श्रीमद्भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

दशमस्कन्धः

(पूर्वार्धः - अनुवृत्तः)

।। अथ षड्विंशोऽध्यायः ।।

श्रीशुक उवाच—

एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ।
स्नातुं नन्दस्तु कालिन्द्या द्वादश्यां जलमाविशत् ।। १ ।।

सत्यधर्मीया — संसारसागरात्कंसारिरहमेवोत्कृष्टानुत्क्रष्टुमीश इति भावमाविष्कुर्वन् जलचरनीतं तातममूमुचत्स्वलोकं चैतदादीनामदर्शयदिति कथयत्यस्मिन्नध्याये । तत्रादौ नन्दः क, क स नीरचरः, कथं नयनमित्यतस्तत्पूर्वरङ्गं सङ्गमयति शुक इत्याह ।। **श्री शुक इत्यादि** । एकादश्यां, निर्गत आहारो यस्य स जनार्दनमभ्यर्च्य द्वादश्यामल्पीयस्यां स्नातुं नन्दः कालिन्द्या यमुनाया जलमाविशत्प्रविवेश । तुः साधनादिसद्भावसूचकः ।। १ ।।

सुमनोरञ्जनी — भक्तवत्सलो भगवान् स्वकीयचरणारविन्दैकशरणान् भवपाशान्मोचयित्वा भक्तिफलत्वेन दास्यमानं स्वलोकं प्रत्याययितुं नन्दस्य वरुणपाशान्मोचनं गोपानां स्वलोकप्रदर्शनं च कृतमित्ययमर्थो निरूप्यतेऽस्मिन्नध्याये । तत्र वरुणपाशबन्धो नन्दस्य कथमभूदित्यतस्तद्वक्तुमुपक्रमते । एकादश्यां निराहारः सन् जनार्दनं श्रीहरिं समभ्यर्च्य द्वादश्यां स्नातुं जलमाविशत् ।। १ ।।

तं गृहीत्वाऽनयद् भृत्यो वरुणस्यासुरोऽन्तिकम् ।
अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ।। २ ।।

सत्यधर्मीया — वरुणस्य भृत्यस्तं नन्दं गृहीत्वा वरुणस्यान्तिकं समीपमनयत् । तत्र तन्त्रमाह ।। **अविज्ञायेति** । वरुणभृत्यः स्वयमविज्ञाय । कलार्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि । आमध्याह्नाः क्रिया सर्वाः कर्तव्याः शम्भुशासनादित्यादिशास्त्रमज्ञात्वा निश्यल्पीयस्यां सत्यामप्यासुरीं वेलां मत्वेति शेषः । अवज्ञायेति पाठेऽसुरवेलामवज्ञायानालक्ष्य प्रविष्टमित्यन्वयः । शास्त्रसम्मत्या तदवज्ञानमिति ज्ञेयम् । यद्वक्ष्यति च वरुणोऽजानता मामकेनेति ।। २ ।।

सुमनोरञ्जनी — वरुणस्येत्येतदुभयत्र सम्बध्यते । वरुणस्य भृत्यः असुरः वरुणस्यांतिकमनयत् । तत्र निमित्तमाह ॥ **अविज्ञायेति ।** आसुरीं वेलां अविज्ञाय । निशि निशीथे उदकं प्रविष्टम् ।

कलार्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि ।
आमध्यान्हाः क्रियाः सर्वाः कर्तव्याः शंभुशासनात् ॥

इति वचनान्निशीथसन्निहितसमये उदकप्रवेशः स्नानार्थं युक्तः ॥ २ ॥

गोपालास्तमपश्यन्तः कृष्ण रामेति चुक्रुशुः ।
भगवांस्तदुपश्रुत्य पितरं वरुणाहृतम् ॥ ३ ॥

सत्यधर्मीया — गोपालास्तं नन्दमपश्यन्तः कृष्ण रामेति चुक्रुशुः । तत्प्रदाननिदानं दानवारिः कृष्ण एवेति तत्पुरस्कृतिः । चुकूजुः । भगवांस्तज्जनकूजनमुपश्रुत्य वरुणाहृतं नेतृनेतृत्वाद्वरुणाहृतमित्युदाहृतं निशम्य ॥ ३ ॥

सुमनोरञ्जनी — भगवान् श्रीकृष्णः । तत् आक्रोशनं उपश्रुत्य । वरुणं प्रति आहृतं नीतं पितरं नन्दं उद्दिश्य ॥ ३ ॥

तदन्तिकं गतो राजन् स्वानामभयदो विभुः ।
प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया ।
महत्या पूजयित्वाऽऽह तद्दर्शनमहोत्सवः ॥ ४ ॥

सत्यधर्मीया — तदन्तिकं वरुणसमीपं गतः स्वानामभयदः । न नास्ति सामर्थ्यमित्याह ॥ **विभुरिति ।** लोकपालो वरुणः । न च वञ्चनरचनमत्र सम्भवीत्याह ॥ **हृषीकेशमिति ।** महत्या सपर्यया तत्साधनेन पूजयित्वा तद्दर्शनमहोत्सव आह ॥ ४ ॥

सुमनोरञ्जनी — तदन्तिकं वरुणान्तिकम् । लोकपालो वरुणः महत्या सपर्यया पूजासाधनेन पूजयित्वा ॥ ४ ॥

वरुण उवाच—

अद्य मे विभृतो देह अद्यार्थोऽधिगतः प्रभो ।
यत्पादभाजो भगवन्नवापुः पारमध्वनः ॥ ५ ॥

सत्यधर्मीया — अद्य मे देहो विभृतः । विधृत इति पाठे स एवार्थः । देहसाफल्यमायातमिति

यावत् । न केवलमेतत्कलेवरमात्रसाफल्यं किन्त्वर्थः शुद्धचिद्देहभोग्यो मोक्षसुखादिरप्यधिगतः एष्यन्नयेन प्राप्तः । यस्य तव पादभाजश्चरणपरिचारका अध्वनः संसृतिसृतेः पारमवापुः ॥ ५ ॥

सुमनोरञ्जनी — अद्य मे विधृतो देह अद्यार्थोऽधिगतः प्रभो ! अद्य, मे मया देहधारणस्य फलरूपपुरुषार्थः त्वत्पादसन्दर्शनलक्षणः अधिगतः प्राप्तः । कुतोऽस्य पुरुषार्थत्वं, यस्य तव पादभाजो जनाः अध्वनः संसाराख्यस्य पारं परतीरं अवापुः । मोक्षसाधनत्वात्पुरुषार्थत्वमिति भावः ॥ ५ ॥

नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ।
न यत्र श्रूयते माया लोकदृष्टिविकल्पना ॥ ६ ॥

सत्यधर्मीया — अतोऽहमपि तत्कूटघटित इति नमति । भगवते ऐश्वर्यादिषड्गुणवते । ब्रह्मणे गुणपूर्णतया तच्छब्दवाच्याय । परमात्मने सकलोत्तमरमास्वामिने । यत्र त्वयि लोकदृष्टिं विकल्पयत्यसमर्थतां नयतीति सा माया प्रकृतिस्तद्बन्ध इति यावत् न श्रूयते । तस्मै तुभ्यं नमः । यद्वा हे नयत्र सकलनीतिरक्षक! त्वयि लोकदृष्टिविकल्पना लोका ज्ञानिनो विध्याद्यास्तेषां दृष्टेर्ज्ञानस्य विकल्पनमेवमिति निर्धारणाभावो यया सा माया महिमा श्रूयत इति वा । माया तु महिमा प्रोक्ता प्राचुर्ये तु मयड्यत इति पाद्म इति तृतीयतात्पर्योक्तेः । भो लोकदृष्टिविकल्प! लोकानां दृष्टिर्ज्ञानं तया विकल्पो युक्तागुणत्वमहत्त्वादिविकल्पो यस्य तत्सम्बुद्धिः । या मा तस्या वा मायाा लक्ष्म्या वा ना परमपुरुष इति पतिरिति यावत् । भवांच्छ्रूयत इंति तुभ्यं नम इति वा । हे नयत्र लोकदृष्टिविकल्पना लोकदृष्ट्या विकल्पनं स्थास्यत्यत्र न वेति यस्याः सा माया तया सह तुभ्यं नम इति वा योजना ॥ ६ ॥

सुमनोरञ्जनी — ब्रह्मणे देशकालगुणैरपरिच्छिन्नाय । यत्र त्वयि । माया प्राकृतम् । लोकदृष्ट्या विविधा कल्पना यया सा ॥ ६ ॥

अजानता मामकेन मूढेनाकार्यवेदिना ।
आनीतोऽयं तव पिता तत् प्रभो क्षन्तुमर्हसि ॥ ७ ॥

गोविन्द नीयतामेष पिता ते मामकाहृतः ।
ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक् ॥ ८ ॥

सत्यधर्मीया — स्तुत्यैव किं पर्यवसानं प्रस्तुतकार्यस्य किमुत्तरमित्यत आह ॥ **अजानतेति ।** अजानता मूढेनाकार्यवेदिनेति भूयो भूयोऽयमज्ञ इति द्योतयितुं पर्यायेण वचनत्रिकमिति ज्ञेयम् । हे अ

अजेनाजया ब्रह्मणा रमया वा नत । अशब्दवाच्य । मामकेन दूतेनावेदिनाऽजानता मया तव पिताऽऽनीत इति यदकारि 'स्वशिष्यदासवर्गकैः समर्थयन्ति भूभुज' इत्यादेस्तत् हे प्रभो क्षन्तुमर्हसि । मामकाहृतस्तव पितैषो नीयताम् । गोविन्देति सम्बोधयन्स्वस्येन्द्रस्थापितैकान्तिकाभिधाबोधोऽस्तीति ध्वनयामास वारीश इति ज्ञेयम् । ते पितेत्यनेन लोकपितुस्तवाप्येकः पिता किमापणश्रेणीमिलित इति ममापि नन्दानयनं सम्मतमन्तरङ्ग इति तव पिता पिता त इति पुनः पुनरुच्चरन्सरिदुच्चोपाह-सद्धरिपितृत्वं नन्दस्येति तात्पर्यं ध्येयम् । एष इत्यनेन न चाङ्गभङ्गोऽस्येति ध्वनयति ॥ ७,८ ॥

सुमनोरञ्जनी — मूढत्वमेव व्यनक्ति ॥ **अकार्येति** । अकार्यवेदिनाऽकार्यं कार्यत्वेन वेत्तीति तथोक्तः । तेन मामकेन मद्भृत्येन । तत् त्वत्पित्रानयनरूपमपराधम् ॥ ७,८ ॥

श्रीशुक उवाच—

एवं प्रसादितः कृष्णो भगवानखिलेश्वरः ।
आदायागात् स्वपितरं बन्धूनां चावहन्मुदम् ॥ ९ ॥

सत्यधर्मीया — प्रसादितो वरुणेन, बन्धूनां मुदमावहन्सन्स्वपितरमादायागात् । कीदृशीं गो-शालां प्रत्यतोऽप्याह । बन्धुना नन्दरूपेणोना न्यूना तां प्रतीति । मुदं च बन्धूनामावहन्निति वा ॥९॥

सुमनोरञ्जनी — मुदम् आवहन् कुर्वन् ॥ ९ ॥

नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयम् ।
कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥ १० ॥

सत्यधर्मीया — अतीन्द्रियं साधारणमानवागोचरं लोकपालस्य वरुणस्य यो महानुदयस्तम् । नन्दस्तेषां वरुणादीनां कृष्णे सन्नतिं प्रवणतां च दृष्ट्वा ज्ञातिभ्यो ग्रामगतगोपेभ्यो विस्मितः सन्नब्रवीत् ॥ १० ॥

सुमनोरञ्जनी — अतीन्द्रियं मानुषेन्द्रियाविषयम् । अदृष्टपूर्वं वा । लोकपालस्य वरुणस्य महोदयं महैश्वर्यम् । कृष्णे कृष्णविषये सन्नतिं नम्रतां च दृष्ट्वा ॥ १० ॥

ते त्वौत्सुक्यधियो राजन् मत्वा गोपास्त्वधीश्वरम् ।
अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ ११ ॥

सत्यधर्मीया — नन्दस्तन्नन्दनमहिमानमाकलय्य गोपा एवं स्वमनसि दध्युरित्याह ॥ **ते त्विति** ।

औत्सुक्येन सहिता धीर्येषाम् । प्रोक्तोऽपि विशेषतोऽशेषाणां भक्तिरुदभूदिति विशेषद्योतकस्तुः । त्वौत्सुक्यधिय इति पदमेकम् । बह्वौत्सुक्यसहितचेतस्काः प्राक् । इदानीं च त्वं स्वानुभूतविलक्षण-मन्यदौत्सुक्यं यस्यां सा त्वौत्सुक्या सा च धीर्येषां त इति वा । अन्यथा तोरेकस्यातिरेकः स्यात्स्याच्चान्वयः क्लेशेन । अधीश्वरं त्वधीश्वरमेव मत्वा ज्ञात्वा नोऽस्माकमधीश्वरो यद्यन्वग्रहिष्यत्तर्हि सूक्ष्मां स्वगतिं वैकुण्ठाख्यामुपाधास्यत् । दर्शयामासेत्युत्तरस्वारस्याददर्शयिष्यत् । लृङ् ।। ११ ।।

सुमनोरञ्जनी — औत्सुक्येन युक्ता धीर्येषां ते तथाविधा आसन् । कस्मिन्विषये औत्सुक्यं तेषामित्यतस्तत्सूचयति । अधीश्वरः सूक्ष्मां परैरज्ञेयां स्वगतिं स्वलोकं नः उपाधास्यंदपि प्रायशोऽस्मान्प्रापयिष्यतीति ।। ११ ।।

इति स्वानां स भगवान् विज्ञायाखिलदृक् स्वयम् ।
सङ्कल्पसिद्धये तेषां कृपयेदमचिन्तयत् ।। १२ ।।

सत्यधर्मीया — स्वानां ज्ञातीनां गोपानामिति चिन्तितं, स च भगवान्विज्ञाय तत्सम्भावकं स्वयमखिलदृक् अखिलं पश्यतीति तदखिलदृक् । तं न रमादिवदन्याधीनमिति स्वयमित्यनेन सूचयति । तेषां गोपानां सङ्कल्पसिद्धये सङ्कल्पितसिद्ध्यर्थं कृपयेदमचिन्तयत् ।। १२ ।।

सुमनोरञ्जनी — स्वानां स्वेषां स्वज्ञातीनाम् । इति इममभिप्रायं विज्ञाय तेषां संकल्पसिद्धये इदं वक्ष्यमाणम् ।। १२ ।।

जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः ।
उच्चावचासु गतिषु न वेद स्वगतिं भ्रमन् ।। १३ ।।

सत्यधर्मीया — इदमित्युक्तमिदमिति वदति ।। जन इति । एतस्मिंल्लोकेऽविद्याकामकर्म-भिस्तदादिभिरुच्चावचासु गतिष्वनेकभेदकगतिषु । उदक् चावाक् चेति द्वयोरुच्चावचेत्यादेशौ । मयूर-व्यंसकादिरिति साधुः । उच्चावचं नैकभेदमित्यमरः । भ्रमन्स्वगतिं न वेद स्वप्राप्यं न वेद ।। १३ ।।

सुमनोरञ्जनी — एतस्मिन् लोके अविद्याकामकर्मादिभिः । उच्चावचासु उत्कृष्टापकृष्टासु । गतिषु योनिषु भ्रमन् । स्वां स्वकीयां गतिं, गम्यत इति गतिस्तां स्वप्राप्यं परब्रह्मरूपं वस्तु न विदुः ।।१३।।

इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः ।
दर्शयामास लोकं स्वं गोपानां तमसः परम् ।। १४ ।।

सत्यधर्मीया — एवं स्वयं सञ्चिन्त्य महाकारुणिक इति कृपया गोपानां, तमसः प्रकृतेः परं विलक्षणमप्राकृतं स्वलोकं वैकुण्ठं दर्शयामास । अयमप्येको गोपालश्चेत्कथमेतादृशं सामर्थ्यमित्यप्याह ॥ आस इति । लोक इत्यादि(?) तं परं दर्शयामासेत्यन्वयः ॥ १४ ॥

सुमनोरञ्जनी — इति सञ्चिन्त्य गोपानां गोपान्प्रति स्वं लोकं वैकुण्ठाख्यं तमसः प्रकृतेः परं विलक्षणम् । अप्राकृतमिति यावत् । दर्शयामास । तत्र निमित्तं महाकारुणिक इति ॥ १४ ॥

सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनम् ।
यद् हि पश्यन्ति मुनयो गुणापाये समाहितम् ॥ १५ ॥

सत्यधर्मीया — गोपा ब्रह्मणो लोकं ददृशुः । तच्च कृष्णादनन्यदित्याह ॥ सत्यमिति । सकलसद्भावप्रापकमबाधितमिति वा । ज्ञानं संविदात्मकमनन्तमन्तत्रयशून्यं नित्यमबद्धं वा ब्रह्म गुणपरिपूर्णं ज्योतिः प्रकाशरूपम् । ज्योतिर्जातं जगदूतिरूपं यस्मिंस्तदिति वा । सनातनं पुराणं वेदवेद्यं वा गतम् । सत्यं ज्ञानमनन्तं ब्रह्म । परं ज्योतिः शाश्वतोऽयं पुराण इत्यादेः । यत्सर्वत्र यातीति व्याप्तमिति यत् । बाह्ये यथा तथाऽन्तरपीति यद्वा । यथोक्तं बृहद्भाष्ये । यथा बाह्ये तथैवान्तस्ततो यदिति चोच्यत इति । ततत्वादन्यथाज्ञानं तीत्येव समुदीर्यते । तस्याधस्तात्सदात्मा तु सादयन्ननृतं हरिः । उपरिष्टाच्च यन्नामा ह्यनृतं नाशयन्स्थित इति बृहद्भाष्यात्सत्यशब्दार्थो ज्ञेयः । भावेऽप्यभावे सूर्यादिर्जीवानां विष्णुरेव हि । ज्योतिस्तथाऽप्यभावे तु तज्ज्ञेयं हि विशेषत इति बृहद्भाष्याज्ज्योतिरर्थोऽनुसन्धेयः । गुणापाये गुणनिवृत्तावावरणापसरण इति यावत् यन्मुनयः गतम् । न दूरे तदित्याह । समाहितं हृदयगुहानिहितं पश्यन्ति । हीतीदं ज्योतिर्हृदय आहितं यदिति । तथा हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुरित्यादिमानान्यत्र भवन्तीति सूचयति ॥ १५ ॥

सुमनोरञ्जनी — कीदृशं लोकमित्यतस्तद्विशिनष्टि ॥ यत् यत्र ब्रह्मज्योतिः ब्रह्माख्यं स्वप्रकाशं वस्तु । समाहितं सम्यक् सन्निहितं तमिति । कीदृशं ब्रह्म । सत्यं जगत्सृष्टृत्वादिसाधुगुणं, ज्ञानं ज्ञानरूपं जानातीति वा । सर्वज्ञमित्यर्थः । मुनयो ज्ञानिनः गुणापाये सत्वादिगुणापाये सत्वादि गुणात्मकदेहेऽपगमे सति यत्पश्यन्ति तथाविधमित्यर्तः ॥ १५ ॥

ते तु ब्रह्महृदान्नीता मग्नाः कृष्णमचक्षत ।
ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरा ॥ १६ ॥

सत्यधर्मीया — कथं तं लोकं ददृशुरित्यत आह ॥ त इति । ते गोपा नीताः कृष्णेन स्वस्थलाद्ब्रह्मह्रदात्तं प्राप्य तत्र मग्ना आदौ सत्यादिपदवाच्यब्रह्माभिन्नं कृष्णमचक्षतापश्यन् । अनन्तरं ब्रह्मणः कृष्णस्य लोकं ददृशुः । पुरा यत्र ब्रह्मह्रदः कृष्णमध्यगात् । कथायाः प्राक्तनत्वाद्ग्रथनस्य शुकपरीक्षित्संवादेनानन्तरिकत्वात्पुरेति सम्भवतीत्येके । चक्रवद्वर्तमानत्वाद्भूतपूर्वगत्येत्यपरे । यत्र ते गोपा ददृशुस्तत्राक्रूरः श्वफल्कजः पुरोत्तरत्र । अध्यगादधिगमिष्यति । अतिनिश्चितत्वाल्लङुपपद्यते । यथोक्तमेतायामोपगव्यन्तमित्यृग्भाष्यटीकयोः । अतिनिश्चितेऽर्थे भूतशब्दश्चेत्याह सूत्रं परेशः । नन्वयामेति कोऽयं शब्दः । यातेर्लङि रूपमेतत् । लङ् भूते वर्तते । न चात्र तत्सम्भवतीत्यत आह ॥ अतीति । अतिनिश्चितेऽपि धात्वर्थे भूतत्ववाची शब्दः प्रयोक्तव्य इत्यस्यार्थस्य प्रतिपादकं सूत्रमाहेत्यर्थः । अन्यत्र एष्यत्तु निश्चितं यत्तदतीतत्वेन भण्यत इतीति । पुरा पुराणे निकटे प्रबन्धातीतिभविष्यतीति विश्वः । तत्र स्नापयित्वा दिव्यं चक्षुश्च दत्वाऽनन्तरं स्वं दर्शयित्वा तद्योग्यतां वितार्य ब्रह्मणः स्वस्य लोकं दर्शयामास तान्प्रतीति भावोऽवसेयः । ब्रह्मह्रदं नीता इति पाठस्तु स्फुटार्थो युक्तश्चेति । तुर्विशेषद्योतकः ॥ १६ ॥

सुमनोरञ्जनी — ननु गोपाः किमत्रैव व्रजे स्थिताः सन्तो ब्रह्मलोकं ददृशुः? नेत्यर्थः । ते तु नन्दादयो गोपाः ब्रह्मह्रदं तन्नामकं यमुनायां विद्यमानं ह्रदं नीताः प्रापिताः सन्तस्तत्र मग्नाः तदैव ब्रह्मणो लोकं ददृशुः । तत्र स्थितं कृष्णं अचक्षत ददृशुः । यत्र ब्रह्मह्रदे पुरा पूर्वस्मिन् ब्रह्मकल्पेऽक्रूरः कृष्णाख्यं ब्रह्माध्यगात् प्रत्यक्षीचकार तद्ब्रह्मह्रदमिति पूर्वेणान्वयः । अनेन ब्रह्मह्रदसंज्ञाया निमित्तमुक्तं भवति ॥ १६ ॥

नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः ।
कृष्णं च तत्र छन्दोभिः स्तूयमानं सुविस्मिताः ॥ १७ ॥

इति श्रीमद्भागवते दशमस्कन्धे षड्विंशोऽध्यायः ॥

सत्यधर्मीया — नन्दादयो गोपाः । तुशब्दस्तद्दर्शनतरतमभावो योग्यतातारतम्येनेति विशेषसूचकः । तं लोकं दृष्ट्वा तत्र छन्दोभिर्वेदैः स्तूयमानं कृष्णं च दृष्ट्वा सुविस्मिताः सन्तः परमानन्दनिर्वृताः केचन परमानन्दाश्च केचन निर्वृता आनन्दिनश्चाभवन्नित्यन्वयो ज्ञेयः । यः(?) परं स्वान्यज्जगद्दर्शनं कृत्वोपर्यागमनात्परमानन्दाः पुनर्मायया बन्धनं कृष्णं दृष्ट्वा निर्वृताः सुखिता विस्मिताश्च बभूवुरिति शेषः । परमानन्देन निर्वृता निभृताः । परमानन्दो नितरां वृतो यैरिति वा ॥ १७ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे षड्विंशोऽध्यायः ॥ १०-२६ ॥

सुमनोरञ्जनी — नन्दादयो गोपा अपि तं वैकुण्ठलोकं, तत्र छन्दोभिः वेदैः स्तूयमानं कृष्णं च दृष्ट्वा सुविस्मिताः, परमानन्देन निर्वृताः तृप्ताः आसन् ॥ १७ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां षड्विंशोऽध्यायः ॥ १०-२६ ॥

॥ अथ सप्तविंशोऽध्यायः ॥

श्रीशुक उवाच—

भगवानपि तां रात्रिं शारदोत्फुल्लमल्लिकाम् ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

सत्यधर्मीया — भक्तिरेव ज्ञानद्वारा मोक्षसाधनं सा चानेकविधेति निरूप्यतेऽस्मिन्नध्याये । तत्रादौ याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति स्वोक्तं किं भगवान्विसस्मार याश्च यदर्थमत्यर्थं तपश्चेरुस्ताः कथं तूष्णीकाः किं वा तदुपरि रात्रिरेवाधुना नायाताऽथवा किञ्चित्तद्दुर्दैवयोगेनान्तरायाति निपात इति सन्दिग्धबुद्धिं परीक्षितं परीक्ष्य स्वयमेव शुको दयया वक्तीति वक्ति ॥ **श्रीशुक इति ।** भगवानपि गोपोपदर्शितस्वस्वलोकः कृष्णोऽपि । शरदृतोः सम्बन्धी कालः शारदस्तेनोत्फुल्ला विकसिता मल्लिका यस्यां सा ताम् । प्रमदाः प्रति प्रतिज्ञातक्षपासु प्राथमिकीं रात्रिं वीक्ष्य रन्तुं ताभिः सह मनश्चक्रे । सकलधर्मशास्त्रवेत्तुः परकलत्रसंसर्गस्तु न मन्मथमथितचेतस्कत्वेन किन्तु तत्तपो-वैपुल्यफलतयेति सूचयितुं स्वयं मनश्चक्र इति । सम्भावकमावेदयति ॥ **योगमायामुपाश्रित इति ।** युज्यतेऽनेनेति योगो हरिरिति पञ्चमतात्पर्योक्तेर्योगः स्वयं तदात्मिका मायेच्छा ताम् । योगो निरन्तरमस्या अस्तीति योगा सा च सा माया चित्प्रकृतिस्तामुपाश्रितः सकलपरकलत्रसन्निहिता रमा तयैव सङ्गो न पुनरन्याङ्गनासङ्ग इति भावः ॥ १ ॥

सुमनोरञ्जनी — यया कयाचन रीत्या श्रीहरिचरणारविन्दे भक्तिरेव मुक्तिसाधनमिति प्रदर्शनाय कामाद्द्वेष्यो भयात्कंस इति सप्तमोक्तं प्रपञ्चयन् कामपूर्वकभक्तिप्रकारं व्यनक्त्यस्मिन्नध्याये । तत्रादौ भगवान् 'मयेमाः रंस्यथ क्षपाः' इति गोपीभ्यः प्रतिश्रुतं सत्यं विधातुं रन्तुं मनश्चक्र इत्याह ॥ भगवानपीति । शारदेन शरदृतुसम्बन्धिना कालेन उत्फुल्ला विकसिता मल्लिका यस्यां सेति पदरत्नावली । ननु स्वरमणोऽप्राकृतविग्रहो भगवान् गोपिकासु रंतुं मनश्चक्र इति कथं सम्भवति । तासां भगवद्रतिपात्रताया असंभवादित्यत उक्तम् ॥ योगमायामुपाश्रित इति । योगमायां महालक्ष्मीं गोपिकासु सन्निहितां तत्रापि स्थितां योगमायां स्वस्त्रीरूपं उपाश्रितः सन् रतियोग्यतयाङ्गी-कुर्वन्नित्यर्थः । रमाया रतिपात्रत्वं तेनैव स्त्रियात्मनेत्युक्तेः ॥ १ ॥

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणैश्च शन्तमैः ।
स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥

सत्यधर्मीया —— प्रियः प्रोषित इति दीर्घदर्शनो दीर्घं बहुघस्रव्यवहितत्वाद्दीर्घकालिकमन्यत्राह-र्व्यवधानाद्दीर्घदर्शनः प्रियायाः स्वभार्याया अन्यत्र तत्त्वेन वृत्ताया ककुभो दिशः प्राच्या मुखमानन-मन्यत्र यत्रोदयस्तं भागमरुणैः किञ्चिद्रक्तैः पल्लवसमतया करैः । आदरातिशयाद्द्वयोरेव बहुत्वेने-त्प्रेक्षणम् । करैरङ्गुलिभिरिति वा रज्जुपाशानितिवत् । अन्यत्र किरणैः । शन्तमैः सुखकरेषु करेष्वति-शयेन सुखरूपतोक्तिः । सममुभयत्रेदम् । तदोडुराजः पुरुषोऽपरत्र चन्द्रश्चर्षणीनां प्रजाश्चर्षणयः स्मृता इत्यृग्भाष्योक्तेः प्रजानामपत्यादिप्रजानामन्यत्र सोमो वै राजा ब्राह्मणानामित्यादेर्ब्राह्मणादीनां शुचः किञ्चिद्गृहकलहहेतुकशोकानन्यत्र तपनतापजनितशोकान्मृजन्परिहरन्समम् । प्रसिद्धो यः प्रियः स इवोदगात् । कस्मादित्यतोऽप्याह ॥ उदगादिति । उच्चोऽगो ह्युदग उदयशैलस्तस्मात्तमारुह्येति वा । दिशस्तु ककुभः काष्ठा इत्यमरः । ककलौल्ये बाहुलकादुभप्रत्ययः । यद्वा कं वातं कुभ्नाति विस्तार-यति । स्कुभ् इति सौत्रो धातुः । ततः क्विप् पृषोदरादित्वात्सलोपः । ककुभः स्त्रियां प्रवेणी दिक्-शोभास्विति भानुः । दिशादान्तिककुबिति शब्दार्णवः । विलिम्पन्मृजंश्चोद्गच्छति तथोदगादित्यन्वयः ॥ २ ॥

सुमनोरञ्जनी —— तदा उडुराजः चन्द्रः प्राच्याः ककुभो मुखं प्राचीदिङ्मुखं शन्तमैः सुखकरैः अरुणैः करैः किरणैः विलिंपन् स्वकरगतारुणिमानं तत्र लिंपन्निव चर्षणीनां प्रजानां सस्यानां वा शुचः दिवा सौरातपजन्याः शुचः प्रमृजन् परिमार्जयन् उदगात् । तत्र निदर्शनं, दीर्घात्कालाद्दर्शनं यस्य सः दीर्घदर्शनः प्रियो भर्ता शुचः प्रमृजन् शन्तमेन अरुणेन स्वकरेण प्रियायाः मुखं विलिंपति । चर्षणीनां प्रजानाम् अपत्यानां च शुचः प्रमृजति तथेति ॥ २ ॥

दृष्ट्वा मुकुन्दस्तमखण्डमण्डलं रामाननाभं नवकुङ्कुमारुणम् ।
वनं च तत्कोमलगोभिरञ्जितं जगौ कलं वामदृशां मनोरमम् ॥ ३ ॥

सत्यधर्मीया —— य उदगात्तमुडुराजं मुकुन्दो दृष्ट्वा । कुमुद्वन्तमिति पाठे कुमुदशब्दपर्यायोऽयं कुमुच्छब्दः । कुमुत्कुमुदं विकास्यत्वेनास्त्यस्येति कुमुद्वांस्तम् । अखण्डो मण्डलो यस्य तम् । अनेन पौर्णमासीति वा तदासन्नतिथिर्वेति ध्वन्यते । रामाननाभं रामस्य स्वाग्रजस्याननस्याभेवाभा यस्य स तम् । पाठः पाङ्क्तश्चेदपि नार्थोऽयं सरलः । अप्रकृतत्वात् । नवकुङ्कुमारुणमित्यनानुगुण्याच्च । गोपाला अपि धरन्ति ललाटे कुङ्कुमतिलकमित्यतोऽप्रकृतत्वं सुस्थिरम् । रामाणां स्वरमणयोग्य-रमणीनामाननाभमिति श्लिष्टोऽर्थः । रमाननाभमिति मनोरमः पाठः । नवकुङ्कुमारुणं नव इति

उद्यन्निति, कुङ्कुमवदरुणस्तम् । अन्यत्र नवेन कुङ्कुमेनारुणमिति । तत्कोमलगोभिरञ्जितमिति पद-मेकम् । तस्य चन्द्रमसः, कोमलं च तद्गोभिः किरणैरभिरञ्जितं विशदीकृतं प्रकाशितमिति यावत् । रञ्जितं विशदे दन्तिदन्तयोस्तारहारयोरिति विश्वः । कोमलं च तद्गोभिरञ्जितं चेति विग्रहः । गोभिर-भिरञ्जितं गोभिरञ्जितम् । तस्य कोमलैर्गोभिरञ्जितं तत्कोमलगोभिरञ्जितमिति वा विग्रहः । द्वितीये रञ्जितपदसमस्तेऽपि गोपदे तदर्थे तादात्म्यसम्बन्धेन कोमलपदार्थान्वयः । सप्तघटिकाभोजनं त्रिलोकनाथ इत्यादिवदिति नापूर्वः । पक्षद्वन्द्वेऽपि, न च टकृ च कथं कथञ्चन रोरीत्याद्यप्रवृत्तिरिति शङ्काद्वन्द्वं नास्तीत्यप्रतिद्वन्द्वमिति मन्तव्यम् । तादृशं वनं च दृष्ट्वा वामदृशां वामाः सुन्दराः दृशश्चक्षूंषि यासां तास्तासां मनोहरं कलमव्यक्तमधुरं च यथा तथा जगावगायत् ।। ३ ।।

सुमनोरञ्जनी — मुक्तिं ददातीति मुकुन्दः श्रीकृष्णः । अखण्डमण्डलं पूर्णमण्डलम् । कीदृशं, रामस्य बलरामस्याननस्याभेवाभा यस्य सः तम् । यद्वक्ष्यति बदरपाण्डुवदन इति । यद्वा नव-कुंकुमारुणमिति विशेषणबलात् रामायाः अरुणप्रभायाः स्त्रियः आननमिव रमणीयं नव-कुंकुम-पुष्पवदरुणं च दृष्ट्वा । तस्य चन्द्रस्य कोमलैः नूतनैः गोभिः किरणैः अभिरंजितम् । अत एव वाम-दृशां स्त्रीणां मनोहरं वनं च दृष्ट्वा । यद्वा वामदृशां मनोहरं कलं मधुरं स्वरं जगौ इत्यन्वयः ।। ३ ।।

निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णनिषक्तमानसाः ।
आजग्मुरन्योन्यमलक्षिताशयाः स यत्र कार्तस्वरलोलकुण्डलाः ।। ४ ।।

सत्यधर्मीया — सद्वंशजेति साध्वीव मुरली मुरहराधरसङ्गता स्वयं करकलिताऽप्यनिर्वाहपक्षे स्वस्वाम्यभिमतमियद्वा कर्तव्यमिति मती युवतीसमाह्वानतत्सङ्गमसाहितीमात्रं व्यतनोदिति ध्वनयन्नाह ।। निशम्येति । कृष्णनिषक्तमानसा व्रजस्त्रियोऽन्योन्यं परस्परमलक्षितोऽविज्ञात आशयोऽन्तःकरण-मभिप्रायो वा यासां तास्तदपेक्षयाऽहमेव प्राग्गत्वा तदङ्गसङ्गसौभाग्यभाग्या भवेयमिति परानव-गमितवृत्ता इति यावत् । कार्तस्वरलोलकुण्डलाः कृतस्वराख्याकरजसुवर्णमयानि लोलानि चलन्ति कुण्डलानि कर्णविष्टनानि हस्ते वलया वा यासां ताः । कुण्डलं वलये पाशे कुण्डलं कर्णविष्टन इति विश्वः । यत्र स गायनोऽनङ्गवर्धनं हरिसङ्गात्प्राङ्गन्मथोत्थापकत्वेनानन्तरं कन्दर्पदर्पच्छेदकत्वेनापीति तद्गीतं निशम्यास्ते तत्स्थलं प्रत्याजग्मुः । वर्धनं छेदने वृद्धाविति विश्वः । यथोक्तं बृहदारण्यकभाष्ये ।

मयं तु मानुषं स्वर्णं पीतं गान्धर्वमेव च ।
इन्द्रगोपनिभं नाम्ना जाम्बूनदमिति स्मृतम् ।
दैवं चामीकरं नाम प्रोद्यदादित्यसन्निभम् ।
नैजो विशेषः स्वर्णानामेतेषां सर्वदैव च ।

नाग्न्यादिनाऽपि समतां यान्ति तानि कथञ्चनेति । अतः कार्तस्वरमिति सामान्यनामेति ज्ञेयम् ।। ४ ।।

सुमनोरञ्जनी — अनंगवर्धनं मन्मथोद्रेककरं तद्गीतं निशम्य । कृष्णे निषक्तं समर्पितं मानसं याभिस्ताः व्रजस्त्रियः, अन्योन्यं, अलक्षितः न ज्ञापितः अज्ञातो वा आशयः अभिप्रायो यासां ताः तथाविधाः सत्यः, सः कृष्णो यत्रास्ते तत्राजग्मुः । कीदृश्यः । कार्तस्वरेण सुवर्णेन रचितानि लोलानि च कुण्डलानि यासां ताः ॥ ४ ॥

दुहन्त्योऽभिययुः काश्चिद् दोहं हित्वा समुत्सुकाः ।
पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥

सत्यधर्मीया — तासां गीतश्रवणसमनन्तरं काऽवस्था जातेत्यत आह ॥ दुहन्त्य इति । गाः काश्चिद्दुहन्त्यो दोहनं हित्वा समुत्सुका लालसा अभिययुः । दुहन्त्योऽभिययुरित्यनेनैव दोहनयानाभियानप्रतीतौ दोहमेव हित्वा काश्चिदभिययुस्तत्समयेऽपीत्यधिकारिविशेषपरतया तत्सार्थक्यं ज्ञेयम् । अपराः पयोऽधिश्रित्य पक्कं कृत्वा संयावं च गोधूमकणिकान्नमधिश्रित्यानुद्वास्य चुल्लीतस्तत्पात्रमनवतार्य ययुः ॥ ५ ॥

सुमनोरञ्जनी — श्रीकृष्णे गोपीनां स्नेहविशेषरूपभक्तेः परां काष्ठां द्योतयन् तासां तदानींतनावस्थामाह ॥ दुहन्त्य इत्यादिना । समुत्सुकाः श्रीकृष्णदर्शने औत्सुक्योपेताः । काश्चित् दुहन्त्यः दोहनं कुर्वन्त्यः । दोहं दोहनक्रियाम् । अपराः पयः अधिश्रित्य चुल्यामारोप्य तत् अनुद्वास्यैव । संयावं क्वथदन्नं अनुद्वास्य अनवरोप्य ॥ ५ ॥

परिवेषयन्त्यस्तद् हित्वा पाययन्त्यः शिशून् पयः ।
शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥

सत्यधर्मीया — काश्चित्परिवेषयन्त्योऽन्नादिपरिवेषणं पात्रे कुर्वन्त्यश्छन्दःसमत्वान्नैकाक्षराधिक्यं दोषाय । तत्परिवेषणम् । शिशून्मातृभ्रात्रादिबालान्पाययन्त्यो गोक्षीरमलमपास्य । स्पृहात्यागोऽनेन ध्वन्यते । पतीन् शुश्रूषन्त्यः शुश्रूषमाणाः सेवामपास्य काश्चित्स्वयमश्नन्त्यो भोजनं चापास्य ययुः ॥ ६ ॥

सुमनोरञ्जनी — परिवेषयन्त्यः पतिपुत्रादीनां भोजनपात्रेषु भोज्यमन्नादिकं परिवेषयन्त्योऽपि तत्परिवेषणं हित्वा शिशून् स्तन्यं पाययन्त्यः तद्धित्वेत्यनुवर्तते । यद्वा शिशून् मार्गे पाययन्त्यः शिशुत्यागमपि विस्मृत्येति यावत् । पतीन् पादसंवहनादिना शुश्रूषंत्यः । अश्नन्त्यो भुञ्जन्त्यः । अपास्य निरस्य ॥ ६ ॥

लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने ।
व्यत्यस्तवस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः ॥ ७ ॥

सत्यधर्मीया — लिम्पन्त्यो गन्धादिभिरङ्गं वा गोमयेन गृहं वा । प्रमृजन्त्यः शरीरशुद्धिं कुर्वन्त्यः । काश्च लोचने अञ्जन्त्यः कज्जलेन । अन्याः काश्चिद्व्यत्यस्तवस्त्राभरणा व्यत्यस्तानि वस्त्राणि परिधानीयमौत्तरीयमौत्तरीयं परिधानीयमिति वस्त्राणि, तथा करभूषणं पादे पादभूषणं कर इत्याभरणानि च यासां ताः कृष्णान्तिकं ययुः ॥ ७ ॥

सुमनोरञ्जनी — लिंपन्त्यः स्वांगे पतीनामङ्गेषु वा चन्दनादिकं लिंपन्त्यः । अङ्गोद्वर्तनं कुर्वन्त्यः । लोचने नेत्रे मष्यादिना अंजन्त्यः तदर्धावशेषितं अपास्यैव ययुः । व्यत्यस्तानि स्वस्थानतः विपरीतानि वस्त्राभरणानि यासां ताः । प्रावरणं परिधाय्य परिधानीयं प्रावृत्य, कटिसूत्रादिकं कण्ठे, हारादिकं कट्यादौ धृत्वेति यावत् ॥ ७ ॥

ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबन्धुभिः ।
गोविन्दापहृतात्मानो न न्यवर्तन्त योषितः ॥ ८ ॥

सत्यधर्मीया — पतिभिः स्वभर्तृभिः पितृभिर्भ्रातृभिर्बन्धुभिर्भगिनीभिर्भर्त्रादिभिर्वार्यमाणा न गच्छेति निवार्यमाणाः । योषित ई आ नित्यमुषितोरसि यस्य स योषितस्तद्गोविन्दहृतात्मानो गोविन्देन कृष्णेन हृत आत्मा मनो यासां ता न न्यवर्तन्त । यत्र रमा मोहिता चञ्चलाऽपि चाञ्चल्यं विहाय तत्रैतद्गमनं न चित्रमिति भावः । हे गोविन्देति । अपहृता आत्मानः, अपेन पालकवर्जितेन हृतात्मानो योषितो न न्यवर्तन्तेति वा । लोके चैकैकस्मिन्पतित्वादिकमत्र तु तत्समुदितमिति तत्त्यागेनागमनमङ्गनानां युक्तमिति तात्पर्यम् ॥ ८ ॥

सुमनोरञ्जनी — अन्तरायसहस्रेणाप्यप्रतिबद्धता स्नेहस्याह ॥ ता इति । ताः पत्यादिभिर्वार्यमाणा अपि गोविन्देन अपहृताः आकृष्टाः आत्मानो मनांसि यासां ताः यतस्तस्मान्न न्यवर्तन्त ॥ ८ ॥

अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥

सत्यधर्मीया — काश्चिदन्तर्गेहगता गोप्यो, द्वारि प्रतिबद्धेऽलब्धोऽप्राप्तो बहिर्निर्गमो निःसरणं याभिस्ताः । तद्भावनायुक्ता अनुभवभवसंस्कारोपेता मीलितलोचना नश्यत्स्वपत्याद्यनिरीक्षणं सूच्यते । तेन दध्युर्ध्यातवत्यः ॥ ९ ॥

सुमनोरञ्जनी — अन्तर्गृहगताः काश्चित् गोप्योऽलब्धो विनिर्गमो बहिर्गमनं याभिस्ताः । तस्मिन्कृष्णे या भावना भक्तिः तया युक्ताः । मीलितलोचनाः सत्यस्तमेव दध्युः ध्यातवत्यः ॥ ९ ॥

दुस्सहप्रेष्ठविरहतीव्रतापधुताशुभाः ।
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ १० ॥
तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

तात्पर्यम् – 'कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः । सम्यक्कृष्णं परं ब्रह्म ज्ञात्वा कालात्परं ययुः । पूर्वं च ज्ञानसंयुक्तास्तत्रापि प्रायशस्तथा । अतस्तासां परं ब्रह्म गतिरासीन्न कामतः । न तु ज्ञानमृते मोक्षो नान्यः पन्थेति हि श्रुतिः । कामयुक्ता तदा भक्तिर्ज्ञानं चातो विमुक्तिगाः । अतो मोक्षेऽपि तासां च कामो भक्त्याऽनुवर्तते । (अतादृक्त्वेन) अतोदकत्वेन सदा द्वेषिणामधरं तमः । मुक्तिशब्दोदितं चैद्यप्रभृतौ द्वेषभागिनः । भक्तिभागी पृथङ्मुक्तिमगाद्विष्णु-प्रसादतः । कामस्त्वशुभकृच्चापि भक्त्या विष्णोः प्रसादकृत् । द्वेषिजीवयुतं चापि भक्तं विष्णु-र्विमोचयेत् । अहोऽतिकरुणा विष्णोः शिशुपालस्य मोक्षणादि'ति स्कान्दे ॥ जगत्प्रपितामहे जारबुद्धिर्न युक्ता तथापि ॥ १०, ११ ॥

सत्यधर्मीया — श्लोकद्विकमेकान्वयि । तमेव परमात्मानमिति श्लोके कामिन्यः काममात्रेण प्रक्षीणबन्धनाः सत्यः सद्यो गुणमयं देहं जहुरिति मुक्तिरुच्यत इति भ्रमं प्रमाणतस्तत्तात्पर्यार्थं दर्शयन्भ्रंशयति ॥ कृष्णकामा इति । कृष्णकामा गोप्यस्तदा त्यक्त्वा देहं दिवं स्वर्गं गता न तु मुक्ता आसन्नित्यर्थः । सम्यग्विष्णुं परं ब्रह्म सर्वोत्तमं ज्ञात्वा कालात्कश्चित्कालमतिगमय्य परं हरिं ययुः । तर्हि न ताः पूर्वं ज्ञानवत्य इत्यत आह ॥ पूर्वं चेति । पूर्वमपि ता ज्ञानयुक्ता एव । तत्र कृष्ण-कामतावस्थायां च प्रायशो बाहुल्येन तथा ज्ञानिन्यः । निगमयति ॥ अत इति । अत एतद्धेतोस्तासां परंब्रह्म गतिरासीत् । ननु कामाद्गोप्य इत्यादेर्न देवगतिस्तासां कुत इत्यत आह ॥ नेति । ज्ञानमृते । ज्ञानसूर्यमृते इत्याद्युदाहृत्य द्वितीयोपपत्तिः प्राक् टीकिताऽनुसन्धेया । विना न मोक्षः । स्मृतिरपि स्वमूलं लपति । हि यस्मान्नान्यः पन्थेति श्रुतिरस्ति तत इति । पन्थेति नलोपः प्रातिपदिकान्तस्येति-वत्प्रातिपदिकनिर्देश इति ज्ञेयम् । सदा तासु हरौ भक्तिस्तज्ज्ञानं चास्ति यतोऽतः कामयुक्ता अपि विमुक्तिगाः । अतो मोक्षेऽपि तद्गमनानन्तरमप्येतासां यः कामः स भक्त्याऽनुवर्तत एव । पुरस्ता-दुक्तमेतत्त इति श्लोके द्वेषस्य मुक्तिहेतुतोच्यत इति प्रतीयते । तस्यापि गतिं मानेनाह ॥ अतादृक्त्वेन भक्तिराहित्यान्न गोपीसादृश्यमित्यतादृक्त्वेन । अतोदकत्वेनेति पाठे कामो मुक्तावन्यथाजनकत्वेनानु-वर्तत इत्यन्वयः । सदा द्वेषिणां जयादिभिन्नानामसुराणां यत्र मुक्त्युक्तिस्तत्र मुक्तिशब्देन तम एवोच्यत इत्याह ॥ अधरन्तम इति । मुक्तिशब्देनोदितम् । चैद्यप्रभृतौ द्वेषभागिनः सकाशात्पृथ-

ग्विद्यमानो जयादिः स विष्णुप्रसादतस्तं प्राप्य मुक्तिमगात् न तु द्वेषभागीत्यर्थः । चैद्यशब्दो जीवद्वयवाचीति चैद्यशब्देन यदा सन्वाच्यस्तदाऽऽनन्दाविर्भावादिकं यदा त्वसंस्तदा तमः सिद्धिशब्देन (?) ग्राह्यमिति विवेकः । ननु, त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामक्रोधस्तथा लोभ इति गीतायां कामस्याशुभफलनरकद्वारतोक्तेः कथं तन्मुक्त्यवस्थानोक्तिरित्यत आह ॥ कामस्त्विति । तुशब्दो गीतागीतकामादेतत्कामव्यावृत्त्यर्थः । अशुभकृत्, चात् शुभकृच्चेति भेदवान्विष्णोः प्रसादकृच्च शुभकृत्स च गोपिकासु विद्यमानया श्रीहरिभक्त्या ।

तर्हि विषसम्पृक्तभक्तवत्कथं दुरसुरसहवासिनो दासानपि जयादीन्दययोददीधरद्धरिरित्यत आह ॥ द्वेषिजीवयुतमिति । विष्णुः काल आयाते विमोचयेद्, द्वेषिजीवयुक्तं भक्तम् । एतेन भक्तिमत्त्वान्मोचयेदित्युक्तिरतो देवोऽतिकरुणः कृपायुततमः । इदमहो आश्चर्यम् । ओदिति प्रगृह्यसंज्ञा प्रकृतिभावश्च न । छान्दसतयेति ज्ञेयमिति केचित् । वस्तुतस्तु प्रकृतिभावस्यानित्यतया तत्सम्भवति । हिनत्वाद्धेयत्वाद्धः स न भवतीत्यहोऽयं सज्जीवसङ्गो त्याज्य इति करण इति वा । नित्यं हीन इति काठकभाष्योक्तेस्तत्र हरिपरत्वात्पूरितं योग्यतया सर्वदोषैरिति हशब्दहीनार्थकत्वमक्षुण्णम् । अहपदमधिकारिविशेषणमतोऽतिकरुण इति सुललितम् । तत्कथङ्कारं कारुण्यं ज्ञातमित्यत आह ॥ शिशुपालस्य तदादेर्मोक्षणान्मोचनादिति । अहो हन्तीति हो नाशयत्येनं दुःसहवासिनं स नेत्यहो नृसिंं हन्ता नृसिंहोऽसावित्यादेरिति वा । जारबुद्ध्याऽपीत्यत्रत्योऽपिशब्दो न समुच्चायकः । समुच्चेयबुद्धेरन्यस्यास्तास्वसत्त्वादित्यतः सत्यं तथाऽपि स न निरर्थः किन्तु सम्भावितत्वगर्हितत्वार्थवान्व्यवस्थयेति तत्रापि कुत्र किमर्थं इत्यतो गृहान्तर्वर्तिगोपिकासु सम्भावितत्वं जारबुद्धेरप्सरस्सु द्वितीयमितरापेक्षयेति मानाननेन दिदर्शयिषुरादावानन्दतीर्थमुनिः स्वयं हेतुं सूचयन्गर्हितत्वमपि शब्दार्थमप्सरःस्त्रीव्यतिरिक्ते दर्शयति । तथाऽपि जगत्प्रपितामहे के जगत्प्रपितामहे जगतो जारबुद्धिर्न युक्ता । एतस्य तु पितामहत्वान्न जातु जारबुद्धिर्जगता कर्तव्या सा गर्हितेत्यर्थः । इदं प्रपितामह इति मानिकपतित्वपितृत्वश्वशुरत्वादेरुपलक्षकम् । जारबुद्धिर्न युक्तेति यद्यपि न समुच्चयार्थोऽपिशब्दः तथाऽपि न व्यर्थः किन्तु सम्भाविता गर्हिता चेत्यर्थः । तत्तदुपाध्युपासकानां जारबुद्धिर्गर्हिता । करिष्यत्याचार्योऽधिकारिविवरणम् । तत्रैव विवरिष्याम इति । केचित् गर्हितत्वमात्रमर्थः इत्यर्हिताः । न युक्तेत्येव श्रीमदुक्तेः । महे तेजः परस्यां देवतायां तेजोऽभिधां तु श्रियमिति भाष्यानुव्याख्यानोक्तेर्महसा च महर्विदुरिति द्विरूपकोशोक्तेर्महःशब्दस्य तेजोऽर्थ उत्तमार्थे च पूज्यार्थे प्रयुज्यते । महच्छब्दो महो मान्यशब्दस्तथैव चेति शब्दनिर्णय इति चतुर्थतात्पर्योक्तेर्महःशब्दस्य तेजोऽर्थः । ततश्च महे तेजसि रमाविषयेऽजारबुद्ध्या जार उपपतिः स तद्भिन्न इति पतिः सबुद्ध्योपास्तिर्महे उपासनोत्सवे आसन्ने जगत्प्रपिता । नियेनमुष्टिहत्ययेत्यादिवत्प्रशब्दः प्राग्योज्यः प्रजगता जगत्प्राणः समीरण

इत्युक्तेर्वायुवाची जगच्छब्दः । मुख्यप्राणेन । ब्रह्माऽप्यनेन ग्राह्यः । तृतीयायाः प्रथमानिर्देशो वा निर्विभक्तिकतया निर्देशो वा । विधिमुख्यप्राणाभ्यां पितेति । जगत्प्रकृष्टजङ्गम इति पतिः सतीनां तस्य पिता श्वशुर इत्युपास्तिर्देवयोषितां, प्रजगतो देवास्तेषां पितामहे हरौ तत्त्वेनोपास्तिः कर्तव्येति यावत् । जगत इतरस्य प्रपितामहे हराविति साक्षादसाक्षाद्वा पदोपरि केचित्केचिदानयन्त्यधिकारिणः ॥ ततश्चायं श्लोकद्विकार्थः ॥ काश्चन कामिन्यो गुणमयं गुणविकृतं देहं जहुस्तत्यजुः । तत्र पापं तथाऽनिष्टं पुण्यमप्यासामेवं बभूवुरित्याह ॥ दुःसहेति । प्रेष्ठस्य स्वेष्टस्य दुःसहः सोढुमशक्यो यो विरहो वियोगस्तज्जातो यस्तीव्रोऽत्युल्बणस्तापस्तेन धूतानि कम्पितानि विश्लिष्टानीति यावत् अशुभानि प्रारब्धेतराणि यासां ताः । ध्यानेन खण्डेनाखण्डेन च प्राप्तोऽन्तर्बिम्बरूप आविर्भूतो योऽच्युतस्तस्या श्लेष आलिङ्गनं तज्जनिता निर्वृतिः परमानन्दस्तया क्षीणं क्षयिष्ण्वनिष्टममङ्गलं याभिस्ताः । भोगेन हीतरे । उपमर्दं चेत्यादेः । अच्युतो दृढ आश्लेषस्तन्निर्वृत्त्याऽक्षीणमङ्गला इति पदमेकं वा ॥ १० ॥

तमेव परिष्वक्तं परमात्मानं परमत्यन्तं जारबुद्ध्यापि जार उपपतिरिति बुद्धिर्जारबुद्धिर्या चेतरगर्हिता तथाऽपि तया सङ्गताः कचिद्गृहान्तर्वर्त्यनिर्गताङ्गनासु सम्भावितत्तयेत्यप्यर्थः । अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेष्विति स्मरणात् । सङ्गतास्तेन मिलिता गुणमयं देहं सद्यो जहुरनन्तरं सं किञ्चित्सारभूतं स्वर्गं गतास्तत्र स्थित्वा काल आयाते प्रक्षीणबन्धनाः सत्यस्तमेव सङ्गताः सम्यग्ज्ञाततत्का गुणमयमाविर्भूतगुणात्मकं जहुः । ओहाङ् गतौ । प्रापुरित्यर्थोऽपि ज्ञेयः । पदव्यत्ययश्छान्दसः । सङ्गता इत्यनेनान्वयो वा । याः सङ्गता गुणमयं देहं जहुस्ताभिर्गुणमयं देहमपीत्यन्वयो वा । कायो देहः क्लीबपुंसोरित्यमरः । धुताशुभा इति पूर्तौ यत्पुनः प्राह प्रक्षीणबन्धना इति तेनैवं सूचयामास व्यास इत्यवसेयम् । स्वबिम्बदर्शने सत्यपि सत्यः स्वर्गतः सत्यादिकं प्राप्य ब्रह्मणा सह काले मुच्यन्त इति सद्य इति प्रतिबन्धभावपरम् । प्रक्षीणबन्धना इति लिङ्गभङ्गतामङ्गनानामाहेति तात्पर्यं ज्ञेयम् ॥ ११ ॥

सुमनोरञ्जनी — किञ्च तदानीमेव गुणमयं त्रिगुणात्मकं देहं जहुः तत्यजुः । संसारान्मुक्ता अभवन्निति यावत् । त्यक्त्वा च परमात्मानं परं ब्रह्म सङ्गताः प्राप्ताः बभूवुः । वर्तमानसामीप्याद्वर्तमानव्यपदेशः । कुतः । कश्चित्कालं स्वर्गाद्यवस्थानस्य प्रमितत्वात् । ननु प्रारब्धेन प्रतिबद्धाः कथं मुक्ता इत्यत उक्तम् ॥ प्रक्षीणबन्धना इति । प्रक्षीणप्रारब्धप्रतिबन्धा इत्यर्थः । ननु प्रारब्धस्य भोगेनैव नाशात् तदानीमेकदा पुण्यपापोभयस्वरूपप्रारब्धस्य भोगस्यानवसरात् कथमुक्तं प्रक्षीणबन्धना इत्यतस्तत्प्रकारं वक्तुमुक्तम् ॥ दुःसहेति । दुःसहः सोढुमशक्यो यः प्रेष्ठस्य श्रीकृष्णस्य विरहः तेन तीव्रतापः तेन धुतानि निरस्तानि अशुभानि यासां ताः । तथा ध्यानेन प्राप्तो योऽच्युतः तस्य आश्लेषेण या निर्वृतिः परमानन्दानुभवः तया आक्षीणानि ईषन्न्यूनं यथा भवति तथा क्षीणानि

बन्धनानि प्रारब्धकाम्यपुण्यानि यासां ताः । अनेकजन्मसु दुःखानुभवकारणपापप्रारब्धस्य तत्तुल्य-श्रीकृष्णविरहजतीव्रतापानुभवेन, तथा अनेकजन्मसु परमसुखानुभवसाधनपुण्यप्रारब्धस्यापि ध्यान-प्राप्ताच्युताश्लेषजन्यपरमानन्दानुभवेन प्रक्षीणतेति भावः । ननु तमेवं विद्वानिति श्रुत्या ब्रह्मज्ञानस्यैव मोक्षसाधनत्वोक्तेस्तद्विधुराणां गोपीनां गर्हितया जारबुध्या कामनामात्रेण कथं मुक्तिरित्यत उक्तम् । परमात्मानं सङ्गता इति । परमात्मानं सं सम्यक् गच्छन्त्यवगच्छन्तीति तथोक्ताः । अत्रापिशब्दो जारबुद्धावरुचिं सूचयति । यद्यपि जारबुद्धिर्न युक्ता । न तया गुणमयदेहत्यागो युक्तस्तथापि पूर्वमिदानीमपि सम्यज्ज्ञानेनापि युतत्वात्स युक्त इति । तदुक्तम् । जगत्प्रपितामहे जारबुद्धिर्न युक्ता । तथापि ब्रह्मतया न सम्यगिति । तथा च न गोप्यो ब्रह्मज्ञानविधुराः किं तु पूर्वजन्मनि तद्वत्य एवेति भावः । इममेव सर्वाभिप्रायं मनसि कृत्वोक्तमाचार्यवर्यैः ।

कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः ।
सम्यक् कृष्णं परब्रह्म ज्ञात्वा कालात्परं ययुः ।
पूर्वं च ज्ञानयुक्तास्तास्तत्रापि प्रायशस्तथा ।
अतस्तासां परब्रह्मगतिरासीन्न कामतः ।
न तु ज्ञानमृते मोक्षो नान्यः पन्थेति हि श्रुतिः ।
कामयुक्ता तदा भक्तिर्ज्ञानं चातो विमुक्तिगाः ।

अतो मोक्षेऽपि चैतासां कामो भक्त्याऽनुवर्तते । अतोदकत्वेनेति । तदा यदा स्वभर्तृभिरन्तर्गृहे निरुद्धास्तदेत्यर्थः । कालात् स्वयोग्यकालात् । ल्यब्लोपनिमित्ता पञ्चमी । कंचित्कालमुषित्वा परं परब्रह्म ययुः प्रापुः । अनेन परमात्मानं संगताः प्रापुरित्यपि योजना सूचिता । एतेन मूले तदैव मुक्तिकथनं पुनर्भारतभुवि जन्माभावाभिप्रायेणेत्युक्तं भवति । पूर्वं च पूर्वमपि । ज्ञानयुक्ता इत्यनेन परमात्मानं सङ्गता इत्येतत् सं सम्यक् गता अभवन्निति प्रकारान्तरेणापि व्याख्यातं भवति । क्तप्रत्ययलब्धार्थवर्णनं पूर्वमिति । तत्रापि गोपीजन्मन्यपि प्रायशस्तथा ज्ञानयुक्ताः । अतः पूर्वं ज्ञानित्वाद्दिवं गत्वा सम्यज्ज्ञानसंपादनाच्च तासां परब्रह्मगतिरासीत् । न कामतः न काममात्रात् । काममात्रादेव स्यात् किमर्थं ज्ञानापेक्षेति तत्राह ॥ न त्विति । हि यस्मादिति श्रुतिः तस्मात् ज्ञानमृते न मोक्ष इत्यर्थः । किं श्रीकृष्णाङ्गसङ्गकामः सर्वथा मोक्षेऽनुपयुक्त एव । नेत्याह ॥ कामयुक्तेति । ज्ञानं चेत्येतत्त्रयमस्ति । अत एताः विमुक्तिगाः आसन् । अनेन कामोऽपि भक्तिसाहित्येन मोक्षफल एवेति भावः । भक्त्यैव मोक्षसिद्धौ किं कामेनेत्यतो मोक्षे विशेषं संपादयतीत्याह ॥ अत इति । अतः कामयुक्तभक्तिमत्वात् मोक्षेऽपि भक्त्या सह कामोऽनुवर्तत एव । अनेन अत्र भगवत्कामः मोक्षेऽपि

भगवत्कामितासाधनभूतो न व्यर्थ इति भावः । हन्त तर्हि मोक्षे यदि कामः तज्जन्यं दुःखमपि स्यादित्यत उक्तम् ॥ अतोदकत्वेनेति । अदुःखजनकत्वेनेत्यर्थ इत्याचार्यवाचो युक्ताभिप्रायः ॥ १०,११ ॥

राजोवाच—

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ।
गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

तात्पर्यम् – ब्रह्मतया न सम्यक् । 'प्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा' । 'रमाया दत्तक्षणमि'ति वचनात् ॥ १२ ॥

सत्यधर्मीया — कृष्णं विदुः परं कान्तमिति श्लोके न तु ब्रह्मतया मुने इति ब्रह्मतयाऽनवगतिस्तथाऽपि गतिः पराऽऽसीदासामिति जानानोऽजानान इव तात्पर्यं परीक्षिदप्राक्षीदिति तत्तात्पर्यं किञ्चिदध्याहृत्य दर्शयति ॥ ब्रह्मतया न सम्यगिति । परं कान्तमित्यत्रत्यपरमित्यस्यार्थोऽत्यन्तं सम्यगिति न शेषक्लेश इति वा । अनेन सामान्यतो ब्रह्मज्ञानं तासामस्ति । सम्यङ्नासीदित्येव । ज्ञानसामान्याभावे नान्यः पन्था इति श्रुतज्ज्ञानप्राप्त्यलोकः कथमासां स्यादिति भावः । तथात्वं तद्वचनादेवावसीयत इति तत्पठति ॥ प्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा, रमाया दत्तक्षणमित्यादिवचनादिति । ननु दुःसहप्रेष्ठविरहतीव्रतापधुताशुभा इत्यनुपदमुक्तेस्त्यक्त्वैतदाचार्याः किं दवीयःपदवीस्थश्लोकोदाहरणमचीचरन्निति चेन्न । अतद्वचनत्वात् । भवांस्तमिति साक्षादधोक्षजं सम्बोध्यैवोक्तेस्तद्वादाक्षोदात् । वचनादिति वचनेऽपि तद्वचनादिति भावोऽस्माकमिति ध्वनयामासुर्मध्वमुनय इति ज्ञेयम् ॥ ततश्चायं श्लोकार्थः ॥ अजानन्निव जनाधीशः पृच्छति ॥ राजेति । गोप्यः कृष्णं परं कान्तं कान्तात्कान्तं जारमिति यावत् हे मुने गोप्यो विदुर्न तु ब्रह्मतया परम् । सम्यक् परमित्यावर्तते । विदुरेवं गुणधियां गुणेषु विषयेषु धीर्यासां तासां गुणप्रवाहोपरमो गुणप्रवाहस्य संसारस्योपरमो निवृत्तिः कथं सम्भवेन्न कथमपि । निवृत्तमार्गलभ्यगुणप्रवाहोपरमस्य कथं प्रवृत्तप्रवर्तमानमानिनीलभ्यता तत्कथयेति परीक्षित्प्रश्नाशयः ॥ १२ ॥

सुमनोरञ्जनी — एवं गूढाभिसन्ध्या शुकमुखोद्गलितस्याभिसन्धिं स्वयं जानन्नपि राजाऽन्यजनानुजिघृक्षया शुकमुखादेवाविष्कारयितुं स्वयमजानन्निव पृच्छतीत्याह ॥ राजेति । कान्तं कमनीयमेव । परं केवलं विदुः । न तु ब्रह्मतया परब्रह्मत्वेन सम्यग्विदुरिति सम्यक्पदाध्याहारेण योजनीयम् । तदुक्तं– ब्रह्मतया न सम्यक् । प्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा, रमाया दत्तक्षणमित्यादिवचनादिति । मूले ब्रह्मतया न विदुरित्यस्य ब्रह्मतया न सम्यक् विदुरित्येवार्थः न तु सर्वथा ब्रह्मतया न

विदुरिति । कुत इत्यत एतत्प्रकरणगतगोपीवचनबलादित्याह ॥ प्रेष्ठ इति । तनुभृतामन्तरात्मेत्यनेन रमाया दत्तक्षणमिति वचनेन च ब्रह्मतया ज्ञानस्य निश्चितत्वादित्यर्थः । गुणेषु विषयेषु धीर्मनो यासां तासाम् । गुणप्रवाहस्य संसारस्य ॥ १२ ॥

श्रीशुक उवाच—

उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ।
द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥

सत्यधर्मीया — शुकः किञ्चित्स्मारयन्परिहरति ॥ उक्तमिति । सप्तमे हिरण्यकशिपुप्रस्तावे द्वेषाच्चैद्यादय इत्यादिना चैद्यस्तच्छब्दवाच्यः संश्चासंश्च यथा सिद्धिं सदसद्रूपिणीं मुक्तिं गत इति यदेतत्ते निरूपितम् । द्विषन्नेकस्तत्सङ्गतया द्विषन्निवापरस्तु साक्षात्तथेति विवेकः । फलमुभयानुरूपं यच्छतो हरेरेतज्ज्ञानं तथा तत्तत्कर्मानुसृत्य कारयितुर्न वैषम्यादीत्यादिसम्भावकं हृषीकेशमिति सकलेन्द्रियप्रेरकतया तत्स्वामिनमधोक्षजप्रिया अतदसदाविष्टाः सिद्धिं सतीं समुपेयुरिति किं वक्तव्यम् । तदेतत्प्रेय इति सतां हरिर्हि सर्वप्रेष्ठः । गोपीनां स्वर्गादिमार्गतो गतानां क्लृप्ते काले मुक्तिर्नाश्चर्यकृज्ज्ञानभक्त्याद्यनुवृत्तेरिति तात्पर्यमवधेयम् ॥ १३ ॥

सुमनोरञ्जनी — जारबुध्यापि सङ्गता इत्यत्र गूढमभिसन्धिमुद्धाटयन् सप्तमस्कन्धोक्तं प्रमेयं स्मारयति शुकः । उक्तमिति । चैद्यः शिशुपालः । हृषीकेशं , अग्नीषोमादिषु स्थित्वा स्वकेश-नियतैस्तत्किरणैः जगद्धर्षणात् हृषीकेश, हृष्याः केशाः यस्येति विग्रहः । तदुक्तं गीताभाष्ये एकादशेऽध्याये 'अग्नीषोमाद्यन्तर्यामितया जगद्धर्षणाद्धृषीकेश इति । एतादृशं श्रीकृष्णं द्विषन्नपि द्वेषिसङ्गादागन्तुकद्वेषवानपि । यथा येन प्रकारेण सिद्धिं मुक्तिं गतः तथा द्विषन्नपि स्वाभाविकद्वेषयुतः चैद्याविष्टदैत्योऽपि यथा यथायोग्यं सिद्धिं गत इत्येतत्सर्वं ते तुभ्यम् । पुरस्तात्पूर्वं उक्तमेव । अतः अधोक्षजप्रियाः अधोक्षजः प्रियः कामनीयो यासां ताः श्रीकृष्णे कामयुता इति यावत् । सिद्धिं गता इति किमुतेति योजना । अत्र चैद्यतदाविष्टयोरपि मुक्तिरुच्यते । सा किमेक-विधैवेत्यतो नेत्यभिप्रायेणास्य तात्पर्यं व्यनक्त्याचार्यचरणः ।

द्वेषिणामधरं तमः ।

मुक्तिशब्दोदितं चैद्यप्रभृतौ द्वेषभागिनः ।
भक्तिभागी पृथङ्मुक्तिमगाद्विष्णुप्रसादतः ।
कामस्त्वशुभकृच्चापि भक्त्या विष्णोः प्रसादकृत् ।

द्वेषिजीवयुतं चापि भक्तं विष्णुर्विमोचयेत् ।
अहोतिकरुणा विष्णोः शिशुपालस्य मोक्षणात् ।

अयमत्राचार्यवचनार्थः । चैद्यप्रभृतौ शिशुपालकेशिपूतनादौ स्थितस्य द्वेषभागिनः भगवद्वेषिणोऽधरन्तमः । मुक्तिशब्दोदितं मुक्तिवाचकशब्दोदितम् । कुतः । यतो द्वेषिणामधरन्तम एव नियतम्, अत इत्यर्थः । भक्तिभागी पृथङ्मुक्तिं विलक्षणां मुक्तिं भगवत्प्राप्तिलक्षणमुक्तिमगादित्यर्थः । अनेन भगवद्भक्तप्राप्यत्वेनोक्ता मुक्तिर्भगवत्प्राप्तिरूपैवेत्युक्तं भवति । ननु किमुताधोक्षजप्रिया इति । अनेन कामस्य मुक्तिसाधनत्वमुक्तं तत्कथं युज्यते । कामस्याशुभकारित्वादित्यत आह । यद्यपि केवलः कामः अशुभकृत्, अपि तथापि भक्त्या सहितः विष्णोः प्रसादकृच्च भवति । अत उक्तं युक्तमिति भावः । ननु यदि द्वेषिणामधरं तमो नियतं तर्हि चैद्यस्यापि द्वेषिसंसर्गेण द्वेषवत्वात्कथं मुक्तिरभूदित्यत आह ॥ द्वेषीति । द्वेषिजीवयुतमित्यनेन द्वेषिसङ्गादेव द्वेषो न स्वाभाविक इति ध्वनयति । शिशुपालादिमोक्षणाद्विष्णोरतिकरुणा ज्ञायत इति शेषः । अनेन भगवान् स्वभावतो द्वेषिणामेवाधरं तमः प्रापयति । स्वभक्तं तु अन्यसंसर्गाद्विषिणमपि तद्वेषमगणयित्वैव भक्तिफलं मुक्तिमेव प्रापयतीत्युक्तं भवति । तदुक्तं गीताभाष्ये । स्वभक्तस्य कदाचिच्छापबलाद्वेषिणोऽपि भक्तिफलमेव ददातीति । द्वेषिणामपि द्वेषफलमनिरूप्य पूर्वतनभक्तिफलमेव ददातीति चेति ॥ १३ ॥

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ।
अव्यक्तस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

सत्यधर्मीया — न कृत्यमेतदाद्युद्दिधीर्षया प्रवृत्तस्य हर्यवतारस्य निःश्रेयसातिसर्जनं विनेति तं बोधयति ॥ नृणामिति । हे नृप! गुणात्मनो ज्ञानादिस्वरूपस्य । निर्गुणस्य भिन्नगुणा वा सत्त्वादयो वा तद्रहितस्याव्यक्तस्य प्रसादमन्तरेण प्रयत्नसहस्रेण व्यक्तिमगच्छतः । तथाऽपि न सामस्त्येनेत्याह ॥ अप्रमेयस्येति । नृणामित्यधिकारित्रितयग्रहः । निःश्रेयसमपि त्रिविधं मतभेदतः । नित्योपलब्धिसूत्राच्च भाषणाट्टीकणादपि । नित्यसंसारिणां लिङ्गभङ्गोऽस्तीति सतां मतमिति श्रीसत्यप्रियगुरुराजैस्तथा श्रीमद्वादिराजतीर्थश्रीपादैश्च तत्स्थानतल्लिङ्गभङ्गहेत्वादिप्रतिपादकपुराणाद्युदाहरणपूर्वकं रचितग्रन्थग्रथनपूर्वकं ललाललामायिनां पतये नम इति नमकव्याख्याने चेमानि कर्माणीति महाभारततात्पर्यनिर्णयश्लोकस्य चास्माकं वितत्योक्तः स चानुसन्धेय इति नात्र विस्तरदरतो व्यालेखि । सदसत्सदसदात्मकविमुक्तिरूपप्रयोजनाय न लिङ्गभङ्ग इति पक्षे व्यावृत्तनिःश्रेयसार्थपदस्य मध्यमविवक्षायां निःश्रेयसनिवृत्तये नित्यबन्धायेति यावदित्यर्थः । तामसविवक्षायां निःश्रेयसपदस्य सन्मोक्षपरतार्थशब्दस्यार्थः स एवेति ज्ञेयम् । सत्पक्षेऽर्थ्यते मनसा प्रार्थ्यत इति स निःश्रेयसं चासावर्थश्चेति

सन्मुक्तिस्तस्मा इति नार्थातिरेक इति विवेकः । अचतुरनिपातितो निःश्रेयसशब्दः । भगवतो व्यक्तिर्नास्तीतीतरतदवतारकृत्यमिति तन्मोचनं युक्तमिति । अप्रमेय इति केवलं विशेष्यसङ्गतं चेन्न सरसमिति गुणात्मन इत्यात्मपदसमस्तगुणपदेनान्वेति । ततश्चाप्रमेया ये गुणास्तदात्मान इत्यर्थः सम्पद्यते । ततश्च त्रिलोकनाथः सप्तघटिकाभोजनमित्यादाविवान्वयो ज्ञेयः । न च तत्र समस्तत्वाद्भवत्वयोग्यतयाऽत्र तु कथं समञ्जसोऽन्वयः समस्तेन व्यस्तस्येति वाच्यम् । दीप्तानलार्कद्युतिमप्रमेयमिति प्रमेयदीपिकायामुक्तेर्जातां द्युतेर्मितत्वशङ्कामेतच्च सविशेषणविशेषणत्वाद् द्युत्या सम्बध्यत इत्युक्तमिति का कथन्ता । पूर्वं विस्तृतं च ।। १४ ।।

सुमनोरञ्जनी — किञ्च नृणां निःश्रेयसार्थाय मोक्षरूपप्रयोजनाय भगवतो व्यक्तिः रामकृष्णादिरूपेण प्रादुर्भावो भवति । मोक्षश्च न तत्प्रसादमन्तरा सम्भवति । प्रसन्नादेव राजादेर्निगडादिमोक्षदर्शनात् । स च प्रसादो न भक्तिं विनेत्यन्यथानुपपत्त्यापि भक्तेरेव मोक्षसाधनत्वं सिध्यतीति भावः । कीदृशस्य भगवतः । अव्यक्तस्य अव्यक्तस्वभावस्य । अव्यक्तस्वभावस्यापि व्यक्तिर्भक्तेषु प्रसादेनैवेति सूचयति । ननु व्यक्तिरिति कुतः उत्पत्तिरेव किं न स्यादित्यत उक्तम् ।। निर्गुणस्येति । गुणत्रयशून्यस्येत्यर्थः । तदेव कुत इत्यत उक्तम् ।। गुणात्मन इति । ज्ञानादिगुणात्मन इत्यर्थः । तर्हि किमिति तथात्वेनास्माभिर्न ज्ञायत इत्यत अप्रमेयस्येत्युक्तम् । स्वप्रसादमन्तरा प्रमातुमशक्यस्येत्यर्थः ।। १४ ।।

कामं क्रोधं भयं मोहं मैत्रीं सौहृदमेव च ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ।। १५ ।।

तात्पर्यम् – कामिनः कामित्वं क्रोधिनः क्रोधित्वमेव सर्वदा भवतीति तन्मयता । 'विमुक्तावपि कामिन्यो विष्णुकामा व्रजस्त्रियः । द्वेषिणश्च हरौ नित्यं द्वेषेण तमसि स्थिता' इति च । 'भक्त्या हि नित्यकामित्वं न तु मुक्तिं विना भवेत् । अतः कान्ततया चापि मुक्तिर्भक्तिमतां हरौ । स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरस्त्रियः । काश्चित्काश्चिन्न कामेन भक्त्या केवलयैव तु । मोक्षमायान्ति नान्येन भक्तिं योग्यां विना क्वचिदि'ति पाद्मे । 'भक्त्या वा कामभक्त्या वा मोक्षो नान्येन केनचित् । कामभक्त्याऽप्सरस्त्रीणामन्येषां नैव कामतः । उपास्यः श्वशुरत्वेन देवस्त्रीणां जनार्दनः । जारत्वेनाप्सरस्त्रीणां कासांचिदिति योग्यता । योग्योपासां विना नैव मोक्षः कस्यापि सेत्स्यति । अयोग्योपासनाकर्तुरनर्थश्च भविष्यति । तस्मात्तु योग्यतां ज्ञात्वा हरेः कार्यमुपासनमि'ति भद्रिकायाम् । 'पतित्वेन श्रियोपास्यो ब्रह्मणोर्मे पितेति च । पितामहतयाऽन्येषां त्रिदशानां जनार्दनः । प्रपितामहो मे भगवानिति सर्वजनस्य तु । गुरुः श्रीब्रह्मणोर्विष्णुः

सुराणां च गुरोर्गुरुः । मूलभूतो गुरुः सर्वजनानां पुरुषोत्तमः । गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णुः सनातनः । इत्येवोपासनं कार्यं नान्यथा तु कथञ्चने'ति वाराहे ॥ १५ ॥

सत्यधर्मीया — कामं क्रोधमिति श्लोके तन्मयतामिति भगवदात्मकताभ्रमं भ्रंशयितुं स्वयं व्याख्याय कामस्य मुक्तावप्यनुवर्तने विहाय कामान्यः पुमांश्चरति निस्पृह इत्यादिविरोधोपरोधं मानाननत उपासनाव्यवस्थां च दर्शयति ॥ कामिन इति । नात्र तच्छब्देन हरिपरामर्शः किन्तु कामादिपरामर्श इत्याह । कामित्वं क्रोधिनो निन्दितकामक्रोधवत इत्येतदादेः सर्वदा सृतावसृतौ चेति सदा भवतीति तन्मयता । कामिनो ज्ञानभक्तिसम्पन्नस्य कामित्वं तथा क्रोधिनो ज्ञानादिहीनस्य सदा सृतौ तमसि चेत्यादौ क्रोधाद्यात्मकत्वेनैव तन्मयता ज्ञेया । विमुक्तावपि तदवस्थायामपि व्रजस्त्रियः कामिन्यो नित्यं तमसि स्थिता इत्यप्रत्यावृत्तिं कथयति ॥ नित्यमिति । द्वेषिविशेषणे द्वेषयोग्यतया सान्तत्यं समर्पयति । इति च स्कान्द इति शेषः । कामना कामिनीनामीदृशीत्याह ॥ भक्त्या हीति । कान्ततयोपपतितयाऽप्सरःस्त्रीसामान्यस्य यो यो यदा सङ्गतः स तदा तदा पतिरेवेति कान्ततयेत्यर्थः । भक्तिमतां स्त्रीजनानां चान्मुक्तिर्भवेत् । स्नेहभक्ता देवाः सदा ।

अत्र स्नेहशब्दः सामान्यप्रीतिमात्रपरः । देवशब्दश्च योग्ययशोदादिसत्कामिन्युपलक्षक इति ज्ञेयम् । अन्यथा तदादीनां मुक्त्यनुक्त्यापत्तेः । काश्चिद्यशोदादयः केवलभक्त्यैव । कामेन नेत्येवकारार्थ-विवरणमिति न वैय्यर्थ्यम् । अप्सरस्त्रियः कामित्वेन भक्ता इत्यन्वयः । कश्चित्काश्चिदप्यनेन कामादिनैव योग्यां भक्तिं, भक्त्या देवादीनां, कामभक्त्या गोपाङ्गना अप्सरआदीनामन्येन भक्ति-विरहितकामादिना । गीतोक्ताः कामाश्च मोक्षप्रतिबन्धका इति नात्र ते ग्राह्याः । अपि त्विच्छारूपः स चानुवर्तते मुक्तावपीति न तद्विरोध इति मन्तव्यम् । तदेव मन्दानन्दार्थं विशदयति । अन्येषां न कामतो मोक्ष इत्यर्थः । देवस्त्रीणाम् । कृत्यानां कर्तरि वेति स्मरणाद्देवस्त्रीणामुपास्यापि मोक्षो न सेत्स्यति । अन्यथोपासने किं भविष्यतीत्यत आह ॥ अयोग्योपासनेति । उपासनां कर्ता तस्या-नर्थोऽनिष्टमिष्टनाशश्च भविष्यति । तस्मात् । तुस्तरतमभावसूचकः । स्वयोग्यतां ज्ञात्वा हरेरुपासनं कार्यम् । भद्रिकानामके ग्रन्थे । श्रिया पतित्वेनोपास्यः । ब्रह्मणोः ब्रह्मप्राणयोः पितेत्युपास्योऽन्येषां त्रिदशानां पितामहतयोपास्यो मे प्रपितामह इति सर्वजनस्योपास्यो गतम् । श्रीब्रह्मणोर्विष्णुर्गुरुस्तत्र श्रीमुख्यस्य ब्रह्मणः श्रीरपि गुरुरिति तन्मुख्यं ज्ञानशब्दयोरितिवज्ज्ञेयम् । सुराणां च गुरोर्गुरुर्गुरुर्विरिश्चस्तस्य गुरुः परमगुरुरिति यावत् सर्वजनानां पुरुषोत्तमो मूलभूतगुरुरस्य जगतो गुरुर्ब्रह्मा सनातनो विष्णुर्दैवम् । सर्वजनानामित्यन्वेति । इति पूर्वोक्तप्रकारेणोपासनं कार्यम् । अन्यथा तु कथञ्चन न कार्यम् । अनर्थश्रुतेरिति भावः ॥ ततश्चायं मूलार्थः ॥ कामं, क्रोधं, स्नेहं प्रीतिमात्रं,

मैत्रीं सौहृदं चेत्यादिकं हरौ नित्यं विदधतः कुर्वन्तो ये, नाभ्यस्ताच्छतुरिति नुमभावः, ते तन्मयतां कामाद्यात्मकतां यान्ति । क्रोधमयतां तु तामसा यान्तीति । हिते । हितगतौ वृद्धौ चेति स्मरणात् । आमन्दादिहितसहितत्वाद्धितेति नित्याभिवृद्धये मोक्षे हिते गतिरूपे तमसीत्यर्थः । प्राप्ते सतीत्यर्थः ॥१५॥

सुमनोरञ्जनी — नन्वेतावता प्रबन्धेन गोप्यः कामयुक्तभक्त्यैव मुक्ताः न काममात्रात् इति निष्टंकितम् । तर्हि भक्त्यैवालं मुक्तौ किं कामेनेत्यतः इदानीं भगवति कामो मोक्षेऽपि भगवत्कामितां प्रत्युपयुज्यत इति वदन् एतन्यायमन्यत्राप्यतिदिशति ॥ काममिति । ये जनाः हरौ विषये कामं विदधते । यथा गोप्यः । क्रोधं द्वेषं यथा मागधादयः । भयं प्रबलोऽयं हरिर्मम शत्रुरिति भयम् । यथा कंसादयः । मैत्रीम् उपकारिताबुद्धिं, सौहृदं अनिमित्तस्नेहं विदधते । यथा पाण्डवादयः । ते तन्मयतां कामाद्यात्मकतां यान्ति । मुक्तौ स्वरूपभूतभगवद्विषयकामादिमन्तो भवन्तीति भावः । यद्वा तन्मयतां तत्प्राचुर्यम् । तदुक्तं 'कामिनः कामित्वं क्रोधिनः क्रोधित्वमेव सर्वदा भवति' इति तन्मयतेति । क्रोधो द्वेषः सर्वदा भवतीत्यादि यत् तत् तन्मयतेत्युच्यत इत्यर्थः ॥ सर्वदेत्युक्त्या मुक्तावप्यनुवृत्तिः सूचिता । तदेव हि प्राचुर्यं नाम यत्सर्वदा विद्यमानत्वं सदेत्यनेन सूचितम् । कामित्वक्रोधित्वादेर्मुक्तिसम्बन्धित्वं स्कान्दवचनेन स्पष्टयति ।

विमुक्ता अपि कामिन्यो विष्णुकामा व्रजस्त्रियः ।
द्वेषिणश्च हरौ नित्यं द्वेषिणस्तमसि स्थिताः ॥ इति चेति ।

हरौ द्वेषिणः नित्यं द्वेषिणो भवन्तीत्यर्थः । तमसि स्थिता इति द्वेषफलमुक्तम् । चशब्देन स्कान्द-इत्यनुवर्तते । यदि इदानीं भगवत्कामित्वं मोक्षे भगवत्कामितां प्रति प्रयोजकं तर्हि तदेवास्तु मुक्तिप्रयोजकं किं भक्त्येत्यतः इदानीं भगवत्कामित्वमात्रं न नित्यकामित्वे प्रयोजकं किं तु भक्तिसहितमेवेति वदन् कामभक्त्यादीन् शृङ्गिग्राहकन्यायेन दर्शयत्पाद्मवचनं प्रमाणयति ।

भक्त्या हि नित्यकामित्वं न तु भक्तिं विना भवेत् ।
अतः कामनया वापि मुक्तिर्भक्तिमतां हरौ ।
स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरस्त्रियः ।
काश्चित्काश्चिन्न कामेन भक्त्या केवलयैव तु ।
मोक्षमायान्ति नान्येन भक्तिं योग्यां विना क्वचित् ॥

इति पाद्म इति । हि यस्मात् भक्त्या भवेत् भक्तिं विना नैव भवेदित्यन्वयव्यतिरेकः सूचितः । अतः भक्तेरेव अन्वयव्यतिरेकित्वात्कामितया सह मुक्तिः । मुक्तौ भगवत्कामित्वमिति यावत् ।

अपिरवधारणे । हरौ भक्तिमतामेवेति सम्बध्यते । स्नेहभक्ताः स्नेहयुक्ताश्च ते भक्ताश्च । स्नेहो मैत्र्यं सौहृदं च । काश्चिदप्सरस्त्रियः कामित्वेन सह भक्तिमत्यः मोक्षमायान्तीत्यनुकृष्यते । काश्चित्तु न कामेनेत्यन्वयः । इदानीं भगवति जारबुध्या कामोऽपि न मुमुक्षुसर्वस्त्रीभिः कर्तव्यः किं तु तद्योग्याभिरेवेति वदन् प्रसङ्गात्सर्वासामुपासनाविशेषप्रकारं प्रदर्शयद्वचनमुदाहरति ।

भक्त्या वा कामभक्त्या वा मोक्षो नान्येन केनचित् ।
कामभक्त्याऽप्सरस्त्रीणामन्येषां नैव कामतः ।
उपास्यः श्वशुरत्वेन देवस्त्रीणां जनार्दनः ।
जारत्वेनाप्सरस्त्रीणां कासांचिदिति योग्यता ।
योग्योपासां विना नैव मोक्षः कस्यापि सेत्स्यति ।
अयोग्योपासनाकर्तुरनर्थश्च भविष्यति ।
तस्मात्तु योग्यतां ज्ञात्वा हरेः कार्यमुपासनम् ।। इति भद्रिकायामिति ।

तत्र नैव कामतो मोक्ष इति सम्बन्धः । श्वशुरत्वेन । इदमुपलक्षणम् । श्वशुरपितृत्वेनेत्यपि ग्राह्यम् । सरस्वतीभारत्योश्च श्वशुरत्वेन । अन्यासां तत्पितृत्वेनेति विवेकः । जारत्वेन तथोपासनमपि नोर्वश्यादीनां सर्वासामपि तु कासांचिद्भगवदंगसङ्गयोग्यानामेव पिङ्गलाप्रभृतीनामप्सरस्त्रीणाम् । इति एवंप्रकारा योग्यता जारत्वेनोपासनायोग्यतेत्यर्थः । एवं स्त्रीसामान्यस्य उपासनाप्रकारमुक्त्वा पूर्वमनुक्ताया रमादेव्या पुरुषसामान्यस्य च तत्प्रतिपादयत्प्रमाणमाह ।

पतित्वेन श्रियोपास्यो ब्रह्मणा मे पितेति च ।
पितामहतयाऽन्येषां त्रिदशानां जनार्दनः ।
प्रपितामहो मे भगवान् इति सर्वजनस्य तु ।
गुरुः श्रीब्रह्मणोर्विष्णुः सुराणां च गुरोर्गुरुः ।
मूलभूतगुरुः सर्वजनानां पुरुषोत्तमः ।
गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णुः सनातनः ।
इत्येवोपासनं कार्यं नान्यथा तु कथंचन ।। इति वाराह इति ।

दैवं कुलदैवमित्याचार्यवचनस्य योजना द्रष्टव्या ।। १५ ।।

न चैवं विस्मयः कार्यो भवता भगवत्यजे ।
योगेश्वरेश्वरे कृष्णे यत एतद् विमुच्यते ।। १६ ।।

सत्यधर्मीया — उक्तमर्थं पर्यवसाययति ॥ न चेति । परदाररत्यादिश्रेष्ठापराधान्नान्यदोषस्य लेपस्तेजीयसामित्यादेर्देवादितेजीयसां यदि न दोषावहस्तदा का कथा यस्य श्रीशस्य प्रसादाद-सारसंसारनिवृत्तिस्तस्येत्याह ॥ योगेश्वरेश्वर इति । यत एतज्जगद्विमुच्यते तस्य कथमेवं प्रवृत्तिरिति तात्पर्यं सत्सम्भावकम् । योगेश्वराश्चतुराननादयस्तेषामीश्वरे स्वामिनीति । इदमत्रैवेति कुत इत्यतोऽज इति । विस्मयो भवता न कार्यो न कर्तव्य इत्यर्थः ॥ १६ ॥

सुमनोरञ्जनी — विस्मयः आश्चर्यबुद्धिः न कार्या । अत्र हेतुर्भगवतीत्यादि । भगवति अव्याहतैश्वर्यादिमति । यतः श्रीकृष्णात् तदनुग्रहादित्यर्थः । एतत् जगत् वि विविधं यथा भवति तथा । मुच्यते यथायोग्यं त्रिविधोऽपि जनः मुक्तिमाप्नोतीति भावः ॥ १६ ॥

ता दृष्ट्वाऽन्तिकमायाता भगवान् व्रजयोषितः ।
अवदद् वदतां श्रेष्ठो वाचःपाशैर्विमोहयन् ॥ १७ ॥

सत्यधर्मीया — समाधायैवं वसुधाधिपमङ्गनागमनानन्तरमनन्तः किं ततान तत्र रात्रावित्यतस्तां कथां कथयति ॥ ता इति । ता व्रजयोषितः कन्या अकन्याश्च कात्यायनीव्रतधराः स्वपतित्वहेतोः मयेमा रंस्यथ क्षपा इत्यादौ तथोत्तरत्र पतयश्च व इत्युक्त्यानुकूल्यात् । भगवान्स्वान्तिकं समीप-मायाताः प्राप्ताः । किं तत्र रात्रावागमनकारणमित्यतोऽप्याह ॥ अन्तिकमायाता इति । अन्ति समीपे कं स्वरूपसुखं यया सा माया च स्वेच्छा च तयैवायन्तीति तास्तथा स्वेच्छात एवायाताः । यदन्ति यच्चेत्यादेः । स योऽत इत्यादेः । वदतां वाग्मिनां श्रेष्ठो भगवान्वाचःपाशैर्वागात्मकवागुरैः राहोः शिर इत्यादिवदभेदे षष्ठी विमोहयन्नवदत् । विमो विशिष्टज्ञानसम्पद्रमासहित इति । ता हयन्निव गच्छन्निवावददिति वा । हय गताविति स्मृतिः ॥ १७ ॥

सुमनोरञ्जनी — एवं परीक्षितः प्रश्नं परिहृत्य पुनः कथां वक्तुमुपक्रमते ॥ ता इति । ताः तथाविधाः व्रजयोषितः गोपीः दृष्ट्वा । वाचः पञ्चमी तृतीयार्थे । वाग्लक्षणैः पाशैः विमोहयन् अवदत् । वाचः परिभाषणात् उदितैः पाशैरिति वा ॥ १७ ॥

श्रीभगवानुवाच—

स्वागतं वो महाभागाः प्रियं किं करवाणि वः ।
व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥ १८ ॥

सत्यधर्मीया — हे महाभागाः । वः स्वागतं युष्माकं समीचीनमागमनं वः प्रियं किं करवाणि । व्रजस्यानामयं नीरोगता, व्रजस्य तत्स्थलोकस्य क्षेममिति यावत् । कच्चित् । आगमनकारणं ब्रूत ॥१८॥

सुमनोरञ्जनी — हे महाभागाः ! वः युष्माकं स्वागतम् । वः प्रियं अभीष्टम् । व्रजस्य अनामयम् आमयः रोगाद्युपद्रवः तदभावः । कच्चिदिति प्रश्नार्थः स्वरविशेषद्योतनार्थः । भवतीनामागमने कारणं प्रयोजनरूपम् ॥ १८ ॥

रजन्येषा घोररूपा घोरसत्वनिषेविता ।
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥

सत्यधर्मीया — घोरैः सत्त्वैः पिशाचादिभिः सर्पादिभिर्वा निषेविता । स्वयं च घोररूपा भीतिहेतुरेषा रजनी रात्रिः । चेत्किमित्यतो मनःपूर्वकं किञ्चिद्विनोदं नटयन्नाह । हे सुमध्यमाः । इह वने स्त्रीभिर्न स्थेयं व्रजं प्रति यातेति । कुत इत्यतोऽस्वतन्त्रा यूयमित्यप्याह । सुमध्यमाः पत्यपत्यादिप्रोक्तकारिण्योऽत्यन्तमिति । सुमध्यमा इति सौन्दर्यातिशयेन दुर्दृष्टिबाधा स्यादतः प्रतियातेत्याशयो द्योत्यते । सुमानि धीयन्तेऽस्मिन्निति सुमधिर्मन्मथस्तेनामो रोगो यासां ता इति वा । आमो (अमो) रोग इत्युक्तेः । यद्वा स्वसम्बोधितस्य सुमध्यमा इत्यस्य सुमानां धीस्तद्विलोकनमतिस्तयाऽमन्तीति तास्तथा । अम गत्यादिष्विति स्मरणात् । पुष्पविलोकनायायाता इत्यायताक्ष्युत्तरपरतयाऽप्यर्थं मनसि कृत्वा तदुत्तरयति । सुमानि धीयन्तेऽस्मिन्निति सुमधि वनमिति वा ॥ १९ ॥

सुमनोरञ्जनी — किं च प्रयोजनशतसद्भावेऽपि न स्त्रीभिः अस्मिन्समये आगन्तव्यमित्याह ॥ रजनीति । घोरं भयजनकं रूपं यस्याः सा । घोरसत्वैः राक्षसादिभिः । यतः स्त्रीभिः । अनेन भीरुस्वभावता ध्वनिता । इह अस्मिन्नरण्ये । न स्थेयं न स्थातव्यम् । अतो व्रजं प्रति प्रतियात । यथाऽगतं तथा गच्छत ॥ १९ ॥

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ।
विचिन्वन्तो ह्यपश्यन्तो मा कृध्वं बन्धुसाध्वसम् ॥ २० ॥

सत्यधर्मीया — पुत्राः पत्युरग्रजादीनां स्वज्येष्ठभगिन्यादीनां वा विचिन्वन्त्यश्च विचिन्वन्तश्च । पुमांस्त्रियेत्येकशेषः । एवमेवापश्यन्त्यो मृगयन्तो हि यतोऽपश्यन्तस्ततो भीता भवेयुः । एवं बन्धूनां साध्वसं भीतिं मा कृध्वं न कुरुत । ततः प्रतियातेत्यन्वयः ॥ २० ॥

सुमनोरञ्जनी — अपि च वः मात्रादयः वः युष्मान् अपश्यन्तः विचिन्वन्ति मार्गयन्ति । बन्धूनां साध्वसं भयं मा कृध्वं मा कुरुध्वम् ॥ २० ॥

दृष्टं वनं कुसुमितं राकेशकररञ्जितम् ।
यमुनानिलनीरेजत्तरुपल्लवशोभितम् ॥ २१ ॥

सत्यधर्मीया — अत्रागमनकृत्यं लोकावलोकनतः सम्पन्नमित उत्तरत्र गृहगमनं युक्तमङ्गना इत्याह ॥ दृष्टमिति । कुसुमितम् । तारकादीतच् । राकेशश्चन्द्रस्तस्य करैः किरणै रञ्जितं प्रकाशितम् । यमुनाया उपर्यायातो मातरिश्वा तथा यमुनाया नीराणि च तैरेजन्त एजमानाः कम्पमानास्तरवो, मध्येगङ्गं मञ्जुलवञ्जुलादीनां समीरणेन नीरभूरुहाणां च कम्पनं युक्तं, तेषां पल्लवैः शोभितं वनं दृष्टं युष्माभिरिति शेषः । यमुनाया अनिलेन च नीरा नीला रलयोरभेदात् एजन्तस्तरुपल्लवा इति क्रमतोऽन्वयः । यमुनानैल्यान्नीलताऽनिलैजमानता च तरुपल्लवानां ज्ञेया ॥ २१ ॥

सुमनोरञ्जनी — यदर्थं वयमागताः तत्प्रयोजनमसाधयित्वा कथं याम इत्येतच्छलेनोत्तरयति ॥ दृष्टमिति । कुसुमान्यस्य संजातानीति तत्कुसुमितम् । राकेशस्य चन्द्रस्य करैः किरणैः राजितं शोभितम् । यमुनायाः अनिलेन नीरेण च एजद्भिः कंपमानैः तरूणां पल्लवैः शोभितम् । एतादृशं वनं भवतीभिर्दृष्टम् । भवदागमनप्रयोजनं सम्पन्नमेवेति भावः ॥ २१ ॥

तद् यात माचिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः ।
क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत ॥ २२ ॥

सत्यधर्मीया — तत्तस्मान्निष्पन्नागतिफलत्वात् । माचिरं गोष्ठं यात । हे सतीः सत्यः, पतीन् तदुपलक्षितार्यान् । पूर्वत्र मातरः पितरः पुत्राः पतय इत्युक्तौ तेषामेवात्रोक्तिस्तद्विलक्षणतां स्वस्मिन्द्योतयितुमिति मन्तव्यम् । वत्साः क्रन्दन्ति दोहनसमयोऽतीत इति तरणका अतो दुह्यत गा इति शेषः । बालाः पूर्वोक्ता क्रन्दन्ति तान्पाययत स्तनमिति शेषः । यथायथं सर्वं बालवत्सपदान्वययोग्यमिति प्रदर्शनाय व्युत्क्रमत उक्तिरिति ज्ञेयम् ॥ २२ ॥

सुमनोरञ्जनी — तत् तस्मात् । माचिरं शीघ्रं यात गच्छत । गत्वा च पतीन् शुश्रूषध्वम् । तत्र हेतुः, यतः सतीः सत्यः पतिव्रताः यूयमिति । सुपां सुलुगित्यनेन पूर्वसवर्णः । वत्साः गोवत्साः । बालाः युष्मदर्भकाश्च । तान् पाययत । स्तन्यमिति शेषः । गाश्च दुह्यत ॥ २२ ॥

अथवा मदभिस्नेहाद् भवत्यो यन्त्रिताशयाः ।
आगता ह्युपपन्नं तत् प्रीयन्ते मम जन्तवः ॥ २३ ॥

सत्यधर्मीया — वनविशेषविलोकनमात्रं नात्र रात्रावागतिफलमन्यदस्त्येतद्रूपमिति स्वयमेव ताः

प्रति विकल्प्य तद्युक्ततां वक्ति ॥ अथवेति । मदभिस्नेहान्मद्भक्तेर्यन्त्रिताशया नियमितान्तःकरणाः । भवन्त्यो भवत्य इति च समार्थौ पाठौ । आगतास्तर्ह्युपपन्नं भवदागमनं युक्तम् । कुत इत्यत आह । हि यतो मम मद्विषये जन्तवः प्राणिनः प्रीयन्ते स्वतः प्रीतिं कुर्वन्ति ततो भवतीनां मां प्रति यदागमनमङ्गनानां तदुपपन्नमिति भावः । मयीति पाठोऽप्यनामयः ॥ २३ ॥

सुमनोरञ्जनी — न वयं प्रयोजनान्तरार्थमागताः अपि तु भवत्स्नेहयन्त्रिताः सत्यः समागता इत्यतस्तदुपपन्नमेव तथापि न शास्त्रविहितं परित्याज्यमित्याह ॥ अथवेत्यादिना । मदभिस्नेहात् मद्विषयकस्नेहाद्यन्त्रिताशयाः मयि बद्धान्तःकरणाः सत्यः आगता इति यत् तत् उपपन्नं युक्तमेव । कुतः । जन्तवः प्राणिनः मम प्रीयन्ते । मां दृष्ट्वा सर्वोऽपि लोकः प्रीणातीति भावः ॥ २३ ॥

भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ।
तद् बन्धूनां च कल्याणं प्रजानां चानुपोषणम् ॥ २४ ॥

सत्यधर्मीया — धर्ममर्म नर्मतः शंसन् स्वाशां विशदीकुर्वन्काञ्चन लीलां लालयन्नालपति ॥ भर्तुरिति । अमाययाऽकापट्येन । हि यतो भर्तुः पत्युः । स्त्रीणामिति बहुवचनेन भर्तुरित्येकवचनेन च शाश्वतिकं भर्तृत्वं स्वस्यैवेति कटाक्षयतीति ज्ञेयम् । शुश्रूषणं सेवा परो धर्मो महान्धर्मस्तद्बन्धूनां कल्याणं तत्करम् । परो धर्म इत्यत्रेवोत्तरत्राप्यन्वेति । प्रजानामनुपालनं च ॥ २४ ॥

सुमनोरञ्जनी — तथापि अमायया अवञ्चनेन । भर्तुः पत्युः शुश्रूषणं स्त्रीणां परः उत्कृष्टो धर्मः । हि शास्त्रे लोके च प्रसिद्धमेतत् । न केवलं भर्तुः अपि तु तस्य भर्तुः बन्धूनां च बन्धूनामपि शुश्रूषणं कल्याणं मङ्गलप्रदं भवति । प्रजानां च पुत्रादीनां तु, अनुपोषणं अनुकूलपोषणं, परो धर्म इति पूर्वेणान्वयः । यद्वा तत् भर्तृशुश्रूषणं बन्धूनां स्वबन्धूनां कल्याणम् । प्रजानां चानुपोषणं पुष्टिकारणमित्यर्थः ॥ २४ ॥

दुश्शीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ।
पतिः स्त्रीभिर्न हातव्यो लोकेऽशुचिरपातकी ॥ २५ ॥

सत्यधर्मीया — पतिरेवमनेवं चेत्सेवनीयोऽसेवनीयश्च वनिताभिरित्याह ॥ दुःशील इति । दुःशीलो दुराचारः । दुर्भगो निर्वीर्यः । वृद्धो जरठो, जडो मूढो, रोगी कुष्ठादियुतोऽधनो दरिद्रो लोकेऽवलोकने योऽशुचिर्निर्नैर्मल्यः सोऽपि न हातव्यो न त्याज्योऽपातकी पञ्चमहापातकरहितः । अनेन पातकित्यागे समयसम्मतिं सूचयति । यदि स्यान्नैव पातकीत्यादेः । लोकेप्सुभिरपातकीति पाठे लोकमीप्सवो लोकेप्सवस्ताभिः ॥ २५ ॥

सुमनोरञ्जनी — ननु पत्युर्दौःशील्यादिमत्वे कथं कर्तव्यमित्यत आह ॥ दुःशील इति । दुः दुष्टं शीलं स्वभावो यस्य । दुर्भगः यशोविहीनः, निर्वीर्यः कान्तिरहितश्च । जडो मूर्खः । एतादृशोऽपि पतिः स्त्रीभिः न हातव्यः न त्याज्यः । तर्हि पतितादेरप्यत्याज्यतापत्तिरत उक्तम् ॥ शुचिरपातकीति । शुचिः पातित्यादिदोषशून्यः । अपातकी ब्रह्महत्यादिपातकशून्यश्चेन्न हातव्य इत्यन्वयः ॥ २५ ॥

अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ।
जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियः ॥ २६ ॥

सत्यधर्मीया — हे कुलस्त्रियः! औपपत्यमुपपतेः पतिप्रतिनिधिधवस्य कर्मौपपत्यं ग्राम्यकर्मेति यावत् । तात्कालिकं सन्ध्यभावं सूचयितुं निस्सन्धिनिर्देशः । इयद्विपत्प्रदमिति तन्न कार्यमित्याह ॥ अस्वर्ग्यमिति । स्वर्गसाधनं न चेदैहिकं किञ्चित्सुखं वर्ततेत्यत आह ॥ अयशस्यमिति । यशोनाशकं काकमांसं शुनोच्छिष्टं स्वल्पमिति, फल्गुफलं कृच्छ्रं कष्टवद्भयावहं तत्पत्यादिदर्शने भवेत्ताडनादिकमिति भयावहम् । जुगुप्सितं शास्त्रतो निन्दितम् । इति सर्वत्रः सर्वांस्त्रायत इति स तथा कृष्णः प्रतियातेत्यवददिति वाऽन्वयः । सर्वत्रेत्थमपि क्वचिदुत्कर्षहेतुर्भवतीत्यतोऽप्याह ॥ अयशस्यमिति । अये शुभावहे दैवे सति शस्यं भवतीन्द्रादौ । यथोक्तं गीताभाष्ये । अहल्याजारत्वाद्यपि दोषकृतोऽपि ते न बहुतरो लेप आसीदित्युत्कर्षमेव वक्तीति । इदं क्वाचित्कं तत्तु प्रायिकत्वाभिप्रायमिति ॥ २६ ॥

सुमनोरञ्जनी — पत्युरपरित्याज्यत्वमुक्त्वा औपपत्यं गर्हितमस्वर्ग्यमित्यादिना । कुलस्त्रियः औपपत्यं उपपतिर्जारः तत्सम्बन्धि सुखं औपपत्यम् । जुगुप्सितं निन्दितम् । अत एव तत् अस्वर्ग्यं स्वर्गविरोधि । इह लोके अयशस्यम् अकीर्तिकरम् । फल्गु अल्पकालीनम् । कृच्छ्रं कष्टम् । भयावहं इहामुत्र च भयजनकम् ॥ २६ ॥

श्रवणाद् दर्शनाद् ध्यानान्मयि भावोऽनुकीर्तनात् ।
न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥

सत्यधर्मीया — यामिनीमलक्षयित्वा लक्षयित्वा त्वां प्रत्यागतानामङ्गनानां त्वत्सङ्गमङ्गलमप्रदाय यातेति कथं कथयसि मधुनाथेत्यत आह ॥ श्रवणादिति । श्रवणात्कथाश्रवणाद्दर्शनात्प्रस्तुतात्, ध्यानाद्दृष्टमदाकारचिन्तनादनुकीर्तनान्नामचरितकीर्तनान्मयि भावो भक्तिर्यथोदेति तथा सन्निकर्षेणाङ्गसङ्गादिना न भवति यत्ततो गृहान्प्रतियात ॥ २७ ॥

सुमनोरञ्जनी — ननु न वयं त्वय्युपपतिबुध्या समागताः किं तु त्वद्भक्तिरेव मुक्तिसाधनमिति मन्वानाः त्वद्दास्यलक्षणभक्तिसंपादनार्थमेवेत्यत आह ॥ श्रवणादिति । सत्यं, मयि भक्तिर्मुक्ति-

साधनमिति तथापि यथा श्रवणात्, अनुकीर्तनात्, प्रवचनात्, ध्यानाच्च मयि भावः भक्तिः भवति तथा सन्निकर्षेण समीपनिषेवणेन न भवति । अतः परोक्षेण भक्तिसंपादनार्थं गृहान् प्रति यातेत्यन्वयः ॥ २७ ॥

श्रीशुक उवाच—

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ।
विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

सत्यधर्मीया — गोविन्दभाषितं मयेमा रंस्यथ क्षपा इति प्रागभिहितमाकर्ण्यायाता यास्ताः, इति गृहान्प्रति यातेति विप्रियं सद्यस्तथाभूतमाकर्ण्य विषण्णा. भग्नसङ्कल्पा विषादयुक्ता रमारमणेन सह रमणसङ्कल्पो भग्नः स इव यासां ता गोप्यो दुरत्ययां रङ्गेशाङ्गसङ्गं विनाऽत्येतुमशक्यां तस्य खेदपूर्वकस्मृतिमापुः ॥ २८ ॥

सुमनोरञ्जनी — इति 'प्रतियात ततो गृहान्' इत्येवंरूपं विप्रियं विप्रियमिव प्रतीयमानम् । गोविन्दस्य भाषितमाकर्ण्य । भग्नः सङ्कल्पः कृष्णाङ्गसङ्गोऽद्य भवितेत्येवंरूपमनोवृत्तिर्यासां ताः । अत एव विषण्णाः ॥ २८ ॥

न्यक्कृत्य वक्त्रवनजान्यतितापशुष्यद्बिम्बाधराणि चरणेन महीं लिखन्त्यः ।
अस्त्रैरुपात्तमषिभिः कुचकुङ्कुमानि तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥२९॥

सत्यधर्मीया — यदा दामोदरो नान्वमोदत तदा तासां दशेदृश्यासीदिति श्लोकद्विकेन शुको वक्ति ॥ न्यक्कृत्येति । वक्त्रवनजानि वक्त्राण्येव वनं जलं तज्जानीति मुखकमलानि न्यक्कृत्य न्यग्भावं प्राप्याधः कृत्वेति यावत् । अतितापेन प्रियविप्रियभाषाजेन शुष्यन्तो बिम्बविडम्बका अधरा ओष्ठा येषां तानि । अधरो दन्तवसने खर्वे हीनेऽधरोऽन्यवदिति विश्वः । ओष्ठाधरौ तु रदनच्छदावित्यमरश्च । चरणेन तन्नखमुखेन महीं भूमिं लिखन्त्यः । कोकतन्त्रसिद्धोऽयं भावो भामिनीनां चिन्तावसरे, यद्यपि तथाऽपि हे महि महिमाऽयं तव यतस्त्वत्प्रार्थनयाऽयमवतारो जातो न जातश्चास्मन्मनोरथः फलितः फलितार्थस्तु न इयद्विपत्तिमूलं त्वमिति तत्त्वमिति मेदिनीविदारणमिति ध्वनयति । तथा हि कामतन्त्रे। कामबाणप्रविद्धाङ्गी खिन्नयोनिर्वराङ्गना । पादाङ्गुष्ठनखेनाधोवदना लिखति क्षितिमिति तत् । उपात्ता मष्यः कज्जलानि यैस्तैरस्रैरश्रुभिः । अस्रमश्रु वेत्यमरः । जलगलनलवकज्जल-विगलनमुचितं सदपि यदा नीरदनीलविश्लेषस्तदाऽऽत्मसंश्लेषोऽपि मास्तु सावर्ण्यादिति ध्वनयति

तदनया धात्र्येति मन्तव्यम् । कुचकुङ्कुमानि मृजन्त्यो मार्जयन्त्य उरुदुःखस्य भरो यासां तास्तूर्ष्णीं तस्थुः । स्मेति तदुक्तस्मृतिमत्यः ॥ २९ ॥

सुमनोरञ्जनी — प्रियतमेन विप्रलब्धानां स्वभावमाह ॥ न्यक्कृत्येति । अतिताप: अन्तर्गत-चिन्ताग्नितापः तेन शुष्यन्ति बिम्बफलसदृशान्यधराणि येषु तानि । वक्त्रवनजानि मुखकमलानि । न्यक्कृत्य अधःकृत्वा । चरणेन स्वस्वचरणेन महीं भूमिं लिखंत्यः । उपात्तमषिभिः गृहीतकज्जलैः । अस्रैः अश्रुभिः कुचेषु लिप्तानि कुङ्कुमानि मृजंत्यः क्षालयन्त्यः । उरुदुःखस्य भरो यासु ताः तूर्ष्णीं स्थिताः स्मेति ॥ २९ ॥

प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः ।
नेत्रे विमृज्य रुदितोपहते स्म किञ्चित्संरम्भगद्गदगिरोऽब्रुवतानुरक्ताः ॥ ३० ॥

सत्यधर्मीया — प्रियेतरमिवाप्रियमिव प्रेष्ठमपि प्रतिभाषमाणं कृष्णम् । तदर्थविनिवर्तित-सर्वकामास्तदर्थं तद्रत्यर्थं विनिवर्तिताः सर्वे कामाः काम्या भर्त्रादिविषया याभिस्ताः । रुदितं रोदनं तेनोपहते नेत्रे । नेत्रे इत्युक्तिरेकैकस्त्रीविवक्षया । गतम् । नेत्रे नियामकायेति वा । नाथाय । विमृज्य पाणिभ्याम् । किञ्चित्संरम्भगद्गदगिरा संरम्भेण गद्गदगिरः स्खलद्वचनाः । अनुरक्ताः सत्योऽ-ब्रुवतावदन् ॥ ३० ॥

सुमनोरञ्जनी — तस्य कृष्णस्यार्थे विनिवर्तिताः परित्यक्ता इति यावत् सर्वे कामाः विषयाः याभिस्ताः । तस्मिन्नेवानुरक्ताः गोप्यो, रुदितेन उपहते क्लिष्टे । नेत्रे विमृज्य परिमार्ज्य । संरम्भेण किंचित्प्रणयकोपेन गद्गदस्वरोपेता गिरो यासां तथाविधाः सत्यो अब्रुवत अब्रुवन् । संरम्भगद्गदाः गिरो वचनानि अब्रुवन्निति वा । संरम्भे निमित्तमाह ॥ प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणमिति ॥ ३० ॥

गोप्य ऊचुः—

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तव पादमूलम् ।
भक्त्या भजेम दुरवग्रह मा त्यजास्मान् देवो यथाऽऽदिपुरुषो भजतो मुमुक्षून् ॥३१॥

सत्यधर्मीया — कामिन्योऽन्योन्यमालोच्याच्युतं प्रति किमब्रुवन्नित्यत आह ॥ मैवमिति । हे विभो! दुरवग्रह! प्रमदास्वस्मासु प्रेमप्रवर्षणविघातकरहित! नृशंसं कण्ठकर्तनरूपं यथा भवति तथा गदितुं व्यक्तं कर्तुं भवान्नार्हति न योग्यो भवति । सर्वविषयानितरान्सन्त्यज्य तव पादमूलं भजेमेति यामिनीत्यनालक्ष्य कामिनीरुपयाता इत्यस्मान्मा त्यज । सपक्षमन्यमनाचक्षाणाः पुष्कराक्ष्य आहुः ॥

देव इति । यथाऽऽदिपुरुषो देवो हरिर्मुमुक्षून्मोक्षापेक्षावतस्तथाऽऽत्मानं भजतो भजमानान् यथा न त्यजति तथा न त्यजेति । न काऽपि कामिनी कामिता मयाऽहं चोर्ध्वरेता इति न वद स्वामिंस्त्वद्रतिपात्रमस्माभिर्विदितं किञ्च नास्माकं साक्षादधोक्षज तेऽङ्गसङ्गः किन्त्वित्थमित्यप्याहुः ॥ मेति । एवं सङ्गमस्मदभीप्सितं मा रमाऽर्हति । एवमस्मत्सङ्गः स्याच्चेदपि तत्सुखं माऽर्हतीति ॥३१॥

सुमनोरञ्जनी — किमित्यब्रुवन्निति तदाह ॥ मैवमिति । भवान् नृशंसं क्रूरं वचनं गदितुं नार्हति । कुतः । यतः सर्वविषयान् सन्त्यज्य तव पादमूलं भक्त्या भजेम । त्वं तु न केनापि प्रतिबद्ध इत्याह ॥ दुरवग्रहेति । अवग्रहः प्रतिबन्धकः तद्रहित इत्यर्थः । अवग्रहो वर्षावघातः तद्रहितः भक्ताभीष्टवर्षणशील इत्यर्थ इति पदरत्नावल्याम् । अतोऽस्मान् मा त्यज । तत्र दृष्टान्तः ॥ देव इति । आदिपुरुषो नारायणः । भजतो भक्तान् ॥ ३१ ॥

यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्येव तत् तदपि देव वरे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ ३२ ॥

सत्यधर्मीया — शुश्रूषध्वं पतीन्सतीरित्युक्तमुत्तरयन्ति ॥ यदिति । अङ्ग हे देव कृष्ण! स्त्रीणां पत्यपत्यसुहृदामनुवृत्तिः स्वधर्म इति यच्छास्त्रविदा त्वयोक्तं तदपि, वरेऽस्माभिर्व्रियत इति स तस्मिन्नीशे त्वय्यस्त्येव । न केवलं कुवलयलोचनानामस्माकं त्वं प्रेष्ठः किन्तु सामान्यतस्तनुभृतां बन्धुरात्मा स्वामी भवान्किल समस्तसमयसिद्धमिदं प्रमेयम् । अनश्वरेश्वरे पतित्वादिकं सर्वं सम्भवदिति तदादिसेवाऽपि वासुदेवात्रैव लभ्यत इति न गमनमनोऽस्माकमिति यातेति न गद गदाग्रजेति तात्पर्यम् ॥ ३२ ॥

सुमनोरञ्जनी — हे अङ्ग ! धर्मविदा त्वया । यत् पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्म इत्युक्तं तदस्त्येवास्मासु । एतदपि पत्यादिभावेनानुवर्तनमपि देववरे ईशे सर्वप्रेरके त्वय्येव त्वद्विषयमेवेत्यर्थः । पत्यादिभावेन त्वामेवानुवर्तयामो नान्यानिति भावः । नन्वेकस्मिन् पतित्वबन्धुत्वादिकं कथमुपपद्यत इत्यतस्तत्तद्गुणयोगादित्याह ॥ प्रेष्ठ इत्यादिना । भवान् तनुभृतां प्राणिनां प्रेष्ठः परमेष्टसाधनम् । अतः पतित्वं युज्यते । बन्धुः बन्धूनां गुणयुक्तः । आत्मा पत्यादिषु स्थित्वा त्वमेवादानादिकर्तेति । सुहृदन्तरात्मेति पाठः साधुः । पूर्वमाचार्यचरणैः समाख्यात्वेन एतत्पाठस्यैव धृतत्वात् ॥ ३२ ॥

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन् नित्यप्रियैः पतिसुतादिभिरार्तिदैः किम् ।
तन्नः प्रसीद वरदेश्वर मा स्म छिन्द्या आशां धृतां त्वयि परामरविन्दनेत्र ॥३३॥

सत्यधर्मीया — तदेवौत्सुक्यातिशयेन विशदयन्ति ॥ कुर्वन्तीति । कुशलाः शिक्षिताः सन्तः । कुशलः शिक्षित इति विश्वः । आत्मन्परमे व्योमन्निितिवदात्मनि स्वात्मनि त्वयि स्वे स्वतन्त्रे । परः स्वो हरिरुद्दामो, अनन्याधीनशक्तित्वाद्धरिः स्व इति चोच्यत इति मात्स्य इत्यादितृतीयतात्पर्योक्तेः । हि यतो रतिं कुर्वन्ति तादृशे त्वयि सति नित्याप्रियैर्नित्यमप्रिया इति नित्याप्रियास्तैः पतिसुतादिभिरार्तिदैः पीडादैः किं, किं प्रयोजनम् । तत्तस्माद्वरदेश्वर समस्तमसमस्तं च हे अरविन्दनेत्र प्रसीद । त्वयि परां धृतामाशामभिलाषं मा स्म छिन्द्या अतोऽन्त्यन्तिके नोऽस्मान्कुर्वित्यावृत्त्याऽन्वयोऽपि । यदन्ति यच्चदूरके । तथा षष्ठाष्टके पञ्चमेऽध्यायेऽतिषद्भूतवामव इत्यृग्व्याख्याने चान्त्यस्मदन्तिक इति परैरपि व्याख्याततत्वात् । अनेन क्रन्दन्तीत्याद्युत्तरितमिति ज्ञेयम् । अभिलाषकामादिपदं विहाय विशाललोचनाः आशामिति गदन्त्यश्शब्दतोऽपि नान्यपुंसङ्गोऽस्त्विति ध्वनयन्ति ॥ ३३ ॥

सुमनोरञ्जनी — ननु तर्हि मुख्यपत्यादय एवानुवर्तनीयाः न तद्भावेनाहमित्यतस्त्वमेव मुख्यः पतिः । अन्ये तु दुःखहेतुत्वादमुख्या इति न तैरस्माकं प्रयोजनमित्याह ॥ कुर्वन्तीति । कुशलाः सारासारविवेकिनः । स्वे स्वतन्त्रे आत्मन् आत्मनि निरुपाधिकप्रिये त्वयि त्वय्येव रतिं भक्तिं कुर्वन्ति हि यस्मात् तस्मात् नः अस्माकं आर्तिदैः अत एव नित्यं अप्रियैः अस्मत्प्रेमानास्पदैः पत्यादिभिः किं, न किमपि प्रयोजनम् । तत् तस्मात् त्वयि धृतां त्वद्विषयां परां उत्कटां आशां मा छिन्द्याः । किंतु नोऽस्मभ्यं प्रसीद प्रसन्नो भवेति ॥ ३३ ॥

चित्तं सखे न भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ।
पादौ पदं न चलतस्तव पादमूलाद् यामः कथं व्रजमथो करवाम किं वा ॥ ३४ ॥

सत्यधर्मीया — व्रजं प्रति यात्रा रात्रौ गात्रविस्राणनादिनाऽनुपपन्नाऽस्मन्नाथेति विज्ञापयन्ति ॥ चित्तमिति । यद्धे सखे भवतापहृतं भवे भवो यस्तापस्तस्य हृतं हृतिर्येन तच्चित्तं भवता त्वयाऽपहृतं गृहेषु न निर्विशत्युत । करावपि गृह्यकृत्ये गृहकर्मणि न निर्विशतः । पादौ करावििति चैकविवक्षया । पादौ, पदमेकं चरणन्यासं, कर्तुं न चलतः । पदं किञ्चिल्लक्ष्यमुद्दिश्य न चलत इति वा । तव पादमूलाद्व्रजं कथं व्रजामः । अथो गमनानन्तरं किं वा करवाम त्वत्प्रत्तचित्तानां किञ्चित्पुरः प्रतिभातीति भावः । सुखेनेति पाठे तदात्मकेन भवतेत्यन्वयः । नेत्युभयत्र न चलत इत्यत आकृष्यते ॥ ३४ ॥

सुमनोरञ्जनी — इत्थं स्वप्रार्थनया किञ्चिन्मन्दस्मितं कृष्णमवलोक्य तदनुरूपमाहुः ॥ सखे! भवता । सखा चापि सखस्तथेति द्विरूपकोशात् । हे यादव हे सखेति प्रयोगाच्च । अकारान्तोऽपि सखिशब्दपर्यायोऽस्ति । चित्तम् अपहृतं यस्मात् तत् चित्तं गृहेषु न निर्विशति न स्मरतीत्यर्थः । करावपि गृहकृत्ये गृहसम्बन्धिनि कार्ये न चलतः । पादावपि, तव पादमूलात् तव पादस्य

मूलादाश्रयात् इतो देशात् पदं पादविन्यासप्रदेशं न चलतः । अतः कथं यामः । अथो अनन्तरं किं करवाम । साधनाभावादिति भावः ॥ ३४ ॥

सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ।
नो चेद् वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ॥ ३५ ॥

सत्यधर्मीया — कामिन्यो यामिन्यां मया किं कर्तव्यं तद्वदतेत्यतः सुदत्यो विज्ञापयन्ति ॥ सिञ्चेति । तवाधरामृतस्य पूर एव प्रवाह एव पूरकस्तेन । अल्पार्थे कन्वा । हासावलोकः सस्मितकटाक्षमोक्षः स च कलमव्यक्तमधुरं गीतं च तस्माज्जायत इति स चासौ हृच्छयो मदनः स एवाग्निस्तं सिञ्चाभिषिञ्च शमयेति यावत् । नो चेन्न शमयसि चेद्वयं विरहो वियोगस्तज्जो योऽग्निस्तेनोपयुक्तः समीप एव सम्बन्धो देहो यासां ताः । अङ्ग हे सखे! ते पादयोर्ध्यानेन ते पदवीमपवर्गमार्गं याम ॥ ३५ ॥

सुमनोरञ्जनी — स्पष्टं स्वाभीष्टं प्रार्थयंति ॥ सिञ्चेति । हे अङ्ग! त्वदधरामृतस्य पूरकेण प्रवाहेण । हासावलोकाभ्यां कलगीतेन मधुरगानेन जातो हृच्छयः कामः स एवाग्निः तं सिंच अभिषिंच शमय । नो चेत् वयं विरहात् त्वद्विरहात् जातेन अग्निना उपयुक्तदेहाः गृहीतदेहाः दग्धदेहाः सत्यः ते पदयोः पदवीं मार्गं यामेति पदरत्नावली । अनेन त्वमस्मान् त्यजसि चेत् प्राण-त्यागमेव कुर्म इति ध्वनितं भवति ॥ ३५ ॥

यर्ह्यम्बुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग स्थातुं त्वया विरहिता बत पारयामः ॥ ३६ ॥

सत्यधर्मीया — हे अम्बुजाक्ष! वयं, रमाया दत्तः क्षणोऽवसरो येनोत्सवो वा येन तत्तव पादतलम् । यर्हि यदा । क्वचिद्वनेऽरण्यजनप्रियस्य वृन्दावनवासिजनप्रियस्य । आन्तरङ्गिको भाव-स्त्वरश्च वैण्यश्च सुधासमुद्रौ । अरश्च ह वैण्यश्चार्णवौ ब्रह्मलोक इत्याद्युक्तारण्याख्यसमुद्रवद्वैकुण्ठवासि जनप्रियस्येति । अस्प्राक्ष्म स्पृष्टवत्यस्तत्प्रभृति तत्क्षणमारभ्यान्यसमक्षम् । प्रतिपरिसमनुभ्योऽक्ष्ण इत्यच् । त्वदितरनरसम्मुखे स्थातुं त्वया विरहिता न पारयामः शक्नुमः । बत खेदे बताश्चर्यं वेति वा ॥ ३६ ॥

सुमनोरञ्जनी — रमायाः दत्तक्षणं दत्तोत्सवम् । दत्तः क्षणः आश्चर्यतया निर्व्यापारावस्था येनेति वा । दत्तावसरं वा । निर्व्यापारस्थितौ कूलविशेषोत्सवयोः क्षण इत्यमरः । अरण्यजनाः प्रिया यस्य । अरण्यजनः सन्न्यस्तजन इति पदरत्नावल्याम् । तव पादतलं क्वचित् वने यर्हि यदा अस्प्राक्ष्म

स्पृष्टवत्यः । तत्प्रभृति तत्क्षणमारभ्य । अन्येषां पुरुषाणां समक्षमपि अभिमुखं स्थातुं न पारयामः न शक्नुमः ॥ ३६ ॥

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वाऽपि वक्षसि पदं किल भृत्यजुष्टम् ।
यस्याः स्ववीक्षणकृतोऽन्यसुरप्रयासस्तद्वद् वयं च तव पादरजः प्रपन्नाः ॥ ३७ ॥

सत्यधर्मीया — अधोक्षज! लक्ष्मीरपि काङ्क्षति त्वत्पदपद्मं कथा काऽस्माकमिति भावेन वदन्ति ॥ श्रीरिति । वक्षसि पदं स्थानं लब्ध्वाऽपि । अन्येषां सुराणां ब्रह्मादीनां प्रयासः । यस्याः स्वनिरीक्षणार्थं कृतो, लोकावलोकनं कथमस्माकं भवेदिति तदर्थं कृतयत्ना इतरेऽमराः । सा भृत्यजुष्टं भक्तजनसभाजितं तुलस्याः पदमास्पदम् । भृत्या(त्यै) न जुष्टं भृत्यजुष्टं स्वोदरभरणार्थं सेवितं नेत्यर्थः । एतेन भृत्यजुष्टत्वं साधारणं किं वक्तव्यमिति निरस्तम् । यत्पदाम्बुजरजश्चकमे तद्वत्सेव वयं तव पादरजः प्रपन्ना आश्रिताः । यद्वा तद्वद्वयमिति पदमेकम् । साऽस्त्यास्विति तद्वत्यस्ताश्च ता वयं च तद्वद्वयं तत्सन्निधानयुता वयमित्यर्थः । नायोग्यताप्रयुक्तत्याज्यत्वा वयमिति भावः ॥ ३७ ॥

सुमनोरञ्जनी — बतेत्यनेनोक्तमाश्चर्यं त्वत्पादमहिम्नः । तदेव दर्शयति ॥ श्रीरिति । यस्याः श्रियः स्ववीक्षणकृते स्वान्प्रति यदीक्षणमवलोकनं तत्कृते तदर्थं श्रीः अस्मान् अवलोकयतु इत्येदर्थ-मिति यावत् । अन्येषां सुराणां प्रयासः प्रयत्नः सा श्रीः वक्षसि पदं स्थानं लब्ध्वापि । भृत्यैः जुष्टं सेवितम् । तुलस्या जुष्टमिति विविच्यान्वेति । तुलस्याः पदमिति वा । यत्पदाम्बुजरजः यस्य श्रीकृष्णस्य पदाम्बुजरजःशुश्रूषणां चकमे अकामयत । तुलस्या सहाकमतेति वा । तद्वद्वयमपि प्रपन्नाः स्मेति भावः ॥ ३७ ॥

तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ।
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥ ३८ ॥

सत्यधर्मीया — हे वृजिनार्दन पापापनोदक! यतो वसतीर्गृहान्विसृज्य त्वदुपासने आशा यासां तास्तेऽङ्घ्रिमूलं प्राप्ता इति तन्न उपरि प्रसीद । प्रसादश्चैतदात्मेत्याहुः ॥ त्वदिति । सुन्दरं च तत्स्मितं मन्दहासश्च, सुन्दरं च तद्वीक्षणं चैताभ्यां तीव्र उद्रिक्तो यः कामस्तेन तप्त आत्मा देहो यासां ताः । हे पुरुषभूषण! पुरुषालङ्काराकार ते दास्यं देहि वितर ॥ ३८ ॥

सुमनोरञ्जनी — हे वृजिनार्दन दुरितनाशन ! यद्यस्मात्तव पादरजः प्रपन्नाः तत् तस्मात् त्वदुपासने त्वद्भजने आशा इच्छा यासां ता तथाविधाः । वसतीः गृहान् विसृज्य तव पादमूलं प्राप्ताः

नः अस्मान् प्रति प्रसीदेत्यन्वयः । हे पुरुषभूषण पुरुषश्रेष्ठ ! तव यत्सुन्दरं स्मितं मन्दहासः निरीक्षणं च ताभ्यामुत्पन्नो यस्तीव्रः कामस्तेन तप्तात्मनां सन्तप्तचित्तानाम् । तद्देहानां वा । त्वत्सुन्दरस्मितस्य निरीक्षणेनोत्पन्न इति वा ॥ ३८ ॥

वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ३९ ॥

सत्यधर्मीया — वीक्ष्यालकावृतमुखमिति ॥ वीक्ष्या दर्शनीया अलकाश्चूर्णकुन्तलास्तैरावृतं च तन्मुखं च कुण्डलश्रीमद्गण्डस्थलं च यस्य तदधरयोर्दन्तवसनयोः सुधाऽमृतं यस्य तत्तच्च हसितेन हासेन सहितोऽवलोको यस्य तत् । दत्ताभयं भुजदण्डयुगं च विलोक्य । वस्त्रवितरणस्य भुजद्वितयकार्यत्वात्तथा रंस्यथेति कथितालिङ्गनस्यापि तदङ्गसाध्यत्वात्तद्दत्ताभयता तद्वाराऽस्मदनुभूतेति सूचयन्त्येनेनेति ज्ञेयम् । श्रियैकरमणम् । यणागमो गतम् । रमाविलासालयं वक्षश्च विलोक्य तव दास्यो भवाम लोट् । त्वं च अ मदस्मदभिमुखमागच्छदास्यं मुखं यस्य स भवेत्यप्यर्थः । अ इति हरिसम्बोधनम् ॥ ३९ ॥

सुमनोरञ्जनी — अलकैः चूर्णकुंतलैः आवृतं मुखम् । कीदृशम् । कुण्डलयोः श्रीः ययोर्याभ्यां वा ते गण्डस्थले, अधरसुधा च यस्मिन् तत् । हसितेन युक्तमवलोकं च वीक्ष्य, दत्तमभयं येन तथाविधं भुजदण्डयुग्मं च । श्रियः एकरमणं मुख्यरतिस्थानं वक्षश्च विलोक्य तव दास्यो भवाम इति ॥ ३९ ॥

का स्त्र्यङ्ग ते कलपदायतवेणुगीतसम्मोहिताऽऽर्यचरितान्न चलेत् त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद् गोद्विजद्रुममृगाः पुलका न्यबिभ्रन् ॥ ४० ॥

सत्यधर्मीया — औपपत्यं जुगुप्सितमित्युक्तमर्थादुत्तरितं तथाऽपि कैमुत्येनाच्युतैतस्माच्च्युतिरार्यमार्गादननुभूतैतद्रसानां सारसाक्षीणां भवेत् । कथा तु कैतदनुभववतीनां नः । किञ्च स्थावरा अपि भवन्त्येवं देवेति वासुदेवं प्रति वदन्ति ॥ केति । अङ्ग रङ्ग! कलपदायतवेणुगीतसम्मोहिता अयतं मूर्च्छितम् । अमृतेत्यपि पाठः स्फुटार्थः । तादृशगीतेन सम्मोहिता का स्त्री आर्यचरितात्सन्मार्गादव्यभिचरितायास्त्रिलोक्यां त्रयाणां लोकानां समाहारस्त्रिलोकी तस्यां न चलेद्भ्रष्टा न भवेत् । दूरतोऽपि त्वत्पूरितवेणुशब्दश्रवणतो मृगदृशां दशेदृशी यदा तदा त्रैलोक्यसौभगं त्रिलोकीसुन्दरतरमिदं रूपं निरीक्ष्य च काऽम्बुजाक्षी न चलेत् । यत् यतो मुरलीस्वरतो गाश्च द्विजाः पक्षिणश्च द्रुमाः सजीवा वृक्षाश्च मृगाश्चैते ये पुलका अस्माकमुदभवंतस्तान्रोमाञ्चान्यबिभ्रन्नितरां भृतवन्तः । प्रायो बताम्ब

मुनय इति प्रागभिहितत्वाद्द्रुमाणामन्तर्निरीक्षणमपि सम्भवतीति निरीक्ष्येत्यपि योजनीयमिति मन्तव्यम्। न्यबिभ्रन्निति पुलका एतानीत्यन्वयेन, पुलकः कृमिभेदे स्यात्तल्पेऽश्वमणिदोषयोः । गजात्तपिण्डे रोमाञ्चे हरिताले शिलान्तर इति विश्वमेदिन्यादयोऽनुकूलिता इत्याकलनीयम् । चलेच्च याच न चञ्चललोचना सा का कुत्सिताऽयोग्येत्यप्यन्वयः । त्रिलोक्यामित्यत्र त्रिलोकी आमिति छेदः । त्रिभिर्नेत्रैर्लोकयितुमवलोकयितुं शीलमस्यास्तीति त्रिलोकी रुद्रस्त्रैलोक्यसौभगं रूपं निरीक्ष्य आ सम्यक् चचालेति वा ॥ ४० ॥

सुमनोरञ्जनी — कुलस्त्रीभिर्न मनश्चाञ्चल्यं कार्यं औपपत्यस्य गर्हितत्वादित्यस्योत्तरमाहुः ॥ का स्त्रीति । कलैः अव्यक्तमधुरैः पदैः अमृतमिवामृतमानन्दकरं यद्वेणुगीतं तेनैव संमोहिता । अथ च त्रैलोक्यसौभगं सुन्दरमिदं तव रूपं च निरीक्ष्य त्रिलोक्यां लोकत्रये का स्त्री, आर्यचरितात् आर्याणां कुलस्त्रीणां चरितं पातिव्रत्याख्यं तस्मान्न चलेत् । नेदं चित्रम् । पश्वादयोऽपि यत् येन वेणुगीतेन संमोहिताः सन्तः पुलकानि रोमांचानि अबिभ्रन् अधारयन् ॥ ४० ॥

व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो देवो यथाऽऽदिपुरुषः सुरलोकगोप्ता ।
तन्नो निधेहि करपङ्कजमार्तबन्धो तप्तस्तनेषु च शिरस्सु च किङ्करीणाम् ॥ ४१ ॥

सत्यधर्मीया — त्वदङ्गसङ्गेऽङ्गनानां न जारता यदज एवैवं जात इत्याहुः ॥ व्यक्तमिति । यो देव आदिपुरुषः सुरलोकगोप्ता नारायणः स एव व्रजभयार्तिहरो व्रजस्य तत्स्थजनस्य भयं चार्तिश्च तयोर्हरोऽभिजातः प्रादुर्भूत इति व्यक्तमिदं निश्चितम् । न चाविष्टरूपमिदमित्याहुः ॥ यथेति । सम्यगनाविष्ट इत्यर्थः । स्वदृष्टान्तो हरेर्भवेदित्यृग्भाष्योक्तेर्यथाऽऽदिपुरुषो हरिस्तथैवाभिजातोऽसि नेषद्वैषम्यं तव तेनेति वा तत्तस्माददोषावहमिति । तव करपङ्कजं किङ्करीणां दासीनां न आर्तबन्धो आदितः शिरस्सु निधेह्यनन्तरं तप्तेषु मन्मथमथनतः स्तनेषु निधेहि । शिरःकरकरणेन दासीत्वेन परिग्रहस्तेन चोत्तरप्रार्थना सङ्गच्छत इति ज्ञेयम् ॥ ४१ ॥

सुमनोरञ्जनी — अभ्युपगम्येदमुदितम् । वस्तुतस्तु अनेकजन्मासादितसाधनसंपत्यापि दुरवापं सर्वस्वामिनं भवन्तं कथमुपपतिं मन्यामह इत्याहुः ॥ व्यक्तमिति । व्रजभवार्तिहरो भवानादिपुरुषः श्रीहरिरेव । व्रजस्य भवार्तिः संसारदुःखम्, व्रजभवानां गोपगोपीनामार्तिं हरतीति वा व्रजभवार्तिहरः सन्नभिजात इति व्यक्तं निश्चितमेव । यथा आदिपुरुष एव सुरलोकस्य गोप्ता रक्षकः सन् वामनतयाऽभिजातस्तथा । इत्थं च सर्वस्वामी भवान् कथमुपपतिः स्यात् । त्वत्सङ्गेन कथमस्माकं निन्द्यता स्यादिति भावः । तत् तस्मात् किंकरीणां नः शिरःसु, तप्तेषु कामाग्निसन्तप्तेषु स्तनेषु च करपङ्कजं निधेहि स्थापय ॥ ४१ ॥

श्रीशुक उवाच—

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ।
प्रहस्य सदयं गोपीरात्मारामो न्यरीरमत् ॥ ४२ ॥

सत्यधर्मीया — तासां विक्लवितं विह्वलितं वचनमिति श्रुत्वा । स्वयमेकोऽनेकाः कामिनीः कथं रमयामास । कथन्तरां ताः पत्नीः पतयोऽगृह्णन्सर्वत्रानुपलभ्यमानात्मारामताभिमता कथन्तमामित्यस्य सर्वस्याप्युत्तरं योगेश्वराणामीश्वर इति । अचिन्त्यशक्त्या वा बहुविग्रहग्रहणेन स्वपार्श्वस्थता-प्रतिपत्तिप्रापणेन वा तत एवात्मारामतेति । सदयमित्येतत्प्रहस्येत्यनेन न्यरीरमदित्यनेनाप्यन्वेति । ता गोपीर्नितरामात्मारामः स्वरतोऽपि । अनेन करुणैवात्र कारणमिति सूच्यते । अरीरमद्रमयामास । संश्वासावयश्च, सदयं च निमित्तीकृत्येति वा ॥ ४२ ॥

सुमनोरञ्जनी — इति तासां विक्लवितं कामपारवश्येनोदितम् । प्रहस्य गोपीः न्यरीरमत् नितरां रमयामास । ननु कथं भगवान् अप्राकृतविग्रहः सन् प्राकृतविग्रहाभिः रेम इत्यत उक्तम् ॥ आत्माराम इति । आत्मन्येव सम्यक् रमत इति आत्मारामः स्वरमण इत्यर्थः । तथा च न भगवान् साक्षाद्गोपीषु रेमे किंतु तदर्गन्तरमारूपान्तर्यामिस्वस्त्रीरूपेष्वेवेति भावः ॥ ४२ ॥

ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ।
उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥ ४३ ॥

सत्यधर्मीया — समेताभिर्मिलिताभिस्ताभिः । उदारं महच्चेष्टितं यस्य सः । प्रियस्य स्वस्येक्षणेनावलोकनेनोत्फुल्लं विकसितं मुखं यासां तास्ताभिः सहितोऽच्युत उदार उत्कृष्टो हासस्तेन किञ्चिद्विवृता द्विजा दन्तास्त एव कुन्दाः कुन्दानि वा । माघ्यं कुन्दमित्यमरः । मारः कुन्दः कुरण्टक इति पुंस्काण्डे रत्नकोशः । कुं भुवं दापयति शोधयति दलतीत्युभयपक्षे तत्पुरुष इत्यलुग्द्वितीयायाः । दैप् शोधने दोऽवखण्डन इति धात्वोरात इति के रूपम् । माघ्यपुष्पाणि तेषां दीधितिः कान्तिर्यस्य सः । कुन्दश्चक्रभ्रमे माघ्ये निधिमेदे सुरद्विषीति विश्वः । स्वातन्त्र्येणोदारहासादीनां दीधितिर्यस्येति वा । उडुभिर्नक्षत्रैर्वृत एणाङ्कः । एणः कुरङ्गो हरिण इति हलः । एणोऽङ्को लाञ्छनं यस्य सः । अङ्कः स्थानेऽन्तिके मन्तौ रूपोऽङ्कच्छुङ्गलक्ष्मस्विति विश्वः । स चन्द्र इव व्यरोचत । उत्कृष्टं दारेषु स्वभार्यायां चेष्टितमिव चेष्टितं यस्य स इति वा ॥ ४३ ॥

सुमनोरञ्जनी — उदारमुत्कृष्टं चेष्टितं चरितं यस्य सोऽच्युतः । प्रियस्य ईक्षणेन । प्रियं प्रेमातिशयजनकं ईक्षणं श्रीकृष्णस्य कटाक्षवीक्षणं तेनेति वा उत्फुल्लानि विकसितानि मुखानि यासां

ताभिः समेताभिः मिलिताभिः गोपीभिः वृतः सन् उडुभिर्वृतो एणांक इव चन्द्र इव व्यरोचतेति सम्बन्धः । कीदृशः । उदारहासः, द्विजाः दन्ताः कुन्दा इव द्विजकुन्दाः तेषां दीधितिर्यस्य सः । उदारहासे द्विजेषु च कुन्दकुसुमानां दीधितिरिव दीधितिर्यस्यासाविति वा । उदारहासेन विवृतानां द्विजकुन्दानां दीधितिर्यस्य स इति वा ॥ ४३ ॥

उपगीयमान उद्गायन् वनिताशतयूथपः ।
मालां बिभ्रद् वैजयन्तीं व्यचरन्मण्डयन् वनम् ॥ ४४ ॥

सत्यधर्मीया — स्वयमुद्गायंस्ताभिरुपगीयमानश्च वनिताशतयूथपः । शतशब्दो बहुवाची । यूथपो गजराजः । अनेन तासां करिणीत्वेनोत्प्रेक्षणम् । वनिताशतयूथं पातीति स इति वा । यूथनाथो गजश्रेष्ठे, यूथं वृन्दमात्रे स्यादिति रभसविश्वौ । वैजयन्तीं तन्नाम्नीम् । मण्डयन्नलङ्कुर्वन् ॥ ४४ ॥

सुमनोरञ्जनी — वनिताशतयूथपः । शतशब्दोऽनेकवाची । गोपीभिरुपगीयमानः स्वयमप्युद्गायन् । वैजयन्तीं तत्संज्ञां आपादलम्बिनीं मालाम् । वनं मण्डयन् भूषयन् ॥ ४४ ॥

नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ।
जुष्टं तत्तरलानन्दिकुमुदामोदवायुना ॥ ४५ ॥

सत्यधर्मीया — हिमवालुकं शीतलसिकतामयम् । नद्या यमुनायाः पुलिनं द्वीपम् । तथा नद्या प्रवहन्त्या तरलान्यानन्दीनि परानानन्दयितुं शीलमेषामिति तानि कुमुदानि कैरवाणि तेषामामोदः सौरभं यस्य तेन वायुना जुष्टं सेवितम् । सिते कुमुदकैरवे इत्यमरः ॥ ४५ ॥

सुमनोरञ्जनी — नद्याः यमुनायाः । हिमवालुकं शीतलवालुकम् । तस्याः नद्याः तरलैः तरङ्गैः आनन्दिनः उत्फुल्लाः ये कुमुदास्तेषामामोदो मकरंदो यस्मिंस्तेन वायुना जुष्टम् । पुलिनं तोयोत्थितसैकतस्थलम् । तोयोत्थितं तत्पुलिनमित्यमरः । आविश्य गोपीभिः रेम इति शेषः ॥४५॥

बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनालभननर्मकराग्रपातैः ।
क्ष्वेलावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥

सत्यधर्मीया — बाहूनां प्रसारः प्रसर्पणं तज्जातो यो परिरम्भ आलिङ्गनं च, तथा कराभ्यामलकाश्चोत्सङ्गाश्च नीव्यो वसनानि तद्ग्रन्थयश्च गतम् । स्तनाश्चेत्यादीनामालभनं मर्दनमोचनादिस्पर्शो यथायथं ग्राह्यः । तच्च नर्मपूर्वकं कराग्राणां नखराणामङ्गुलिप्रान्तानां वा पाताश्च तैः । करालकेलीति पाठो न सरलः कर्णकठोरश्च । क्ष्वेला सिंहनादवन्नादोऽवलोको निरीक्षणं हसितानि हासाश्च

तैर्व्रजसुन्दरीणां रतिपतिं मन्मथमुत्तम्भयन्स्थिरीकुर्वन्पुनःपुनः सम्भोगाशां जनयन्निति यावत् रमयाश्चकार रमयामास। रमयां चकारेति पदद्वन्द्वं तथाऽप्यनुप्रयोगो नियतः ॥ ४६ ॥

सुमनोरञ्जनी — बाहुप्रसारेण परिरम्भः आलिङ्गनं तेन करालकेली तीव्रक्रीडा तस्यां नीवी वस्त्रग्रन्थिः तस्यालभनं, स्तनयोर्नर्मौक्तिपूर्वं कराग्रपातः नखपातश्च तैः। करालकोरुनीवीत्यादि केचित्पठन्ति। क्ष्वेलया क्रीडया अवलोकनेन हसितैर्मन्दस्मितैश्च रतिपतिं कामं उत्तंभयन्नुद्दीपयन् रमयांचकार रमयामास ॥ ४६ ॥

एवं भगवतः कृष्णाल्लब्धमाना महात्मनः।
स्वात्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं (अधिक्याभ्यधिकं) भुवि ॥ ४७ ॥

सत्यधर्मीया — मानिन्योऽभ्यधिकं भुवीत्यपि पठन्ति ॥ अधिक्याभ्यधिकं भुवीति। अत्राधिक्येति न सरलार्थ इत्युपर्येव ज्ञायते। मानिन्यः स्त्रीणां मध्ये आत्मानमधिकं मेनिर इत्यन्वयः। तदहङ्कारहेतुरेवं कृष्णाल्लब्धमाना इति ॥ ४७ ॥

सुमनोरञ्जनी — कृष्णात् लब्धमानाः यत् अन्याः विहायास्माकमेव कृष्णो लब्धस्तस्मा-त्प्राप्ताहंकाराः। भुवि स्त्रीणां मध्ये स्वात्मानमेवाधिक्येनाधिकं मेनिरे। कस्मात्। कृष्णाल्लब्धात् कृष्णलाभान्निमित्तादेवेति भावः ॥ ४७ ॥

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः।
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥

इति श्रीमद्भागवते दशमस्कन्धे सप्तविंशोऽध्यायः ॥

सत्यधर्मीया — मानं स्वकृतं तद्योग्यतातिरिक्तं वीक्ष्य। तज्जातं सौभगं सौन्दर्यं तत्सम्बन्धिमदमहन्तां च वीक्ष्य केशवः प्रशमायाहन्ताशान्त्यै अनन्तरं प्रसादाय तं विधातुं तत्रैव विद्यमानस्थल एवान्तरधीयतान्तर्हितोऽभूत् ॥ ४८ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे सप्तविंशोऽध्यायः ॥ १०-२७ ॥

सुमनोरञ्जनी — सौभगमदं सौभाग्यनिमित्तं मदं मानं अहंकारं च वीक्ष्य मदाहंकारयोः प्रशमाय परिहाराय प्रसादाय च तत्रैव वन एव। अन्तरधीयत अदृश्योऽभवत् ॥ ४८ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां सप्तविंशोऽध्यायः ॥ १०-२७ ॥

॥ अथ अष्टाविंशोऽध्यायः ॥

श्रीशुक उवाच—

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।
अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥

सत्यधर्मीया — कान्तारन्तः कान्तान्तर्धानानन्तरमनन्तमार्गणं कामिनीनां तथाऽऽसां भक्त्युद्रिक्ततां च वर्णयत्यस्मिन्नध्याये । तत्रादौ हरिमनिरीक्ष्य हरिणाक्षीणामनुतापं तापसो वक्तीति वक्ति ॥ श्रीशुक इति । भगवति सहसाऽनालोच्यैवान्तर्हितेऽदृश्ये सति । करिण्य इव यूथपं गजमचक्षाणा अपश्यन्त्यो यथा तप्ता भवन्ति तथा तमचक्षाणा अतप्यन् । तत्रापि नैकलोऽगच्छत्किन्तु कन्तुबाधया कान्तामेकामेकान्तं निनायैव नायकः, सैका सहसा सहसैवं, वयं त्वेवमिति मनसि चक्रुरिति तात्पर्यमवधेयम् । अन्तरङ्गे रङ्गेशेन सह गतामङ्गनां सम्बोध्य व्रज तवापि दशेदृशी भवेदेव देवस्य चाञ्चल्यादित्यप्यङ्गनाः कटाक्षयामासुरिति च ॥ १ ॥

सुमनोरञ्जनी — श्रीकृष्णदर्शनेन निरस्ताहंमतीनां गोपीनां श्रीकृष्णे स्नेहपारवश्यस्य परां काष्ठां प्रदर्शयत्यस्मिन्नध्याये । तत्रादौ श्रीकृष्णान्तर्धाने गोपीनामवस्थां निरूपयति ॥ अन्तर्हित इत्यादिना । भगवति श्रीकृष्णे सहसा अन्तर्हिते अदृश्ये सति । तमचक्षाणा अपश्यन्त्यः अतप्यन् सन्तप्ता बभूवुः । यूथपं गजेन्द्रमचक्षाणाः करिण्य इवेति ॥ १ ॥

गत्याऽनुरागस्मितरञ्जितेक्षितैर्मनोरमालापविहारविभ्रमैः ।
आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥

सत्यधर्मीया — गत्या गमनेनानुरागः स्नेहविशेषस्तत्पूर्वकं यत्स्मितं मन्दहासस्तेन रञ्जितानीक्षितानीक्षणानि तैर्मनोरमो मनोहरो य आलापः सौरतसल्लापो विहारः क्रीडा च तयोर्विभ्रमा विलासास्तैराक्षिप्तं चित्तं यासां ताः प्रमदा योषाः प्रकृष्टो मदः प्राग्यासां ता इदानीं प्रगतो मदो यासां ता इति चान्तरङ्गिको भावः । तदात्मिकास्तस्मिन्नात्मा मनो यासां ता रमापतेर्विचेष्टा विशिष्टाः चेष्टाश्चरितानि जगुः । एकैकां जगुरिति यावत् ॥ २ ॥

सुमनोरञ्जनी — गत्या गमनेन इङ्गितज्ञतया वा । अनुरागस्मितरंजितेक्षितैः । अनुरागेण स्मितेन च रंजितानि ईक्षितानि अपांगनिरीक्षणानि तैश्च । अनुरागयुक्तस्मितेनेति वा । मनोहरैः आलापैः वचनैः विहारैः क्रीडाभिः विभ्रमैः शृङ्गारचेष्टाभिः । मनोहरालापविहारलक्षणैः विभ्रमैरिति वा ।

आक्षिप्तानि आकृष्टानि चित्तानि यासां ताः गोप्यः । तदात्मकाः तस्मिन्नेवात्मा मनो यासां तथाविधाः सत्यः, तास्ताः पूर्वमनुभूताश्चेष्टाः श्रीकृष्णचरितानि जगृहुः न्यरूरुपन् । धातूनामनेकार्थत्वात् ॥ २ ॥

गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ।
असावहं न्वित्यबलास्तदात्मिका नावेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥

सत्यधर्मीया — अनन्तस्मरणादनङ्गस्मरणास्ता इति चर्या चेरुरिति वदति ॥ गतीति । गतिर्गमनं स्मितं हासो वीक्षणं कटाक्षमोक्षणं भाषणं चादिर्येषां ते तेषु । स्मितप्रेक्षणं स्मितभाषणमिति वा । प्रिया गोप्यः । प्रियस्य कृष्णस्य प्रतिरूढा ध्यानेनानुकृता मूर्तिराकारो यासां ताः परस्परं कृष्ण इत्यङ्कूरितधिषणा इति यावत् असावहं न्विति विकल्पं नावेदिषुर्न व्यजानन् । तत्र तन्त्रं तदात्मकाः कृष्णविहारभ्रमा इति । कृष्णविहार एव अधुना मधुनाथः क्रीडत्यस्माभिरिति विभ्रमो भ्रान्तिर्यासां ताः । प्रश्ने विकल्पे नु स्विच्चेति यादवः । नु प्रश्ने च विकल्पार्थ इति विश्वः ॥ ३ ॥

सुमनोरञ्जनी — किञ्च अबलाः गोप्यः तदात्मकाः तन्मनस्काः सत्यः,पार्श्वस्थायामसौ इति, स्वस्मिन्नहमिति व्यवस्थितविकल्पे नुशब्दः । नावेदिषुरिति सम्बन्धः । कुत इत्यतस्तदात्मकत्वं विवृण्वन्नाह ॥ प्रतिरूढमूर्तय इति । प्रतिरूढा मनसि संलग्ना मूर्तिः श्रीकृष्णस्य मूर्तिर्यासां ताः तदैकध्यानपरा इति यावत् । तदपि कुतः । प्रियस्य श्रीकृष्णस्य गत्यादिषु प्रियाः प्रीतियुक्ताः । कृष्णविहारे विभ्रमो मनोविलासो यासां ताः । श्रीकृष्णविहारमेव पुनः पुनः स्मरंत्य इति यावत् । असौ श्रीकृष्णः । नु उत अहं इति स्वात्मानं नावेदिषुरिति वा ॥ ३ ॥

गायन्त्य उच्चैरमुमेव सङ्गता विचेरुरुन्मत्तकवद् वनाद् वनम् ।
पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥

सत्यधर्मीया — सङ्गता मिलिता अमुमेवोच्चैर्गायन्त्यो वनाद्वनमुन्मत्तकवद्धत्तूरादनवन्मनुजवद्विचेरुः । आकाशवदन्तर्बहिरपि भूतेषु सन्तम् । ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चेति । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादेः । पुरुषं वनस्पतीन्पप्रच्छुः । ये गन्धर्वा अप्सरसश्च देवीरेषु वृक्षेषु वनस्पतीष्वासते नैय्यग्रोधौदुम्बराश्वत्थप्लक्ष इतीध्मो भवति । एते वै गन्धर्वाप्सरसां गृहा इति मन्त्रब्राह्मणोक्तेः । कान्ताभिर्भ्रान्त्या कृतमपि भागवत्य इति भाविभगवदवगमनसाधनदेवताप्रसादसाधनं जातमिति वनस्पतिशब्देन ध्वनयामासेति ज्ञेयम् ॥ ४ ॥

सुमनोरञ्जनी — अपि च सर्वा अपि संगताः मिलिताः, उन्मत्तेन तुल्यं वर्तन्त इति उन्मत्तकवत् वनाद्वनं विचेरुः । आकाशवत् भूतेषु बहिरन्तश्च सन्तं पुरुषं परमपुरुषं श्रीकृष्णमुद्दिश्य वनस्पतीन् पप्रच्छुरिति ॥ ४ ॥

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध किंशुक ।
नन्दसूनुरिहागात् किं सह हासावलोकनैः ॥ ५ ॥

सत्यधर्मीया — उन्मत्तत्वं स्पष्टयितुं किञ्चित् ''अश्वत्थः सर्ववृक्षाणाम् । मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अग्रतः शिवरूपाय वृक्षराजाय ते नमः'' इत्यादिसमयस्यैतत्समयेऽप्यनुसन्धानमस्तीति तत्पुरस्कृत्य ध्वन्यत इति सूचयन्नाह ॥ दृष्ट इति । अश्वत्थप्लक्षोऽपि तद्वृक्षविशेषः । प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्भभाण्डयोः । पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तित इति विश्वः । विज्ञेयः पर्कटी प्लक्षः प्लक्षः पिप्पलपादप इति शाश्वतः । पर्कटी वा न्यग्रोधो वटो वा शमी वा । न्यग्रोधो बहुपाद्वटो, न्यग्रोधस्तु पुमाव्यामवटयोश्च शमीतरावित्यमरभानू । किंशुक पलाशो गतम् । तदुपरि कीरमपि दृष्ट्वा तमपि पृच्छन्तीत्याह शुको नन्दसूनुरागात्किमिति । हासावलोकनैः सहागात्किं वो युष्माभिर्दृष्टः कच्चित् ॥ ५ ॥

सुमनोरञ्जनी — प्रश्नप्रकारं प्रपञ्चयत्यष्टभिः श्लोकैः । हे अश्वत्थादयः ! नन्दसूनुः हासावलोकनैः सह । सस्मितावलोकनं कुर्वन्निति यावत् । इहागात् आगतः किं ? आगतोऽपि वः युष्माभिः दृष्टः । कच्चित् इति इष्टप्रश्नार्थकः । कच्चित्कामप्रवेदन इत्यमरः ॥ ५ ॥

कच्चित् कुरबकाशोक नाग पुन्नाग चम्पक ।
रामानुजो मानिनीनां दोग्धा नन्दस्य चात्मजः ॥ ६ ॥

सत्यधर्मीया — कुरबक कुरञ्ज । भवेत्कुरबकः शोणम्लानवाटीप्रभेदयोरिति विश्वाद्वृक्षविशेषः । गोरण्टीत्यपभ्रष्टभाषेति केचित् । एवमेव कुरबकस्तबकेति माधव्याख्यायामप्युक्तम् । अशोक । अशोको वञ्जुले मानद्रुमनिःशोकयोरपि । अशोकः कटुरोहिण्यामिति विश्वः । नागपुन्नाग नागकेशर । नागं तु, नागकेसरपुन्नागो नागदन्तकमस्तके । देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थित इति विश्वः । चम्पक । काञ्चनतरुरिति रभसो रत्नकोशश्च । मानिनीनामानन्दस्य दोग्धा तत्प्रपूरको दातेति यावत् नन्दस्यात्मजः पुत्रो रामानुजश्च दृष्टः कच्चित् ॥ ६ ॥

सुमनोरञ्जनी — कुरबकः गोरण्टीवृक्षप्रभेदः । नागः नागकेसरपुन्नागः । दोग्धा अभिलषितस्येति शेषः ॥ ६ ॥

कच्चित् तुलसि कल्याणि गोविन्दचरणप्रिये ।
सह त्वालिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥

सत्यधर्मीया — हे कल्याणि मङ्गलरूपिणि गोविन्दचरणप्रिये तुलसि । अलिकुलैर्भ्रमरसमूहैः सह त्वा त्वां बिभ्रद्दधानः, अत्यतिक्रान्ताः प्रियाः कान्ता वयं येन प्रिया अस्मानतिक्रान्त इति वा सोऽच्युतस्ते त्वया दृष्टः कच्चित् । एवमन्वये गोविन्दचरणप्रिय इत्यनेनैव परस्परप्रेमलाभादतिप्रियं इति कृतमिति पराकृतम् । स हित्वेति काचित्कोऽपि सुमङ्गलः पाठः । सहेत्यनुक्तावपि वृद्धो यूनेत्यादि-वत्तल्लाभसम्भवात् । स हत्वेति पाठे स आलिकुलैः सखीसङ्घैः सहास्मानिति शेषः । हत्वा त्वां बिभ्रद्दृष्टः कच्चिदित्यन्वयः । अतिप्रियः प्राङ्नो यः स इत्यावृत्त्याऽप्यन्वयः । नेह किं वध इति वक्ष्यमाणत्वादिदमेवमनेन हननं भवतीति भावः ॥ ७ ॥

सुमनोरञ्जनी — हे तुलसि ! अलिकुलैः सह त्वा त्वां बिभ्रत् ते अतिप्रियोऽच्युतः ते त्वया दृष्टः कच्चित् । अलिकुलैः सह त्वया दृष्टः किमिति वा ॥ ७ ॥

मालत्यदर्शि वः कच्चिन्मल्लिके जातियूथिके ।
प्रीतिं वा जनयन् यातः करस्पर्शेन माधवः ॥ ८ ॥

सत्यधर्मीया — हे मालति! जातिविशेषः । मालती जातिभेदे स्यादिति विश्वः । मल्लिके, हे जातियूथिके आम्रातक! यूथिकाम्रातके पुष्पविशेषेऽपि च यूथिकेति विश्वः । माधवः, करस्पर्शेन वः प्रीतिं जनयन्यातो, वो युष्माभिर्दृष्टः कच्चित् । पुष्पाणि! युष्माकमस्माभिरतीतजातौ तच्चरणसंसर्गोऽदायीति स लब्धः पुनरपि तद्बोधन एधनं तदर्पणेन भवितेत्यवितारं शंसेति तद्याञ्चेति तात्पर्यम् ॥ ८ ॥

सुमनोरञ्जनी — जातिः यूथिका वः युष्माभिः दृष्टः । वः युष्माकं करस्पर्शेन प्रीतिं जनयन् यातः किम् ॥ ८ ॥

चूतप्रियालपनसासनकोविदारजम्ब्वर्कबिल्वबकुलाम्रकदम्बनीपाः ।
येऽन्ये परार्थभविनो यमुनोपकूलाः शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥

सत्यधर्मीया — प्रियालो राजादनः । असनः पीतसारः । कोविदारः काञ्चनारकः । ऋक्षः शोणकवृक्षः । ऋक्षोऽद्रिभेदे भल्लूके शोणक इति विश्वः । बिल्व । बकुलो वञ्जुलोऽशोक इत्यमरः । भ्रमात्पुनर्वचः । आम्रकदम्बाम्राणां समूह । नीपः कदम्बमाहुः सिद्धार्थे नीपेऽपि निकुरम्ब इति विश्वः । अतोनैकातिरेकः । येऽन्ये परार्थभविनः परार्थं भव उत्पत्तिः स एषामस्तीति ते तथा ।

यमुनोपकूला यमुना उपकूलमुत्पत्तिस्थलं येषां ते । रहितमात्मा शरीरमीशो वा यासां तास्तासां जीवन्मृतानामिति यावत् नः कृष्णपदवीं शंसन्तु । हे इ वनलक्ष्मि! अमुना रहितात्मनां नोऽमुना कृष्णेन ॥ ९ ॥

सुमनोरञ्जनी — चूतः प्रसिद्धः, प्रियालः राजादनः स च चूतावान्तरभेदः । कोविदारः काञ्चनारकः, असनः पीतसारो वृक्षविशेषः । ऋक्षं शुकनासं, नीपः कदंबावान्तरभेदः । हे चूतादयः ! ये अन्ये च परार्थमेव भविनः उत्पन्नाः । यमुनायाः कूलसमीपे वर्तमानाः वृक्षजातीयाः भवन्तः । रहितः आत्मा स्वामी श्रीकृष्णो यासां तासां नः, कृष्णस्य पदवीं मार्गं शंसन्तु कथयन्तु ॥ ९ ॥

किं ते कृतं क्षिति शुभं बत केशवाङ्घ्रिस्पर्शोत्सवोत्पुलकिताऽङ्गरुहैर्विभासि ।
अप्यङ्घ्रिसम्भव उरुक्रमविक्रमाद्वा आहो वराहवपुषा परिरम्भणेन ॥ १० ॥

सत्यधर्मीया — हे क्षिति महि । क्तिजन्तत्वात्कृदिकारादक्तिन इति ङीप् । ईकारान्तः शब्दः । ते त्वया किं शुभं तप आदिकं कृतम् । केन कार्येणोह्यतेऽस्मच्छुभं युष्माभिरित्यत आहुः ॥ केशवेति । केशवस्याङ्घ्र्योः पादयोः स्पर्शः सम्बन्धस्तज्ज उत्सवस्तेनोत्पुलकिता सञ्जातरोमाञ्चा । अङ्गरुहै-र्दूर्वादिभिर्विभासीति । बत तव सन्तोषोऽस्माकं खेद इत्यर्थः । अङ्घ्रिसङ्ग उत्पुलकिततायां मम तयोश्च कोऽनुबन्ध इति न वदाम्बेति तामाहुः ॥ हे अङ्घ्रिसम्भव इति । अङ्घ्रिभ्यां सम्भवतीति सा तथा । पद्भ्यां भूमिरजायतेत्यादेः । तातततापेक्षया भीतिः प्रबलेति हे अबले तवेयं पुलकितता वेति पृच्छन्ति । उताप्युरुक्रमस्य त्रिविक्रमस्य विक्रमात्पादविक्षेपात्तद्धारस्य प्रागनुभूतत्वादिदानीमप्रदर्शने सन्तोष-कार्यस्य पुनरपि तथा कृतवांश्चेत्सहनं न भवेन्ममेति भयत एव वेति । सर्वमपि सर्वसहेऽ-किञ्चित्करमिति स्वानुभूतं पक्षमुत्प्रेक्ष्य प्रेक्षावत्यः पृच्छन्ति । आहो वराहवपुषा वराहस्य वपुरिव वपुर्यस्य तेन हरिणा कृतेन परिरम्भणेनालिङ्गनेनेति वा । वरेणासुरवरेण सह त्वदुद्धृतये आहवं युद्धं पुष्णाति तत्पोषस्तु तन्मारणरूप इति । अथवाऽऽहवेन तन्मरणकारणेन समरेण पुष्णाति त्वामिति तेनेत्यावर्त्याऽन्वय इति ॥ १० ॥

सुमनोरञ्जनी — हे क्षिति क्षिते । ते त्वया किं शुभं सुकर्म कृतम् । बतेति हर्षे । कुतः । यतस्त्वं केशवस्य अङ्घ्रिस्पर्शेन उत्सवो यस्याः सा । अङ्गरुहैः तरुगुल्मादिभिः उत्पुलकिता रोमाञ्चितेव विभासि । उत्पुलकितत्वे निमित्तं पृच्छति, वितर्कयति । अपि किं तत्र अङ्घ्रिसम्भव अङ्घ्रेः भगवदङ्घ्रेः सकाशात् सम्भवः उत्पत्तिरेव तत्र निमित्तम् । पद्भ्यां भूमिरिति श्रुतेः । आहोस्विदुरुक्रमस्य त्रिविक्रमस्य विक्रमात् पादविन्यासात् इत्थंभूता । किं वा वराहवपुषा हरिणा कृतेन परिरंभणेन आलिङ्गनेनेति । हे अङ्घ्रिसम्भवे इति क्षितेः सम्बोधनं वा । योजनांतराणि पदरत्नावल्यां द्रष्टव्यानि ॥ १० ॥

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन् दृशां सखि सुनिर्वृतिमीश्वरो वः ।
कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥ ११ ॥

सत्यधर्मीया — हे एणपत्नि! उपचारतो वा देवा एवावन्यामेतदाद्यात्मनाऽवतारिता इति वा पत्नीत्युक्तिः । तत्कृतयज्ञफलभोक्तृताप्रयोजकत्वात्तच्छब्दप्रयोगस्य योषित्सु । वो व इत्येकैवानेकतया कायस्मृतिगतेरभावादिति वा सम्मानिनीयेयं मानिनेति वाऽस्मद्वत्सापत्न्यक्लेशो न त इति व्यञ्जयितुं च बहुवचनैकवचने ज्ञेये । प्रियया सह नीतया गात्रैः स्वावयवैर्दृष्टैर्दृशां द्रष्टृणाम् । सखीति दृक् सदृक् तया सख्यं ज्ञेयम् । सुनिर्वृतिं बहुसुखं तन्वन्सन् उपगतः समीपमाप्तः । हे मोहनाङ्गच ऊह्यते केनेत्यत आहुः । कुलपतेः श्रीकृष्णस्य । कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः, कान्तायाः सहनीतवनिताया अङ्गसङ्गस्तत्काले कुचकुङ्कुमेन रञ्जिता तस्याः । कुन्दस्रजः कुन्दमालाया इह त्वन्निकटे गन्ध आमोदो वाति आवात्यागच्छतीति । नो नाथ आयातश्चेदायताक्षि नैवंविधः कुन्दस्रगामोदः स्यादिति भावः । अतिगन्ध उपगत इह वा इहैव । वाशब्द इवार्थे । वा स्याद्विकल्पोपमयोरिवार्थे च समुच्चय इति विश्वः । गन्धो गन्धक आमोदे इति विश्वः । हे सखि एणपत्नि! गात्रैर्नेत्राद्यैर्दृशां सुनिर्वृतिं तन्वन्प्रिययेतरया सहेश्वरो भर्ता पुंमृग उपगतोऽपि किमित्यर्थः । अपिः सम्भावनाप्रश्नशङ्कागर्हासमुच्चय इति विश्वः । स च न दृश्यते गन्धश्चैतादृश आयातीति स गत एवेत्यूहयाम इति वदन्ति ॥ कान्तेति । कुलपतेर्हरिणस्य कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजस्तन्मालायास्तासां गन्ध आवाति । स न दृश्यत इति तात्पर्यमिति केचित् । भ्रमपरिभ्रमणतः स्वसौभाग्यं तत्र मृग्यामारोप्य कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजः कुलपतेरिति प्रतिपादितं सुदत्यो वदन्तीति च तात्पर्यं वर्णयन्ति । याः, कान्तः पतिरङ्गसङ्गकाले कुचकुङ्कुमेन रञ्जितो याभिस्तास्तासामस्माकं कुन्दानां स्रग्यस्य तस्य कुलपतेः कृष्णस्य सकाशादिहैतत्समयेऽतिगन्धो बहुहिंसा उपगतो गतम् । व ईश्वरस्तु हे सखि एणपत्नि प्रियया त्वयैव सह गात्रैर्दृशां सुनिर्वृतिं तन्वन्नुपगतोऽपि किम् । नास्मद्वत्तव दुर्दशाऽत एवं विभासीत्याक्रोशोक्तिरित्यपि योजयन्ति ॥ ११ ॥

सुमनोरञ्जनी — हे एणपत्नि मृगभार्ये ! ईश्वरः श्रीकृष्णः गात्रैः वः युष्माकं दृशां निर्वृतिं आनन्दं तन्वन् । कयाचित्प्रियया सह । इह, अपि किम्, उपगतः प्राप्तः । प्रियया सह इहागत इति प्रश्ने बीजमाहुः ॥ कान्तेति । कान्तायाः अङ्गसङ्गेन निमित्तेन कुचकुङ्कुमेन रञ्जितायाः संक्रान्तायाः कुलपतेः श्रीकृष्णस्य या कुन्दकुसुममयी स्रक् तस्याः गन्धः वाति आगच्छति । गन्धः गन्धवान्वायुर्वा मत्वर्थीयोऽच् । कुङ्कुमगन्धसम्भिन्नः कुन्दगन्धः समायाति यतोऽतः कयाचित्प्रियया सहैवेहागतः स्यादिति सम्भाव्यत इति भावः । अधिकं तु पदरत्नावल्यां द्रष्टव्यम् ॥ ११ ॥

बाहुं प्रियां स उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदान्धैः ।
अन्वीयमान इह वस्तरवः प्रणामं किं वाऽभिनन्दति चरन् प्रणयावलोकैः ॥ १२ ॥

सत्यधर्मीया — तरूनुरुफलभुग्नानग्रतो दृष्ट्वा नमन्तो नमता वा वासुदेवेनेति पृच्छन्ति ॥ बाहुमिति । प्रियायाः कस्याश्चिदंसे स्कन्धे बाहुमुपधाय निधाय गृहीतपद्मो गृहीतमितरहस्तन्यस्तं पद्मं येन सः । अन्तरङ्गतस्तु गृहीता पाणिगृहीती पद्मा रमा येन स इति । अनेनास्मत्कृतसुकृततो लोकानुकृत्यैवं नटनमस्येति ध्वन्यते । रामानुजो रामा अस्माननु हीना जो जेतेति । रामानुजो रामैका अनु अनुसृत्य जा जवनोपेता यस्येति वा सः । जो जेता जवनेऽपि स्यादिति विश्वः । आर्यं प्रति वोक्त्वा जीवन्त्यश्चेदुत्तरत्र शासितुं शक्यमिति रामस्य बलरामस्यानुज इत्यभ्यधुरिति वा । तुलसिकासङ्गता अलयो भ्रमरास्तेषां कुलानि तैर्मदान्धैरेतद्रसास्वादजनितमदान्धैरन्वीयमानोऽस्मन्नाथ इह चरन् , हे तरवः! प्रणयावलोकैः सस्नेहकटाक्षैः प्रणामं युष्मत्कृतमभिनन्दति किं वेत्यपृच्छन् । कच्चित्कुरबकाशोकेत्यशोकस्य, कच्चिन्मल्लिक इति मल्लिकायाश्चूतप्रियालेति चूतस्य प्रस्तुतप्रश्नादिनाऽऽनुबन्धान्न मन्मथसाहितीमावहेयुरुत्पलं च तासामुत्पलाक्षीत्वात्स्वकान्तिपराजितत्वाच्च तद्धाणीभवनसम्भवं शिष्टं सपत्नीपद्मासद्मेति छद्मना पद्मं कायजसहायमाचरेदितस्तद्रक्षाऽऽवश्यकीति पद्मं दधार करे हरिरिति ध्वनितमनेनेति ज्ञेयम् । अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायका इत्यमरः ॥ १२ ॥

सुमनोरञ्जनी — फलप्रसूनादिभारेण नम्रान् तरून् दृष्ट्वा 'अत्र श्रीकृष्णः आगतः स्यात् । कथमन्यथाऽन्यस्मै ते स्वशाखाग्रैः प्रणामं कुर्युरिति मत्वा पृच्छन्ति । बाहुमिति ॥ प्रियायाः अंसे बाहुं स्वबाहुं उपधाय हस्तेन गृहीतपद्मः । तुलसिकायाः अलिकुलैः भ्रमरसमूहैः अत एव मदान्धैः अन्वीयमान इह चरन् वः युष्माकं प्रणामं अभिनन्दति श्लाघते किम्? किञ्च प्रणयावलोकैः अभिनन्दति अन्तर्णीतणिजर्थोऽयम् । अभिनन्दयति किमिति? पदरत्नावल्यां बाहुमतीत्यवतार्य वः युष्मभ्यं प्रणामं चरन् कुर्वन् प्रणयावलोकैर्वो युष्मान् अभिनन्दतीत्यपि योजितम् ॥ १२ ॥

पश्यतेह लता बाहूनप्याश्लिष्टा वनस्पतेः ।
नूनं तत्करजस्पर्शाद् बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥

सत्यधर्मीया — हे सख्य इह तत्करजस्पर्शात्तस्य कृष्णस्य कराभ्यां जायत इति स चासौ स्पर्शश्च तस्मात् । करजा नखा वा । उत्पुलकान्यूर्ध्वं पुलका येषु तानि लोमस्थलानि भवत्यो बिभ्रति तथेह वनस्पतेर्वृक्षराजस्य बाहून्स्कन्धानाश्लिष्टा आलिङ्गितवत्यः । कर्तरि क्तो वा भावे वोक्तस्ततो

बहुव्रीहिर्वा । लता अप्युत्पुलकानि गतम् । बिभ्रति । अहो अतद्योग्यस्यापि वनस्पतेः सहवास इयदुन्नाहवह इत्याश्चर्यं पश्यत । एकः कृष्णः स्वयमनेका इत्यत्रापि वनस्पतेर्लता इति न्यरूरुप-न्सारूप्यमिति ज्ञेयम् । नूनं निश्चयः । वनस्पतेर्बाहूनाश्लिष्टा लता अपीह नूनं निश्चयेन तत्करजाः कृष्णनखास्तत्स्पर्शादुत्पुलकानि बिभ्रत्यहो सख्यः पश्यत । स्वपत्यालिङ्गनतोऽपि तासामस्मन्नाथ-करजमात्रस्पर्शः पुलककुलकोऽतोऽस्माभिः स्वस्वपतिपरित्यागत आगतिरच्युतं प्रत्युचितेति सूचया-मासुरिति ज्ञेयमिति वा । एवमेव देवोऽपि हे सख्यः सह वर्तेत चेद्वयमपि समाश्लिष्य तमुत्पुल-कितकलेवराः स्यामेति तासां हृदयम् ।। १३ ।।

सुमनोरञ्जनी — इमाः लताः पश्यत । वनस्पतेर्बाहूनाश्लिष्टा अपि तस्य कृष्णस्य करजैः नखैः स्पर्शात् उत्पुलकानि बिभ्रति । अतः इमाः कृष्णेन सङ्गताः एव नूनम् ।। १३ ।।

एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् ।
व्यचक्षत वनोद्देशे पदानि परमात्मनः ।। १४ ।।

सत्यधर्मीया — शुक आह ।। एवमिति । पृच्छमानाः पृच्छन्त्यो वृन्दावनलताः । समस्तमपि लतापदेन वृन्दावनपदं विश्लिष्टं सत्संश्लिष्टं योग्यतया भवति तरुपदेनापि । ततश्च वृन्दावनलता वृन्दावनतरूंश्चेति सिध्यत्यन्वयः । वृन्दावनलताभिरस्तो रुः शब्दो येषां ते वृन्दावनलतास्तरवस्तां-स्तरूनित्यावृत्त्याऽन्वयः । एकयैकान्तकाले तच्छब्दश्चेद्रसाभासः स्यादिति भाव इति वा । क्वचिद्वनो-द्देशे परमात्मनः पदानि व्यचक्षतापश्यन् ।। १४ ।।

सुमनोरञ्जनी — वृन्दावने विद्यमानाः लतास्तरूंश्च । एवं पृच्छमानाः । वनोद्देशे वनप्रदेशे । परमात्मनः श्रीकृष्णस्य पदानि व्यचक्षत अपश्यन् ।। १४ ।।

पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः ।
लक्ष्यन्ते हि ध्वजाम्भोजवज्राङ्कुशलतादिभिः ।। १५ ।।

सत्यधर्मीया — कथं निर्दधुः पदानि यदुपतेरित्यत आह ।। पदानीति । लता कल्पलता । आदिपदेन यवचक्रादिग्रहः ।। १५ ।।

सुमनोरञ्जनी — तत्र श्रीकृष्णपदानि दृष्ट्वापि सन्दिहानाः प्रति काश्चिदाहुः ।। पदानीति । एतानि नन्दसूनोः पदानि । व्यक्तं निश्चितमेवैतत् । कुतः । यत एतानि ध्वजाद्याकाररेखाभिर्लक्ष्यन्ते । लता कल्पलता । आदिपदेन यवपूर्णकुम्भादयो विवक्षिताः ।। १५ ।।

तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ।
वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ १६ ॥

सत्यधर्मीया — इत्युन्मत्तवचो गोप्य इत्यारभ्य बद्धान्वयास्रजाकापि तन्वीत्यादि विडम्बनमित्यन्ता दशश्लोकी प्रक्षिप्तेति प्रेक्षावत्सम्प्रदाय इति न व्याख्याता प्राचीनैरिति न व्याख्याताऽस्माभिरपीति ज्ञेयम् । तैस्तैः पदैस्तत्पदवीं कृष्णमार्गमन्विच्छन्त्यः काङ्क्षन्त्योऽग्रतः पुरो वध्वाः कस्याश्चित्पदैः पदाङ्कैः सुपृक्तानि सम्पृक्तानि मिश्रितानीति यावत् विलोक्य दृष्ट्वाऽऽर्ताः, सपत्न्याः कस्याश्चिदङ्गसङ्गोऽस्माकं पत्युरित्युन्नता किं सेतीर्ष्यादुःखिताः समब्रुवन्परस्परसंल्लापं चक्रुः ॥ १६ ॥

सुमनोरञ्जनी — तैस्तैस्तत्र तत्र प्रतीयमानैः । तत्पदवीं अन्विच्छन्त्यः अन्वेषणं कुर्वन्त्यः । वध्वाः कस्याश्चित्स्त्रियः पदैः पादविन्यासैः सुपृक्तानि मिश्रितानि विलोक्य समब्रुवन् ॥ १६ ॥

कस्याः पदानि चैतानि याताया नन्दसूनुना ।
अंसन्यस्तप्रकोष्ठायाः करिण्याः करिणा यथा ॥ १७ ॥

सत्यधर्मीया — नन्दसूनुना सह याताया अस्मन्मध्य एव कस्या एतानि पदानि योषिच्चरणा इति निश्चयोऽप्येतस्या इत्यनिश्चय इति कस्या इत्युक्तिः । अंसयोः पत्युः स्कन्धयोर्न्यस्तः प्रकोष्टः, प्रकोष्ठो विस्तृतकरे भूपकक्ष्यान्तरेऽपि च । कूर्परादधरे चापीति विश्वः । अब्रुवन्नित्यनेनान्वयः । कूर्परादधस्तनभागो यया सा तस्याः । करिण्याः पदसम्पृक्तानि करिणः पदानीवेति केचित् । करिणा सह करिण्या यथा यानं तथा याताया इत्यन्वयः ॥ १७ ॥

सुमनोरञ्जनी — नन्दसूनुनेत्युभयत्र सम्बध्यते । नन्दसूनुना, अंसे स्वांसे न्यस्तः प्रकोष्टो मणिबन्धकूर्परयोर्मध्यभागो यस्यास्तथाविधायाः कस्याः पदान्येतानि स्युः । या नन्दसूनुना सह गता अस्मान्विहायेति शेषः । करिणा अंसन्यस्तप्रकोष्ठायाः करिण्याः पदानीव विद्यमानानीति ॥१७॥

अनयाऽऽराधितो नूनं भगवान् हरिरीश्वरः ।
यन्नो विहाय गोविन्दः प्रीतो यामनयद् रहः ॥ १८ ॥

सत्यधर्मीया — यद्यतो नोऽस्मान्विहाय त्यक्त्वा गोविन्दः प्रीतो यां रह एकान्तस्थानमनयन्नीतवांस्तस्मादनया हरिरीश्वरो भगवान्नूनं निश्चयेनाराधितः पूजितो भवेत् । अनयाऽऽराधित इत्यतोऽनुवृत्तमानमाराधनं नूनं निश्चय इत्यब्रुवन्नित्यन्वयः । अनया आर आधित इति छेदः । अनया सहारेत्याधितो मनोव्यथातोऽब्रुवन्नित्यनेनान्वयः । आर्ता इति पूर्वेक्तिस्वारस्यात् ॥ १८ ॥

सुमनोरञ्जनी — अनया श्रीकृष्णेन सङ्गतया स्त्रिया भगवान् पूर्वजन्मन्याराधित एव नूनं यत् यदाराधनप्रभावादेव गोविन्दः प्रीतः सन् नः अस्मान् विहाय यां रहः रहसि अनयत् नीतवान् ॥१८॥

धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः ।
यान् ब्रह्मेशौ रमादेवी दधुर्मूर्ध्ना तदूतये ॥ १९ ॥

सत्यधर्मीया — हे आल्यः सख्यः । आलिः सखी सत्रपङ्क्त्योरिति यादवः । गोविन्दाङ्घ्र्यब्जरेणवोऽमी धन्याः कृतकृत्या अहो । यान्रेणून्ब्रह्मा चेशश्च तौ विधिभवौ रमादेवी च तदूतये स्वस्वाभिप्रेतोती रक्षा वाऽभिप्रेतार्थसिद्धिर्वा तस्यै । भरतिष्ठान ऊतये रक्षानिमित्तमभिप्रेतार्थसिद्ध्यर्थमित्यृग्भाष्याद्यूतिजूतीति निपातितः । मूर्ध्ना दधुरिति । इयदामननादित्युक्तेर्विधिरधिकृतो भवद्भवादौ रमा च नाधिकारिमध्यस्थेति विशेषं सूचयितुं पृथङ्निर्देशः । कथाविच्छेदश्चेदपि भवतु यत्राङ्काः पदानां ते धन्या इत्यौत्सुक्यातिशयेनास्तुवन्रेणून्करेणुगतय इति तात्पर्यम् । आन्तरङ्गिको भावस्त्वेतयाऽऽराधित इत्यनुक्तेरुक्तेरनयानुपूर्व्याऽनयेनास्माभि-र्विनाऽनयैवेत्यान्यायेनाराधित इति व्यज्यमान एतासां ज्ञेयः ॥ १९ ॥

सुमनोरञ्जनी — हे आल्यः! आलिः सखी वयस्या स्यादित्यमरः । सख्यः ! अमी वनोद्देशाः धन्याः कृतार्थाः । कुतः । गोविन्दांघ्रोरब्जरेणवः हेतुगर्भविशेषणमिदम् । यतो गोविन्दाघ्रंब्जरेणवो येषु ते तथाविधा अत इति । यद्वा गोविन्दांङ्घ्र्यब्जरेणवः धन्याः अतिपुण्या इत्यर्थः । यान् रेणून् ब्रह्मेशौ ब्रह्मरुद्रौ रमादेवी च ऊतये स्वरक्षायै मूर्ध्ना दधुः अधारयन् तत्तस्मादिति ॥ १९ ॥

तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि यत् ।
एकाऽपहृत्य गोपीनां रहो भुङ्क्तेऽच्युताधरम् ॥ २० ॥

सत्यधर्मीया — शोकस्तु प्राक् सन्नुज्वलत्युज्वलाङ्गीचरणाङ्करेणुदृष्ट्योत्कृष्टमित्याहुः ॥ यदिति । यत एकाऽपहृत्यास्मत्तो गोपीनां नो मध्येऽच्युताधरं भुङ्क्ते । अनेन न व्यासेधामो दामोदराधरसुधापानमस्माभिः सह तस्या इति स्वतदनसूयतां ध्वनयन्ति । तस्यास्तस्मादमूनि पदानि चरणान्युच्चैः प्रोक्तोऽतिशयेन क्षोभं चित्तचलनं कुर्वन्ति ॥ २० ॥

सुमनोरञ्जनी — अपरा आहुः । तस्याः कृष्णनीतायाः स्त्रियः अमूनि दृश्यमानानि पदानि नः क्षोभं कुर्वन्ति । कुतः । यत् यस्मात् गोपीनां मध्ये एकैव गोविन्दमपहृत्य स्थानान्तरे नीत्वा रहः अच्युतस्य अधरं अधरसुधां भुङ्क्ते ॥ २० ॥

न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः ।
खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ २१ ॥

सत्यधर्मीया — तस्या अत्र पदानि न लक्ष्यन्ते न दृश्यन्ते । तृणाङ्कुरैः खिद्यत्, सुजातं कोमलमङ्घ्रितलं यस्याः सा तां, प्रेयसीमतिप्रियां प्रियः कृष्ण उन्निन्ये स्कन्धेनोवाह । नूनं निश्चयः । अन्यथा पथि पदानि दृगास्पदानि भवेयुरिति भावः ॥ २१ ॥

सुमनोरञ्जनी — ततोऽपि किञ्चिद्दूरे गत्वा इदमधिकं शोककारणमित्याशयेनाहुः ॥ नेति । प्रियः श्रीकृष्णः प्रेयसीं प्रियतमां उन्निन्ये उदूह्य नीतवान् खलु । उदूह्य नयने निमित्तमुत्प्रेक्षयन्ति ॥ तृणांकुरैरिति । तृणाङ्कुरैः खिद्यत्सुजाते अङ्घ्रितले सुकुमारपादतले यस्याः सा ताम् । उन्नयनज्ञापकमाहुः । अत्र अस्मिन्देशे तस्याः पदानि न लक्ष्यन्ते न दृश्यन्ते ॥ २१ ॥

इमान्यधिकमग्नानि पदानि वहतो वधूम् ।
गोप्यः पश्यत कृष्णस्य भाराक्रान्तानि कामिनः ॥ २२ ॥

सत्यधर्मीया — काचित्काश्चित्प्रति । अये आल्यो धूल्यास्पदानि चेत्पदानि दृश्येरन्न च तथेति शङ्कते ॥ अधिकमग्नानीति । पदमेकम् । अधिकं के अग्नानीत्यतो न दृश्यन्ते । तद्वहनोहनं न सम्भवतीत्यतोऽप्याहुः ॥ अधिकं अग्नानीति । अधिकमत्यन्तं न विद्यते ग्ना नदी यमुना एषां तानीत्यतत्प्रविष्टानीति यावत् । दर्शनयोग्यान्यपि न दृश्यन्तेऽत ऊहनं युक्तमिति भावः । ग्नावोनेष्ट इत्यृग्भाष्ये ग्ना नद्यश्च समीरिता इति शीलत्वतो ग्नास्ता इत्युक्तेः । तट्टीकायां च गमेस्ताच्छील्ये न इति नप्रत्ययो डिच्चेत्युक्तः । माधवेन ग्नाशब्दः स्त्रीवाचीत्युक्तम् । तथा चाह यास्कः । मेनाग्ना इति स्त्रीणां मेना मानयन्त्येना ग्ना गच्छन्त्येना इतीति यद्व्याख्यातं तन्न विरुणद्धि ॥

पुनस्तथा तदुद्वहने हेतुमूहयन्ति ॥ इमानीति । हे गोप्यः । कामिनो वधूं वहत इमानि पदानि । भाराक्रान्तानीत्यधिकं मग्नानि धूल्यां पश्यत । स्वेर्ष्यावशाद्विश्रम्भरस्य कियानयमेकस्याः कृशाङ्ग्या भारस्तेनातिमग्नतावादोऽपि तासामिति भ्रमतो बोध्यः । अथवैतासां मदनमदविधूतये मधुसूदन एवैवं दर्शयामासेत्यवसेयम् ॥ २२ ॥

सुमनोरञ्जनी — इतोऽप्यनन्यथासिद्धलिङ्गबलादुन्नयनमनुमीयत इत्याहुः ॥ इमानीति । हे गोप्यः ! इमानि पदानि पश्यत । कीदृशानि । अधिकमग्नानि अधिकं यथा तथा भूम्यां मग्नानि । कस्य पदानि, भाराक्रान्तस्य कृष्णस्य । अनेनाधिकमग्नत्वे भाराक्रान्तत्वमेव निमित्तमिति सूचितम् । भाराक्रान्तत्वमेव कुत इत्यतस्तन्निमित्तमाहुः ॥ वधूं वहत इति ॥ २२ ॥

अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना ।
अत्र प्रसूनापचयः प्रियार्थे प्रेयसा कृतः ॥ २३ ॥

सत्यधर्मीया — पुष्पहेतोस्तदादानार्थं महात्मना कृष्णेनात्रा त्रायत इति त्रोऽकिञ्चिदुपपदकादपि त्रायतेरादेच इत्यात्वे आतश्चेति योगविभागात्पान्तीति पाश्चक्रवर्तिन इतिवत्कप्रत्यये त्रोऽन्यो न विद्यते यस्या इति वा, अस्त्रायको यस्या इति वाऽत्रा कान्ताऽवरोपिता स्कन्धादवतारिता । अत्र प्रेयसा प्रियार्थे प्रसूनापचयः कुसुमलवनं कृतः ॥ २३ ॥

सुमनोरञ्जनी — अहो किमस्याः सौभाग्यं वर्णनीयम् । यदस्या इच्छितं स्वयमेव कर्तुमिच्छतीति भावेनाहुः ॥ अत्रेति । अत्र कान्ता पुष्पहेतोः पुष्पाहरणं निमित्तीकृत्य अवरोपिता । न केवलमेतावत् अपि तु तया प्रेरितेन पुष्पापचयोऽपि कृत इत्याहुः ॥ अत्रेति । महात्मनापि प्रेयसा । प्रियायाः प्रेमपात्रायाः अर्थे प्रसूनानां पुष्पाणामपचयः प्रलूननं कृतः ॥ २३ ॥

प्रपदाक्रमणे एते पश्यतासकले पदे ।
केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥ २४ ॥

सत्यधर्मीया — कुसुमचयापचयः कृष्णेन कृत इति कथं ज्ञायत इत्यत आहुः ॥ प्रपदेति । प्रपदाभ्यां पादाग्राभ्यामाक्रमणं ययोस्ते । अत एवासकले भूम्यलग्नत्वादपृष्ठे(?) इत्यसकले असमग्रे एते पदे पश्यत । अत्र कामिना कामिन्याः केशप्रसाधनं तत्संस्कारः कृतम् । उन्नतलता आनमय्य पुष्पग्रहणसमये प्रपदमात्रगोत्रास्पर्शः सञ्जात इति भावः । पादाग्रं प्रपदमित्यमरः ॥ २४ ॥

सुमनोरञ्जनी — तत्र किं ज्ञापकमित्यतस्तदूचुः ॥ प्रपदेति । प्रपदयोः पादाग्रयोः अक्रमणं ययोस्ते । अत एवासकले असमग्रे एते पदे पादलांछने पश्यत । स्वकराग्रपरिमाणापेक्षया किञ्चिदुन्नतशाखाग्रगतपुष्पापचयः प्रपदमात्रेण भुवमाक्रम्य कृतः । अत इमे पदे असंपूर्णे स्याताम् । ते पश्यतेति भावः । तत्रैव स्थानान्तरे श्रीकृष्णजान्वन्तरोपविष्टायाश्चिह्नं दृष्ट्वाऽऽहुः । कामिन्याः केशानां शिरोरुहाणां प्रसाधनं संस्कारः । कामिना प्रसन्नेन, प्रसादोऽपीच्छाविशेषः । तद्वता कृतमिति ॥ २४ ॥

तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ।
रेमे तया चात्मरत आत्मारामोऽप्यखण्डितः ॥ २५ ॥

सत्यधर्मीया — कान्तां तानि स्वापचितानि कुसुमानि चूडयता शेखरीकुर्वतेह ध्रुवमुपविष्टं तया रेमे च । कामी रेम इत्याद्युक्तिर्लोकानुकारेणेति स्वयं ग्रन्थकृदप्रशस्तकामितादिकं प्रतिषेधति ॥

आत्मरत आत्माराम इति । आत्मरत आत्मक्रीड इति श्रुत्यनुवादरूपमिति न पुनरुक्तिशङ्केति केचित् । आत्मरतः स्वरतः । न विद्यते रामा वयं यस्य सोऽराम आत्मनैवाराम आत्मारामः । स्वेच्छयैव त्यक्तास्मत्कः । अखण्डितः न विद्यते खण्डिता नायक्यो यस्य सोऽखण्डितोऽन्योपभोगचिह्नितो हि पतिरागच्छति यस्याः साखण्डिता । तत्प्रभेदस्तु रसमञ्जर्यामुक्तो, बहुधा मुग्धाखण्डिता यथा वक्षः किमु कलशाङ्कितमिति किमपि प्रष्टुमिच्छन्त्या नयनं नवोढसदृशः प्राणेशः पाणिना पिदध इत्यादिनोक्तोऽनुसन्धेयः । अधुना स्वदर्शनाभावादेता न खण्डिताः प्राणेशः पाणिनेत्याद्युक्तेः समागम आवश्यकः । शुकोक्ती रेम इत्यादिकेति ज्ञेयम् ॥ २५ ॥

सुमनोरञ्जनी — तानि पुष्पाणि चूडयता केशपाशे बन्धयता कृष्णेन इह स्थले उपविष्टं खलु । न केवलमेतावत् किंतु तया रेमे च । आत्मारामः स्वरमणः । आत्मरतः आत्म स्वरूपभूतं रतं रतिरानन्दो यस्य सः । आत्मारामपदप्रयोजनं पूर्वमुक्तम् । अखण्डितः कामेन अनाकृष्टचित्तः । रेमे तयेति शुकवाक्यमिति केचित् । तन्न । उत्तरवाक्ये इतिशब्दस्य, अस्मिन्नपि चशब्दस्यास्वारस्यापत्तेः । न चात्माराम इत्यादिवचनं जारत्वेन ज्ञातवतीनां गोपीनां कथमुपपद्यत इति वाच्यम् । न तु ब्रह्मतयेति परीक्षित्प्रश्नवाक्यव्याख्यानावसरे आचार्यचरणैरेवास्याः शङ्कायाः समाहितत्वादिति ॥ २५ ॥

इत्येवं प्रलपन्त्यस्ताश्चेरुर्गोप्योविचेतनाः ।
कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ २६ ॥

सत्यधर्मीया — विचेतना ज्ञानहीना इति प्रलपन्त्यश्च ता गोप्य एवं चेरुः । आत्मरतः किमिति रेमे रामाभिरित्यत आह । कामिनां निन्दितकामवतां दैन्यं दर्शयन्ननुकुर्वन् स्त्रीणां दुरात्मतां च दर्शयन्रेम इत्यन्वयः ॥ २६ ॥

सुमनोरञ्जनी — इति पूर्वोक्तप्रकारेण प्रलपन्त्यः विचेतनाः संभ्रान्तचित्ताः चेरुः ॥ २६ ॥

यां गोपीमनयत् कृष्णो विहायान्याः स्त्रियो वने ।
सा च मेने तदाऽऽत्मानं वरिष्ठं सर्वयोषिताम् ॥ २७ ॥

सत्यधर्मीया — अन्याः स्त्रियो विहाय यां कृष्णोऽनयन्निनाय वने सा च साऽपि सर्वयोषितां मध्ये आत्मानं वरिष्ठं मेने । आत्मशब्दलिङ्गविवक्षया वरिष्ठमित्युक्तिः ॥ २७ ॥

सुमनोरञ्जनी — कृष्णनीतायाः स्त्रियो वृत्तान्तमाह ॥ यामिति । कृष्णः यां गोपीं अनयत् सा तदा सर्वयोषितां मध्ये आत्मानं स्वस्वरूपं वरिष्ठं मेन इत्यन्वयः ॥ २७ ॥

हित्वा गोपीः कामयाना मामसौ भजतेऽति ह ।
ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥ २८ ॥

सत्यधर्मीया — कामयानाः स्वं, गोपीर्हित्वाऽसौ वासुदेवो मामतिभजते । कथान्तरारम्भं सूचयति हेत्यनेन । प्रत्यारम्भे प्रसिद्धौ हेति यादवः । वनोद्देशं गत्वा दृप्ता ततः केशवमब्रवीत् ॥२८॥

सुमनोरञ्जनी — कुतो मेने इत्यत आह ॥ हित्वेति । कामयानाः सर्वा अपि गोपीर्हित्वा । असौ प्रियः मामेव भजते अतोऽहमेव वरिष्ठेति । ततस्तदनन्तरं सा दृप्ता सती , न मत्सदृशी प्रियतमा अन्या अस्यास्ति अतोऽयं मद्वश एवेत्यहंकाररूपदर्पविशिष्टा केशवमब्रवीत् ॥ २८ ॥

न पारयेऽहं चलितुं नय मां यत्र ते मनः ।
एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति ॥ २९ ॥

सत्यधर्मीया — अहं चलितुं न पारये न समर्था यत्र ते मनस्तत्र मां नय । एवमुक्तः स्कन्धे आरुह्यतामिति प्रियामाह ॥ २९ ॥

सुमनोरञ्जनी — किमितीत्यत आह ॥ नेति । चलितुं गन्तुम् । न पारये न शक्नोमि । यत्र गन्तुं ते मनः तत्र त्वमेव मां नय । स्कन्धादावारोप्येति शेषः । इत्युक्तः कृष्णः प्रियां, मे स्कन्ध आरुह्यतामित्याहेत्यन्वयः ॥ २९ ॥

ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ।
हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ।
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥ ३० ॥

सत्यधर्मीया — सा वधूरहन्तासहिताऽन्वतप्यत सन्तप्ताऽभवत् । अनुतापप्रकारमीरयति ॥ हा नाथेति । सखे! ते तव दास्याः कृपणाया मे । सन्निधिं विद्यमानस्थानं दर्शय ॥ ३० ॥

सुमनोरञ्जनी — भगवान् भक्तानुग्रहाय तत्कालप्राप्ताहंकारखण्डनेन भक्तिफलमेव ददातीति भावेन पुरोवृत्तान्तमाह ॥ तत इति । पश्चात्तापः शुद्धबुद्धीनां स्वभाव इति दर्शयितुमाह ॥ सा वधूरिति । हे रमण रतिप्रद ! प्रेष्ठ प्रियतम ! कृपणायाः दीनायाः कृपाविषयाया इति वा ॥ ३० ॥

अन्विच्छन्त्यो भगवतो मार्गं गोप्योऽविदूरतः ।
ददृशुः प्रियविश्लिष्टां मोहितां दुःखितां सतीम् ॥ ३१ ॥

सत्यधर्मीया — भगवतो मार्गमन्विच्छन्त्यो गोप्य इतराः । अविदूरतः समीपे । यद्विषय उन्निन्य इत्याद्यूहनं तां ददृशुः । रमणि! रुचिररूपः किन्नु दूरे तवासीदित्यादिप्रश्नप्रतिवचनादिकं चोह्यम् । साऽप्यपूर्णमनोरथेत्याह । प्रियस्य विश्लेषेण मोहितां दुःखितां सखीमिति ॥ ३१ ॥

सुमनोरञ्जनी — भगवतो मार्गमन्विच्छन्त्यः अन्वेषयन्त्यः । अपरा गोप्यः । अविदूरतः समीपतः । मोहितां अहमेव वरिष्ठेति मोहयुक्ताम् । तत एव प्रियेण कृष्णेन विश्लिष्टाम् अत एव दुःखितां सखीं ददृशुरित्यन्वयः ॥ ३१ ॥

तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ।
अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥ ३२ ॥

सत्यधर्मीया — माधवाल्लक्ष्मीपतेः सकाशान्मानप्राप्तिं सत्कारस्वीकारं च तया कथितं सर्वं तदनुभूतमाकर्ण्य श्रुत्वा दौरात्म्यादहन्ताहेतुदुश्चित्तताया अवमानं हेलनं चाकर्ण्य परमं विस्मयं ययुः ॥ ३२ ॥

सुमनोरञ्जनी — मानप्राप्तिं बहुमानप्राप्तिम् । गर्वप्राप्तिं च । दौरात्म्यात् स्वकीयदौरात्म्यात् ॥ ३२ ॥

गत्वा वनाद् वनं चन्द्रज्योत्स्ना यावद् विभाव्यते ।
तमःप्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः ॥ ३३ ॥

सत्यधर्मीया — अत्र ज्योत्स्नाशब्दः कान्तिमात्रवाची । यावच्चन्द्रप्रकाशो विभाव्यते तावद्वनमविशन् । चन्द्रवत्कर्पूरवद्धवलज्योत्स्ना चन्द्रिकेति वा । चन्द्रः सुधांशुकर्पूरकम्पिल्लस्वर्णवारिष्विति विश्वः । प्रविष्टं तम आलक्ष्य ततो हरेर्मार्गणान्निववृतुर्निववृतिरे ॥ ३३ ॥

सुमनोरञ्जनी — यावच्चन्द्रज्योत्स्ना विभाव्यते प्रकाशते तावत् । वनाद्वनं एकं वनं विहायान्यद्वनं गत्वा । चन्द्रास्तमयानन्तरं प्रविष्टं व्याप्तम् । तमः आलक्ष्य दृष्ट्वा निववृतुः निवृत्ताः ॥ ३३ ॥

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ।
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥ ३४ ॥

सत्यधर्मीया — तदालापास्तच्चरितसंल्लापास्तस्यैव विशिष्टा चेष्टा यासां तास्तदात्मिकास्तत्स्वामिकास्तद्गुणान्गायन्त्य एवात्मागाराणि शरीराणि गृहाणि च न सस्मरुः ॥ ३४ ॥

सुमनोरञ्जनी — तन्मनस्काः तस्मिन् कृष्ण एव मनो यासां ताः । तदालापाः तद्विषयक एव आलापः सम्भाषणं यासां ताः । तद्विचेष्टाः तदुद्देशेनैव चेष्टाः अङ्गचेष्टाः हावभावादयो यासाम् ।

तदर्थमेव विगतेतरचेष्टा इति वा । तदात्मकाः स एवात्मा स्वामी यासां ताः । तद्गुणानेव तस्य कृष्णस्य गुणान् स्वस्वानन्दकरान् गुणानेव कीर्तयन्त्यः । विरहातुरस्त्रीणां स्वभावत्वान्न स्वपत्यादि-गुणकीर्तनपरा इत्येवकारेण बोध्यम् । आत्मागाराणि स्वस्वगृहाणि । आत्मानं स्वस्वदेहं, आगारं, आगाराणि चेति वा बहुवचनम् । न सस्मरुः न स्मृतवत्यः । तदेकस्मरणनिष्ठत्वादित्यर्थः ॥ ३४ ॥

पुनः पुलिनमाविश्य कालिन्द्याः कृष्णभावनाः ।
समवेता जगुः कृष्णं तदागमकाङ्क्षिताः ॥ ३५ ॥

इति श्रीमद्भागवते दशमस्कन्धे अष्टाविंशोऽध्यायः ॥

सत्यधर्मीया — पुनः पुलिनं प्रत्यागत्य सुरतस्थलमाविश्य । कृष्णस्य भावनं ध्यानं यासां ताः समवेताः मिलिता ललनास्तदागमनं कांक्षितं यासां तास्तथा । तदागमनकांक्षिणीरिति पाठे द्वितीया प्रथमार्थे समवेता जगुः ॥ ३५ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे अष्टाविंशोऽध्यायः ॥ १०-२८ ॥

सुमनोरञ्जनी — पुनः कालिन्द्याः पुलिनं प्रत्यागत्य । कृष्णस्यैव भावनं यासां ताः । समवेताः एकत्र मिलिताः । तदागमनकाङ्क्षिणीः काङ्क्षिण्यः । सुपां सुलुगिति पूर्वसवर्णः । तस्य कृष्णस्यागमनमेव काङ्क्षयन्तीति तथा सत्यः कृष्णं जगुरित्यन्वयः ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां अष्टाविंशोऽध्यायः ॥ १०-२८ ॥

॥ अथ एकोनत्रिंशोऽध्यायः ॥

गोप्य ऊचुः—

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा साधु तत्र हि ।
दयित दृश्यतां त्वां दिदृक्षतां त्वयि धृतासवस्त्वा विचिन्वते ॥ १ ॥

सत्यधर्मीया — बिम्बाधराश्चित्ते प्रतिबिम्बितं सम्बोध्यैवमगायन्गोविन्दमित्याह ॥ गोप्य ऊचूरिति । हे दयित प्रेष्ठ कृष्ण! ते जन्मना प्रादुर्भावेन व्रजो गोकुलं गतम् । अधिकमत्यन्तं जयति उत्कर्षेण वर्तते । जन्मापि न कर्मायत्तमित्याहुः । जन्म लोकवज्जन्म न आव्रजः स्वेच्छयाऽऽगत-वानसीति । तत्र तन्त्रमाहुः । अधिकं चतुर्मुखे । विभक्त्यर्थेऽव्ययीभावः । अग्भावो गौणं चाधि-

करणत्वम् । प्रार्थनार्थं प्राप्तवति सति त्वमाव्रज इति जन्मना व्रजो जयतीत्यप्यन्वयो वेति । जिः प्राप्त्यर्थकस्तु धनजिते स्वर्जित इत्याद्यावेदिताः । यतस्ततस्तत्र साधु इन्दिरा रमा श्रयते । त्वा दिदृक्षतां द्रष्टुमिच्छतां जनानां भवान्दृश्यतां प्रत्यक्षीभवतु । ते च कीदृशा इत्यत ईदृशा इति मृगदृशो दर्शयन्ति ।। त्वयीति । त्वयि धृता असवः प्राणा येषां ते त्वां विचिन्वते मार्गयन्ति । अतस्त-त्प्रत्यक्षीभवनं भवतो युक्तं तत्कुर्विति भावः । दिदृक्षतामिति पुंस्त्वेन, त्वां विचिन्वत इति परोक्षनिर्देशेन ताः स्वदेवताभावं ध्वनयामासुरिति ज्ञेयम् । परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इत्यादेः । अनङ्गवशतोऽङ्गस्मरणाभावात्का त्वं चिकीर्षसि वने मुनिवर्य शैल इत्यादिवदुक्तिर्वा । दिदृक्षन्त्यश्च दिदृक्षन्तश्चेत्येकशेषेण स्वत्वादिकं सङ्गृह्य प्रोचुरिति वा । पुमांस्त्रियेत्येकशेषः । कार्यतोऽकामिनीप्राया वयमित्येवमवदन्निति वा । हे तत्र त्रायत इति तत्रेति सम्बोधनं वा । एकतकारद्वितकारयोः श्रवणे विशेषाभावादिति ज्ञेयम् । विस्तृतं चैतद्भाष्यदीपिकायुक्तिवात्याया-मस्मत्कृतायां भाष्यकैय्यटशेखराद्युदाहृत्यानुसन्धेयम् ।

हे ज अस्मज्जयशालिन् । ज यतिता इधिकं जन्म न व्रजः आ इन्दिरा साधु तत्रेति पदानि । जो जेतरीति विश्वः । जगज्जनकेति वा । जनकस्यात्ययो जातिरित्यादेः । ननु विरक्तस्य मम किमासक्त्येत्यत आहुः । ते यतिता सन्यासित्वं नेति । इधिकं इर्विधिर्वा कामो वा धीयतेऽस्मिन्निति गर्भे तद्वच्छ्रीतत्त्वं रमाऽस्यामिति वा । अधिकरणे किः । गर्भधिमित्यादिवत् । तेन तया वा कं सुखं तस्य तस्या वा कं सुखं यस्मात्तं त्वा दिदृक्षतामित्यन्वयः । ते जन्म मुख्यं न किन्तु त्वमेवेच्छयाऽव्रज इन्दिरया प्रविष्टयाऽन्तरधुतेनातिरस्कृत्या सहित इति इन्दिरासाधुतोऽयं स्त्रीजनस्तं त्रायत इति तत्सम्बोधनम् । सत्सु लसत्सु मल्लुलोकयिषा योषाणां कुत इत्यतोऽप्याहुः । भवान्दृश्यतां सुन्दरतां श्रयते हि यतस्तत इति । इन्दिरा च धृतासवः प्राणायामादिपराः, धृता आसवा यज्ञा येन सोऽपि आव्रजो निवासत्वेनास्तीति स तज्जनश्च त्वां विचिन्वत इत्यप्यन्वयः । प्रायः प्रतिपादमनुप्रासोत्तरा प्रथमाक्षरप्रासश्च ज्ञेयम् । तदवबादीनां सावर्ण्यान्न प्रासभङ्ग इति च मन्तव्यम् । त्रिष्टुप्छन्द-स्येकादशाक्षरवृत्तेषु नगणरगणद्वयलघुगुरुकवृत्तमेतन्नामेति नोक्तं तदाकर इदं निबन्धनेन हरिवृत्त-दुर्ज्ञेयतां ध्वनयतीति मन्तव्यम् । मध्ये लघू र इत्युक्ते रगणसाजात्यं मध्यलाघवस्त्रीगणस्यापि । किञ्च रोऽग्निरित्युक्तेरयमपि विरहानलव्यापिकलेवर इतीदानीं दानवारिः सर्वप्रकारेण लाघवं स्वादर्शनाभि-मर्शनतो ददौ तस्येति, च प्रसादे सति लघुभूतस्यापि तस्य दास्यति गोविन्दो गौरवमिति ध्वनयितुं ग्रन्थकृन्नगणरगणद्वयलघुगुरुयुक्तवृत्तविशेषतो गीतविशेषं न्यभांत्सीदिति भावः ।। १ ।।

सुमनोरञ्जनी — (अत्र सुमनोरञ्जिनीव्याख्यायां कतिचनभागः नोपलब्धः)

व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित ।
भज सखे भवे किङ्करीः स्म नो जलरुहाननं चारु दर्शयन् ॥ २ ॥

सत्यधर्मीया — हे वीर गरुडारूढ! समर्थ! विगत ईरः प्रेरको यस्येति स तत्सम्बुद्धिः । वीराश्च योषितोऽस्वैरिण्यो वयं च तासामित्येकं पदं वा । व्रजजन आर्तिहन्निति छेदः । हे व्रजजन गोकुलज! व्रजे जनो जननं यस्य तत्सम्बुद्धिः । वीर! वीरयोषितां आर्तिहन् हे ज गतम् । योषितां वीरयोषितामार्तिहंश्च न व्रज एवमुपेक्ष्य क्षपायां न गच्छेति वा । अलमेतल्लीलयेति लपन्ति । निजजनानामस्माकं स्मयो गर्वस्तस्य ध्वंसनं येन तत्स्मितं यस्य, ध्वंसयतीति तद्वा तत्सम्बुद्धिः । भवे भाविमङ्गलार्थं हे सखे जलरुहवद्विद्यमानमाननं, जलरुहस्याननं चेष्टा यस्मात्तद्रूपं चारु दर्शयन्सन् किङ्करीरिति नः स्मृत्वा भज सेवस्व पालयेति यावत् । इतरेण धुनानमब्जमित्युक्तेः । विपरीतं चेच्चारु रुचा चारु भविष्यति ॥ २ ॥

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ ३ ॥

सत्यधर्मीया — शरदुदाशये साधु जातसत्सरसिजोदरश्रीमुषेति पदम् । शरदो ऋतोस्तत्सम्बन्ध्युदाशयः सरस्तस्मिन्साधु यथा तथा जातं सत्सरसिजं कमलं तस्य श्रियं शोभां मुष्णाति चोरयतीति सा तया दृशा कटाक्षेण । सप्तम्या अलुगसंज्ञात्वेऽपि ज्ञेयः । हे सुरतनाथ रमणसमर्थ ! वरद ! अशुल्कदासिका अविक्रीतदासीः । अनेन स्वाभाविकता दास्यस्य सूच्यते । निघ्नतो दूरीभूततया हतवतस्तवेह वधो न किं, न शरादिः कथं कथयत । कामिन्योऽयं युष्मद्वध आयुष्मत्य इति न वद वधदृगेव तादृगिति तात्पर्यम् । असाधुजातसत्सरसिजोदरश्रीमुषा असाधूनां जातं समुदायस्तस्य तथा सन्ति रक्तिम्ना समीचीनानि सरसिजस्य कमलस्योद्गतान्यराणि दलानि च तेषां च या श्रीस्तां मुष्णातीति सा तया दृशा । हलन्तत्वाट्टाबन्तः शब्दः । दृगेव भवति । शरदुदाशये शरवदाचरतीति स शरत् उद्गतोऽस्मय आशयो यस्य तस्मिन्सति । सुरत शाश्वतरतिमन् । किञ्च हे शुल्कद! असिश्च कश्च पावकश्चासिकौ आ सम्यगसिकौ यस्यां सा सति वा यम एव यस्यां त्वद्वियुक्तानां सैव खड्गाग्निरूपिणीति यावत् । (असिका, दृशा इत्यन्वयः । त्वद्वियुक्तानां अस्माकं त्वद्दृष्टिरेव खड्गाग्निरूपिणी इत्यर्थः इति भाति) को ब्रह्माऽनिलार्केषु शमने सर्वनाम्नि च । पावके च मयूरे चेति विश्वः । हे वरद निघ्नतो निघ्ना अधीना नाथते एता मद्विषया भवन्त्वित्याशास्त इति ते सकाशादिह वधो न किं यथान्यासमन्वयो वा । हे सुरतनाथ ! ते ! आनन्दं तीति वै

वदेदित्यादेरानन्दमूर्ते ! या अशुल्कदासिका वरदनिघ्नतो वरदाधीनानामस्माकं ते दृशेत्यादिकमादिवत् वधो नेह किमिति वा योजना । एतत्पक्षे सति शरदुदाशयपदेन लसति सरसिपदं सरसि, साधुजातपदं सत्पदमित्येकतरमतिरिक्तं चेति परास्तमिति मन्तव्यम् । आशिषिनाथ इत्यात्मनेपदता । अधीनो निघ्न आयत्त इत्यमरः । वरं ददातीति प्रागिदानीं वरं द्यतीति वरदेति ज्ञेयम् । दोऽवखण्डन इति स्मरणात् । शरवन्मण्डवदाचरदुदं समुद्रोदकं तत्राशेते यः स तस्मिन्निति वा । विना द्रढिमानं वारोधारणायोगात् । तद्यदपां शर आसीत्तत्समहन्यत । शरो मण्ड इति प्रोक्त इत्यादेः । अधिकरणे शेतेरित्यच् । हे नेह न विद्यत ईहेच्छा यस्याक्लिष्टकर्तः कृष्ण ! हे सुरत ! अथैवं वने वनितात्यजनानन्तरं न किं वध इत्यन्वयो वा । हे साधुजात साध्वर्थं तद्रक्षार्थमिति यावत् जात प्रादुर्भूत ! साधोर्नन्दगोपाज्जात! तव पिता नैतादृश इति भावः । सत् यत्सरसिजं तस्योदरमावासस्थानं यस्याः सा च सा श्री रमा तां मुष्णाति स्वविषयीकरणमेव तन्मोषणं तयेति वा का कथाऽस्माकमिति भावः। तर्हि तदा कृतदन्तनखक्षतापेक्षयाऽयमधिकृत्किं किङ्कर्य इति न वदेति च वदन्ति । रदनिघ्नतो रदैर्निघ्नंस्तस्य ते सकाशाद्वधो व वध इव किं नेति वा । इवार्थे वशब्दो वाशब्दो वा बोध्य इत्युक्तेः ।।३।।

विषजलाशयाद् व्यालराक्षसाद् वर्षमारुताद् वैद्युतानलात् ।
वृषमयाद् भयाद् विश्वतोमुखाद् वृषभ ते वयं रक्षिता मुहुः ।। ४ ।।

सत्यधर्मीया — हे वनिताः । नावनं कदाऽपि मया कृतमिदानीं कुत एवमर्थनेति न स्वामिन्वद । वदामः सर्वजनीनं त्वद्रक्षणं क्षणं दिशेति शंसति ।। विषेति । विषात्मकाज्जलाशयो यमुनाह्रदस्तस्माद्व्यालः क्रूरो राक्षसस्तृणावर्तस्तस्मात् । व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । विषं जलाशयं यमुनाह्रदमातयति गमयति प्रापयतीति स तथा स चासौ व्यालः कालियस्तेन सहितो राक्षसस्तृणावर्तो वा बको वा तस्मादिति वा । वर्षं वृषकृतं तेन सहितस्तत्प्रहित एव मारुतस्तस्मात्तदा त्वयैव तत्प्रेरिताद्विद्युदग्नेः । वृषेण वत्सासुरेण मय्यते गम्यते प्राप्यत इति तस्माद्भयात् । अयवयपयमयचयतयणयगताविति स्मरणात् । तद्रूपादेव भयात् । यद्वा वृषश्च वत्सश्च तेन सहितो मयो जन्यजनकशब्दसाङ्कर्यान्मयपुत्रो व्योमस्तस्मादिति केचित् । वृषमयाद्भयादिति पदमेकम् । वृषश्च मयाच्च मयपुत्रो वृषमयातौ ताभ्यां भयं तस्मादिति वा । मुखं निःसारणे वक्त्र इति विश्वात्सर्वतो मुखं निःसरणं यस्य तस्माद्दवादिति शेषः । हे वृषभ ते त्वया । एवं मुहुर्वयं रक्षिता अत एतर्ह्यपि रक्षेति भावः । न च वाच्यं स्युरुत्तरपदे व्याघ्रपुङ्गवसुरर्षभकुञ्जराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचका इति किञ्चित्पदोत्तरं सतां व्याघ्रादिपदानां श्रेष्ठार्थवाचकत्ववचनात्पुंव्याघ्र इत्याद्युदाहरणात्कथं केवलवृषशब्दः श्रेष्ठवाचीति । वृषभः पुङ्गवे वृष इति नानार्थरत्नमालोक्ते रूढ्या श्रेष्ठोऽप्यर्थः । यथोक्तं

तिग्मेन वृषभेण पुरोभिदित्यृग्भाष्यटीकाटिप्पणेषु । अभिनद्धृषेण प्राणेन वृषभेण वृषेण जीवश्रेष्ठेन प्राणेन वृषभः पुङ्गवे वृष इति नानार्थरत्नमालोक्तेः श्रेष्ठोऽपि वाच्य इति भाव इति । यद्वा वर्षयिताऽभिलषितमिति वृषभः । यद्वा वृष सेचनेऽस्मादभजित्यनुवृत्तौ ऋषिवृषिभ्यां किदित्यनेन (अभच्प्रत्ययः सच कित्) तस्य कित्त्वाद्गुणाभावे च निष्पन्नो वृषशब्दो योगेन वर्षयितारमाह । इदमप्युक्तं त्वमग्रे वृषभः पुष्टिवर्धनः । वृषभो वर्षणस्य कर्तेति । वृषं धर्मं बिभर्तीति वा तत्सम्बुद्धिः । वृषो धर्मे वृषः श्रेष्ठे वृषो गौर्मूषको वृषः । वृषो बलं वृषः कामो वृषलो वृष उच्यत इति नानार्थध्वनिपदमञ्जर्युक्तेर्योग्यभर्तृत्वाद्वृषभ इति वा । वृषभत इति पदमेकं वा वृषभस्य मान्धातुर्वाहनत्वे वृषभरूपेन्द्रस्य तिर्येन वायुर्वृषभरूपेणेत्युक्तेर्वायोर्वा तिर्येनेति तत्सम्बुद्धिर्वा ॥ ४ ॥

स खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।
विखनसार्चितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥ ५ ॥

सत्यधर्मीया — न वयमज्ञा इति विज्ञापयन्ति ॥ स इति । स भवान्गोपिकाया यशोदाया नन्दनः सुतः खलु न । निषेधे वागलङ्कारे वीप्सनेऽनुनये खल्विति च । विश्वोऽपि प्रागुदाहृतः । गोपिका अस्मानानन्दयतीति स तथा स खलु इदानीं नेतिं वा । कुतो न यशोदासुत इत्यत आहुः । अखिलदेहिनामन्तरात्मा तम्पश्यतीति स तथा । हेत्वन्तरमाहुः ॥ विखनसार्चित इति । विखना ब्रह्मा तेनार्चितः सम्प्रार्थितस्तेनेति यावत् । प्रयोजनमाहुः ॥ विश्वगुप्तय इति । जगद्रक्षार्थम् । हे सखे सात्वतां यादवानां कुले भवानुदेयिवानुदयं प्राप्तः स भवान्गोपिकानन्दनः खलु निश्चय इति वा । न खल्वित्यपि पाठस्तत्र खलु वाक्यालङ्कारे । योऽखिलदेहिनां खिलो नेत्यखिलो देहः स्वरूपदेहो येषामस्ति तेषामन्तरात्मदृक् विखनसाऽर्चितश्च । खन् अवदारणेऽस्मादसुनि विगतं खनोऽवदारणं यस्य विखना अखनाश्मसम इति यावत् । तेन ब्रह्मणा । सखः सुखपूर्ण इति वा । समं खं ब्रह्मणा येन स सख इति । कं ब्रह्म खं ब्रह्मेति श्रुतेः । खं प्रकाशस्वरूपत्वात्पुनः खं सुखरूपतः । ख्यातत्वाच्चैव तत्खं स्याद्रौहिणेयस्तथाऽवददिति बृहदारण्यभाष्योक्तम् । सशब्दस्य समार्थकता प्रागुक्त्वोपपादिताऽनुसन्धेया । हे आत्मदृक् मदपरोक्षज्ञानिन् त्वं भवांस्तरेति विश्वगुप्तये सात्वतां कुले उदेयिवान् । मे चाखिलदेहिनामं अखिलदेहिनो विध्यादयस्तेषां नामः प्रणामो यस्य सकलनमस्कृतम् । नो गापिकाऽस्मद्यशोदा आनन्द बबन्ध स त्वं खलु नामन्तरेत्यत्र न यतिभङ्गः शङ्क्यः । तस्य क्षुद्रकाव्याभव्यताहेतुत्वात् । अर्थान्तरवर्णने सुतरामदोषत्वात् । स्पष्टं चैतत्प्रमेयदीपिकादिषु । स भवान्गावश्च पिकाश्चोपलक्षणया सन्तोषणीयसर्वग्रहास्तानानन्दयति । आकरणानुकरणादिभिः । अखिलदेहिनां मध्ये भवानन्तरा विना । आद्यर्थे बहुवचनम् । संसारादिदुरिष्टं, सखः शुभेन्द्रियसहितः

सन्नुदेयिवानिति वा । हे अखिल पूर्ण हे गोपिकानन्दन नामं प्रह्वणं भावे घञ् । नस्तरेति तर वितर पुनर्मदो न यथोदंचेत्तथा कुर्विति भावः । आत्मदृक् स्वप्रकाशः ॥ ५ ॥

विरचिताभयं वृष्णिवर्य ते शरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ६ ॥

सत्यधर्मीया — स्वाभीष्टमिष्टं प्रति बोधयन्ति ॥ विरचितेति । हे कान्त कमनीय पते वा । वृष्णिवर्य । धुर्येत्यपि पठन्ति । स च वृषभपर्याय इति श्रेष्ठार्थकः । ते तव, संसृतेः सत्सङ्ग-रूपसंसारात्तामुद्दिश्य तथा भयादितरस्माच्छरणमीयुषां प्राप्तानां विरचिताभयं विरचितमभयं येन तत्कामदमपेक्षितदं कामो मारस्तं द्यति खण्डयतीति तत्तथेति वा । श्रीकरग्रहं गृह्णातीति ग्रहं श्रियः करस्य पाणेर्ग्रहं करस्य ग्रहो यस्य तदिति वा करसरोरुहं करकमलं नः शिरसि धेहि । संसृते-र्भयादित्यन्वयस्तु प्रस्तुतार्थानस्तुङ्कार इति ज्ञेयम् । पारमार्थिकोक्तिरयं संसार एव नेति वा । हे श्रीकर सम्पत्कर । श्रीर्विषमिदानीं करे यस्य स तत्सम्बुद्धिः । श्रीर्विषे वेषसम्पदोरिति रत्नकोशः । नो मध्ये का कामिनी मदं ग्रहं तदात्मकं पिशाचं यायादिति शेष इति वा । श्रीर्वाणीलक्ष्मीलवङ्गेषु विषे बिल्वेऽप्यथो त्रिष्विति नानार्थरत्नमाला ॥ ६ ॥

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥

सत्यधर्मीया — किञ्च प्रणतदेहिनां पापं कर्शयत्यपकर्षतीति तत्तथा । पापस्य कर्शनं यस्मादिति वा । तृणचरास्तृणभक्षकास्तत्सञ्चारिणो वा पशवस्ताननुगच्छतीति तत्तथा । श्रीनिकेतनं शोभावद्वा लक्ष्मीनिवासभूतं वा । अनेनाटनं नटनमिति ध्वन्यते । फणिफणार्पितं प्राक् शेषशीर्षार्पितमेतर्हि कालियफणिफणार्पितम् । नः कुचेषु कृणु । अनेन फणिफणार्पणमर्पणमस्मत्कुचेषु चासङ्गस्य तव सममिति ध्वनयन्ति । किञ्च स च कञ्चुकमोचकस्तत्सङ्गेन त्वमपि तथा भवेत्यपि तेन च हृच्छयो हृदि शेत इति हृच्छयो हृच्छ्रयत इति वा हृच्छयस्तं कृन्धि हिंसय । यो नः कुचेषुनः कुचेषूनर-विन्दादीषु इन्नयति प्रापयतीति स तथा तं हृच्छयमित्यावृत्त्याऽन्वयनेनानागस्कृदनङ्गभङ्ग-प्रार्थनेत्यर्थविशेषः सूचितो भवतीति मन्तव्यम् ॥ ७ ॥

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यतीरधरसीधुनाऽऽप्यायस्व नः ॥ ८ ॥

सत्यधर्मीया — वल्गूनि मनोहराणि वाक्यानि यस्यां सा तया । मधुरया स्वयं मनोहर्त्र्या गिरा वाण्या जारनारीणामेव मनोहरता न गीरितीरयन्ति । बुधमनोज्ञया विद्यावद्धृद्यया । पुष्करेक्षण पद्मनेत्र! पुष्करं पुष्कलमीक्षणं ज्ञानं वा पुष्कलानीक्षणानि नयनानि यस्य तत्सम्बुद्धिर्वा । हे वीर प्रेरकान्तररहित शूर वा । विधिकरीर्विधिमाज्ञां कुर्वन्ति तच्छीला इति विधिकर्यस्ताः । कृञो हेतुताच्छील्यानुलोम्येष्विति कृञष्टः । टित्त्वान्ङीप् । दासीर्मुह्यतीरिमाः । अधरसीधुना तद्गतरसरूपमद्येन । मैरेयमासवं सीधुरित्यमरः । नः आप्याययस्व वर्धय । स्फायी ओप्यायी वृद्धाविति स्मरणात् । प्रथमाष्टकषष्ठाध्यायद्वाविंशतिवर्गगताप्यायस्व समेतु त इत्यृग्व्याख्यावसरे वर्धस्वेति विवृतत्वात् । सेचयेत्यादि व्याख्यानं धात्वनेकार्थत्वात्सम्भवति । मुरलि मुररिपुप्रिये त्वमप्याययेत्यन्तरङ्गतः कटाक्षयन्ति ॥ विधिकरीरिमेति । विधिकरीरो हि विधिनिर्मितब्रह्माण्डघटः सोऽस्या अस्तीति विधिकरीरिणी । घटः करीरः कलश इत्यमरः । सा मा सम्पद्यस्याः सा त्वं मुरलि । तव यः स्वनस्तेन न आप्याययेति वा ॥ ८ ॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९ ॥

सत्यधर्मीया — ये तव, तप्तान्संसारतो, जीवयतीति, तप्तानां जीवनं येनेति वा । किञ्च कविभिरीडितं स्तुतम् । कवयो गृणन्तीत्यादेः । कल्मषापहं पापपरिहारकम् श्रवणेन मङ्गलं यस्माच्छ्रवणयोर्मङ्गलं येनेति तत् । श्रीमत्समृद्धियुतमाततं विश्ववितितम् । हे भूरिद सकलपुरुषार्थप्रद! गृणन्ति ते । जनः पामर इति विश्वः । अजना अपामरा महान्त इति भावः । भूरि स्वर्णं जातरूपं हिरण्यं राःकल्याण हेम रुक्मं सुवर्णमित्यभिधानम् । भूरिर्ब्रह्माच्युतेशेषु भूरिप्राज्यसुवर्णयोरिति विश्वः। तवाजना जीवन्मुक्ता इति वा ॥ ९ ॥

प्रहसितं प्रिय प्रेमवीक्षितं विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥

सत्यधर्मीया — अधरसीधुनाप्याययस्वेत्यनन्तरमेव प्रहसितमित्यादि कथनीयम् । मध्ये मद्विरहदहने उज्वलति कथमुज्वलाङ्गच इयल्लवं जीवनं युष्माकमित्यतः पारोक्ष्येण तव कथामृतमित्याद्युक्त्वा तेनैवास्मदवस्थानमित्यर्थात् सूचयित्वा पुरा रचितमच्युताधरसुधाया अवितरणे क्षोभकमिदमिति वदन्ति । हे कुहक! प्रणयकोपेन कुहकेत्युक्तिरित्यन्तःप्रतिबिम्बितसम्बोधनम् । अन्तरर्थस्तु नो कुहकेति । प्रहसितं ते हासः । प्रेमवीक्षितं स्नेहपूर्वकमीक्षणं ध्यानमङ्गलमित्यविपरिणतं, विपरिणतं

सद्यथायथमन्वेति । विहरणं क्रीडा । हृदिस्पृशो हृदयङ्गमाः । हृद्युभ्यामित्यलुक् । रहसि याः संविदः सम्भाषणानीत्येतदादयो हि यतो नोऽस्माकं मनः क्षोभयन्ति । संविद्युद्धे प्रतिज्ञायां सङ्केताचारयामसु । सम्भाषणे क्रियाकारे विज्ञाने तोषणेऽपि चेत्युक्तेस्सम्भवदर्थो ग्राह्यः । क्षुभ सञ्चलने । चालयन्त्यन्यथाकुर्वन्तीति यावत् । ततोऽधरसीधुनाप्याययस्वेत्यन्वयः ॥ १० ॥

चलसि यद् व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् ।
तृणशिलाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११ ॥

सत्यधर्मीया — ज्ञातत्वत्स्वतन्त्रत्वानामस्माकमपि प्रेमविशेषप्रसरान्मन एवं भवति । त्वं तत्त्वतोऽकुहकोऽपि नटयसि तत्त्वमिति सुदत्यो वदन्ति ॥ चलसीति । यद्यदा व्रजात्पशूंश्चारयंश्चलसि हे नाथ! ते नलिनसुन्दरं कमलकोमलं तदपेक्षयाऽपि सुन्दरं वा पदं, तृणशिलाङ्कुरैस्तत्स्पर्शेन सीदति विशीर्णं भवतीति नो मनः कलिलतां व्यग्रतां गच्छति । मम युष्माकं च कोऽनुबन्ध इति न वदेति वदन्ति ॥ कान्त रमणेति । इदानीं कृतं किं मयेत्यामयो युष्माकमित्यतोऽप्याहुः । पशूनिवास्मांश्चारयन्वनं वनं व्रजादस्मात्सङ्घाच्चलस्यन्यत्रेति । कान्त कस्य सुरतसुखस्यान्तो येन तत्सम्बुद्धिः ।

कान्तः स एव यः स्थैर्यधैर्यसौन्दर्यसागरः ।
सुखस्यान्तकरं कान्तमपरं तर्कयामहे इत्युक्तेः ।

अन्ततो गत्वा मम स्वभावोऽयमिति न गद गदाग्रजेत्याहुः । कस्य स्वरूपसुखस्याप्यन्तो निर्णयो येन तत्सम्बुद्धिः कान्तेति । अतः कौहक्यं दर्शयसीति कुहकेत्युक्तमिति भावः । हे मनःकान्त! मनः कान्तोऽश्मरूपं यस्य सो भवांश्चलसीति कलिलतां गच्छत्यस्मद्व्रज इति वा । कान्तोऽश्मनि प्रिय इति विश्वः । निवृत्ताः किल ललना इति न लप यदुपेत्यप्याहुः । नो मनः कलिना तन्नामकद्रुमेण सहिता लता माधवी तदादिकमेव मार्गणार्थं पुनर्गच्छतीति वा । लता कस्तूरिकायां तु माधवीद्रुमयोरपीति विश्वः । भूतावासः कलिद्रुम इत्यमरः । मनःकान्त मनोहर यदा व्रजात्पशूंश्चारयंश्चलसि तदा तथाऽपि ते पदं नलिनसुन्दरमेव । नः पदन्तु तृणशिलाङ्कुरैः सीदतीति भवान्कलिलतां न गच्छतीति वा कुहकेति । कलिं स्वभावतो लान्त्याददत इति कलिलास्तेषां भावस्तां नाथ भवान्गच्छतीति कुहकेति वा । यद्यनुप्रासनैर्भर्यं तर्हि शिलतृणेति पाठस्तत्र शिलाः सन्त्यमीष्वित्यर्श आद्यचि शिलानि तृणानि चाङ्कुराश्च तैरित्यर्थः । हे कान्त नो मनः, कलिलानां स्वीकृतकलहानां भावस्तां गच्छतीति वा । कलिः स्यात्कलहे शूर इति विश्वः । ते पदं मम मनो नाथते आशास्ते । आशिषि नाथ इति वाच्यमिति वार्तिकादात्मनेपदता ॥ ११ ॥

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।
वनरजस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

सत्यधर्मीया — कलिलमन्यत्रागच्छन्नो मनस्त्वत्कृतस्मृतिमदिति त्वमित्थं तनोषि स्मृत इति वदन्ति ॥ दिनपरिक्षय इति । सायंसमये । नीलकुन्तलैर्नीलालकैः । एत एव त्वद्विरहे रहः कुन्तहस्त-वद्विद्यमाना इति ध्वनयितुं श्यामलालकैरित्यनभिदधाना अभ्यधुः कुन्तलैरिति मन्तव्यम् । कुन्तलः केशपर्यायः कुन्तहस्तवच्च कुन्तल इत्यनेकार्थध्वनिपदमञ्जरी । नैल्यं लोहमयत्वात्तत्रापि सम्भवि । आवृतं वनरुहाननं बिभ्रत् । वनानां यत्तद्भूमौ गोरजस्तद्युतम् । हे वीर दर्शयन्मुहुर्नो मनसि स्मरं यच्छसि । मुहुरित्यत्रापि योज्यम् ॥ १२ ॥

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥

सत्यधर्मीया — हे रमण! आधिहन्मनोव्यथामथन! पद्मजार्चितम् । धरणिमण्डनं धरणी धरणि-र्मही महीति द्विरूपकोशः । तदलङ्काररूपम् । आपदि आ सम्यग्व्यक्तं पदि धूल्यङ्किते पादे दृष्टे सति ध्येयमिति वा । यथोक्तं पुरस्तात् । पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः । लक्ष्यन्त इत्यादि । अनेनापद्येवेति निरस्तं भवति । ध्येयं, शन्तममतिसुखम् । स्वित्यानन्दः समुद्दिष्टो वरिति ज्ञानमुच्यते । मुक्तिदानेन तद्दानात्सुवरस्य पदद्वयमिति बृहद्भाष्योक्तेः । चरणपङ्कजं नः स्तनेष्वर्पय । यद्यपि ते पदाम्बुजं, कृणु कुचेषु नः कृन्धि हृच्छयमिति प्रागस्यार्थस्य प्रार्थितत्वात्पुनरर्थनमादराद्वाऽनेकासां कामिनीनां मेलनात्तत्र कासाञ्चिदत्र कासाञ्चिदिति वा ज्ञानदातृत्वोपाधिना तत्रैकमानन्ददातृत्वो-पाधिनाऽत्रैकमत एव शन्तममित्युक्तमिति वा युक्तम् । एवमुत्तरत्रापि ज्ञेयम् । नः स्तनेष्वस्मच्छब्देषु चरणपङ्कजमर्पय तत्स्तुतिरतमस्मच्छब्दं कुर्विति तात्पर्यमिति ॥ १३ ॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥

सत्यधर्मीया — सुरतवर्धनं व्यवायः सुरतं, स्वरितवेणुना स्वरोऽस्य सञ्जात इति स्वरितः स चासौ वेणुश्च तेन चुम्बितम् । सुष्ठ्वित्यनेन यदा कदाचिन्नः, तस्य तु सदेत्यसूचयन् । इतरराग-विस्मारणमितरविषयासक्तिविस्मारकम् । नृणामिति द्रष्टृमात्रग्रहणम् । अनुभवित्रीणां तु का कथेति

ध्वन्यतेऽनेन । वीर! नस्तेऽधरामृतं वितर । अनेन पूर्वोक्तसीधुशब्दं मूलकृद्व्याचख्याविति ध्येयम् । विश्राणनं वितरणं स्पर्शनं प्रतिपादनमिति हलः ॥ १४ ॥

अटति यद् भवानह्नि काननं त्रुटि युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जडवदीक्षतां पक्ष्मनुद्दृशाम् ॥ १५ ॥

सत्यधर्मीया —— न गोपीनामस्माकमन्यो व्यापारोऽपारमहिमंस्त्वच्चिन्तनादिति विज्ञापयन्ति ॥ अटतीति । यद्यदा भवानह्नि दिवा काननं वनमटति तदा त्वामपश्यताम् । पुंप्राया इत्यपश्यतामित्युक्तिः । अस्माकं गोपीजनानां त्रुटिः । न लोपः प्रातिपदिकान्तस्येत्यादि- वत्प्रातिपदिकनिर्देशः । त्रुट छेदने इगुपधात्कितीन् । स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणव इत्यमरः । लेशोऽपि कालो, युगानीवाचरति युगायते । युगं तु दिव्यद्वादशसहस्रवत्सरात्मकः कालः । कुटिलं कुन्तलं श्रीमुखं च जडवन्निमीलनोन्मीलनाभावमात्रेण तद्वदित्युक्तिः । अन्यथेक्षतामिति विक्षतं स्यादिति ज्ञेयम् । ईक्षमाणानां दृशां तत्सम्बन्धिनयनानां पक्ष्मनुत्पक्ष्माणि तल्लोमानि नुदति व्यथयतीति तत्तथा । पक्ष्मकृदिति पाठे पक्ष्माणि करोतीति स चतुराननो जडवन्मूर्खवदेवेत्यर्थ इति केऽपि । यद्यदाऽह्नि भवानटति यत्र कुत्रापि तदा नं नियन्तारं त्वाऽस्मदितरा नारी न आम नान्वगच्छत् । सा काऽपि त्रुटियुगा त्रुटिर्युगं यस्याः सा सती । पश्यताम् पश्यो जीवोऽस्यास्तीति स जीवस्तत्त्वमयते गच्छति न काऽपि । याऽयते पश्यतां सा केति तां पश्य तादृङ्गगदृङ्नास्तीत्यर्थः । पश्यत इति व्याख्यावेलायां पश्यतीति पश्यो जीव इति तत्त्वप्रकाशिकाद्युक्तेः । ईक्षतां दृशामजडवत्पण्डितवद्युगं त्रुटियुग्मवदाचरतीत्यपि त्रुटियुगायत इत्यावर्त्यार्थो ज्ञेयः । एवं चेन्न वृत्तविच्छित्तिस्त्रुटिर्युगायत इति पठतामिव नापि प्रातिपदिकताश्रयणक्लिष्टता च भवतः । स्यात्त्रुटिः संशये लेशे सूक्ष्मैलाकालमानयोरिति विश्वः । यद्वाऽर्धर्चादित्वान्नपुंसकलिङ्गता । न च काशिकायामर्धर्चगोमयेत्यारभ्य शकलान्तशब्देषु त्रुटेरग्रहीतेः कथं तत्त्वेन नपुंसकतेति वाच्यम् । ओष्ठे इत्यृग्भाष्यटीकायामर्धर्चादित्वादोष्ठशब्दो नपुंसकलिङ्ग इत्युक्तस्य तत्रोपसङ्ख्यानत्वादित्युक्तेराकृतिगणतामजिज्ञपन् युगेत्येकदेशा ग्रन्थकृत इति । काऽत्र कथन्ता लिङ्गमशिष्यमिति भाष्याद्वा नपुंसकता ॥ १५ ॥

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य ते ह्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥

सत्यधर्मीया —— स्वस्थितिमिव तत्स्थितिमपि नर्ममर्म वध्वो बोधयन्ति ॥ पतीति । पतिर्भर्ता च सुताः पुत्राश्चान्वयास्तदनुबन्धिनो भ्रातरो बान्धवा इतरे चताननतिविलङ्घ्यातिक्रम्य ते त्वां प्रत्यागता

हि यतोऽच्युत । गतिविद इति प्रथमा षष्ठी च । गतिविदोऽस्मद्गतिज्ञस्य तवोद्गीतेन मोहिता गतिविदश्चागता योषितो निशि कस्त्वदन्यस्त्यजेन्न त्यजेदतः कितवेति सम्बोध्य इति भावः ॥ १६ ॥

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरःश्रियो धाम वीक्ष्य ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥

सत्यधर्मीया — या वयं रहसि संविदं गतम् । हृच्छयोदयमिति सम्भवद्विशेषणम् । प्रहसिताननं प्रेमवीक्षणं च । बृहद्विशालं श्रियो रमाया धाम गृहरूपमुरश्च ते वीक्ष्य चाच्छूत्वा संविदं चातिस्पृहा इति नो मनो मुह्यते मोहयुतं भवति । हे अतिस्पृह अतिक्रान्तः स्पृहां इति तत्सम्बुद्धिः । नो मनो मुहुरामुह्यत इति वा । बृहदुरः श्रियो वीर वीक्ष्येति पाठे बृहदुरसि स्थिताश्च ताः श्रियश्च ता वीक्ष्य । एकाऽपि सापत्न्येर्ष्यातोऽनेकीभूय भासत इति श्रिय इत्युक्तिर्युक्तेति वा ॥ १७ ॥

व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ।
भज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

इति श्रीमद्भागवते दशमस्कन्धे एकोनत्रिंशोऽध्यायः ॥

सत्यधर्मीया — वयं सर्वथा नाथ त्वया दयनीया इति विज्ञापयन्त्य उपसंहरन्ति ॥ व्रजेति । व्रजौकसो वनौकसश्च तेषामङ्ग स्वजन अत्यन्तमुत्पत्तिरहित विश्वव्याप्त ते व्यक्तिरवतारोऽलं वृजिनहन्त्री पापनाशिनी । यत्त्वत्स्पृहात्मनां तुभ्यं स्पृहा यस्य स आत्मा मनो येषामस्मदादीनां हृद्रुजां मनआमयानां निषूदनं परिहारकं तन्मङ्गलं रूपं मनागीषद्भज सेवस्व दर्शयेति यावत् । विश्वमङ्गलं सर्वश्रेयो नो विषये भज । अथवा मनागीषद्भज दर्शनं वो देहीति वा ॥ १८ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे एकोनत्रिंशोऽध्यायः ॥ १०-२९ ॥

॥ अथ त्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १ ॥

सत्यधर्मीया — यथा नक्तं व्यक्तो भक्त्या तुष्टः सन्गोपीगोपनं ततान तथाऽन्यानप्यवतीश्वर इति प्रतिपादयत्यस्मिन्नध्याये । तत्रादौ रौति नृत्यतीत्याद्युक्तभक्त्युद्रिक्ततां तासु दर्शयन्रोदनादिकं कथयति ॥ इतीति । कृष्णदर्शनतृष्णा गोप्य इति सुस्वरं यथा तथा गायन्त्यः स्वरतेस्तु स्वरो विष्णुरिति छान्दोग्यभाष्योक्तेस्तं विष्णुमुद्दिश्यैव सुगायन्त्य इत्यन्वयः । चित्रधा प्रकारप्रकारेण । सुस्वरं श्रोतृकरुणाकरं वा प्रलयन्त्यश्च सुस्वरं सु अत्यन्तं स्वरा वायवः श्वासा इति यावत् । अस्मिन्कर्मणि यथा तथा । स्वे विष्णौ रमते यस्मात्स्वरो वायुरुदीरित इति तद्भाष्योक्तेः । रुरुदू रोदनं चक्रुः ॥१॥

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥

सत्यधर्मीया — तत्फलमालपति ॥ तासामिति । स्मयमानमुखाम्बुजः स्रग्वी । अस्मायेति विनिः । साक्षादिति सर्वप्रत्यक्षसिद्धतां मन्मथमन्मथत्वस्य दर्शयति । मन्मथं मथ्नातीति मन्मथमत्प्रमथनाथस्तस्य नारायणीरूपेण मथः स तथा । यरोऽनुनासिक इत्यनुनासिकः । एत-न्मुरारिः । अनेन तादृङ्नगदृग्भवनसमर्थस्य (तादृगङ्गनाभवनसमर्थस्येति स्यादिति भाति । स्वतः रुद्रादिमोहकस्त्रीरूपधारणसमर्थस्य इत्यर्थः स्याद्वा) नैतदाभीरनारीवाञ्छया प्रादुर्भाव इति दुर्भावः कार्यः किन्तु तद्दयात एवोदय इति सूच्यते । साक्षान्मुख्यतो मन्मथो मन्मथो येन स इति वा कामकामत्वप्रदः । एतेन न तद्बाधा माधवस्येति द्योत्यते । मथ विलोडने मथतीति मथो मनसो मथो मन्मथः । पचाद्यच् । स्वजनकस्यापि स्ववैर्यागारत्वाद्विलोडनं युक्तमिति ज्ञेयम् । मनो रुद्र उदाहृत इत्यादेः । मित्रचन्द्रानुबन्धस्तु दूरोत्सारित इति सन्तोष्टव्यम् । चन्द्रमा मनसो जात इत्यादेः । मननं मच्चेतनम् । सम्पदादिक्विप् । गमादीनां क्वाविति नलोपः । ह्रस्वस्य पिति कृतीति तुक् । मन्मथो मनोमथक इतरत्पूर्ववदिति वा ॥ २ ॥

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ।
उत्तस्थुर्युगपत् सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥

सत्यधर्मीया — प्रेष्ठं तमालोक्य प्रीत्युत्फुल्ला दृशो यासां ता अबलास्तन्वः शरीराणि । आगतं प्राणा यथोत्तिष्ठन्ति तथेति सर्वा युगपदेकदेवोत्तस्थुः ॥ ३ ॥

काचित् कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ।
काचिद् दधार तद्बाहुमंसे चन्दनरूषितम् ॥ ४ ॥

सत्यधर्मीया — अंसे चन्दनरूषितं बाहुं काचिद्दधार ॥ ४ ॥

काचिदञ्जलिनाऽगृह्णात् तन्वी ताम्बूलचर्वितम् ।
एका तदङ्घ्रियुगलं सन्तप्तस्तनयोरधात् ॥ ५ ॥

सत्यधर्मीया — ताम्बूलचर्वितं काचित्तन्वी कोमलाङ्ग्यञ्जलिना सम्पुटितपाणिद्वयेनैका काचित्तदङ्घ्रियुगलमेकैककरेणोन्नमय्य स्वयं च प्रवणा सन्तप्तस्तनयोरधाद्दधार । अधुनाऽनुपवेशादुद्धृत्येति पूरणीयम् । यद्वक्ष्यति स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे तत्रोपविष्ट इति ॥ ५ ॥

एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ।
प्रत्यवैक्षत् कटाक्षेण निर्दष्टदशनच्छदा ॥ ६ ॥

सत्यधर्मीया — एका तु प्रेमसंरम्भविह्वला भ्रुकुटिं भ्रुकुटीमाबद्ध्य ग्रन्थीकृत्य निर्दष्टो दशनच्छदोऽधरोष्ठो यया सा कटाक्षेण प्रत्यवैक्षत्प्रैक्षत् ॥ ६ ॥

अपराऽनिमिषं दृग्भ्यां जुषाणा तन्मुखाम्बुजम् ।
आपीतमपि नातृप्यत् सन्तस्तच्चरणं यथा ॥ ७ ॥

सत्यधर्मीया — अपराऽनिमिषं यथा तथा दृग्भ्यां भ्रमराभ्यां तन्मुखाम्बुजमापीतमपि जुषमाणाः सन्तस्तच्चरणं दृग्भ्यां जुषाणाः पश्यन्तो यथा न तृप्ता भवन्ति तथा तेन पानेन नातृप्यन्न तृप्ताऽभूत् ॥ ७ ॥

तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च ।
पुलकाङ्ग्युपगुह्यास्ते योगीवानन्दनिर्भरा ॥ ८ ॥

सत्यधर्मीया — काचिन्नेत्ररन्ध्रेण हृदि कृत्य साक्षात्प्रभृतीनि चेत्यस्याकृतिगणतया हृदीत्यस्य कृञा योगे सत्यां गतिसंज्ञायां कुगतीति समासे क्त्वो ल्यपि हृदिकृत्येति भवति । चक्षुर्निमील्योपगुह्यालिङ्ग्य च योगीवानन्दनिर्भरा पुलकाङ्गी रोमाञ्चितशरीराऽऽस्ते ॥ ८ ॥

सुमनोरञ्जनी — तं कृष्णं हृदि कृत्वा प्रविष्टं ध्यात्वा । नेत्रे निमील्य तमुपगुह्य मनसा आलिङ्गच । आनन्दनिर्भरा सती । पुलकाङ्गी रोमाञ्चितगात्रा । आस्ते स्मेति ॥ ८ ॥

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ।
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनः ॥ ९ ॥

सत्यधर्मीया — केशवालोकपरमोत्सवनिर्वृतास्ताः सर्वाः प्राज्ञं पण्डितं प्राप्य यथा जनः पामरस्तापं सांसारिकं जहाति तथा विरहजं तापं जहुः । जनो जाग्रत् तापं दिवा जातं प्राज्ञं भगवन्तं प्राप्यालिङ्गच जहाति तथेति वा । प्राज्ञेनात्मना सम्परिष्वक्त इत्यादेः ॥ ९ ॥

सुमनोरञ्जनी — केशवस्यालोकः अवलोकनं, तल्लक्षणोत्सवेन तदुद्भूतोत्सवेन वा निर्वृताः सन्तुष्टाः । विरहजं कृष्णवियोगजनितं तापं जहुः तत्यजुः । जनः अज्ञजनः । प्राज्ञं ज्ञानिनम् । प्राप्य यथा तापं सांसारिकं जहाति तथेति । प्राज्ञं परमात्मानं सुषुप्तौ प्राप्य यथा जनः तापं जागृदाद्यवस्थासंभवमिति वा ॥ ९ ॥

ताभिर्विधूतशोकाभिर्भगवानच्युतो नृप ।
व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ १० ॥

सत्यधर्मीया — विधूतः शोको याभिस्ताभिः सहितो यथा शक्तिभिः स्वभार्याभिः श्रीभूदुर्गादिभिः पुरुषो हरी रोचते । शक्यत्वाच्छक्तयो भार्या इति गतम् । तथा भगवानच्युतः कृष्णो व्यरोचत । स्वदृष्टान्तो हरेर्भवेदित्यृग्भाष्योक्तेः पुरुषो यथेति युक्तम् ॥ १० ॥

सुमनोरञ्जनी — भगवानच्युतः विधूतशोकाभिः गोपीभिः अधिकं व्यरोचत । यथा पुरुषः पूर्णषड्गुणो विष्णुः शक्तिभिः लक्ष्मीविभूतिभिः तथेति ॥ १० ॥

ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः ।
विकसत्कुन्दमन्दारसुरतानिलषट्पदम् ॥ ११ ॥

सत्यधर्मीया — ताः समादाय । अनेन सन्तोषभरेण तासां गमनसामर्थ्यं स्वतो नेति ध्वन्यते । पुलिनं निर्विश्य । तत्स्वरूपं निरूपयति ॥ विलसदिति । विलसन्तः कुन्दमन्दारा यस्मिन्स तद्वा । सुरतस्य तत्सम्बन्धी तदुपयोगी मन्दोऽनिलोऽज्ञं कुर्वन्तश्च षट्पदा यस्मिन्स तद्वा स चासौ स च तच्च तत्तच्चेति वा । नलिनपुलिनेति लिङ्गानुशासने द्विलिङ्गताभिधानात् । विलसत्कुन्दमन्दारेषु सुरतानिल-

षट्पदा यस्मिन्निति पक्षेऽनिलस्य निर्भरं तदुपर्यागतिरेव सुरततेति मन्तव्यम् । विकसत्कुन्द-मन्दारुलताभिः सहिता अनिलषट्पदा यस्मिन्निति वा । सुरभ्यनिलेति पाठस्तु सुलभार्थः ॥ ११ ॥

सुमनोरञ्जनी — विकसत्कुन्दमन्दारेषु सुष्ठु रताः सम्बद्धाः अनिलाः वायवः, षट्पदाः भ्रमराः यस्मिन् तत् । यद्वा विकसत्कुन्दमन्दाराः, सुष्टु रतं रतिः सुखं यस्मात्तादृशः सुखावह इत्यर्थः अनिलो वायुः षट्पदाश्च यस्मिंस्तदिति ॥ ११ ॥

शरच्चन्द्रांशुसन्दोहध्वस्तदोषातमः शिवम् ।
कृष्णाया हस्ततरलाचितकोमलवालुकम् ॥ १२ ॥

सत्यधर्मीया — शरदश्चन्द्रः शरत्कालिकश्चन्द्रस्तस्यांशवः किरणास्तेषां सन्दोहः समूहस्तेन ध्वस्तं दोषा रात्रिस्तत्तमोऽन्धकारो यस्मिन्स चासौ शिवश्चेति पुल्लिङ्गतापक्षे । द्वितीयपक्षेऽनेकताया-मेकतायां पदस्य नायव्ययौ । ननु गत्वा वनाद्वनं चन्द्रज्योत्स्ना यावद्विभाव्यते । तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रिय इति प्रागुक्तेर्न हि चन्द्रास्तमयानन्तरं पुनस्तद्दिने शरच्चन्द्रांश्वित्याद्युक्तिः कथमिति चेत् । अबलाश्रान्त्यसहिष्णुः कृष्णस्तमःसृष्टिं सति शीतांशौ ततानानन्तरं चेदं वचनमिति सम्भवात् । प्रविष्टपदस्वारस्यात् । पुनश्चन्द्रसृष्टेरिति वा । कृष्णाया यमुनाया हस्तास्तद्रूपास्तरलास्तरङ्गास्तैराचिताः इतस्ततः प्रसारिताः कोमलवालुकाः सिकता यस्मिंस्तन्निर्विश्य व्यरोचतेत्यतीतेनान्वयः । विशेषकम् । कृष्णेहायस्ततरलाञ्चितेति पाठे कृष्णस्येहा चेष्टा तयाऽऽयस्ता आयासं प्राप्तास्तरला लघुतरङ्गास्तैः पूर्ववदुर्वरितम् । कृष्णे या ईहा प्रवाहस्तयेति वा । अणुस्तरङ्गो लोलः स्यात्तरलः कुरुलस्तथेति गोपालः ॥ १२ ॥

सुमनोरञ्जनी — शरच्चन्द्रस्यांशुसन्दोहेन किरणसमूहेन ध्वस्तं दोषातमो रात्र्यंधकारो यस्मिंस्तत् । ननु पूर्वं वनाद्वनं गत्वा चन्द्रज्योत्स्ना यावद्विभाव्यते तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः इति चन्द्रास्तमयमुक्त्वा पुनस्तस्यामेव रात्रौ शरच्चन्द्रस्य कथं पुनः? । न च दिनान्तरविषयमेतत् । तथाऽप्रतीतेः । किञ्च तमःप्रविष्टमालक्ष्येति रात्रौ चन्द्रास्तमयोक्त्या शुक्लपक्षत्वं शरच्चन्द्रेत्यनेन शुक्लपक्षे असंभावितचन्द्रांशुध्वस्ततमस्त्वोक्त्या कृष्णपक्षता लक्ष्यते । अतः कथमेतत्सर्वं समंजसमिति चेत् । शुक्लपक्षे चन्द्रास्तमयानन्तरमपि पुनः कृष्णे क्रीडाप्रसक्तौ तत्सेवार्थं पुनश्चन्द्रस्यागमनेन वा । शरच्चन्द्र इव अंशुसन्दोहो यस्य कृष्णस्य सः शरच्चन्द्रांशुसंदोह इत्यर्थमङ्गीकृत्य श्रीकृष्णकान्त्यैव तमो-निवारणाङ्गीकारेण वा उपपत्तेः । वस्तुतस्तु पूर्वश्लोकस्य विद्यमानापि चन्द्रज्योत्स्ना श्रीकृष्णमायया गोपीनां नादृश्यतेति तात्पर्यम् । गोप्यस्तु तमः प्रविष्टमित्यालक्ष्य ज्ञात्वा निववृतुरिति इतिशब्दा-

ध्याहारेण योजना ज्ञेया । इत्थं च न काप्यनुपपत्तिः । कृष्णायाः यमुनायाः ईहया चेष्टया । आयस्ता मन्दीभूताः तरलाः तरङ्गाः तैः अंचितं सिक्तं कोमलवालुकं यस्मिन् तत् । कृष्णस्य ईहा चेष्टा क्रीडालक्षणा तदर्थमिति वा ॥ १२ ॥

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः ।
स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥

सत्यधर्मीया — तद्दर्शनाह्लादेन विधूता हृद्रुजस्तद्दर्शनाभिमर्शनजा आमया यासां ताः । अन्यत्र तद्दर्शनेन तद्विषयीकरणहेतुना व्यक्त आह्लादस्तदभिमानिद्वारा तासां तेन विधूता हृद्रुजो, स्वरहस्यार्थाननु वर्णनकरणका रोगा यासां ता मनोरथान्तं प्रार्थितसुरताद्यर्थपूर्तिम् । अन्यत्र मनोरथो मनोगति-स्तस्यान्तमित उत्तरं गम्यं नास्तीति निर्णयं श्रुतयो वेदा यथा यान्ति तथा ययुः । पक्ष द्वयेऽप्यतृप्तिरेव भूषणमिति । अमनोरथान्तमिति विभजनेनार्थस्तु । यतो वाचो निवर्तन्ते । नातृप्यन्नित्यादे रसविशेषद इति रसिकौर्महः(?) । कुचकुङ्कुमाङ्कितैः स्वैरुत्तरीयैः प्रावरणवस्त्रैरात्मबन्धवे आत्मनः स्वकीयस्य पितुर्बन्धुर्जामाता तस्मै स्वप्राणनाथाय वाऽऽसनमचीक्लृपन्कल्पयामासुः । तदुपरि तमुपवेशयामासुः ॥ १३ ॥

सुमनोरञ्जनी — तस्य श्रीकृष्णस्य दर्शने य आह्लादः तेन विधूताः हृद्रुजो मनोव्यथाः यासां ताः । मनोरथस्य मानस्यमनोभिलाषस्य वा । अन्तं पारम् । ययुः । प्राप्ताभीष्टाः सत्यः तुष्टा बभूवुरिति भावः । तन्निदर्शयति ॥ श्रुतयो यथेति । मोक्षार्थं प्रवृत्ताः श्रुतयः तत्साधनभगवदपरोक्षार्थं श्रवणादीन् विदधत्यः स्वनियोज्यस्य यावन्न भगवतो दर्शनं तावदकृतार्था इव विद्यमानास्तिष्ठन्ति । यदा तु भगवान् प्रसन्नः सन् भक्ताय स्वस्वरूपमाविष्करोति तदा श्रुतयस्तस्य भगवतो दर्शनेन य आह्लादः तेन विधूतहृद्रुजः स्वमनोरथान्तं यथा गच्छन्ति तथेति भावः । कुचकुङ्कुमेन अङ्कितैः लिप्तैः स्वैः स्वकीयैः उत्तरीयैः प्रावरणवस्त्रैः । आत्मनो बन्धवे प्रियाय । आत्मनो वायोर्बन्धवे इति वा । आसनं अचीक्लृपन् चक्रुः ॥ १३ ॥

तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ।
चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधत् ॥ १४ ॥

सत्यधर्मीया — तत्र तत्कल्पितासने उपविष्टः स भगवानीश्वरो योगेश्वराणां महायोगिनामन्त-र्हृदि । विभक्त्यर्थेऽव्ययीभावः । तृतीयासप्तम्योर्बहुलमिति नाम्भावः । हृदय इत्यर्थः । हृदयान्तः कल्पितं तैरासनं यस्य स सोऽपि तत्रोपविष्ट इति कारुण्यं तासु ध्वन्यते । इदं नटनमिति वा ।

गोपीपरिषद्गतस्ताभिरर्चितश्च । त्रैलोक्यलक्ष्म्यैकपदम् । त्रिलोक्या इमास्त्रैलोक्यास्ता **लक्ष्म्यः शोभा**-स्तासामेकपदं मुख्याधिकरणं वपुःशरीरं दधच्चकास चकासे शुशुभे ॥ १४ ॥

सुमनोरञ्जनी — योगेन ईश्वराः योगप्रभावलब्धैश्वर्यवन्तो ये योगिनः तेषां हृद्यन्तः कल्पितासनः स ईश्वरः । तत्र गोपीजनपरिकल्पितवस्त्रासने उपविष्टः । गोपीनां परिषदि समूहे गतः मध्यगतः । त्रैलोक्यलक्ष्म्याः त्रैलोक्यसम्बन्धिन्याः शोभायाः एकपदं मुख्याश्रयं वपुः दधत् । चकास शुशुभे ॥१४॥

सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमद्भ्रुवः ।
संस्पर्शनोत्काङ्ककृताङ्गहृच्छयं संस्तभ्य ईषत्कुपिता बभाषिरे ॥ १५ ॥

सत्यधर्मीया — सहासलीलेक्षणविभ्रमद्भ्रुवो हासश्च लीला च ताभ्यां सहितं सहासलीलमीक्षणं तेन विभ्रमन्त्यो भ्रुवो यासां ता विभ्रमन्त्यौ भ्रुवाविति वा गोप्यः । अनङ्गं दीपयतीति स तं सभाजयित्वा सम्पूज्य संस्पर्शनेनोत्पन्नोत्कोत्कण्ठा सैवाङ्को लाञ्छनं तेन कृतोऽङ्गो गतिर्यस्य स चासौ हृच्छयः कामश्च तमन्तरङ्कूरितं संस्तभ्य सन्निरुध्य । विवक्षाविरामात्सन्ध्यभावः । ईषदित्युभयान्वयि । कुपिता बभाषिरे ऊचुः । हृच्छयं प्रति संस्तभ्य स्तम्भनीय इतीषत्कुपिता बभाषिर इति वा । पोरदुपधादिति यत् ॥ १५ ॥

सुमनोरञ्जनी — अनङ्गं कामं दीपयतीत्यनङ्गदीपनम् । सहासेन मन्दहाससहितेन लीलेक्षणेन लीलया यदीक्षणं तेन लीलाकारीक्षणेनेति वा विभ्रमन्त्योऽनुदिशं चलन्त्यो भ्रुवो यासां ताः । संस्पर्शने श्रीकृष्णांगसंस्पर्शने उत्का उत्कण्ठा सैव अंकं यस्य सः संस्पर्शनोत्कांकः । स चासौ, कृतः अङ्गे शरीरे उत्पन्नः हृच्छयः कामः तम् । संस्तभ्य निरुध्य । श्रीकृष्णांगसंस्पर्शनोत्कंठाजनकं कामं निरुध्येत्यर्थः । यद्वा संस्पर्शनेनोत्पन्ना या उत्केति वा । तदा श्रीकृष्णाङ्गसंस्पर्शनाभिव्यक्तं कामं निरुध्येति भावः । यद्वा कृष्णस्यैवेदं विशेषणम् । स्वसंस्पर्शनार्थं या उत्का उत्कण्ठा तस्याः अङ्कानि चिह्नानि उत्पुलकत्वादीनि यस्य तादृशश्चासौ कृताङ्ग उत्पादितो हृच्छयो येन तं श्रीकृष्णं संस्तभ्य क्षणमस्मद्वचः श्रुणुहीति वचनेन स्तम्भयित्वेति । अथवा ईषत्कुपितेत्युक्ते कोपाविष्करणाय सहासलीलेक्षणविभ्रमद्भ्रुवः संस्तभ्य भ्रुकुटीमाबध्येति यावत् । कृष्णं बभाषिर इति योज्यम् । १५ ॥

गोप्य ऊचुः—

भजतोऽनु भजन्त्येक एक एतद्विपर्ययम् ।
नोभयांश्च भजन्त्यन्य एतन्नो ब्रूहि साधु भोः ॥ १६ ॥

सत्यधर्मीया — इयन्तमायासमनुभूयायताक्ष्यः स्वयं विकल्प्य श्रीमन् त्वं तत्त्वं जल्प किं कल्पमध्य इति निष्प्रकाशितस्वाशयाः परोक्षतः पृच्छन्ति ॥ भजत इति । एके केचन भजतः सेवमानान्भजन्ति तदनुसवनसेवानुसारिफलोपलम्भकतया सेवन्ते । एके चैतद्विपर्ययं स्वानभजतोऽपि स्वयं फलं वितरन्तः सेवन्ते । भजतोऽभजत इत्युभयानपि केचन न भजन्ति उदासत इति यावत् । एतत्कल्पत्रये किं साधु सम्यग्भो आत्मन्ब्रूहि । अनेन विवेकः कृतश्चेत्कृतघ्नता तवाविर्भवतीति भामिन्यो ध्वनयन्ति स्मेति तात्पर्यम् । एक एतद्विपर्ययं इत्यस्माद्व्याख्यासङ्घर्चं भजन्त्यभजतो ये वै करुणा इत्युत्तरत्रोत्तरे भजत इति युक्ता ॥ १६ ॥

सुमनोरञ्जनी — गोप्यः श्रीहरेरकृतज्ञत्वमारोप्य तन्मुखेन संवादयितुं पृच्छन्ति ॥ भजत इति । एके जनाः भजतः सेवमानान् अनु तदिच्छानुसारेण फलदानेन । भजन्ते । एके केचित् । एतद्विपर्ययो व्यत्यासः यथा स्यात्तथा भजन्ते । अभजतोऽपि जनान् तद्योग्यफलदानेनोपकुर्वन्तीति भावः । अन्ये जनाः नोभयान् भजन्ति सेवमानानसेवमानानपि न फलदानेन प्रत्युपकुर्वन्तीत्यर्थः । एतस्मिन् एतत्पक्षत्रये यत्साधु निर्दुष्टं तत् ब्रूहि । लोके जनास्त्रिविधाः । केचिदुपकारमुपेक्ष्य प्रत्युपकुर्वते । अन्ये तूपकारमनपेक्ष्यैवोपकर्तारः सुहृत्पदाभिधेयाः । अपरे तु उपकारिणामनुपकारिणां च न समर्पयन्ति । एते तु द्विधा सम्भाव्या अकृतघ्ना उदासीनाश्चेति । तत्र भवान् अकृतघ्नेषु वा उदासीनेषु वा प्रविशति । यतोऽनन्यभक्त्या भजमानानां विजने त्यजनं कृतवानिति यतोऽत इति भावः ॥ १६ ॥

श्रीभगवानुवाच—

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ।
न तत्र सौहृदं धर्मः स्वार्थं तद् वित्त नान्यथा ॥ १७ ॥

सत्यधर्मीया — एवं सारसाक्षीभिरधिक्षिप्तः स्वयमुत्तरं वक्तुमारभते ॥ मिथ इति । परस्परं भजतोऽनुभजन्ति ये हे सख्यस्ते स्वार्थैकान्तोद्यमाः स्वार्थ एवोपकृतोपकारप्राप्त्यर्थ एकान्तो नियत उद्यमो यत्नो येषां ते तथा । हि यतस्ततस्तत्र तेषु सौहृदमनिमित्तस्नेहरूपो धर्मो न नास्ति स्वार्थं तदित्यन्यथा नेति च वित्त । यद्वा स्वार्थैकान्तोद्यमा हे सख्य इति सामानाधिकरण्यम् । ते यूयमित्यन्वयः । त इति निर्देशेनाग्निपुत्रत्वं तासां द्योत्यते । हिते हितादिविषये वा । तत्र सौहृदं धर्मो न किन्तु स्वार्थमेव परस्परं भजन्तीति तद्वित्त । अन्यथा नेति वित्तेत्यन्वयः । अतो न स्वार्थैकान्तोद्यमाः स्वार्थं वित्तेत्यनयोः पौनरुक्त्यमिति मन्तव्यम् ॥ १७ ॥

सुमनोरञ्जनी — सत्यमेवं चतुर्विधा जना इति । तथापि नाहं गणनीय इति भावेन परिहरति ॥

मिथ इति । हे सख्यः ! ये जनाः मिथः परस्परं भजन्ति उपकारप्रत्युपकारलक्षणां सेवां कुर्वन्ति ते स्वार्थैकान्तोद्यमाः स्वप्रयोजनमात्रनियतोद्योगाः । तत्र तेषु सौहृदं अनिमित्तस्नेहो नास्ति । मास्तु स्नेहः अपि तु परोपकरणं पुण्यसाधनं भवत्वित्यत उक्तम् ॥ धर्मोऽपि न भवतीति । किन्तु तेषां तत् उपकारप्रत्युपकारलक्षणं कर्म स्वार्थं स्वप्रयोजनार्थमिति वित्त जानीत । वेतनसेवावत् । अत्र मिथ इत्युक्त्या इदं ध्वन्यते । यदि फलाकांक्षयाऽस्मान्भजत तर्हि यूयमपि स्वार्थमात्रोद्यमा इति गतं युष्मास्वपि सौहृदमिति ॥ १७ ॥

भजन्त्यभजतो ये वै करुणाः पितरो यथा ।
धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥

सत्यधर्मीया — अभजतः स्वानसेवमानान्ये भजन्ति ते यथा पितरः पुत्रसेवामनपेक्ष्य तत्त्राण-कर्तारस्तथा करुणाः करुणयन्तीति ते तथा । अत्रैतादृशेषु जनेषु हे सुमध्यमाः शोभनमध्यप्रदेशयुता वामाक्ष्यो धर्मश्च निरपवादो निर्दोषः सौहृदं च निरपवादमिति विपरिणतमन्वेति । उत्तमाधिकारि-लक्षणमिदम् ॥ १८ ॥

सुमनोरञ्जनी — हे सुमध्यमाः । ये करुणाः करुणयन्ति प्राणिनो दृष्ट्वा द्रवीभूतहृदयाः भवन्तीति तथोक्ताः जनाः, अभजतोऽपि भजन्ति फलदानेनोपकुर्वन्ति । तत्र दृष्टान्तः पितरो यथेति । अभजतोऽपि बालान् पितरो यथोपकुर्वन्ति तथेत्यर्थः । अत्र एषु जनेषु । निरपवादः अप्रतिषिद्धः निरुपाधिको वा धर्मः सौहृदं चास्तीति वित्तेति पूर्वेणान्वयः ॥ १८ ॥

भजतोऽपि न वै केचिद् भजन्त्यभजतः कुतः ।
आत्मारामा ह्याप्तकामा ह्यकृतज्ञा गुरुद्रुहः ॥ १९ ॥

सत्यधर्मीया — तृतीयकल्पे द्वयमधिकारिण इत्याह ॥ भजत इति । भजतो जनानपि न भजन्ति । अभजतो न भजन्तीति कुतो वाच्यम् । ते चात्मारामा आत्मनि भगवत्यारमन्त इत्य-सम्प्रज्ञातसमाधिस्था आप्तकामा इत्यभजने पूर्णकामनाहेतुमाह । द्वितीयकोटिमाह । केचिद्भजतोऽपि न भजन्ति वै । अभजतो नेति कुतो वक्तव्यम् । ते च किंरूपा इत्यतो निरूपयति । कृतं परकृतमुपकारं न जानन्तीति ते तथा । गुरुद्रुहो गुरुभ्यो महात्मभ्यो द्रुह्यन्तीति ते तथा हि प्रायेणैवमेव जन इति प्रसिद्धौ । यतो न भजन्ति तत आत्मारामा आप्तकामाः पुनर्यतो भजतोऽपि न भजन्त्यतोऽकृतज्ञा गुरुद्रुह इति वा । विपर्ययेण यत आत्मारामाद्या यतश्चाकृतज्ञाद्यास्ततश्च भजतोऽपि न भजन्तीति वा ॥ १९ ॥

सुमनोरञ्जनी — नोभयांश्च भजन्त्यन्य इत्यनेनोक्ता अपि द्विविधा इत्याह ॥ भजतोऽपीति । केचित् भजतोऽपि प्रत्युपकारेच्छया भजमानानपि जनान्न भजन्ति, अभजतस्तु भजन्तीति कुतः । ते के इत्यतः आप्तकामा मुक्ता इति भावेनाह ॥ आत्मारामा इति । आत्मन्येव रमन्त इत्यात्मारामाः बाह्यविषयेष्वनासक्ता इत्यर्थः । तदपि कुतः । यत आप्तकामाः अवाप्तपरमानन्दाः । न केवलं ज्ञानिनस्तथाभूताः किन्तु अकृतज्ञाश्च तथाविधा इत्याह ॥ अकृतज्ञा इति ॥ १९ ॥

नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तयो यथा ।
तथैव मत्तः फलसम्पदः स्युरुच्चावचाः कल्पतरोरिवार्थिनाम् ॥ २० ॥

सत्यधर्मीया — नाहमेतेष्वेकतमः किन्त्वियं लौकिकी रीतिरिति ताः प्रति स्वस्थितिं कथयति ॥ नाहमिति । हे सख्योऽहं भजतोऽपि जनान्न भजामि मदो भवेदिति तत्काले न भजामीति वचनम् । क्रमादभजनं तज्जनानुजिघृक्षयैव । फलं तु निश्चितमिति वदति ॥ अमीषामिति । अमीषां यथाऽनुवृत्तयः सेवाः स्युस्तथा मत्त एव फलसम्पद उच्चावचाः स्युरेव । तत्र व्यतिरेकं निदर्शनमाह ॥ नार्थिनां कल्पतरोरिवेति । स च योग्यतायोग्यताविचाररहितः स्वार्थिजनमनःसङ्कल्पितमेव यच्छति न त्वसङ्कल्पितमहं तु न तथेति । उच्चावचास्तत्तद्योग्यतानुसारेणानेकप्रकाराः ।

तथा च नीतिकारः । ''सौन्दर्यं भुवनत्रयेऽपि विदितं सम्भूतिरम्भोनिधेर्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः । इत्थं दातृगुरोर्गुणास्सुरतरोः सर्वेऽपि लोकोत्तराः स्यादर्थिप्रकरार्थतर्पणविधावेको विवेको यदि'' इति । न भजामि ततः प्रत्युपकृतिं न वाञ्छामि तत्रान्वयनिदर्शनं वा । कल्पतरुर्नार्थिभ्यः स्वयं किञ्चिदपेक्षत इति ॥ २० ॥

सुमनोरञ्जनी — अहं तु भजतः फलार्थितया सेवमानान् । अपिशब्दादभजतोऽपि जन्तून् न भजामि स्वप्रयोजनोद्देशेन न तदिच्छानुसारिफलं दास्यामि । अपि तु अमीषामनुवृत्तयः सेवाः यथा तथैव मत्तः उच्चावचाः फलसंपदः स्युः । सेवानुरूपं तदधिकारियोग्यमेव फलं दास्यामीति भावः । तत्र दृष्टान्तः ॥ अर्थिनां कल्पतरोरिवेति । यादृशी भावना यस्य सिद्धिर्भवतीति भावः ॥ २० ॥

यथाऽधनो लब्धधने विनष्टे तच्चिन्तयाऽन्यं निभृतं न वेद ।
एवं मदर्थार्पितलोकवेदस्वानां हि वा मय्यनुवृत्तयोऽबलाः ॥ २१ ॥

मया परोक्षं भजता तिरोहितं सासूयितुं नार्हथ मां प्रियं प्रियाः ॥ २२ ॥

सत्यधर्मीया — स्वतिरोधानमेतदर्थमिति ताः प्रति प्रोच्य स्वोपास्तिरेवं कर्तव्येत्यर्थात्सूचयन्स्ता-

वयितुं लौकिकीं काञ्चिद्धाटीमाटीकमानः सत्सम्माननं कुर्वन्नेवेश्वर ईरयति ।। यथेति । अधनः प्राग्दरिद्रो दैवाल्लब्धधने प्राप्तद्रव्ये पुनर्विनष्टे चोरादिद्वारा तच्चिन्तया जनोऽन्यन्निभृतं धनभिन्नं क्षीरादिपूर्णकलशादिकं न वेद तदितरत्रादरादिति भावः । तथा हि तत्त्वनिर्णयटीकायाम् । यो हि यत्रादरवांस्तस्यैव तद्वस्तु विद्यमानमपि स्फुरति न त्वत्रानादरवतोऽन्यत्रादरवतश्चेत्यनुभवसिद्धमिति । निभृतं स्वगृहीतमेवं तथा मदर्थार्पितलोकवेदस्वानां मद्रूपेऽर्थे विषयेऽर्पिताः समर्पिता लोको लौकिको वेदो वैदिकः स्वं द्रव्यं ज्ञातयो वा याभिस्तासां वो युष्माकमनुवृत्तय उपासनाद्या मयि मय्येवाबला अन्यत्रापरिवर्तमाना नष्टधनस्य धनचिन्तया तस्य यथा नान्यज्ज्ञानं तथा भवदनुवृत्तयोऽपि मत्तोऽबलाः । सत्येवं तिरोधानं माधव कुत इत्यतोऽभिधत्ते ।। मयेति । मया किञ्चिद्व्यवधानेन परोक्षमेवं भजता तिरोहितम् । परोक्षमपि मां भजतेति । अतिरोहितमीषत्तिरोहितमिति वा । सासूयितुमसूयासहितं कर्तुम् । सुप्सुपेति वा मयूरव्यंसकादित्वाद्वा समासः । हे प्रियाः प्रियं मां नार्हथ । भार्यामीर्ष्यति मैनामन्योऽद्राक्षीदित्यादिवद्यं प्रतीत्यविवक्षणाद्द्वितीया । सासूयितुं माऽर्हथ तत्प्रियं प्रिया इति पाठस्तु स्फुटार्थः । समसूयितुं सासूयितुं वेति केचित् । सर्वा अपि मिलित्वेति तदर्थः ।।२१,२२।।

सुमनोरञ्जनी — एवं चेद्भवान् किमस्माभिर्भवत्सेवैव न कृता । यतस्त्वयाऽन्तरधायीत्यतो नेति भावेन तदीयसेवां स्तुवन्नन्तर्धाने निमित्तमाह ।। यथेति । लब्धधने विनष्टे तच्चिन्तया अन्यत्

निभृतमत्यन्तं न वेद न जानाति । युष्मदनुवृत्तयः मद्विषयाः सेवा अपि । एवं अनन्यविषया इत्यर्थः। कुत इत्यत उक्तम् ।। मदर्थेति । मदर्थे मद्रूपेऽर्थे । अर्पितं समर्पितं लोकवेदस्वं लौकिकवैदिकसर्वस्वं यासां तासाम् ।। एवं चेदन्तर्धाने किं निमित्तमित्यतस्तदाह ।। मयेति । परोक्षं अव्यक्तत्वम् । भजता भजनशीलेन । ताच्छीलिकोऽयं प्रत्ययः । तिरोहितं अन्तर्हितम् । मम परोक्षस्वभावत्वादन्तर्धानमिति भावः । अतः हे प्रियाः ! प्रियं मां सासूयं मन्तुं नार्हथेत्यन्वयः ।। २१,२२ ।।

न पारयेऽहं निरवद्यसंयुजां सुसाधुकृत्यं विबुधायुषाऽपि वः ।
यो मां भजेद् दुर्जरदेहशृङ्खलाः संवृश्च्य वृद्धिं प्रतियाति सोऽधुना ।। २३ ।।

इति श्रीमद्भागवते दशमस्कन्धे त्रिंशोऽध्यायः ।।

सत्यधर्मीया — रतिसमयत्वात्ताः प्रोत्साहयति ।। नेति । निरवद्यसंयुजां निरवद्यं यथा संयुजन्त इति निरवद्यसंयुजस्तासामकुटिलसंयोगवतीनां वो विबुधायुषाऽपि सु साधुकृत्यं न पारये भवत्कृतं प्रतिकृत्वा न पारयितुं शक्तः । यो जनः सत्यो वा मर्त्यो वेति जनो मां भजेत्सो दुर्जरा जरयितुं रीत्यन्तरेणासुसाधादेहरूपशृङ्खला निगडान्संवृश्च्य । वो वृश्चू छेदने । सञ्छिद्याधुना सद्य एव वृद्धिं

स्वरूपानन्दाद्यां प्रतियाति । तस्य तावदेव चिरमिति श्रुतेः । दुर्जरदेहो दिह्यत उपनीयत इति देहः स्नेहस्तद्रूपशृङ्खलाः संवृश्च्य यो भजेत्सोऽधुनैव वृद्धिं मुक्तिं प्रयातीति वा । एष्यन्निश्चयादेवमुक्तिः । आन्तरङ्गिको भावस्तु भगवतो वो विबुधायुषाऽपि दैवात्प्राप्तेन तेनापि यत्कृत्यं कर्म तन्निरवद्यस्य मम संयुजाम् । सम्पदादित्वात्किप् । बहुवचनमाद्यर्थे । सङ्गादीनां सु साधु सम्यक् साध्विति पर्याप्तमिति वक्तुं न पारये न शक्नोमि । अल्पीयसी सत्कृतिः फलमनल्पमिति । मद्भजनस्यायमाजनीनः स्वभाव इत्याह ॥ य इति ॥ २३ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे त्रिंशोऽध्यायः ॥ १०-३० ॥

सुमनोरञ्जनी — निरवद्यसंयुजां निर्दुष्टानां संयुजां सखीनाम् । निर्दुष्टमनोयोगवतां वा । वः युष्माकम् । साधुकृत्यं प्रत्युपकारलक्षणं कर्तुम् । विबुधानां देवानामायुषापि न पारये न शक्नोमीत्यनेन परमानुग्रहः सूचितः । एवमेव यः पुरुषः मां भजेत् स दुर्जरदेहः जरयितुमशक्यदेहः शृङ्खलाः लिङ्गशरीरलक्षणाः । संवृश्च्य छित्वा परमां वृद्धिं मौक्तानन्दवृद्धिं प्रतियाति । न केवलमामुष्मिकीं किन्तु अधुनापि ऐहिकीमपि वृद्धिं प्रतियातीति ॥ २३ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां त्रिंशोऽध्यायः ॥ १०-३० ॥

॥ अथ एकत्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ।
जहुर्विरहजं तापं तत्सङ्गोपचिताशिषः ॥ १ ॥

सत्यधर्मीया — भक्तिरेवानन्दभुक्तिहेतुर्नान्यत्साधनं तत्रेति निरूपयितुं वल्लवीभिर्वल्लभस्य तद्भक्ति प्रसन्नस्य रासक्रीडां वर्णयति । तत्रादौ हरिगिरा तद्विरहतापोपशमः कामिनीनां जात इत्याह ॥ इत्थमिति । सुपेशला अतिरुचिराः । पेशलो रुचिरे दक्ष इति विश्वः । वाचो बह्वर्थगर्भितत्वाद्गोप्यः श्रुत्वा किञ्च तत्सङ्गोपचिताशिषस्तस्य सङ्गः सम्बन्धस्तेनोपचिताः सफला आशिषोऽभिलाषा यासां ताः सत्यो विरहजं तापं जहुः ॥ १ ॥

सुमनोरञ्जनी — भक्त्या प्रसन्नेन भगवता गोपीनामानन्दातिशयजननाय प्रवर्तितां रासक्रीडां वर्णयत्यस्मिन्नध्याये । तत्रादौ श्रीकृष्णेन सह सल्लापं कुर्वन्त्यो गोप्यस्तद्विरहजं तापं जहुरित्याह ॥

इत्थमिति । सुपेशलाः अतिमधुराः । तस्य कृष्णस्य संगेन उपचिताः पल्लविताः समृद्धा इति यावत् आशिषो मनोरथाः यासां व्राः ॥ १ ॥

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ।
स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥

सत्यधर्मीया — अनुव्रतैः स्त्रीरत्नैर्योषिच्छ्रेष्ठैरन्योन्यमाबद्धा बाहवो यैस्तैः । सा च भरतशास्त्रोक्ता ज्ञेया लीला । शुकोऽप्यङ्गनामङ्गनामन्तरा माधवो माधवं माधवं चान्तरेणाङ्गना इत्याद्याह ॥ २ ॥

सुमनोरञ्जनी — तत्र तस्यामवस्थायां रासक्रीडां राससंज्ञां क्रीडाम् । मध्ये एकं शंकुं संस्थाप्य तत्परितो वलयाकारेणान्योन्यं गृहीतहस्तैः क्रियमाणो नृत्यविशेष इति यावत् । तत्प्रकारं प्रदर्शयति सार्धश्लोकेन । अन्योन्याबद्धबाहुभिः । अन्योन्यं आबद्धाः सम्यग् गृहीताः बाहवो यैस्तैः स्त्रीरत्नैः सह आरभत ॥ २ ॥

रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः ।
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ।
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥ ३ ॥

सत्यधर्मीया — गोपीनां मण्डलं वलयाकारेण स्थितसङ्घस्तेन मण्डितोऽलङ्कृतस्तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कण्ठे च गृहीतानां रासोत्सवः प्रवृत्तः । सर्वाः स्त्रियश्च यं स्वनिकटं स्वसमीपवर्तिनं मन्येरंस्तासामिति पूर्वेणान्वयः । एकस्यैवानेकासां मध्यगततादिसम्भावकमाह ॥ योगेश्वरेणेति ॥ ३ ॥

सुमनोरञ्जनी — कृष्णेन रासोत्सवः संप्रवृत्तः संप्रवर्त्तित इति योजना । श्रीकृष्णः किमाज्ञामात्रेण प्रवर्तक इत्यतो नेत्याह । तासां मण्डलाकारेण स्थितानाम् । द्वयोर्द्वयोः मध्ये प्रविष्टेनेति । एकस्य कथं द्वयोर्द्वयोर्मध्येऽवस्थानमित्यत उक्तम् ॥ योगेश्वरेणेति । योगैश्वर्येण बहुरूपतया प्रवेशो युक्त इति भावः । कीदृशेन । स्वनिकटवर्तिन्या स्त्रिया । कण्ठे कण्ठसमीपे अंसदेशे गृहीतेन ॥ ३ ॥

यन्मन्येरन् नभस्तावद् विमानशतसङ्कुलम् ।
दिवौकसां सदाराणामौत्सुक्यनिभृतात्मनाम् ॥ ४ ॥

सत्यधर्मीया — यद्यदा वा तावत्सदाराणां सभार्याणां दिवौकसामौत्सुक्येन निभृतः पूर्ण आत्मा मनो येषां ते तथा तेषाम् । विमानशतेन निर्मानविमानैर्नभो गगनं सङ्कुलं व्याप्तं बभूवेति शेषः । यन्मन्येत नभस्तावदिति पाठे व्यत्ययादिक्लेश इति प्राचीनटीकात एवावसीयते ॥ ४ ॥

सुमनोरञ्जनी — यत् यदा रासोत्सवं मन्येत अमन्यत । व्यत्ययश्छान्दसः । अङ्गीचकारेति यावत् । तावत् तदा नभः, औत्सुक्येन निभृतं पूर्णं आत्म मनो येषां तेषां दिवौकसाम् । विमान-शतसङ्कुलम् । आसेति ॥ ४ ॥

ततो दुन्दुभयो नेदुः खात् पेतुः पुष्पवृष्टयः ।
जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥

सत्यधर्मीया — तद्यशः कृष्णयशोऽमलं निर्दोषम् ॥ ५ ॥

सुमनोरञ्जनी — खात् आकाशात् । तस्य श्रीकृष्णस्य यशः ॥ ५ ॥

वलयानां नूपुराणां किङ्किणीनां च योषिताम् ।
सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥

सत्यधर्मीया — सप्रियाणां पतिसहितानां योषितां वलयानां नूपुराणां चरणभूषणानां किङ्किणीनां कटितटादिगतक्षुद्रघण्टानां रासमण्डले तुमुलः परस्परमेलनजः शब्दोऽभूत् ॥ ६ ॥

सुमनोरञ्जनी — नूपुराणां याः किङ्किण्यः तासां, नूपुराणां किङ्किणीनां चेति वा ॥ ६ ॥

तत्रापि शुशुभे ताभिर्भगवान् देवकीसुतः ।
मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥

सत्यधर्मीया — तत्रापि तत्समयेऽपि ताभिराभीरमानिनीभिः सह देवकीसुतः शुशुभे । तत्र निदर्शनमाह ॥ मध्य इति । हैमानां हेमसम्बन्धिनां तदगाराणामिति यावत् मणीनां मध्ये महामरकतो यथा तथेति । मृगमदतिलकादयः श्यामवर्णा मणयो योषितः स्वर्णसमाः । अयं हरिस्तु मरकतसम इत्यर्थः । हैमानां गतम् ॥ ७ ॥

सुमनोरञ्जनी — तत्रापि तासां मध्येऽपि । हैमानां हेममयानाम् ॥ ७ ॥

पादन्यासैर्भुजविधुतिभिः सुस्मितैर्भ्रूविलासैः
भज्यन्मध्यैश्चलकुचतटैः कुण्डलैर्गण्डलोलैः ।
स्विद्यन्मुख्यः कबररशनाग्रन्थयः कृष्णवध्वो
गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥

सत्यधर्मीया — रासविलाससारस्यं विशदयति । पादानां न्यासा विक्षेपास्तैर्भुजानां विधुतयो विधूननानि करपल्लवयोग्यकम्पनानि तैः । सुस्मितैरिति पाठः सुस्मितताव्हः । सस्मितैरिति पाठे भ्रूविलासविशेषणता ज्ञेया । भ्रूविलासैर्भ्रूभङ्गैर्भज्यन्ति तथाभान्ति मध्यानि कुचभारेण कटितटानि । मध्यं न्यायेऽब्जकोशे च कट्यामिति विश्वः । तैः । चलानि कुचतटानि तैर्गण्डेषु लोलानि तैः कुण्डलैः कर्णभूषणैः । स्विद्यन्ति स्वेदसहितानि भवन्ति मुखानि यासां ताः । स्वाङ्गादिति ङीष् । कबररशनासु कबराणि केशपाशा रशनाः काञ्च्यश्च तास्वग्रन्थयो ग्रन्थ्यभावा यासां ताः श्लथद्ग्रन्थय इत्यर्थः । कृष्णवध्वस्तं गायन्त्यो मेघचक्रे मेघसमूहे । अनेन बहुनीरदसमवाये यादृशी कान्ति-स्तादृश्यैकतमकृष्णाङ्गकान्तिरिति तदपि स्थूलदृश्वबुद्ध्यारोहार्थमुक्तमिति सूच्यते । तडित इव विद्युत इव विरेजुः । ध्वनिप्रकाशनमात्र एतन्निदर्शनम् । अल्पस्यापि प्रसिद्ध्यैव दृष्टान्तत्वं युज्यत इत्यृग्भाष्योक्तेः ॥ ८ ॥

सुमनोरञ्जनी — नृत्यसमये गोपीनां स्वभावं वर्णयति ॥ पादेति । पादन्यासैः । अन्यूनानतिरिक्तदेशतया पादविक्षेपैः । भ्रूविलासैः भ्रूचालनैः । भज्यन्मध्यैः भज्यदिव प्रतीयमानमध्यप्रदेशैः। अनेन कटेः अतिकार्श्यं नर्तनसमये नम्राङ्गता च ध्वनिता । चलन्ति कुचतटानि यासां ताः । गण्ड-लोलैः चञ्चलैः कुण्डलैश्च विशिष्टाः । स्विद्यन्ति स्वेदयुक्तानि मुखानि यासां ताः । कबराः केश-पाशाः रशनाः काञ्चीदामानि तासामग्रन्थयोऽबन्धनानि यासां ताः । श्लथत्कबररशनाकांच्य इति यावत् । एतादृश्यः कृष्णवध्वः । तं कृष्णं गायन्त्यः । मेघचक्रे मेघसमुदाये । तटित इव विरेजुरिति संबन्धः । कृष्णरूपाणां मेघवर्णत्वात् । गोपीनां तटित्कान्तिमत्वादिति भावः ॥ ८ ॥

उच्चैर्जगुः कृतमदा रक्तकण्ठ्यो रतिप्रियाः ।
कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥

सत्यधर्मीया — यद्गीतेन यच्च गीतं च तेनेदं विश्वमावृतं व्याप्तं, कृतमदाः प्रमदा इत्यत एव नाम तासां रक्तकण्ठ्यो मनोहरकण्ठयुता रतिप्रिया इष्टसुरताः । कृष्णस्याभिमर्शः सङ्गस्तेन मुदितास्तुष्टा उच्चैस्तथा जगुरगायन् ॥ ९ ॥

सुमनोरञ्जनी — कृतः मदः श्रोतृसुखं याभिस्ताः । रक्तकण्ठ्यः स्निग्धकण्ठगुणाः । अभिमर्शः स्पर्शविशेषः । यासां गीतेन । इदं जगत् । आवृतं व्याप्तम् ॥ ९ ॥

काचित् समं मुकुन्देन स्वरजातीरमिश्रिताः ।
उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ।
तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ १० ॥

सत्यधर्मीया — काचिद्गोपिका मुकुन्देन समं साकममिश्रिताः (स्वरान्तरैः) परस्परममिलिताः स्वरजातीः षड्जादिजातीरुन्निन्ये तावदूर्ध्वं निनाय । प्रीयता प्रीतिं प्राप्नुवता तेन साधु साध्विति सुसमीचीनं सुसमीचीनमिति पूजिता सत्कृता पुनर्नायकतोषविशेषं तद्दृष्ट्वा । तदित्यव्ययम् । तं स्वरमेव ध्रुवं यावत्तन्मूर्छनं भरतभारतीप्रमितं तावत्पर्यन्तमुन्निन्ये । या तस्यै मानं सत्क्रियां बहु यथा तथाऽदात्कृतवान् । मुकुन्दस्यैतत्समगानं तासामनुग्रहविशेषेणेति मन्तव्यम् । तदुन्नयनमेव ध्रुवं तन्नामकतालसहितं यथा तथैवोन्निन्य इति वा । स्वरजा विरजा तस्यास्तीरेण परेण मिश्रिताः सम्बद्धा एष्यन्नयेनारचय्योन्निन्ये ऊर्ध्वं वैकुण्ठं प्रति निन्य इत्यर्थः ॥ १० ॥

सुमनोरञ्जनी — अमिश्रिताः स्वरान्तरासङ्कीर्णाः स्वरजातीरुन्निन्ये उच्चैः जगौ । तेनोच्चैर्गानेन । प्रीयता तुष्टेन श्रीकृष्णेन । साधु साध्विति वाचा । पूजिता श्लाघिता । तदेव गीतं अन्या ध्रुवं अत्यन्तमुन्निन्ये पूर्वापेक्षया उच्चैः जगौ । तस्यै च तस्या अपि । मानं, बहु अधिकम् ॥ १० ॥

काचिद् रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः ।
जग्राह बाहुना स्कन्धं स्रवत्कबरमल्लिका ॥ ११ ॥

सत्यधर्मीया — काचिद्गोपी रासपरिश्रान्ता । पार्श्वस्थस्य स्वसमीपस्थितस्य । गदाभृतो गदाधरस्य श्रान्त्यादिप्रापकरोगाधारिणः । अनेन न स्वयमनवतीर्णनयावसर इति ध्वनयति । स्रवन्त्यो विगलन्त्यः कबरान्मल्लिका यस्याः सा । बाहुना स्कन्धं जग्राह ॥ ११ ॥

सुमनोरञ्जनी — स्रवंत्यः च्युताः कबरमल्लिकाः यस्याः सा ॥ ११ ॥

तत्रैका सगतं बाहुं कृष्णस्योत्पलसौरभम् ।
चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ॥ १२ ॥

सत्यधर्मीया — तत्र तत्समये सङ्गतं स्वस्कन्धस्थमुत्पलसौरभमुत्पलानां सौरभं सौगन्ध्यं यस्य स तं चन्दनेन मलयजेन आलिप्तं रूषितं च । स्वयमाघ्राय हृष्टरोमा हृष्टानि हृषितानि रोमाणि यस्याः सा । डाबुभाभ्यामिति डाप् । चुचुम्ब चुम्बितवती ॥ १२ ॥

सुमनोरञ्जनी — उत्पलस्य सौरभमिव सौरभं यस्य तम् ॥ हृष्टरोमा सती ॥ १२ ॥

कस्याश्चिन्नाट्यविक्षिप्तकुण्डलत्विषभूषितम् ।
गण्डं गण्डे सन्दधत्या आदात् ताम्बूलचर्वितम् ॥ १३ ॥

सत्यधर्मीया — नाट्येन विक्षिप्ताः सर्वत्र प्रसृताः कुण्डलयोस्त्विषाः कान्तयः । हलन्ततायाष्टाबन्तता । यस्मिन्स चासौ भूषितश्च तम् । मकरिकादिपत्राल्याः स्वगण्डं गण्डे कृष्णकपोले सन्दधत्याः कस्याश्चिद्गोपिकायाः पश्यन्त्याः सत्याः कृष्णस्य ताम्बूलचर्वितं या, बाहुं चुचुम्ब साऽऽदाद्गृहीतवतीत्यन्वयः । कुण्डलत्विषभूषितं गण्डं गण्डे सन्दधत्या इति चतुरस्रः पाठः । त्विष दीप्तावित्यस्मात्पचाद्यचि लघूपधगुणे त्विषेति निष्पत्तिरित्युक्तेः । नाट्येन विक्षिप्तं विक्षेपस्तेन त्विषं दीप्तिमदिति भूषितं तस्मिन् । गुणमात्रसंज्ञापूर्वकानित्यतेति विशेषः । गण्डखण्डे गण्डमण्डले समूहे मण्डले खण्डमाहुः शब्दविशारदा इत्युत्पलमाला । कृष्ण एव ताम्बूलचर्वितमादादिति सर्वेऽर्थात्सूचयन्ति । त्विषधातोः को वा भावे इगुपधलक्षणो वा घञर्थे क इति वा । तथा च त्विषेण कान्त्या भूषित इति पक्षद्वयेऽप्यन्वय इति वा ॥ १३ ॥

सुमनोरञ्जनी — नाट्येन विक्षिप्तयोः स्थानात् भ्रष्टयोः स्वकुण्डलयोः त्विषेण कान्त्या भूषिते गण्डखण्डे कपोलैकदेशे । ताम्बूलचर्वितं स्वयमधात् स्थापयामास । अभिदधत्याः देहीति वाचं ब्रुवत्याः ॥ १३ ॥

नृत्यन्ती गायती काचित् कूजन्नूपुरमेखला ।
पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताऽधात् स्तनयोः शिवम् ॥ १४ ॥

सत्यधर्मीया — नृत्यती गायती नर्तनं गानं च कुर्वती तत एव कूजन्त्यो, नूपूरे च मेखला काञ्ची च, यस्याः सा । पार्श्वस्थाच्युतहस्ताब्जं करकमलं श्रान्ता सती स्तनयोरधाद्दधार । पार्श्वस्थश्चासावच्युतश्चेति वा । स्वयं नृत्यन्ती कूजन्नूपुरमे कूजन्नूपुरा च साऽहं च तस्या मे काचिद्गायती पार्श्वस्था खला । नीचेऽधमे खल इति विश्वान्नीचा सपत्नी । अच्युतहस्ताब्जं गृह्णीयादिति श्रान्ता शिवं मङ्गलकरं करमधादिति वा ॥ १४ ॥

सुमनोरञ्जनी — शिवं सुखकरम् ॥ १४ ॥

गोप्यो लब्ध्वाऽच्युतं कान्तं श्रिय एकान्तवल्लभम् ।
गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ १५ ॥

सत्यधर्मीया — श्रियो रमाया एकान्तवल्लभं मुख्यभर्तारमच्युतं कान्तं लब्ध्वा प्राप्य तद्दोर्भ्यां बाहुभ्यां गृहीताः कण्ठा यासां तास्तं गायन्त्यो विजह्रिरे चिक्रीडुः ॥ १५ ॥

सुमनोरञ्जनी — काश्चिच्च गोप्यः । श्रियः एकान्तवल्लभमतिप्रियम् । तस्य कृष्णस्य दोर्भ्यां गृहीतकण्ठ्यो विजह्रिरे चिक्रीडिरे ॥ १५ ॥

कर्णोत्पलालकविटङ्ककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः ।
गोप्यः समं भगवता ननृतुः स्म केशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥

सत्यधर्मीया — कर्णेषु धृतान्युत्पलानि तैस्तथाऽलकाश्चूर्णकुन्तला एव विटङ्काः पुरःपाताद्वक्रदारुविशेषा इव तैर्युतास्ताः **कपोला यस्य तत्** । घर्मेण स्वेदोदकेन युतानि च तानि वक्त्राणि तेषां श्रीर्यासां ताः । घर्मः स्यादातपे ग्रीष्मे ह्युष्णस्वेदाम्भसोरपीति विश्वः । विटङ्कोऽलङ्कार इति वा । वलयाश्च नूपुराश्च घोषाः पादभूषणविशेषा एतैर्वाद्यैश्चैतद्रूपवाद्यैरिति वा । घोष इति गतम् । भगवता समं गोप्यो ननृतुः । केशेभ्यः स्रस्ताः स्रजो यासां ताः । भ्रमरा गाया एव गायकाः । ण्वुलन्तः । यस्यां सा च सा रासगोष्ठी तत्स्थानं तस्याम् । गोष्ठी गतम् ॥ १६ ॥

सुमनोरञ्जनी — नर्तने सहकारिघटकं वाद्यादिकमाह ॥ कर्णेति । कर्णोत्पलैः अलकानां विटङ्कैः आश्रयैः कपोलैश्च तेषु यो घर्मः स्वेदबिन्दुसमुदायः तेन च वक्तृश्रीः विलक्षणमुखशोभा यासां ता गोप्यः । वलयाः नूपुराण्येव वाद्यानि । तद्धोषैः समं, भगवता च समम् । भ्रमरा एव गायकाः अनुस्वरदातारो यस्यां तथाविधरासगोष्ठ्यां रासक्रीडास्थाने ननृतुरित्यन्वयः ॥ १६ ॥

एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ।
रेमे रमेशो व्रजकामिनीभिर्यथा स्वतन्त्रः प्रतिघं विडम्बयन् ॥ १७ ॥

सत्यधर्मीया — यथा स्वतन्त्र ईश्वरः प्रतिघं प्रवृत्तिधर्मं विडम्बयन्नुन्मत्तादिवद्विध्याद्यगोचरम् । विध्याद्यगोचरे कोपे प्रवृत्ते प्रतिघं विदुरिति च । अनुकुर्वन्नमते । एवं परिष्वङ्ग आलिङ्गनं कराभिमर्शः करपरिग्रहः स्निग्धानि तत्रैवेक्षणानि चक्षूंषि च । उद्दामेति विलासहासविशेषणं तैः । रमेशोऽपि व्रजकामिनीभी रेमे । यथा स्वतन्त्रः कश्चित्पतिः । प्रतिघं कोपं तत्कोपप्रतिकोपं विडम्बयन्नमते तथेति । प्रतिघः प्रतिघाते स्यात्कोपेऽपि प्रतिघो मत इति विश्वः । स्वतन्त्रोऽपि प्रतिघं दन्तप्रतिघातमिति वा । यथाऽर्भकः स्वप्रतिबिम्बविभ्रम इति पाठेऽर्भको बालो जलादर्शादिप्रतिफलितस्वप्रतिबिम्बेन विभ्रमो विलासो यस्य स सन् यथा रमत एवं रेम इत्यर्थः ॥ १७ ॥

सुमनोरञ्जनी — परिष्वंगः आलिङ्गनम् । उद्दाम उत्कृष्टः । रमेशो, व्रजकामिनीभिः । अस्वतन्त्रो यथा कामिनीपरतन्त्र इव रेमे । कुतः । प्रतिघं प्रवृत्तधर्मं विडम्बयन् अनुकुर्वन् ।। १७ ।।

तदङ्गसङ्गप्रमदाकुलेन्द्रियाः केशान् दुकूलं कुचपट्टिकां वा ।
त्यक्तुं पतिं वोढुमलं व्रजस्त्रियो विस्रस्तमाल्याभरणाः कुरूद्वह ।। १८ ।।

सत्यधर्मीया — तस्य कृष्णस्याङ्गसङ्गजो यः प्रमद आनन्दस्तेनाकुलानि व्याप्तानीन्द्रियाणि यासां ताः । विस्रस्तमाल्याभरणा व्रजस्त्रियः केशान्दुकूलं वस्त्रं कुचेषु पट्टिका कञ्चुकादिकं वा त्यक्तुं तथा पतिं वोढुं वाऽलं समर्थाः । न द्वयं वोढुं शक्ता इत्यर्थः । हे कुरूद्वहेति महीमहन्मह एवमिति सूचयति । व्रजस्त्रियो अविस्रस्तमाल्याभरणा अः इति छेदः । स्त्रियः काश्चित्सपत्नीं प्रति वदन्ति । अविस्रस्तमाल्याभरणा सती । उपलक्षणया केशादिग्रहः । यो अः साक्षान्नारायणस्तं त्वमुद्वह तथा कुरु व्रज इत्यवदन्निति वा । अविस्रस्तं आलि आभरणा अः कुरु उद्वहेति आ सम्यगाभरणानि यस्याः सा हे आलि सखि त्वं तद्दुकूलादिकमविस्रस्तं कुरु । योऽस्तमुद्वह च व्रजेति तामपजहसुरिति वा । नाज्ञः प्रतिव्योढुमिति पाठोऽनर्थमूलः कल्पितो बहुकोशेष्वदृष्टः ।। १८ ।।

सुमनोरञ्जनी — तस्यांगसङ्गोत्पन्नेन प्रमदेन आकुलानि व्याकुलानि इन्द्रियाणि यासां ताः । तदङ्गसङ्गप्रमदार्थं आकुलानि उत्सुकानि इन्द्रियाणि यासामिति वा । तदङ्गसङ्गवती या प्रमदा तया निमित्तया आकुलेन्द्रिया इति वा । कृष्णाङ्गसङ्गिनीमन्यां दृष्ट्वा व्याकुलेन्द्रिया इति भावः । केशान् केशबद्धभूषणानि कुसुमानि वा । दुकूलं कुचपट्टिकां वा त्यक्तुमलं शक्ताः अभवन् । किमर्थं, पतिमलं वोढुं, सर्वाङ्गैः वोढुम् । अत एव यद्विस्रस्तमाल्याभरणाः आसन् तदपि अलं भूषणमेवासीदित्यलं शब्दमावृत्य योज्यम् । यद्वा दुकूलादीन् त्यक्तुम् । पतिं वोढुं वा अलं पर्याप्ताः शक्तिरहिताः आसन् । पतिं वोढुं सर्वाङ्गैरोढुं दुकूलादि त्याज्यम् । तदपि त्यक्तुं अलं शक्तिरहिता अभवन्निति वा । कुतः आकुलेन्द्रियत्वात् ।। १८ ।।

कृष्णविक्रीडितं वीक्ष्य व्यमुह्यन्त सुरस्त्रियः ।
कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ।। १९ ।।

सत्यधर्मीया — कृष्णविक्रीडितं तत्क्रीडां च वीक्ष्य सुरस्त्रियः कामार्दिता व्यमुह्यन्त । सगणश्चन्द्रश्च विस्मितोऽभवत् । नास्मदादिसाहितीसहितो मन्मथो वा धत्तेऽमुं तथाऽपीयं कथेति विस्मितोऽभवत्सोम इति भावः ।। १९ ।।

सुमनोरञ्जनी — शशाङ्कश्चन्द्रः । सगणः उडुगणसहितः ।। १९ ।।

कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ।
रराम भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥

सत्यधर्मीया — गोपयोषितो यावतीर्यावत्यस्तावन्तं तत्सङ्ख्यमात्मानं कृत्वाऽऽत्मारामोऽपि लीलया ताभिः सह रराम । पदव्यत्यासेन तत्सुखार्थमेव रमणमिति भावः सूच्यते ॥ २० ॥

सुमनोरञ्जनी — तावन्तं तावद्रूपवन्तम् ॥ २० ॥

तासां रतिविहारेण श्रान्तानां वदनानि सः ।
प्रामृजत् करुणः प्रेम्णा शन्तमेनाङ्ग पाणिना ॥ २१ ॥

सत्यधर्मीया — रतिविहारेण सुरतक्रीडया । रतिविहारो मन्मथस्तेन तदुपद्रवेणेति वा । श्रान्तानां तासां गोपीनां वदनानि स्विन्नानि शन्तमेन पाणिना प्रेम्णा सः प्रामृजन्मार्जयामास ॥ २१ ॥

सुमनोरञ्जनी — शन्तमेन अतीवसुखकरेण ॥ २१ ॥

गोप्यः स्फुरन्मकरकुण्डलकुन्तलत्विड्गण्डश्रिया सुरतहासनिरीक्षणेन ।
मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥ २२ ॥

सत्यधर्मीया — स्फुरतां मकराकारानुकाराणां कुण्डलानां तथा कुन्तलानां च । अथवा स्फुरन्मकराणां कपोललिखितपत्रालीनां कुण्डलानां वर्तुलानां च त्विट् कान्तिस्तद्युक्ता गण्डास्तेषां श्रिया शोभया । सुरतस्य तत्सम्बन्धि हाससहितं च तन्निरीक्षणं च तेन । तत्कररुहा नखास्तेषां स्पर्शेन प्रमोदो यासां ताः । मानं सत्कारं दधत्यो विदधत्यो ऋषभस्य स्वनाथस्य पुण्यानि तत्प्रापकाणि कृतानि जगुरगायन् ॥ २२ ॥

सुमनोरञ्जनी — तस्य श्रीकृष्णस्य कररुहाणां नखानां स्पर्शेन उद्रिक्तः प्रमदो यासां ता गोप्यः। स्फुरतोः मकरकुण्डलयोः कुन्तलानां च त्विट् ययोस्तयोः गण्डयोः श्रिया । सुरतेन हासेन निरीक्षणेन साकूतकटाक्षवीक्षणेन च । ऋषभस्य । मानं बहुमानं दधत्यः विदधत्यः कुर्वन्त्य इति यावत् । तस्य मनोहराणि कृतानि कर्माणि । जगुरिति सम्बन्धः ॥ २२ ॥

ताभिर्युतः श्रममपोहितुमङ्गसङ्गध्वस्तस्रजः सुकुचकुङ्कुमरञ्जिता याः ।
गन्धर्वपालिभिरनुद्रुत आविशद् वाः श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥

सत्यधर्मीया — रासविलासमुक्त्वेदानीं जललीलां लपितुमारभते ॥ ताभिरिति । या

अङ्गसङ्गध्वस्तस्रजोऽङ्गयोः परस्परं सङ्गकाले ध्वस्ता विगलिताः स्रजो यासां ताः । सुकुचेषु सुकुङ्कुमेन रञ्जिताश्च ताभिर्वनिताभिः श्रममपोहितुं हापयितुं वाः यमुनानीरं ययौ । गन्धर्वाणां आलयः पङ्क्तयस्ताभिरनुद्रुतो याश्चाविशद्भिन्नसेतुर्मर्दन भिन्नः सेतुः सिकतादिकृतो येन स इव । इभराट् एर्मन्मथस्य भर इभर इभरेणाटतीतीभराण्मदनातुर इव, सुरतकाले गजीभिः करेणुभिर्यथा पाथो विशति तथाऽविशदित्यन्वयः । गन्धर्वपा इव विद्यमाना अलयस्तैरिति वा भिन्नसेतुर्भिन्नमर्याद इति कृष्णपक्षेऽप्यन्वयः ॥ २३ ॥

सुमनोरञ्जनी — जलक्रीडां वर्णयति । याः अङ्गसङ्गेन ध्वस्ता निरस्ताः स्रजो यासां ताः सुकुचकुङ्कुमरञ्जिताश्च, ताभिर्गोपीभिः सह । तासां श्रममपोहितुं परिहर्तुं ययौ । कथंभूतः । गन्धर्वाणां गायकानां पालीभिः श्रेणीभिः अनुद्रुतः । गच्छन्तं श्रीकृष्णमनुसृत्य अन्तरिक्षमार्गे गन्धर्वा अप्यनुगच्छन्ति स्मेति भावः । गतश्च वाः यामुनोदकमाविशत् । तत्र दृष्टान्तः । भिन्नः प्रभिन्नः सेतुरिव सेतुः गण्डस्थलं यस्य सः इभराट् । यद्वा भिन्नमर्यादः मत्त इति यावत् । गजीभिः करेणुभिः सहेवेति ॥ २३ ॥

सोऽन्तर्जले युवतिभिः परिषिच्यमानः प्रेमेक्षितप्रहसिताभिरभिष्टुताङ्गः ।
वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः ॥ २४ ॥

सत्यधर्मीया — गजेन्द्रलीलः स्वरतिः स्वरमणः । एतद्रमणीरमणं तु लोकमोहनायेति मन्तव्यम् । युवतिभिरन्तर्जले गतं जलमध्ये परिषिच्यमानः करनीरैर्दृतिद्वारा वा । प्रेमपूर्वकमीक्षितं प्रहसितं च यासां ताभिरभिष्टुतमङ्गं यस्य सः । वैमानिकैर्गगनगैर्देवैः कुसुमवर्षिभिश्चेड्यमानः स्वयं रेम इत्यन्वयः ॥ २४ ॥

सुमनोरञ्जनी — प्रेम्णा ईक्षितं प्रहसितं च यासु ताः । वैमानिकैः विमानस्थितैर्देवैः । स्वेनैव रतिर्यस्यासौ स्वरतिः ॥ २४ ॥

ततश्च कृष्णोपवने जलस्थलप्रसूनगन्धानिलजुष्टदिक्तटे ।
चचार भृङ्गप्रमदागणावृतो यथा मदच्युद् द्विरदः करेणुभिः ॥ २५ ॥

सत्यधर्मीया — ततो जलविलासानन्तरम् । कृष्णाया उपवने यमुनोपवने । जलस्थलप्रसूनानि कमलादीनि । स्थलकमलस्यापि सत्त्वात् । उक्तेर्गीतगोविन्दमुक्तावल्यादौ । मल्लिकादिकानि वा तद्गन्धवाननिलो गन्धवाहस्तज्जुष्टानि दिशां तटानि यस्मिंस्तत्तस्मिन् । भृङ्गवद्विद्यमानाः प्रमदास्तासां गणेनावृतो, मदच्युन्मदस्रावी द्विरदो गजः करेणुभिर्यथा चरति तथा चचार ॥ २५ ॥

सुमनोरञ्जनी — ततः जलविहारानन्तरम् । जलप्रसूनानां स्थलप्रसूनानां च गन्धो यस्मिन्ननिले तेन जुष्टाः सेविताः दिक्तटा दिक्प्रान्ता यस्य तस्मिन् । कृष्णायाः यमुनायाः उपवने । करेणुभिः गजस्त्रीभिः मदच्युद्द्विरदः मदस्रावी गजः यथा चरति तथा भृङ्गाणां प्रमदानां च गणैर्वृतो हरिश्चचारेति सम्बन्धः । भृङ्गप्रमदाः भृङ्गस्त्रियः तासां गणैः आवृत इति द्विरदस्य विशेषणं वा ।। २५ ।।

एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ।
सिषेव आत्मन्यवरुद्धसौभगः सर्वाः शरत्काव्यकथारसाश्रयाः ।। २६ ।।

सत्यधर्मीया — उपसंहरति ।। एवमिति । सर्वाः शरत्काव्यकथारसाश्रयाः शरदनुसम्बन्धिनः काव्यकथायामुक्ता ये रसाः शृङ्गारादिरसास्तेषामाश्रयो यासु ताः । शशाङ्कस्यांशवः किरणा-स्तैर्विराजिता निशा रात्रीरात्मनि स्वस्मिन्नेवावरुद्धं निरुद्धं सौभगं यस्य सः । नान्यत्र तादृक्-सौभाग्यस्यावकाश इति भावः । अनुरतोऽबलागणो योषित्सङ्घो यं सः सत्यकामोऽप्रतिहतेच्छ एवं सिषेवे । निशा इति द्वितीयया क्षणमात्रं क्षपायां रत्यविरतिं द्योतयति । सतीष्वकामस्तदिच्छारहित इति रहोभावः ।। २६ ।।

सुमनोरञ्जनी — उपसंहरति । सत्यकामः सत्यसङ्कल्पः । अनुरतः अनुरक्तः अबलागणो यस्मिन्सः । आत्मन्येव अवरुद्धं नियतं सुरतमेव सौरतं यस्य सः । स्वरमण इति यावत् । एवम् उक्तप्रकारेण सर्वाः शरत् शरत्संज्ञाः सुपां सुलुगिति शसो लुक् । निशाः सिषेवे इति सम्बन्धः । अत एव काव्यकथानां ये रसाः अभिप्रायविशेषास्तेषामाश्रयाः विषयाः काव्येषु वर्णनीया इति यावत् । कृष्णस्येदं विशेषणम् । रसाः शृङ्गारादयः ।। २६ ।।

राजोवाच—

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।
अवतीर्णो हि भगवानंशेन जगदीश्वरः ।। २७ ।।

सत्यधर्मीया — भिन्नसेतुरित्याद्यसहमानः परीक्षिदप्राक्षीत्प्रेक्षावन्तमित्याह ।। राजेति । धर्मस्य संस्थापनायेतरस्याधर्मस्य प्रशमाय नाशाय च जगदीश्वरो भगवानंशेन पद्मनाभकृष्णकेशेनावतीर्णः । हि प्रसिद्धमेतत् । यदा यदा हि धर्मस्य ग्लानिर्भवति भारतेत्यादौ ।। २७ ।।

सुमनोरञ्जनी — परीक्षित् मन्दजनमनोगतां शङ्कां शुकमुखेन परिजिहीर्षुः पृच्छति ।। संस्थापनायेति । इतरस्य अधर्मस्य ।। २७ ।।

स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता ।
प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥ २८ ॥

सत्यधर्मीया — धर्मसेतूनां तन्मर्यादानां वक्ताऽन्येषां कर्ता स्वयमभिरक्षिता च स कथमेतत्प्रतीपं विरुद्धं परदाराभिमर्शनमाचरच्चचार ॥ २८ ॥

सुमनोरञ्जनी — धर्मसेतूनां धर्ममर्यादानाम् । प्रतीपं तद्विरुद्धम् । कर्म आचरदिति किं तदित्यत आह ॥ परेति ॥ २८ ॥

आत्मारामो यदुपतिः कृतवान् वै जुगुप्सितम् ।
किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥ २९ ॥

सत्यधर्मीया — आत्मारामः स्वरमणो यदुपतिरेतज्जुगुप्सितं लोकनिन्दितं कृतवान् । कोऽभिप्रायो यस्य सः । हे सुव्रत नो मदादीनां संशयं छिन्धि भिन्धि ॥ २९ ॥

सुमनोरञ्जनी — जुगुप्सितं निन्दितम् । कोऽभिप्रायो यस्य स किमभिप्रायः । एतत् एतं संशयम् ॥ २९ ॥

श्रीशुक उवाच—

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ३० ॥

सत्यधर्मीया — यच्चरितामृतपायिनां न विहिताननुष्ठानं दुरितावहं का कथा धुतबन्धस्य मधुमथनस्येति समाधत्ते ॥ धर्मेति । ईश्वराणामनीश्वराणामपीश्वरत्वेन तरतमभावेन भगवत्स्थापितानां धर्मव्यतिक्रमो दृष्टः । साहसं चन्द्रादीनां दृष्टम् । तेजीयसां भगवदनुग्रहोपयातप्रभाववतां दोषाय न भवति । सर्वभुजो वह्नेर्यथाऽमेध्यदहनहेतुकदोषो न तथेति ॥ ३० ॥

सुमनोरञ्जनी — यत्प्रसादपात्राणामपि धर्मव्यतिक्रमो न दोषाय किमुत हरेरित्यभिप्रायेण शुकः परिहरति ॥ धर्मेति । ईश्वराणामिन्द्रादीनां साहसः स्वेच्छया क्रियमाणः धर्मव्यतिक्रमो दृष्टः, इन्द्रादीनामहल्याजारत्वादिरूपः शास्त्रेषु, तथापि सः दोषाय पापादिलेपाय न भवति । कुत इत्यत उक्तम् ॥ तेजीयसामिति । स्वभावसिद्धज्ञानाख्यतेजःशालिनामित्यर्थः । तत्र दृष्टान्तः । सर्वभुजः मेध्यामेध्यसर्वं दहतो वह्नेस्तत्कृताशुचित्वादिकं यथा नास्ति तथेति ॥ ३० ॥

नैतत् समाचरेज्जातु मनसाऽपि ह्यनीश्वरः ।
नश्यत्याश्वाचरन् मौढ्याद् यथा रुद्रोऽपिबद् विषम् ॥ ३१ ॥

सत्यधर्मीया — यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत इत्यादेरीश्वरचर्याऽवश्यमनीश्वरेण कार्येति सर्वैरेवं कर्तव्यमित्यायातमिति तत्राह ॥ नेति । एतद्धरितदितरतेजीयैः कृतमनीश्वरो जातु कदाचिदपि मनसाऽपि नाचरेत् । यदि चाचरन्भवेत्तत्र तन्त्रं मौढ्यादिति । आशु नश्यति । नाशश्च बहुप्रकारः सहस्रभवत्वादेः प्रमितत्वात् । नश्यत्यादौ दोषयुक्तो भवति तदनन्तरं यथायथं भवतीति वा दोषयुक्तपुरुषे नष्टशब्दप्रयोगादित्युक्तेः । तत्र व्यतिरेकनिदर्शनं दर्शयति ॥ यथेति । रुद्रो विषमपिबदिति स्वयमाचरंस्तद्भक्षयन्नश्येदेवेति । अरुद्रो रुद्रेतरो विषं, शिष्टं प्राग्वत् । यथा वायुरपिबदिति रुद्रो विषमपिबन्नीलगलत्वादिना नष्टश्चेत्यन्वयो वा । वायुरस्मा उपामन्थत्पिनष्टिस्मा कुनन्नमा । केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सहेत्यादि । स तत्पिबन् कण्ठगतेन तेन निपातितो मूर्छित आशु रुद्रः । नीलोऽस्य गलस्तदासीदित्यादिश्रुतिस्मृत्यादिकमुदाहृत्याष्टमे स्फुटीकृतमस्माभिस्ततोऽनुसन्धेयम् । यथा रुद्रोऽब्धिजं विषमिति पाठो ललितान्वयः । हिशब्देन यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि । नो इतराणीति सुचरिताचरणाभ्यनुज्ञानप्रसिद्धिं सूचयति । यथा रुद्रो जह्नुरगस्त्यो वाऽब्धिजं विषं जलमपिबत्तथाऽऽचरन्नन्यो नश्येदतस्तथा नाचरेदिति वा । विषं तु गरले तोय इति विश्वः । यथा रुद्रः कोपी सञ्जह्नुरगस्त्यो वेति वा । रुद्रः क्रूरे महेश्वर इति नानार्थोक्तेः ॥ ३१ ॥

सुमनोरञ्जनी — नैतावता यद्यदाचरति श्रेष्ठ इति स्मृत्याऽस्मदादिभिर्लौकिकैस्तथा चरितुं युक्तमित्याह ॥ नैतदिति । एतत् महतां धर्मव्यतिक्रमाचरणम् । मनसापि न समाचरेत् । कुतः । हि यस्मादनीश्वरः असमर्थः । विपक्षे बाधकमाह ॥ नश्यतीति । मौढ्यात् स्वयमपि धर्मव्यतिक्रममाचरन्नाशु नश्यति । तत्र दृष्टान्तः ॥ यथेति । रुद्रो विषमपिबदिति । तथैवायमन्मर्त्यो(?) यथा नश्यति तथेति । इतिशब्दतथाशब्दावध्याहृत्य योज्यम् ॥ ३१ ॥

ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ।
तेषां यत् स्ववचोयुक्तं बुद्धिमान् नैतदाचरेत् ॥ ३२ ॥

सत्यधर्मीया — तर्हि सदुक्तिर्नानुसर्तव्येत्यायातमिति तत्र व्यवस्थया शङ्कां दुरवस्थीकरोति ॥ ईश्वराणामिति । सत्यमर्थप्रापकतया यथार्थम् । तथैव तेषामाचरितं च सत्यं, क्वचित्तेषामेव यत्स्ववचः स्वमात्रविषयकं यत्तदयुक्तम् । तामेवायुक्ततां विशदयति । बुद्धिमान्नैतत्तन्मात्रयुक्तं स्वायुक्तं

नाचरेदाचरंश्च प्रत्यवेयादिति भावः । स्ववचः कलिङ्गनीत्यादिरूपमयुक्तं मोहनार्थत्वात् । तदुक्तमेतन्नाचरेदिति वा । ईश्वराणां वचः सत्यं तथैवाचरितं सत्यम् । अन्यथा तेषां चित्क । न तद्वचनसत्यतायामेषा संविदुत्पत्तिमार्गाभावाच्चिज्ज्ञानं केत्यपि योजना ॥ ३२ ॥

सुमनोरञ्जनी — तर्हि तेषामेव यद्यदाचरति श्रेष्ठ इति वचनं शिष्टानामाचारश्चायथार्थः स्यादित्यतस्तत्तात्पर्यमाह ॥ ईश्वराणामिति । ईश्वराणां वचः सत्यं यथार्थमेव । तेषामाचरितमपि तथैव सत्यं निर्दुष्टमेव तथापि क्वचित्तेषामेतदाचरितं स्ववचसः स्वमुद्दिश्य प्रवृत्तस्य विधिनिषेधात्मक-श्रुतिवचसः अयुक्तं विरुद्धं नाचरेदिति । तेषामाचरणं वेदविरुद्धं चेन्न कार्यमिति भावः । तथा च यद्यदाचरतीति स्मृतिः सत्कर्माचारमनुजानाति न त्वसत्कर्माचरणमिति भावः । तथा च श्रुतिः । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । नो इतराणीति । विधिनिषेधगोचत्वान्नान्यन्निषिद्धं कर्तव्यमित्युक्तं भवति ॥ ३२ ॥

कुशलाचरितेनैषामिह चार्थो न विद्यते ।
विपर्ययेण चानर्थो निरहङ्कारिणां प्रभो ॥ ३३ ॥

सत्यधर्मीया — पक्वभक्तिप्रतिपत्तियुक्तानां न सांसारिकं सुकृतं दुष्कृतं च फलोपलम्भकमिति कथयति ॥ निरहङ्कारिणां ममताद्यतिगानामिति । कुशलाचरितेनेह संसृतावर्थोऽभिनवो न हि विद्यते । विपर्ययेणाकुशलाचरितेनानर्थोऽक्लृप्तविच्छित्तिरूपो नरकाद्यनर्थोऽपि न विद्यते ॥ ३३ ॥

सुमनोरञ्जनी — तर्हि विध्याद्यनुसारेण तैरपि किं न क्रियत इत्यतस्तेषां विधिनिषेधबन्धा-गोचरत्वात्तथा वर्तनं युक्तमित्याह ॥ कुशलेति । एषां ईश्वराणां कुशलाचरणेन इह, चशब्दादमुत्र च । अर्थः प्रयोजनं स्वर्गादिकम् । विपर्ययेण निषिद्धाचरणेन । अनर्थो नरकादिः । तत्र हेतुः निरहंकारि-णामिति । कर्तृत्वाद्यभिमानशून्यानामित्यर्थः ॥ ३३ ॥

किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसाम् ।
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥

सत्यधर्मीया — ज्ञानिमात्रस्य यदैवं तदा तदादिसर्वेश्वरस्य हरेर्न पुण्यपापलेप इति किमालप-नीयमिति नृपं प्रति लपति ॥ किमिति । अखिलानि सत्त्वानि स्वभावादीनि तेषां तथा तिर्यञ्चश्च पक्ष्याद्याश्च मर्त्या नराश्च दिवौकसो देवाश्चेति तेषामीशितव्यानां प्रेर्याणाम् । प्रेरणा तरतमभावापेक्षया तिर्यगादिक्रमत उक्तिः । ईशितुः प्रेरकस्य हरेः कुशलाकुशलान्वयो नेति किमुत, न वाच्यमित्यर्थः ॥ ३४ ॥

सुमनोरञ्जनी — यदा ज्ञानिनामेवैवं भावः किमु वक्तव्यं दूरीकृतविधिनिषेधबन्धस्य हरेरित्यत आह ॥ किमुतेति । तिर्यङ्मर्त्यदिवौकसां बहुवचनमाद्यर्थे । तिर्यङ्मनुष्यदेवप्रभृतीनामखिलसत्वानामीशितव्यानां जडानां चेशितुः हरेः कुशलाकुशलयोः पुण्यपापयोः अन्वयः लेपः किमुतेति ॥३४॥

यत्पादपङ्कजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबन्धाः ।
स्वैरं चरन्ति मुनयोऽपि न न ह्यमानास्तस्येच्छयाऽऽत्तवपुषः कुत एव बन्धः ॥३५॥

सत्यधर्मीया — परीक्षित्साक्षिसिद्धान्मुनीन्निदर्शयित्वाऽपि कैमुत्यं द्रढयति ॥ यत्पादेति । यस्य पादावेव पङ्कजे तयोः परागा रेणवस्तेषां निषेवा बोधो यस्य स तेन तृप्ता यत्पादपङ्कजपरागाणां निषेवा येषां ते यत्पादपङ्कजपरागनिषेवा अत एव तृप्ता इति वा । योगप्रभावेन विधुतोऽखिलः समस्तोऽनन्यनिबर्हणीय इति दृढः कर्मबन्धो यैस्ते तथा मुनयो गतम् । स्वैरं गतम् । चरन्ति । तत्र निमित्तमाह ॥ न हीति । अमाना नेत्यभिमानवन्तस्ते ता नेति न न हि । अमाना द्वौ नञौ प्रकृतन्यायादत्यभिमानहीना निरहङ्कारिणां प्रभवित्यानुकूल्यमेवमन्वये ज्ञेयम् । अत एवेति निर्गतिका गतिः । तस्य तदधिपस्येच्छायत्तवपुषः श्रीकृष्णस्य बन्धः कुत एव किंहेतुकः स्यात् ॥ ३५ ॥

सुमनोरञ्जनी — प्रकारान्तरेणोक्तं प्रमेयं द्रढयति ॥ यदिति । योगस्तस्मिन्नेव मनोयोगः । तत्प्रभावेन तत्सामर्थ्येन विधुताखिलकर्मबन्धो येषां तैः । ननह्यमानाः नसमासोऽयं, कर्मभिरबध्यमानाः । विषयस्नेहेनाबध्यमाना वा । स्वैरं चरन्ति । इच्छया आत्तवपुषः तस्य हरेस्तु बन्धः पुण्यपापबन्धः कुतः न कुतोऽपीति ॥ ३५ ॥

गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेहभाक् ॥ ३६ ॥

सत्यधर्मीया — परदारसंसर्गमभ्युपेत्य दोषो नेषदिति प्रागुक्तमेतर्हि न स इत्यावेदयति ॥ गोपीनामिति । गोपीनां तासां पतयस्तत्पतयस्तेषां च किञ्च सर्वेषां देहिनां च योऽन्तश्चरति सोऽध्यक्षः सर्वसाक्षी । तर्ह्यत्र जन्म कुत इति तत्राह । एषः क्रीडनं क्रीडोपयुक्तं देहं भजतीति स तथेति । अनेन तत्र स्त्रीरूपी गोपेषु पुरुषरूपी सन्सन्निहित इति न साक्षात्तत्सम्पर्क इति सूच्यते । ई रमा च गोपीनामन्तश्चरति सः स्वयं च चरति तत्पत्नीनां सर्वेषां देहिनां चान्तश्चरति तयोरेव संसर्गो नाभीरभामिनीपरिरम्भादिरिति हृदयम् । ननु चतुर्थे तत्र सन्निहिता श्रीश्च यत्र सन्निहितो हरिः । नास्य सन्निधिमात्रेण रमा पत्नीत्वमाव्रजेत् । साक्षादेव तु साक्षाच्च हरेः सन्निधितः क्वचित् । गोप्यादिरूपा भवति विपरीतं न तु क्वचिदित्युक्तेर्गोपान्तर्गतभगवद्रूपस्य पत्नीत्वं रमा समाया-

तीत्युक्तिर्बाधत इति चेत् । भावानवबोधात् । पुरुषाद्याविष्टविष्णुपत्नीत्वं न साक्षाद्रुक्मिण्यादिवदवताराया रमायाः कृष्णादिसाक्षाद्रूपस्य रमणं च सम्भवतीत्येतत्परत्वात्तत्तात्पर्यवचनस्य । यथा रमात्राविष्टाऽपि साक्षादवतीर्णहरिपत्नी भवति तथा हरिरप्यन्यत्राविष्टसाक्षादवतीर्णरमापतिः क्वचिद्भवति किं नेत्याह ॥ विपरीतमिति । हरिरन्यत्राविष्टः साक्षादवतीर्णरमापतिः क्वचिदपि नैव भवतीत्यर्थ इत्यादिना विवृतमाचार्यैरनुसन्धेयम् ॥ ३६ ॥

सुमनोरञ्जनी — क्रीडने क्रीडार्थं देहभाक् ॥ ३६ ॥

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः ।
भजते तादृशीं क्रीडां यां श्रुत्वा तत्परो भवेत् ॥ ३७ ॥

सत्यधर्मीया — नायव्ययौ कायस्वीकारतस्तिथ्योरथाऽपीतीरयति ॥ अनुग्रहायेति । भक्तानामुपर्यनुग्रहाय मानुषं देहमाश्रितः । तादृशीं तन्मानुषतनुसदृशीं क्रीडां लीलां भजते यां श्रुत्वा नरस्तत्परस्तदात्मको भवेदिति तदनुकृतिरिति भावः ॥ ३७ ॥

सुमनोरञ्जनी — इच्छयापि किमर्थं देहं स्वीकरोतीत्यत आह ॥ अनुग्रहायेति । मानुषं मानुषवत्प्रतीयमानं तादृशीं मानुषदेहोचिताम् । तत्परः तदेकभक्तः ॥ ३७ ॥

नासूयन् नृप कृष्णाय मोहितास्तस्य मायया ।
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ३८ ॥

सत्यधर्मीया — तत्पतयस्ता आस्तरणेऽदृष्ट्वा किं वाऽवदंश्चक्रुश्च किमित्यत आह ॥ नेति । व्रजौकसो गोपाः स्वान्दारान्भार्यास्तस्य माययेच्छयैव मोहिताः स्वपार्श्वस्थान्मन्यमानाः कृष्णाय नासूयन्न दोषान्गुणेष्वाविष्कृतवन्त इत्यर्थः । क्रुधेति चतुर्थी ॥ ३८ ॥

सुमनोरञ्जनी — परपुरुषाभिरतानां गोपीनां पतयः कृष्णाय कथं नाभ्यसूयन्निति तत्राह ॥ नेति । तस्य कृष्णस्य ॥ ३८ ॥

ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः ।
अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥ ३९ ॥

सत्यधर्मीया — किं ताः कान्ताः कान्तारेऽवतस्थिरे तथैव किं वा गता गेहमित्यत आह ॥ ब्रह्मरात्र इति । ब्रह्मरात्रे ब्राह्मे मुहूर्ते । एकदेशपूर्वकत्वादच् । उपावृत्ते उपायाते वासुदेवेनानुमोदिता

गच्छतेतः परं सदनमित्यनुमोदिताः । अनिच्छन्त्यो विरहासहिष्णुतया । भगवान्प्रियो यासां ता भगवतः प्रिय इति वा स्वगृहान्ययुः । शरच्चन्द्रांशुसन्दोहेति श्लोकस्य व्याख्या द्वेधा प्रवृत्ता । तदनुरोधेन तद्दिने वा दिनान्तरे वा भगवन्मायायाः किं मान्ध्यम् ॥ ३९ ॥

सुमनोरञ्जनी — ब्रह्मरात्रे ब्राह्मे मुहूर्ते । उपावृत्ते प्राप्ते ॥ ३९ ॥

विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद् यः ।
भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ ४० ॥

इति श्रीमद्भागवते दशमस्कन्धे एकत्रिंशोऽध्यायः ॥

सत्यधर्मीया — एतद्रूपमेतस्य फलमिति निरूपणेनैतदाकर्णनं वर्णनं चावश्यं कार्यमिति विधत्ते ॥ विक्रीडितमिति । विष्णोः कृष्णस्य व्रजवधूभिर्व्रजगजगामिनीभिः सहेदं च विक्रीडितं तच्चरितभरितां कथामिति यावत् श्रद्धान्वित आस्तिक्यबुद्धिरनुशृणुयादथ स्वयं वर्णयेदन्यान्प्रति । परां साक्षादपरोक्षजनयित्रीम् । प्रतिलभ्य प्राप्य, कामहेतुको यो हृद्रोगस्तमाशु शीघ्रमपहिनोति त्यजति । अचिरेण त्वरया धीरो धिया ज्ञानेन ज्ञाने वा रमत इति स तथा भवति । आशु प्रतिलभ्य धीरो धृतिसहितोऽचिरेण कामं हृद्रोगमपहिनोतीत्यन्वयो वा ॥ ४० ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे एकत्रिंशोऽध्यायः ॥ १०-३१ ॥

सुमनोरञ्जनी — फलमाह । विष्णोः व्रजवधूभिः सह विक्रीडितं तथा इदं च त्वत्प्रश्नस्य मयोक्तं परिहरणं यः श्रुणुयादथ वर्णयेत् सः । प्रतिलभ्य प्राप्य । हृद्रोगं मनसो रोगमिव रोगं कामम् । आशु अपहिनोति त्यजति । न केवलमेतावत् किन्तु अचिरेण धीरः ज्ञानी च भवतीत्यर्थः ॥ ४० ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां एकत्रिंशोऽध्यायः ॥ १०-३१ ॥

।। अथ द्वात्रिंशोऽध्यायः ।।

श्रीशुक उवाच—

एकदा देवयात्रायां गोपाला जातकौतुकाः ।
अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनम् ।। १ ।।

सत्यधर्मीया — कंसारिः संसारोरगग्रस्तमेवं मोचयतीति दिदर्शयिषुर्नन्दस्याहितो विहितं मोचनं तथा शङ्खचूडचूडारत्नहरणं तं मारयित्वा बलाय तद्वितरणं च कथयत्यस्मिन्नध्याये । तदादौ गोपानां यात्राप्रकारं निरूपयति ।। एकदेति । जातमुत्पन्नं कौतुकमभिलाष उत्सवो वा येषां ते तथा । कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः । परम्परासमायातमङ्गले च कुतूहले । विवाहसूत्रगीतादिभोगकामेषु च स्मृतमिति विश्वात्सम्भवद्विश्वार्थं तत्पदम् । अनडुद्भिर्वृषैर्युक्तैरनोभिः शकटैरम्बिकावनम् । अम्बिकाऽत्र पार्वती । देवं पशुपतिं प्रभुं, देवीं च नृपतेऽम्बिकामिति जनसभाजनतरतमभावस्य वक्ष्यमाणत्वात् ।। १ ।।

सुमनोरञ्जनी — भक्त्या प्रसन्नो भगवान् भक्तानामात्यन्तिकानिष्टं निवर्तयित्वा परमाभीष्टं प्रदास्यतीति द्योतयितुं नन्दस्य सर्पान्मोक्षं शङ्खचूडं हत्वा बलभद्राय तच्छिरोरत्नदानं च निरूपयत्यस्मिन्नध्याये । तत्र पूर्वप्रवृत्तां कथामाह ।। एकदेति । देवस्य पशुपतेः यात्रायाम् ।। १ ।।

तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं प्रभुम् ।
आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकाम् ।। २ ।।

सत्यधर्मीया — तत्र सरस्वत्यां स्नात्वा पशुपतिं देवाधिपम् । पशवो देवताः स्मृता इति छान्दोग्यभाष्योक्तेः । नन्द्यधीशमिति वा । अर्हणैः पूजासाधनैर्भक्त्याऽऽनर्चुरपूजयन् । चात्ता-मम्बिकामानर्चुरित्यन्वयः ।। २ ।।

सुमनोरञ्जनी — अर्हणैः पूजासाधनैः ।। २ ।।

गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ।
ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ।। ३ ।।

सत्यधर्मीया — सर्वे रुद्रे ददुः । देवो वासुदेवो नः प्रीयतामिति । अयमेव कुतो नार्च्य इत्यतोऽप्याह ।। देवोन इति । देवाद्वासुदेवादून इति । गाः व इति छेदः । मधु क्षौद्रं मध्वन्नं मधुरमन्नं देवो वासुदेव इदं सर्वं वो युष्माकमिति ददुः । देवो वो युष्मदन्तर्गतो देवः प्रीयतामिति ददुः ।। ३ ।।

सुमनोरञ्जनी — गावः गाः । मधु क्षौद्रं मध्वन्नं मधुरान्नं ब्राह्मणेभ्यो ददुः । गावोऽप्यादृताः पूजिता इति वा ।। ३ ।।

ऊषुः सरस्वतीतीरे जलं प्राश्य यतव्रताः ।
रजनीं तां महाभाग नन्दसुनन्दकादयः ।। ४ ।।

सत्यधर्मीया — जलं प्राश्य पीत्वा, यतव्रता इत्याभ्यां तीर्थोपोषणं गोपानां सूच्यते । तां रजनीं रात्रिं तत्रोषुरवात्सुः ।। ४ ।।

सुमनोरञ्जनी — तां रजनीं रात्रिम् । ऊषुः । कालाध्वनोरिति द्वितीया ।। ४ ।।

कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः ।
यदृच्छयाऽऽगतो नन्दं शयानमुरगोऽग्रसीत् ।। ५ ।।

सत्यधर्मीया — तस्मिन्विपिने वने कश्चिन्महानुरगोऽतिबुभुक्षितो यदृच्छया हरीच्छयाऽऽगतः शयानं नन्दमग्रसीत् । तत्र निदर्शनमाह । कश्चिन्महानहिर्वृत्र इन्द्रमिवेति शेषः । यदावृणोत्तद्वृत्रस्य वृत्रत्वमित्यादेरिति । अहिर्वृत्रासुरे सर्प इति विश्वः । उरगः शापतोऽहिर्न विद्यते हिस्तत्त्वेन निश्चयो यस्य तज्ज्ञात्यवच्छिन्न इति यावदिति चोरगविशेषणम् । अतोऽपि न पुरोगतोरगतः पुनरुक्तिरिति ज्ञेयम् । हिर्ज्ञानं तन्न विद्यते यस्याहिरज्ञः । यथोक्तमृग्भाष्यटीकायाम् । हीति निश्चयवाची स्यादिति वचनात् हि गतौ ततो डिस्ततो नञ्समासोऽहयो ज्ञानविरोधिन इत्युभयपक्षे ।। ५ ।।

सुमनोरञ्जनी — तस्मिन् वने । कश्चित् महानहिः आसीत् । सः उरगः यदृच्छया ईशेच्छया । शयानं नन्दं प्रत्यागतः । तमग्रसीत् ।। ५ ।।

स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयम् ।
सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ।। ६ ।।

सत्यधर्मीया — स नन्दोऽहिना ग्रस्तो महानयं सर्पो मां ग्रसते ग्रसति तात मां परिमोचयेति चुक्रोश । सतीह त्वयीयं दशेति महानयं परमान्यायं यथा तथा ग्रसत इति वा । प्रपन्नापदविमोचनं महानयं महान्यायोपेतमतो मां परिमोचयेति वा ।। ६ ।।

सुमनोरञ्जनी — स नन्दः । प्रपन्नं शरणागतं सर्पास्यप्रपन्नं वा ।। ६ ।।

तस्य चाक्रन्दितं श्रुत्वा गोपालाः सहसोत्थिताः ।
ग्रस्तं च दृष्ट्वा सम्भ्रान्ताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥

सत्यधर्मीया — तस्य नन्दस्य: । ग्रस्तमहिना । दृष्ट्वा चोल्मुकैर्विव्यधुरताडयन् ॥ ७ ॥

अलातैर्हन्यमानोऽपि नामुञ्चत् तमुरङ्गमः ।
तमस्पृशत् पदाऽभ्येत्य भगवान् सात्वतां पतिः ॥ ८ ॥

सत्यधर्मीया — अनुवादेनैव ग्रन्थकृदुल्मुकपदं स्वयं व्याकरोति ॥ अलातैरिति । उरङ्गमश्छान्दसः । तं नन्दं नामुञ्चन्न तत्याज । तदा सात्वतां पतिस्तमभ्येत्य पदाऽस्पृशत्पस्पर्श ॥ ८ ॥

सुमनोरञ्जनी — विव्यधुः ताडयामासुः ॥ ७,८ ॥

स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ।
भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥ ९ ॥

सत्यधर्मीया — श्रीमान्यः पादस्तस्य स्पर्शेन हतमशुभं शापतो दुर्जन्मप्रापकं कर्म यस्य स संस्तत्सर्पवपुर्हित्वा विद्याधरार्चितं स्वं वपुर्भेजे ॥ ९ ॥

तमपृच्छद् हृषीकेशः प्रणतं समुपस्थितम् ।
दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥ १० ॥

सत्यधर्मीया — दीप्यमानेन वपुषा स्थितम् ॥ १० ॥

सुमनोरञ्जनी — विद्याधरैरर्चितं रूपं देहम् ॥ ९,१० ॥

को भवान् परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ।
कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥ ११ ॥

सत्यधर्मीया — लक्ष्मीः शोभा । गतिं योनिम् । अद्भुतदर्शनः परया लक्ष्म्या रोचते ॥ ११ ॥

सुमनोरञ्जनी — जुगुप्सितां निन्दिताम् । एतां सर्पलक्षणां गतिं जन्म ॥ ११ ॥

सर्प उवाच—

अहं विद्याधरः कश्चित् सुदर्शन इति श्रुतः ।
श्रिया स्वरूपसम्पत्त्या विमानेनाचरन् दिशः ॥ १२ ॥

सत्यधर्मीया — को भवानिति भगवता पृष्ट आहाहिरित्याह ॥ सर्प इति । अहं प्राक् सुदर्शन इति श्रुतः प्रसिद्धो विद्याधरः कश्चिदिति । यद्यपि श्रुतोयुक्तमिवाभाति तथाऽपि दर्पायातसर्पत्वः प्रागिति स्वाहन्ताशान्तिं प्रदर्शयितुं कश्चिदिति वदन्विपश्चिदिति मन्तव्यम् । श्रिया सम्पदा स्वरूपसम्पत्त्या सौन्दर्यातिशयेन विमानेन व्योमयानेन दिश आचरन् सञ्चरन् ॥ १२ ॥

ऋषीन् विरूपानङ्गिरसः प्राहसं रूपदर्पितः ।
तैरिमां प्रापितो योनिं प्रलब्धः स्वेन पाप्मना ॥ १३ ॥

सत्यधर्मीया — विरूपांस्तपसाऽङ्गिरसस्तन्नामकान्नृषीन् रूपदर्पितः सौन्दर्यसञ्जातदर्पोऽहसं अहोऽमीषां रूपमिति । स्वेन पाप्मनैतदनर्थसाधनेन प्रलब्धो वञ्चितोऽहं तैरङ्गिरोभिरिमां सर्पयोनिं प्रापितो विकृताकृतिमतः स्वान्दृष्ट्वाऽहसदसाधुरिति कर्णविकलगूढपत्वादिविकृतिमदहिताप्रापणं समुचितमिति तथा शापं कोपादयूयुजन्निति भावः । कश्चिदितिवदृषींस्तैरित्यादिबहुवचनभावो विभाव्यः । (मुनिषु गौरवं सूचयति बहुवचनप्रयोगेण विद्याधर इति भावः) एतदुदंचकसञ्चित-कर्मवञ्चित इमां दशां प्रापितस्तैरिति भावः ॥ १३ ॥

शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ।
यदहं लोकगुरुणा पादस्पृष्टो हताशुभः ॥ १४ ॥

सत्यधर्मीया — शापो यस्तैः करुणात्मभिः कृतः समनुग्रहायैव । कुतोऽनुग्रह इत्यत आह ॥ यदिति । लोकगुरुणा त्वया पादेन स्पृष्टो हतमहिताप्रापकमशुभं यस्य स जातो यदतोऽनुग्रहाय कृत इत्यन्वयः ॥ १४ ॥

सुमनोरञ्जनी — विरूपान् सौन्दर्यरहितान् । रूपं स्वभावे सौन्दर्ये चेत्यभिधानात् । प्राहसं अपहासं कृतवान् । पाप्मना पापेन । प्रलब्धः वञ्चितः ॥ १३,१४ ॥

तं त्वाऽहं भवभीतानां प्रपन्नानां भयापहम् ।
आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥ १५ ॥

सत्यधर्मीया — हे अमीवहन् । पीवमीवेति मीवतेर्घञि नञ्समासे नलोपो नञ इति नलोपे चामीवमिति रूपम् । काश्यर्प्रदत्वाद्दुःखममीवशब्देनोच्यत इति भावः । डुमिञ् प्रक्षेपे मीङ् हिंसायामित्यस्माद्वा धातोः शेवायह्वजिह्वाग्रीवाप्वमीवा इति स्त्रियामुणादिसूत्रवृत्तौ निपातितो बाहुलकाल्लिङ्गान्तरेऽप्यस्तीति तस्य वेदं रूपम् । यथोक्तं भागवत एव । यस्याखिलामीव हतिरिति ।

अमीवह वास्तोष्पत इत्येतत्परभाष्ये अमः रोग इत्यस्माद्ध ईट्चेति व्याख्यातत्वादमीवं रोगं वेति वा । अमीवा दु:खं तं हन्तीति स तथा तत्सम्बुद्धिः । भवभीतानां संसारभीतिमतां प्रपन्नानां जनानां तद्भयापहं तं त्वां पादस्पर्शात्पापनिर्मुक्तोऽहमापृच्छे । आङि पृच्छयामित्यात्मनेपदता । गन्तुमाज्ञां प्रार्थये ॥ १५ ॥

सुमनोरञ्जनी — आपृच्छे प्रार्थये । अमीवहन् दोषनाशन ॥ १५ ॥

प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ।
अनुजानीहि मां कृष्ण सर्वलोकेश्वरेश्वर ॥ १६ ॥

सत्यधर्मीया — अनुजानीह्यनुज्ञां देहि ॥ १६ ॥

सुमनोरञ्जनी — अनुजानीहि आज्ञापय ॥ १६ ॥

ब्रह्मदण्डाद् विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनात् ।
यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ।
सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ १७ ॥

सत्यधर्मीया — हे अच्युत! ते दर्शनात्सद्यस्तत्क्षणं यन्नाम गृह्णंश्चाखिलान् श्रोतॄनात्मानं पुनाति हि यतस्तस्य ते पदा स्पृष्टोऽहं ब्रह्मदण्डाद्विमुक्त इति भूयो महत्किं न महदित्यर्थः । हे अच्युत ते दर्शनमतति गच्छति प्राप्नोतीति सः सद्यो विमुक्तो भवति यथा पूर्वमुर्वरितम् ॥ १७ ॥

श्रीशुक उवाच—

इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवाद्य च ।
सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥ १८ ॥

सत्यधर्मीया — दाशार्हं कृष्णमनुज्ञाप्यानुज्ञाप्रदानोन्मुखं कृत्वा परिक्रम्य तथाऽभिवाद्य सुदर्शनो विद्याधरो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥ १८ ॥

सुमनोरञ्जनी — यस्य नाम गृह्णन्नुच्चरन् पुरुषः । तस्य ते ॥ १७,१८ ॥

निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ।
समाप्य तस्मिन् नियमं पुनर्व्रजं नृपाययुस्तत् कथयन्त आदृताः ॥ १९ ॥

सत्यधर्मीया — तदात्मवैभवं तत्स्वरूपभूतं माहात्म्यं व्रजौकसो निशाम्य दृष्ट्वा तस्मिन्सरस्वतीतीरे नियमं व्रतदीक्षां समाप्य तद्वैभवमादृताः कथयन्तः सन्तः पुनर्व्रजमाययुः ॥ १९ ॥

कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः ।
विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषिताम् ॥ २० ॥

सत्यधर्मीया — वने तत्रापि रात्र्यां व्रजयोषितां मध्यगौ विजह्रतुः ॥ २० ॥

सुमनोरञ्जनी — निशाम्य दृष्ट्वा ॥ १९,२० ॥

उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ।
स्वलङ्कृतानुलिप्ताङ्गौ स्रग्विणौ विरजाम्बरौ ॥ २१ ॥

सत्यधर्मीया — स्वलङ्कृतान्यनुलिप्तानि गन्धादिना चाङ्गानि ययोस्तौ । विरजोऽम्बराविति सरलः पाठः । विरजाम्बराविति गतम् ॥ २१ ॥

सुमनोरञ्जनी — विरजाम्बरौ निर्मलवस्त्रौ ॥ २१ ॥

निशामुखं मानयन्तावुदितोडुपतारकम् ।
मल्लिकागन्धमत्तालिजुष्टं कुमुदवायुना ॥ २२ ॥

सत्यधर्मीया — मल्लिकागन्धेन मत्ता अलयो भृङ्गास्तैर्जुष्टम् । जुष्टमिति शब्दानुशासनमित्यत्रत्य-शब्दशब्दवदुत्कृष्टं कुमुदवायुनेत्यनेनाप्यन्वेति । यद्वा मल्लिकागन्धेन मत्ता अलयो यस्मिंस्तदिति निशामुखविशेषणम् । जुष्टमिति वायुमात्रान्वयीति । उदित उडुपश्चन्द्रस्तारका नक्षत्राणि च यस्मिं-स्तन्निशामुखं प्रदोषं मानयन्तौ विजह्रतुरित्यतीतेनान्वयः । जगतुरित्युत्तरेण वाऽन्वयः ॥ २२ ॥

सुमनोरञ्जनी — कुमुदवायुना जुष्टम् ॥ २२ ॥

जगतुः सर्वभूतानां मनःश्रवणमङ्गलम् ।
तौ कल्पयन्तौ युगपत् स्वरमण्डलमूर्च्छनाम् ॥ २३ ॥

सत्यधर्मीया — तौ युगपत्स्वरमण्डलस्य सप्तस्वरसङ्घस्य मूर्छनां कल्पयन्तौ । सा च सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्छना इति भरतभारत्या ज्ञेया । कल्पयन्तौ सर्वभूतानां मनः श्रवणमङ्गलं यथा तथा जगतुः ॥ २३ ॥

सुमनोरञ्जनी — स्वरमण्डलस्य मूर्च्छनां एकविंशतिसंख्याकां कल्पयन्तौ जगतुः गानं चक्रतुः ॥

गोप्यस्तद्गीतमाकर्ण्य मूर्च्छिता नाविदन् नृप ।
श्लथद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २४ ॥

सत्यधर्मीया — तन्मूर्छनासहितं गीतमाकर्ण्य मूर्छिता मोहं प्राप्तास्तथा श्लथन्ति दुकूलानि यस्मात्स तं तथा स्रस्ताः केशाः स्रजश्च यस्मात्तं चात्मानं नाविदन्न व्यजानन् ॥ २४ ॥

एवं विक्रीडतोः स्वैरं गायतोः सम्प्रमत्तवत् ।
शङ्खचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २५ ॥

सत्यधर्मीया — सम्प्रमत्ताविव सम्प्रमत्तवत्क्रीडतोः सतोः शङ्खचूड इति ख्यातः कुबेर-भृत्योऽभ्यगात् ॥ २५ ॥

सुमनोरञ्जनी — आत्मानं स्वदेहम् । नाविदन् नाजानन् ॥ २४,२५ ॥

तयोर्निरीक्षतोरेव तन्नाथं प्रमदाजनम् ।
क्रोशन्तं कालयामास दिश्युदीच्यामशङ्कितः ॥ २६ ॥

सत्यधर्मीया — निरीक्षतोः निरीक्ष्यमाणयोस्तन्नाथं तौ नाथौ यस्य तं प्रमदाजनमुदीच्यां दिशि क्रोशन्तं कालयामास व्यद्रावयत् । स्वस्वामिस्वाम्यं यत्र तदुदीच्यामिति सम्भवि । अशङ्कितो निःसंशयः ॥ २६ ॥

सुमनोरञ्जनी — तावेव नाथौ यस्य सः तन्नाथः । कालयामास बलात्कारेण नेतुं चकर्षेति ॥ २६ ॥

क्रोशन्तं कृष्ण रामेति विलोक्य स्वपरिग्रहम् ।
यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥ २७ ॥

सत्यधर्मीया — स्वपरिग्रहं स्वस्त्रीजनं यथा दस्युना हिंसकेन व्याघ्रादिना ग्रस्ता गास्तथा शङ्खचूडान्मोचयितुं भ्रातरावन्वधावताम् । दस्यू तस्करशार्दूलाविति यादवः ॥ २७ ॥

सुमनोरञ्जनी — दस्युना तस्करेण व्याघ्रेण वा ग्रस्ताः गाः प्रति यथा तथा ॥ २७ ॥

मा भैष्टेत्यभयारावौ तालहस्तौ मनस्विनौ ।
आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥ २८ ॥

सत्यधर्मीया — तालो वाद्यविशेषस्तृणराजो वा हस्तयोर्ययोस्तौ । तं तरसा बलेन त्वरितं शीघ्रं गुह्यकाधममासेदतुः । तरो बले च वेगे चेति विश्वः ॥ २८ ॥

सुमनोरञ्जनी — मा भैष्ट, भीताः मा भवन्तु, भवतत्यभयशब्दवन्तौ । तालवृक्षावेव हस्तयोर्ययोस्तौ ॥ २८ ॥

स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ।
विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवनेच्छया ॥ २९ ॥

सत्यधर्मीया — कालश्च मृत्युश्च ताविव । अकालमृत्युश्चेत्कथञ्चिन्मन्थरयितुं शक्योऽयं न तथेति कथयति ॥ कालमृत्यू इवेति । काले प्राप्तौ मृत्यू इवानुप्राप्तौ । शङ्खचूड उद्विजन् स्त्रीजनं विसृज्य मूढः परिहाराचतुरं स्वं न विद्वानिति मूर्खो जीवनेच्छया प्राद्रवत् ॥ २९ ॥

सुमनोरञ्जनी — कालो यमः मृत्युदेवता । काले प्राप्तौ मृत्यू इवेति वा । प्राप्तौ तौ रामकृष्णौ समीक्ष्य । उद्विजन् बिभ्यन् ॥ २९ ॥

तमन्वधावद् गोविन्दो यत्र यत्र स धावति ।
जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥ ३० ॥

सत्यधर्मीया — यत्र यत्र स धावति तत्र तत्र गोविन्दस्तमन्वधावत् । शिरोरत्नं जिहीर्षुः शिरश्च तत्रत्यं रत्नं चेति वा । बलः स्त्रियो रक्षंस्तस्थौ ॥ ३० ॥

इवाविदूर अभ्येत्य शिरस्तस्य दुरात्मनः ।
जहार मुष्टिनैवाङ्ग सहचूडामणिं विभुः ॥ ३१ ॥

सत्यधर्मीया — इवाविदूरेऽल्पसमीपेऽभ्येत्य तस्य दुरात्मनः शिरो मुष्टिनैव सहचूडामणिम् । नायममन्तः किन्तु बिन्द्वन्तः । अशनायां हि मृत्युः सर्वाशननेतेत्यर्थे बिन्दुरिति बृहद्भाष्योक्तेः । प्रशस्तचूडामणिशिर इत्यन्वयः । यः शिरस्तं सहचूडामणिमिति वाऽन्वयः । निचकर्त शिरान्द्रौणिरित्यादेः । मुष्टिना सहैव जहार मुष्टेर्निःसरणे सह तेन शिर एव निःसृतमिति भावः । न विद्यते मणिर्यस्यां साऽमणिश्चूडा च साऽमणिश्च ताम् । विशेषणस्य परनिपातः । मणिरहितां चूडाम् । विभावयतीति विभुरिति वा । सह चूडामणिप्रभुरिति पाठस्तु निष्प्रयासान्वयः ॥ ३१ ॥

सुमनोरञ्जनी — अविदूर इव समीप इव । सहचूडामणिम् । तस्य शिरो जहार अपहृतवान् ॥ ३०,३१ ॥

शङ्खचूडं निहत्यैव मणिमादाय भासुरम् ।
अग्रजायाददात् प्रीत्या पश्यन्तीनां च योषिताम् ॥ ३२ ॥

इति श्रीमद्भागवते दशमस्कन्धे द्वात्रिंशोऽध्यायः ॥

सत्यधर्मीया — भासुरं मणिमादाय प्रीत्याऽग्रजायाददात् । योषितां पश्यन्तीनां सतीनां ता अनादृत्य ॥ ३२ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे द्वात्रिंशोऽध्यायः ॥ १०-३२ ॥

सुमनोरञ्जनी — अग्रजाय रामाय । प्रीत्या हर्षेण ॥ ३२ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां द्वात्रिंशोऽध्यायः ॥ १०-३२ ॥

॥ अथ त्रयस्त्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ।
कृष्णलीलां प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥ १ ॥

सत्यधर्मीया — गतोदवसितासिताक्ष्यः कथमवसन्ननुभूतप्रभुसङ्गरुचय इत्यत एवं कृष्णकृतक्रीडाः क्रोडीकृत्य परस्परं तत्कीर्तनपरा अनितरप्रत्तावसरा वासराननयन्निति निरूप्यतेऽत्राध्याये । तत्रादौ तत्पारवश्यं दर्शयञ्छुक आहेत्याह ॥ श्रीशुक इति । अनुद्रुतं चेतो यासां ता दुःखेन तद्विरहजं दुःखसहितं च तत्खं च सुखं लीलास्मरणजं च तेन वासरान् एकमहः । बहुवचनं च विरहदहनतो भानं तथेत्यर्थद्योतकम् । दुर्दुःखमिति सम्प्रोक्तं खं सुखं प्रोच्यते बुधैरिति तात्पर्यान्तरोक्तेः । केवलं दुःखमेव चेद्वनितानां तल्लीला स्मृतिः कथं स्यादिति वर्णयन्ति । द्वौ द्वौ श्लोकावेकैकस्या उक्तितया योज्यौ ॥ १ ॥

सुमनोरञ्जनी — वेणुनादं वर्णयितुमयमध्यायः । तं कृष्णम् । अनुद्रुतं अनुसृत्यैव गतं चेतो यासां ताः । वासरान् अहानि ॥ १ ॥

गोप्य ऊचुः—

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ।
कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥

सत्यधर्मीया — सम्मुग्धतया गोप्य ऊचुरिति प्रतिश्रुत्य तत्रैकाऽनेका गोपीः सम्बोध्य वक्तीति वक्ति ॥ वामबाह्विति । शृणुतेति तृतीयश्लोकादाकृष्य हे गोप्यः शृणुतेत्यन्वेतव्यम् । वामो बाहुस्तस्मिन्कृतो वामः सव्य इत्युक्तेर्मनोहर इत्यप्यर्थः । कपोलो यस्य सः । भार्याभागो वाम इति प्रसिद्ध इत्युक्ते रमैव स्वद्वारं द्वारकानायकनायतामित्यादौ तद्भागं पुरस्कृत्यास्तुवन्निति तात्पर्यमवधेयम् । वल्गिते नर्तिते भ्रुवौ यस्य सः । अधरे ओष्ठेऽर्पितो वेणुर्येन सः । वेणुमिति पाठस्तु ललितः । कोमलाभिरङ्गुलिभिः । आश्रितो मार्गो मूर्छनादिमार्गो यस्य तं वेणुं मुकुन्दो यत्र यदा यदेरयति स्वपूरणेन प्रेरयति ॥ २ ॥

सुमनोरञ्जनी — तल्लीलागानप्रकारं प्रदर्शयति ॥ वामेति । तत्र काचित् इतरगोपीः सम्बोधयन्ती इत्याह ॥ हे गोप्यः ! इदं शृणुतेत्याकृष्यते । वामबाहौ कृतं स्थापितमिति यावत् वामकपोलं येन स तथा । वग्लिता नर्तिता भ्रूर्येन स तथा । अधरोष्ठे अर्पितो वेणुर्येन सः । एवंभूतः सन् मुकुन्दः यत्र यदा कोमलैः अङ्गुलिभिः । आश्रिताः आच्छादिताः मार्गाः श्वासनिर्गमरन्ध्राः यस्य तं वेणुं ईरयति गायति ॥ २ ॥

व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ।
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥

सत्यधर्मीया — तदा व्योमयानवनिता विमानोपविष्टा योषित इति केचित् । व्योमयाना दिविषदस्तेषां योषित इत्यपरे । सिद्धैः श्रवणसन्नद्धैः सह विस्मितास्तद्गीतमुपधार्याकर्ण्य काममार्गणैः समर्पितं चित्तं यासां ताः सलज्जाः । अपस्मृतनीव्यो विस्मृतवस्त्रा वा तद्ग्रन्थिमत्यो वा कश्मलं मूर्छादिकं ययुः ॥ ३ ॥

सुमनोरञ्जनी — तदा व्योमयानवनिताः विमानस्थाः स्त्रियः । तद्गीतं उपधार्य श्रुत्वा विस्मिताः । काममार्गणेन समर्पितं संलग्नं चित्तं यासां ताः । काममार्गणेन निमित्तेन समर्पितं श्रीकृष्ण एव संलग्नं चित्तं यासां ता इति वा । अपस्मृता नीवी वस्त्रग्रन्थिर्यासां ताः । मुच्यमानवस्त्रग्रन्थिस्मरणरहिताः । कश्मलं मूर्च्छां ययुरिति सम्बन्धः ॥ ३ ॥

हन्त चित्रमबलाः शृणुतेदं हारभास उरसि स्थितविद्युत् ।
नन्दसूनुरयमार्तजनानां शर्मदो यर्हि कूजितवेणुः ॥ ४ ॥
वृन्दशो व्रजवृषो मृगगावो वेणुवाद्यहृतचेतस एत्य ।
दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥

सत्यधर्मीया — हे अबलाः! हारभासो हारस्य भा यस्य, भा येन तस्य कृष्णस्येदं चित्रं कर्म शृणुतेत्यन्वयः । हन्त हर्षः । हारहास इति पाठे हारवन्मुक्तासरवच्छुभ्रो हासो यस्य स इति नन्दनन्दनविशेषणम् । हारो मुक्तावली, हारो मुक्तावलीत्यमरविश्वौ । स्थिता विद्युत् विशेषेण द्योतमानेति विद्युद्रमा यस्य सः । तत्स्थानमाह ॥ उरसीति । आर्तजनानां शर्मदः सुखदोऽयं नन्दसूनुर्यर्हि यदा कूजितवेणुस्तदा वृन्दशः सङ्घशो व्रजवृषो व्रजेन्द्रो नन्दसूनुरिति वा । मृगा गावश्च वेणुवाद्येन वेणुसम्बन्धिनादनयोग्यस्वरेण हृतं चेतो यासां ता एत्याभ्येत्य । दन्तैर्दष्टः कवलस्तृणग्रासो यासां ताः । धृताः कर्णा याभिरिति तत्स्वभावोक्तिः । निद्रया(निद्रिताः आ)ऽऽनन्दतुन्दिलतया निद्रणं लिखितचित्रं चित्रलिखित-गोकुलमिव निश्चेष्टा आसन् । अत एव तद्विरहं कथं हा(?) सहासह इति सर्वत्रान्वेतव्यम् ॥ ४,५ ॥

सुमनोरञ्जनी — अपरा काचिदाह ॥ हन्तेति । हारेण भासत इति हारभासम् तस्मिन् । उरसि स्थिता, विद्योतत इति विद्युत् श्रीर्यस्यासौ तथाविधो नन्दसूनुः । यर्हि यदा । कूजितवेणुर्भवति ॥ तदा एत्य समेत्य व्रजवृषादयः लिखितचित्रमिव निश्चेष्टा आसन्नित्यन्वयः । धृतकर्णाः निश्चलकर्णाः । दन्तैः दष्टानि कवलानि ग्रासाः यैस्तैस्तथा । निद्रिताः कार्यान्तररहिताः । निद्रिता इव परमानन्द-निर्भराः सन्त इति वा ॥ ४,५ ॥

बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः ।
कर्हिचित् सबल आलि सगोपैर्गाः समाह्वयति यत्र मुकुन्दः ॥ ६ ॥
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ।
स्पृहयतीर्वयमि वाबहुपुण्याः प्रेमवेपितभुजा स्मिमितापाः ॥ ७ ॥

सत्यधर्मीया — भ्रान्तस्वान्तत्वात्कान्तानामनेकत्वेऽप्यालीत्येकवचनमिति मन्तव्यम् । हे आलि सखि बर्हिणो मयूरस्य स्तबकैः पिच्छगुच्छैर्धातुभिर्गैरिकादिभिः पलाशैः पल्लवैर्बद्धो यो मल्लपरिबर्हो मल्लभूषाविशेषस्तं विडम्बयत्यनुकरोति स तथा । बर्हिणस्तबकैरिति समस्तं वा । मयूरो बर्हिणो बर्हीत्यमरः । कर्हिचित्कदाचित्सबलो गोपैः सहितः स यत्र मुकुन्दो वेणुना गाः समाह्वयति तर्हि तदा

भग्ना गतिर्यासां ताः सरित एतद्ध्वनिदन्धनीकृतस्पन्दना वयमिव ता अप्यबहुपुण्याः महासुकृतहीनाः प्रेमवेपितभुजाः प्रेमविशेषकम्पिततरङ्गा अनिलनीतं वायुना नीतं तत्पदयोरम्बुजयो रजः परागं स्पृहयतीः काङ्क्षन्त्यः स्तिमिता आपो यासां ताः स्तिमितापा आसन् । वैशब्दोऽचेतनानां नदीनां यदेयं दशाऽस्माकं केति तद्भावसूचकः । स्तिमितापा इति पाठे समासान्तविधेरनित्यतया स्पृहयतीर्वय-मिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापाः । आमृशन्पयसि वा बहुपुण्याः प्रेमवेपितभुजा हृतवेगा इति वा पाठः । पयसि स्वोदकेऽनिलनीतं तत्पदाम्बुजरज आमृशन्नस्पृशन्नतो बहुपुण्या हृतवेगाः प्रेमवेपितभुजा भग्नगतयो मन्दस्पन्दना आसन्नित्यर्थः ॥ ६,७ ॥

सुमनोरञ्जनी — हे आलि! कर्हिचित् कदाचित् । यत्र यदा यस्मिन्देशे स्थित्वा । गाः समाह्वयति । तर्हि तदा तस्मिन् देशे सरितः तीरे पयसि वा । अनिलनीतं तत्पदांबुजरजः आमृशन् अस्पृशन्नित्यन्वयः । कथंभूतः । बर्हिणः मयूरस्य स्तबकैः पिच्छबन्धविशेषैः, धातुभिः गैरिकादिभिः पलाशैः पल्लवैः बद्धस्य मल्लपरिबर्हस्य मल्लपुरुषश्रेष्ठस्य विडम्बः अनुकारो यस्य स तथा । मयूरो बर्हिणो बर्ही नीलकण्ठो भुजंगभुगित्यमरः । बहूनि अनेकानि पुण्यानि यासां तास्तथा । विपुलानेकयोर्बहुरिति यादवः । प्रेम्णा कामोन्नतस्नेहेन वेपिताः कंपिताः भुजाः तरंगलक्षणाः यासां तास्तथा । अत एव हृतवेगाः मन्दीकृतस्पन्दनलक्षणजवाः । अत एव भग्नगतयः स्तिमितप्रवाहाः आसन्नित्यनुषङ्गः ॥ ६,७ ॥

अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः ।
वनचरो गिरितटेषु चरन्तीर्वेणुनाऽऽह्वयति गाः स यदा हि ॥ ८ ॥
वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ९ ॥

सत्यधर्मीया — अनुचरैर्गोपैर्ब्रह्मादिभिश्च सम्यगनुवर्णितानि वीर्याणि यस्य सः । अचला स्थिरा विभूतिर्लक्ष्मीः सम्पद्वा यस्य सः । वनचरो जलं विजनं च तत्र चरतीति स तथा । आदिपूरुष इव श्रीनारायण इव । गिरितटेषु पर्वतप्रदेशेषु गिरिर्वायुर्मातूक्ताप्राक् स एव तटाः । जातौ बहुवचनम् । तट इयदामननादित्यधिकारिपाररूपस्तस्मिंश्चरतीर्विद्यमाना अन्यत्र तृणादनं कुर्वतीर्गा वेदवाणीरन्यत्र सुरभीराह्वयति स्वप्रतिपादकत्वेन स्वीकरोति परत्राकारयति यदा । अनुचरैः सुग्रीवादिभिरचलभूति-श्चित्रकूटसम्पत्प्रद आदिपूरुष आदिनो रावणाद्यास्तेषां पुरि लङ्कायां पुरे लङ्कायै रुषा रोषो यस्य सः । हलन्तत्वाट्टाबन्तता । पुरे रुषा यस्य स आदिनां पुरुष इति न ऋक्पूरब्ध्वति समासान्ताकारप्रत्यय-प्रसक्तिः । वनचरो यः कपिसङ्घो गिरितटेषु तं विद्यमानमाह्वयति तथेति वा । अचलभूतिः

पर्वतगतविभूतिरूप इति वा कृष्णः । तदा वनलतास्तरवश्चात्मनि स्वान्तस्थितं व्यञ्जयन्तो व्यक्तीकुर्वन्त इव पुष्पफलैराढ्याः प्रणतम् क्तो भावे प्रणतिं बिभ्रतीति ते विटपाः शाखा येषां ते । प्रेमहृष्टतनवो भक्ता आनन्दोदबिन्दूनिव मधुधारा रसप्रसरान्ससृजुः स्मेत्याश्चर्ये ॥ ८,९ ॥

सुमनोरञ्जनी — अन्या काचिदाह ॥ आदिपूरुष इव मूलरूपी विष्णुरिव । अनुचरैः, सम्यगनुवर्णितं वीर्यं पराक्रमो यस्य सः । अन्यत्रानुचराः सनकादयः । अचलभूतिः स्थिरश्रीः । भूतिश्रीजन्मभस्मस्विति यादवः । एवंभूतो वनचरः स कृष्णः । यदा वेणुना वेणुस्वरेण गाः समाह्वयति तदा वने विद्यमाना लतास्तरवश्च पुष्पफलाढ्याः सन्तः । केषाञ्चिदशोकप्रमुखानां गीतात् पुष्पफलावाप्तिर्भवति । अत एव प्रणतभारविटपाः भारनम्रशाखाः मधुधाराः ससृजुः । तत्र हेतुः । प्रेमहृष्टतनव इति । तत्र दृष्टान्तः ॥ आत्मनि विष्णुं व्यंजयन्त इति । आत्मनि स्वहृदये । विष्णुं व्यंजयन्तः अपरोक्षीकृतवन्तो ज्ञानिन इवेति । अपरोक्षीकृतबिम्बाः प्रेमहृष्टतनवः सन्तो आनन्द-जलधारां विसृजन्ति यथा तथेति ॥ ८,९ ॥

दर्शनीय (तिलको वनमाला) विकचोत्पलमालादिव्यगन्धतुलसीमधुमत्तैः ।
अलिकुलैरलघुगीतमभीष्टमाद्रियद् यर्हि सन्धितवेणुः ॥ १० ॥

सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ।
हरिमुपासत ते यतचित्ता हन्त मीलितदृशो धृतमौनाः ॥ ११ ॥

सत्यधर्मीया — यर्हि यदा सन्धितो वेणुरधरे येन सः । दर्शनीयतिलको दर्शनीयस्तिलकोऽलिके यस्य स दर्शनीयेषु सुन्दरेषु तिलको मुख्य इति वा वनमालाया दिव्यगन्धेन तथा तुलस्या मधुना च मत्तैः । दर्शनीयानि विकचानि विकसितान्युत्पलान्यस्मत्कचसम्बन्धरहितानीति तेषां मालाया इतरत्समम् । अलिकुलैर्भृङ्गसङ्घैरभीष्टं स्वाभीप्सितमलघु गम्भीरं गीतमाद्रियच्चार्चिचत् तदा सरसि सारसाश्च हंसाश्चेत्येतदादयो विहङ्गाश्चारु यद्गीतं तेन हृतं चेतो येषां ते सन्त एत्य समेत्य यतचित्ता धृतमौना मीलितदृशो हरिमुपासत हन्तेदं चित्रम् ॥ १०,११ ॥

सुमनोरञ्जनी — यर्हि यदा सन्धितवेणुः स्वरेणेति शेषः । कृष्णः, दर्शनीयायाः चक्षुः-प्रियायाः । विकचैः उत्पलैः नीलोत्पलैः कृतायाः मालायाः दिव्यगन्धायाः अमानुषपरिमल-तुलस्याश्च मधुना पीतेन मत्तैः अलिकुलैः अभीष्टं गातुमुपक्रान्तम् । अलघु गम्भीरं गीतम् । आद्रियत् अर्चितम् । आदृतौ सादरार्चिताविति च । तदा सरसि विहरन्तो ये सारसहंसविहङ्गाः ते पक्षिणः एत्य सम्भूय । चारुणा गीतेन हृतचेतसः आकृष्टबुद्धयः । अत एव यतचित्ताः एकाग्रकृतमानसाः अर्धनिमीलितनेत्राः धृतमौनाः स्वजातिस्वररहिताः हरिमुपासतेत्यन्वयः ॥ १०,११ ॥

सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ।
आह्वयद् यर्हि वेणुरवेण जातहर्ष उपरम्भति विश्वम् ॥ १२ ॥

महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ।
सुहृदमभ्यवर्षत् सुमनोभिश्छायया च विदधे वितपत्रम् ॥ १३ ॥

सत्यधर्मीया — हे व्रजदेव्यो गोप्यः! सहबलो बलरामसहितः । स्रगवतंसविलासः स्रजावतंसेन कर्णोत्पलेन च विलासो यस्य स क्षितिभृतो भूभृतः सानुषु प्रस्थेषु स्थितो जातहर्ष इव जातश्च गा आह्वयत् । साधनभभिधत्ते ॥ वेणुरवेणेति । तदा च विश्वं चेतनमात्रमुपरम्भत्युत्तानाननं करोति । उपरम्भस्तूर्ध्वमुखे प्रक्रमे निर्वृते तथेति वचनात् । उपरम्भति नादेन पूरयतीत्यपरे । तदा बलाहका अपि धाटीमिमामाटीकमानाः काञ्चन सेवां देवस्याकुर्वन्नित्याह ॥ महदिति । महता स्वस्वरेणाति-क्रमणमुल्लङ्घनं तेन शङ्कितं चेतो यस्य स सन् मन्दं मन्दं मेघोऽनुगर्जति । अनु मुरलीस्वरानुसारि यथा तथा गर्जति । सुमनोभिः । उपमानवाचकपदादुपमेयं लक्ष्यते । कुसुमसमजलबिन्दुभिरनिमित्त-विश्वोपकारादनुकाराच्च वर्णेन सुहृदं कृष्णमभ्यवर्षत् । किञ्च स्वच्छायया वितपत्रं प्रतपत्रं विदधे सितपत्रमिति त्रयः पाठाः । तत्र द्वौ वितपात्प्रतपादातपात्त्रायत इत्येकार्थौ । अवेः सूर्यस्य तपात्त्रायत इति वा । तृतीये सितपत्रं श्वेतच्छत्रमित्यर्थः । विदधेऽकरोत् ॥ १२,१३ ॥

सुमनोरञ्जनी — हे व्रजदेव्यः ! बलेन सहितः । स्रजा मालयाऽवतंसेन कर्णोत्पलेन च विलासः कान्तिविशेषो यस्य स तथा । यद्वा स्रगवतंसयोर्विलासो शोभा यस्मात्स तथा । आत्मशोभाजनकत्वेन धृतयोः स्रगवतंसयोः शोभाजनक इत्यर्थः । क्षितिभृतो गिरेः सानुषु शिखरेषु स्थितः । लोकदृष्ट्या तदानीं जातहर्षः आविष्कृतानन्दविशेषः कृष्णो यर्हि यदा वेणुरवेण आह्वयत् । गा इति शेषः । विश्वं देहमाविश्य वर्तमानं प्राणिजातम् । उपरम्भति ऊर्ध्वमुखीकरोति आह्वयति वा नूतनं कर्तुमुपक्रमते वा । उपरम्भस्तूर्ध्वमुखे प्रक्रमे निर्वृते तथेति च । तदा मेघः, महतो हरेरुच्चैः गर्जनेन । कर्णबाधिर्यजन-कातिक्रमणमतिलङ्घनं स्यादिति शङ्कितमनाः । मन्दं मन्दम्, अनु वेणुरवानुकूलं यथा भवति तथा गर्जति । किं च सुमनोभिः पुष्पसदृशजलबिन्दुभिः । श्यामवर्णसाम्यात्सुहृदं मित्रम् । अभ्यवर्षत् । किञ्च छायया । वितपत्रं वितपात् त्रायत इति वितपत्रम् । विदधे च । हरेरिति शेषः । सितपत्रमिति पाठे श्वेतच्छत्रमित्यर्थः । वेणुरवेण व्रजदेवीराह्वयदिति वा ॥ १२,१३ ॥

विविधगोपचरणेषु विदग्धो वेणुवाद्यमधुरां निजशिक्षाम् ।
तव सुतः सति यदाऽधरबिम्बे दत्तवेणुरनयत् स्वरजातीः ॥ १४ ॥

सुमनसस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ।
कवय आनतकन्धरगात्राः विस्मयं ययुरनिश्चिततत्त्वाः ।। १५ ।।

सत्यधर्मीया — तत्र गजयात्रां काश्चित्काचिद्यशोदां विधाय सूत्वा त्वं सुतमेतमस्मदसुहरणं कृतवत्यसि सौभाग्यवति हेति मनसा कल्पयित्वा वदतीति वक्ति ।। विविधेति । तस्याश्वस्रा एतत्कूटघटने रसाभासप्राप्तेः पाक्षिक्यामागतावित्यवददिति वेति केऽपि । सति यशोदे! विविधानां गवां गीतध्वनीनां पतयो हि गन्धर्वास्ततोऽपि चरणेषूत्तरानुत्तरीकृतिषु विदग्धः कुशलः । विविधानि गोपो गोपनं तदुपयुक्तानि चरणान्युपायरचनानि तेषु विदग्ध इति । वेणुवाद्ये माधुर्यावहामिति वेणुमधुरतां निजशिक्षां स्वयं कल्पिता नेतरजल्पिता तां शिक्षां तव सुतो यदाऽधरबिम्बे तन्मण्डले तत्सावर्ण्याद्बिम्बफले वा दत्तः स्थापितो वेणुर्येन स सन् स्वरजातीर्निषादादिस्वरजातीश्चानयत्प्रापयत् । अजातीरतद्योग्यजातिमतीः प्रजाः स्वः स्वर्गमनयदिति वा । तदा तद्गानं सुमनसः शुद्धमानसा देव्यो वा तथा सुरेशाः, शक्र इन्द्रः, शर्वः शिवः, परमेष्ठी प्रजापतिरित्येते पुरोगा येषां ते तथा ।

नन्वत्र नोत्तमक्रमोऽधमक्रमः कुत इति चेत् । सत्यम् । कश्मलोपगमस्तथा तत्त्वानिश्चय-श्चेतरा(रसुरा)सुरापेक्षया सहस्राक्षे तदपेक्षया त्र्यक्षे तदपेक्षया ब्रह्मणि च तरतमतया वर्तत इति द्योतनायैवं वचनमित्यवेहि । स्वराकर्णनक्रम एव इत्येवमुक्तिरिति वा । हस्ताभ्यां तद्ग्रहोऽनन्तरं गानमनःकरणं तदुपरि स्वरवेदं गर्भीकृत्य सरस्वतीविलास इति वा शक्रशर्वपरमेष्ठिपुरस्कार इति । कवयो गानगतिज्ञा इति कवयः(?) प्रकृतानुकूल्यात् । एतादृशा अप्यनिश्चितं तत्त्वं स्वरस्तालोऽयमियं स्वरमूर्छना चेयं विषमेति यैस्ते तथा । अनवधानेन तथेति नेति कथयति ।। आनतकन्धरगात्रा इति । आनता कन्धरा ग्रीवा येषां तानि गात्राणि येषां तेऽप्युपधार्याकर्ण्य कश्मलं मोहं ययुः । अतो न कन्धराबाध इति ज्ञेयम् । कन्धरा वारिवाहे स्याद्ग्रीवायामपि कन्धरेति विश्वः ।। १४,१५ ।।

सुमनोरञ्जनी — यशोदान्तिक आहुः । हे सति यशोदे ! विविधेषु गोपानां चरणेषु वेणुगानाद्याचरणेषु विदग्धः पण्डितः । वेणुवाद्ये विषये मधुरां मनोहराम् । निजानां आत्मीयानां गोपानां शिक्षां गानकलाशिक्षामुद्दिश्य । अधरबिम्बे बिम्बफलवद्विद्यमानाधरोष्ठे । दत्तवेणुः सन् । तव सुतः स्वरजातीः षड्जादिस्वरभेदान् । अनयत् आनयामास । तदा सुमनसः कवयोऽपि गानकला-कुशला अपि । अनिश्चिततत्वाः । इदं गानमस्मदाकलितेष्वेवंजातीयमिति तत्वज्ञानहीनाः सन्तः । कश्मलं मोहं मनोव्याकुलतां ययुरित्यन्वयः ।। १४,१५ ।।

निजपदाब्जदलैर्ध्वजवज्रनीरजाङ्कुशविचित्रललामैः ।
व्रजभुवः प्रशमयन् खुरतोदं वर्ष्म धुर्यगतिरीरितवेणुः ।। १६ ।।

व्रजमितेन वयं सविलासवीक्षणार्पितमनोभववेगाः ।
व्रजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १७ ॥

सत्यधर्मीया — यदा धुर्यगतिर्वृषभगमनः । व्रजभुवो व्रजभूमेः खुरतोदं गवादिखरखुर-जनितव्यथाम् । ध्वजो वज्रो नीरजं चाङ्कुशश्चेत्येतदादीनि विचित्राणि ललामानि चिह्नानि येषां तानि तैः । वज्रेति । वा पदान्तस्त्वसौ वक्त्र इत्युक्तेः वज्रस्य पदान्तिमवर्णत्वान्न लाघवमिति पूर्वत्रोत्तरत्र ज्ञेयम् । ललामोऽस्त्री ध्वजे श्रेष्ठे भूषायां पुण्ड्रचिन्हयोरिति च । ललाम च ललामं च लाञ्छनध्वज-वाजिषु । शृङ्गे प्रधाने भूषायां रम्ये वालन्धिपुण्ड्रयोरिति विश्वः । निजपदाब्जयोर्दलैरङ्गुलिरूपैः शमयन्नीरितवेणुर्भवति तदा तेन व्रजमितेन प्राप्तेन । वयं, सविलासं विलाससहितं यद्वीक्षणं निरीक्षणं विलाससहितं यथा तथेति वा यद्वीक्षणं तेनैवार्पितो यो मनोभवस्तस्य वेग उद्रेको यासां ताः । ब्रह्मरात्र उपावृत्त इत्युक्तरीत्या व्रजगतिं तद्रूपं मन्दिरम् । तेन गमिताः । कश्मलेन विरहप्रवहन्मोहेन वसनं वस्त्रं कबरं केशवेषं वर्ष्मास्मिच्छरीरमिदमिति च न विदामः । कश्मलः स्यात्पिपासा च कश्मलो मोह एव चेत्यनेकार्थध्वनिपदमञ्जरी । वर्ष्मणा कायेन धुर्यो महान्गजो वा वृषभो वा तद्वद्गतिर्यस्य स इति तत्रैवान्वयो वा ॥ १६,१७ ॥

सुमनोरञ्जनी — निजपदाब्जदलैः अङ्गुलीलक्षणैः ध्वजादिचिन्हैश्च । व्रजभुवः खुरतोदं गवां खुरनिष्पातव्यथाम् । प्रशमयन् । वर्ष्मणा महता शरीरेण युक्तो धुर्यो वृषभस्तस्य गतिरिव गतिर्यस्य स वर्ष्मधुर्यगतिः । यद्वा वर्ष्मधुर्यो गजः तद्गतिः । यदा ईरितवेणुः शब्दितवेणुः यः कृष्णः । तेन पुनः सन्ध्याकाले । व्रजमितेन प्राप्तेन । सविलासवीक्षणेन अर्पितो यो मनोभवः कामः तस्य वेगो यासां ताः । व्रजगतिं गोष्टस्थानम् । प्रापिताः वयं कश्मलेन मनोऽनवस्थालक्षणेन मोहेन, स्रुतं कबरं केशभारम् । वसनं वस्त्रं स्थितिं वा न विदाम इत्यन्वयः ॥ कुजगतिमिति पाठे स्थावरस्वभावमित्यर्थः ॥ १७ ॥

मणिधरः क्वचिदागमयन् गा मालया दयितगन्धतुलस्या ।
प्रणयिनोऽनुचरस्य कदांऽसे प्रक्षिपन् भुजमगायत यत्र ॥ १८ ॥
क्वणितवेणुमुप वञ्चितचित्ताः कृष्णमीयुरनु कृष्णगृहिण्यः ।
गुणगणार्णमनुगम्य हरिण्यो गोपिका इव विमुक्तगृहेशाः ॥ १९ ॥

सत्यधर्मीया — यत्र देशे कदा कदाचिन्मणिधरः कौस्तुभधारी क्वचित्स्थलविशेषे गा आगम-यन्नावर्तयन् । दयितो गन्धो यस्यां सा तुलसी यस्यां सा तया मालया युतः । षष्ठीपाठेऽपि दयितगन्धतुलस्या मालयेत्यन्वयः । प्रणयिनः स्नेहपात्रस्यानुचरस्य भृत्यस्यांसे स्कन्धे भुजं स्वं

प्रक्षिपन्नगायत । तदा क्वणितो ध्वनितो वेणुर्येन तम् । गुणगणार्णं गुणगणसमुद्रं कृष्णं, विमुक्ताः परित्यक्ता गृहेशाः पतयो याभिस्ताः । कृष्णस्य गृहिण्यो भार्या वयमिव, गोपिका गावश्च पिकाश्च त इव हरिण्यो हरिणतरुण्यो वञ्चितचित्ता अनुगम्योपान्वीयुरुपासत । गोपिका अनुगम्येवान्वीयुरिति वाऽन्वयः । अनेन कृष्णगृहिण्य इत्यनेन हरिणीत्वलाभाद्धरिण्य इत्यतिरिक्तं विपर्ययो वेति परास्तम् । नारायणं निखिलपूर्णगुणार्णमित्यृग्भाष्यटीकाटिप्पणेषु तद्धिता इति बहुवचनज्ञापितो मत्वर्थे ड इत्यतिविशदमुक्तेरयमर्णः समुद्रवाच्यर्णशब्द इति मन्तव्यम् । अर्णं वारिणि च प्रोक्तमर्णं स्यादक्षरेऽपि चेति विश्वः ॥ १८,१९ ॥

सुमनोरञ्जनी — मणिधरः कौस्तुभरत्नधारी । दयितगन्धा प्राणप्रियगन्धा तुलसी यस्यां सा तथा । तया मालयोपलक्षितः । प्रणयिनः स्निग्धतमस्यानुवर्तमानस्य कस्यचिद्गोपस्य । अंसे भुजशिरसि । भुजं प्रक्षिपन् निदधानो गाः आगमयन् वनाद्व्रजमावर्तयन् कृष्णः, कदाचित् कस्मिंश्चित्काले । यत्र यस्मिन् वने । अगायत् ॥

तदा वञ्चितचित्ताः प्रलोभितान्तःकरणाः । कृष्णगृहिण्यः कृष्णमृगपरिग्रहभूताः हरिण्यः । गुणगणार्णं क्वणितवेणुं कृष्णमनुगम्य उपान्वीयुः । का इव । मुक्तगृहेशाः परित्यक्तनिजपतयः । उभयत्र समानं, गोपिकाः गोपांगना इव । अन्यत्र गोपनशीला इव ॥ १८,१९ ॥

कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥ २० ॥

मन्दवायुरुपवात्यनुकूलं मानयन् मलयजस्पर्शेन ।
बन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥

सत्यधर्मीया — हे अनघे! यदा कुन्ददाम्ना धृतकुन्दमालया कृतं कौतुकमुत्सवो यस्य स वेषो यस्य सः । गतम् । कौतुकेन वेषो यस्येति वा । सुमनसस्तदुपधार्येत्यारभ्यैकोनविंशश्लोकपर्यन्तं यशोदां लक्ष्यीकृत्योक्तिरिति स्फोरयितुं पुनरनुक्तौ बहुसंविधानसापेक्षतया चेतश्चाञ्चल्यं स्यादिति नन्दसूनुरनघ इत्युक्तिरिति ज्ञेयम् । गोपैर्गोधनैश्च वृतो नन्दसूनुरित्युक्तावुदरान्तरज इति स्यादिति तव वत्स इत्युक्तिः । न धर्मादयः कुन्तीसूनव इवायमिति बोधयितुं नन्दसूनुरिति । प्रणयिनां नर्मदो विनोदजनितानन्ददो यमुनायां विजहार चिक्रीड । मलयजस्पर्शेन चन्दनपरागदानेन कृष्णं मानयन्ननुकूलं यथा तथा मन्दवायुरुपवाति वीजयति । ये उपदेवगणा गन्धर्वसङ्घास्ते बन्दिनः स्तुतिपाठका इव वाद्यैर्गीतैर्बलिभिः सह परिवव्रुः । एवं महापुण्यवती त्वमिति सूचयन्त्यनघ इत्यनेनेति मन्तव्यम् ॥ २०,२१ ॥

सुमनोरञ्जनी — हे अनघे यशोदे! कुन्ददाम्ना कुन्दपुष्पमालया कृतः कौतुकवेषो, विवाहकाले वरस्य हस्ते यत्सूत्रं बध्यते तत्कौतुकं, तद्विशिष्टो वेषो यस्य सः कुन्ददामकृतकौतुकवेषः कौतुकं विषयाभेदे हस्तसूत्रे कुतूहल इति यादवः । प्रणयिनां नर्मदः लीलावचनेनानन्ददः । तव वत्सः बालः नन्दसूनुः यदा यमुनायां विजहार । तदा मलयजस्पर्शेन चन्दनगन्धदानेन । कृष्णं मानयन् वायुर्यथाऽनुकूलो भवति तथा मन्दं मन्दं उपवाति वीजयतीत्यन्वयः । किञ्च तदा ये उपदेवगणाः देवसमीपे वर्तमानाः गन्धर्वाः बन्दिनो वंदमानाः यद्वा मङ्गलपाठकाश्च । वाद्येन गीतेन बलिना उपहारेण च । तं कृष्णं परिवव्रुः ॥ २०,२१ ॥

वत्सलो व्रजगवां यदगाधो वन्द्यमानचरणः पथि वृद्धैः ।
कृत्स्नगोधनमपोह्य दिनान्ते गीतवेणुरनुगोद्धृतकीर्तिः ॥ २२ ॥

उत्सवं श्रममपोह्य दृशीनामुद्वहन् खुररजश्छुरितस्रक् ।
दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥

सत्यधर्मीया — व्रजगवां व्रजजनानां गवां च विषये वत्सलः स्निग्धो, यद्यतोऽगाधोऽनितरालोड्यः पथि अध्वनि वृद्धैर्ज्ञानादिवृद्धैर्वन्द्यमानौ चरणौ यस्य सः । कृत्स्नं समस्तं गोधनं दिनान्ते प्रदोषसमयेऽपोह्य प्रत्यावृत्त्यानुगैर्ब्रह्मादिभिरुद्धृता कीर्तिर्यस्य सः । गवां गमने मध्येमार्गमनुगैरुद्धृता कीर्तिः पङ्को यस्य स इति वा । उद्धृतेति पदमुद्धृतमेवमिति मन्तव्यम् । कीर्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि चेति विश्वः । गोखुरादि नीररजः सङ्गतो भवन्तं पङ्कं पादलग्नं पश्चादागच्छदनुगा उद्धरन्ति निष्कासयन्तीति तात्पर्यम् । गीतो वेणुर्येन स तथा । श्रमं स्ववियोगजमिव वनते(?) वनजं चापोह्य निरस्य दृशीनां द्रष्टृदृष्टीनामुत्सवमुद्वहन् प्रापयन्खुराणां गोखुराणां रजोभिर्धूलिभिश्छुरिता मिश्रिता स्रङ्माला यस्य स देवकीजठरभूरेषो देवक्या जठरादुद्भवतीति तथा ज्ञानितया देवकीजठरभूरिति सत्योऽभ्यधुः । इयं यशोदापरोक्ष्यदशायामुक्तिरिति वा । नो चेत्कुप्येदेताभ्यो राज्ञीति । यद्वा तस्याः श्रुतवत्या अपि प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इति गर्गानर्गलगिरं स्मृतवत्या न कोपो नापि ताप इति वा मन्तव्यम् । उडुराजश्चन्द्रः । लुप्तोपमेयम् । सुहृदाशिषः सुहृदभिलाषान्दातुमिच्छा दित्सा तयाऽभियाति । चन्द्रोऽपि भविष्यद्देवक्यदितिस्तद्भवो रूपान्तरेणेति । व्रजगवामध्वगगवादीनां वत्सलस्तापापनोदक इति स्निग्धोऽगस्यास्तगिरेरधो वृद्धैः सप्तर्षिभिः पथि च वन्द्यमानचरणो गगनाध्वनीनचरणः स्तुत्यसञ्चारो वा । दिनान्ते कृत्स्नं गोधनं किरणधनमपोह्योपसंहृत्य गीतवेणुः क्व रे चन्द्र इति वृद्धैरपटुचक्षुष्कैः पृष्टैः स्पष्टदृष्टिभिर्गीतो वेणुर्यस्य सः । अहो तत्र वेणुः शाखोपरि लसतीति गीतवेणुः ।

अनुगाभिरश्विन्यादिभिः सहोद्धृता भूस्तत ऊर्ध्वं धृता कीर्तिर्विस्तारो यस्य सः । अनुगं गगने उद्धृत इत्युच्चैः स्थित इति कीर्तिः कीर्तनं ज्योतिषकैर्यस्य स इति वा । श्रमं दिनमणिघृणिजमपोह्य दृशीना-मुत्सवमुद्वहन्खुररजसाऽत्रत्येनैव छुरिता स्रक् किरणहारो यस्य स तावत्पर्यन्तमिदं रजो गतमिति भावः । यद्वाऽन्तर्गतकुरङ्गखुररजच्छुरितगोलोकस्य चन्द्रमण्डलादुपरितनत्वेन ततो गोविन्दाभिषेकार्थ-मागच्छत्सुरभ्यादीनां चरणरजच्छुरितस्रग्वा । शान्तिपर्ववचनं च प्रागुदाहृतम् । सुहृत्सुहृन्मनो-नियम्यत्वेनास्यास्तीति स आशिषो दित्सयैतीत्युडुराजो देवकीजठरभूरिवेति चान्वेतव्यम् ॥ २२,२३ ॥

सुमनोरञ्जनी — व्रजगवां वत्सलः प्रियः । अगाधः गम्भीरः, अन्याविज्ञातमहिमा । पथि वृद्धैः वन्द्यमानचरणः स्तूयमानस्वरूपः । दिनान्ते सायं संध्यायम् । कृत्स्नं समस्तं गोधनमपोह्य व्यावर्त्य । अनुगैः उद्धृता प्रकटिता कीर्तिर्यस्यासौ तथाविधः । गीतः ध्वनितो वेणुर्येन सः । व्रजगवां, खुरैः समुत्पन्नरजसा धूल्या च्छुरिता मिश्रिता स्रक् वनमाला यस्यासौ । एषः देवकीजठरभूः देवकीजठरात् भवति व्यज्यत इति तथाविधः कृष्णः उडुराजश्चन्द्र इव । लुप्तोपमेयम् । दृशीनां नेत्राणां श्रमं सूर्यकिरणतापजन्यम् । अपोह्य अपोहयित्वा, णिजर्थोऽन्तर्णितः, उत्सवं आनन्दविशेषम् । उद्वहन् । सुहृदां बन्धूनां आशिषः अभीष्टानि । दित्सया दातुमिच्छया । एतीति ॥ २२,२३ ॥

मदविघूर्णितलोचन ईषन् मानदः स्वसुहृदां वनमाली ।
बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या ॥ २४ ॥

यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते ।
मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम् ॥ २५ ॥

तात्पर्यम् – 'मानवो बदरः सिंधुः शशिनस्तु त्रिनामकम् । यो वेद मुच्यते रोगैर्विष्णुनाम्नेव संसृतेरि'ति स्कान्दे ॥

सत्यधर्मीया — मदविघूर्णितेति पद्ये बदरशब्दस्य विवक्षितार्थाप्रतीतेः स्वयं मानेन तदर्थमाह ॥ मानव इति । मानवो बदरः सिन्धुरिति शशिनस्त्रिनामकं सार्थकं नामत्रिकमित्यर्थः । यो वेद स रोगान्मुच्यते मुक्तो भवति । तत्र दृष्टान्तमाचष्टे । विष्णुनाम्नोच्चारितेनाधिकारी संसृतेः संसारादिव यथा तथा मुच्यत इति ॥ ततश्चायं श्लोकार्थः ॥ काचित्कामिनी मधुनाथमधुनाऽपि द्वाभ्यां प्रस्तुतं स्तुत्वोप-संहरति ॥ मदेति । ईषत्किञ्चिदपि मानदः स्वसुहृदामत्यावश्यककामिनीनां सः, मय्यविघूर्णिते अविचालिते अभ्रामिते इति यावत् लोचने यस्य स अतत्कटाक्षिताऽहमित्यर्थः । मदो हर्षविशेषस्तेन विघूर्णिते उद्भ्रान्ते लोचने यस्य स वा । वनमाली बलिध्वंसी । शिखादिरयम् । बदरेणोद्यच्चन्द्रेण

पाण्डुवदनं यस्य सः । लपनोपरि परिपतितसान्द्रचन्द्रिकातस्तत्पाण्डुवदनं यस्येति वा । तत्र तन्त्रमाह । कनककुण्डललक्ष्म्या कनकात्मककुण्डलकान्त्येति । पडि गतौ ततो मृगव्यादिः कुः । पृषोदरादिदीर्घः । हरिणः पाण्डुरः पाण्डुरिति व्याख्यायां पाण्डुस्तु पीतभागार्धः केतकी धूलिसन्निभ इति शब्दार्णवः । पाण्डुः कुन्तीपतौ सित इति हैमः । त्रीणि पीतसंवलितशुक्लस्येत्युक्तेश्चन्द्रिकाशौक्ल्यं कनककुण्डलपीततेति तयोः संवलनं ज्ञेयम् ।

मृदु यथा तथेति वा । मृदुश्चासौ गण्डश्च तं मण्डयन्नलङ्कुर्वन्द्विरदराजो गजराजस्तद्वद्विहारो यस्य सः । दिनान्ते यामिनीपतिश्चन्द्रो दिनान्त इव व्रजगवां दिनतापं मोचयन् दुरन्तमेतद्विनाऽन्यस्मादनन्तं मुदितवक्त्र उपयाति । वनमाली जलमाली । वनोपरिग इति तन्माली वा । दिनतापं मोचयन्निति समम् । वस्तुतो वियुक्तानां तन्मात्रानुरक्तानामङ्गस्मरणं नास्तीत्येतावता विना भगवन्तमन्यत्र मनो मनागपि गच्छेदिति प्रक्रमानुसारेणैवोपसंहारस्य न्याय्यत्वान्नाप्रस्तुतस्तुत्योपसंहरणं मनोहरम् । विष्णुं शशिवर्णमित्युक्तेर्युक्तं तथा प्रदर्शनमिति वा । दैवं चामीकरं नाम प्रोद्यदादित्यसंन्निभमिति बृहद्भाष्योक्तेरादित्ये च । तदेतदादित्यस्य शुक्लं रूपमिति छान्दोगोपनिषदुक्तेः । कनककुण्डललक्ष्मीः शुभ्रेति बदरपाण्डुरतापीडितेति मन्तव्यम् । गोप्यः कृष्णे वनं यात इति कृष्णलीलां प्रगायन्त्य इति । तथा, एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः । रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदया इति शुक एव भगवत्स्तुतिं सम्पुटीमाटीकतेति करसम्पुटीं कृष्णायैव कुर्युः ॥ २४,२५ ॥

सुमनोरञ्जनी — बदरपाण्डुवदनः मदविघूर्णितलोचन इति विशेषणद्वयसामर्थ्यादिदं पद्यं बलरामप्रशंसापरमिवाभाति । मदेन विघूर्णिते लोचने यस्य सः बदरश्चन्द्रः तद्वत्पाण्डुवदनः । तदुक्तं तात्पर्ये । मानवो बदरश्चन्द्रः शशिनस्तु त्रिनामकमिति । स्वसुहृदां मानं बहुमानं ददातीति तथोक्तः । स्वसुहृदां स्त्रीणां मानं कामगर्वं द्यति खण्डयतीति तथोक्तः । कनककुण्डललक्ष्याः मृदु गण्डं मण्डयन् अलङ्कुर्वन् । एककुण्डलत्वादेकवचनम् । द्विरदराजविहारः गजराजगतिः एष यदुपतिः बलभद्रः यामिनीपतिरिव चन्द्रमा इव । व्रजगवां दुरन्तं दिनजनिततापं मोचयन् । दिनान्ते सायंसमये । मुदितवक्त्रः सन् उपयातीति सम्बन्धः ॥ २४,२५ ॥

श्रीशुक उवाच—

एवं व्रजस्त्रियो राजन् कृष्णलीला नु गायतीः ।
रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥

इति श्रीमद्भागवते दशमस्कन्धे त्रयस्त्रिंशोऽध्यायः ॥

सत्यधर्मीया — लीलाः नु गायतीरिति छेदः । ऐकपद्यं वा । कृष्णलीला अनुगायतीः कृष्णलीलानुगायन्त्योऽहस्सु तच्चित्ता मुनय इव तन्मनस्का महोदया इति समं रेमिरे चिक्रीडुः ॥ २६ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे त्रयस्त्रिंशोऽध्यायः ॥ १०-३३ ॥

सुमनोरञ्जनी — एवं कृष्णलीला, सुपो लुक् । कृष्णलीलाम् । अनुगायतीः, पूर्वसवर्णादेशः अनुगायन्त्यः । व्रजस्त्रियः । अहस्सु । तच्चित्ताः तस्मिन् चित्तं मनो वाऽन्तरावृत्तिर्यासां ताः । तन्मनस्काः अत एव । महान् उदयो यासां ताः तथाविधाः सत्यः रेमिरे । अनेन एतद्गीतगायकानामपि महानुदयः फलमिति सूचितम् ॥ २६ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां त्रयस्त्रिंशोऽध्यायः ॥ १०-३३ ॥

॥ अथ चतुस्त्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ।
महीं महाककुत्कायः कम्पयन् खुरविक्षताम् ॥ १ ॥

सत्यधर्मीया — अरिष्टासुरविनष्टिं कृष्णकृतां तथा कृतान्तमुखं खलं कंसं यापयित्वा वासुदेवसेवां विधित्सुर्विधिसुतः सर्वं वसुदेवादिकृतं कर्ममर्म शशंस । तेन च हिंसोद्योगं कंसश्चकारेत्यत्र प्रतिपाद्यते। तत्र गोपीपरिवृतो व्रजमुपव्रज्य किं कृतवान्भगवानिति परीक्षकपरीक्षिच्छङ्कां स्वयं दयया परिहरति शुक इति कवयति ॥ श्रीशुक इति । अथ शङ्खचूडाहननानन्तरम् । तर्हि तदेत्यव्यवधानं सूचयति । अथ मङ्गलसूचकं सत्प्रारम्भार्थे विक्रमान्तरमारभ्यत इति । महास्कन्धाङ्गः खुरविक्षतां महीं कम्पयन्नागतः । हे महि त्वमेवास्मद्धननमूलं न चेत्त्वत्प्रार्थने कुतोऽवतरेद्धरिर्नावतरेच्चेत्पूतनादिघातः कुतो भवेदिति मतितस्तत्क्षितिसक्षतीकरणमसुरस्येति तात्पर्यम् । किञ्च स्वनासिकाछेदमपीह सोढ्वा खलो निरुन्धे खलु सत्प्रयाणमितिवत्स्वयं पशुत्वं सम्पाद्यापि लोकबाधा कर्तव्येति मनुतेऽयं दनुज इति दुर्जनस्वभावोऽसुर इत्यनेनासूचि ॥ १ ॥

सुमनोरञ्जनी — कथान्तरप्रारम्भार्थोऽथशब्दः । तर्हि यदा शङ्खचूडं हत्वा व्रजमागतस्तदा नाम्ना अरिष्टः वृषभाकारोऽसुरः । महान्तौ ककुत्कायौ यस्य सः । खुरैः पादाग्रैः विक्षताम् । महीं कंपयन् । गोष्ठं प्रत्यागत इति सम्बन्धः ॥ १ ॥

रवमाणः खरतरं पदा च विलिखन् महीम् ।
उद्यम्य पुच्छमभ्राणि विषाणाग्रेण चोद्धरन् ॥ २ ॥

सत्यधर्मीया — रवमाणो रवन् हम्भाध्वनिं कुर्वन्विषाणाग्रेण शृङ्गप्रान्तेन चात्पुच्छेनाप्यभ्राणि मेघानुद्धरन् । अनेन तावदौन्नत्यं ध्वन्यते । कृष्णसावर्ण्यान्मेघा अपि मेघकारिण इति चोत्तुङ्ग-शृङ्गोद्धरणमिति ध्वनिः ॥ २ ॥

सुमनोरञ्जनी — खरतरं क्रूरतरं यथा भवति तथा रवमाणः शब्दं कुर्वाणः । अभ्राणि मेघान् ॥ २ ॥

किञ्चित्किञ्चिच्छकृन्मुञ्चन् मूत्रयन् स्तब्धलोचनः ।
यस्य निर्ह्रादितेनाङ्ग निष्ठुरेण गवां नृणाम् ॥ ३ ॥

पतन्त्यकालतो गर्भाः स्रवन्ति स्म भयेन वै ।
निर्विशन्ति घना यस्य ककुद्यचलशङ्कया ॥ ४ ॥

सत्यधर्मीया — शकृन्मलम् । स्तब्धलोचनः स्तब्धे लोचने यस्य सः । मदभावोऽयम् । निर्ह्रादितेन नादेन नृणां तद्योषितां नृणां निष्ठुरेण श्रवणासह्येनाकालतो गवां गर्भा इत्यन्वयः । आचतुर्थाद्भवेच्छ्रावः पातः पञ्चमषष्ठयोः । पञ्चमषष्ठयोः पातो, मासचतुष्टयात्प्राक् चेच्छ्राव इति विवेकः । ककुद्यचलशङ्कया पर्वतशङ्कया निर्विशन्ति । तावानायामः(?) ककुद इति भावः ॥ ३,४ ॥

सुमनोरञ्जनी — स्तब्धे निश्चले लोचने यस्य सः । निष्ठुरेण क्रूरेण निह्रादितेन गर्जितेन । गर्भाः पतन्ति स्रवन्ति च । मासत्रयादर्वाकृतनाः स्रवन्ति । तदूर्ध्वाः पतन्ति । यस्य ककुदि घनाः अचलशङ्कया पर्वतसम्भावनया । निर्विशन्ति उपविशन्ति ॥ ३,४ ॥

तं तीक्ष्णशृङ्गमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ।
पशवो दुद्रुवुर्भीता राजन् सन्त्यज्य गोकुलम् ॥ ५ ॥

सत्यधर्मीया — तीक्ष्णे क्रूरे शृङ्गे यस्य सः ॥ ५ ॥

सुमनोरञ्जनी — तत्रसुः भीताः आसन् ॥ ५ ॥

कृष्ण कृष्णेति ते सर्वे गोविन्दं शरणं ययुः ।
भगवानथ तद् वीक्ष्य गोकुलं भयविद्रुतम् ॥ ६ ॥

सत्यधर्मीया — तद्गोकुलं तत्स्थजनम् ॥ ६ ॥

सुमनोरञ्जनी — भयेन विद्रुतं पलायनं कुर्वत् ॥ ६ ॥

मा भैष्टेति गिराऽऽश्वास्य वृषासुरमुपाह्वयत् ।
गोपालैः पशुभिर्मन्द त्रासितैः किमसत्तम ॥ ७ ॥

सत्यधर्मीया — आश्वास्य समाधाय । मन्द दरिद्राज्ञ वा ॥ ७ ॥

सुमनोरञ्जनी — सपालैः पालकसहितैः । पशुभिः त्रासितैः किं किं कृतं भवेत् ॥ ७ ॥

बलदर्पहाऽहं दुष्टानां त्वद्विधानां दुरात्मनाम् ।
इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ।
सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ ८ ॥

सत्यधर्मीया — बलं च दर्पश्च तौ हन्तीति स तथा । त्वद्विधानां तव विधा प्रकारो येषां ते तथा तेषामास्फोट्य तलेन बाहुं वोरू वाऽऽहत्य । तलशब्देन परस्परं तलध्वनिना । आभोगो हि कायो महान्भुजस्तदाकार इति भुजाभोगस्तम् । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । सख्युरंसे प्रसार्यावस्थितः । अनेन तदलक्ष्यता ध्वन्यते ॥ ८ ॥

सुमनोरञ्जनी — बलस्य यो दर्पः अहङ्कारः तस्य अपहर्ता । आस्फोट्य बाहुं हस्तेन सशब्दं ताडयित्वा । भुजा भोगमिव भुजाभोगं सर्पाकारां भुजाम् । भुजाशब्दः स्त्रीलिङ्गोऽप्यस्ति । भुजाभोगं पुष्टवृत्तभुजमिति वा ॥ ८ ॥

सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ।
उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥

सत्यधर्मीया — उद्यत्पुच्छं बालस्तेन भ्रमन्तस्तस्मिन्वा मेघा येन सः ॥ ९ ॥

सुमनोरञ्जनी — कोपितः कोपं प्रापितः । उद्यत्पुच्छेन भ्रमन्तो मेघा येन सः ॥ ९ ॥

अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् ।
कटाक्षिप्याद्रवत् तूर्णमिन्द्रमुक्तोऽशनिर्यथा ॥ १० ॥

सत्यधर्मीया — अग्रे विधाय स्वविषाणयुग्ममुग्रोऽच्युतं प्रत्यगमत्सहायम् । दोष्णा तदुत्पाटयतो मुरारेः कुर्वन् शिरोभारजिहीर्षयेवेत्याह ॥ अग्रन्यस्तेति । अग्रे पुरोभागे न्यस्ते स्थापिते विषाणयोरग्रे

प्रान्तभागे येन सः । स्तब्धे जडीकृते असृग्वद्रक्ते लोचने यस्य सः । कटाक्षिप्य कटाक्षगोचरं कृत्वा । इन्द्रमुक्तोऽशनिर्वज्रो विपे यथा तथा तूर्णमभ्यद्रवत् । अनेवं व्याख्याने निदर्शनमिदमप्रदर्शनीयं स्यात् । अर्थविपर्यासादिति मन्तव्यम् । यथैव वज्रो विपतौ वृथा भवेदिति भगवदुक्तेः ॥ १० ॥

सुमनोरञ्जनी — अग्रन्यस्तविषाणाग्रः पुरोभागे कृतविषाणाग्रः । स्तब्धे, असृग्वत् रुधिरवत् रक्ते लोचने यस्य सः । कटाक्षिप्य वक्रदृष्ट्या विलोक्य ॥ १० ॥

गृहीत्वा शृङ्गयोस्तं वा अष्टादशपदानि सः ।
प्रत्यपोवाह भगवान् गजः प्रतिगजं यथा ॥ ११ ॥

सत्यधर्मीया — शृङ्गयोस्तदग्रयोस्तं गृहीत्वाऽष्टादशपदानि प्रत्यपोवाह पश्चात्प्रातिलोम्येन नीतवान् । प्रतिगजमित्युक्तिर्भगवद्यशोविशेषणार्थमिति मन्तव्यम् ॥ ११ ॥

सुमनोरञ्जनी — स्तब्ध्वा अवष्टभ्य । अपोवाह तिर्यग्गमयामास ॥ ११ ॥

सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः ।
आपतत् स्विन्नसर्वाङ्गो निःश्वसन् क्रोधमूर्च्छितः ॥ १२ ॥

सत्यधर्मीया — स एवमपविद्धो घर्षणसमयेऽवनिजानुसमासज्जनेन पतितः पुनः सत्वर उत्थाय स्विन्नसर्वाङ्गो निःश्वसन्क्रोधमूर्छितश्चापतत्कृष्णोपर्यपतत् ॥ १२ ॥

सुमनोरञ्जनी — अपविद्धः तिर्यक्पातितः ॥ १२ ॥

तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य निपात्य भूतले ।
निष्पीडयामास यथाऽऽर्द्रमम्बरं कृत्त्वा विषाणे न जघान सोऽपतत् ॥ १३ ॥

सत्यधर्मीया — यदुपतिमृदुहस्तेनोद्धृतं तस्य शृङ्गं व्यसुमसुरमकार्षीत्तत्क्षणेनेति युक्तम् । अपि शिरसि धृतो यत्स्वीय एवान्तकाले करवशमुपयातः शत्रुतामेति शत्रोरित्याह ॥ तमिति । सन्ततं (सन्तमिति स्यादिभाति । सन्तं वृषमित्यन्वयः) कथमपोथन्मधुमथन इत्यतो वा कथयति ॥ तमापतन्तमिति । तमायां रात्र्यां पतत्पततीति तमापतत्तम् । तमा तमसि गीयत इत्यनेकार्थ-ध्वनिपदमञ्जरी । तमे तमस्यापतन्तं तत्पातयोग्यमिति वा गतम् । अनेन गौर्न पदा स्पृष्टव्येति सामान्यतो गोमात्रपादस्पर्शोऽविहिते विहितवान्कथं धर्ममर्मविद्भगवानिति परास्तम् । शृङ्गयोर्निगृह्य पदा समाक्रम्य भूतले निपात्यार्द्रमम्बरं वस्त्रं न यथा तथासृगार्द्रं यथा सम्यङ्निष्पीडयामास विषाणे शृङ्गे कृन्त्वोत्कृत्य ताभ्यां जघान स चापतत् । विषाणं दन्तशृङ्गयोरित्यमरः ॥ १३ ॥

सुमनोरञ्जनी — आर्द्रमम्बरं वस्त्रं यथा तथा तं निष्पीड्य विषाणं कृत्वा तेन विषाणेन जघान ॥१३॥

असृग् वमन् मूत्रशकृत् समुत्सृजन् क्षिपंश्च पादाननिमीलितेक्षणः ।
जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः ॥ १४ ॥

सत्यधर्मीया — असृक् अश्यतेरौणादिके प्रत्ययेऽसृक्शब्दो बोध्यः । रक्तं वमन्नुद्गिरन्मूत्रेण सहितं शकृत्समुत्सृजन्पादांश्चतुरः समुत्क्षिपन्ननिमीलितेक्षणः सोत्कोचलोचनः कृच्छ्रं प्राणसङ्कटं जगाम । अथानन्तरं निर्ऋतेर्मृत्योः क्षयं गृहं जगाम च । सुराः पुष्पैः किरन्तः सन्तो हरिमीडिरे पूजयामासुः ॥ १४ ॥

सुमनोरञ्जनी — असृक् रक्तम् । वमन् । मूत्रेण सहितं शकृत् । समुत्सृजन् । स्वपादान् विक्षिपन् इतस्ततो विक्षिपन् । अनिमीलितेक्षणः विवृतनेत्रः । निऋतेर्यमस्य क्षयं लोकम् । जगाम । अथ तद्धननानन्तरम् ॥ १४ ॥

एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ।
विवेश भगवान् गोष्ठं गोपीनां नयनोत्सवः ॥ १५ ॥

सत्यधर्मीया — ककुद्मिनं वृषभं स्वजातिभिर्गोपैर्देवैर्वा ॥ १५ ॥

सुमनोरञ्जनी — ककुद्मिनं वृषभासुरम् । स्वजातिभिः गोपैः ॥ १५ ॥

अरिष्टे निहते गोष्ठे कृष्णेनाद्भुतकर्मणा ।
कंसाय प्राह भगवान् नारदो देवदर्शनः ॥ १६ ॥

सत्यधर्मीया — देवदर्शनो देवानां दर्शनं रहस्यं मतं यस्य स देवकार्याभिज्ञ इति यावत् । प्रेण यथा कंसस्याश्वासो भवेद्भवेच्च तेन कृष्णद्वेषस्तेन च तस्य हिंसा सत्वरं स्यात्तथा वचनस्य प्रकृष्टतां सूचयति ॥ १६ ॥

सुमनोरञ्जनी — देवानां दर्शनं सिद्धान्तः असुरनिग्रहलक्षणो यस्य सः । यद्वा दैवज्ञ इत्यर्थः ॥१६॥

यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च ।
रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ।
न्यस्तौ स्वमित्रे नन्दे वै याभ्यां ते पुरुषा हताः ॥ १७ ॥

सत्यधर्मीया — यशोदायाः सुतां प्राहेत्यन्वयः । कन्यां दुर्गाम् । कृष्णमेव सुतमित्यन्वयः । बिभ्यता त्वत्तो भीतेन स्वमित्रे नन्दे नन्दगोपे न्यस्तौ याभ्यां ते पुरुषा हताः । योषिदेकैव पूतनेति

तदनुक्तिः । अपुरुषा हता इति छेदः । यः अः तेन हतेत्यपि वदन्ति । पुरुषाश्च हता इत्यावृत्त्याऽन्वयने तल्लाभ इति ज्ञेयम् । तौ स्थापितौ ॥ १७ ॥

सुमनोरञ्जनी — कन्यां यशोदायाः सुताम् । देवक्याः सुतं कृष्णं, रोहिणीपुत्रं रामं प्राहेत्येकं वाक्यम् । बिभ्यता वसुदेवेन । स्वमित्रे नन्दे तौ स्थापितौ । याभ्यां कृष्णरामाभ्याम् । ते पुरुषाः त्वद्भृत्याः शकटतृणावर्त्तादयः हता इति च प्राहेत्यपरं वाक्यम् ॥ १७ ॥

निशम्य तद् भोगपतिः कोपात् प्रचलितेन्द्रियः ।
निशातमसिमादत्त वसुदेवजिघांसया । १८ ॥

सत्यधर्मीया — तन्नारदेरितम् । निशातमुत्तेजितम् ॥ १८ ॥

सुमनोरञ्जनी — तत् नारदोक्तम् । निशातं निशितम् ॥ १८ ॥

निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ।
ज्ञात्वा लोहमयैः पाशैर्बबन्ध सह भार्यया ॥ १९ ॥

सत्यधर्मीया — तत्सुतौ वसुदेवसुतौ । लोहमयैः कृष्णायोविकृतैः पाशैः सह भार्यया वसुदेवं बबन्ध ॥ १९ ॥

सुमनोरञ्जनी — नारदेन निवारितः ॥ १९ ॥

प्रतियाते तु देवर्षौ कंस आशास्य केशिनम् ।
प्रेषयामास हन्येतां भवता रामकेशवौ ॥ २० ॥

सत्यधर्मीया — केशिनं तन्नामानं दनुजमाशास्य शिक्षयित्वा । तत्किंरूपं शासनमित्यतः शंसति । तौ रामकेशवौ भवताऽऽशास्येत्यप्यन्वेति । प्राक् प्रहारादिभिराशास्य हन्येतामिति प्रेषयामास । एवमाशास्य मनस्यभिलाषं कृत्वेत्यर्थः ॥ २० ॥

सुमनोरञ्जनी — केशिनं तन्नामकं दैत्यम् । रामकेशवौ हन्येतामिति आशास्य आज्ञाप्य ॥ २० ॥

ततो मुष्टिकचाणूरशलतोसलकादिकान् ।
अमात्यान् हस्तिपांश्चैव समाहूयाह भोजराट् ॥ २१ ॥

सत्यधर्मीया — हस्तिपान् इदानीमेव दानवारिभयत एकं वस्तु दृष्टमनेकधा भवतीति सूचयति

बहुवचनम् । अवान्तराम्बष्टसहितमिति बहुवचनमिति वा । महामात्रेति चैकमात्रसम्बोधनात् । हस्तिपानितिवाग्वत् महामात्रशब्दस्वारस्याच्चेति ज्ञेयम् ॥ २१ ॥

सुमनोरञ्जनी — मुष्टिकः चाणूरः शलः तोसलकः एते आदिकाः येषां तान् ॥ २१ ॥

भोभो निशम्यतामेतद् वीर चाणूरमुष्टिकौ ।
नन्दव्रजे किलासाते सुतावानकदुन्दुभेः ॥ २२ ॥

सत्यधर्मीया — वीरेति चाणूरमुष्टिकोभयविशेषणम् । अनेनानयोरितरशलतोसलतो विशेषस्तत्रापि तन्मुख्यं ज्ञानशब्दयोरितिवच्चेन्द्रकामावित्यादिवत्तरतमभावो ध्वन्यते ॥ २२ ॥

रामकृष्णौ सुतौ मह्यं मृत्यू कालनिदर्शितौ ।
भवद्भ्यामिह सम्प्राप्तौ हन्येतां मल्ललीलया ॥ २३ ॥

सत्यधर्मीया — मृत्यू कालेन दुर्गारूपेण । यथोक्तमेकादशतात्पर्ये । हरिश्च प्रकृतिश्चेत्यारभ्य कालशब्दोदिताः क्रमादिति । निदर्शिताविति छत्रिन्यायेन क्वचिज्जात इत्येव तदुक्तेः ॥ २३ ॥

सुमनोरञ्जनी — कालेन दैवेन निर्दर्शितौ ॥ २३ ॥

मञ्चाः क्रियन्तां विविधा मल्लरङ्गपरिश्रिताः ।
पौरा जानपदाः सर्वे पश्यन्तु स्वैरसंयुगम् ॥ २४ ॥

सत्यधर्मीया — मल्लरङ्गं परितः श्रिताः । स्वैरं योद्धृपरिश्रमसर्वस्वं संयुगं पश्यन्तु ॥ २४ ॥

सुमनोरञ्जनी — मल्लरंगं परितः श्रिताः स्थिताः मञ्चाः उन्नतस्थानानि । स्वैरं यथेच्छं क्रियमाणं संयुगं मल्लयुद्धम् ॥ २४ ॥

महामात्र निबोधेदं वचो मम महामते ।
गजः कुवलयापीडः प्रभिन्नकरटामुखः ॥ २५ ॥

सत्यधर्मीया — हे महामात्र हस्तिपाधिप । महामात्रः समृद्धेऽथाप्यमात्ये हस्तिपाधिप इति विश्वः । मम वच इदं निबोध शृणु । प्रभिन्ने करटयोर्गण्डयोरामुखे ईषन्मदोदकनिःसरणद्वारे यस्य सः । करटो गजगण्डे स्यात्कुसुम्भे कृच्छ्रजीविनीति । मुखं निःसरण इति च विश्वः ॥ २५ ॥

सुमनोरञ्जनी — महामात्र हस्तिपक ! कुवलयापीडः तन्नामकः । प्रभिन्नं मदस्रावि करटामुखं गण्डतुण्डो यस्य सः गजः ॥ २५ ॥

संस्थाप्यो द्वारि रङ्गस्य करारोपितमुद्गरः ।
तेन ते तत्र हन्तव्यौ सुतावानकदुन्दुभेः ॥ २६ ॥

सत्यधर्मीया — करे शुण्डायामारोपितो मुद्गरो यस्य सः । ते त्वया ॥ २६ ॥ .

सुमनोरञ्जनी — कुत इत्यतस्तत्प्रयोजनमाह । तेन गजेन मदस्राविं ते त्वया हन्तव्यौ । अन्तर्भावितणिजर्थोऽयं हनयितव्याविति यावत् ॥ २६ ॥

सोऽप्याकुलमतिः प्राह निहन्तव्यौ कथं मया ।
स्वस्रीयौ भोजराजस्य कंसस्य जगतीपतेः ॥ २७ ॥

सत्यधर्मीया — महामत इति सम्बोधनयोग्यतां प्रकटयन्नाहेत्याह ॥ सोऽपीति । स्वस्रीयौ स्वसुः पुत्रौ गतं षष्ठे । भोजराजस्य तत्कुलपतेर्जगती पृथिवी तस्याः पत्युः कंसस्य तवेत्यन्वयः । कथं हन्तव्यावित्याकुलमतिरतिविह्वलबुद्धिस्तं प्रत्येवमाह । जगती रत्नगर्भा भूर्भूतधात्र्यब्धिमेखलेत्यमरः ॥ २७ ॥

सुमनोरञ्जनी — सोऽपि हस्तिपकोऽपि । कंसस्य तव । स्वस्रीयौ कथं हन्तव्याविति तत्राह ॥ २७ ॥

इत्युक्तस्तेन कंसस्तु महामात्रेण दुर्मतिः ।
उवाच भूयो वचनं समेतान् श्रावयन् नृप ॥ २८ ॥

सत्यधर्मीया — स्वमातृदोषाविष्करणं न कार्यमिति मतिरहितत्वाद्दुर्मतिः । तदपि नैकान्त इत्याहेव नैकवारमित्यप्याह ॥ भूयो वचनं समेतांच्छ्रावयन्निति । मतिदौष्ट्योपोद्बलमिदमपीति ज्ञेयम् ॥ २८ ॥

सुमनोरञ्जनी — समेतान् मिलितान् ॥ २८ ॥

कंस उवाच—

शृणुध्वमेतद् वचनं मयोदितं निशम्य सर्वे हृदि धारयन्तु तत् ।
येनाहमेतेष्वसुहृत्त्वमादितश्चरामि बन्धुष्वपि तस्य कारणम् ॥ २९ ॥

सत्यधर्मीया — एतद्वचनमन्यदीयमेव मयोदितमनुभाषणमिषेण सर्वे यूयं शृणुध्वम् । निशम्य श्रुत्वा च भवन्तो हृदि धारयन्तु येन कारणेनाहमेतेषु कृष्णादिषु बन्धुष्वसुहृत्त्वं द्वेषितामादितः प्राक्तश्चरामि करोमि तस्य कारणं शृणुध्वमिति ॥ २९ ॥

सुमनोरञ्जनी — असुहृत्वं शत्रुभावम् । एतेषु यादवेषु ॥ २९ ॥

माता मम महाभागा कदाचित् कमलेक्षणा ।
विचचार गृहोद्याने मन्दमारुतवीचिते ॥ ३० ॥

सत्यधर्मीया — महाभागेत्यमनःपूर्वकतां वक्ष्यमाणकर्मणः सूचयति । कमलेक्षणेति द्रुमिलमनःकरणकारणोक्तिरिति ज्ञेयम् । गृहान्तर्गतलीलावने ॥ ३० ॥

प्रोत्फुल्लाशोकबकुलपूगपुन्नागशोभिते ।
भ्रमद्भ्रमरसङ्घाते कूजत्कोकिलसङ्कुले ॥ ३१ ॥

सत्यधर्मीया — प्रोत्फुल्लेत्यशोकादिविशेषणम् ॥ ३१ ॥

सुमनोरञ्जनी — भ्रमतां चरतां भ्रमराणां सङ्घातः समुदायो यस्मिन् तस्मिन् ॥ ३१ ॥

नृत्यच्छिखण्डिनिवहे मर्कटाटोपसुन्दरे ।
वसन्तसमये रम्ये सालमण्डलमण्डिते ॥ ३२ ॥

चरन्ती तत्र मे माता चिन्तयामास सुव्रता ।
भर्तारं कामसन्तप्ता ऋतुस्नाता स्वलङ्कृता ॥ ३३ ॥

सत्यधर्मीया — सुव्रता पतिव्रता ॥ ३३ ॥

सुमनोरञ्जनी — नृत्यतां शिखण्डिनां मयूराणां निवहः समूहो यस्मिन् । मर्कटानाम् आटोपेन सुन्दरे । सालानां सर्जानां मण्डलेम समूहेन मण्डिते ॥ ३२,३३ ॥

तत्रैव कश्चिद् गन्धर्वो द्रुमिलो नाम नामतः ।
चरन्नन्तर्हितः काले दृष्ट्वा तामेकचारिणीम् ॥ ३४ ॥

सत्यधर्मीया — नामतो द्रुमिलो, नाम प्रसिद्धम् । अन्तर्हितो मायया । एकैव चरतीत्येकचारिणी ताम् ॥ ३४ ॥

सुमनोरञ्जनी — नामतो द्रमिल इति नाम प्रसिद्धः । अन्तर्हितः अदृश्यः ॥ ३४ ॥

विज्ञाय चिन्तितं तस्याः सर्वसत्त्वाशयार्थवित् ।
उग्रसेनवपुर्बिभ्रत् सस्मितालापवीक्षितम् ॥ ३५ ॥

सत्यधर्मीया — सर्वेषां सत्त्वानां प्राणिनामाशयेऽन्तःकरणे स्थिताश्च तेऽर्थाश्च तान्वेत्तीति स तथेति तच्चिन्तितज्ञाननिदानाभिधानम् । उग्रसेनस्य वपुरिव विद्यमानं वपुः सस्मितालापवीक्षितं बिभ्रद्दधत् ॥ ३५ ॥

सुमनोरञ्जनी — चिन्तितं चिन्ताविषयम् । सर्वसत्वानां सर्वप्राणिनां आशयार्थं अभिप्रेतार्थं वेत्तीति तथोक्तः । परचित्तवृत्यभिज्ञत्वलक्षणसिद्धिमानिति यावत् । स्मितालापवीक्षितैः सहितं यथा भवति तथा ॥ ३५ ॥

तामाससाद कामार्तः कामयानां पतिव्रताम् ।
अजानमाना साऽभ्येत्य रेमे तेन समं वने ॥ ३६ ॥

सत्यधर्मीया — तामाससाद । अजानमाना पतीतर इत्यजानती ॥ ३६ ॥

सा तं विदित्वा रमणेतरं सती नितान्तखेदाविललोचनाशया ।
उवाच कस्त्वं कितवार्यगर्हितं दुरात्मना येन कृतं त्वयेदृशम् ॥ ३७ ॥

सत्यधर्मीया — सा मन्माता सती । रमणेन ग्राम्यकर्मणैवेतरं पतिभिन्नं नित्यानुभूतव्यत्यस्तैः ।

> शङ्किता साऽभवत्पश्चात्तस्य गौरवदर्शनात् ।
> सा तमाहोत्थिता नत्वं भीता मम पतिर्ध्रुवम् । इति हरिवंशोक्तेः ।

विदित्वा ज्ञात्वा नितान्तं गाढं खेदो यस्तेनाविलौ अनाच्छौ लोचनाशयौ नयनमानसे यस्याः । आर्यगर्हितं महद्भिनिन्दितम् । कितव वञ्चक! येन दुरात्मना दुष्टमनस्केन त्वयेदृशं कृतं त्वं क इत्युवाच ॥ ३७ ॥

सुमनोरञ्जनी — रमणे रतिक्रियायां रतौ विषये वा । सा तं विदित्वा पत्युरन्यं ज्ञात्वा । नितान्तखेदेन अतिविषादेन आविलौ व्याप्तौ लोचनाशयौ यस्याः सा । हे कितव वञ्चक ! आर्याणां गर्हितं निन्दितम् ॥ ३७ ॥

इति ब्रुवन्तीं परिसान्त्वयन् शनैः स दीर्घबाहुर्द्रुमिलोऽभ्यभाषत ।
वयं हि गन्धर्वकुलोद्भवाः प्रिये गीर्वाणतुल्यामरवल्लभानुगाः ॥ ३८ ॥

सत्यधर्मीया — इति ब्रुवन्तीं दीर्घबाहुर्द्रुमिलस्तत्प्रसूत इति स्वस्य बलिष्ठतां सूचयितुमिदम् । परिसान्त्वयन् शनैरभाषत । महात्मसङ्गे जाते मोदः सम्पादनीयः खेदः कुत इति द्रुमिलो निज-

दुर्मिलतां ललनां प्रतिलपयति ।। वयमिति । हि यतः प्रिये वयं गन्धर्वकुलोद्भवा जात्या गन्धर्वाः किञ्च गीर्वाणैर्देवैस्तुल्याः समाश्च तेऽमरवल्लभ इन्द्रस्तस्यानुगा भृत्याश्च ते । या गीस्तया वाणतुल्या तामभाषतेत्यन्वयः ।। ३८ ।।

सुमनोरञ्जनी — अमराणां वल्लभानुगाः प्रियभृत्याः ।। ३८ ।।

भवादृशीनां मनुजाङ्गनानां जानीहि भद्रे सुलभा वयं न च ।
जराविनाशाद्यखिलाधिभागिनां नृणां सुराणां महदन्तरं प्रिये ।। ३९ ।।

सत्यधर्मीया — भवादृशीनां मनुजाङ्गनानां हे भद्रे वयं सुलभाः सुखलभ्या न चेति जानीहि । पुनर्भद्रे प्रिये वयं वयमित्युक्तिः पद्ममुखीसुमुखीकृत्या इति ज्ञेयम् । दुर्मिलता च त इति तां विलासयति । जरा च विनाशश्च तावादी येषां ते च तेऽखिलाधयश्च तान्भजन्ति तच्छीला इति तेषां नृणां, सुराणां निर्जराणां महदन्तरं महान्विशेष इति ।। ३९ ।।

सुमनोरञ्जनी — जरा च विनाशश्च तावेवादी येषामवस्थाविशेषाणां तथा अखिलानां आधीनां च भजितुं शीलं येषां तथाविधानां नृणां तद्विधुराणां सुराणां च महदन्तरं महातारतम्यमस्ति । अतो भवादृशीनां वयं न सुलभा इत्यन्वयः ।। ३९ ।।

इति ब्रुवन्तं सा भूयः प्राह क्रोधाकुलेन्द्रिया ।
किं मां सान्त्वयसे भूयः कृत्वेत्थं दुष्टचेष्टितम् ।। ४० ।।

सत्यधर्मीया — जारारे विशेषोऽस्तु किमनेन न दोषः स्यादिति मतिमत्याह ।। इति ब्रुवन्तमिति । सा क्रोधाकुलेन्द्रिया । कस्त्वमित्युक्तेः प्राग्भूय इत्युक्तिः । इत्थं दुष्टचेष्टितं दुर्व्यापारं कृत्वा मां भूयः किं सान्त्वयसे । मूढेति निरूढः पाठः । सान्त्वयसि समाधत्से ।। ४० ।।

सुमनोरञ्जनी — अस्तु, त्वं यथा तथा तथापि पातिव्रत्यभङ्गो मा भूदित्यभिप्रायेणाक्षिपति ।। इतीति ।। ४० ।।

इमानतिक्रम्य जलाग्निमेदिनीसमीरणाकाशनिशेशसूर्यान् ।
दिक्कालधर्मानवधीर्य येन दुरात्मनेत्थं मलिनीकृताऽहम् ।। ४१ ।।

सत्यधर्मीया — हे कान्ते एकान्ते यज्जातं जातं कोऽपि न वेत्तीतीयान्कोपः कुत इत्यतः सुकृतदुष्कृतसाक्षिण एत इति सा सारसाक्षी प्रोच्य तं तुच्छीकरोति ।। इमानिति । इः इच्छा तेनैव मम

मं विषं येन स तत्सम्बुद्धिः । मासे च समये चन्द्रे यमे वेधसि मं विषमिति विश्वः । हे आनतिक्रम्य आनतिः सत्कार्यप्रवणता क्रम्या क्रमणीया क्षेप्या यस्य स तत्सम्बुद्धिः । जडेषु चेतनग्रहः समीरणो वायुरवधीर्य । धृङनादरे । विस्तृतं चैतद्युक्तिपादीयसुधास्थगौरवमनुरुध्य प्रयोजनमवधीर्यतामिति वाक्यटिप्पणे । अवज्ञायातो नैकतरातिरेकः । वैशकलित्येनार्धयोरन्वय इति पदद्वयं वा । येन दुरात्मनाऽहं मलिनीकृता । च्विना प्रागित एतादृङ्मालिन्याभावः सूचित इति ज्ञेयम् ॥ ४१ ॥

सुमनोरञ्जनी — इमान् जलाग्न्यादीन् । साक्षित्वेन स्थितान् निश्चित्यापि तान् अवधीर्य अवज्ञायेत्यर्थः । मलिनीकृता परपुरुषाभिगमनदोषवती कृता ॥ ४१ ॥

गजेनेव मदान्धेन पद्मिनी वनमध्यगा ।
विशृङ्खलेन विमला येनाहं मलिनीकृता ।
स त्वं किमिति मां भूयः सान्त्वयस्यमराधम ॥ ४२ ॥

सत्यधर्मीया — वनमध्यगेति पद्मिनीपक्षे जलमध्यगेति पद्माक्षीपक्षे । वनमध्यमुद्यानमध्यं गच्छतीति सा तथेत्यर्थो ज्ञेयः । विशृङ्खलेनोद्घाटितनिगडेन । अन्यत्र सन्मात्रमपहाय स्वैरेणेत्यर्थः । हे अमराधम देवैर्गर्हित! एतत्ते कर्म तव, विदित्वा त्वां गर्हयेयुरिति भावः । अधमौ गर्हितन्यूनाविति च । अधमः कुत्सिते न्यून इति विश्वः । देवनीच वा ॥ ४२ ॥

सुमनोरञ्जनी — अमरेषु अधम । तदेव सदृष्टान्तं विवृणोति ॥ गजेनेति । विशृङ्खलेन विधिनिषेधस्मरणलक्षणशृङ्खलारहितेन । अन्यत्र स्पष्टम् । मदान्धेन उभयत्र समम् । अहमपि पद्मिनी । स्त्रीजातिविशेषः । तादृशी वनमध्यगा उपवने चरन्ती ॥ ४२ ॥

इति ब्रुवन्तीं प्रोवाच स भूयः शापशङ्कितः ।
अनुलोमः सरोजाक्षि मनुष्यासु दिवौकसाम् ॥ ४३ ॥

नराणां देवकान्तासु प्रतिलोमो हि सङ्गमः ।
जानीहि नाहमागस्कृत् तेन पङ्कजगन्धिनि ॥ ४४ ॥

सत्यधर्मीया — नाधर्मो मयाऽचारीति समाधत्ते ॥ इतीति । हे पङ्कजगन्धिनि पङ्कजस्य गन्धः सोऽस्या अस्तीति तत्सम्बुद्धिः । हे सरोजाक्षि मनुष्यासु दिवौकसां सङ्गमोऽनुलोमो युक्तः स्वभावतस्तेषामुत्तमत्वात् । देवकान्तासु नराणां सङ्गमः प्रतिलोमो विरुद्धः स न कार्यः । हिशब्देन

तत्तज्जातित्वेनैवैतस्य विरुद्धता नावतारादिष्विति शन्तनुगङ्गादिव्यावृत्तिर्मानप्रसिद्धेरिति सूचयति । तेन हेतुनाऽहमागस्कृदपराधकर्ता न ॥ ४३,४४ ॥

सुमनोरञ्जनी — मनुष्यासु मनुष्यस्त्रीषु । दिवौकसां देवानां सङ्गमः अनुलोमः युक्तः । अतो दोषावहो न भवति । प्रतिलोमः प्रतिकूलः । स्वोच्चदारपरिग्रहरूपत्वात् ॥ ४३,४४ ॥

तस्मात् ते जायते पुत्रो मद्वीर्यं न वृथा भवेत् ।
श्रीमान् धीमान् महोत्साहो न मे वाग् जायते मृषा ॥ ४५ ॥

सत्यधर्मीया — तस्माच्छ्रीमान्धीमान्महोत्साहः पुत्रो जायते मद्वीर्यं रेतो न वृथा भवेत् । मे वाक् च मृषा न जायते ॥ ४५ ॥

इत्येवं वादिनं क्रुद्धा माता मम यशस्विनी ।
प्राह सन्त्यज्य सन्तप्ता पातिव्रत्यं सुदुर्लभम् ॥ ४६ ॥

सत्यधर्मीया — सुदुर्लभं पातिव्रत्यं सन्त्यज्य स्थितेति क्रुद्धा मम मातैवं वादिनम् । निन्दा द्योत्यत इतिना इति प्राह ॥ ४६ ॥

सुमनोरञ्जनी — पातिव्रत्यं सन्त्यज्य पातिव्रत्यत्यागेन सन्तप्तेति यावत् ॥ ४६ ॥

निस्सेतोर्भिन्नवृत्तस्य पापस्योन्मार्गवर्तिनः ।
क्रूरस्ते तनयो भूयात् साहसी निर्दयोऽघृणः ॥ ४७ ॥

सत्यधर्मीया — निर्निर्मितः सेतुर्येन निर्जितराक्षसो रामस्तस्य सकाशाद्भिन्नं विलक्षणं वृत्तमाचारो यस्य । एकपत्नीव्रतरामविलक्षणवृत्तस्य व्यभिचारिण इति यावत् । उन्मार्गवर्तिनः पापस्य ते तव तनयः साहसी स्वबलमनवलोक्य कर्ता । निर्दयोऽदाताऽघृणः कृपाविकलोऽघृणो जुगुप्सा-रहितो निर्दयोऽघृण इति वा । घृणा जुगुप्साकृपयोरिति विश्वः । दया दानेति स्मृतेः । भूया-द्धीमांच्छ्रीमान्महोत्साहीति भावः ॥ ४७ ॥

सुमनोरञ्जनी — निःसेतोः निर्मर्यादस्य । भिन्नवृत्तस्य । भिन्नं भग्नं वृत्तं शीलं सात्विकस्वभावो येन । कुतः । उन्मार्गवर्तिनस्ते तनयः । साहसी हिंसकः, अघृणः अकृत्येषु जुगुप्सारहितः । घृणा जुगुप्साकृपयोरित्यभिधानात् ॥ ४७ ॥

नानुग्राह्यो देवतानां द्विजानां च तपस्विनाम् ।
इत्थं वदन्त्यां तस्यां स क्रुद्धायां शापशङ्कितः ।
तावकानां भवेच्छत्रु(स्तत्रैवा)रित्युक्त्वाऽन्तरधीयत ॥ ४८ ॥

सत्यधर्मीया — देवतानां तपस्विनां द्विजानां च नानुग्राह्यः । क्रुद्धायां तस्यामित्थं वदन्त्यां शापेन शङ्कितः सतीयं कुपिता सती यदि दद्याच्छापं तर्हि न सोऽन्यथा भवेदिति सन्देहग्रस्तस्तावकानां सतां स्वकीयानां शत्रुर्भवेदित्युक्त्वा तत्रैव स्थितस्थान एवान्तरधीयतान्तर्हितोऽभूत् ॥ ४८ ॥

सुमनोरञ्जनी — इत्थं वदन्त्यां सत्याम् । तावकानां भोजवृष्ण्यन्धकानाम् ॥ ४८ ॥

गते तस्मिन् महोद्यानान्माता मम तपस्विनी ।
केनाप्यज्ञातवृत्तान्ता गृहानेवाभ्यपद्यत ॥ ४९ ॥

सत्यधर्मीया — तस्मिन्गन्धर्वे ॥ ४९ ॥

ततः सा गर्भमालम्ब्य कालेनैव सुषाव माम् ॥ ५० ॥

सत्यधर्मीया — ततस्तद्दिनप्रभृति गर्भमालम्ब्य काले दशमे मासि मां सुषावासूत ॥ ५० ॥

इति मे नारदः प्राह कदाचिद् भगवान् ऋषिः ।
ततः प्रभृत्यहं द्वेष्मि तानेतान् बन्धुदुर्जनान् ॥ ५१ ॥

सत्यधर्मीया — भगवानृषिरित्यन्यथाकथनहेतूक्तिः । ततः प्रभृति तद्दिनमादीकृत्यैतान्बन्धुदुर्जनान्बन्धवः स्वकीयाश्च ते दुर्जनाश्च तानहं द्वेष्मि द्वेषं करोमि । अनेन स्वैरसंयुगमित्यत्र (२४,श्लो) स्वैः अ संयुगमिति पदत्रयम् । अनिमान इत्यत्रेव नञर्थस्याकारस्य स्वपदेनान्वयः । अस्वैर्न स्वकीयैः संयुगं पश्यन्त्विति वृत्त्यन्तरमादर्शि ॥ ५१ ॥

सुमनोरञ्जनी — बन्धुभूतान् दुर्जनान् ॥ ५१ ॥

यूयं तत्र प्रमाणं हि द्विषन्त्येतेऽपि मां सदा ।
उग्रसेनं च दुर्बुद्धिमाहुकं च दुराशयम् ॥ ५२ ॥

सत्यधर्मीया — तेऽपि मां सदा विद्विषन्ति । न केवलमहमेकल एवं कलयामि किन्तु यूयं सर्वेऽपि तत्र तन्मद्द्वेषे प्रमाणं साक्षिणो मद्विषये तद्द्वेषो युष्मत्साक्षिसिद्धो नाहं वितथकथ इति भावः । दुर्बुद्धिमुग्रसेनं दुराशयमाहुकं च ॥ ५२ ॥

सुमनोरञ्जनी — तेषामनुभवमारोहयति ॥ यूयमिति । हि यस्मादेवं तस्मादेतेऽपि मां सदा द्विषन्ति । तत्र यूयमेव प्रमाणं साक्षिणः ॥ ५२ ॥

वसुदेवं च कितवमन्यांश्च तदुपाश्रयान् ।
हत्वा न जायते दोषो मम गन्धर्वजन्म नः ॥ ५३ ॥

सत्यधर्मीया — कितवं, पोतं तत्र प्रस्थाप्य कन्यामन्यायतो नीत्वा यात इति मायावीति कितवम् । हत्वा स्थितस्य मम दोषो न जायते । क्षेत्रमात्रस्वाम्युग्रसेनोऽतो गन्धर्वजन्म नो ममेति निर्लेपताया मार्गान्तरप्रदर्शनम् ॥ ५३ ॥

सुमनोरञ्जनी — दोषः बन्धुहनननिमित्तः । कुतः । गन्धर्वजन्मनि, मम गन्धर्वजातत्वाद्बन्धुतैव नास्तीति भावः ॥ ५३ ॥

तेनादेक्ष्यामि पुरुषं हन्येतामिति तावहम् ।
ताभ्यां हताभ्यां बालाभ्यां कुञ्जरेण बलीयसा ॥ ५४ ॥

सत्यधर्मीया — तेन हेतुना पुरुषं प्रस्तुतं केशिनं, तौ हन्येतां त्वयेत्यहमादेक्ष्याम्याज्ञापयामि । यथाकथञ्चिन्मुक्तौ चेत्केशिना बलीयसा कुञ्जरेण हताभ्याम् ॥ ५४ ॥

सुमनोरञ्जनी — तेन कारणेन । पुरुषं भृत्यभूतं हस्तिपकम् ॥ ५४ ॥

कृत्वा पारत्रिकीं पूजां यान्तु तत्पदवीमिमे ।
वसुदेवोग्रसेनौ च तथाऽन्यौ नन्ददेवकौ ॥ ५५ ॥

सत्यधर्मीया — पारत्रिकीं पूजां मदभिप्रेतप्रेतकार्यमिममुग्रसेनाद्या अपि तत्पदवीं मृत्युमार्गं यान्तु । तानपि घातयामीत्याशयः । वसुदेवश्चोग्रसेनश्च ताभ्यामन्यौ नन्ददेवकौ च ॥ ५५ ॥

गोपाला यादवाश्चैव ये चान्येताननुव्रताः ।
पश्यन्तु विवृतैर्नेत्रैर्हन्यमानौ स्वदारकौ ॥ ५६ ॥

सत्यधर्मीया — गोपाला यादवाश्चेत्येते विगतं वृतमावरणं येषां विवृतास्तैर्नेत्रैः । वक्त्रनेत्रारण्यगाण्डीवानि नपुंसके चेति लिङ्गानुशासनसूत्रान्नेत्रशब्दः पुल्लिङ्गः । प्रकृते सङ्गमय्योक्तिरियमन्यथाऽपि निर्वाहादिति ज्ञेयम् । हन्यमानौ स्वदारकौ पश्यन्तु ॥ ५६ ॥

आहूयन्तां जनपदाः पश्यन्तु मम पौरुषम् ॥
महामात्र त्वया भद्र रङ्गद्वार्यपनीयताम् ॥ ५७ ॥

सत्यधर्मीया — जनपदा देशस्था जनाः । हे महामात्र हे भद्र रङ्गद्वारि रङ्गकवाटेऽपनीयता-मुपनीयताम् । अपाश्रय इतिवदयम् । उपनीयतामित्यपि क्वचित्पाठः । इत उपनीयतामिति ॥ ५७ ॥

द्विपः कुवलयापीडो जहि तेन ममाहितौ ।
आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ॥ ५८ ॥

सत्यधर्मीया — तेन द्विपेन ममाहितौ वैरिणौ जहि । रङ्गन्नेत्राभ्यां स्रवद्वारि पयो यथा भवति तथा जहीति वाऽन्वयः । यथाविधि चतुर्दश्यां धनुर्यागश्चारभ्यताम् ॥ ५८ ॥

सुमनोरञ्जनी — रङ्गद्वारि कुवलयापीडो द्विपः अपनीयतां नीयताम् ॥ ५७,५८ ॥

विशसन्तु पशून् मेध्यान् भूतराजाय मीढुषे ।
इत्याज्ञाप्यार्थतत्त्वज्ञमाहूय यदुपुङ्गवम् ।
गृहीत्वा पाणिना पाणिं तत्राक्रूरमुवाच ह ॥ ५९ ॥

सत्यधर्मीया — भूतराजाय मीढुषेऽभिलषितसेचकाय मेध्यान् शुद्धान्पशून्विशसन्तु सूदयन्त्विति महामात्रादीनाज्ञाप्यार्थतत्त्वज्ञं प्रयोजनरहस्यज्ञं यदुश्रेष्ठमाहूयाकारयित्वा पाणिना स्वहस्तेन तद्धस्तं गृहीत्वा तत्र तत्समयेऽक्रूरं कर्मणा शर्मणा चोवाच ॥ ५९ ॥

सुमनोरञ्जनी — मीढुषे भक्ताभीष्टसेचकाय । भूतराजाय रुद्राय । अर्थस्य प्रयोजनस्य । तत्वज्ञं सम्यग्वेत्तारं, प्रयोजनसाधनविषये निपुणमिति यावत् ॥ ५९ ॥

भो भो दानपते मह्यं क्रियतां मैत्रमादृतः ।
नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ ६० ॥

सत्यधर्मीया — भो भो दानपते दातृपते शुद्धिमदधिप वा । दानं गजमदे त्यागे पालनच्छेद-शुद्धिष्विति विश्वः । मह्यं मम मैत्रमादृत इत्युभयान्वयि । मयाऽऽदृतो मय्यादृत इति क्रियताम् । किं तावदाप्तता तव मयि त्वयि मम वेत्यत आह । त्वत्तोऽन्यो भोजवृष्णिषु हिततमोऽतिमित्रं न विद्यत इति ॥ ६० ॥

सुमनोरञ्जनी — मैत्रं मित्रेण क्रियमाणं कर्म । हिततमः हितकृच्छ्रेष्ठः ॥ ६० ॥

अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनम् ।
यथेन्द्रो विष्णुमाश्रित्य स्वार्थमध्यगमद् विभुः ॥ ६१ ॥

सत्यधर्मीया — सौम्य शान्त सुन्दर वा । सौम्यो विप्रे सोमजीवे सुन्दरे सोमदेवत इति । गौरवेण प्रभुगौरवेण साधनं येन स कार्यस्य गौरवसाधनस्तं त्वामाश्रितः । तत्र निदर्शनमिन्द्रो विष्णुमुपेन्द्रमाश्रित्य स्वार्थं बलिबलादिजयलभ्यमध्यगमत्प्राप । कार्येषु गौरवं यस्य कार्यस्य तस्यापि साधनं साधकमिति वा ॥ ६१ ॥

सुमनोरञ्जनी — हे सौम्य सोमपानार्ह सुन्दरेति वा । सौम्ये विप्रे सोमजीवे सुन्दरे सोमदैवत इत्यभिधानात् ॥ कार्यगौरवस्य कार्यमहत्वस्य साधनं साधकम् । अवान्तरकर्तृकरणत्वोपचारः । त्वां आश्रितः अवलम्बमानः कार्यं साधयिष्यामीति यावत् । विभुरपीन्द्रः । विष्णुं आश्रित्य । स्वार्थं स्वप्रयोजनम् ॥ ६१ ॥

गच्छ नन्दव्रजं तत्र सुतावानकदुन्दुभेः ।
आसाते ताविहानेन रथेनानय माचिरम् ॥ ६२ ॥

सत्यधर्मीया — स्तुतिरियती कुतः प्रस्तुतं किं किं शंसेत्यतः शंसति ॥ गच्छेति । आनकदुन्दुभेः सुताविति तद्बन्धनसूचनार्थम् । तत्र नन्दव्रजे आसाते । अनेन रथेन ताविहानय । नालस्यं विलास्यमित्याह ॥ मा चिरमिति ॥ ६२ ॥

सुमनोरञ्जनी — अस्तु किमाज्ञापयसीति तत्राह ॥ गच्छेति । माचिरं शीघ्रम् ॥ ६२ ॥

निसृष्टः किल मे मृत्युर्देवैर्वैकुण्ठसंश्रयैः ।
तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः ॥ ६३ ॥

सत्यधर्मीया — भो भो राजन् कुतः कुतः कुमारमारणमिति न वदेति स्वयं हेतुमाह ॥ निसृष्ट इति । वैकुण्ठो हरिस्तत्संश्रयैर्देवैर्मे मृत्युर्हन्ता निसृष्टः क्लृप्तो मयैवाग्रे जाग्रता भाव्यमिति तावानयेत्युक्तिः । एको नाकार्यः कार्यः प्रकाशः स्यादिति ताविति नन्दाद्यैर्गोपैः सममिति च वचनम् । साभ्युपायनैर्देयदायसहितैः ॥ ६३ ॥

सुमनोरञ्जनी — वैकुण्ठो विष्णुः संश्रयो येषां तैः । मृत्युः तयोरन्यतरेण निसृष्टः क्लृप्तः । अभ्युपायनं राज्ञे दीयमानकरः तेन सहितैः ॥ ६३ ॥

घातयिष्य इहानीतौ कालकल्पेन हस्तिना ।
यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥ ६४ ॥

सत्यधर्मीया — इहानीतौ कालकल्पेन यमसमेन ततो हस्तिहस्ततो वैद्युतोपमैर्विद्युतो निर्गतो वैद्युताग्निस्तेनोपमा येषां ते तैर्मल्लैः । ते नेतरधृता इत्यप्याह ॥ अमल्लैरिति । मल्लो धारणं तन्नैषा-मित्यमल्लास्तैः । मलमल्लधारण इति स्मरणात् ॥ ६४ ॥

सुमनोरञ्जनी — कालकल्पेन मृत्युसदृशेन । वैद्युतः विद्युतो निसृतोऽग्निः । अशनिरिति यावत् । तस्योपमा येषां तैः ॥ ६४ ॥

तयोर्निहतयोस्तप्तान् वसुदेवपुरोगमान् ।
तद्बन्धून् निहनिष्यामि वृष्णिभोजदशार्हकान् ॥ ६५ ॥

सत्यधर्मीया — कुतो मनोरथे न्यूनता स्वप्ने च पयोन्नाशने कुतो द्रवतेति नीतेः सर्वं स्वाभिप्रेतं शंसति ॥ तयोरिति । तप्तान्दुःखतः ॥ ६५ ॥

उग्रसेनं मत्पितरं स्थविरं राज्यकामुकम् ।
तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ ६६ ॥

ततश्चैषा मही मित्र भवित्री नष्टकण्टका ।
जरासन्धो मम गुरुर्द्विविदो दयितः सखा ॥ ६७ ॥

सत्यधर्मीया — उग्रसेनं मत्पितरं स्थविरं राज्यकामुकमिति मारणकारणनिकुरुम्बोक्तिः । तत इति एतद्धननानन्तरं मही नष्टक्षुद्रोपद्रवा भवित्री । स्वानुबन्धिनः कथयति ॥ जरासन्ध इति । मम गुरुः श्वशुरः । श्वशुरः पञ्चमो गुरुरित्युक्तेः ॥ ६६,६७ ॥

सुमनोरञ्जनी — हे मित्र ! जरासन्धादीनां सत्वात्कथं निष्कण्टका भविष्यतीति तत्राह ॥ जरेति ॥

शम्बरो नरको बाणो मय्येव कृतसौहृदाः ।
तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ॥ ६८ ॥

सत्यधर्मीया — बाण इति सरलः पाठः । वात इति । वात एव तन्नामा कल्पको वातापिर्वा तैः सह सुरपक्षीयान्नृपान् हत्वा महीं भोक्ष्य इत्यन्वयः ॥ ६८ ॥

सुमनोरञ्जनी — अन्ये सुरपक्षीयाः सन्तीत्यतस्तत्राह ।। तैरिति ।। ६८ ।।

एतज्ज्ञात्वाऽऽनय क्षिप्रं रामकृष्णाविहार्भकौ ।
धनुर्यागनिरीक्षार्थं द्रष्टुं यदुपुरश्रियम् ।। ६९ ।।

सत्यधर्मीया — एतज्ज्ञात्वाऽपदेशमुपादिशति ।। धनुरिति । यदुपुरश्रियं द्रष्टुं च ।। ६९ ।।

सुमनोरञ्जनी — आनय । मनसि गूढं निमित्तमुक्त्वा बाह्यं निमित्तमाह ।। धनुर्यागेति ।। ६९ ।।

अक्रूर उवाच—

राजन् मनीषितं सम्यक् तव चावद्यमार्जनम् ।
सिद्ध्यसिद्ध्योः समं कुर्याद् दैवं हि फलभावनम् ।। ७० ।।

सत्यधर्मीया — श्रुततद्वचनश्चातुरीत आतुरं प्रति वक्ति ।। राजन्निति । मनीषितं सध्र्यक्सम्यगिति समीचीनौ पाठौ । अवद्यमार्जनमवद्यं मृत्युमेष्यन्तं ज्ञात्वा न यत्नं तेन इति यदवद्यमप्राबुद्ध्यं तस्य मार्जनम् । अन्तरङ्गतस्तु ममावद्यस्य पापस्य नाशनमिति । अत एव चशब्दोऽपि । सिद्धिश्चासिद्धिश्च तयोः समं यथा तथा कुर्यात् । कुतो न मदुक्तिसोत्कण्ठो भवति भवानसन्दिग्धेऽर्थे च कुतः सन्दिग्धे इत्यत आह ।। हीति । यतो दैवं फलं भावयत्युत्पादयतीति तत्तथेति । यत्नस्तु सर्वथाऽनुष्ठेयः फलं त्वीश्वरायत्तमिति तात्पर्यम् ।। ७० ।।

सुमनोरञ्जनी — हे राजन् ! अवद्यस्य मरणस्य मार्जनं परिहरणम् । मनीषितं कर्तुमिच्छा-विषयीभूतम् । तत् सम्यगेव । सिध्यसिध्योः फलस्य । सिद्धावसिद्धौ च । मन इति शेषः । समं खेदमोदरहितम् । कुर्यात् । कुत इत्यतः फलस्य स्वप्रयत्नाविषयत्वादित्याह ।। दैवमिति ।। फलभावनं फलकारणम् ।। ७० ।।

मनोरथान् करोत्युच्चैर्जनो दैवहतानपि ।
युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ।। ७१ ।।

सत्यधर्मीया — तर्हि यदर्हणं निष्फलं तुभ्यं न मदर्थितं रुरुच इत्यतः स्वावश्यकमिदमिति बाधकमुपन्यस्यापि किञ्चित्साशं कुर्वन्नाह ।। मनोरथानिति । जनो मनोरथान्दैवहतानपि करोति कुर्वंश्च हर्षशोकाभ्यां युज्यते । साहसमेवं न कार्यं चेदपि ते आज्ञां करोमि गच्छामीति यावत् । प्रभ्वाज्ञायाः प्राज्ञेनानुल्लङ्घ्यत्वादिति भावः ।। ७१ ।।

सुमनोरञ्जनी — सिध्यसिध्योः खेदमोदौ लोके दृष्टावित्याह ॥ मनोरथानिति । दैवहतान् दैवप्रतिकूलान् । अथापि एवं सत्यपि । राजाज्ञाया अखण्डितत्वात् ते तवाज्ञां करोमीति ॥ ७१ ॥

श्रीशुक उवाच—

एवमादिश्य चाक्रूरं मन्त्रिणश्च विसृज्य सः ।
प्रविवेश गृहं कंसस्तथाऽक्रूरः स्वमालयम् ॥ ७२ ॥

इति श्रीमद्भागवते दशमस्कन्धे चतुस्त्रिंशोऽध्यायः ॥

सत्यधर्मीया — गृहं कंसः प्रविवेश तथाऽक्रूरोऽपि स्वमालयं प्रविवेशेत्यन्वयः ॥ ७२ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे चतुस्त्रिंशोऽध्यायः ॥ १०-३४ ॥

सुमनोरञ्जनी — विसृज्य प्रेषयित्वा ॥ ७२ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां चतुस्त्रिंशोऽध्यायः ॥ १०-३४ ॥

॥ अथ पञ्चत्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्दरयन् मनोजवः ।
सटावधूताभ्रविमानसङ्कुलं कुर्वन् नभो हेषितभीषिताखिलः ॥ १ ॥

सत्यधर्मीया — नारदः स्वस्य वर्तमानवर्तिष्यमाणचरितमतिरस्तीति सूचयितुं तथाऽस्तौषीदिति प्रमेयं निरूप्यते । तत्रादौ कंसशंसितः केशी किं चकारेत्यत ईरयति ॥ केशी त्विति । कंसेन प्रहित आदिष्टो महाहयस्तदाकारः खुरैर्महीं निर्दरयन्भिन्दन्मनोजव इवेत्यूहनाज्ज्ञातः सटाभिः स्कन्दगतरोमभिरवधूतान्यभ्राणि मेघा विमानानि च तैः सङ्कुलं नभो गगनं कुर्वन् हेषितात्स्वशब्दाद्भीषितमखिलं येन सः ॥ १ ॥

सुमनोरञ्जनी — केशिवधलक्षणं भगवद्विक्रमं वक्तुमुपक्रमते ॥ केशीति । केशी नामतः । कंसेन प्रहितः प्रेषितः । महाहयरूपी महीं खुरैः निर्दरयन् नितरां दलयन् । निर्विद्येत्यादिवत् निरोऽपि नितरामित्यर्थकता युज्यते । नभः । सटाः स्कन्धगतरोमावलयः । ताभिरवधूतानि निरस्तानि अभ्राणि विमानानि च । तैः संकुलं निबिडं कुर्वन् । हेषितेन अश्वजात्युचित्तेन गर्जनेन भीषितं अखिलं येन सः ॥१॥

विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः ।
दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन् ।। २ ।।

सत्यधर्मीया — विशालौ नेत्रौ यस्य सः । विकटं विशालं विकरालं वाऽऽस्यं कोटरं गर्तं यस्य सः । विकटः सुन्दरे प्रोक्तो विशालविकरालयोरिति विश्वः । बृहद्गलः स्थूलगलप्रदेशः । नील-महाम्बुदेनोपमा सादृश्यं यस्य सः । दुर्दुष्ट आशयोऽभिप्रायो यस्य सः । नन्दस्य नन्दगोपस्य व्रजं कम्पयन्नन्दस्य मुदो व्रजं कम्पयंश्चालयन्नित्यप्यर्थो जगाम ।। २ ।।

सुमनोरञ्जनी — विकटं विस्तृतं आस्यकोटरं मुखगर्तं यस्य सः । दुराशयः दुष्टाभिप्रायः । व्रजं कंपयन् जगामेति सम्बन्धः ।। २ ।।

तं त्रासयन्तं भगवान् स्वगोकुलं स्वहेषितैर्बालविघूर्णिताम्बुदम् ।
आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयन्स व्यनदन् मृगेन्द्रवत् ।। ३ ।।

सत्यधर्मीया — स्वहेषितैर्गोकुलं त्रासयन्तं बालेन पुच्छेन विघूर्णिता अम्बुदा येन तमात्मानं स्वमाजौ युद्धविषये मृगयन्तमग्रणीस्तत्पुरःसर आह्वयन्स मृगेन्द्रवद्व्यनदन्ननाद ।। ३ ।।

सुमनोरञ्जनी — स्वहेषितैः स्वगोकुलं गोसमुदायं त्रासयन्तम् । बालेन पुच्छेन विघूर्णिताः संभ्रान्ताः इतस्ततश्चालिता इति यावत् । अम्बुदा येन तम् । आजौ युद्धार्थम् । आत्मानं स्वं मृगयन्तम् । अग्रणीः अभिमुखं गच्छन् । मृगेन्द्रवत् सिंहवत् । नदन् ध्वनिं कुर्वन् स कृष्णः उपाह्वयत् आह्वयामास ।। ३ ।।

स तं निशम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः ।
जघान पद्भ्यामरविन्दलोचनं दुरासदश्चण्डजवो दुरत्ययः ।। ४ ।।

सत्यधर्मीया — स केशी तं केशवनादं यो दुरत्ययस्तमरविन्दलोचनं पद्भ्यां जघानेत्यप्यन्वयः ।। ४ ।।

सुमनोरञ्जनी — स तं नादम् । नभस्थलं पिबन्निव मुखं व्यादायेति शेषः ।। ४ ।।

तद् वञ्चयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः ।
सावज्ञमुत्सृज्य धनुःशतान्तरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ।। ५ ।।

सत्यधर्मीया — तत् पादहननम् । सावज्ञं सानादरं यथा तथा ।। ५ ।।

सुमनोरञ्जनी — तत् हननम् । वञ्चयित्वा सावज्ञं अवज्ञया हेलनेन सहितं यथा भवति तथा । उत्सृज्य क्षिप्त्वा । तार्क्ष्यस्य कश्यपस्य सुतो गरुडः ॥ ५ ॥

स लब्धसञ्ज्ञः पुनरुत्थितो मुखं व्यादाय केशी तरसाऽऽपतद् हरिम् ।
सोऽप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ॥ ६ ॥

सत्यधर्मीया — यद्व्यादायायतीकृत्य हरिं प्रत्यभ्यपतत् । स हरिरप्यस्य तस्मिन्वक्त्रे उत्तरं दक्षिणं (उत्तरशब्दः उत्तमार्थकः । उत्तमत्वं च वामदक्षिणयोः दक्षिणस्यैव इत्यभिप्रायेणेयं व्याख्या । ''उत्तरं प्रतिवाक्ये स्यादूर्ध्वोदीच्योत्तमेऽन्यवत्'' इति विश्वः) स्म यन्निति पदच्छेदः । प्राप्तः प्रवेशयामास । यथा मन्त्रज्ञो बिले तत्कृतसुषिरे उरगं सर्पं प्रवेशयति तथेत्यनेन व्यथासामान्याभावं सूचयति ॥ ६ ॥

सुमनोरञ्जनी — व्यादाय । मुखमिति शेषः । उत्तरं सव्यम् (सव्यशब्दः वामदक्षिणोभयार्थकः । ''सव्यं दक्षिणे । वा मे च प्रतिकूले च'' इति हेमकोशः) ॥ ६ ॥

दन्ता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा ।
बाहुश्च तद्देहगतो महात्मनो यथाऽऽमयः संववृधे उपेक्षितः ॥ ७ ॥

सत्यधर्मीया — ते भगवद्भुजस्पृशः केशिनो दन्ता निपेतुः । तप्तमग्रावयः स्पृशन्तीति स्पृशो यथा तथा पेतुः । क्वचिदेकसकारः पाठः । तत्र तप्तमयमतितप्तं लोहादि तत्स्पृश इवेत्यर्थः प्रवेशितः । ईशितुर्बाहुस्तद्देहगत उपेक्षितो रोगिणाऽऽमयो रोगो यथा वर्धते तथा ववृधे । विवक्षाभावात्सन्ध्यभावः ॥ ७ ॥

सुमनोरञ्जनी — ते, व्यात्तमुखे दृश्यमानाः दन्ताः निपेतुः । तप्तं अयोलोहं स्पृशन्तो यथा पतन्ति तथेति । बाहुश्च संववृधे स्थूलोऽभवत् । उपेक्षितः आमयो व्याधिः ॥ ७ ॥

समेधमानेन स कृष्णबाहुना निरुध्यवायुश्चरणांश्च विक्षिपन् ।
प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लण्डं विसृजन् क्षितौ व्यसुः ॥ ८ ॥

सत्यधर्मीया — समेधमानेन वर्धमानेन निरुद्ध्यमानवायुः प्रतिबद्धश्वासो लण्डं शकृत् । तुरगस्य । शकृल्लण्डं लङ्काप्राकारकोशयोरित्यभिधानम् । लेण्डमिति च पठन्ति स्फुटोऽर्थः । व्यसुर्निष्प्राणः ॥ ८ ॥

सुमनोरञ्जनी — विक्षिपन् इतस्ततः प्रसारयन् । लण्डं शकृत् । तुरंगस्य शकृल्लंडं लङ्काप्राकारकोशयोरिति यादवः । व्यसुः विगतप्राणः ॥ ८ ॥

तद्देहतः कर्कटिकाफलोपमाद् व्यसोरपाकृष्य भुजं महाभुजः ।
अविस्मितोऽयं निहतारिरुस्रियैः प्रसूनवर्षैर्ववृषद्भिरिडितः ॥ ९ ॥

सत्यधर्मीया — व्यसोः, कर्कटिकाफलमुर्वारुकविशेषस्तदुपमात्तद्देहतो महाभुजो भुजमपाकृष्य स्वयमविस्मित उस्रियैर्देवैर्गतम् । प्रसूनवर्षैर्ववृषद्भिवर वृषद्भिरल्लोपेनावकिरद्भिरित्यर्थः । वृषतो वर्षणादिति भाष्यप्रयोगान्न गुणः । ईडितः स्तुतः । प्रसूनं फलपुष्पयोरित्युक्तेः फलपुष्पवर्षैरित्यर्थः ॥९॥

देवर्षिरुपसङ्गम्य भागवतप्रवरो नृप ।
कृष्णमक्लिष्टकर्माणं रहसीदमभाषत ॥ १० ॥

सत्यधर्मीया — कंसं प्रति शंसित्वा तद्धिंसकं प्रति प्रतिवक्तुमागतो नारदो विशारदमेव-मवोचदित्याह ॥ देवर्षिरिति । भागवतप्रवरो देवर्षिरक्लिष्टकर्माणं कृष्णं रहस्युपसङ्गम्य देवगुह्यस्या-प्रकाश्यत्वाद्रहसीत्युक्तिः । इदं वक्ष्यमाणमभाषत ॥ १० ॥

सुमनोरञ्जनी — कर्कटिकाफलोपमात् तद्वद्भिदीर्णात् । प्रसूनं पुष्पसमुदायम् । ववृषद्भिः पौनःपुन्येन अतीव वर्षद्भिः उस्रियैः देवैः ॥ ९,१० ॥

कृष्णकृष्णाप्रमेयात्मन् योगेश जगदीश्वर ।
वासुदेवाखिलावास सात्वतां प्रवर प्रभो ॥ ११ ॥

सत्यधर्मीया — अस्मन्मर्म कंसाय शंसितवान्किल कथमुत्तरत्रेति मुरमथनेनेश्वरे त्वयि दुश्चित्ततेति भावेन स्तौति ॥ कृष्ण कृष्णेति । श्रुतिप्रतीकधृतिरिति श्लोकद्विके पुनरुक्तिरार्थिकी न दोषाय । एतेन कृतकृत्या इति न कृत्यविचारे मन आयासनीयम् । अप्रमेयात्मन् अपरिच्छिन्नस्वामिन् अपरिच्छिन्नकाय वा । योगेश ज्ञानाद्युपायस्वामिन् हे योग सर्वयोजक । यथोक्तं पञ्चमतात्पर्ये । युज्यतेऽनेनेति योगो हरिरिति । ईश लक्ष्मीपते! जगदीश्वर जगत्स्वामिन् प्राणपते! वासुदेव । प्रवृत्तिनिमित्तमाह ॥ अखिलावासेति । प्रकृते सात्वतां प्रवर यादववर । वस्तुतस्तु सात्वन्तो भक्ताः पञ्चरात्रिकास्तत्प्रवर । प्रभो जगदुत्पादक । सात्वतां प्रवराणां प्रभो इति वा ॥ ११ ॥

सुमनोरञ्जनी — अप्रमेयात्मन् अपरिच्छिन्नस्वरूप! योगेश योगस्य मोक्षसाधनज्ञानरूपोपायस्य ईश फलप्रद! अखिलावासत्वादेव वासुदेव! वासनाद्वासुदेवोऽसीति वचनात् । सात्वतां भक्तानाम् ॥११ ।

त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ।
गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥ १२ ॥

सत्यधर्मीया — सर्वभूतानामात्माऽन्तर्नियामक एको मुख्यः । एधसां काष्ठानां मध्ये ज्योतिरग्निरिव मतिमथनलभ्यः । गुहाशयो हृदयगुहायामाशेत इति सः । गूढः प्रसादं विना । साक्षी कृतसुकृतासुकृतसाक्षाद्द्रष्टा । महापुरुषः क्षराक्षरपुरुषोत्तमः । ईशेभ्यो वर ईश्वरः । श्रुतय एतन्मूलभूताः षष्ठादौ प्रदर्शिता विमृश्याः ॥ १२ ॥

सुमनोरञ्जनी — त्वमेक एव । आत्मा स्वामी । न राजादिवद्बहिः स्थित्वा नियमनमात्रेण किन्तु गुहाशयः हृदयगुहायां निविष्टः । एधसां काष्ठानां मध्ये ज्योतिरिव अग्निरिव । गूढः । न केवलमेतावत् किन्तु सर्वेन्द्रियेषु स्थित्वा साक्षादीक्षत इति साक्षी । महापुरुषः उत्तमपुरुषः । कुतः । यत ईश्वरः ईशेभ्योऽपि वरः श्रेष्ठः ॥ १२ ॥

आत्मन्नात्माश्रयः पूर्वं मायया सृजसे गुणान् ।
तैरिदं सत्यसङ्कल्पः सृजस्यत्स्यवसीश्वरः ॥ १३ ॥

सत्यधर्मीया — साक्षादधोक्षज एव भवान्भुव्येतदर्थमवतीर्ण इत्याह ॥ आत्मन्सर्वस्वामिन्निति । पूर्वमादौ मायया स्वेच्छया निमित्तभूतया मायया प्रकृत्योपादानभूतया गुणांस्त्रीन्सृजसे सृजसि । तैः स्वसृष्टैर्गुणैरिदं जगत्सृजस्यवस्यत्सि भक्षयसि च । ईश्वर इत्येतत्सम्भावकं नान्याश्रय इत्याह ॥ आत्माश्रय इति । स्वाश्रयः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति श्रुतिः । आत्मनेति पाठे स्वेनैव प्रेरकव्यतिरेकेण । यद्वाऽऽत्मनां चेतनानां नात्मनां जडानां चाश्रय इत्यर्थः । प्रतिज्ञा-प्रतिहतिर्नास्तीति सत्यसङ्कल्प इति ॥ १३ ॥

सुमनोरञ्जनी — आत्मना परप्रेरणामन्तरेण आत्मैवाश्रयो यस्यासौ । अनेनाधिष्ठानानुपपत्ते-श्चेत्येतदस्मत्पक्षे नास्तीति सूचितम् । मायया प्रकृत्या । गुणान् सत्वादीन् । तैः सत्वादिभिः । इदं जगत् ॥ १३ ॥

स त्वं भूभारभूतानां दैत्यप्रमथरक्षसाम् ।
अवतीर्णो विनाशाय साधूनां रक्षणाय च ॥ १४ ॥

सत्यधर्मीया — तत्रावनानवनेऽधिकार्यानुगुण्येन कर्तुं विश्वभर्तुस्तवावतार इत्याह ॥ स इति । स भगवद्रूपस्त्वं गोपरूपो भूभाररूपदैत्यप्रमथरक्षसां विनाशाय साधूनां रक्षणाय चावतीर्णोऽसि ॥१४॥

दिष्ट्या ते निहतो दैत्यो लीलयाऽयं हयाकृतिः ।
अस्य ह्रेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवम् ॥ १५ ॥

सत्यधर्मीया — मुने नाधुना मया तदनुष्ठितमिति न वदेति कृतं किञ्चिदुदाहृत्य भाविनं व्यापारमपारविदाह ।। दिष्ट्येति । अयं हयाकृतिर्दैत्यो दैत्यस्वरूपो लीलया ते त्वया हत इति दिष्ट्या सुखं जातम् । किं तन्महत्त्वमित्यत आह ।। अस्येति । हेषितात्सन्त्रस्ता अनिमिषा दिवं त्यजन्ति । तद्भीस्तावत्पर्यन्तम् । स्वरभीरभूदिति भावः ।। १५ ।।

सुमनोरञ्जनी — दैत्यौ निहतावित्येतत् दिष्ट्या परमानन्दकरम् ।। १५ ।।

चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिपान् ।
कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ।। १६ ।।

सत्यधर्मीया — स्वयं यत्पीठिकां दृढीकृत्यायातस्तमर्थमाह ।। चाणूरमिति । मुष्टिकोक्तिस्तु बलोऽप्युपलतुलस्त्वमेव तत्र स्थित्वा हंसीति ध्वनयितुमिति ज्ञेयम् । तोषपारवश्येन कथापौर्वापर्यमिति तात्पर्यं ज्ञेयम् । अन्यांस्तोसलादीन्हस्तिपांस्तदादीन्परश्वोऽहनि कंसं च निहतं द्रक्ष्ये पश्यामि । न च स्वोक्ताधिकरणदिनापेक्षया चतुर्थेति जातस्य कंसहिंसनस्य 'कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते' इति परश्वो दर्शनोक्तिर्नास्य निर्युक्तिकेति वाच्यम् । परश्व इत्यस्य पराभ्यां स्वोत्तराभ्यां तिथिभ्यां सहितं श्वः इति विग्रहकरणे विवक्षितस्य चतुर्थस्याह्नो लाभसम्भवात् । यद्वा ते त्वां परश्वो मधुरायां द्रक्ष्येऽहनि तदितरेऽहनि निहतं कंसं च द्रक्ष्य इति योजनायामभिलषितसिद्धेः । अथवा पर श्व इति भिन्नलाभे तच्च योग्यतया चतुर्थमेवाह्नो गृहीतुं शक्यत्वात् ।। १६ ।।

सुमनोरञ्जनी — ते त्वया ।। १६ ।।

तस्यानु शङ्खयवनमुराणां नरकस्य च ।
पारिजातस्य हरणमिन्द्रस्य च पराजयम् ।। १७ ।।

सत्यधर्मीया — तस्यानु तमनु शङ्खः पञ्चजनासुरो यवनः कालयवनो मुरस्तेषाम् । नरकस्य भूमिजस्य । पारिजातस्य हरणं द्वारकां प्रति । इन्द्रस्य च पराजयम् ।। १७ ।।

उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणम् ।
नृगस्य मोक्षणं पापाद् द्वारकायां जगत्पते ।। १८ ।।

सत्यधर्मीया — हे वीर! कन्यानां प्रत्याहृतानाम् । वीराणां कन्यास्तासामिति वा । रुक्मिण्यादीनाम् । वीर्यशुल्कादिलक्षणं वीर्यशुल्कं कन्यामूलद्रव्यं तदेवादिर्यस्य लक्ष्यवेधादेस्तदेव लक्षणं चिह्नं यस्य स तमुद्वाहं द्रक्ष्य इत्यन्वयः । हे जगत्पते द्वारकायां तत्रापि गर्ते नृगस्य कृकलासस्य मोक्षणम् ।। १८ ।।

सुमनोरञ्जनी — तस्य कंसहननस्य । अनु पश्चात् । शङ्खादीनां हननमिति वाक्यशेषः । द्वितीयान्तानां सर्वेषां द्रक्ष्यामीत्युत्तरेणान्वयः । शङ्खः पञ्चजनाऽसुरः । यवनः कालयवनः । वीर्य-शुल्कादि लक्षणं चिह्नं नाम वा यस्य तम् ॥ १७,१८ ॥

स्यमन्तकस्य च मणेरादानं सह भार्यया ।
मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः ॥ १९ ॥

सत्यधर्मीया — भार्ययेति भाविभावोक्तिः । कान्त्या श्रेष्ठेति वा । श्यमन्तकस्य मणेः सत्राजितः सकाशादादानम् । ब्राह्मणस्य सान्दीपनेः स्वमातुश्च तथा तृणावहस्य च मृतपुत्राणामुपादानं तत्समीपे दानम् । स्वधामत एकत्र यमलोकः स्वधामापरत्रानन्तासनमिति विवेकः । पुत्रोऽपि, न तत्क्षणे मृत्वा स्थितो न देहः परीक्षित्तत्रासून्निवेशयामासेत्यपि नेत्याह ॥ स्वधामत इति । स्वधाकारः पितॄणा-मित्यादेः स्वधया मतः सत्कृतः पितृवर्गप्रविष्टो यस्तस्य पुत्रस्योपादानं ज्ञेयमिति स्वगेहादित्यनुक्त्वा स्वधामत इत्युक्त्याऽसूचयदिति ज्ञेयम् । द्विजदारकान्मयोपनीता द्विजात्मजा इति तद्बहुत्वादिन-बाहुविध्याज्जातो जात इत्युक्तेश्च स्वधायोग्यत्वात्तथोक्तिर्वेति मन्तव्यम् । स्वधायामस्मत्कर्मिकायां मतः सम्मतो यस्तत्पुत्रोपादानमिति वा ॥ १९ ॥

सुमनोरञ्जनी — भार्यया जाम्बवत्या सह । ब्राह्मणाय स्वगुरवे सान्दीपिनामकाय ॥ १९ ॥

पौण्ड्रकस्य वधं पश्चात् काशिपुर्याश्च दीपनम् ।
दन्तवक्रस्य निधनं चैद्यस्य च महाक्रतौ ॥ २० ॥

सत्यधर्मीया — पौण्ड्रकस्य त्वज्ज्येष्ठभ्रातुः । काशिपुर्याः करवीरनगर्या दीपनं दाहम् । दन्तवक्रस्य चैद्यस्य च महाक्रतौ धर्मराजसूये ॥ २० ॥

सुमनोरञ्जनी — महाक्रतौ पाण्डवैः क्रियमाणराजसूययागे ॥ २० ॥

यानि चान्यानि वीर्याणि द्वारकामावसन् भवान् ।
कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि ॥ २१ ॥

सत्यधर्मीया — यानि चान्यानि तव वीर्याणीति साम्मुग्ध्याऽभिधानं यादृशतादृशानि तानीत्यौदासीन्येन न किन्तु कंसाद्यायुरल्पमवशिष्टं कृष्णेन गन्तव्यमागन्तव्यमक्रूरेणेति तद्दृष्टचेति मन्तव्यम् । भुवि द्वारकायामावसन्भवान्कर्ता तानि द्रक्ष्यामि । कविभिर्गेयानि ते च मुक्ता अमुक्ताश्चेति ज्ञेयम् ॥ २१ ॥

सुमनोरञ्जनी — भुवि गेयानीत्यनेन श्रवणमननकीर्तनादिभिर्भवापवर्गायैव त्वयेमानि चरित्राणि कृतानीति सूचयति ॥ २१ ॥

अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै ।
अक्षोहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥ २२ ॥

सत्यधर्मीया — सञ्जिहीर्षाया परमिकायाः कार्यमुदीर्य पुनर्भगवत्त्वेन स्तुवन्नुपसंहरति ॥ अथ त इत्यादिना । कालरूपस्य संहाराकारस्वीकारिणः क्षपयिष्णोरमुष्येत्यर्जुनसारथिपदसमस्तार्जुनपदेन योग्यतयाऽन्वेति । कौरवबलं क्षपयिष्णोः संहर्तुकामस्यामुष्यार्जुनस्य सारथिस्तस्य । यद्वा कालरूपस्यापेक्षितवितरणकल्पतरोः क्षपयिष्णोः संहर्तुमिच्छोरर्जुनसारथेरमुष्य तव सकाशादक्षौहिणीनामष्टादश सङ्ख्यानां निधनं द्रक्ष्यामीति ॥ २२ ॥

सुमनोरञ्जनी — अथ अनन्तरम् । क्षपयिष्णोः संहर्तुकामस्य कालरूपस्य ते सकाशात् । जायमानं त्वदिच्छया जायमानमिति यावत् । अक्षोहिणीनां अष्टादशसंख्यानां निधनम् ॥ २२ ॥

विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवर्तिनम् ।
स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवन्तमीमहि ॥ २३ ॥

सत्यधर्मीया — विशुद्धं विज्ञानं विशिष्टज्ञानं तेन घनं निबिडं तद्रूपमिति यावत् । स्वसंस्थया । स्वस्थित्या समाप्ताः प्राप्ताः सर्वेऽर्था येन यं वा स्वकर्तृक्या संस्थया मृतिरूपिण्या समाप्ताः समापिताः स्वस्वकारणनिविष्टा अर्था येन स तम् । अमोघवर्तिनमव्यर्थं यथा तथा वर्तत इति तम् । स्वतेजसा स्वसामर्थ्येनैव नित्यं निवृत्तो मायागुणानां प्रकृतिगुणानां प्रवाहो येन स तं भगवन्तमीमहि शरणमिति शेषः ॥ २३ ॥

सुमनोरञ्जनी — एवमुक्त्वा पुनः स्तौति ॥ विशुद्धेति । विशुद्धं जडामिश्रम् । विज्ञानघनं विज्ञानैकस्वरूपम् । स्वसंस्थया स्वस्वभावेनैव । सम्यक् प्राप्तसर्वार्थम् आप्तकाममिति यावत् । अनेन पूर्णानन्दतामाह । अमोघवर्त्तिनम् अमोघा वर्तिर्वर्तनं प्रवृत्तिरिति यावत् यस्यासौ तथोक्तः । अनेनाप्रतिबद्धशक्तिमत्तामाह । स्वतेजसा स्वप्रभावेन नित्यं निवृत्तः मायागुणानां प्राकृतगुणानां सत्वादीनां प्रवाहः कार्यपरंपरा यस्य तम् । ईमहि शरणमिति शेषः ॥ २३ ॥

त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम् ।
क्रीडार्थमाद्यन्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्त्वताम् ॥ २४ ॥

तात्पर्यम् – 'आदिनो राक्षसाः प्रोक्तास्तदन्तत्वाज्जनार्दनः । आद्यन्त इति विज्ञेयः परेशो ब्रह्मणीशनादि'ति ब्राह्मे ॥ २४ ॥

सत्यधर्मीया — त्वामीश्वरं स्वाश्रयमिति श्लोके आद्यन्तेति पदमर्श आद्यच्युत्पत्तिनाशवत्परमिति भ्रमभ्रंशं मानेन तनोति ॥ आदिन इति । आदिन आ सम्यगदोऽदनं येषामस्ति त इत्यादिनो राक्षसा णिनिर्वा । तदन्तत्वात्तन्नाशकत्वादाद्यन्त इति विज्ञेयः । ब्रह्मणि चतुर्मुखे स्थित्वा प्रेरणादीशनात्परेश इति विज्ञेयः । अनेन परस्येशनं तस्मादिति व्युत्पत्तिः सूचिता । अथ मूलार्थः ॥ स्वाश्रयमीश्वर-मात्ममायया स्वेच्छयैव विनिर्मितमशेषाणां ये विशेषाः सत्याधिपत्यादयस्तेषां कल्पनं येन तम् । अशेषाश्च ते विशेषाश्चेति वा विनिर्मिता निर्मितविरुद्धा नित्या अशेषा ज्ञानादयस्तेषां विशेषमहिम्नेति कल्पनमानन्द आनन्दीति यस्मिंस्तं वा । क्रीडार्थमाद्यन्तमनुष्यविग्रहम् । अनेनाकर्मनिर्मिततां तद्विग्रहस्याभिप्रैति । यदुवृष्णिसात्वतां धुर्यं वर्यं नतोऽस्मीत्यन्वयः । आद्यन्तश्चासौ मनुष्यविग्रहश्च तं मनुष्यवद्विग्रहो यस्याद्यन्तमनुष्यविग्रहम् ॥ २४ ॥

सुमनोरञ्जनी — तर्हि जगत्सृष्ट्यादिव्यापारः कथमित्यत आह ॥ त्वामिति । आत्माधीनया मायया प्रकृत्या । विनिर्मिता अशेषविशेषकल्पना अवान्तरभेदकल्पना येन तम् । क्रीडार्थं लीलार्थं, मनुष्यविग्रहवत्प्रतीयमानविग्रहो यस्य तम् । तदुक्तम् । आदिनो राक्षसा इत्यादि । धुर्यं, धुरं वहतीति धुर्यः, सर्वाभीष्टसाधकम् । ईमहीति पूर्वेणान्वयः ॥ २४ ॥

श्रीशुक उवाच—

एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः ।
प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः ॥ २५ ॥

सत्यधर्मीया — पूर्वत्रात्र च भागवतप्रवर इति वर्णाधिक्यं न वैकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामित्युक्तेर्न छन्दश्छेदकम् । तद्दर्शनोत्सवस्तस्य केशवकृतचाणूरकंसादिहिंसाकर्मणो दर्शने उत्सवो यस्य सः । चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिपान् । कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभाविति प्रार्थनानुकूल्यात् ॥ २५ ॥

सुमनोरञ्जनी — तद्दर्शनेन कृष्णदर्शनेन उत्सवः आनन्दो यस्य सः ॥ २५ ॥

भगवानपि गोविन्दो हत्वा केशिनमाहवे ।
पशूनपालयत् पालैः प्रीतैर्व्रजसुखावहः ॥ २६ ॥

सत्यधर्मीया — प्रीतैः पालैः सह ॥ २६ ॥

सुमनोरञ्जनी — पशून् चारयन्तः ॥ २६ ॥

एकदा ते पशून् पालाश्चारयन्तोऽद्रिसानुषु ।
चक्रुर्निलायनक्रीडां चोरपालापदेशतः ॥ २७ ॥

सत्यधर्मीया — निलायनक्रीडां नयनाच्छादनानन्तरमेकेन गन्तव्यं नेयाः पशवस्तेन तन्मार्गणं कर्तव्यमिति चोरपालापदेशतस्तद्व्याजतः क्रियमाणा निलयनक्रीडा ताम् ॥ २७ ॥

सुमनोरञ्जनी — निलायनक्रीडां निलीयहरणलक्षणक्रीडाम् । चोराणां पालानां च अपदेशः सङ्केतः । तस्मात् ॥ २७ ॥

तत्रासन् कतिचिच्चोराः पालाश्च कतिचिन्नृप ।
मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥ २८ ॥

सत्यधर्मीया — मेषायितास्ताननुकुर्वन्तः ॥ २८ ॥

सुमनोरञ्जनी — तदेवाह ॥ तत्रेति । मेषायिताः मेषवद्वर्तमानाः ॥ २८ ॥

मयपुत्रो महामायो व्यामो गोपालरूपधृक् ।
मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥ २९ ॥

सत्यधर्मीया — व्योमो नाम्ना गोपालरूपधृक् स्वयं चोरायितो मेषायितान्बहून्गोपानपोवाहापाजहार ॥ २९ ॥

सुमनोरञ्जनी — व्योमो नामतः । चोरायितः चोरवद्वर्तमानः । अपोवाह निन्ये ॥ २९ ॥

गिरिदर्यां विनिक्षिप्य नीतंनीतं महासुरः ।
शिलया पिदधे द्वारं चतुःपञ्चावशेषिताः ॥ ३० ॥

सत्यधर्मीया — नीतं नीतं मेषरूपगोपं गिरिदर्यां निक्षिप्य शिलया द्वारं पिदधे आच्छादयामास । अवशेषितसङ्ख्यामाह ॥ चतुःपञ्चावशेषिता इति । चत्वारः पञ्च वा चतुःपञ्चावशेषिता उर्वरिताः ॥ ३० ॥

सुमनोरञ्जनी — गिरिदर्यां पर्वतगुहायाम् । पिदधे आच्छादयामास ॥ ३० ॥

तस्य तत् कर्म विज्ञाय कृष्णः शरणदः सताम् ।
गोपान् नयन्तं जग्राह वृकं हरिरिवौजसा ॥ ३१ ॥

सत्यधर्मीया — सतां शरणदस्तस्य तत्कर्म वीक्ष्य हरिः सिंहो वृकं श्वापदमिव जग्राह ॥ ३१ ॥

सुमनोरञ्जनी — शरणदः अभयप्रदः । हरिः सिंहः ॥ ३१ ॥

स निजं रूपमास्थाय गिरीन्द्रसदृशं बली ।
इच्छन् विमोक्तुमात्मनं नाशक्नोद् ग्रहणातुरः ॥ ३२ ॥

सत्यधर्मीया — वेषमुन्मुच्य निजं रूपम् । गुरुणा महताऽऽत्मानं विमोक्तुं मोचयितुमिच्छन्नपि नाशक्नोच्छक्तो नाभूत् ॥ ३२ ॥

सुमनोरञ्जनी — गुरुणा महता । हरिणा । गृहीतः ॥ ३२ ॥

तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ।
पश्यतां दिवि देवानां पशुमारममारयत् ॥ ३३ ॥

सत्यधर्मीया — पशुमारममारयत्पशुमारं यथा हिंसितवान् । उपमाने कर्मणि चात्कर्तरि चेत्युक्तेः । पशुवदमारयत् । णमुलन्तः शब्दः ॥ ३३ ॥

सुमनोरञ्जनी — पशुमारम् पशोर्मारणक्रिया यथा भवति तथा ॥ ३३ ॥

गुहापिधानं निर्भिद्य गोपान् निस्सार्य कृच्छ्रतः ।
स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥ ३४ ॥

इति श्रीमद्भागवते दशमस्कन्धे पञ्चत्रिंशोऽध्यायः ॥

सत्यधर्मीया — गुहापिधानं निर्भिद्य कृच्छ्रतो व्योमकृतकष्टाद्गोपान्निःसार्य निष्कासयित्वा गोपैः सुरैश्च स्तूयमानः स्वगोकुलं प्रविवेश ॥ ३४ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे पञ्चत्रिंशोऽध्यायः ॥ १०-३५ ॥

सुमनोरञ्जनी — कृच्छ्रतः कष्टात् । निःसार्य मोचयित्वेत्यपि सम्बन्धः ॥ ३४ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां पञ्चत्रिंशोऽध्यायः ॥ १०-३५ ॥

॥ अथ षट्त्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः ।
उषित्वा रथमास्थाय प्रययौ नन्दगोकुलम् ॥ १ ॥

सत्यधर्मीया — इतोऽप्यधिकारी संसारकारागारबन्धं ध्वंसयितुं समीहमानः स्वयमक्रूरवद्भक्तिं कुर्यादिति दिदर्शयिषुरक्रूरस्य क्रूराज्ञातो गोकुलगमनं तत्र मनोरथकरणं तत्फललाभश्चेत्येतदेतदध्याये प्रतिपाद्यते । तत्रादौ तदाज्ञप्तः किं तत्क्षणे निष्क्रान्तः किं वा तां क्षणदां तत्रैव स्थित्वा प्रातरिति प्रथममनभ्युपगमेन द्वितीयमभ्युपगमेन समाधत्त इत्यभिधत्ते ॥ श्रीशुक इति । तां कंसशंसित-वासरशर्वरीम् ॥ १ ॥

सुमनोरञ्जनी — मधुपुर्यां मधुरायाम् ॥ १ ॥

गच्छन् पथि महाभागो भगवत्यम्बुजेक्षणे ।
भक्तिं परामुपगत एवमेतदचिन्तयत् ॥ २ ॥

सत्यधर्मीया — महान्भागो दैवं यस्य सः । एतद्वक्ष्यमाणं प्रमेयं नानाप्रकारेणाचिन्तय-च्चिन्तयामास ॥ २ ॥

सुमनोरञ्जनी — एतद् वक्ष्यमाणम् । एवं प्रकारेणैव ॥ २ ॥

अक्रूर उवाच—

किं मयाऽऽचरितं भद्रं किं तप्तं परमं तपः ।
किं वाऽथाप्यर्हते दत्तं यद् द्रक्ष्याम्यद्य केशवम् ॥ ३ ॥

सत्यधर्मीया — मया किं भद्रं मङ्गलमाचरितं पुरा । परमं किं तपस्तप्तं कृतम् । अर्हते योग्याय किं वा दत्तम् । अथाऽप्ययोग्यसहवासे सत्यपि यद्येन केशवं द्रक्ष्यामि । अद्येति न दवीयःपदवी मधुरागोकुलयोरिति सूचयति ॥ ३ ॥

सुमनोरञ्जनी — भद्रं पुण्यकर्म यागादि । किं किं जातीयमाचरितं स्यात् । अर्हते योग्याय । विष्णुभक्त्यादिगुणसंपन्नाय । यत् येन कारणेन ॥ ३ ॥

ममैतद् दुर्लभं मन्ये उत्तमश्लोकदर्शनम् ।
विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥ ४ ॥

सत्यधर्मीया — शूद्रजन्मनस्तज्जातिजातस्य ब्रह्मकीर्तनं वेदाध्ययनं यथा दुर्लभम् । श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणमध्ययने जिह्वाच्छेद इत्यादेः । तथा विषयात्मनो विषयेषु लौकिकेष्वात्मा मनो यस्य तस्य ममोत्तमश्लोकस्य ब्रह्माद्युत्तमस्तुत्यस्य दर्शनं दुर्लभं मन्ये ॥ ४ ॥

सुमनोरञ्जनी — विषयेष्वेवात्मा मनो यस्य तस्य शूद्रजन्मनः । ब्रह्मकीर्तनं वेदाध्ययनम् ॥ ४ ॥

मैवं मामवमंस्यामि स्यादेवाच्युतदर्शनम् ।
ह्रियमाणः कालनद्या क्वचित् तरति कश्चन ॥ ५ ॥

सत्यधर्मीया — दैवं देवो विजानाति नावजानामि मामहमिति ससम्भावनमावेदयति ॥ मैवमिति । एवमहं मां नावमंस्यामि सर्वथा योग्य इति न घटते घटनेति नावजानामि । अच्युतदर्शनं स्यादेव । कालनद्या ह्रियमाणः कश्चिद्विपश्चित्तरति न सर्वः सर्वदेति कश्चन क्वचिच्च्यां ध्वनयति । प्रायेण सर्वं योषिन्मूलमिति ध्वनयितुं कालनद्येत्युक्तिः ॥ ५ ॥

सुमनोरञ्जनी — मम दुर्लभमित्यश्लीलकीर्तनभीरुः पुनराह ॥ मैवमिति । अहं, एवं उत्तमश्लोकदर्शनं दुर्लभमिति माऽवमंस्यामि नावजानामि । अश्लीलं न कीर्तयामीति यावत् । स्यादेवेत्यत्र संभावकमाह ॥ कश्चिदिति । कालाख्यनद्या ह्रियमाणः ऊह्यमानः । यथा प्रसिद्धनद्यामूह्यमानोऽपि कश्चित्तुंबावलंबादिसामग्रीमान् तरति तथेति ॥ ५ ॥

ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः ।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ॥ ६ ॥

सत्यधर्मीया — अद्य ममामङ्गलं सर्वं नष्टं ध्वस्तम् । ममैव ममतैवाद्यं यस्य तदमङ्गलमिति पदमेकं वा । ततो मे भवो जन्म फलवान्सफलः । योगिभिरुपायवेदितृधात्रादिभिर्ध्येयमङ्घ्रिपङ्कजं नमस्य इति । यद्योगिभिः सनकादिभिर्वा ॥ ६ ॥

सुमनोरञ्जनी — भवो जन्म । योगिभिः सनकादिभिः ॥ ६ ॥

कंसो बताद्याकृत मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रिपद्मं प्रहितोऽमुना हरेः ।
कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥ ७ ॥

सत्यधर्मीया — अन्येषु सत्सु सान्निध्ये तान्विहाय मामाज्ञापयद्राजा मय्यनुग्रहं महान्तं कृतवानिदंप्रयोजनयोजकत्वाद्दिति चेतस्यालोच्य तुष्यन्भाषते ॥ कंस इति । कंसो मे मदुपर्यद्यात्यनुग्रहमकृत । बताश्चर्ये । येनामुना प्रहितोऽहं हरेः कृतावतारस्याङ्घ्रिपद्मं द्रक्ष्ये । पूर्वे आद्या यन्नखमण्डलत्विषा यस्य नखसमूहस्य महसा यद्दुरत्ययं तमोऽज्ञानं वा ग्लानिं वाऽतरंस्तस्य ॥ ७ ॥

सुमनोरञ्जनी — कंसोऽपि मे मयि । अत्यनुग्रहम् । अकृत अकरोत् । बतेत्याश्चर्ये कथम् । यतः अमुना कंसेन प्रहितः प्रेषितः । कृतावतारस्य कृष्णत्मनाऽवतीर्णस्य हरेः अङ्घ्रिपद्मं द्रक्ष्ये अत इत्यन्वयः ॥ तद्दर्शनफलं पुराकल्परूपार्थवादेन प्रशंसति ॥ कृतावतारेति । कृतः अवतारः आविर्भावो येन तस्य । भक्तान्प्रति आविर्भूतस्वरूपस्य । नखमण्डलत्विषा दृष्ट्या । दुरत्ययं तमः । अतरत् अत्यवर्तत । अहं तु समग्रमङ्घ्रिपद्मं द्रक्ष्ये । अतः । अत्यर्थमनुग्रहमकृतेत्यन्वयः ॥ ७ ॥

यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्विकैः ।
गोचारणायानुचरैश्चरद् वने यद् गोपिकानां कुचकुङ्कुमाङ्कितम् ॥ ८ ॥

सत्यधर्मीया — ब्रह्मभवादिभिः सुरैरङ्घ्रिपद्मं देव्या श्रिया च ससात्विकैः पाञ्चरात्रिक-समेतैर्मुनिभिश्चार्चितम् । अनुचरैर्गोपैः समं वने गोचारणाय गवां सञ्चारणार्थम् । तृणखादनार्थं वा । गोपिकानां कुचकुङ्कुमेनाङ्कितं यदेतीति यत्तदङ्घ्रिपद्मं द्रक्ष्य इति पूर्वेण वा द्रक्ष्यामीत्युत्तरेण वाऽन्वयः ॥ ८ ॥

सुमनोरञ्जनी — अङ्घ्रिपद्मं विशिनष्टि ॥ यदिति । ससात्वतैः पाञ्चरात्रिकैः सहितैः । वने सञ्चरत् । यच्च गोपिकानां कुचकुङ्कुमाङ्कितं तदद्य द्रक्ष्य इति पूर्वेणान्वयः ॥ ८ ॥

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकञ्जलोचनम् ।
मुखं मुकुन्दस्य गुडालकावृतं प्रदक्षिणं मे प्रचरन्ति वै मृगाः ॥ ९ ॥

सत्यधर्मीया — मुकुन्दवदनं द्रक्ष्यामि न चेदेवं शकुनसम्पत् न स्यादित्याह ॥ द्रक्ष्यामीति । सु शोभने कपोलनासिके यस्य तत् । स्मितावलोकेन सहिते अरुणकञ्जे इव विद्यमाने लोचने यस्य तत् । गुडालकावृतं गुडवदिक्षुविकृतवत्स्निग्धैरलकैश्चूर्णकुन्तलैरावृतम् । गुडः स्याद्गोलके हस्तिसन्नाहेक्षु-विकारयोरिति विश्वः । मृगादयः प्रदक्षिणं प्रचरन्ति । ये गरुडादयस्ते प्रदक्षिणं प्रगतदक्षिणं वामभागमित्यप्यर्थः । यैर्यैर्यथा यथा गन्तव्यं ते तथा चरन्तीति भावोऽवसेयः ॥ ९ ॥

सुमनोरञ्जनी — स्मितसहितावलोको ययोस्ते च ते अरुणकंजवल्लोचने यस्य तत् । गुडाः

अङ्गुलिकाः तद्वलयीकृताः गुडवत् स्निग्धा वा अलकाः तैः आवृतम् । मुकुन्दस्य मुखं नूनं निश्चयेन द्रक्ष्ये । कुतः । वै यस्मात् मृगाः प्रदक्षिणं चरन्तीति ॥ ९ ॥

अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया ।
लावण्यधाम्नो भवितोपलम्भनं मह्यं ननु स्यात् फलमद्य सन्दृशः ॥ १० ॥

सत्यधर्मीया — भुवो भारावताराय मनुजत्वं मनुष्यतामीयुषो गतवतो भगवतो निजेच्छया स्वरूपभूतेच्छया लावण्यधाम्नः सौन्दर्याश्रयस्य मह्यं ममोपलम्भनं भविता दर्शनं भविष्यति । अद्याद्येत्यादरातिशयादुक्तिः । पृथक् पृथगन्वयो वा । मह्यं मम संदृशः फलं स्यान्ननु निश्चयः । समिति सामीचीन्यस्य योग्यतया फलपदार्थेऽन्वयः । दृशोरिति वक्तव्ये यद्दृश इत्युक्तं तेन ज्ञानस्यापि सफलतां सूचितवानिति । ननु स्यात्फलमञ्जसा दृश इत्यसदृशः पाठः ॥ १० ॥

सुमनोरञ्जनी — ईयुषः प्राप्तवतः । उपलम्भनं दर्शनं भविता भविष्यति । संदृशः सम्यक् पश्यतीति, समीचीना दृक् ज्ञानं यस्येति वा व्युत्पत्या संदृशः अपरोक्षज्ञानिनः यत्फलं विलक्षणसन्तोषोद्रेकरूपं तत् । मह्यम् अद्य स्यादित्यर्थः । यद्वा मह्यं मम दृशः नेत्रस्य सं समीचीनं फलं स्यान्ननु स्यादेव । समभेदे समीचीन इति च । प्रश्नावधारणैतिह्यसमीहानुमते नन्विति च । संदृश इत्येकं वा पदम् । नसंदृश इत्येकं वा पदम् । (?) नसंदृशे तिष्ठतीति श्रुतिः । सन्दर्शनसाधनस्य नेत्रस्येत्यर्थः ॥ १० ॥

य ईक्षिताऽहंरहितोऽप्यसत्सतोः स्वतेजसाऽपास्ततमोभिदाभ्रमः ।
स्वमाययाऽऽत्मन् रचितेषु तत् सन् प्राणादिभिर्जन्तुषु भाति चित्रधा ॥ ११ ॥

तात्पर्यम् – तत्सन् तथैव सन् ॥ ११ ॥

सत्यधर्मीया — स्वमाययाऽऽत्मन्नचितेषु तत्सन्निति श्लोके सन्विद्यमान इत्येतावताऽन्वयपूर्तौ तदित्यनावश्यकमित्यतोऽनूद्य तदर्थमाह ॥ तत्संस्तथैव सन्निति । तदित्यव्ययम् । तथैवाविकारेणै-वेत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ योऽहमित्यहङ्कारवाच्यव्ययम् । अभिमानरहितः । जन्तुभिरनुष्ठीय-मानयोरसत्सतोरशुभशुभयोः कर्मणोः । यद्यपि सदसतोरिति वक्तव्यं तथाऽप्यसुरा बहुला यस्मा-दित्यादेस्तदसद्बाहुल्यादसत्पुरस्करणमिति मन्तव्यम् । स्वतेजसा स्वसामर्थ्येन । अनेन मुक्ता-व्यक्तव्युदासः । अपास्तस्तमश्चाज्ञानं भिदा चान्यथामतिस्ताभ्यां जातो यो भ्रमोऽनवस्थानं येन सः । तमो ग्लानिर्भिदा गुणकर्मभेदो भ्रमश्चेत्येतेऽपास्ता येनेति वा । तमश्चाभिदाभ्रमोऽभेदभ्रमश्च येनेति वा । आत्मन्नात्मनि स्वाधारत्वेन स्वमायया स्वेच्छया निमित्तभूतयोपादानभूतया प्रकृत्या च रचितेषु जन्तुषु तत्तथैवाविकृत एव सन्वर्तमानः प्राणादिभिः सहेक्षिता साक्षी चित्रधा नानात्मना भाति ॥११॥

सुमनोरञ्जनी —— नायं साधारणः कश्चन किन्तु एको देवः सर्वभूतेषु गूढः इति श्रुतिप्रतिपाद्यं ब्रह्मैव यदुकुलेऽवतीर्णमित्याह य इत्यादिना ॥ य इति यच्छब्दः । स चावतीर्ण इति तच्छब्देनान्वेति । यः स्वमायया स्वाधीनया प्रकृत्या स्वेच्छया च । आत्मन् आत्मनि स्वाधारतया आत्मना स्वेनेति वा। प्राणादिभिः इन्द्रियादिभिः सह । रचितेषु सृष्टेषु जन्तुषु तत्सन् तथैव । तत्तदाकारेण तत्तत्क्रियानुकूल्यक्रियां कुर्वन्नेव विद्यमानः । चित्रधा भोक्तृभोग्य-सेव्यसेवक-भावादिना भाति । ज्ञानिनामिति शेषः । तदुक्तम् । तत्सन् तथैव सन् इति । स्वसृष्टाशेषजन्तुषु तत्तच्छरीरेन्द्रियादिषु तत्तदाकारेण विद्यमानः तदनुकूलाः क्रियाः कुर्वन्नेव ज्ञानिनां पूज्यपूजकतया तत्साधनतया भोक्तृ-भोज्यतत्तत्साधनतयेत्यनेकप्रकारेण भातीति भावः । तर्हि शरीराद्याकारेण विकारः प्राप्त इत्यतोऽप्याह ॥ तत्सन्निति । तथैव सन् अविकार एव सन्नित्यर्थः । तर्हि शरीरसम्बन्धकृतशुभाशुभफललेपः स्यादित्यत उक्तम् । सदसतोः शुभाशुभयोः जीवभोग्ययोः ईक्षिता साक्षीभूता एव न तु तत्कृत-नीचोच्चतादिमानिति । तत्र हेतुः अहंरहित इति । अभिमानरहित इत्यर्थः । तत्कुत इत्यत उक्तम् । स्वतेजसा स्वरूपसामर्थ्येन । अपास्तौ निरस्ते तमोभिदाभ्रमौ अज्ञानमिथ्याज्ञाने यस्य सः । यद्वा दह्यमानगेहगतयोरुभयोरपि दाहवदेकशरीरे जीवेन सह स्थितस्य परस्यापि शुभाशुभफललेपः स्यादेवेत्यतो नेत्याह ॥ स्वतेजसा स्वसामर्थ्येन सदसतोः सदसद्भ्यां शुभाशुभाभ्यां रहित इति । एकगेहगतयोरपि यथाग्निस्तंभवतोऽन्यतरस्य दाहाभावस्तथेश्वरस्येति भावः । अत एव अहम् । हन्नामा हन्यमानत्वादिति वचनानुसारेण हं जीवः तद्विलक्षणत्वादहं जीवविलक्षण इत्यर्थः ॥ ११ ॥

यस्याखिलामीवहभिः सुमङ्गलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगद् यास्तद्विरक्ताः स्युरशोभना मताः ॥ १२ ॥

तात्पर्यम् – शुम्भन्ति शोभयन्ति। 'शुम्भनं शोभनं शुम्भं शुभपर्यायवाचका' इत्यभिधानम्॥१२

सत्यधर्मीया —— यस्याखिलामीवहभिरिति श्लोके शुभशुम्भ भाषणे हिंसायां चेति धात्वनेकार्थ-ताया अत्राभिप्रेतार्थोऽयं तथाऽन्तर्णीतणिजर्थ इति तदनूद्य व्यातनोति ॥ शुम्भन्ति शोभयन्तीति । तत्र प्रमाणं च पठति शुम्भनं शोभनं शुम्भं शुभं चेति शब्दाः पर्यायवाचका इत्यर्थः । शुभशुम्भशोभार्थ इति मणिना शुम्भमाना इत्यृक्टीकाटिप्पणोक्तं चानुसन्धेयम् ॥ ततश्चायं मूलार्थः ॥ यस्यामीव-हभिरमीवानि पापानि घ्नन्तीति तैः । अमीवेति गतम् । गुणाश्चानन्दादयश्च कर्माणि गजगर्जन-मोचनादीनि प्रस्तुतानि च जन्मानि स्तम्भादित इति तैः । सुमङ्गलैश्चिन्तयितृमङ्गलप्रदैर्मिश्रा वाचः कृष्ण कृष्णाप्रमेयात्मन्नित्याद्या जगत्प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति शुभवत्कुर्वन्ति वा। पुनन्ति पवित्रयन्ति । प्रसिद्धमिति वैकारो द्योतयति । यास्तद्विरक्ता गुणकर्मजन्मभिस्तै रहिताः स्युस्ता अशोभना मताः ॥ १२ ॥

सुमनोरञ्जनी — या इति वक्ष्यमाणमत्रापि सम्बध्यते। याः वाचः, अखिलानां अमीवानि पापानि घ्नन्तीत्यखिलामीवहानि। तैः अखिलान्यमीवानि घ्नन्तीति वा। अत एव सुमंगलैः मङ्गलप्रदैः। यस्य हरेः गुणकर्मजन्मभिः गुणाः पूर्णानन्दादयः, कर्माणि जगत्सर्जनादीनि, जन्मानि मत्स्याद्यवताराः तैः। विमिश्राः प्रतिपाद्यप्रतिपादकभावसम्बन्धेन सङ्कलिताः तत्प्रतिपादिका इति यावत्। ता वै ता एव। जगत् प्राणन्ति प्राणयन्ति आह्लादयन्ति। णश्च निर्वृतिवाचक इत्यभिधानात्। जीवयन्तीति वा। शुभन्ति। व्याख्यातमेतद्भगवत्पादैः। शुम्भन्ति शोभयन्ति। शोभनं शुंभनं शूनं(?) शुभपर्याय-वाचकमित्यभिधानमिति। शुभयुक्तं कुर्वन्तीत्यर्थः। पुनन्ति परित्रयन्ति। याः वाचः तद्भिरक्ताः भगवद्गुणकर्माद्यप्रतिपादकाः स्युः ताः अशोभना इति अमंगला इति मताः संमता इत्यर्थः ॥ १२ ॥

स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत्।
यशो वितन्वन् व्रज आस्त ईश्वरो गायन्ति देवास्तदशेषमङ्गलम् ॥ १३ ॥

सत्यधर्मीया — एतावतोक्तं पर्यवसाययति ॥ स चेति। स च स एव सात्वतान्वये। अकारान्तः सात्वच्छब्दपर्यायः सात्वतशब्दः। तेषामन्वयेऽवतीर्णः। स वाऽवतीर्ण इति न पठन्पठंश्च स चेति सुखेनावतीर्णो न देवाद्यवतारवदंशांशिसुखानुसन्धानादिव्यत्यस्त्यवतार इति द्योतयामासुः। इन्द्र इद्धर्योः स चासंमिश्ल इत्यृग्भाष्ये स चा सुखेनेत्युक्तेः। षच समवाये, धात्वादेः षः सः। सम्पदादित्वात्क्विपि तृतीयैकवचनम्। धात्वनैकार्थ्यात्सुखार्थता। स चेति निपातपक्षे न कोऽपि क्लेशः। यथोक्तं माधवेन। स चेत्यस्य निपातत्वपक्षे स्फुटमाद्युदात्तत्वमिति। स्वसेतुपालाः स्वमर्यादा रक्षका येऽमरवर्यास्तेषां शर्म सुखं तत्करोतीति कृत्। सु अत्यन्तमसेतुपाला अमरेभ्यो वर्या अग्रतो जाताः पूर्वदेवास्तेषां शर्म कृन्ततीति स तथेति वा। यद्यशो वितन्वन्विस्तारयन्नीश्वरो व्रजे आस्ते तद्यशोऽशेषमङ्गलं देवा गायन्ति स च मूलरूपेण समवेतः सन्नेवावतीर्ण इति। स्वश्चासौ सेतुपश्च तं न लान्ति माददत इति न तत्त्वेन स्वीकुर्वन्तीति उर्वरितं पूर्ववत्। अमरा भवतेति वरो येषामस्ति तेऽमरवरिणः स्वसेतुपालाश्च तेऽमरवरिणश्च तेषां (न) शर्मकृत्सुखदातेति वा ॥ १३ ॥

सुमनोरञ्जनी — यः एवंविधमहिमोपेतः स च स एव ईश्वरः। सात्वतां यदूनाम् अन्वये वंशे अवतीर्णः सन्। यशः स्वमाहात्म्यं वितन्वन् विस्तारयन् व्रजे आस्ते किलेत्यन्वयः। कस्मै प्रयोजनायेति तत्राह ॥ स्वसेतुपालेति। स्वेन कृतः सेतुः मर्यादा आज्ञारूपा तां पालयन्ति रक्षन्ति अनुवर्तन्त इति यावत्। ते च तेऽमरवर्याश्च तेषां शर्मकृत् सुखकृत्। देवकार्यायेति भावः। यद्यशो वितन्वन्नास्ते, अशेषाणां मङ्गलं मङ्गलप्रदं तद्यशः देवा अपि गायन्ति। किमु मादृशा इत्यर्थः ॥१३॥

तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकान्तं दृशिमन्महोत्सवम् ।
रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥ १४ ॥

सत्यधर्मीया — महतां गतिं प्राप्यं तेषां च गुरुं त्रैलोक्ये कान्तं मनोहरम् । दृशिमन्महोत्सवं दृशो लोचनानि सन्ति येषां ते दृशिमन्तस्तेषां चक्षुष्मतां महानुत्सवो येन तत् । श्रियो रमाया ईप्सितं काङ्क्षितमास्पदं गतम् । वक्षःस्थलं यस्मिंस्तद्वपुर्दधानमद्य द्रक्ष्ये नूनं निश्चयः । ममोषसः षष्ठी, सम्बन्धिनः क्षणादयः प्रातः सुदर्शनाः सम्यग्दर्शनं येषां ते दृश्या आसन् । मम आ आसन्निति पदानि । आ उषसः सुदर्शनमुपलम्भो येषां ते शकुनविशेषा आसन्निति वा । दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिष्विति विश्वः ॥ १४ ॥

सुमनोरञ्जनी — अस्त्वेतादृशमहिमा भगवान् व्रज आस्त इति । तावता तव किमायातमित्यत आह ॥ तं त्विति । तं तु तमेव । अद्य द्रक्ष्ये पश्ये । अतः मम । उषसः प्रभातकालक्षणाः, सुदर्शनाः भाविमङ्गलसूचकवस्तुदर्शनयुक्ताः आसन् । अद्य प्रभातसमये कस्यापि मङ्गलसूचकस्य वस्तुनो दर्शनं ममासीन्नूनम् । येनेदृशं भगवन्तमद्य द्रक्ष्य इत्यन्वयः । कीदृशम् । महतां ब्रह्मादीनां, गम्यत इति गतिः प्राप्य इत्यर्थः । गुरुं महिदासादिरूपेणोपदेशकम् । त्रैलोक्ये कान्तं कमनीयम् । दृशिमतां चक्षुष्मतां महोत्सवम् । एतादृशं रूपं दधानम् । श्रियः महालक्ष्म्याः ईक्षितास्पदं अभीष्टास्पदमिति ॥ १४ ॥

अप्यङ्घ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपङ्कजम् ।
दत्ताभयं कालभुजङ्गरंहसा प्रोद्वेजितानां शरणैषिणां नृणाम् ॥ १५ ॥

सत्यधर्मीया — अङ्घ्रिमूले पतितस्य । प्रणतस्येत्यनुक्त्वोक्त्वा च पतितस्येति स्वाहन्ताशान्त्यै पतितदूतत्वात्तत्प्रायस्यापि मम शिरसि विभुः पतितोद्धरणसमर्थो निजहस्तपङ्कजं स्वकरकमलमधास्यदपि धारयेत् किम्? तन्महत्त्वं किमित्यत आह । कालभुजङ्गः कालियस्तद्रंहो वेगस्तेन प्रोद्विजितानां गोपानां यथेदानीं दत्ताभयं तथा कालाख्यो भुजङ्गस्तस्य रंहो वेगस्तेन प्रोद्विजितानां शरणैषिणां रक्षककामानाम् । नृणामिति सदुपलक्षणम् । तेषां दत्तमभयं येन तदिति ॥ १५ ॥

सुमनोरञ्जनी — अक्रूरः स्वमनसि एवं वितर्कयतीत्याह ॥ अप्यंघ्रीति । विभुः, कालाख्यस्य भुजंगस्य रंहसा वेगेन । प्रोद्वेजितानां भीतानाम् । अत एव शरणैषिणां रक्षकमिच्छताम् । शरणं गृहरक्षित्रोरित्यमरः । नृणां दत्ताभयं, दत्तमभयं येन तत् । एतादृशं निजहस्तपङ्कजम् । अङ्घ्रिमूले पतितस्य मे शिरसि अधास्यत् स्थापयेत्किमिति योजना ॥ १५ ॥

समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेन्द्रताम् ।
यद् वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगन्धिकगन्ध्यपानुदत् ॥ १६ ॥

सत्यधर्मीया — कौशिक इन्द्रः । आतू न इन्द्रकौशिकेत्यृग्भाष्ये मात्रा कुशैर्गृहीतत्वादित्युक्तेः कुशगृहीतत्वात्कौशिकः । कौशिको नकुले व्यालग्रहे गुग्गुलशक्रयोरिति विश्वः । यत्राङ्घ्रौ समर्हणं निधाय विधाय महाबलिश्च यत्र हस्तपङ्कजे समर्हणं धारोदकदानादिपूजां निधाय दत्वा जगत्त्रयेन्द्रतामाप । किञ्च विहारे तत्समये योषितां श्रमम् । सौगन्धिकगन्धि सौगन्धिकानां कल्हाराणामिव गन्धो यस्य । उपमानाच्चेतीत्वम् । स्पर्शेनापानुदत्पर्यहर्षीद्यत्तदधास्यत्किम् ॥ १६ ॥

सुमनोरञ्जनी — अङ्घ्रिमूले पतितस्य मे शिरसि प्रायशो हस्तं स्थापयेदिति सम्भावयति ॥ समर्हणमिति । यत्र यस्मिन्पादमूले समर्हणं अभिवन्दनादिना पूजाम् । विधाय कौशिकः इन्द्रः महाबलिश्च । जगत्त्रयेन्द्रतां त्रैलोक्यस्वामिताम् । आप । यज्ञेन यज्ञमयजन्तेति श्रुतिः । यद्वा यच्च पादमूलं सौगन्धिकस्य कल्हारस्य गन्धो यस्मिन् तत् । विहारे क्रीडायाम् । स्वस्पर्शेन व्रजयोषितां श्रमं त्रिविधमपि । अपानुदत् निराकरोत् । तस्मिन्नङ्घ्रिमूले पतितस्येति पूर्वेणान्वयः । यस्मादङ्घ्रिमूले पतिताः स्वस्वाभिलषितं प्रापुः तस्मादहमपि स्वाभिलषितं प्राप्स्य इति भावः । पदरत्नावल्यां तु यच्छब्दद्वयं हस्तपङ्कजपरतया व्याख्यातम् ॥ १६ ॥

न मय्युपैत्यप्रियबुद्धिमच्युतः कंसस्य भृत्यः प्रहितोऽपि विश्वदृक् ।
योऽन्तर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥ १७ ॥

सत्यधर्मीया — दुराशीस्तव प्रादुरासीदरेऽक्रूरारेः क्रूरस्य निदेशत एतद्देशमायात इति मतिमान्न दययेद्यदुनाथ इति मन्दसन्देहसन्दोहं परिहरन्नाह ॥ न मयीति । अच्युतः । अनेन कंसच्युतिरहितस्य मदहितप्रहितता किं तान्तिकर्त्रीति भावो ध्वन्यते । कंसस्य भृत्यस्तेन प्रहित इति मय्यप्रियबुद्धिं नोपैति । मम मनः सद्वासद्वेति न परमुखविचार्यप्रमेय इत्याह । विश्वदृक् यश्चेतसोऽन्तर्बहिश्चेहितं चेष्टितममलेन चक्षुषा क्षेत्रज्ञः क्षेत्राणि जानातीति स तथेक्षतीक्षते । इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । क्षेत्रज्ञं चापि मां विद्धीत्यादेः । ईक्षत्यमलेनचक्षुषेति पदमेकम् । ईक्षतेर्नाशब्दमितिवद्धातुनिर्देशः । तेन तदर्थ ईक्षणं लक्ष्यते । ईक्षणसाधनं यदमलं तदीक्षत्यमलं तच्च तदिनयुक्तं सूर्यसहितं यच्चक्षुस्तेनैव यः क्षेत्रज्ञोऽपरोक्षीकृतसकलक्षेत्र इति फलितार्थ इति वा । अमलेतीनविशेषणं वा । अ ईषन्मलं यस्य सोऽमलश्चन्द्रश्चेनः सूर्यश्च ताभ्यां सहितं यच्चक्षुरिति वा । हेमसारङ्गलीलेत्यादेः । किञ्चित्सञ्चितमलस्यापि चन्द्रस्य चक्षुरन्तःस्थापनं दययैवेति मामपि तथैव दयास्पदं

तनुयादेवेति ध्वनयति । अनेन लोकसाक्षित्वेनेक्षतेर्लक्षितलक्षणातो ज्ञानसाधनतया तदाश्रयौ तावेव, तद्युक्तचक्षुषा, षष्ठे सूर्योऽग्निः खं मरुद्गावः सोम इत्याद्युदाहृत्य स्फुटीकृतमनुसन्धेयम् ॥ १७ ॥

सुमनोरञ्जनी — ननु सत्यमेवैतत् । यदिन्द्रादयो देवा भगवच्चरणारविन्दसेवासमासादित-महासंपद इति । परन्तु त्वं कंसभृत्यस्तेन प्रेषितश्चेति त्वय्यप्रीतिमानेव स्यादित्याशङ्क्य नैवं स्यादित्याह ॥ न मयीति । यद्यपि अहं कंसभृत्यः तेन प्रहितः प्रेषितश्च अपि तथापि अच्युतः श्रीकृष्णः मयि अप्रियबुद्धिं अयमप्रिय इति बुद्धिं नोपैति न प्राप्नोति । कुतः । यतो विश्वदृक् सर्वसाक्षी मम मनोनैर्मल्यं जानातीत्यर्थः । तदेव विवृणोति ॥ य इति । यः अन्तर्बहिः चेतसः स्वरूपमनसो बाह्यमनसश्च । ईहितं व्यापारम् । अमलेन निर्दुष्टेन चक्षुषा ईक्षति पश्यति । अत एव क्षेत्रज्ञः क्षेत्रम् इदं शरीरं साकल्येन जानातीति तथोक्तः ॥ १७ ॥

अप्यङ्घ्रिमूले पतितं कृताञ्जलिं मामीक्षते सस्मितमार्द्रया दृशा ।
सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशङ्क ऊर्जिताम् ॥ १८ ॥

सत्यधर्मीया — कृताञ्जलिमङ्घ्रिमूले पतितं मां सस्मितं यथा तथाऽऽर्द्रयाऽऽनन्दोदकक्लिन्नया दृशेक्षतेऽपि स्वित्, सपदि तत्क्षणेऽपध्वस्तसमस्तकिल्बिषः सन्वीतविशङ्कोऽपगतमहासंशय ऊर्जिता-मुद्रिक्तां मुदं वोढा भविष्यामि ॥ १८ ॥

सुमनोरञ्जनी — आर्द्रया दयार्द्रया दृशा । सस्मितं यथा भवति तथा अपीक्षते ईक्षते किम्? येनेक्षणेन अहं सपदि सत्वरम् । अपध्वस्ताः अपास्ताः समस्ताः किल्बिषाः यस्य स तथाविधः सन् । वीता विशङ्का यस्य सः वीतविशङ्को निःसंशयः । ऊर्जितां मुदं वोढयिष्यामीत्यन्वयः ॥ १८ ॥

सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरभ्यतेऽथ माम् ।
आत्मा हि तीर्थीक्रियते तदैव मे बन्धश्च कामात्मक उच्छ्वसित्यतः ॥ १९ ॥

सत्यधर्मीया — सुहृत्तमं तथा ज्ञातिं वंशसम्भवमनन्यदैवतं न विद्यतेऽन्यद्दैवतमुपास्यं यस्य तं इति परिरम्भणकारणोदीरणम् । बृहद्भ्यां दोर्भ्यां यद्यात्मा स्वामी परिरभ्यते । अथानन्तरमात्मा शरीरं तीर्थीक्रियते तदैव मे मम कामात्मको विषयाभिलाषरूपो बन्धश्चातः परिरम्भणादेवोच्छ्वसिति स्रस्तो भवति । अतो देहादिति वा । अथेत्यनेन तदैवेत्यनेन च तदानन्तर्यप्रतीतेरतः परिरम्भणादित्य-वक्तव्यमिति वदन्ति ॥ १९ ॥

सुमनोरञ्जनी — अथ ईक्षणानन्तरम् । अनन्यदैवतं न विद्यतेऽन्यद्दैवतं इष्टप्रदं यस्य तम् । सुहृत्तमं बन्धुं ज्ञातिं च माम् । बृहद्भ्यां दीर्घाभ्यां दोर्भ्याम् । यदा परिरभ्यते आश्लिषति । तदैव ।

अतः भगवदङ्गसङ्गाद्धेतोः । मे आत्मा देहो मनो वा तीर्थीक्रियते पवित्रीक्रियते । कामात्मकः विषयतृष्णालक्षणः बन्धः बन्धको वैरी । उच्छ्वसति विनश्यदवस्थां प्राप्नोतीत्यर्थः । निर्वीर्यो भवतीति यावत् । सर्वथा निर्वृतिस्तु योग्यापरोक्षानन्तरमिति भावः ॥ १९ ॥

लब्धाङ्गसङ्गं प्रणतं कृताञ्जलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः ।
तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २० ॥

सत्यधर्मीया — उरुश्रवा महाकीर्तिरेवं लब्धाङ्गसङ्गकृताञ्जलिं प्रणतं मां हे अक्रूर तत तात । तातेति वक्तुं जिह्वा जिह्वेतीति ततेत्युक्तिः । तातस्तत इति द्विरूपकोशोक्तेः । वक्ष्यते चेत्तदा वयं जन्मभृतः सार्थकीकृतजन्मानो महीयसाऽतिमहता कृष्णेन यो नैवादृतोऽमुष्य तस्य तज्जन्म धिक् निन्द्यमित्यर्थः ॥ २० ॥

सुमनोरञ्जनी — उरुश्रवाः उत्कृष्टकीर्तिः । यदा माम् । हे अक्रूर हे तत हे तातेति वक्ष्यते सम्बोधयति तदा वयं जन्मभृतः जन्मसाफल्यं प्राप्ताः इति यावत् । नो चेन्नेत्याह ॥ महीयसेति । महीयसा महात्मना यः पुमान् नादृतः प्रियसम्बोधनादिना आदृतो न भवति । अमुष्य पुंसः यज्जन्म तत् धिगेव निन्दितमेवेत्यर्थः ॥ २० ॥

न तस्य कश्चिद् दयितः सुहृत्तमो न वाऽप्रियो द्वेष्य उपेक्ष्य एव च ।
तथापि भक्तान् भजते यथा यथा सुरद्रुमो यद्वदुपाश्रितार्थदः ॥ २१ ॥

सत्यधर्मीया — देवदेवस्वभावमावेदयति ॥ नेति । तस्य कस्यचिद्योग्यतामतिक्रम्येति सर्वत्र ज्ञेयम् । सुहृत्तमोऽतिप्रियोऽप्रियोऽपि न वा नैव द्वेष्यो द्वेषपात्रमुपेक्ष्योऽपि नास्ति । तथाऽपि यथा यथा योग्यतामनुसृत्य भक्तान्भजतः स्वयमपि फलदानेन भजते विभज्य फलं ददातीति यावत् । तत्र निदर्शनमाह । सुरद्रुमः कल्पतरुरुपाश्रितार्थदो यद्वत्तद्वदिति । वनस्पतिरिति पाठे वनस्पतिर्वृक्षमात्रे कल्पादौ पुष्पवर्जित इत्युत्पलमालोक्तेर्वनस्पतिः सुरतरुरित्येवार्थः ॥ २१ ॥

सुमनोरञ्जनी — वस्तुतस्तु अहं सुहृत् अहं प्रिय इत्यादिबुद्धिर्वृथैव । भक्तप्रियो भगवान् भक्त्यनुरूपमेव फलं प्रयच्छति नान्यथेत्येवंरूपामक्रूरचिन्तामाह ॥ नेति । दयितः प्रेमास्पदः । सुहृत्तमः बन्धुः अनिमित्तोपकारी वा । अप्रियः अप्रियकारी । द्वेष्यो द्वेषविषयः । तथापि भक्तान् यथा यथा तत्तद्योग्यतामनतिक्रम्य सेवानुसारिफलं दत्वेति । तत्र दृष्टान्तः वनस्पतिरिति । कल्पवृक्ष इत्यर्थः ॥ २१ ॥

किञ्चाग्रजो माऽवनतं यदूत्तमः स्मयन् परिष्वज्य गृहीतसञ्चितौ ।
गृहं प्रवेश्याप्तसमस्तसत्कृतं सम्प्रक्ष्यते कंसकृतं स्वबन्धुषु ॥ २२ ॥

सत्यधर्मीया — इयता कृष्णकृतचिन्तामुक्त्वेदानीं बलराममुद्दिश्यापि कृतामक्रूरचिन्तां वक्ति ॥ किञ्चेति । अग्रजो यदूत्तमो गृहीतसञ्चितौ गृहीता हस्ते या सञ्चितिः पशुपाशस्तस्यां सत्यामप्यवनतं मां स्मयन्परिष्वज्यलिङ्ग्य गृहं प्रवेश्य, आप्तं समस्तं सत्कृतं सत्कारो येन स तम् । स्वबन्धुषु स्वो कृष्णः स्वयं च बन्धवो वसुदेवाद्यास्तेषु कंसकृतं कंसेन करिष्यमाणं कृतं कर्म सम्प्रक्ष्यते पृच्छेत्किम् । पदबन्धनपाशं तु पशूनां सञ्चितिं विदुरिति वररुचिः । गृहीतमञ्जलाविति पाठोऽर्थाप्रतिभानमूलः कल्पितः । गृहीता जन्मान्तरगृहीता सञ्चितिः पुण्यसञ्चयो येन तस्मिन्मयि दृष्टे स्मयन्निति वा । गृहीतमानन इति सुगमः पाठः । यद्वाऽग्रजो रामो यदूत्तमो कृष्णः पृथक् पृथगन्वयात्सम्प्रक्ष्यत इत्याद्युपपन्नम् । इति सञ्चिन्तयन्कृष्णमित्युपसंहारानुसारस्वारस्यमत्र ज्ञेयम् ॥ २२ ॥

सुमनोरञ्जनी — इदानीं बलभद्रमुद्दिश्य कृतामक्रूरचिन्तामाह ॥ किञ्चाग्रज इति । हस्ते गृहीता सञ्चितिः पशुपादबन्धनरज्जुर्येन स तथोक्तः । तथाविधे सति कृष्णे पशुबन्धनादिकार्यान्तरासक्त इति यावत् । पादबन्धनपाशन्तु पशूनां सञ्चितिं विदुरिति वररुचिः । अवनतं मां यदूत्तमः अग्रजो रामः । स्मयन् स्मितं कुर्वन् । परिष्वज्य गृहं प्रवेश्य च । आत्ता स्वीकृता समस्तसत्कृतिर्येन तथाविधं मां प्रति । स्वबन्धुषु वसुदेवादिविषये कंसकृतं कंसेन क्रियमाणं संप्रक्ष्यते किमित्यन्वयः । कृष्णे कार्यान्तरासक्ते सति अग्रजो रामो वा मां गृहं प्रवेश्य सत्कारं कृत्वा स्वबन्धुवृत्तांतं सम्प्रक्ष्यते वा न वेति भावः ॥ २२ ॥

श्रीशुक उवाच—

इति सञ्चिन्तयन् कृष्णं श्वफल्कतनयोऽध्वनि ।
रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥ २३ ॥

सत्यधर्मीया — अध्वनि निःशब्दं यथा तथा चिन्तयन्सूर्यश्चात्प्राप्त इत्यन्वय इति सूचयति ॥ २३ ॥

सुमनोरञ्जनी — इति एवं प्रकारेण । अध्वनि मार्गे । कृष्णमुद्दिश्य सञ्चिन्तयन् श्वफल्कतनयोऽक्रूरः रथेन गोकुलं प्राप्तः । सूर्यश्चास्तं गिरिं प्राप्तः अस्तंगत इत्यर्थः ॥ २३ ॥

पदानि तस्याखिललोकपालकिरीटचूडामणिपादरेणोः ।
ददर्श गोष्ठे क्षितिकौतुकानि विलिक्षितान्यब्जयवाङ्कुशाद्यैः ॥ २४ ॥

सत्यधर्मीया — अखिललोकपालानां किरीटेषु मुकुटेषु चूडामणय इव विद्यमानाः पादरेणवो यस्य तस्य गोष्ठे क्षितिकौतुकानि क्षितेः कौतुकं मङ्गलं यैस्तानि गतम् । अब्जयवाङ्कुशाद्यै-र्विलक्षितानि चिह्नितानि पदानि ददर्श ॥ २४ ॥

सुमनोरञ्जनी — अखिला ये लोकपाला इन्द्रादयः तेषां किरीटचूडामणिषु पादरेणवो यस्य । किरीटेषु चूडामणिवद्विद्यमानाः पादरेणवो यस्येति वा । तस्य श्रीकृष्णस्य पदानि पादाङ्कानि । कीदृशानि क्षितिकौतुकानि क्षितेः भूमेः कौतुकानि मङ्गलकराणि । अब्जयवांकुशाद्यैः । आद्यशब्देन ध्वजवज्रादयः । तैः विशेषेण लक्षितानि चिह्नितानि । इतरपदविलक्षणतया ज्ञातानीति वा ॥ २४ ॥

तद्दर्शनाह्लादविवृद्धसम्भ्रमः प्रेम्णोत्थरोमाऽश्रुकलाकुलेक्षणः ।
रथादवस्कन्द्य स तेष्वचेष्टत प्रभोरिमान्यङ्घ्रिरजांस्यहो इति ॥ २५ ॥

सत्यधर्मीया — तद्दर्शनेन जनिताल्हादस्तेन विवृद्धः सम्भ्रम आदरो यस्य सः । उत्था रोमाश्चा यस्य स चासावश्रुकलाभिश्चाकुले ईक्षणे यस्य स च । उभयत्रापि हेतुः प्रेम्णेति । प्रेमा । क्वचित्प्रेमोत्थेति पाठः । स प्रेमावहः । रथात्स्वोपविष्टादवस्कन्द्य तत्र पारवश्यमनेन ध्वन्यते । प्रभोरिमान्यङ्घ्रिरजांसि अहो इति । तेषु रजस्सु अचेष्टत व्यलुण्ठत् । प्रेमोर्ध्वरोमा इति पाठोऽपि रोमहर्षदः । अहो इति तद्दौर्लभ्यं विभावयति ॥ २५ ॥

सुमनोरञ्जनी — तेषां पादचिह्नानां दर्शनेन जनितो यः आह्लादः आनन्दः तेन विवृद्धः संभ्रमः उत्सवविशेषो यस्य सः । प्रेम्णा भक्त्या उत्थानि रोमाणि यस्य सः । रोमाञ्चितविग्रह इत्यर्थः । अश्रुकलाभिः अश्रुबिन्दुभिः आकुले ईक्षणे यस्य स तथोक्तः सः अक्रूरः रथादवस्कन्द्य अवप्लुत्य । इमानि प्रभोः श्रीकृष्णस्य अङ्घ्रिरजांसि । अहो इत्यास्वादने । इति मन्वानः तेषु । अचेष्टत अलुंठत ॥ २५ ॥

ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ ।
पीतनीलाम्बरधरौ शारदाम्बुरुहेक्षणौ ॥ २६ ॥

सत्यधर्मीया — गोदोहनं तत्स्थानं गतौ प्राप्तौ गोदोहनं क्षीरक्षारणव्यापारं गताविति वा । पीतं च नीलं चेत्यम्बरयोर्धरौ ॥ २६ ॥

सुमनोरञ्जनी — गोदोहनमुद्दिश्य व्रजे गोष्ठे गतौ विद्यमानौ कृष्णं रामं चेत्येतौ । ददर्शेत्यन्वयः । क्रमेण पीतनीलाम्बरधरौ ॥ २६ ॥

किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ।
सुसुखौ सुन्दरवरौ बालद्विरदविक्रमौ ॥ २७ ॥

सत्यधर्मीया — श्यामलश्च श्वेतश्च वर्णतस्तौ । श्रीरेकत्र रमा परत्र शोभावन्तौ नासत्ये-द्याश्रयणाच्छ्रिय ईरितेत्यादेर्वारुणी वा रेवती वा तन्निकेतौ ॥ बलमूलरूपविवक्षातो विषं श्रीस्तन्निकेत इति वा गतम् ॥ २७ ॥

सुमनोरञ्जनी — किशोरौ तद्वयस्कौ शामलश्वेतौ कृष्णः शामलः रामः श्वेतः । श्रियः शोभायाः निकेतौ आश्रयौ । बालद्विरदवत् करिण्योतवत् विक्रमः पराक्रमः पादविन्यासो वा ययोस्तौ । गजराजगती इत्यर्थः ॥ २७ ॥

ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजम् ।
शोभमानौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥ २८ ॥

सत्यधर्मीया — सानुक्रोशानि सदयानि सस्मितानि विकसितानीक्षणानि ययोस्तौ शोभमानौ शोभयन्तौ ॥ २८ ॥

सुमनोरञ्जनी — शोभमानौ शोभयन्तौ । अनुक्रोशो दया स्मितं च ताभ्यां सहितमीक्षणं अवलोकनं ययोस्तौ ॥ २८ ॥

उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ।
पुण्यगन्धानुलिप्ताङ्गौ स्नातौ विरजवाससौ ॥ २९ ॥

सत्यधर्मीया — उदारा महती रुचिरा मनोज्ञा क्रीडा ययोस्तौ । इदानीमक्रीडौ न विद्यते क्रीडा ययोस्तौ । गोदोहनं गतावित्युक्तिस्वारस्यात् । तावुदाररुचिर्ददर्शेत्यन्वयः । स्रग्विणौ इतरसरसरसौ । वनमालिनौ आपादपद्मं लसतीं वनमालां विदुर्बुधा इति वचनाद्वनमाला ययोर्वनमालामुद्दिश्यायाता आ अलिनो भ्रमरा भ्रमन्तो ययोस्ताविति वा । विरजवाससौ गतम् ॥ २९ ॥

सुमनोरञ्जनी — उदारा उत्कृष्टा रुचिरा क्रीडा ययोस्तौ । स्रग्विणौ वनमालातिरिक्त-मुक्तामालादिमन्तौ । पुण्यगन्धेन मनोहरचन्दनादिना । पुण्यं वल्गु मनोहरमित्यमरः । विरजवाससौ निर्मलाम्बरौ ॥ २९ ॥

प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ।
अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३० ॥

तात्पर्यम् – वैन्यपार्थबलेशादावाविष्टं पुरुषोत्तमम् । अपेक्ष्य तद्गुणाः सर्वे तज्जीवानामभाविनः । अप्युच्यन्ते पुराणेषु विशेषात्सन्निधिर्यत' इति माहात्म्ये ॥ ३० ॥

सत्यधर्मीया — प्रधानपुरुषावित्यत्र प्रधानपुरुषत्वाद्यत्वाद्यं साम्येन केशवरामयोः शंसितमिव भाति । इदं कथमित्यतो मानेन तद्वास्तवार्थं दर्शयति ॥ वैन्यपार्थेति । वैन्यः पृथुः । पार्थः पृथासुतोऽर्जुनो बलस्तु प्रस्तुत ईशः शिव एत एवादयो यस्य वासवादिस्तस्मिन्नाविष्टं पुरुषोत्तमं भगवन्तमपेक्ष्य तद्गुणास्तज्जीवानां वैन्यदिजीवेष्वभाविनोऽविद्यमाना अपि पुराणेषु विशेषाद्यतस्तेषु सन्निधिस्तत उच्यन्त इत्यन्वयः । इति माहात्म्ये तन्नामग्रन्थे ॥ अथ मूलार्थः प्रधानपुरुषावाद्यौ सर्वादिभावौ । जगद्धेतू जगन्निमित्तभूतौ । तथा तत्स्वामिनौ जगत्यर्थे भूप्रार्थनातस्तदर्थे स्वांशेन कृष्णेन शुक्लेन केशेन च ॥ ३० ॥

सुमनोरञ्जनी — प्रधानपुरुषौ उत्तमपुरुषौ । जगत्याः भूम्याः अर्थे प्रयोजनाय । बलकेशवनामानौ भूत्वा अवतीर्णौ । ननु कथं बलभद्रे प्रधानपुरुषत्वादयो भगवतो गुणाः उच्यन्ते । तस्य शेषावतारत्वेन तदयोग्यत्वादिति चेदत्रोक्तं भगवत्पादैः ।

वैन्यपार्थबलेशादावाविष्टं पुरुषोत्तमम् ।
अपेक्ष्य तद्गुणाः सर्वे तज्जीवानामभाविनः ।

अप्युच्यन्ते पुराणेषु विशेषात्सन्निधिर्यतः । इति माहात्म्य इति । वैन्यः पृथुः । पार्थोऽर्जुनः । बलो बलभद्रः । ईशो रुद्रः । तेषु आविष्टं पुरुषोत्तमम् । अपेक्ष्यैव तज्जीवानामभाविनः भवितुमयोग्या अपि तस्य हरेः गुणाः पुराणेषूच्यन्ते । अतो न विरोध इत्यर्थः । तज्जीवानामयोग्या अपि भगवद्गुणाः तदाविष्टभगवद्विवक्षयैवोच्यन्त इति भावः । यद्यन्तर्गतभगवद्विवक्षया भगवद्गुणास्तेषूच्यन्ते तर्ह्यन्यत्रापि तद्गुणाः किं नोच्यन्ते । सर्वत्रान्तर्यामितया भगवतः सन्निधानादित्यत उक्तम् ॥ विशेषादिति । विशेषसन्निधानमेव तत्र निमित्तमिति भावः ॥ ३० ॥

दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया ।
यथा मरकतः शैलो रौप्यश्च कनकान्वितौ ॥ ३१ ॥

सत्यधर्मीया — वितिमिरा निरन्धकारा मरकतः शैल इन्द्रनीलपर्वतस्तथा कृष्णो रौप्यो रूप्यं रजतं तन्मयश्च कैलासादिस्तद्वद्भावपि । कनकान्वितावकराकरत्वात्तथा तथेति । कृष्णकृष्णप्रभापि तमोनिवारयित्री तदेतदादित्यस्य कृष्णं रूपमिति छान्दोग्योक्तेस्तद्यथा तमःपरिहारकृत्तथेति मन्तव्यम् । न श्यामलताभ्राष्ट्रवत्किन्त्विन्द्रनीलकान्तिरप्यन्तः शुभ्रेति तमोहृतिः सम्भवतीत्येके । अत्र कनकाभरणसम्बद्धावित्यर्थः ॥ ३१ ॥

सुमनोरञ्जनी — वितिमिराः विगतान्धकाराः । मरकतः मरकतमणिमयः । रौप्यः रजतमयः । इत्येतौ शैलौ कनकांचितौ कनकालंकृतौ यथा तथेति भावः ॥ ३१ ॥

रथात् तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः ।
पपात चरणोपान्ते दण्डवद् रामकृष्णयोः ॥ ३२ ॥

सत्यधर्मीया — अवप्लुत्यावस्कन्द्य । स्नेहो भक्तिस्तेन विह्वलश्चलत्कलेवरः ॥ ३२ ॥

सुमनोरञ्जनी — स्नेहविह्वलः भक्तिपरवशः । सोऽक्रूरः । रथात् तूर्णं शीघ्रम् अवप्लुत्य अवरुह्य । रामकृष्णयोः चरणोपान्ते पादसमीपप्रदेशे दण्डवत् पपात । साष्टाङ्गं प्रणनामेति योजना ॥ ३२ ॥

भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ।
पुलकाङ्कित औत्कण्ठ्यात् स्वाख्याने नाशकन्नृप ॥ ३३ ॥

सत्यधर्मीया — औत्कण्ठ्यादुत्कण्ठायाः । उत्कण्ठोत्कलिके सम इत्यमरः । व्याख्यातुमक्रूरोऽहं भो अभिवादयामीति भाषितुं नाशकत्समर्थो न बभूव ॥ ३३ ॥

सुमनोरञ्जनी — भगवद्दर्शनोत्थाह्लादेन यद्बाष्पं तेन पूर्णे आकुले चंचले ईक्षणे यस्य सः तथोक्तः । पुलकैः अङ्कितं अङ्गं यस्य सः । औत्कण्ठ्यात् । व्याख्यातुं सम्भाषणं कर्तुं नाशकत् ॥ ३३ ॥

भगवांस्तदभिप्रेत्य रथाङ्गाङ्कितपाणिना ।
परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३४ ॥

सत्यधर्मीया — रथाङ्गं चक्रं तेनाङ्कितश्चासौ पाणिर्हस्तश्च तेन । तत्स्नेहपारवश्येनाव्याहरणं हरिरभिप्रेत्य ज्ञात्वाऽभि स्वप्रमुखमुपाकृष्य प्रीतः प्रणतवत्सलः परिरेभे आलिलिङ्गे ॥ ३४ ॥

सुमनोरञ्जनी — भगवान् श्रीकृष्णः तत्, आह्लादातिशयेन स्वागमनकारणं वक्तुमशक्त इत्येतत् अभिप्रेत्य ज्ञात्वा । रथांगं चक्रम् । तेन अङ्कितेन पाणिना । अभ्युपाकृष्य आभिमुख्येन समीपमानीय । परिरेभे आलिङ्गितवान् ॥ ३४ ॥

सङ्कर्षणश्च प्रणतमुपगुह्य महामनाः ।
गृहीत्वा पाणिना पाणिमनयत् सानुजो गृहम् ॥ ३५ ॥

सत्यधर्मीया — सङ्कर्षणश्च प्रणतमक्रूरं महामना उपगुह्यालिङ्ग्य पाणिना पाणिं गृहीत्वा सानुजो रामो गृहमनयत् ॥ ३५ ॥

सुमनोरञ्जनी — संकर्षणश्च बलरामोऽपि । प्रणतमक्रूरमुपगुह्य आलिङ्ग्य । पाणिना स्वपाणिना पाणिं अक्रूरस्य पाणिं गृहीत्वा । सानुजः सन् । गृहमनयत् ।। ३५ ।।

पृष्ट्वाऽथ स्वागतं तस्मै निवेद्य परमासनम् ।
प्रक्षाल्य विधिवत् पादौ मधुपर्कार्हमाहरत् ।। ३६ ।।

सत्यधर्मीया — स्वागतं पृष्ट्वा तस्मै परमासनं परममासनं वा निवेद्य विधिरतिथिसत्कारबोधकसमयसहितं यथा तथा पादौ प्रक्षाल्य मधुपर्कार्हं मधुपर्करूपमर्हणसाधनमहरदानिनाय । मधुपर्कं च सक्षौद्रं दधि प्रोक्तं मनीषिभिरिति वचनात्तदर्थो ज्ञेयः । दधि मध्विति संसृज्य कांस्येन वर्षीयसा पिधाय कूर्चाभ्यां प्रतिगृह्य मधुपर्क इति प्राह । त्रिवृतमेकं घृतं च प्राङ्क्तमेकधानाः सक्तुश्चेति गृह्यसूत्राद्दधिमधुसंसृष्टं मधुपर्कः । पयो वा मधुसंसृष्टमभाव उदकमिति धर्मसूत्राच्च तत्प्रकारो ज्ञेयः ।। ३६ ।।

सुमनोरञ्जनी — अथ अनन्तरम् । तस्मै अक्रूराय । परमासनं निवेद्य दत्वा । स्वागतं पृष्ट्वा । विधिवत्पादौ प्रक्षाल्य । मधुपर्कार्हं मधुपर्कपूजाम् । आहरत् दत्तवान् ।। ३६ ।।

निवेद्य गां चातिथये संवाह्य श्रान्तमादृतः ।
अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद् विभुः ।। ३७ ।।

सत्यधर्मीया — संवाह्य पादौ । मेध्यं पवित्रं बहुगुणं षड्रसोपेतम् ।। ३७ ।।

सुमनोरञ्जनी — तदङ्गत्वेन मां च अतिथये निवेद्य । आदृतः आदरेण युक्तः । संवाह्य पादाविति शेषः । बहुविधं षड्रसोपेतमन्नम् उपाहरत् आनीय समर्पितवान् ।। ३७ ।।

तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ।
मुखवासैर्गन्धमाल्यैः परां प्रीतिं व्यधात् पुनः ।। ३८ ।।

इति श्रीमद्भागवते दशमस्कन्धे षट्त्रिंशोऽध्यायः ।।

सत्यधर्मीया — मुखवासैरेलालवङ्गजातीफलाद्यैर्गन्धमाल्यैश्च पुनः परां प्रीतिं व्यधादकरोत् ।। ३८ ।।

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे षट्त्रिंशोऽध्यायः ।। १०-२८ ।।

सुमनोरञ्जनी — रामः, परमधर्मवित् बन्धुदर्शनानन्तरं कर्तव्यक्रियमाणकुलाचाराभिज्ञः । भुक्तवते तस्मै अक्रूराय । मुखवासैः एलालवंगादियुक्तताम्बूलादिभिः । गन्धैः पुष्पैश्च । प्रीतिं आनन्दम् ।। ३८ ।।

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां षट्त्रिंशोऽध्यायः ।। १०-३६ ।।

॥ अथ सप्तत्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

सुखोपविष्टः पर्यङ्के रामकृष्णानुमोदितः ।
लेभे मनोरथान् सर्वान् पथि यान् स चकार ह ॥ १ ॥

सत्यधर्मीया — पर्यंके मञ्चे सुखं यथा तथोपविष्टो रामकृष्णाभ्यामनुमोदितः सत्कृतः सोऽक्रूरः पथि मार्गे यान्मनोरथान्कृष्णेन कर्तव्यत्वेनाकरोत्तान्सर्वांल्लेभे लब्ध्वा चकार दध्याविति वा । करणं कारणे काले साधनेऽनुव्रतादिषु । स्पष्टाद्युच्चारणाभेदे ध्यानपद्मासनादिष्विति यादव इति पूर्वे । रामकृष्णोरुमानित इति पाठोऽप्युरुमानितः ॥ १ ॥

सुमनोरञ्जनी — भक्तानुकंपी भगवान् स्वभक्तमनोरथान् सत्यानेव करोति नान्यथेत्येतमर्थं सूचयत्यस्मिन्नध्याये ॥ सुखेति । रामकृष्णाभ्यामनुमोदितः सन् पर्यङ्के सुखेनोपविष्टः सोऽक्रूरः पथि यान् मनोरथान् चकार तान् सर्वान् मनोरथान् लेभे प्राप्तवान् ॥ १ ॥

किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने ।
तथापि तत्परा राजन् नैव वाञ्छन्ति किञ्चन ॥ २ ॥

सत्यधर्मीया — मध्ये तदुभयकथं कथमक्रूरचिन्तितं सर्वमभूदिति चेतश्चित्रयन्तं परीक्षितं प्रति शुकोऽपि परवशः सन्नेदमाश्चर्यमिति वक्ति ॥ किमिति । श्रीनिकतने श्रिय आश्रये भगवति प्रसन्ने सत्यलभ्यं दुर्लभं किं न किमपि । तथाऽपि तत्परा हर्यासक्ता राजन् किञ्चनापि न वाञ्छन्ति न काङ्क्षन्ति ॥ २ ॥

सुमनोरञ्जनी — नन्वक्रूरो भगवत्प्रसादमन्तरा किमप्यैहिकमामुष्मिकं वा फलं कुतो नाकाङ्क्षी-दित्यत एकान्तभक्तानामयं स्वभाव इत्याह ॥ किमिति । भगवति हरौ प्रसन्ने सति किमलभ्यं भवेत् सर्वमपि लभ्यमेव । तथापि तत्पराः तदेकान्तभक्ताः । तत्प्रीतिमन्तरा किञ्चन ऐहिकमामुष्मिकं वा ॥ २ ॥

सायन्तनाशनं कृत्वा भगवान् देवकीसुतः ।
सुहृत्सु वृत्तिं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥ ३ ॥

सत्यधर्मीया — पुनः कृष्णाक्रूरप्रवृत्तं वृत्तं कथयति ॥ सायन्तनेति । सायन्तनमशनं भोजनं कृत्वा रागतः प्राप्तेऽपि भोजने स्मृतिकारैर्नियमितत्वात् । तथा हि । सायं प्रातर्द्विजातीनामशनं

स्मृतिचोदितमिति । इमां स्मृतिं स्मृतिपथमानेतुमशनमिति जगदे जगदेकगुरुणा । सुहृत्सु कंसस्य वृत्तिमन्यद्यच्चिकीर्षितं कर्तुं वाञ्छितं तत्पप्रच्छाप्राक्षीत् ॥ ३ ॥

सुमनोरञ्जनी — सुहृत्सु वसुदेवादिषु विषये । वृत्तिं प्रवृत्तिम् । चिकीर्षितं कर्तुमिच्छाविषयम् ॥ अन्यच्च पप्रच्छेति । अस्मद्बन्धुविषये कंसः कथं प्रावर्तत । उत्तरत्र वा किं कर्तुं वाञ्छतीति कंस-वृत्तान्तम् । अन्यच्च तदतिरिक्तं च वर्णयेति पप्रच्छेति भावः ॥ ३ ॥

पृष्टो भगवता सर्वं वर्णयामास माधवः ।
वैरानुबन्धं यदुषु वसुदेववधोद्यमम् ॥ ४ ॥

सत्यधर्मीया — माधवो मधुकुलजोऽक्रूरो यदुषु वैरानुबन्धं वसुदेववधोद्यमं च वर्णयामास ॥४॥

सुमनोरञ्जनी — माधवः मधुकुलोद्भवोऽक्रूरः । यदुषु वैरानुबन्धं वैरस्य अनुबन्धमनुवर्तनम् । वसुदेववधे उद्योगम् ॥ ४ ॥

यत्सन्देशो यदर्थे वा दूतः सम्प्रेषितः स्वयम् ।
यदुक्तं नारदेनास्य स्वजन्मानकदुन्दुभेः ॥ ५ ॥

श्रुत्वाऽक्रूरवचः कृष्णो बलश्च परवीरहा ।
प्रहस्य नन्दं पितरं राज्ञाऽऽदिष्टं विजज्ञतुः ॥ ६ ॥

सत्यधर्मीया — यस्य सन्देशो यस्य सः । यस्यार्थे प्रयोजन इति यदर्थे वा दूतः स्वयं प्रेषितः । आनकदुन्दुभेः सकाशात्स्वजन्मेति नारदेन यदुक्तं तदक्रूरवचः कृष्णो बलश्च श्रुत्वा । परवीर-हेत्युभयविशेषणम् । प्रहस्य राज्ञा कंसेनादिष्टं पितरं नन्दं प्रति विजज्ञतुर्विज्ञापयामासतुः ॥ ५,६ ॥

सुमनोरञ्जनी — कंसकृतो यश्च सन्देशः धनुर्मखार्थमागन्तव्यमित्यादिरूपा आज्ञा । यदर्थं यत्प्रयोजनार्थम् । स्वयमक्रूरः दूतः सन् प्रेषितः । तत्सर्वं कंसवृत्तान्तम् । तथा अन्यदपि । अस्य कंसस्य नारदेन यदुक्तं तदपि । वर्णयामासेत्यन्वयः । किं नारदोक्तमित्यतस्तदाह । स्वजन्मेति । स्वस्य कृष्णस्य तव जन्म । आनकदुन्दुभेः वसुदेवादभूदित्येवंरूपमित्यर्थः । परे शत्रुभूताः ये वीराः तान् हन्तीति तथोक्तः । बलः बलरामः कृष्णश्चेत्येतौ । राजादिष्टं राज्ञा कंसेनादिष्टं आज्ञप्तं विजज्ञतुः विज्ञापयामासतुः ॥ ५,६ ॥

गोपान् समादिशत् सोऽपि गृह्यतां सर्वगोरसः ।
उपायनानि गृह्णीध्वं युज्यन्तां शकटानि च ॥ ७ ॥

सत्यधर्मीया — सोऽपि नन्दोऽपि सर्वगोरसो गवां रसो गोरसः सर्वश्चासौ गोरसश्च गृह्यताम् । सर्वासां गोरस इति योग्यतयालापने गोरतद्धितलुकीति न टच्प्रसङ्गः । उपायनानि पूजोपयुक्तानि वस्तूनि । शकटान्यनांसि युज्यताम् ॥ ७ ॥

यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ।
द्रक्ष्यामः सुमहत् पर्व यान्ति जानपदाः किल ॥ ८ ॥

सत्यधर्मीया — रसान्सुवर्णादिकरान् । रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे । रेतस्यास्वादने हेम्नि निर्यासे रसशब्दयोरिति च । सुमहत्पर्व धनुरुत्सवं द्रक्ष्यामः । न केवलं वयमेवोद्युञ्जामहे किन्तु जानपदा देशस्था यान्ति किल । पक्षसन्धावुत्सवे च ग्रन्थौ पर्व विदुर्बुधा इति दत्तः । पर्व स्यादुत्सवे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपीति विश्वः ॥ ८ ॥

सुमनोरञ्जनी — सोऽपि नन्दोऽपि गोपान् समादिशत् आज्ञापयामास । किमित्यतस्तदाह ॥ गृह्यतामिति । सर्वगोरसः सर्वासां गवां रसः क्षीरादिः । उपायनानि उत्तमवस्तूनि गृह्णीध्वम् । शकटानि युज्यन्ताम् । अनडुद्भिरिति शेषः । नृपतेः रसान् गोरसान् दास्यामः । रसशब्दच्छलेनेदं सूचयति । रसान् विषान् दास्याम इति । रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रव इत्यभिधानात् । पर्व धनुर्मखोत्सवम् । पक्षसन्धावुत्सवे च ग्रन्थौ पर्व विदुर्बुधा इत्यभिधानात् ॥ ७,८ ॥

एवमाघोषयत् क्षत्रा नन्दगोपः स्वगोकुले ।
गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिताशयाः ॥ ९ ॥

सत्यधर्मीया — क्षत्रा सूतेन । एवं श्वो गन्तव्यमित्याघोषयत् । याः कृष्णसङ्गतास्ता गोप्यस्तद्घोषणमुपश्रुत्य व्यथिताशया बुभूवुः ॥ ९ ॥

सुमनोरञ्जनी — एवमुक्तरीत्या क्षत्रा । व्रजरक्षार्थमधिकृतेन । आघोषयत् । ताः कृष्णैकमनस्काः गोप्यः । तत् आघोषणम् । उपश्रुत्य, आघोषणे किं बीजमिति चिन्तायाम् । रामकृष्णौ पुरीं मधुरापुरीं प्रतिनेतुं व्रजं प्रत्यागतमक्रूरं च । व्यथितः सञ्जातव्यथः आशयोऽन्तःकरणं यासां तथाविधाः बभूवुः ॥ ९ ॥

रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ।
काश्चित् तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ १० ॥
स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च काश्चन ।
अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः ॥ ११ ॥

सत्यधर्मीया — पुरीं मधुराम् । तत्कृताभ्यां गमनवार्ताश्रवणकृताभ्यां हृत्तापश्च श्वासश्च ताभ्यां म्लानं क्षीणहर्षं यन्मुखं तस्य श्रीरिति विपर्यासोक्तिर्यासां ताः । म्लाना मुखश्रीर्यासामिति वा । स्रंसन्त्यो दुकूलवलयकेशग्रन्थ्यो ग्रन्थयो यासां ताः । काश्चन तस्य कृष्णस्यानुध्यानेन निवृत्ता अशेषा वृत्तयो यासां ताः ॥ १०,११ ॥

सुमनोरञ्जनी — व्यथाचिह्नानि निदर्शयति ॥ काश्चिदिति । तेन श्रवणेन कृताभ्यां हृत्ताप-श्वासाभ्यां, तत्कृतो यो हृत्तापः हृदः मनसः सन्तापः तेन यः श्वासः तेनेति वा, म्लाना मुखश्रीर्यासां ताः ॥ काश्चन स्रंसद्दुकूलवलयकेशग्रन्थ्यः । दुकूलानि वलयानि केशग्रन्थयश्च । स्रंसन्तः दुकूलवलयकेशग्रन्थयो यासां ताः । अन्याश्च तस्य कृष्णस्य अनुध्यानेन अनुचिन्तनेन । निवृत्ताः अशेषाः वृत्तयः प्रवृत्तयः अशेषेन्द्रियवृत्तयो वा यासां तथाविधाः सन्त्यः ॥ १०,११ ॥

नाभ्यजानन्निमं लोकमात्मलोकं गता इव ।
स्मरन्त्यश्चापराः शौरेरनुरागस्मितेरिताः ॥ १२ ॥

सत्यधर्मीया — इमं लोकं देहमात्मलोकं मोक्षं गता इव नाभ्यजानन् । शौरेरनुरागश्च स्मितं च ताभ्यामीरिताः ॥ १२ ॥

हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ।
गतिं सुललितां चेष्टां स्निग्धहासावलोकनम् ॥ १३ ॥

सत्यधर्मीया — हृदिस्पृशो हृदयङ्गमाश्चित्राणि पदानि यासां ता गिरः स्मरन्त्यः स्त्रियः सम्मुमुहुः । सुललितां गतिं सुललितां चेष्टां स्निग्धहासावलोकनं स्मरन्त्य इत्यन्वयः ॥ १३ ॥

शोकापहानि नर्माणि प्रोद्दामचरितानि च ।
चिन्तयन्त्यो मुकुन्दस्य भीता विरहकातराः ॥ १४ ॥

समेताः सङ्घशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १५ ॥

सत्यधर्मीया — शोकापहानि नर्माणि प्रोद्दामचरितानि च चिन्तयन्त्यो भीता अक्रूराद्विरहकातराः समेताः सङ्घशोऽच्युताशया अश्रुमुख्यः प्रोचुः । न च्युतो माधवध्यानादाशयो यासां ता इति वा ॥ १४,१५ ॥

सुमनोरञ्जनी — इमं लोकं देहम् । नान्वजानन् । आत्मलोकं मोक्षं गताः मुक्ता इवेति । अपराः

स्त्रियः शौरेः कृष्णस्य । गिरो वाक्यानि । स्मरन्त्यः संमुमुहुरित्यन्वयः । कथंभूताः । अनुरागस्मित-पूर्वकमीरिताः अत एव हृदिस्पृशः हृदयङ्गमाः मनोहरा इत्यन्वयः । चित्राणि नानाविधश्लेषयुक्तानि पदानि यासु ताः । गतिं गमनम् । सुललिताम् अतिमनोहराम् । चेष्टां शृङ्गारचेष्टाम् । स्निग्धः स्नेह-सहितो यो हासः,तद्युक्तम् अवलोकनम् । शोकापहानि शोकपरिहारकाणि । नर्माणि विनोदवचनानि । प्रोद्दामानि उत्कृष्टानि चरितानि केशिवधादीनि । चिन्तयन्त्यो ध्यायन्त्यः । मुकुन्दस्य । विरहेण कातराः । सङ्घशः समेताः प्रोचुरित्यन्वयः । अश्रुमुख्यः अश्रूणि मुखेषु यासां ताः । अच्युते आशयः चिन्ता यासां ताः ॥ १२-१५ ॥

गोप्य ऊचुः—

अहो विधातस्तव न क्वचिद् दया संयोज्य मैत्र्या प्रणयेन देहिनः ।
तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं विचेष्टितं तेऽर्भकचेष्टितं यथा ॥ १६ ॥

सत्यधर्मीया — विधिमधिक्षिपन्ति ॥ अहो इति । हे विधातो धातस्तव क्वचिदपि दया नेति न द्रवद्धृदयः । कुत एवं वचनमित्यत उदश्चयन्ति ॥ संयोज्येति । प्रणयेन स्नेहेन मैत्र्या मित्रतया देहिनः प्राणिनः संयोज्य योजयित्वा तान्संयुक्तानकृतार्थान्कृतः पर्याप्तोऽर्थो येषां ते कृतार्थास्ते न भवन्तीत्यकृतार्थास्तान् । कृतं युगे च पर्याप्ते विहिते हसिते फल इति विश्वः । आप्राप्तभोगानिति विवरणं संयोज्येत्युक्तिबाधितम् । वियुनङ्क्षि वियुक्तांस्तनुषे । मम तेन प्रयोजनं वियोजनेनेति न वदेति वदन्ति । अपार्थकं निरर्थकमिति । तत्र निदर्शनं यथाऽर्भकचेष्टितमिति । मार्तिकीं काश्चन पुत्तलिकां कृत्वा स तां स्वयमेव मर्दयन्निर्दयो मृदं तनोति तथा ते क्रीडितम् । यतो हे अर्भक भगवद्बालक चतुर्मुख ते विधा प्रकार एवम् । ततोऽतस्तवन अतं गतं स्तवनं यस्य स तत्सम्बुद्धिः । ते चिज्ज्ञानं दया च क्व न ते उभे त्वयि वर्तेते इति भावः । ते चेष्टितं यथा सम्यग्विक्रीडितमित्यन्वयो वा । मैत्र्या संयोज्याप्रणयेनास्नेहेन हेतुना वियुनङ्क्षीत्यन्वयो वा । विक्रीडितं विक्रीडनं वियुनङ्क्षीत्यकृतार्थान्विधातः कुर्वन्नभूरिति ते यथा सम्यगर्भकचेष्टितमिति वा ॥ १६ ॥

सुमनोरञ्जनी — किमिति प्रोचुरिति तत्राह ॥ अहो इति । हे विधातः! तव । क्वचिदपि विषये दया नास्ति । कुतः । त्वं प्रणयेन स्नेहेन । देहिनः जन्तून् । मैत्र्या मित्रभावेन । संयोज्य परस्परं मैत्रीमुत्पादयित्वेति यावत् । तान् देहिनः । अकृतार्थानेव अप्राप्तमनोरथानेव । अपार्थकं व्यर्थं वियुनङ्क्षि वियोजयसि । अतस्ते तव । विक्रीडितं चेष्टितं अपार्थकं निष्फलम् । अर्भकानां बालानां चेष्टितं यथा तथेति । बालाः यथा स्वयमेव किञ्चिदुत्पाद्य निर्मितं स्वयमेव नाशयंति तथेति भावः ॥ १६ ॥

यस्त्वं प्रदर्श्यासितकुन्तलावृतं मुकुन्दवक्त्रं सुकपोलमुन्नसम् ।
शोकापनोदस्मितलेशसुन्दरं करोषि पारोक्ष्यमसाधु ते कृतम् ॥ १७ ॥

सत्यधर्मीया — परेषां देहिनां संयोगवियोगदाने कोदरशूला कामिन्यो भवद्विषयो नानयो मयाऽचारि लोकवार्तया कुतः कृशीभवनं भवतीनामित्यतस्ते वयमेवेति कैश्चित् श्लोकैर्वदन्ति ॥ य इति। यस्त्वमसितकुन्तलावृतं सुकपोलमुन्नसमुन्नता नासिका यस्य तत् । शोकस्यापनोदो येन स शोकापनोदः स्मितस्य लेशो यस्तेन सुन्दरं मुकुन्दवक्त्रं प्रदर्श्योपरोक्ष्यविषयं कारयित्वा पारोक्ष्यं करोषीति यत्ते कृतं कर्मासाध्वमङ्गलं ते त्वयाऽसाधु कृतमिति वा । यद्वाऽन्तरङ्गत एका वदति ॥ असेति । असा धुता इकृतमिति छेदः । न सा असा सा मधुरा स्थिता इना कामेनेच्छयेति यावत् गतं कृतमिति । असा तद्भिन्नाऽहं धुतेत्यर्थः ॥ १७ ॥

सुमनोरञ्जनी — न केवलमपार्थकं किन्तु निन्दितमपीत्याहुः । यद्वा अस्तु लोके यथा तथा । भव(द्भिः)तां कोऽपराधः कृत इति तत्राह ॥ य इति । यस्त्वं मुकुन्दवक्त्रं प्रदर्श्य पुनः तस्य पारोक्ष्यं दृष्टयगोचरतां करोषि । अतस्ते कृतं कर्म असाधु निन्दितमित्यन्वयः । कीदृशं मुकुन्दवक्त्रमित्यतस्तद्विशिनष्टि ॥ असितेत्यादि । असितैः नीलैः कुन्तलैः आवृतम् । सु समीचीने कपोले यस्य तत् । उन्नसं उन्नतनासिकम् । शोकमपनुदति परिहरतीति शोकापनोदः । स चासौ स्मितलेशः मन्दहासः तेन सुन्दरं मनोहरम् ॥ १७ ॥

क्रूरस्त्वमक्रूरसमाख्यया स्मृतश्चक्षुर्हि दत्तं हरसे बताज्ञवत् ।
येनैकदेशेऽखिलसर्गसौष्ठवं तदीयमद्राक्ष्म वयं मधुद्विषः ॥ १८ ॥

सत्यधर्मीया — हे विधातः! इदानीं क्रूरः, कठिणो नेति त्वमन्वर्थनाम्ना पूर्वं स्मृतः गुणानुगुण्येन । येन चक्षुषा मधुद्विष एकदेशे एकैकदेशेऽखिलं सर्गसौष्टवं तव सृष्टिसौष्टवम् । तर्हि तद्रचने चातुर्यं सम्मतं किमित्यत आहुः ॥ तदीयमिति । त्वयि स्थित्वा स एव कारयितेति भावः । वयमद्राक्ष्म । तद्दत्तं चक्षुरज्ञवन्मन्दमिव मन्दमतिवद्धरसे हरसि । एतद्धरणफलं तवैवास्त्विति द्योतयितुमात्मनेपदप्रयोगः । स्वरितञितः कर्त्रभिप्राये क्रियाफल इति स्मृतिः । विस्तृतं चैतच्चक्रे शास्त्रमित्यनुव्याख्याव्याख्यासुधायाम् । बत खेदोऽतोऽक्रूरसमाख्ययाऽक्रूरनाम्ना क्रूरः स्मृतः स्मर्यसे । अखिलसर्गसौष्टवं निसर्गसुष्टुतां तदीयं तत्सम्बन्धं वाऽद्राक्ष्मेति वा ॥ १८ ॥

सुमनोरञ्जनी — इतश्च तव कर्म निन्दितमित्याहुः । त्वया दत्तं चक्षुस्त्वमेव हरसे अपहरसे अज्ञवत् मूढवत् । दत्तापहारित्वं तव प्राप्तमिति भावः । भवतामनुपयोगित्वात्तदपहारो नात्यन्तदोषावह

इत्यत आह ।। येनेति । येन त्वद्दत्तेनैव चक्षुषा । मधुद्विषः श्रीकृष्णस्य एकदेशे मुखाद्येकावयवे । एकदा कदाचित् ईशे श्रीकृष्णे इति वा । त्वदीयं त्वया निर्मितम् । अखिलसर्गसौष्टवम् अखिलसर्गे समस्तसृष्टौ यत्सौष्टवं सौन्दर्यं तत् अद्राक्ष्म । सकलसौन्दर्यसारभगवन्मुखादिदर्शनसाधनत्वा-दत्युपकारकमस्माकमिति भावः । श्रीकृष्णवियोजने चक्षुर्जन्योपकाराभावादनुपकारकं अपहृत-प्रायमेवेति भावः । तर्ह्यक्रूर एवापाहार्षीन्नाहमित्यत आहुः ।। क्रूरस्त्वमिति । नात्राक्रूरनामा यादवः समागतः किन्तु क्रूरस्त्वमेवाक्रूरसमाख्यया स्मृतः सन्नागत इत्यर्थः । अक्रूरनामकः सन् त्वमेवागत इति भावः । अत्र तदीयं इति पाठोऽपि दृश्यते । तस्य तव सम्बन्धीत्यर्थः । यद्वा अक्रूरं कटाक्षी-कृत्यैवैतद्वचनम् । तथा हि । हे अक्रूर ! त्वं वस्तुतः क्रूरः । अक्रूर इति समाख्यया नाम्ना स्मृत इत्यर्थः । त्वं नाममात्रेणाक्रूरः स्वभावतस्तु क्रूर एवेत्यर्थः । हि यस्माद् ब्रह्मणा अस्मदुपकाराय दत्तं चक्षुः त्वं अज्ञवत् हरसे । बत कष्टम् । अतः कोऽयमुपकारस्तेन चक्षुषेत्यत उक्तम् ।। येनेति । येन चक्षुषा मधुद्विष एकदेशे मुखाद्येकावयवे । तदीयं ब्रह्मनिर्मितमखिलसर्गसौष्टवम् । वयं अद्राक्ष्मेति योजना । यद्वा तदीयं श्रीकृष्णसम्बन्धि । अखिलं पूर्णं सर्गसौष्टवं निसर्गसौष्टवम् । स्वाभाविक-सौन्दर्यमिति पदरत्नावल्युक्तरीत्येत्यर्थः । अतः सकलसौन्दर्यसारश्रीकृष्णमुखसन्दर्शनरूपास्मदिष्ट-विघातितया त्वं क्रूर एवेति भावः । यद्वा त्वदीयमिति पाठे कृष्णं कटाक्षीकृत्येयमुक्तिः । हे कृष्ण ! त्वं, अक्रूरः पेशलो दक्ष इत्यादौ अक्रूरसमाख्यया स्मृतोऽपि क्रूर एव । कुतः । हि यस्मात् त्वयैव दत्तं चक्षुः अज्ञवत् त्वमेव हरसे । अतः येन चक्षुषा । मधुद्विषस्तवैकदेशे अखिलसर्गसौष्टवं सम्पूर्णस्वाभाविकसौन्दर्यं वयमद्राक्ष्मेति दृष्ट्वा सुखिनः स्म इति । त्वयि मधुरां पुरीं गते सति त्वत्संदर्शनाभावेन चक्षुषः साफल्याभावात् स्थितमप्यपहृतप्रायमिति भावः ।। १८ ।।

न नन्दसूनुः क्षणभङ्गसौहृदः समीक्षते नः स्वकृतातुरा अपि ।
विहाय गेहान् स्वजनान् सुतान् पतीन् स्वदास्यमद्धोपगता नवप्रियाः ।। १९ ।।

सत्यधर्मीया — किमक्रूरे एव शब्दः सखि, सखाऽपि चञ्चलाक्षि! बहुचञ्चल इति सुदती वदति ।। न नन्दसूनुरिति । क्षणेन भङ्गो यस्य तत्सौहृदं यस्य स नन्दसूनुः कृष्णः । स्वकृते स्वनिमित्त-मातुराः क्लिष्टाः । गेहानि सन्ति येषाम् । तान समीक्ष्यते न पश्यति । कुतः । नवप्रियो नूतनप्रियः । अनेन नगरनारीजनरन्तृतां कटाक्षयन्तीति ध्वन्यते । अयं नन्दसूनुर्न सखि किन्तु स हरिरित्यन्तरङ्गोऽर्थः । समीपसंस्थानस्मांश्च नेक्षत इति । सूनुरेतत्कुमारो मारश्च क्षणभङ्गसौहृदो ननन्द तुतोष, एताः शरतो मारयामीति वा ।। १९ ।।

सुमनोरञ्जनी — काश्चित्सखीः प्रति एवमाहुरित्याह ।। नेति । यदुक्तं अक्रूरः श्रीकृष्णं मधुरां

नेष्यतीति तत् न, किं तु नन्दसूनुरेव । नवप्रियः नवं नवं प्रियं यस्य स तथाविधः । अद्धा सत्यम् । एवं सत्यक्रूरः किं कुर्यात् । स्वस्यैव नूतनप्रियत्वात्स्वयं गच्छतीति भावः । ननु चिरकालप्राप्तं सौहृदं कथं त्यजेदित्यत उक्तम् ॥ क्षणभङ्गसौहृद इति । क्षणे भङ्गो यस्य तत् क्षणभङ्गम् । अस्थिरमित्यर्थः । तादृशं सौहृदं यस्य स तथोक्तः । स्वभाव एव तस्य तादृश इति भावः । तत्र किं ज्ञापकमित्यतो न ज्ञापकान्तरमन्वेषणीयमिदमेव पश्यतेत्याहुः ॥ समीक्षत इति । नेत्यनुवर्तते । स्वकृते स्वनिमित्तमेव आतुराः क्लिष्टाः, स्वेन कृतेन मन्दहासादिना आतुराः परवशाः, मन्मथातुरा इति वाऽर्थः । एतादृशीरपि नः अस्मान् न समीक्षते नावलोकते । इदं अद्धा प्रत्यक्षमेव । किं च गेहान् स्वजनान् सुतान् पतीनपि विहाय । स्वदास्यमेवोपगताः प्राप्ता अपि न समीक्षते न चिन्तयति । सर्वमपि परित्यज्य स्वदास्यं प्राप्ता इत्येतदपि न गणयतीति भावः । अद्धा प्रत्यक्षसत्ययोरिति पदरत्नावली ॥ १९ ॥

सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम् ।
याः सम्प्रविष्टस्य मुखं व्रजस्पतेः पश्यन्त्यपाङ्गोत्कलितस्मितासवम् ॥ २० ॥

सत्यधर्मीया — नूतनवनिताप्रीतिमत्त्वान्निवारितोऽपि परिवारित एतैर्गच्छेदेव देवस्ततश्च ता एवं भवन्तीतीर्ष्यया वदन्ति ॥ सुखमिति । पुरयोषितां नगरनारीणामियं रजनी रात्रिः सुखं यथा तथा प्रभाता प्रभामरुणसम्बन्धिनीमततीति सा तथाऽऽशिषस्तदभिलाषाः सत्या बभूवुर्ध्रुवं निश्चयः । कुत इत्यत आह ॥ या इति । सम्प्रविष्टस्य पुरमिति शेषः । व्रजस्पतेर्व्रजनाथस्य । पारस्करादिः सुडार्षो वा। अपाङ्गोत्कलितस्मितासवमपाङ्गेन कटाक्षवीक्षणेनोत्कलितमुज्जृम्भितं च तत्स्मितं हसितं तदेवासवोऽमृतसमो रसो यस्मिंस्तन्मुखं पश्यन्तीति । अपाङ्गो ह्यनङ्ग उत्कलितश्छिन्नो येन तच्च स्मितं तदेवासवमसुतर्पकं यस्मिंस्तदिति वा । अस्मदवस्थैव शृणु सखीति काश्चित्कान्तां वदन्ति । या रमाया येन सुखं तदपाङ्गोत्कलितस्मितासवं मुखं याः पश्यन्ति तासां रजनी सुप्रभाता व्रजस्पतेः प्रभाता गतेति । न इत्यनुवर्तते । नो विषये यमाशिषाः, एताः स्मरशरतो दारयित्वा नयामि संयमिनीमिति यमस्याभिलाषाः सत्या बभूवुर्ध्रुवमिति । रमणविरहतो भवेदेव मरणमिति तात्पर्यम् ॥ २० ॥

सुमनोरञ्जनी — पुरयोषितां मधुरापुरस्त्रीणाम् । इयं रात्रिः सुखप्रभाता सुखकरप्रभातसमया । कुतः । तासामाशिषः मनोरथाः वाञ्छाः सत्याः सफलाः बभूवुः । तदेव विवृणोति ॥ या इति । याः स्त्रियः संप्रविष्टस्य पुरीं प्रविष्टस्य । व्रजस्पतेः गोकुलनायकस्य श्रीकृष्णस्य अपांगेन तासां कटाक्षवीक्षणेन उत्कलितमुत्पन्नं उज्जृम्भितं वा स्मितमेवासवममृतं यस्मिन् तत् मुखं संपश्यन्तीति पदरत्नावलीरीत्या योजना द्रष्टव्या । यद्वा अपाङ्गेन उत्कलितं संमिश्रं स्मितासवं यस्मिन् तत् । अपांगस्मिताभ्यां सहितमिति यावत् । अपाङ्गोऽनङ्गः मन्मथः तेन उत्कलितं उज्जृंभितं स्मितासवं

यथा स्यात्तथेति क्रियाविशेषणं वा । श्रीकृष्णस्यागमनवार्तयोद्रिक्तमन्मथाः,तेन स्मयंत्यः सत्यः । श्रीकृष्णमुखं सादरं पश्यन्तीति भावः ॥ २० ॥

तासां मुकुन्दो मधुमञ्जुभाषितैर्गृहीतचित्तः परवान् मनस्व्यपि ।
कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्या अलज्जाः स्मितविभ्रमद्भ्रुवः ॥ २१ ॥

सत्यधर्मीया — मनस्वी सन्नपि तासां पुरतरुणीनां मधुमञ्जुभाषितैर्मधुनो मनोहरादपि मञ्जूनि मञ्जुलानि च तानि भाषणानि च तैर्गृहीतं चित्तं यस्य सः । परवान्, परवांस्तु पराधीनो निघ्नः परवशः स्मृत इति हलः । परवशो ग्राम्या ग्रामीणा अलज्जाः स्मितविभ्रमद्भ्रुवः स्मितेन विभ्रमन्त्यो भ्रुवो यासां तास्तासामित्यन्वयः । पुनः कथम् । नोऽबलाः प्रतियास्यते आगच्छति । ग्राम्या व्यवायधर्ममर्मज्ञा वाऽश्लीलशीला वा ॥ २१ ॥

सुमनोरञ्जनी — ननु भवतु नाम उत्सवदर्शनानन्तरं पुनरागमिष्यति । नन्दादिभिरार्यैः सह गतः तान् विसृज्य कथं तत्रैव स्थास्यतीत्याशङ्क्याहुः ॥ तासामिति । मुकुन्दः यद्यपि महामनाः, परवान् आर्यवान् आर्याधीनः, अपि तथापि तासां पुरस्त्रीणाम् । मधुमञ्जुभाषितैः मधुवत् मंजुभिः मनोहरैः स्नेहमाधुर्याभ्यां सहितैरिति यावत् । भाषितैः वचनैः । गृहीतचित्तः वशीकृतचित्तः आकृष्टचित्तः । अत एव परवान् पराधीन इति वा । परवांस्तु पराधीन इति हलः । पुनः नः अस्मान् प्रति । कथं प्रतियास्यति प्रत्येष्यति । न कथमपीत्यर्थः । स्त्रीणां लज्जालुत्वात्कथं सहसैव परपुरुषवशीकरणं सुरतसंकेतादि तासां संभाव्यत इत्यत आहुः ॥ ग्राम्या इति । इदमावर्तते । हे अबलाः! ग्राम्याः ग्रामीणाः स्त्रियः, ग्रामीणाः विषयलोलुपाः अत एव अलज्जाः । स्मितेन विभ्रमन्त्यो भ्रुवो यासां ताः । स्मितसहितभ्रूविलासैः स्वयं झडित्येव पुरुषं वशीकुर्वन्त्यः सुरतं सङ्केतयन्तीति भावः ॥ २१ ॥

अद्य ध्रुवं तत्र दृशां महोत्सवो दाशार्हभोजान्धकवृष्णिसात्वताम् ।
महोत्सवं श्रीरमणं गुणास्पदं द्रक्ष्यन्ति ये चाध्वनि देवकीसुतम् ॥ २२ ॥

सत्यधर्मीया — दाशार्हभोजान्धकवृष्णिसात्वतां दृशां नेत्राणां तत्र मधुरायामद्य महोत्सवो ध्रुवं भविता ये च जना अध्वनि मार्गे देवकीसुतम्, स क इत्यतो वदन्ति महोत्सवं तद्रूपं महानुत्सवस्तद्यस्मिंस्तमिति वा । गुणानामास्पदं स्थानम् । नित्यनपुंसकलिङ्ग आस्पदशब्दः । आस्पदं प्रतिष्ठायामिति निपातनात् । श्रीरमणं रमापतिं द्रक्ष्यन्ति तेषां दृशां महोत्सव इति सम्बन्धः ॥ २२ ॥

सुमनोरञ्जनी — तत्र मधुरायां दाशार्हादीनां दृष्टयो याः दृशः तासां महोत्सवो भविष्यतीति शेषः । महोत्सवे किं कारणमित्यतस्तदाह ॥ देवकीसुतं द्रक्ष्यन्तीति । कीदृशं महोत्सवम् । महानुत्सव

आह्लादविशेषो यस्मात्तं श्रीरमणं श्रियोऽपि रमणं सुखं यस्मात्तथाविधं किमुतान्येषामिति भावः । गुणानामानन्दादीनामास्पदमाश्रयम् । न केवलं दाशार्हादीनामेवोत्सवः किं नाम ये च जनाः अध्वनि मार्गे देवकीसुतं द्रक्ष्यन्ति तदीयनेत्राणामपि अद्य महोत्सवो भवितेति योजना ॥ २२ ॥

मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीवदारुणः ।
योऽसावनाश्वास्य सुदुःखितं जनं प्रियात् प्रियं नेष्यति पारमध्वनः ॥ २३ ॥

सत्यधर्मीया — यदागतिरेतद्गतिदाऽस्माकं हेति तमक्रूरं निन्दन्ति ॥ मेति । एतद्विधस्यैषा विधा यस्य स एतद्विधस्तस्याकरुणस्य न विद्यते करुणा यस्य स तथा तस्य । अकूर इत्येतन्नाम मा च भूद्योऽसावक्रूरः सुदुःखितं जनं गोपीजनं, परमपुरूषाङ्गसङ्गभङ्गेऽस्माकमपि पुरुषप्रायतैवेति ध्वनयितुं जनमिति वचनम् । अनाश्वास्यासमाधाय प्रियात्प्रियं सर्वप्रीतिपात्रपदार्थात्प्रियमध्वनो मार्गस्य पारं दूरमस्मत्दृगगोचरं देशं नयतीत्यतीवदारुणो बहुकठिनः ॥ २३ ॥

सुमनोरञ्जनी — इदानीं अक्रूर इति नाम कैः सङ्केतितं वा । तदतीवायुक्तमित्यक्रूरं शपन्ति ॥ मैतदिति । यः अतीव दारुणः क्रूरः । एतद्विधस्य एतादृशस्य अत एवाकरुणस्याक्रूर इति यन्नाम तन्मा भूत् न सङ्केतनीयमिति भावः । किं कृतं तेन । येनाकरुणत्वं सम्भाव्यत इत्यत उक्तम् ॥ असाविति । प्रियविश्लेषशङ्कया सु अत्यन्तं दुःखितं जनं गोपीजनम् । अनाश्वास्यैव स्थितं प्रियात्प्रियं कृष्णं, अध्वनः पारं सीमानं ग्रामान्तरमिति यावत् । नेष्यति यतोऽत इति योजना ॥ २३ ॥

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयन्ति दुर्मदाः ।
गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते ॥ २४ ॥

सत्यधर्मीया — स्वमनोरथमसिद्धं च तमनु रथं निरीक्ष्य तत्रास्थितं गच्छन्तं कृष्णमपि च गोपानपि कोपादविवेकयन्ति ॥ अनार्द्रधीरिति । एषः कृष्णोऽनार्द्राऽद्रवन्ती धीर्यस्य सः । अनाश्वास्येत्याकृष्यात्रापि योज्यम् । रथमास्थित इति तमनु चामी गोपा अनोभिस्त्वरयन्ति । दुर्मदाः पूर्वोत्तरकार्यान्धताप्रापकमदयुताः । स्थविरैरप्युपेक्षितं नोभयथाऽपि ते प्रोचुरिति । तेऽपि किं कुर्युः । अद्य नो दैवं भागधेयं प्रतिकूलं विरुद्धमीहते चेष्टते । दैवेऽनुकूले सर्वमनुकूलं तस्मिंश्चैवं प्रतिकूले कं प्रति वदामः किं कुर्मो हेति ताः प्रालपन्निति भावः ॥ २४ ॥

सुमनोरञ्जनी — किमन्यान् प्रति अन्यथाभाषणेन । दैवमेवास्माकं प्रतिकूलम् । अतः कोऽप्यस्माकमनुकूलो न भवतीत्याह ॥ अनार्द्रधीरिति । एषः कृष्णः अनार्द्रधीः द्रवच्चित्तो न भवति । अमी गोपा अपि दुर्मदाः हिताहितज्ञानरहिताः । तं कृष्णं अनु अनुसृत्य । अनोभिः शकटैर्युक्ता-

स्त्वरयन्ति । स्थविरैः वृद्धैश्च उपेक्षितम् । यतोऽतः दैवमेव प्रतिकूलं यथा स्यात्तथा ईहते चेष्टते चेष्टयते । तत्र किमस्माभिः कार्यमिति ॥ २४ ॥

निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबान्धवाः ।
मुकुन्दसङ्गान्निमिषार्धदुस्त्यजाद् दैवेन विभ्रंशितदीनचेतसाम् ॥ २५ ॥

सत्यधर्मीया — इममेकं पक्षमेका निश्चित्य तत्र प्रतिभातं दोषं स्वयमेव प्रमोषयन्ती भाषते ॥ निवारयाम इति । समुपेत्य गत्वा माधवं निवारयामः । वृद्धाः, व्यभिचारिण्य इति भवेयुरुदीर्णकोपा इत्यत आहुः । कुलवृद्धा बान्धवाश्च किमकरिष्यन् कुर्युः । किमनिष्टं मरणं शरणीकृतवतीनां किं तत्कृत्यमितोऽधिकमिति वदन्ति ॥ मुकुन्दसङ्गादिति । निमिषार्धदुस्त्यजाद्दैवेन तेनैव विभ्रंशितं विभ्रंशनं तेन दीनं चेतो यासां तासामस्माकमिति ॥ २५ ॥

सुमनोरञ्जनी — एवमपि स्वयमेव प्रयताम इत्याहुः ॥ निवारयाम इति । तर्हि कुलवृद्धाः बान्धवाश्च कथं सहेयुरित्यत आह ॥ किमिति । नः अस्माकं किमकरिष्यन् किं कुर्युः । किमपि न कुर्वन्तीति भावः । कुत इति तत्राह ॥ मुकुन्देति । मुकुन्दसङ्गात् विभ्रंशितं विभ्रंशः तेन दीनचेतसाम् । विभ्रंशितानाम् अत एव दीनचेतसामिति वा । अस्मद्व्यथां ज्ञात्वा कृतमप्यक्रमं सहन्त एवेति भावः ॥ २५ ॥

यस्यानुरागललितस्मितवल्गुमन्त्र-
लीलावलोकपरिरम्भणरासगोष्ठ्याम् ।
नीताः स्म नः क्षणमिव क्षणदा विना तं
गोप्यः कथं न्वतितरेम तमोऽदुरन्तम् ॥ २६ ॥

सत्यधर्मीया — स्वसाहसं न पारमियादिति मतिमत्यः काश्चित्प्रतिवदन्ति ॥ यस्येति । अनुरागेण ललितं स्मितं वल्गुश्च मन्त्रो लीलावलोकश्च परिरम्भणं च यस्यां सा रासगोष्ठी तस्याम् । क्षणदा रात्रयः क्षणमिव नीता नोऽस्माभिस्तं विना दुरन्तमपारं तमो दुःखं कथं न्वतितरे-मोपायान्तरापायात् । हे गोप्यस्ता एव क्षणदास्तमो ग्लानिमनन्तरमन्तं नाशमदुर्दत्तवत्यः क्षणत्वेन नयनकोपतस्ता एव नो नाशयन्तीति तात्पर्यं वा ॥ २६ ॥

सुमनोरञ्जनी — अनुरागयुक्तानि ललितस्मितादीनि यस्यां तस्यां रासगोष्ठ्याम् । नोऽस्माभिः क्षणदाः रात्रयः । क्षणमिव क्षण इव । नीताः । इदानीं तासु रात्रिषु । तं श्रीकृष्णं विना स्थिताः वयं दुरन्तं अपारं तमो दुःखं कथमतितरेमेति योजना । अनुरागस्य नित्यसापेक्षत्वात्समासोपपत्तिः ॥ २६ ॥

योऽह्नः क्षये व्रजमनन्तसखः परीतो गोपैर्विशन् खुररजश्छुरितालकस्रक् ।
वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोति तमृतेऽम्ब कथं भवेम ॥ २७ ॥

सत्यधर्मीया — अह्नः क्षये सायंसमयेऽनन्तस्य बलस्य सखा स मुक्तसख इति स गोपैः परीतो व्रजं विशन्खुररजसा छुरिताः सम्मिश्रा अलकाः स्रजो यस्य सः । वेणुं क्वणन्रणयन्स्मितं कटाक्ष-निरीक्षणेन च नश्चितं क्षिणोति निवासयति । यस्तमृते विना । अम्बा गोप्य इति पूर्वमुदीरणा-दम्बेत्येकवचनं गात्रास्मृतेरिति मन्तव्यम् । कथं भवेम जीवेम । स्वयमेवोत्तरं वदन्ति ॥ अम्ब कथमिति । अम्बः कृष्णकर्तृकः शब्दस्तदनुसारिणी कथा यस्मिन्कर्मणि तद्यथा भवति तथा भवेमेत्यनेनान्वयः ॥ २७ ॥

सुमनोरञ्जनी — यः कृष्णः अह्नः क्षये सन्ध्याकाले । अनन्तसखः बलरामेण सहितः । खुर-रजोभिः च्छुरिताः मिश्रिता अलकाः स्रजश्च यस्य सः । स्मितसहितेन कटाक्षनिरीक्षणेन चित्तं क्षिणोति अपहरति । तं कृष्णं ऋते विना कथं भवेम स्थास्यामः । अम्बेति सखीसम्बोधनम् ॥२७॥

श्रीशुक उवाच—

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णनिषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥ २८ ॥

सत्यधर्मीया — एवं ब्रुवाणा भृशं विरहेणातुरा व्रजस्त्रियः कृष्णनिषक्तमानसा लज्जां विसृज्य गोविन्द दामोदर माधवेति सुस्वरं रुरुदुः । हे धव, मा व्रजेति रुरुदुः ॥ २८ ॥

सुमनोरञ्जनी — कृष्णे नितरां सक्तं मानसं यासां ताः ॥ २८ ॥

स्त्रीणामेवं रुदन्तीनामुदिते सवितर्यथ ।
अक्रूरश्चोदयामास कृतमैत्र्यादिको रथम् ॥ २९ ॥

सत्यधर्मीया — स्त्रीणामेवं रुदतीनां ता अनादृत्य सवितरि सूर्ये उदिते सत्यक्रूरः, कृतं मैत्र्यमादिर्यस्य तद्यस्य स कृतसूर्योपस्त्यादिरथ रथं चोदयामास ॥ २९ ॥

सुमनोरञ्जनी — कृतमैत्र्यादिकः कृतं मैत्र्यादिकं गायत्रीमन्त्रजपसूर्यमण्डलस्थनारायणो-पासनादिकं येन सः । रथं चोदयामास ॥ २९ ॥

गोपास्तमन्वसज्जन्त नन्दाद्याः शकटैस्ततः ।
आदायोपायनं भूरि कुम्भान् गोरससम्भृतान् ॥ ३० ॥

सत्यधर्मीया — तं रथमनु असज्जन्त सन्नद्धा अभवन् । तमक्रूरमन्विति वा । भूरि महदुपायनं, भूरि सुवर्णरूपमुपायनं वा गतम् ।। ३० ।।

सुमनोरञ्जनी — अन्वसज्जन्त अनुसृत्य सन्नद्धा बभूवुः । गोरसैः क्षीरघृतादिभिः सम्भृतान् पूर्णान् ।। ३० ।।

गोप्यश्च दयितं कृष्णमनुव्रज्यानुरञ्जिताः ।
प्रत्यादेशं भगवतः काङ्क्षन्त्यश्चावतस्थिरे ।। ३१ ।।

सत्यधर्मीया — प्रत्यादेशं स्वाभिमुखीभूय तिष्ठताऽहमप्यल्पेनानेहसा गमिष्यामीत्येवमाज्ञारूपं वचनम् । प्रति प्रतिविधौ वीप्सालक्षणादौ प्रयोगतः । मात्रार्थे चाभिमुख्ये च प्रतिदानादिषु प्रतीति विश्वः । यद्वनितास्तथा तप्यतीर्वीक्ष्येति । अवतस्थिरे ।। ३१ ।।

सुमनोरञ्जनी — गोप्यश्च गोप्योऽपि । अनुरञ्जिताः समुत्पन्नानुरागाः । अङ्गरागैः कुङ्कुमादिभिः अनुरञ्जिता वा । प्रत्यादेशं शीघ्रमेवायास्ये भवद्भिरित एव निवर्तितव्यमित्यादिरूपं वचनम् ।। ३१ ।।

तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ।
सान्त्वयामास संप्रेष्यैरायास्य इति दौत्यकैः ।। ३२ ।।

सत्यधर्मीया — स्वप्रस्थाने स्वप्रयाणे प्रस्तुते तथा तप्यतीस्तापमुपाप्नुवाना यदूत्तमो वीक्ष्य रथारोहात्पश्चादभिमुखः सन् वीक्ष्य संप्रेष्यैः स्वतद्रहस्यविदस्त इति सम्प्रेष्यास्तैः । दौत्यपदार्थैकदेश-दूतपदार्थान्वयि । सम्यक् प्रेष्यैर्दूतसम्बन्धिभिर्वचनैरिति तदर्थः । दूत्यकैरित्यपि सुपठम् । आयास्येऽह मिति सान्त्वयामास । सप्रेमैरिति पाठोऽपि प्रेमास्पदः । नान्तोऽप्ययं महिशब्दवदकारान्तः । दौत्यकैर्दूतसम्बन्धिभिः सम्प्रेष्यैस्ताः प्रति प्रेषणार्हैर्वचनैरिति वा ।। ३२ ।।

सुमनोरञ्जनी — स्वस्य प्रस्थाने प्रयाणे सक्ते सति । तथा पूर्वोक्तप्रकारेण । संप्रेष्यैः स्वमुखप्रेष्यैः । दौत्यकैः दूतकर्मनिरतैः जनैः । यद्वा दौत्यकैः कर्तृभिः आयास्य इत्यादिरूपैः संप्रेष्यैः आज्ञारूपैः वचनैः सांत्वयामासेति ।। ३२ ।।

यावदालक्ष्यते केतुर्यावद् रेणू रथस्य च ।
अनुप्रस्थापितात्मानो लेख्यानीवोपतस्थिरे ।। ३३ ।।

सत्यधर्मीया — यावत्केतुर्ध्वजो रथस्य रेणुश्च यावदालक्ष्यते दृश्यतेऽनुप्रस्थापिता आत्मानो मनांसि याभिस्ताः । लेख्यानीव भित्तिचित्रितपुत्तलिका इवोपतस्थिरे । उपाच्चेत्यकर्मकात्तिष्ठतेरात्मनेपदता ।।३३।।

सुमनोरञ्जनी — रथस्य केतुः ध्वजः । रथस्य रेणुः धूलीपटलम् । यावत् यावत्कालपर्यन्तम् । आलक्ष्यते तावत्पर्यन्तम् । अनुप्रस्थापितः श्रीकृष्णमनुसृत्यैव प्रेषितः आत्मा मनो यासां ताः । तदेकमनस्का इति यावत् । गोप्यः लेख्यानीव चित्रलिखितप्रतिमा इव । उपतस्थितरे ॥ ३३ ॥

ता निराशा निववृतुर्गोविन्दविनिवर्तने ।
विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम् ॥ ३४ ॥

सत्यधर्मीया — गोविन्दविनिवर्तने व्रजमाव्रज स्वामिन्निति निवर्तने निराशाः स्वयं निववृतु-र्निववृतिरे । नारदेन, (अक्रूरेण) कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभविति दिनद्वयव्यवहृतिः कंसहतेरुक्तेत्यहनी नारद(अक्रूर)गमनानन्तरं द्वे इत्येवमुक्तिः । अहनी (अहानि) इति वक्तव्ये, दिनद्वय-कालहरणं कर्तव्यमित्याभाणकानुसरणेनोक्तिर्वा । प्रियचेष्टितं गायन्त्यो विशोका निन्युर्गमयामासुः ॥३४॥

सुमनोरञ्जनी — गोविन्दस्य विनिवर्तने प्रत्यावर्तने विषये । निराशाः सत्यः निववृतुः । स्वस्व-गृहान् प्रतीति शेषः । प्रियस्य श्रीकृष्णस्य चेष्टितं गायन्त्यः स्वत एव विशोकाः सत्यो अहनी अहानि दिनद्वयं वा । कानिचिद्दिनानीति यावत् । निन्युः नीतवत्यः ॥ ३४ ॥

भगवानपि सम्प्राप्तो रामाक्रूरौ तथा नृप ।
रथेन वायुवेगेन कालिन्दीमघनाशिनीम् ॥ ३५ ॥

सत्यधर्मीया — रामाक्रूरौ च सम्प्राप्तावित्यन्वेति ॥ ३५ ॥

सुमनोरञ्जनी — रामाक्रूरावपि तथा संप्राप्तावित्यर्थः । कालिन्दीं यमुनाम् ॥ ३५ ॥

तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ।
वृक्षखण्डमुपव्रज्य सरामो रथमाविशत् ॥ ३६ ॥

सत्यधर्मीया — मणेरिन्द्रनीलस्य प्रभा यस्य तत् । वृक्षाणां खण्डं सङ्घमुपव्रज्य तद्युत-मार्गेणोपव्रज्य सरामो रथमाविशत् ॥ ३६ ॥

सुमनोरञ्जनी — तत्र कालिन्द्याम् । उपस्पृश्य आचम्य । उपस्पर्शस्त्वाचमनमित्यमरः । मणेरिन्द्रनीलस्य प्रभेव प्रभा यस्य तत् । वृक्षखण्डं वृक्षषण्डं वृक्षैकदेशं वा ॥ ३६ ॥

अक्रूरस्तावुपामन्त्र्य निवेश्य च रथोपरि ।
कालिन्द्या ह्रदमागम्य स्नानं विधिवदाचरन् ॥ ३७ ॥

सत्यधर्मीया — स्नानं माध्याह्निकम् । ह्रदं ब्रह्मसंज्ञम् ।। ३७ ।।

सुमनोरञ्जनी — तौ रामकृष्णौ प्रति । उपामन्त्र्य स्नानार्थं गच्छामीति निवेदयित्वा ।। ३७ ।।

निमज्य तस्मिन् सलिले जपन् ब्रह्म सनातनम् ।
तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ।। ३८ ।।

सत्यधर्मीया — तस्मिन्ह्रदोदके निमज्य । सनातनमपौरुषेयतया नित्यं ब्रह्माघमर्षणसूक्तं जपन्सनातनं ब्रह्म नारायणाख्यं जपन्निति वा समन्वितौ मिलितौ ।। ३८ ।।

सुमनोरञ्जनी — ब्रह्म प्रणवं, जपन् उपांशु उच्चरन् । 'यतश्वासो निमज्याप्सु प्रणवेन समाहितः' इति स्नानविधावाचार्यवचनात् । तावेव यौ स्वेन रथोपरि निवेशितौ तावेवेत्यर्थः ।। ३८ ।।

तौ रथस्थौ कथमिह सुतावानकदुन्दुभेः ।
तर्हि स्वित् स्यन्दने न स्त इत्युन्मज्य व्यचष्ट सः ।। ३९ ।।

सत्यधर्मीया — रथस्थौ तावानकदुन्दुभेः सुताविह ह्रदे कर्हिचित्स्यन्दने रथे न स्तः किमित्युन्मज्योन्मज्जनमुत मज्जनं कृत्वा वार्युपरि मुखं कृत्वा सोऽक्रूरो व्यचष्टापश्यत् ।। ३९ ।।

सुमनोरञ्जनी — रथस्थौ तौ रामकृष्णौ । इह सलिले कथं स्तः । यदि च इह स्तः तर्हि स्यंदने रथे । न स्तःस्वित् न स्तः किम् । इत्यालोच्य उन्मज्य ।। ३९ ।।

तत्रापि च यथापूर्वमासीनौ पुनरेव सः ।
न्यमज्जद् दर्शनं मेने मृषा किं सलिले तयोः ।। ४० ।।

सत्यधर्मीया — तत्रापि रथेऽपि यथापूर्वमासीनौ व्यचष्टेत्यन्वेति । निमज्य यत्तयोर्दर्शनं तन्मृषा किमिति मेने सन्दिग्धे ।। ४० ।।

सुमनोरञ्जनी — तत्रापि रथेऽपि । यथापूर्वं पूर्ववदेव आसीनौ । एषः व्यचष्ट अवलोकितवान् । पुनः निमज्य निमज्जन् सन् । सलिले तयोर्दर्शनं किं मृषा इति मेने । मुखं व्यादाय स्वपितीति समानकालेऽपि क्त्वाप्रयोगः । निमज्जनकाले एवं मेन इति भावः ।। ४० ।।

भूयस्तत्रापि सोऽद्राक्षीत् स्तूयमानमहीश्वरम् ।
सिद्धैर्भुजङ्गपतिभिरसुरैर्नतकन्धरैः ।। ४१ ।।

सत्यधर्मीया — भूय: प्रमाभ्रमताभ्रंशनाय सिद्धैर्भुजङ्गपतिभिर्नतकन्धरैरित्युभयान्वयि । असुरै: साधुभि: । असुरा अपि साधव: सन्तीति सुधाभिधानात् । असुरूप इत्याचार्योक्ते: सद्विकृताकृतियुतराक्षसादिभिर्वा ।। ४१ ।।

सुमनोरञ्जनी — भूयोऽपि पुनरपि । तत्र सलिले । अद्राक्षीत् । किमद्राक्षीदिति तदाह ।। स्तूयमानमिति । नतकन्धरै: सिद्धादिभि: स्तूयमानम् । अहीश्वरं शेषम् । तत्र असुरै: योग्यै: । असुरा अपि योग्या: सन्तीति सुधोक्ते: ।। ४१ ।।

सहस्रशिरसं देवं सहस्रफणमौलिनम् ।
नीलाम्बरं बिसश्वेतं शृङ्गैः श्वेतमिव स्थितम् ।। ४२ ।।

सत्यधर्मीया — सहस्रं शिरांसि यस्य तम् । सहस्रं च फणास्तेषु मौलय: किरीटान्यस्य सन्तीति स तम् । मौलि: किरीटे धम्मिल्ले केकलिद्रुमचूडयोरिति विश्व: । व्रीह्यादिर्नान्त: शब्द: । बिसवन्नालीकनालतन्तुवच्छ्वेतं नीलमम्बरं यस्य तम् । शृङ्गै:कूटै: श्वेतं तन्नामानमचलन्निव स्थितम् ।। ४२ ।।

सुमनोरञ्जनी — सहस्रं फणा: मौलयो मुकुटान्यस्य सन्तीति तथोक्तम् । प्रशंसार्थे इनि: । बिसवत् श्वेतपद्मवत् शुक्लम् । शृङ्गै: सहितम् । श्वेतमिव श्वेतनामानं पर्वतमिव ।। ४२ ।।

तस्योत्सङ्गे घनश्यामं पीतकौशेयवाससम् ।
पुरुषं चतुर्भुजं शान्तं पद्मपत्रारुणेक्षणम् ।। ४३ ।।

सत्यधर्मीया — तस्य शेषस्योत्सङ्गे उत्सङ्गवद्विद्यमानमण्डलीकृताङ्गे देवताविवक्षया तत्सङ्गो मुख्य: । एकादशश्लोकस्थविलोक्येत्यनेनान्वय: ।। ४३ ।।

सुमनोरञ्जनी — तस्य शेषस्य उत्संगे शरीरे । चतुर्भुजं, पुरुषं पूर्णषड्गुणम् । हरिं विलोक्येति वक्ष्यमाणेनान्वय: ।। ४३ ।।

चारुप्रसन्नवदनं चारुहासनिरीक्षणम् ।
सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ।। ४४ ।।

सत्यधर्मीया — सुभ्रुवौ उन्नासिके च यस्य सुभ्रून्नसस्तम् ।। ४४ ।।

सुमनोरञ्जनी — चारुणी हासनिरीक्षणे यस्य तम् । सु समीचीने भ्रुवौ यस्य स: सुभ्रू: । स चासौ उन्नसश्च तम् ।। ४४ ।।

प्रलम्बपीवरभुजं तुङ्गांसोरःस्थलश्रियम् ।
कम्बुकण्ठं निम्ननाभिं वलिमत्पल्लवोदरम् ॥ ४५ ॥
बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम् ।
चारुजानुयुगं चारुजङ्घायुगलसंयुतम् ॥ ४६ ॥

सत्यधर्मीया — पीवराः पुष्टाः । तुङ्गावंसौ स्कन्धौ यस्य स चासावुरस्थले श्री रमा यस्य तं वलिमत्त्रिवलिमत्पल्लववत्किसलयवत्कोमलमुदरं यस्य सः । बृहत्कटितटं तथा बृहती श्रोणी नितम्बौ यस्य तच्च तत्करभवत्करिशुण्डावत्कनिष्ठामूलवद्विद्यमानौ च तावूरू च तयोर्द्वयेनान्वितम् ॥ ४५,४६ ॥

सुमनोरञ्जनी — प्रलम्बाः पीवराः पुष्टाः भुजाः यस्य तम् । तुंगयोः अंसोरुरःस्थलयोः श्रीर्यस्य तम् । तुङ्गौ अंसौ यस्य स चासौ उरःस्थले श्रीर्यस्य स इति वा । कम्बुवत् रेखात्रयोपेतकण्ठो, निम्ना गम्भीरा नाभिर्यस्य तम् । वलयः त्रिवलयोऽस्य सन्तीति वलिमत् । तथाविधं च तत् पल्लववत् मृदु उदरं यस्य स तथा । बृहता कटितटेन श्रोण्या च तथाविधया । करभवत् कनिष्ठिकामूलवत् अलोमं मांसुलं च यत् ऊरुद्वयं तेन चान्वितम् ॥ ४५,४६ ॥

तुङ्गगुल्फारुणनखव्रातदीधितिभिर्वृतम् ।
नवाङ्गुल्यङ्गुष्ठदलैर्विलसत्पादपङ्कजम् ॥ ४७ ॥

सत्यधर्मीया — तुङ्गौ किञ्चिदुदञ्चितौ गुल्फावरुणनखाश्च तेषां व्रातः । क्रतुपुरुषकपोलगुल्फ-मेधाभिधानीति लिङ्गानुशासनसूत्रात्पुल्लिङ्गो गुल्फशब्दः । हस्तकुन्तान्तव्रातदूतधूर्तक्षतमुहूर्ताः पुंसीत्युक्ते व्रातशब्दश्च, सङ्घस्तस्य दीधितयः प्रकाशास्ताभिर्वृतम् । नवा नूतन्योऽङ्गुलयश्चाङ्गुष्ठौ च त एव दलानि तैः । कल्पभेदेन गङ्गाजनकत्वं द्वयोरस्तीति विशेषतो विशिष्याङ्गुष्ठेति ग्रहणमिति मन्तव्यम् ।

वाराहे वामपादं तु तदन्येषु तु दक्षिणम् । पादं कल्पेषु भगवानुज्जहार त्रिविक्रम इति पञ्चम-तात्पर्योक्तेः । लक्षणशास्त्रे । गूढगुल्फो गूढजत्रुर्महापूरुष उच्यते । नीतिकृताऽपि । पादौ श्लिष्टाङ्गुली वेत्यारभ्य गूढगुल्फौ जङ्घे च । व्यासगद्ये च निगूढगुल्फायेति चेत्युक्तेः । कथं तुङ्गता गुल्फयोरिति चेन्न । मध्यतुङ्गताया अक्षुण्णत्वात् । गुल्फैर्युक्ता अरुणाश्च ते नखाश्च । तुङ्गाश्च ते गुल्फारुणनखा इति विग्रहे न तव दुराग्रहः कार्यकारी । उत्तुङ्गरक्तविलसन्नखचक्रवालेत्यादेः । तस्य तद्भूषत्वादिति । पङ्कजस्य युक्ता दलतेतीत्यर्थमुक्तिः ॥ ४७ ॥

सुमनोरञ्जनी — तुंगयोः गुल्फयोः । अरुणस्य नखव्रातस्य दीधितिभिः कान्तिभिः । नवैः अङ्गुल्यंगुष्ठाख्यैः दलैः । विलसती पादपङ्कजे यस्य तम् ॥ ४७ ॥

महार्हमणिविभ्राजत्किरीटकटकाङ्गदः ।
कटिसूत्रब्रह्मसूत्रहारनूपुरकुण्डलैः ॥ ४८ ॥

सत्यधर्मीया — महार्हैर्बहुमूल्यैर्मणिभिर्विभ्राजन्ति किरीटानि । किरीटमुकुटललाटेत्यादिलिङ्गानुशासनात् । कटकान्यङ्गदानि च गतं यस्य सः । कटिसूत्रं काञ्ची ब्रह्मसूत्रं यज्ञोपवीतं हारनूपुरकुण्डलानि च तैर्भ्राजमानमित्यन्वयः ॥ ४८ ॥

सुमनोरञ्जनी — महार्हमणिभिः विभ्राजन्तो ये किरीटकटकाङ्गदाः तैः । कटिसूत्रादिभिश्च भ्राजमानम् ॥ ४८ ॥

भ्राजमानं पद्मकरं शङ्खचक्रगदाधरम् ।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥ ४९ ॥

सत्यधर्मीया — पद्मं करे यस्य तम् ॥ ४९ ॥

सुमनोरञ्जनी — पद्मं करे यस्य तम् ॥ ४९ ॥

सुनन्दनन्दप्रमुखैः पार्षदैः सनकादिभिः ।
सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ ५० ॥

सत्यधर्मीया — नवभिर्द्विजोत्तमैर्मरीच्यादिभिः ॥ ५० ॥

सुमनोरञ्जनी — नवभिः द्विजोत्तमैः कश्यपादिभिः । वसुः वसुराजः एतैः कर्तृभिः ॥ ५० ॥

प्रह्लादनारदवसुमुखैर्भागवतोत्तमैः ।
स्तूयमानं पृथङ्मार्गैर्वचोभिरमलात्मभिः ॥ ५१ ॥

सत्यधर्मीया — वसवोऽष्टौ वोपरिचरो वा । प्रल्हादश्च नारदश्च वसवश्च वसुश्च वा मुखं येषां ते तैः पृथङ्मार्गैर्वैदिकैस्तान्त्रिकैर्वचोभिरमलात्माभिर्निर्दोषमनस्कैः स्तूयमानम् ॥ ५१ ॥

सुमनोरञ्जनी — पृथङ्मार्गैः ज्ञानकर्मादिभिः नानामार्गविषयैः वैदिकतान्त्रिकमार्गविषयैर्वा वचोभिः करणैः स्तूयमानम् । यद्वा पृथङ्मार्गैरिति प्रह्लादादीनामेव विशेषणम् । भक्तियोगज्ञानयोगाद्यनेकमार्गनिरतैरित्यर्थः ॥ ५१ ॥

श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयाऽजया ।
विद्ययाऽविद्यया शक्त्या मायया च निषेवितम् ॥ ५२ ॥

सत्यधर्मीया — इलया भूम्याऽजयाऽविद्यया । तमो हि दुर्गेत्यादेर्दुर्गारूपिण्या सर्वाण्यपि रमारूपाणि ॥ ५२ ॥

सुमनोरञ्जनी — श्रियादिभिः शक्तिभिः । अजयेति पदच्छेदः ॥ ५२ ॥

विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः ।
हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥ ५३ ॥

सत्यधर्मीया — विलोक्य सुभृशं प्रीतः परमया भक्त्या युतः । भावेन सत्स्वभावेन । भावः स्वभावाभिप्रायेत्यादिविश्वः । परिक्लिन्नान्यात्मा मनश्च लोचने च यस्य सः ॥ ५३ ॥

सुमनोरञ्जनी — भावेन भक्त्या परिक्लिन्ने आत्मलोचने यस्य सः । आत्मा मनःसत्वं धैर्यम् ॥ ५३ ॥

गिरा गद्गदयाऽस्तौषीत्सत्त्वमालम्ब्य सात्त्वतः ।
प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिपुटः शनैः ॥ ५४ ॥

इति श्रीमद्भागवते दशमस्कन्धे सप्तत्रिंशोऽध्यायः ॥

सत्यधर्मीया — सत्त्वं धैर्यम् । सात्वतो भक्तो गतम् । सात्वच्छ्वफल्कजत्वात् । मूर्ध्ना प्रणम्यावहितः सावधानमनसः कृताञ्जलिपुटः शनैर्गद्गदया गिराऽस्तौषीत् ॥ ५४ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे सप्तत्रिंशोऽध्यायः ॥ १०-३७ ॥

सुमनोरञ्जनी — सत्वं स्वभावं वा ॥ ५४ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां सप्तत्रिंशोऽध्यायः ॥ १०-३७ ॥

॥ अथ अष्टत्रिंशोऽध्यायः ॥

श्रीशुक उवाच—

एवं दृष्ट्वा तमक्रूरः प्रसन्नहृदयेन्द्रियः ।
तुष्टाव पुण्डरीकाक्षं भक्त्याऽवनतकन्धरः ॥ १ ॥

सत्यधर्मीया — अक्रूरस्तुतिव्याजतोऽव्याजभजकैरेवं देवोपासनं कर्तव्यमिति निरूप्यते । तत्रादौ दृष्ट्वा कृष्णं किं चकाराक्रूर इति किञ्चिच्चलच्चित्तं विदित्वा तदा तुस्वयमेव शुक उक्त्या स्थिरयती-

तीरयति ।। श्री शुक इति । प्रसन्नं हृदयं प्रसन्नानीतराणि चेन्द्रियाणि यस्य सः । अवनता कन्धरा यस्य सः ।। १ ।।

अक्रूर उवाच—

नतोऽस्म्यहं त्वाऽखिलहेतुभूतं नारायणं पूरुषमादिमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद् ब्रह्माऽऽविरासीद् यत एष लोकः ।। २ ।।

सत्यधर्मीया — साक्षात्कृतोऽयं साक्षाल्लक्ष्म्यध्यक्ष इति तल्लक्षणान्युक्त्वा नमस्यति ।। नतोऽस्मीति । अहं त्वा नतोऽस्मीत्यन्वयः । अखिलस्य हेतुभूतः कारणतया सदा संस्तम् । नावान्तरकारणमित्यप्याह ।। अखिलेति । खिलो दुर्बलो नेत्यखिलः स चासौ हेतुश्च तद्रूप इति तम् । पूरुषमादिमिति पदम् । पूरुषोऽक्षरपुरुषश्चासौ मा रमा च तस्या आदिं उपजीव्यमुत्तममिति यावत् ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्यादेः । पूरुषं पूर्णषड्गुणं सर्वशरीरशायिनं वा । आदिं अ न विद्यते आदिरुत्पादको यस्य स आदिः । अ निषेध इति विश्वः । निपात एकाजित्यादि त्वार्षतया नेति ज्ञेयम् । तर्हि प्रागभाववन्निवृत्तिः किं न स्यादित्यत आह ।। अव्ययमिति । नाशरहितम् । प्रातर्ध्यातोऽप्ययमित्याह ।। अविं सूर्यमयते गच्छति स इति तदन्तर्गतमिति । अवयः शैलमेषार्का इत्यमरः । अविः शैले रवौ मेष इति विश्वः । ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण इत्युक्तेर्नारायणमिति सुलग्नं चैतत्पक्षे । स्रष्टृत्वसंहर्तृत्वे नान्यगते इत्यप्याह ।। आदिमव्ययमिति । आदिमः सर्वादिभवश्चासौ विशेषेणायो गतिर्निवृत्तिर्यस्मात्स चेति । पूरुषो मा रमा साक्षादादिमा यस्य जगतस्तस्य व्ययोऽत्यन्तसामीप्यरूपश्च यतयश्च(?) यस्मात्स तथा तम् । विधातृविश्वविधायकताऽप्येवमित्याह ।। यदिति । नाभिजातादरविन्दकोशाद्ब्रह्मा यतो धातुः सकाशादेषः मानप्रमित आसीत्सोऽप्याविरासीत्तं नारायणम् । एवमाद्यविरुद्धगुणाश्रयत्वात्तदभिधानमिति विभवादुक्तवक्ष्यमाणानि लक्षणानि ज्ञेयानि । तथाऽनेकवाक्यमूलानीति यत्र दैवाल्लब्धा सङ्गतिर्भवतु नान्यत्र मन आयासनीयम् । अखिलहेतुमिति पाठे कारणीभूतप्रकृत्यादिकारणमित्यर्थः ।। २ ।।

सुमनोरञ्जनी — अक्रूरकृतस्तवनानुवादव्याजेनाधिकारिभिर्यथायोग्यं स्वयोग्यगुणोपसंहारपूर्वकं कर्तव्यमन्तर्बहिः सर्वगतत्वेनेत्युपासनात्रयं सूचयन् सर्वजगत्स्रष्टृत्वरमाब्रह्मादिभिरपि दुरधिगममहित्वादिमाहात्म्यं निरूपयत्यस्मिन्नध्याये । यद्यपि पूर्वाध्यायान्ते अस्तौषीदित्युक्तं तथापि

पुनस्तुष्टावेत्युक्तिः श्रोतॄणामादरजननाय । आचार्यैस्तथोपदेशात् । तदनुवादस्तुतिप्रकारमेवाह ॥ नतोऽस्मीति । अहं त्वां नतोऽस्मीत्यन्वयः । अन्यान् विहाय मन्नमने को हेतुरित्यत उक्तम् ॥ नारायणमिति । अरविरुद्धत्वान्नाराः गुणाः तेषामयनं गुणपूर्णमित्यर्थः । अन्यत्राविद्यमानं गुणपूर्णत्वं कथमुक्तमित्यतस्तत्र सम्भावकं लक्षणमाह ॥ अखिलेति । अखिलस्य जगतः कारणभूतम् । ननु जगत्सृष्टौ कारणान्तरमस्ति न वा । नेति पक्षे सृष्ट्यनुपपत्तिः । उपादानमन्तरा तदसम्भवात् । अस्ति चेल्लक्षणमतिव्याप्तमित्यत उक्तम् । अखिलेषु जगद्धेतुषु भूतं स्थितम् । तत्र तत्र स्थितो विष्णुस्त-तच्छक्तीः प्रबोधयन्नित्यादि । तथा च मुख्यं कारणत्वं तस्यैवेति भावः । अस्यैव जगत्कारणत्वे किं प्रमाणमित्यत उक्तम् । पूरुषं पुरुषशब्दवाच्यम् । अनेन पुरुषसूक्तं प्रमाणमुक्तं भवति । तेन च तद्व्याख्यानभूताः सर्वे वेदाः प्रमाणमिति लभ्यते । ब्रह्मणः पुरुषशब्दवाच्यत्वात्तद्व्यावर्तनायादित्वेन विशिनष्टि । पुराणपुरुषमित्यर्थः । अत एवाव्ययं नाशरहितम् । ननु लोके चतुर्मुखस्यैव स्रष्टृत्वेन प्रसिद्धेः कथं विष्णोः कारणत्वमित्यतः सोऽप्यस्मादेव जात इत्याह । यतश्चतुर्मुखादेष लोकः सुरनरतिर्यगादिः आविरासीत् स ब्रह्माऽपि यस्य विष्णोर्नाभिजातादरविन्दकोशादाविरासीदित्यन्वयः । यतः यस्मिन् नाभिपद्मे । एष लोकः समुदायैकवचनं भुवनानि तिष्ठन्तीति वा । यस्मिन्विश्वानि भुवनानि तस्थुरिति श्रुतेः ॥ २ ॥

भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि ।
सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ॥ ३ ॥

तात्पर्यम् – तवाङ्गेभ्यो भूताः ॥ ३ ॥

सत्यधर्मीया — भूस्तोयमग्निरिति श्लोके भूरादिविबुधान्तानामङ्गभूता इत्यङ्गतादात्म्यमुच्यत इति भ्रमं विग्रहं प्रदर्श्य भ्रंशयति ॥ तवाङ्गेभ्यो भूता इति । पद्भ्यां भूमिरित्यादेः । भूता जाताः ॥ ततश्चायं श्लोकार्थः ॥ भूः पद्भ्यां तोयमापो रेतसोऽम्भस्तु यद्रेत इत्यादेः । अग्निर्मुखात्पवनः प्राणात्खं नाभ्याम् । नाभ्या आसीदन्तरिक्षमित्यादेः । आदिर्भूतादिरहङ्कारः स्वस्यादिरहङ्कार इति वा । महान्महत्तत्त्वम् । अजा चादिश्च प्रकृतिरूपं कारणमिति । मनः पञ्चवृत्तिमदिन्द्रियाणीतराणि । सर्वे च ते इन्द्रियार्थाः शब्दाद्या विषयाः । विबुधा एतदभिमतिमन्तो ब्रह्मादयो देवा ये जगतो हेतवो हेतुत्वेन सम्प्रतिपन्नास्ते सर्वे ते तवाङ्गभूता अङ्गेभ्यो जाताः । मुख्यहेतुत्वं तव, तेषां त्ववान्तरकारणत्वमिति भावः । हा ईतव इति छेदः । या रमायास्तवः प्रकाशो यस्मादितीतवस्तस्य सम्बुद्धिः । विस्तृतं च तवस्तरमिति व्याख्यावसरे ॥ ३ ॥

सुमनोरञ्जनी — न केवलं जगत्स्रष्टृत्वेन प्रसिद्धो ब्रह्मैव एतस्माज्जातः किं तु ये ये जगत्कारण-

तया श्रुत्यादौ प्रसिद्धास्ते सर्वेऽपि त्वदंगसंभूता इत्याह ॥ भूरिति । भूरादिपञ्चभूतानि । तेषामादिः कारणीभूसम् । तामसं अहङ्कारतत्वम् । महान् महत्तत्वम् । अजा प्रकृतिः । मनः, इन्द्रियाणि तदतिरिक्तानि श्रोत्रादीनि । मनस इन्द्रियत्वेऽपि प्राधान्यात्पृथगुक्तिः । आदिः इन्द्रियकारणीभूतं तैजसाहंकारतत्वम् । इदमुपलक्षणम् । देवतादेहकारणवैकारिकाहङ्कारतत्वमपि ग्राह्यम् । यद्वा अजेति सम्बुद्धिः । द्वितीयादिशब्देनैव महत्तत्वकारणीभूता त्रिगुणा प्रकृतिः ग्राह्या । प्रथमादिपदेन त्रिविधमप्यहङ्कारतत्वं ग्राह्यमिति । सर्वेन्द्रियाणामर्थाः विषयाः शब्दादयः । न केवलं भूरादयो जडा एव अपि तु विबुधास्तत्तदभिमानिनो देवा अपि ये जगतो हेतवस्ते सर्वे । ते इत्यावर्तते । ते तव अङ्गभूताः अङ्गेभ्यो जाता इत्यर्थः । अत्रैव तवाङ्गभूता अवयवभूता इति भ्रमं निराकर्तुं आचार्यचरणैः तवांगेभ्यो भूता इति व्याख्यातम् ॥ ३ ॥

नैते स्वरूपं विदुरात्मनस्ते अजादयोऽन्यात्मतया गृहीताः ।
अजोऽनुबद्धः स गुणैरजाया गुणात् परं वेद न ते स्वरूपम् ॥ ४ ॥

तात्पर्यम् – अन्यात्मतया गृहीताः । मत्तोऽन्ये जीवात्मान् एत इति भगवता गृहीताः । 'अहं परो हि मद्भिन्ना जीवात्मानोऽल्पबुद्धयः । मद्वशाः सर्व एवेति ब्रह्मादीन्मन्यते हरिरि'ति स्कान्दे ॥ ''यथा हरिः स्वमात्मानं वेद तद्वद्रमापि न । ब्रह्मा च कुत एवान्ये विदन्त्येव तथापि त्वि'ति माहात्म्ये ॥ ४ ॥

सत्यधर्मीया — नैते स्वरूपं विदुरात्मन इति श्लोकेऽन्यात्मतया गृहीता इति पदमप्रतीतार्थमिति तदनूद्य स्वयं व्याकृत्य तद्द्रढिम्ने मानं चोदाहरति ॥ अन्यात्मतया गृहीता इति । अन्यपदं साकाङ्क्षितमिति विवक्षितं पूरयति ॥ मत्त इति । अन्ये च त आत्मानो जीवाश्च तेषां भावस्तत्ता । तत्त्वेन गृहीता इति मूलार्थं मनसि निधाय जीवात्मान एत इति भगवता गृहीता ज्ञाता इत्युक्तम् । अहं परोऽन्यो मदिति व्यस्तं समस्तं च जीवात्मनः । तत्र हेतुरल्पशक्तय इति । कदाचित्तथाऽन्यदा त्वन्यथेति नेत्याह ॥ सर्वदैवेति । इति । ब्रह्मादीन्हरिर्मन्यत इति । हरिर्यथा स्वं वेद तथा रमाऽप्यात्मानं नो वेद ब्रह्मा च न वेदाऽन्ये च कुत एव विद्युः । तथाऽपि तु योग्यतानुसारेण जानन्ति ॥ ततश्चायं श्लोकार्थः ॥ एतेऽजादयो ब्रह्मादय आत्मनो जगत्स्वामिनः स्वरूपं न विदुः । ते त्वया अन्यात्मतयाऽन्ये मत्त आत्मान इति गृहीता ज्ञाताः । अजो ब्रह्माऽपि सोऽजायाः प्रकृतेर्गुणैरनुबद्ध इति हेतुगर्भम् । ततो न वेदेति । तर्हि नैतद्ब्रह्मेति जानाति जनार्दनं साकल्येन किमित्यतोऽप्याह ॥ अजा येति । ते स्वरूपं वा याऽजा साऽपि ते गुणात्परं तदतीतं स्वरूपं न वेद । गुणात्परं यथा तथा सत्यपीत्यपि योजना । ज्ञानाभावः सर्वस्येत्युक्ते रमाऽपि साकल्येन न जानाति जानन्ति च यथा स्वयोग्यं ते सर्वेऽपीति

तदर्थमुपासना सार्थकीति तात्पर्यम् । सनकादयो जानन्ति किमित्यतो नेत्यप्याह ।। अजाया इति । न विद्यते जाया येषां तेऽजायाः । अनित्यत्वान्न निङ् । अर्शआद्यजन्तो वा ।। ४ ।।

सुमनोरञ्जनी — ननु जगत्कारणत्वं यथा श्रुतिबलाद्विष्णोरङ्गीक्रियते तथा हिरण्यगर्भः समवर्ततेत्यादिश्रुतिबलादन्येषामपि स्यात् । न च द्वयोः स्वातन्त्र्येण कारणत्वं विरुद्धम् । ऐक्याङ्गीकारेणोपपत्तेरित्यतस्तत्राह ।। नैत इति । एते अजादयः ब्रह्मादयः आत्मनः सर्वस्वामिनः ते स्वरूपं स्वरूपभूतं जगत्स्रष्टृत्वादिमाहात्म्यं न विदुः न प्राप्नुवन् । ननु कुतो न प्राप्नुवन्ति । अजादीनां भगवदभेदेन तत्स्वरूपभूतमहिम्नोऽपि प्राप्तिसंभवादिति चेत्कालत्रयेऽपि भेदग्राहिप्रत्यक्षविरुद्धोऽभेदो न युक्त इत्यभिप्रायेण भेदविषये ईश्वरप्रत्यक्षं प्रमाणयति ।। अन्यात्मतयेति । एते जीवात्मानो मत्तोऽन्ये इति भगवता गृहीता इत्यर्थः । तदुक्तमाचार्यचरणैः । मत्तोऽन्ये जीवात्मान एत इति भगवता गृहीताः ।

> अहं परो हि मद्भिन्ना जीवात्मानोऽल्पशक्तयः ।
> मद्वशाः सर्व एवैते ब्रह्मादीन् मन्यते हरिः ।। इति स्कान्द इति ।

स्पष्टोऽर्थः । भेदे प्रत्यक्षं प्रमाणमुक्त्वा अनुमानमपि वक्तुं यदा श्रुत्यादौ देशकालाभ्यां भगवता समत्वेन प्रसिद्धा रमापि तत्स्वरूपं साकल्येनावगन्तुमशक्ता तदा कुतो ब्रह्मादीनां तदवगमः कुतस्तरां तदैक्यं युक्तमिति भावेनाह ।। अजेति । यथातथाशब्दावध्याहार्यौ । भवानिति शेषः । भवान् ते तव स्वरूपं यथा वेद साकल्येन जानाति तथा या श्रुत्यादौ प्रमिता सा अजा रमापि ते स्वरूपं न वेद साकल्येनेति शेषः । यदा च रमापि तव स्वरूपं साकल्येन जानाति तदा किमु वक्तव्यं ब्रह्मा न जानातीति । सः प्रकृतेः गुणैः सत्वादिभिः अनुबद्धः बद्धः हेतुगर्भविशेषणम् । अजः ब्रह्मा गुणात् सत्वादिगुणसमुदायात् परम् । दूरीकृतगुणत्रयमित्यर्थः । ते स्वरूपं न वेद न जानातीति किमु इति योजना । अजादीनां प्रकृतत्वेऽपि अजमात्रस्य ग्रहणं कैमुत्यद्योतनाय । यदाऽजस्यैवं भावः किम्वन्येषामिति । अनेन भगवतः ब्रह्मादिभ्योऽभेदे गुणबद्धत्व-गुणातीतत्व-सार्वज्ञ्याल्पज्ञत्वादि-रूपविरुद्धधर्माधिकरणत्वानुमानं प्रमाणमुक्तं भवति । एवमेवाभिप्रेत्योक्तं तात्पर्ये ।

> यथा हरिः स्वमात्मानं वेद तद्वद्रमापि न ।
> ब्रह्मा च कुत एवान्ये विदन्त्येव तथापि तु ।।

इति माहात्म्य इति । अयमर्थः । हरिः यथा स्वमात्मानं वेद साकल्येन जानाति तद्वद्रमापि न वेद । ब्रह्मा च ब्रह्मा तु कुतः । अन्ये तु कुत एव । कुतस्तरां विदन्तीत्यर्थः । यदि सर्वथा सर्वेषां भगवज्ज्ञानं नास्ति तर्हि साधनानुष्ठानं व्यर्थमापद्येतेत्यत आह ।। तथापि त्विति । यद्यप्येवं तथापि तु यथायोग्यं विदन्ति । अतो न साधनानुष्ठानवैफल्यमिति भावः ।

इदं पाठान्तरम् (ननु) कुतो न प्राप्नुवन्ति । अजादीनां भगवदभेदेन तत्स्वरूपभूतस्यापि महिम्नः प्राप्तिसंभवादित्यतो न ब्रह्मादीनां भगवता अभेदोऽस्ति । भेदेनैव गृहीतत्वादित्याह ।। अन्यात्मतयेति । भगवतेति शेषः। एते जीवात्मानः मत्तोऽन्ये इति भगवता गृहीताः निश्चिता इत्यर्थः । अनेन जीवेश्वरयोर्भेदे ईश्वरप्रत्यक्षं प्रमाणमित्युक्तं भवति । एतदेवाभिप्रेत्योक्तमाचार्यचरणैः ।

मत्तोऽन्ये जीवात्मानो एत इति भगवता गृहीताः ।

> अहं परो हि मद्भिन्ना जीवात्मानोऽल्पशक्तयः ।
> मद्वशाः सर्व एवेति ब्रह्मादीन् मन्यते हरिः ।।

इति स्कान्दे इति सप्रमाणकं व्याख्यातम् । स्पष्टमिदम् । इतश्च नाभेदो युज्यत इत्याह ।। अज इति । स प्रकृतः अजो ब्रह्मा । अजायाः प्रकृतेः गुणैः सत्वादिभिः अनुबद्धः भगवदिच्छानुसारेण बद्धः । अतो गुणात्परं गुणातीतं दूरीकृतगुणत्रयमित्यर्थः । ते तव स्वरूपं न जानातीति योजना । अत्र अजादीनां प्रकृतत्वेऽपि अजमात्रग्रहणं यदा प्रतिभातपरावरस्यैवं भावस्तदाऽन्येषामेवंभावः स्वतः सिद्ध इत्यभिप्रायेण । ननु मास्तु गुणबद्धस्य ब्रह्मणः गुणातीतभगवत्स्वरूपज्ञानं तत् तस्य भगवदभेदोऽपि मास्तु । रमादेव्यास्तु सर्वथा गुणबद्धत्वाभावेन तस्यास्तदस्तु इत्याशङ्काया अपि इदमेवोत्तरम् ।। अजाया इति । या गुणाबद्धत्वेन देशकालाभ्यां च भगवता समत्वेन प्रसिद्धा सा अजापि रमापि ते स्वरूपं न वेदेति । तस्य सर्वथा भगवद्ज्ञानाभावे सर्वज्ञा सैषा बन्धिका प्रकृतिरिति श्रुतिविरोध इत्यस्यापीदमेवोत्तरम् ।। वेदेति । यद्वा किं रमादीनां सर्वथा भगवत्स्वरूपज्ञानं नास्ति । नेत्याह ।। वेदेति । भवानिति शेषः । यथा तथेत्युपस्कर्तव्यम् । भवान् यथा ते स्वरूपं वेद साकल्येन जानाति तथा अजा अजोऽपि न जानातीति । रमादयः साकल्येन न जानन्तीति भावः । अनेन गुणबद्धत्व-गुणातीतत्व-अल्पज्ञत्व-सर्वज्ञत्वादिरूपं भेदसाधकमभेदे बाधकं चेदमुक्तं भवति । एतदेवाभिप्रेत्योक्तमाचार्यचरणैः ।

> यथा हरिः स्वमात्मानं वेद तद्वद्रमापि न ।
> ब्रह्मा च कुत एवान्ये विन्दन्त्येव तथापि तु ।। इति ।

ब्रह्मा च न वेदेत्यन्वयः । यदि सर्वथा भगवद्ज्ञानमन्येषां नास्ति तर्हि ज्ञानार्थं साधनानुष्ठानं व्यर्थं स्यादित्यत उक्तम् ।। तथापीति । तथापि तु यथायोग्यं विन्दन्त्येव । अतो न वैयर्थ्यमिति भावः ।। ४ ।।

त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ।
साध्यात्मं साधिभूतं च साधिदैवं च साधवः ।। ५ ।।

तात्पर्यम् – 'स्थितो ब्रह्मादिदेवेषु खादिभूतेषु चेश्वरः । आत्मशब्दोदितनरेष्वपि यस्माज्जनार्दनः । साध्यात्मः साधिभूतश्च साधिदैवेति चोच्यत' इति ध्यात्मे ॥ ५ ॥

सत्यधर्मीया — त्वां योगिनो यजन्त्यद्धेति पद्येऽधिकेनात्मना सहितं तथाऽधिकेन भूतेन सहितमधिकेन दैवेन सहितमिति कृष्णस्य स्वोत्कृष्टात्मसहितता प्रतीयते तां निरसितुं मानेन तच्छब्दं निरुच्य हरिवाचकतां वर्णयति ॥ स्थित इति । ब्रह्मादिदेवेषु खादिषु चात्मशब्दोदिताश्च तेषु च यस्मादीश्वरो जनार्दनः स्थितस्तस्मादधिकतया देवेषु विद्यमानं रूपमधिदैवं तेन सहित इति सर्वत्र विग्रहो ज्ञेयः । साधिभूत इति साध्यात्म इत्युच्यते । क्रमव्यत्यस्त्युक्तिश्चैतत्त्रितयाधिष्ठातृरूपाणां विशेषाभावसूचनार्थेति ज्ञेयम् । पाठक्रमादर्थक्रमो गरीयानित्येवमुक्तिरिति परे । अपरे चोत्पत्तिक्रमसंहारक्रमविवक्षयोक्तिरित्युक्तवन्तः । अधिदैव इत्यधिदैवेति समस्तं पदम् । अतोऽधिदैव इति वक्तव्यमिति निरस्तम् । सम्बुध्यन्तं चेति केचित्केचिदविभक्तिको निर्देश इति व्याचक्रुः ॥ अथ मूलार्थः ॥ साधवो योगिनो महापुरुषमीश्वरं साध्यात्ममधिकत्वेनात्मसु विद्यमानमध्यात्मं रूपं तेन सहित इति साध्यात्मस्तम् । एवमितरत्रापि ज्ञेयम् । साधिभूतं साधिदैवं चाद्धा यजन्ति । आत्मस्वध्यात्मम् । अनश्चेति टच् ॥ ५ ॥

सुमनोरञ्जनी — सर्वोपास्यत्वाच्च त्वमेव वन्द्य इत्याह ॥ त्वामिति । योगिनः उपायज्ञाः । साधवः अध्यात्मनिष्ठाः । साध्यात्ममित्यादि । अध्यात्माद्यनुष्ठानसहितम् । अत एव महापुरुषं महांश्चासौ पूर्णषड्गुणश्च । ईश्वरं निरवधिकैश्वर्ययुक्तम् । त्वां यजन्ति उपासते । मुमुक्षवो ज्ञानोपायैः श्रवणमननादिभिः अध्यात्माद्यधिष्ठानेषु त्वामुपासत इति भावः ॥ ५ ॥

त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः ।
यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥ ६ ॥

तात्पर्यम् – 'सर्वदेवेष्वपि हरिः सर्वदेवनियामकः । नामवान्सर्वदेवानां सर्वपूजां तथाऽत्त्यसावि'ति च ॥ ६ ॥

सत्यधर्मीया — त्रय्या च विद्यया केचित्त्वां वा इति श्लोके नानारूपामराणामाख्यया यजन्त इत्युच्यते । तत्र तदाख्या च नाभेदं विना मुख्यतः सम्भवतीति तदात्मकतैवेति प्रतीयत इति तामध्यात्मवचनेन निराकरोति । सर्वदेवेष्विति । सर्वेषु हरिः सर्वदेवनियामक इति सर्वदेवानां नामवान्यतस्तत्तन्नामकस्ततः सर्वपूजां चासावत्ति भक्षयति । तदधीनत्वादर्थवत् । स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम् । यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः । नामानि सर्वाणि । यो

देवानां नामधा एक एवेत्यादेस्तत्तन्नाम्ना दत्ताहुतीस्तत्तदन्तर्गतो मुख्यतो भगवानत्तीति भावः ॥ ततश्चायं श्लोकार्थः ॥ योगिन इत्युक्त्या तदितरेऽन्यथा यजन्तीति सूचितम् । तान्सकृत्यानाह ॥ त्रय्येति । त्रय्या विद्यया वेदविद्यया कर्मप्रधानया वैतानिका वितानो यज्ञः । वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणि । वृत्तभेदावसरयोर्वितानं तुच्छमन्दयोरिति विश्वः । तत्कृताः । विततैर्यज्ञैर्नानारूपा-मराख्यया नाना नानाविधानि रूपाणि चतुर्मुखत्र्यक्षत्वाद्याकारा येषां ते च तेऽमराश्च देवाश्च तेषां नानारूपाख्या तया यजन्ते पूजयन्ति । नानारूपेति योग्यतयाख्यापदेनान्वेति । नानारूपेण सुवर्णादि-साधनेन वा । बहुरूपं च पुरटमिति काठकभाष्योक्तेः । अत एव तुच्छं वितानं तत्कर्मसम्बन्धिन इति वैतानिकाः । त्रैविद्या मां सोमपाः पूतपापाः क्षीणे पुण्ये मर्त्यलोकं विशन्तीत्यादेः ॥ ६ ॥

सुमनोरञ्जनी — कर्मिणामुपासनाप्रकारमाह ॥ केचिद्वैतानिकाः यज्ञादिकर्मनिष्ठाः द्विजाः त्रय्या विद्यया वेदविद्यया । विततैः यज्ञैः त्वां वै त्वामेव यजन्ते । नन्विन्द्रादिदेवोद्देशेनैव यागः प्रतीयते । तत्कथमुक्तं त्वामेव यजन्त इति तत्राह ॥ नानेति । नानारूपाः नानाविधाकृतयो येऽमराः देवाः इन्द्रादयः तेषामाख्यया नाम्ना त्वामेव यजन्त इत्यन्वयः । इन्द्रादिनामभिरपि त्वामेव जानन्तो यजन्तीति भावः । तदुक्तम् । सर्वदेवेष्वपि हरिः सर्वदेवनियामकः । नामवान् सर्वदेवानां सर्वपूजां तथाऽत्त्यसाविति ।

ननु कथमिन्द्रादिनामभिर्भगवन्तं जानन्ति । इन्द्राय वज्रपाणय इत्यादि तत्तदसाधारणधर्मोक्तेरित्यत उक्तम् ॥ नानारूपेति । अस्मिन्पक्षे नानारूपेति सम्बुद्धिः । यस्मात्त्वं नानारूपोऽसि अतो वज्रपाणित्वपाशहस्तत्वादिकमपि इन्द्राद्यन्तर्यामिणि त्वय्येव जानन्तीति भावः । इन्द्रादीनां बहुत्वेऽपि समुदायाभिप्रायेण आख्ययेत्येकवचनम् । विप्राणां भोजनमितिवत् । नानारूपामराणां आख्या यस्याः तयेति विद्याया विशेषणं बोध्यम् ॥ ६ ॥

एके त्वखिलकर्माणि सन्न्यस्योपशमं गताः ।
ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम् ॥ ७ ॥

सत्यधर्मीया — प्रवृत्तिकर्ममार्गमुक्त्वा निवृत्तकर्मप्रवर्तनाप्रकारमीरयति ॥ एक इति । एक एकान्तिनोऽखिलकर्माणि सन्न्यस्य त्वयि समर्प्योपशमं त्वन्निष्ठां गता ज्ञानिनो ज्ञानयज्ञेन ज्ञानविग्रहं ज्ञानानन्ददेहं यजन्ति ॥ ७ ॥

सुमनोरञ्जनी — भक्तियोगिनां ज्ञानिनामुपासनामाह ॥ एके त्विति । तुशब्देन पूर्वोक्तेभ्यो विशेषं द्योतयति । तमेव विशेषमाह ॥ अखिलेति । अखिलान्यपि लौकिकानि वैदिकानि च कर्माणि ।

सन्न्यस्य त्वय्येव समर्प्य । त्वत्कर्तृकत्वेन त्वत्पूजारूपत्वेन चानुसन्धायेति यावत् । पूर्वे तु वैदिकान्येव समर्पयन्तः । एते त्वखिलानीति विशेष इति भावः । उपशमं उपे सर्वोत्तमे शमं हरौ निष्ठां भगवति भक्तिमिति यावत् । ज्ञानयज्ञेन ज्ञानाख्येन यज्ञेन । ज्ञानविग्रहं त्वां यजन्तीति सम्बन्धः ॥ ७ ॥

अन्ये तु संस्कृतात्मानो विधिना विहितेन वै ।
यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्यैकमूर्तिकम् ॥ ८ ॥

सत्यधर्मीया — अन्ये तु संस्कृतात्मानो गुरुशिक्षितमनस्कास्तीर्थस्नानादिपवित्रदेहाः । विधिना कालेन । विधिर्विधाने नियतौ विधिः काले विधातरीति विश्वः । पञ्चधा प्रपञ्चितेन पञ्चकालपरायणैरितीरणात्त्वन्मयास्त्वं मयः प्रधानो येषां ते तथा बहुमूर्त्यैकमूर्तिकमिच्छागृहीतानेकाकारं तथैकमूर्तिकम् । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इत्यादेः ॥ ८ ॥

सुमनोरञ्जनी — अन्तरुपासनाप्रकारमाह ॥ अन्ये त्विति । विधिना वेदेन विहितेन कर्मणा तदनुष्ठानेनेति यावत् । संस्कृतात्मानः शुद्धान्तःकरणाः । त्वन्मयाः त्वत्प्रधानकाः । मयं प्रधानमुद्दिष्टमिति वचनात् । बहुमूर्त्यां स्थितं एकमूर्तिकम् । नवनारीकुंजरादिवद्बहुमूर्तिसमाहारात्मकबिम्बसंज्ञमित्यर्थः । इयमेवोपासनाऽस्मत्परमगुरुचरणजैः प्रपञ्चिता षोडशरत्नाख्ये ग्रन्थे ॥ ८ ॥

त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।
बह्वाचार्यविभेदेन भगवन् समुपासते ॥ ९ ॥

सत्यधर्मीया — पाशुपताद्यागमा अन्यथाऽवगमयन्ति तत्कथं सर्वे त्वां यजन्तीति मन्दाशङ्कां परिहरति ॥ त्वामिति । शिवोक्तेन मार्गेण मोहकसमयरूपेण शिवरूपं शिवान्तर्यामिणं बह्वाचार्यविभेदेन । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारयेत्युक्तेर्दधीच्यादयो ये बहव आचार्यास्तत्कृतमतविभेदेन । दधीच्याद्यैश्च कारयेत्युक्तेः । तेऽधिकारिणस्त्वामेव समुपासते । नानारूपामराख्ययेत्युक्तं विशदयति ॥ त्वामिति वा । नानारूपामराख्ययेत्युक्त्यनन्तरमताद्दगाशङ्कानुन्मेषात् ॥ ९ ॥

सुमनोरञ्जनी — ननु शिवाद्युपासकानामपि सत्वात्कथं सर्वोपास्यत्वं भगवत इत्यत आह । त्वामेवेति । अन्ये पाशुपताद्याः । शिवरूपिणं शिव एव रूपं प्रतिमा यस्य तथाविधं शिवान्तर्यामिणमित्यर्थः । एवं बह्वाचार्यविभेदेन बहूनामाचार्याणां दधीचिबृहस्पत्यादीनां भेदेन उपदेशभेदेन उपासनां कुर्वन्तोऽपि त्वामेवोपासते ॥ ९ ॥

सर्व एव यजन्ति त्वां सर्वदेवमहेश्वरम् ।
येप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ १० ॥

सत्यधर्मीया — उपसंहरति ॥ सर्व इति । हे प्रभो येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियोऽन्यस्मिंस्त्वद्भिन्ने देवे धीर्येषां तथा सर्वदेवमहेश्वरं सर्वेषां देवानां महेश्वरं परमस्वामिनं ते सर्वेऽपि त्वामेव भजन्ते ।

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ।
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते । इति भगवद्वचनात् ॥ १० ॥

सुमनोरञ्जनी — ननु यदि पाशुपताद्या अपि शिवादिरूपिणं भगवन्तमेवोपासते भगवदुपासनाफलमेव किं न लभन्त इत्यत आह ॥ सर्व एवेति । यद्यपि ये अन्यदेवताभक्तास्ते सर्वेऽपि सर्वदेवमहेश्वरं सर्वदेवोत्तमं त्वामेव यजन्ति अपि तथापि तेऽन्यधियः त्वत्तोऽन्यस्मिन् शिवादिरूपे अधिष्ठान एव पूज्यत्वं मन्वानाः अयं शिव एवास्माभिः पूज्यत इति ज्ञानिनो न तु तदन्तर्यामिणि हरौ पूज्यत्वबुद्धिमन्त इति यावत् । तस्मादेव भगवदुपासनाफलं न लभन्त इति भावः । अन्या विलक्षणा धीर्येषामिति वा । वैलक्षण्यं चेदृशमेव बोध्यम् । प्रभो इति सम्बोधनम् । प्रभाविति सप्तम्यन्तपाठे प्रभौ त्वयि विषये । अन्या विलक्षणा शिवाद्यभेदावगाहिनी धीर्येषामित्यर्थः ॥ १० ॥

यथाऽद्रिप्रभवा नद्यः पर्जन्यापूरिता विभो ।
विशन्ति सर्वतः सिन्धुं तद्वत् त्वां गतयोऽन्ततः ॥ ११ ॥

सत्यधर्मीया — अद्रिप्रभवा अद्रिभ्यः प्रभवन्तीति तास्तथा नद्यः पर्जन्येन ध्वनद्घनेनापूरितास्तद्वृष्टजलैः पूर्णाः सर्वतः सिन्धुं समुद्रं विशन्ति । तद्वदन्ततः सर्वसुपर्वगतयोऽर्चनमार्गास्त्वामेव विशन्ति । आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रतिगच्छतीत्यादेः । गतयस्तत्तन्मतमूलश्रुतिसम्पादितज्ञानानि त्वामेव विशन्ति त्वद्रूपैकविषयिण्यो भवन्तीति यावत् ॥ ॐ गतिसामान्यात् ॐ ॥

सर्वे वेदा युक्तयः सप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव ।
प्रकाशन्ते न विरोधः कुतश्चिद्वेदेषु सर्वेषु तथेतिहासे ।

इति श्रुतेर्गतेर्ज्ञानस्य साम्यमेवेत्यादेः ॥ ११ ॥

सुमनोरञ्जनी — सर्वदेवतापूजापि भगवत्पूजैव भवतीत्येतत्सदृष्टान्तमाह ।। यथेति । अद्रिभ्यः प्रभवः उत्पत्तिर्यासां ताः । पर्जन्येन मेघेन आपूरिताः । सर्वतः सर्वदेशात् । सर्वा इति नदीविशेषणं वा । सिन्धुं समुद्रं तद्वत् गतयः गतिसाधनीभूता उपासना अन्ततः त्वां विशन्तीति त्वद्विषयिण्यो भवन्तीति । यद्वा नानारूपामराख्ययेत्यादिना यत्सर्वनामवत्वं भगवतोऽभिसंहितं तत्र प्रमाणमाह ।। यथेति । अनेन हन्तैतमेव सर्वाणि नामान्यभिवदन्ति । यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिविशन्तीति श्रुतिमुपादत्ते । गतयः गतिसाधनानि सर्वाणि नामानि अन्ततः मुख्यया वृत्त्या त्वां विशन्तीत्यर्थः ।। ११ ।।

सत्त्वं रजस्तम इति भवतः प्रकृतेर्गुणाः ।
तेषु हि प्राकृताः प्रोता आब्रह्म स्थावरादयः ।। १२ ।।

सत्यधर्मीया — त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरित्यादेः बह्वचो हि बुद्ध्यो मतभेदाल्लोकानामित्याह ।। सत्त्वं रज इति । भवतः प्रकृतेस्त्वदुत्तेजितशक्तिरिति त्वत्सम्बन्धिन्याः सत्त्वं रजस्तम इति नामानो गुणाः । तेषु हि यतः स्थावरादय आब्रह्मपर्यन्तं प्रोताः सम्यक् स्यूतास्ततः प्राकृता अतो वैचित्र्यमुपपद्यत इति भावः ।। १२ ।।

सुमनोरञ्जनी — ननु सर्वैः क्रियमाणमुपासनादिकमन्ततो भगवद्विषयकमित्युक्तम् । तर्हि फलभेदः किंनिबन्धन इत्यतोऽन्यधिय इत्यनेन बुद्धिवैलक्षण्यं निमित्तमित्युक्तम् । तदपि कुत इत्यतस्तत्र निमित्तमाह ।। सत्वमिति । प्रकृतेः जडप्रकृतेः कार्यभूताः गुणाः सत्वादयः भवतः त्वत्तः, जाता इति शेषः । तेषु सत्वादिषु स्वावरादयः तृणादयः आब्रह्म ब्रह्मपर्यन्तं विद्यमानाः स्थावरं तृणमारभ्य ब्रह्मपर्यन्ताः पदार्था इति यावत् । तेषु सत्वादिषु प्रोताः अनादितः सम्बद्धा इत्यर्थः । अत एव प्राकृताः । हि प्रमितमेतत् । अतो बुद्धिवैलक्षण्यं युक्तमिति । अयं भावः । जनास्त्रिविधाः सात्विकाः राजसाः तामसाश्चेति । सात्विकानामन्तःकरणं सत्वगुणोपबृंहितं सम्यग्ज्ञानमेव जनयति । राजसानां मिश्रम् । तामसानां तमोगुणोपबृंहितं विपरीतज्ञानमेव जनयतीति गुणत्रयसम्बन्ध एव बुद्धिवैलक्षण्ये निमित्तम् । तत्सम्बन्धस्यानादित्वान्न तत्र निमित्ताकाङ्क्षेति ।। १२ ।।

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ।
गुणप्रवाहोऽयमविद्ययाऽसकृत् प्रवर्तते देवनृतिर्यगात्मसु ।। १३ ।।

तात्पर्यम् – अविद्यया भगवदिच्छया ॥ १३ ॥

सत्यधर्मीया — तुभ्यमिति श्लोके गुणप्रवाहोऽयमविद्ययेत्याविद्यकता प्रपञ्चस्योच्यत इति प्रतीतिं निवारयितुमविद्ययेत्यनूद्य

महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यते ।

इत्यन्यत्र स्वयं मानमुदाहृतवन्त इति स्ववचनतो विवृण्वन्ति ॥ अविद्यया भगवदिच्छयेति । अस्याकारवाच्यस्य विष्णोर्विद्ययेति केचित् । तन्न । प्रामाणिकक्रमानानुगुण्यात् । ननु तर्हि भगवत्पादोदितं भगवदिति निरवनिकमिति चेन्न । अध्याहृततच्छब्दसङ्गमनीययच्छब्दार्थत्वात् । मानिकध्यानतापदद्दृष्ट्या भगवदिति रूढावेव नैर्भर्यात् । माने च तवेत्येतन्न सरसान्वयीति दिगिति केचित् ॥ ततश्च श्लोकव्याकृतिः ॥ अयं गुणप्रवाहो यस्य भगवतोऽविद्ययेच्छया देवनृतिर्यगात्मसु देवाश्च नरश्च तिर्यञ्चश्चेत्यतदात्मसु जीवेष्वसकृत्प्रवाहतः प्रवर्तते । तुभ्यं तस्मै । अविषक्ता क्वाप्यप्रतिबद्धा तथा शुभाशुभफलसम्बद्धा दृष्टिर्ज्ञानं यस्य तस्मै । कुतोऽयं विलुप्तावबोध इत्यत आह ॥ सर्वात्मन इति । सर्वस्वाम्यादिगुणयुक्ताय सर्वधियां साक्षिणे च नमोऽस्तु । नैवमन्यस्मै कृता नतिरुन्नतिदेति तुभ्यं ते इव नमस्तुभ्यमस्तु नान्यस्मा इत्यन्वयस्तच्छब्देनेवार्थकेन द्योत्यते । गतम् । हे त आनन्दमूर्त इति वा ॥ १३ ॥

सुमनोरञ्जनी — ननु ब्रह्मादिष्विव चेतनत्वाद्भगवत्यपि गुणकार्यपरंपरा किं न स्यादित्यतो गुणप्रवाहस्य तदिच्छाधीनत्वात्कथं प्रेक्षावान् गुणप्रवाहरूपेण बन्धेन स्वयं बद्धो भूयादिति वदन्प्रणमति ॥ तुभ्यमिति । यद्वा ब्रह्मादिस्थावरान्तेषु सत्वादिगुणसम्बन्धेऽपि किं निमित्तमित्यतस्तत्र निमित्तं वदन्प्रणमति ॥ तुभ्यमिति । यस्य भगवतोऽविद्यया इच्छया । तदुक्तम् । अविद्यया भगवदिच्छयेति । अन्यत्रापि

महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येव तवेच्छानन्त कथ्यत ॥ इति च ।

देवनृतिर्यगात्मसु देवनृतिर्यक्शब्देन उत्तममध्यमाधमा गृह्यन्ते । एतद्रूपेषु आत्मसु चेतनेषु अयं गुणप्रवाहः गुणानां सत्वादीनां प्रवाहः ज्ञानादिरूपकार्यपरंपरा । असकृत् प्रतिकल्पं प्रवर्तते । तत्तादृशे तुभ्यं नमोऽस्त्विति सम्बन्धः । कीदृशाय । अविषक्तदृष्टये । अविषक्ता अप्रतिबद्धा दृष्टिर्यस्येति तस्मै । तत्र हेतुः सर्वात्मन इति । सर्वस्वामिने इत्यर्थः । स्वानधीनं हि प्रतिबन्धकं स्यादिति भावः । सर्वधियां साक्षिणे साक्षादीक्षित्रे ॥ १३ ॥

अग्निर्मुखं तेऽवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ।
द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवं कुक्षिर्मरुत् प्राणबलं प्रकल्पितम् ॥ १४ ॥

तात्पर्यम् – त्वयैव प्रकल्पिताः । 'विष्णोरङ्गसमुद्भूता विष्णोरङ्गानि देवताः । उच्यन्ते सर्ववेदेषु स्वरूपा भेदिनोऽपि त्वि'ति च ॥ १४ ॥

सत्यधर्मीया — अग्निर्मुखं त इत्यादिश्लोकत्रिके लोकाः सपालाः प्रकल्पिता इति मिथ्याभूता आरोपिता इत्यन्यथाप्रतीतिं वारयितुं त्वयीत्यस्य तृतीयात्वमभ्युपेत्यान्वयं प्रदश्र्य मानेन तत्तात्पर्यमाह ॥ त्वयैव प्रकल्पिता इति । प्रकर्षेणोत्पादिता यतो विष्णोरङ्गेभ्यः समुद्भूतास्ततो देवता विष्णोरङ्गान्युच्यन्ते । स्वरूपाद्भेदिनो भेदवन्तश्चेदपि सर्ववेदेषु ब्राह्मणोऽस्य मुखमासीदित्यादिषु । यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः । तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखमित्यादेः । कार्यकारणशब्दसाङ्कर्याद्देवा अङ्गानीत्यङ्गानि देवा इत्यप्यर्थः ॥ ततः श्लोकार्थः ॥ सर्वसुपर्वसपर्या त्वय्येव पर्यवस्यतीत्येतत्स्थेम्ने प्रागुक्ताङ्गभूता इति विवृण्वन्नाह ॥ अग्निर्मुखमिति । तेऽग्निर्मुखम् । मुखादिन्द्रश्चाग्निश्चेत्यादेः । अवनिर्भूस्तेऽङ्घ्रिः । पद्भ्यां भूमिरिति श्रुतिः । एकवचनं च परस्परं कार्यकरत्वादिति ज्ञेयम् । ईक्षणं सूर्यः । चक्षोः सूर्योऽजायत । नभो नाभिः । नाभ्या आसीदन्तरिक्षम् । श्रुतिर्दिशः श्रोत्रात् । एकवचनं चोक्तगतिकम् । एवं सजातीये सर्वत्र ज्ञेयम् ।

कं द्यौः शीर्ष्णो द्यौः । सुरेन्द्रा इन्द्राद्यस्तव बाहवः । बाहू राजन्यः कृतः । श्रुतेर्बाहुद्वितयमात्रार्थकत्वभ्रमं भ्रंशयितुं बाहव इति तद्विवरणं कृतमिति अवधेयम् । सत्यलोकपालो ब्रह्माऽग्निः कुबेरो निर्ऋतिश्चेतान्विहायेतरे बाहुजाः । अग्निर्मुखमिति पृथग्गृहीत इति वचनबाहुजः । यथोक्तम् । बाहवो लोकपालानां प्रायशः क्षेमकर्मणामिति श्लोकतात्पर्ये द्वितीयस्कन्धे ब्राह्मणवैश्यादीन्वर्जयितुं प्रायश इतीति । सत्यादिलोकपालेषु ब्रह्माऽग्नी ब्राह्मणौ, कुबेरो वैश्यो, नैर्ऋतिः शूद्र एतेषां बाहुजत्वं परिहर्तुमिति यादुपत्योक्तेः । विस्तरः क्वचिव्द्यत्यासश्च कल्पभेदसमाधेयश्च द्वितीयाज्ज्ञेयः । अर्णवं समुद्रः कुक्षिस्त्वदुदरभवस्तदाश्रितश्च । अर्णव इत्यपि पाठोऽस्ति सोऽक्लेशिष्टार्थः । मरुत्प्राणः प्राणाद्वायुः प्राणेन सहितं बलं तत्र विद्यमानसामर्थ्यं च । एवमेव सर्वत्रापि पूर्वोक्तेरग्न्यादौ पाचनादिशक्तयो ग्राह्या इति ध्येयं परिवर्तनं वा । इत्येतत्सर्वं प्रकल्पितं त्वयैवोत्पादितं त्वयैव तदाश्रितत्वेन च प्रकृतमित्यर्थः । अर्णवमिति पाठोऽपि विना शेषमशेषहर्षविदः । तथा ह्युक्तमनुव्याख्यानसुधयोः ।

तस्माच्छास्त्रेण जिज्ञास्यमस्मदीयगुणार्णवम् ।
वासुदेवाख्यमद्वन्द्वं परं ब्रह्माखिलोत्तमम् ।

अर्णव इवाचरतीति क्विपि कृतेऽर्णवतेः पचाद्यचि कृतेऽर्णवशब्दः स्त्रीलिङ्गः साधुरिति ॥ १४ ॥

सुमनोरञ्जनी — संक्षेपविस्तराभ्यां च कथयन्ति मनीषिणः । बहुवारस्मृतेस्तस्य फलबाहुल्यकारणादित्युक्तदिशा भगवद्गुणानां पुनः पुनः स्मरणस्य फलबाहुल्यकारणतां मन्वानोऽक्रूरः तवाङ्गभूता इति संक्षिप्योक्तं प्रमेयं किञ्चित्प्रपञ्चयति ॥ अग्निरिति । अग्निस्ते मुखं मुखाज्जातो मुखमित्युच्यते । मुखादिन्द्रश्चाग्निश्चेति श्रुतेः । अवनिः भूमिः तवाङ्घ्रिः अङ्घ्रिजातत्वादङ्घ्रिशब्दोक्ता । एवं सर्वत्र । ईक्षणं चक्षुः । नभोऽन्तरिक्षम् । दिशः दिगभिमानिनः । श्रुतिः श्रोत्रम् । द्यौः द्युलोकः । कं शिरः । कं शिरोऽम्बुनोरित्यमरः । सुरेन्द्राः लोकपालाः बाहवः । यद्वा सुरेन्द्राः वाय्वाद्याः क्षत्रजातीयाः बाहवः । बाहूराजन्यः कृत इति श्रुतेः । तासां दिशां वत्समिति च । अर्णवः समुद्रः । मरुत् तव वायुः । प्राणबलं प्राणसहितं बलं मुख्यप्राणात् श्वासात् बलाच्च जात इत्यर्थः । अग्न्यादिकं सर्वं तवाङ्गेभ्यो न स्वत एव जातम् । किन्तु ते त्वया प्रकल्पितं सृष्टमित्यन्वयः ॥ १४ ॥

रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ।
निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रं तु वृष्टिस्तव वीर्यमिष्यते ॥ १५ ॥

सत्यधर्मीया — वृक्षाश्चौषधयश्च रोमाणि श्मश्वादीनि, शिरोरुहाः केशा मेघास्ते परस्यास्थिनखान्यद्रयः । नखोऽस्त्री नखरोऽस्त्रियामित्यमरः । निमेषणं निमेषोन्मेषौ रात्र्यहनी । प्रजापतिर्दक्षो मेढ्रं शिश्नो वृष्टिस्तव वीर्यं रेत इष्यते प्रामाणिकैः सर्वत्रान्वेति ॥ १५ ॥

सुमनोरञ्जनी — वृक्षाः रसालादयः ओषधयः नीवारादयः तव रोमाणि । मेघाः तव शिरोरुहाः । शिरसि स्थितशिखापरपर्यायरोमभ्यो जाताः । अद्रयः परस्य ते अस्थिनखानि । निमेषणं निमेषोन्मेषौ रात्र्यहनी । निमेषः मुकुलीभावः रात्रिः । उन्मेषः विकसनं अहरिति विवेकः । प्रजापतिः दक्षः तव मेढ्रं, वृष्टिः तव वीर्यं रेतः । इष्यते प्रामाणिकैरिति शेषः ॥ १५ ॥

त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसङ्कुलाः ।
यथा जले सञ्जिहते जलौकसोऽप्युदुम्बरे वा मशका मनोमये ॥ १६ ॥

सत्यधर्मीया — हे अव्ययात्मन्! तस्मिन्पुरुषे त्वयि त्वया बहुजीवसङ्कुलाः सपाला लोकाः कल्पिता उत्पादिता अङ्गेभ्यः । तत्रैव तिष्ठन्ति चेत्यत्र निदर्शने आह ॥ यथा जल इति । जलौकसो मत्स्याद्यास्तत्र जले सञ्जिहते सञ्जायन्ते तदोकसश्च परस्परमज्ञातायां चोदुम्बरे मशकाः कृमिविशेषास्तत्रैवोत्पद्यन्ते । परस्परमज्ञाश्च । तथा मनोमये ज्ञानात्मकेऽहं प्रकल्पितं पश्यामीत्यन्वयः ॥ १६ ॥

सुमनोरञ्जनी — किं बहुना । बहुजीवसंकुलाः सपालाः लोकाः भूरादयः । हे अव्ययात्मन् ! त्वयैव प्रकल्पिताः सृष्टाः त्वय्येव स्थिताश्चेत्यर्थः । अत्र त्वय्येव प्रकल्पिताः आरोपिता इति भ्रमं

निवारयितुं प्रवृत्तं तात्पर्यं त्वयैव प्रकल्पिता इति । प्रकल्पिता इत्यस्य सृष्टा इत्यर्थः । ननु तर्हि सृष्टेः कर्तृसापेक्षत्वेन त्वयीत्यधिष्ठानोक्तिरसङ्गतेत्यत उक्तम् ।। त्वयेति । तथा च त्वयेत्यध्याहारो वा । ते इत्यस्यैव विपरिणामो वाऽङ्गीकार्यः आरोपिता इत्यर्थे वक्ष्यमाणदृष्टान्तानुपपत्तेः । न हि जले जलौकसो उदुम्बरे मशका वा आरोपिता इति भावः । तत्र दृष्टान्तमाह ।। यथेति । सञ्जिहन्ते उत्तिष्ठन्ते जायन्त इति यावत् । उदुम्बरे मशकाः सूक्ष्मा मक्षिकाः । मनोमये ज्ञानस्वरूपे ।। १६ ।।

यानियानीह रूपाणि क्रीडनार्थं विभर्षि हि ।
तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ।। १७ ।।

तात्पर्यम् – 'भृतामेव विभर्तीशो ह्यवतारतनुं सदा । विभर्तीत्युच्यतेऽथापि मोहाय व्यत्त्यपेक्षये'ति तत्त्वनिर्णये ।। १७ ।।

सत्यधर्मीया — यानि यानीहेति पद्येऽवताराणां कादाचित्कता प्रतीयते । सा च मय्यनन्त-गुणेऽनन्ते गुणतोऽनन्तविग्रह इत्यवतारसन्ततताप्रतिपादकागमबाधितेति प्रमाणेन व्याकरोति ।। भृतामिति । सदा भृतामेवावतारतनुमीशो बिभर्ति । तथाऽप्यसुराणां मोहाय व्यक्त्यपेक्षया बिभर्तीत्युच्यत इति लडुपपद्यत इत्यर्थः । ततश्चायं श्लोकार्थः ।। यानियानि पदमेकम् । क्रीडनार्थं बिभर्षि तैस्तैः । तैरिति द्वितीयस्य शेषः । विस्तृतं स्कन्धान्तरे ते ते पिबन्तु जिह्वयेत्येतद्भाष्य-टीकाद्युदाहृत्य ततोऽनुसन्धेयम् । आमृष्टा मार्जिताः शुचो येषां ते लोका मुदा ते यशो दिक्षु व्याप्तं कीर्तिविशेषं गायन्ति ।। १७ ।।

सुमनोरञ्जनी — एतावता विशिष्टत्वेन नम्यत्वमुक्त्वा इष्टत्वाच्च नम्य इति भावेनेष्टत्वमुपपादयति ।। यानि यानीति । इह लोके यानि यानि रूपाणि अवतारान् बिभर्षि धारयसि प्रकटीकरोषि तैस्तै-रवतारैः लोकाः सज्जनाः आमृष्टशुचः आमृष्टा परिमार्जिता परिहृतेति यावत् शुक् शोको येषां तादृशाः सन्तो मुदा ते यशो गायन्तीति योजना । अवतारग्रहणेन किं स्वप्रयोजनमित्यत उक्तम् ।। क्रीडनार्थमिति । लीलार्थमेव न स्वप्रयोजनापेक्षयेति भावः । अत्र बिभर्षीति वर्तमानव्यपदेशेन इतः पूर्वमवतारग्रहणं नास्तीति प्रतीयते । तां निवारयितुं प्रवृत्तं तात्पर्यम् ।

भृतामेव बिभर्तीशो ह्यवतारतनुं सदा ।
बिभर्तीत्युच्यतेऽथापि मोहाय व्यत्त्यपेक्षया ।।

इति तत्वनिर्णय इति । ईशो यद्यपि सदा भृतामेव अवतारतनुं बिभर्ति । अवतारस्य सदात्वे बिभर्तीति वर्तमानार्थकलकारप्रयोगः कुत इत्यत आह ।। अथापीति । व्यत्त्यपेक्षया व्यत्त्यभिप्रायेण यद्बिभर्तीत्युच्यते तदयोग्यजनानां मोहार्थम् । अन्यथाज्ञानजननार्थमेवेति योजना ।। १७ ।।

नमः कारणमत्स्याय प्रलयाब्धिचराय च ।
हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १८ ॥

सत्यधर्मीया — यानि यानीह रूपाणीति साम्मुग्ध्येनोक्तानीदानीमाविष्टानाविष्टरूपाणि किञ्चिच्चरितसहितानि सङ्गृह्य स्तौति ॥ नम इति । कारणमत्स्याय सत्यव्रतादिरक्षणं निमित्तीकृत्य मत्स्यरूपयुताय । प्रलयोऽवान्तरस्तत्कालिकोऽब्धिः समुद्रस्तत्र चरतीति स तथा तस्मै हयशीर्ष्णे तुभ्यं नमः । मधुकैटभावादिदैत्यौ तन्मृत्यवे । मत्स्यहयाननविशेषणं वा । स्वातन्त्र्येण केशवायेत्यध्याहृतविशेष्यपदेनान्वयो वा ॥ १८ ॥

सुमनोरञ्जनी — कानि तान्यवताररूपाणीत्यतो लेशेन दर्शयन्प्रणमति ॥ नम इति । कारणमत्स्याय । कारणेन मन्वादिरक्षणनिमित्तेन मत्स्यवेषधारिणे । प्रलयाब्धिचरायेत्यनेन तदानीं सत्यव्रतं प्रति कृतस्तत्वोपदेशो लक्ष्यते । हयशीर्ष्णे चेति चशब्दान्वयः । मधुकैटभमृत्यवे केशवायेति पदरत्नावल्याम् ॥ १८ ॥

अकूपाराय बृहते नमो मन्दरधारिणे ।
क्षित्युद्धारविहाराय नमः सूकरमूर्तये ॥ १९ ॥

सत्यधर्मीया — अकूपाराय कूर्मराजाय । अकूपारः समुद्रे च कूर्मराजेऽपि कीर्तित इति विश्वः । बृहते पूर्णाय मन्दरगिरेः धारिणे । सूकरस्य मूर्तिर्यस्य सः । क्षित्युद्धारविहारायेति कृत्योक्तिः । अवतारदशकमात्रवचननैर्भर्यं नेति द्योतयितुं समुद्रचरतास्मृतहयाननग्रहणमिति मन्तव्यम् ॥ १९ ॥

सुमनोरञ्जनी — अकूपाराय कूर्माय । कूर्मे चाब्धावकूपार इत्यमरः । मन्दरधारिणे इत्यनेन अमृतार्थं मथनसमये निमज्जन्मन्दरं वीक्ष्य खिन्नानां सुराणां शोकपरिहारः सूचितः । एवमुत्तरत्रापि । अनेनैव मन्दरमुपरि धृत्वा मथनं कुर्वदजितनामकं रूपमपि संगृहीतं बोध्यम् । बृहते नित्यपूर्णाय । क्षितेः भूमेः उद्धाररूपो विहारो यस्य तस्मै ॥ १९ ॥

नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ।
वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ॥ २० ॥

सत्यधर्मीया — अद्भुतत्वं च स्तम्भसम्भूतत्वेनेव द्वैरूप्येणापीति ज्ञेयम् । साधुलोकाः प्रल्हादाद्यास्तद्भयापह । साधुलोका बल्याद्या इति वामनविशेषणं वा । क्रान्तं त्रिभुवनं येन स तस्मै । न मस्तेऽद्भुतसिंहायेति छेदः । मस्तकावच्छेदेनाद्भुतसिंहाय न सूकरमूर्तय इव ॥ २० ॥

नमो भृगूणाम्पतये दृप्तक्षत्त्रवनच्छिदे ।
नमस्ते रघुवर्याय रावणान्तकराय च ॥ २१ ॥

सत्यधर्मीया — भृगूणां पतये षष्ठ्या अलुक् आक्रोशे, आक्रोशश्च निरवध्यधिकस्य भार्गवमात्रपतित्वविषय इति ज्ञेयम् । दृप्तक्षत्रवनच्छिद इत्यनेन कठोरकुठारायुधताऽपि ध्वन्यते । रावणान्तकराय रघुवर्याय ते नमः ॥ २१ ॥

सुमनोरञ्जनी — अद्भुतसिंहाय आश्चर्यसिंहाय । आकारद्वयोपेतत्वेन आश्चर्यता नरसिंहायेति यावत् । हे साधुलोकस्य प्रह्लादादेः भयापह भयपरिहारक! ते नम इत्यन्वयः । क्रान्तं पादत्रयेणाक्रान्तं त्रिभुवनं येन तस्मै त्रिविक्रमायेत्यर्थः । भृगूणां भृगुवंशजानाम् । परशुरामायेत्यर्थः । दृप्तं मत्तं क्षत्रवनं छेत्तीति तथाविधः तस्मै ॥ २१ ॥

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २२ ॥

तात्पर्यम् – 'प्रद्युम्ने चानिरुद्धे च बलदेवे च केशवः । सन्निधानं विशेषेण करोति जगतां पतिः । तत्र कृष्णः स्वयं विष्णुः परमानन्दलक्षणः । पाराशर्यश्च भगवान्स्वयमेव जनार्दन' इति च ॥ 'तत्तद्गतस्यैव हरेस्तत्तन्नामानि चाञ्जसा । औपचारिकनामानि तदन्येषामिति स्थितिरि'ति शब्दनिर्णये ॥ २२ ॥

सत्यधर्मीया — नमस्ते वासुदेवायेति श्लोके वासुदेवसहपाठात्सङ्कर्षणादयोऽपि साक्षाद्विष्णुरूपा इति भ्रान्तिर्भवति तां निरसितुं मानमुदाहरति ॥ प्रद्युम्ने चेति । नात्र तरतमभावक्रमविवक्षा । अनिरुद्धे तत्पुत्रे बलदेवे सङ्कर्षणे जगतां पतिः केशवो विशेषेण सन्निधानं करोति । तर्ह्येतत्सहोक्त्या वासुदेवोऽपि तथा किमित्यत आह ॥ तत्रेति । परमानन्द एव लक्षणं व्यावृत्तिकृल्लक्षणं यस्य सः । पाराशर्यश्च वेदव्यासश्च । तत्रैवं सहपाठे सत्यपि(?) तात्स्यात्ताच्छील्याल्लोकविलक्षणत्वाल्लोकवन्मुख्यता समायात इति तत्राह ॥ तत्तद्गतस्यैवेति । तदन्येषां प्रद्युम्नानि नामानि । इति स्थितिरिति शब्दनिर्णयवचनादयमेवार्थः । पाराशर्यग्रहणं प्रसङ्गादिति ज्ञेयम् । ननु सङ्कर्षणादीनामपि साक्षाद्रूपाणां सत्त्वात्तत्परतायां नानुपपत्तिरिति नाचार्यैः पराक्रमणीयमिति चेत् । सत्यम् । नमस्ते वासुदेवायेत्यादावुक्त्वाऽन्ते च सात्वतां पतय इति सम्पुटीकरणात्तद्व्यूहो यदि नम्यस्तर्हि पृथगेव वदेत् । न च तथोवाचेति सङ्कर्षणादिभ्रमः स्यादेवेति तं च्यावयितुमाचार्यैराचारविवरणमिति विद्धि । सात्वतां पतय इत्यव्यवधानेनाभिधानादुद्बुद्धस्य कृष्ण एवौचित्यात्सम्पुटता ॥ ततश्च मूलार्थः ॥ वासुदेवाय गतम् ।

सङ्कर्षणाय शेषान्तर्गताय । अस्य सङ्कर्षणमात्रोपासकत्वान्निरन्तरं तन्मात्रदृष्टेस्तस्य च साक्षादधोक्षजत्वमिति वक्तव्यमेवेति तत्सहपठितप्रद्युम्नाद्या अप्येत इति वक्तव्यत्वाद्वेति ज्ञेयम् । प्रद्युम्नाद्यन्तर्गताय सात्वतां यादवानां पत्ये नमः ॥ २२ ॥

सुमनोरञ्जनी — सङ्कर्षणायेति । बलदेवाय तत्र सन्निहिताय हरय इत्यर्थः । अत्र मत्स्यादीनामिव सङ्कर्षणादीनामपि साक्षाद्भगवदवतारत्वभ्रमं वारयितुं प्रवृत्तं तात्पर्यम् ।

प्रद्युम्ने चानिरुद्धे च बलदेवे च केशवः ।
सन्निधानं विशेषेण करोति जगतां पतिः ।
तत्र कृष्णः स्वयं विष्णुः परमानन्दलक्षणः ।
पाराशर्यश्च भगवान् स्वयमेव जनार्दन इति ।

पाराशर्यः पराशरात्मजो वेदव्यास इति तत्वनिर्णय इति पूर्वेण सम्बन्धः । ततश्च सङ्कर्षणादिषु भगवतो विशेषसन्निधानादेव अवतारेषु गणनं न साक्षाद्भगवतारत्वेनेति भावः । तर्हि सङ्कर्षणायेत्यस्य सङ्कर्षणस्थितायेत्यर्थः स्यात् तर्हि मञ्चाः क्रोशन्तीत्यादिवल्लाक्षणिकः प्रयोगो भवति । तथाविधशब्दप्रयोगे किं निमित्तमित्याशङ्कायामाह ॥ तत्तदिति ।

तत्तद्गतस्यैव हरेस्तत्तन्नामानि चांजसा ।
औपचारिकनामानि तदन्येषामिति स्थितिः ॥

इति शब्दनिर्णये । तत्तन्नामानि तत्तद्गतस्य हरेरेव । अंजसा मुख्यया वृत्या । प्रतिपादकानीति शेषः । कथमन्येषु व्यवहार इत्यत उक्तम् । औपचारिकेति । न चौपचारिकत्वं उपचाराख्यवृत्तिमत्वं किन्तु परममुख्यवृत्यतिरिक्तमुख्यवृत्या अर्थप्रतिपादकत्वं बोध्यम् । तथा च परममुख्यवृत्या भगवद्वाचकत्वात्सर्वनाम्नां न लाक्षणिकतापत्तिरित्याशयः ॥ २२ ॥

नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ।
म्लेञ्छप्रायक्षत्त्रहन्त्रे नमस्ते कल्किरूपिणे ॥ २३ ॥

सत्यधर्मीया — बुद्धाय दैत्यदानवमोहिने । अनेन प्रत्यवेयादिति न तत्तद्योग्यतानुसारेण बोधनान्न दोष इत्याह ॥ शुद्धायेति । म्लेञ्छप्रायाणि क्षत्राणि तद्धन्त्रे ॥ २३ ॥

सुमनोरञ्जनी — दैत्यदानवमोहिने । वेदाप्रामाण्यप्रतिपादनेनेति शेषः । तर्हि विप्रलंभकत्वेन सदोषः स्यादित्यत उक्तम् ॥ शुद्धाय निर्दुष्टायेति । अयोग्यजनव्यामोहनं न दोष इति भावः । म्लेञ्छप्रायं म्लेञ्छसदृशम् । नमः कारणमत्स्यायेत्यारभ्यैतत्पर्यन्तेन बहिरुपासना सूचिता ज्ञेया ॥ २३ ॥

भगवन् जीवलोकोऽयं मोहितस्तव मायया ।
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २४ ॥

सत्यधर्मीया — कंसारे संसार एतन्मूल इत्याह ॥ भगवन्निति । जीवलोकोऽयं तव मायया मोहितः । असन्ग्राहोऽज्ञानं यस्य स कर्मवर्त्मसु तन्मार्गेषु भ्राम्यते तथैव ॥ २४ ॥

सुमनोरञ्जनी — अखिलहेतुभूतमित्यनेन सर्वजगत्स्रष्टृत्वेन तथा यानीत्यादिना स्वसृष्टलोकस्य तदा तदा प्राप्तभयपरिहारादिना पालकत्वेन च स्तुत्वा इदानीं बन्धमोक्षज्ञानादिप्रदत्वेन स्तुवन्प्रणमति ॥ भगवन्नित्यादिना । माययेत्यावर्तते । तव मायया इच्छया त्वदधीनया प्रकृत्या च विमोहितः सन् । कर्मवर्त्मसु स्वस्वात्मीयरक्षणोपयुक्तकर्माख्यमार्गेषु । कोऽयं मोह इत्यतस्तद्दर्शयन् जीवलोकं विशिनष्टि ॥ अहमिति । शरीरे अहमिति दारापत्यादिषु ममेति असन् ग्राहोऽभिमानो यस्य सः । देहादिषु अहंममेत्यभिमान एव मोह इति भावः ॥ २४ ॥

अहं चात्मात्मजागारदारार्थस्वजनादिषु ।
भ्रमामि स्वप्नकल्पेषु मूढः सुखधिया विभो ॥ २५ ॥

सत्यधर्मीया — ते भवन्तु भ्रान्ता न भवांस्तथेति न वद देवेति वदति ॥ अहं चेति । आत्मा देह आत्मजाः पुत्रा दारा भार्या अर्थो द्रव्यं स्वजना आदयो येषां विषयाणां तेषु स्वप्नकल्पेष्व-स्थिरतया तत्समेषु । अत्रैव सुखमिति धीस्तया भ्रमामि । एतद्दृढमूलतां श्लथयितुं तवैव सामर्थ्यमिति तथा सम्बोधयति विभविति ॥ २५ ॥

सुमनोरञ्जनी — न केवलं जीवलोकः किन्तु मूढो विचित्तोऽहं च स्वप्नकल्पेषु अनित्येषु । आत्मजादिषु आत्मा देहः आत्मजाः पुत्राः आगारं गृहम् । अर्थो धनम् । स्वजनो बन्धुजनादिः । एवमादिषु सुखासाधनेषु । सुखधिया सुखसाधनत्वबुध्या । भ्रमामीति सम्बन्धः ॥ २५ ॥

अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ।
द्वन्द्वारामस्तमोनिष्टो न जाने त्वां जगत्पते ॥ २६ ॥

सत्यधर्मीया — अनित्येषु नित्यताया अनात्मन्यात्मताया दुःखे सुखताया इति विपर्ययेण मतिर्यस्य स द्वन्द्वारामस्तमोनिष्ठोऽज्ञानवान् जगत्पते त्वां न जाने ॥ २६ ॥

सुमनोरञ्जनी — देहादिषु सुखसाधनत्वज्ञानं कथं भ्रम इत्यतस्तदुपपादयन्नाह ॥ अनित्येति । अनित्येषु नश्वरेषु । अनात्मसु जडेषु अस्वाभाविकेषु वा । दुःखेषु दुःखसाधनेषु । विपर्यया मतिः

स्थायित्वसुखसाधनत्वादिबुद्धिर्यस्य सः । द्वन्द्वेषु शीतोष्णादिरूपेषु विषयेषु रममाणः । तमोविष्टः तमसा ॥ २६ ॥

यथाऽबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ।
अभ्येति मृगतृष्णां वै हित्वाऽहं त्वा पराङ्मुखः ॥ २७ ॥

सत्यधर्मीया — यथाऽबुधोऽज्ञस्तदुद्भवैः शैवालादिभिश्छन्नं जलं नेति हित्वा मृगतृष्णामभ्येति तथा त्वां हित्वाऽहं पराङ्मुखः ॥ २७ ॥

सुमनोरञ्जनी — अज्ञानेन विष्टः आविष्टः सन् तत्रैव स्थितं त्वां न जाने तत्र दृष्टान्तमाह यथाऽबुधो मूर्खः तदुद्भवैः जलोद्भवैः शैवालादिभिः प्रतिच्छन्नं जलं हित्वा । मृगतृष्णां मरुमरीचिकाम् । अभ्येति तथा त्वा त्वां हित्वा । पराङ्मुखः बहिर्मुखः ॥ २७ ॥

नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ।
रोद्धुं प्रमाथिभिः स्वाक्षैर्ह्रियमाणमितस्ततः ॥ २८ ॥

सत्यधर्मीया — उपासनया तदसनं कुर्वक्रूरेत्यत आह ॥ नेति । कृपणधीरहं कामकर्महतं मनः प्रमाथिभिः प्रमथनशीलैः स्वाक्षैः स्वेन्द्रियैरितस्ततो ह्रियमाणं रोद्धुं नोत्सहे न शक्नुयाम् । मनो वृत्तिवैचित्र्ययुतमिति स्वाक्षैः ह्रियमाणमिति सम्भवति ॥ २८ ॥

सुमनोरञ्जनी — कामकर्महतं कामकर्मभ्यां हतं दुष्टम् । प्रमाथिभिः प्रमथनशीलैः स्वाक्षैः चक्षुरादिभिरिन्द्रियैर्द्वारभूतैः । इतस्ततो विषयेषु, ह्रीयमाणं आकृष्यमाणं मनः । रोद्धुं विषयपराङ्मुखं कर्तुम् । नोत्सहे न शक्तोऽस्मीति योजना ॥ २८ ॥

सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं यच्चाप्यहं भवदनुग्रहमीश मन्ये ।
पुंसो भवेद् यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनयाऽऽमतिः स्यात् ॥ २९ ॥

सत्यधर्मीया — प्रयत्नोऽपि न मद्यत्नसाध्यः सर्वोऽपि सर्वेश तवानुग्रहहेतुक इत्याह ॥ सोऽहमिति । योऽशक्तः सोऽहमसतां दुरापं तैर्दुष्प्राप्यं तवाङ्घ्री चरणावुपगतोऽङ्घ्री उपगतौ यमिति येनेति वाऽङ्घ्र्युपगतोऽस्मीति तदुपगमनं मयीश भवदनुग्रहं तद्धेतुकं मन्ये । हे अब्जनाभ यर्हि सदुपासनयाऽऽमतिः समीचीना बुद्धिः स्यात्तर्हि पुंसोऽधिकारिवर्गस्य संसरणादपवर्गो भवेत् । संसारनिवृत्तौ सन्निहितायां तत्साधनीभूतसदुपासनतः सद्बुद्धिरुदेतीति भावः ॥ २९ ॥

सुमनोरञ्जनी — यद्येवं त्वं पराङ्मुखस्तर्हि मद्दर्शनादिकं कथं तवेत्यत आह ॥ सोऽहमिति । चशब्दोऽवधारणे । अपिशब्दः सोऽपीति सम्बध्यते । अहं सोऽपि मनोनिरोधायाशक्तः सन् विषय-लोलुपोऽपि । यत् तवांघ्र्युपगतोऽस्मि तत् भगवतोऽनुग्रहमेव अनुग्रहनिमित्तमेवेति अहं मन्ये । नान्यत्साधनमस्तीति सम्बन्धः । नन्वस्त्वेवं भवद्विषये । त्वदन्यजीवलोकस्य संसारादपवर्गो दुर्घट एवेत्यतस्तत्साधनं वदन् भगवतो मोक्षप्रदत्वं तत्साधनज्ञानप्रदत्वं च सूचयन्नाह ॥ पुंस इति । एवंविधस्यापि पुंसः योग्यजनस्य । यर्हि यदा । अब्जनाभस्य या सती योग्या उपासना तया । मतिः अपरोक्षज्ञानं स्यात् तर्हि तदा संसरणात्संसारादपवर्गो मोक्षो भवेदिति योजना । ननु सत्यं स्वयोग्याब्जनाभोपासनाजन्यापरोक्षेण मोक्षो भवतीति । सैव कथं लभ्या भगवद्गुणज्ञानाभावात् इत्यस्येदमेवोत्तरम् ॥ सदुपासनयेति । हे अब्जनाभेति सम्बोधनम् । सतां महतां उपासनया शुश्रूषया । सद्गुरूपदेशेनेति यावत् । मतिः उपासनोपयुक्तं भगवद्गुणज्ञानं स्यादिति । ननु तर्हि सत्समागम एव कथं लभ्य इत्यस्यापीदमेवोत्तरम् ॥ पुंस इति । इतिशब्दोऽध्याहार्यः । पुंसोऽधिकारिणः संसरणाप-वर्गः स्यादिति यर्हि यदा पुंसः परमपुरुषस्य मतिरिच्छा स्यात्तदैवेति । एनं मोचयामीति यदा भगव-दिच्छा तदैवेति भावः । मतिबुद्धिपूजेति सूत्रे मतिशब्दस्य इच्छार्थत्वात् मतिरिच्छेति युक्तम् ॥ २९ ॥

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ॥ ३० ॥

सत्यधर्मीया — विज्ञातमात्राय विज्ञानात्मकाय । सर्वेषां प्रत्ययो ज्ञानं तस्य हेतवे । पुरुषो ब्रह्मा चेशश्च रुद्रश्च तयोः श्रेष्ठाय । ब्रह्मणेऽनन्तशक्तये सर्वसम्भावकमिदम् ॥ ३० ॥

सुमनोरञ्जनी — नम इति । विज्ञानमात्राय विज्ञानमेव विज्ञानमात्रम् । विज्ञानात्मकायेति यावत् । सर्वप्रत्ययानां हेतवे सर्वमनोवृत्तिप्रेरकायेत्यर्थः । पुरुषेशयोर्विरिञ्चिशङ्करयोः प्रधानाय उत्तमाय । अनन्ता अपरिच्छिन्ना शक्तिर्यस्य तस्मै ॥ ३० ॥

नमस्ते वासुदेवाय सर्वभूतक्षयाय च ।
हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥ ३१ ॥

इति श्रीमद्भागवते दशमस्कन्धे अष्टात्रिंशोऽध्यायः ॥

सत्यधर्मीया — सर्वभूतक्षयाय च प्रलयकाले वासुदेवाय ते नमः । हृषीकेश तुभ्यं नमः । किं

पुनः पुनर्नमसि मनःस्थितं वदेत्यत आह ॥ प्रपन्नं मां पाहीति । न तवान्ध्यमिदं कियदिति वक्ति ॥ प्रभविति ॥ ३१ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे अष्टात्रिंशोऽध्यायः: ॥ १०-३८ ॥

सुमनोरञ्जनी — वासुदेवायेत्यस्यैव विवरणं सर्वभूतक्षयाय सर्वभूतनिवासाय । क्षि निवास-गत्योरिति धातोः । हृषीकाणामिन्द्रियाणां ईश प्रेरक । प्रपन्नं शरणागतम् । प्रभो समर्थ ॥ ३१ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां अष्टात्रिंशोऽध्यायः ॥ १०-३८ ॥

॥ अथ एकोनचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः ।
भूयः समाहरत् कृष्णो नटो नाट्यमिवात्मनः ॥ १ ॥

सत्यधर्मीया — अक्रूरविलोकितं लोकेशरूपमवर्तत तथैव किं वा न्यवर्तताथ चाक्रूरकृष्णयोः कथा काऽभूदिति भूपतिशङ्कां शुकः परिहरतीतीरयति ॥ श्रीशुक इति । स्तुवतस्तस्याक्रूरस्य जले वपुर्दर्शयित्वा भूयः पुनः कृष्णः समाहरदुपसञ्जहार । तत्र निदर्शनमाह ॥ नट इति । नट आत्मनः स्वसम्बन्धि यन्नाट्यं वेषादिकं दर्शयित्वा तिरोधापयति तथेति ॥ १ ॥

सुमनोरञ्जनी — भगवान् भक्तानामेव प्रसीदति नान्येषामिति द्योतयितुं श्रीकृष्णमवजानतो रजकस्य निग्रहं, तमेव भक्त्या बहुमानयतोः कुब्जासुदाम्नोः अनुग्रहं च वक्तुमुत्तरकथामारभते ॥ स्तुवत इति । नाट्यं नटसम्बन्धिवेषम् ॥ १ ॥

सोऽपि चान्तर्हितं वीक्ष्य जलादुन्मज्य सत्वरः ।
कृत्वा चावश्यकं सर्वं विस्मितो रथमाविशत् ॥ २ ॥

सत्यधर्मीया — सोऽप्यक्रूरोऽप्यन्तर्हितं भगवन्तमीक्ष्य । जलादुन्मज्जनमत्र बहिर्निःसरणम् । सत्वरः, आवश्यकं नियमतः करणीयं कर्म कृत्वा विस्मितो दृष्टाकारस्मरणेन रथमाविशत् ॥ २ ॥

सुमनोरञ्जनी — सोऽपि अक्रूरोऽपि । उन्मज्य उत्थितः । आवश्यकं नित्यं मध्याह्ने कर्तव्यं कर्म । विस्मितः सञ्जाताश्चर्यः ॥ २ ॥

तमपृच्छद् हृषीकेशः किं ते दृष्टमिहाद्भुतम् ।
भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥

सत्यधर्मीया — अये दानपते सकलनिदानपते कां वा चर्यां दृष्टवानिव भासि त्वमिति सर्वविदपि लोकमनुकुर्वन्दयया तं पृच्छतीति वदति ॥ तमिति । हृषीकेश इति सर्ववेदितृत्वहेतुः । ते त्वया किमद्भुतं दृष्टमिति सामान्यत उक्तं विशिनष्टि ॥ भूमाविति । लोकरीत्या विकल्पितपक्षद्वये रुचिस्तृतीयं कल्पं पृच्छति ॥ तोये वेति । तथाऽद्भुतावलोकक लोकद्वयं त्वां लक्षयामहे तर्कयामः ॥ ३ ॥

सुमनोरञ्जनी — श्रीकृष्णो ज्ञातवृत्तान्त इव अक्रूरमपृच्छदित्याह ॥ तमिति । ते त्वया । इहास्मिन्देशे, भूमौ, वियति आकाशे तोये वा । किमद्भुतं दृष्टम् । कुतः । त्वाम् दृष्टाश्चर्यवत् । लक्षयामहे लक्षणैस्तर्कयामः ॥ ३ ॥

अक्रूर उवाच—

अद्भुतानीह यावन्ति भूमौ वियति वा जले ।
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥

सत्यधर्मीया — भूमौ वियति जले वा यावन्त्यद्भुतान्याश्चर्याणि सन्ति तानि विश्वात्मके जगद्वितते इह त्वय्येव सन्तीति त्वां विपश्यतोऽवलोकयितुर्मम किमदृष्टं सर्वं दृष्टमेवेत्यर्थः ॥ ४ ॥

सुमनोरञ्जनी — अक्रूरो गूढाभिसन्ध्या उत्तरमाह ॥ अद्भुतानीति । भूम्यादौ यावन्ति अद्भुतानि सन्ति तानि विश्वात्मके विश्वान्तर्यामिणि इह अस्मिन् त्वयीति सामानाधिकरण्यम् । विपश्यतो मे किमदृष्टं भवेत् । सर्वमप्यद्भुतं दृष्टमेवेति । यद्वा इह लोके यान्यद्भुतानि तानि त्वयि विपश्यतो मे भूम्यादौ किं दृष्टं स्यात् । न किमपि भूम्यादावद्भुतं दृष्टम् । किं तु त्वय्येव दृष्टमिति भावः ॥ ४ ॥

यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ।
तं त्वाऽनुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतम् ॥ ५ ॥

सत्यधर्मीया — ननु मदुपास्तेः प्रागेव प्रसन्नाननोऽसि तदधुना किं प्रयुक्तमुक्त्या प्रकटयेत्यतो वदति ॥ यत्रेति । भूमौ वियति जले वा यान्यद्भुतानि सर्वाणि च यत्र तं त्वां दूरतोऽनुपश्यतो मम किमद्भुतं न दृष्टम् । ब्रह्मन् ब्रह्मेति पाठौ युक्तौ । यत्र सर्वाण्यद्भुतानि तं त्वामनुपश्यतो मम भूमौ वियति जल इतीह किमद्भुतं दृष्टं स्यात् । आश्चर्याश्चर्यरूपे त्वयि दृष्टे कृष्ण न काप्यन्यदाश्चर्यं भवेत् । ब्रह्मत्वस्य मुख्यपूर्णत्वस्याश्चर्यताप्रयोजकस्यान्यत्राभावान्नेतरदाश्चर्यकरमिति भावः ॥ ५ ॥

सुमनोरञ्जनी — मय्यपि किमाश्चर्यं दृष्टमित्यतोऽभिसन्धिमुद्घाटयन्नाह ॥ यत्रेति । जल इत्यावर्तते। हे ब्रह्मन् ! भूम्यादौ यान्यद्भुतानि तानि सर्वाणि यत्र यस्मिंस्त्वयि सन्ति तं तादृशं सर्वाश्चर्यमयं त्वाम् । जले अनु पश्चात् । इह रथे पुनर्जले अनुपश्यतो मे अद्भुतं किमदृष्टं भवेत् । किं तु दृष्टमेवेति भावः । रथे स्थितस्यैव तदानीमेव जले दर्शनं पुनः रथे पुनर्जले तद्दर्शनम् । तदेवाद्भुतं दृष्टमिति भावः ॥ ५ ॥

श्रीशुक उवाच—

इत्युक्त्वा चोदयामास स्यन्दनं गान्दिनीसुतः ।
मधुरामनयद् रामं कृष्णं चैव दिनात्यये ॥ ६ ॥

सत्यधर्मीया — इत्युक्त्वा कृष्णं प्रति गान्दिनीसुतः स्यन्दनं चोदयामास । दिनात्ययेऽपराह्णे मधुरां रामं कृष्णं चानयत् ॥ ६ ॥

सुमनोरञ्जनी — गान्दिनीसुतः अक्रूरः । दिनात्यये अपराह्णे । ततोऽपराह्णे इत्युत्तरवाक्यात् ॥ ६ ॥

मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः ।
वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ॥ ७ ॥

सत्यधर्मीया — मार्गे ग्रामजनास्तत्र तत्रोपसङ्गता वसुदेवसुतौ वीक्ष्य प्रीताः सन्तो दृष्टिं कृष्णार्पितां न चाददुर्न प्रत्यावर्तयन् ॥ ७ ॥

सुमनोरञ्जनी — उपसंगताः मिलिताः । वसुदेवसुतौ रामकृष्णौ । दृष्टिं तयोः लग्नां दृष्टिं नाददुः नु प्रत्याजह्रुः । तावेव पश्यन्तोऽवतस्थिर इति भावः ॥ ७ ॥

तावद् व्रजौकसस्तात नन्दगोपादयोऽग्रतः ।
पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥ ८ ॥

सत्यधर्मीया — हे तात प्रकृतकृष्ण! तातश्चासौ नन्दगोपश्च स आदिर्येषां ते तथेति वा । पुरोपवनमासाद्य प्रतीक्षन्तः प्रतीक्षमाणा एतदागमनमवतस्थिरेऽतिष्ठन् गतम् ॥ ८ ॥

सुमनोरञ्जनी — नन्दगोपादयो व्रजौकसो गोपाः अग्रतो गताः । पुरस्य उपवनम् आसाद्य लब्ध्वा । प्रतीक्षन्तः श्रीकृष्णागमनमाकाङ्क्षमाणाः तावत्पर्यन्तम् । अवतस्थिरे ॥ ८ ॥

तान् समेत्याह भगवानक्रूरं जगदीश्वरः ।
गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥

सत्यधर्मीया — तान्नन्दादीन्समेत्य भगवाञ्जगदीश्वरः पाणिना पाणिं गृहीत्वा प्रश्रितमक्रूरं प्रति प्रहसन्निवाह ॥ ९ ॥

सुमनोरञ्जनी — तान् नन्दादीन् प्रति । समेत्य आगत्य ॥ ९ ॥

भवान् प्रविशतामग्रे सहयानः पुरीं गृहम् ।
वयं त्विहावमुच्याथ तावद् द्रक्ष्यामहे पुरीम् ॥ १० ॥

सत्यधर्मीया — भवानग्रे पुरीं प्रविशताम् । यानं स्थापयित्वा किमित्यत आह ॥ सहयानो व्रज गच्छेति । पुरीं प्रविशतामस्मदादीनामग्र इति वा वयं हि त्ववमुच्य शकटतो वृषभान्विमोच्य तावदस्तमयपर्यन्तं पुरीं द्रक्ष्यामहे ॥ १० ॥

अक्रूर उवाच—

नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मधुरां प्रभो ।
त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥ ११ ॥

सत्यधर्मीया — पुरीं पुरा विशेतीशेनोक्तोऽक्रूरः प्रतिवक्ति ॥ नेति । भवद्भ्यां रहितो वर्जितो मधुरां न प्रवेक्ष्ये । हे भक्तवत्सल नाथ ते भक्तं मां त्यक्तुं नार्हसि ॥ ११ ॥

सुमनोरञ्जनी — भवानग्रे पुरीं प्रविशताम् । अतो व्रज । वयं तु अवमुच्य विश्राम्य ॥ १०,११ ॥

आगच्छ याम गेहान्नः सनाथान् कुर्वधोक्षज ।
साग्रजः सह गोपालैः सुहृद्भिश्च सुहृत्तमः ॥ १२ ॥

सत्यधर्मीया — हे अधोक्षज! नो गेहानवान्तरागाराणि येषां सन्ति ते गेहा निलयास्तान्याम आगच्छ । अस्मान्वा गेहानेव वा सनाथान्नाथोपेतान्कुरु । गेहेऽन्नं रात्रिभोक्तव्यमन्नं यस्य सः सन्सनाथानस्मान्कुर्विति वा । न केवलमेकल एवेति वदति । गोपालैः सह साग्रज इतरैः सुहृद्भिश्च सहेति ॥ १२ ॥

सुमनोरञ्जनी — नो गेहान् प्रत्यागच्छ । नः अस्मान् । सुहृद्भिः गोपालैः नन्दाद्यैः ॥ १२ ॥

पुनीहि पादरजसा गृहान् नो गृहमेधिनाम् ।
यच्छौचेनातितृप्यन्ति पितरः साग्नयः सुराः ॥ १३ ॥

सत्यधर्मीया — गृहमेधिनां गृहस्थानां नोऽस्माकं तत्पादरजसा गृहान् । गृहाः पुंसि च भूम्न्येवेत्यमरः । पुनीहि पवित्रय । यच्छौचेन यदवनेजनेन पितरः साग्नयः सुराश्च तृप्यन्ति ॥ १३ ॥

सुमनोरञ्जनी — गृहमेधिनां गृहेषु क्रियमाणाः मेधाः यज्ञाः पञ्चमहायज्ञाः येषां गृहाश्रमिणां नो गृहान् । पादरजसा पुनीहि पवित्रीकुरु । यस्य त्वत्पादस्य शौचेन प्रक्षालनोदकेन ॥ १३ ॥

अवनिज्याङ्घ्रियुगलमासीच्छ्लाघ्यो बलिर्मखे ।
ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या ॥ १४ ॥

सत्यधर्मीया — न केऽपि तद्भूतवन्तः किं त्वं काङ्क्षसीत्यत आह ॥ अवनिज्येति । बलिर्मखेऽङ्घ्रियुगलमवनिज्य प्रक्षाल्य श्लाघ्य इह स्तुत्य आसीत् । अतुलं सुतले मन्वन्तरान्तस्वैश्वर्यं लेभे । एकान्तिनामेकान्तभक्तानां या क्लृप्ता गतिस्तामपि लेभ इत्यन्वयः ॥ १४ ॥

सुमनोरञ्जनी — अवनिज्य प्रक्षाल्य । अतुलं ऐश्वर्यम् ऐन्द्रपदम् । एकान्तिनां या गतिः क्लृप्ता तां गतिं च लेभे ॥ १४ ॥

आपस्तेऽङ्घ्र्यवनेजन्यस्त्रींल्लोकान् शुचयोऽपुनन् ।
शिरसाऽधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥ १५ ॥

सत्यधर्मीया — तवावनेजन्यो अवनेजनिसम्बन्धिन्य आपो ब्रह्मकमण्डलुगताः शुचयः साङ्घ्रिस्पर्शा इति शुद्धास्त्रिलोकान् । विशेषणसमासः । अपुनन्नशोधयन् । याः शर्वः शिरसाऽधत्त । सगरात्मजा भस्मीभूताः स्वः स्वर्गं क्रमान्मुक्तिं च याताः । स्वर्गसुषुप्तेरित्यस्य मुक्तेरपि समायात इति छान्दोग्यभाष्योक्तेः ॥ १५ ॥

सुमनोरञ्जनी — ते अङ्घ्र्यवनेजन्यः पादप्रक्षालनसाधनीभूताः आपः भागीरथीरूपाः त्रीन् लोकान् स्वर्गभूपातालाख्यान् । अपुनन् पवित्रयांचक्रुः । या अपः शर्वः महादेवः शिरसा अधत्त धारयामास । याभिः सगरात्मजाः स्वः स्वर्गं याताः प्राप्ताः ॥ १५ ॥

देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ।
यदूत्तमोत्तमश्लोक नारायण नमोऽस्तु ते ॥ १६ ॥

सत्यधर्मीया — इयन्महीयस्त्वं तव साक्षान्नारायणत्वादेवेति परवान्वदति ॥ देवदेवेत्यादिना ॥१६॥

सुमनोरञ्जनी — पुण्यकरं श्रवणं कीर्तनं च यस्य सः । उत्तमश्लोक उत्तमकीर्ते ॥ १६ ॥

श्रीभगवानुवाच—

आयास्ये भवतो गेहमहमार्यसमन्वितः ।
यदुवर्गद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥ १७ ॥

सत्यधर्मीया — एवमुक्तः किमुक्तवान्देव इत्यतो भगवान्वक्तीति वक्ति ॥ श्रीभगवानिति । अहमार्यसमन्वितः सबलो यदुवर्गद्रुहं यदुवर्गाय द्रुह्यतीति स तथा तं हत्वा भवतो गेहमायास्ये सुहृत्प्रियं च वितरिष्ये दास्ये ॥ १७ ॥

सुमनोरञ्जनी — आर्येण रामेण । यदुवर्गद्रुहं यदुवर्गद्रोहं कुर्वन्तं कंसम् । सुहृदां वसुदेवादीनां प्रियं सन्तोषं वितरिष्ये दास्ये ॥ १७ ॥

श्रीशुक उवाच—

एवमुक्तो भगवता सोऽक्रूरो विमना इव ।
पुरीं प्रविश्य कंसाय कर्मावेद्य गृहं ययौ ॥ १८ ॥

सत्यधर्मीया — भगवतेत्याज्ञानवज्ञाने हेतूक्तिः । कर्म कृष्णागमनादिकमावेद्य निवेद्य गृहं स्वम् ॥ १८ ॥

सुमनोरञ्जनी — कर्म कृष्णानयनलक्षणं कर्म । कंसाय । आवेद्य निवेदयित्वा ॥ १८ ॥

ततोऽपराह्णे भगवान् कृष्णः सङ्कर्षणान्वितः ।
मधुरां प्राविशद् गोपैर्दिदृक्षुः परिवारितः ॥ १९ ॥

सत्यधर्मीया — गोपैः परिवारितो मधुरां दिदृक्षुर्मधुरां प्राविशत् ॥ १९ ॥

सुमनोरञ्जनी — मधुरां दिदृक्षुः ॥ १९ ॥

ददर्श तां स्फाटिकतुङ्गगोपुरं बृहत्स्फुरद्धेमकपाटतोरणाम् ।
ताम्रारकोष्ठपरिखां दुरासदामुद्यानरम्योपवनालिशोभिताम् ॥ २० ॥

सत्यधर्मीया — कृष्णः स्फाटिकतुङ्गगोपुरां स्फटिकात्मोच्चपुरद्वारयुक्ताम् । बृहन्ति महान्ति स्फुरन्ति प्रकाशमानानि हेम्ना कृतानि कपाटानि यस्मिंस्तत्तोरणम् । तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरमित्यमराद्बहिर्द्वारं यस्याः सा ताम् । बृहत्स्फुरद्धेमकपाटतस्तेभ्यो निमित्तेभ्योऽरणां वैरि-विरचितरणानर्हामिति वा । ताम्रैरारैर्लोहविशेषैर्निर्मिताः कोष्ठा धान्यादिधामानि । पुंसि कोष्ठोऽन्तर्जठरं

कुसूलोऽन्तर्गृहं तथेत्यमरः । तथा परिखास्तदात्मका यस्यां सा दुरासदां दुष्प्रवेशाम् । उद्यानानि दूरस्थवनानि रम्याणि रमणीयान्युपवनानि समीपवर्तिवनानि तेषामालयः पङ्क्तयस्ताभिः शोभिताम् । उद्याना ऊर्ध्वं यानं येषां ते रम्योपवनेष्वलयो भ्रमराश्च तैः शोभितामिति वा । दुरासदा च साऽऽमुदा यानं येषां तेऽलिनस्तैः शोभिता च तामिति पदमेकं वा । पुरीं ददर्शेत्यन्वयः ॥ २० ॥

सुमनोरञ्जनी — श्री कृष्णदृष्टां मधुरां पुरीं वर्णयति ॥ ददर्शेति । स्फाटिकानि स्फटिकनिर्मितानि तुंगानि उन्नतानि गोपुराणि पुरबहिर्द्वाराणि यस्यास्ताम् । स्फुरद्धेममयानि कपाटानि तोरणानि द्वारबहिःप्रदेशाः यस्यां ताम् । ताम्रैः आरैः आरकूटैः पित्तलापरपर्यायैः निर्मितानि कोष्टानि प्राकाररक्षणाय यन्त्रस्थापनार्थं निर्मितानि कुट्टिमानि तैः । ताम्रमयाः अराः तादृशकुट्टिमोपरि रचितानि दलानि तैरिति वा । आसमन्ताद्विद्यमाना परिखा । तया च दुरासदां शत्रुभिः प्राप्तुमशक्याम् । उद्यानानां वनानां रम्याणामुपवनानां च आलिभिः पङ्क्तिभिः शोभिताम् ॥ २० ॥

सौवर्णशृङ्गाटकहर्म्यनिष्कुटश्रेणीसभाभिर्भवनैरुपस्कृताम् ।
वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥ २१ ॥

सत्यधर्मीया — सौवर्णानि सुवर्णविकृतानि शृङ्गाटकानि चतुष्पथानि हर्म्याणि धनिकगृहाणि निष्कुटा गृहारामास्तेषां श्रेणयः पङ्क्तयः सभाश्च ताभिः । शृङ्गाटकचतुष्पथे, हर्म्यादिर्धनिनां वासो, गृहारामस्तु निष्कुटः, श्रेणी रेखास्तु राजय इति सर्वतश्चामरः । भवनैरुपसंस्कृतामलङ्कृतां गतम् । वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिन्मणिभिरुपस्कृतामित्यन्वयः । जुष्टा जुष्टाश्च जुष्टाः पुमांस्त्रियेत्येक-शेषेण जुष्टेष्वित्यन्वयो वा । वलभीष्वाच्छादकवक्रदारुषु वेदिषु वेदिकासु ॥ २१ ॥

सुमनोरञ्जनी — सौवर्णे सुवर्णबद्धे शृङ्गाटके चतुष्पथे विद्यमानानि हर्म्याणि धनिनां गृहाणि । निष्कुटाः गृहारामाश्च तेषां श्रेणीभिः पङ्क्तिभिः । तत्र तत्रोपवेशनार्थं कृताभिः सभाभिः श्रेणीभिः समानाभिः सभाभिरिति वा । श्रेणीनां शिल्पोपजीविनां सभाभिरिति वा । श्रेणिः समाने शिल्पानां संहतिः श्रेणिरावलिरिति शाश्वतः । भवनैश्चोपस्कृतामलङ्कृतां शृङ्गाटकचतुष्पथे इत्यमरः । हर्म्यादि धनिनां वास इति च । गृहारामस्तु निष्कुटा इत्यपि । अमलाः शाणोल्लीढाः । विद्रुमाः प्रवालाः । हरितो मरकताः । वैडूर्यादिरत्नैर्जुष्टेषु खचितेषु वलभीषु पुरोभागे वक्रदार्वाच्छादनेषु । वेदिषु गृहबहिः पार्श्वयोः रचितवेदिकासु ॥ २१ ॥

जुष्टेषु जालामुखरन्ध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ।
संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलाम् ॥ २२ ॥

सत्यधर्मीया — जुष्टेषु व्युप्तेषु जालानां गवाक्षाणामामुखरन्ध्रं तन्मुखछिद्रमभिव्याप्य विद्यमानाः कुट्टिमा निबद्धभूमयस्तेष्वाविष्टाः पारावता बर्हिणश्च तैर्नादिताम् । संसिक्ताश्चन्दननीरादिभी रथ्या रथमार्गा आपणमार्गः पण्यवीथिकामार्गश्चत्वराणि चतुष्पथा यस्यां सा ताम् । चत्वरं च पथाश्लेषे स्थण्डिलाजिरयोरपीति हैमः । चत्वरं चाङ्गणेऽजिर इत्यमरादङ्गणानीति वा । प्रकीर्णाः, माल्यानि पुष्पाण्यङ्कुरा लाजा भ्रष्टव्रीहयस्तण्डुलाश्च यस्यां सा ताम् ॥ २२ ॥

सुमनोरञ्जनी — तथा जालामुखरन्ध्रेषु गवाक्षच्छिद्रेषु । कुट्टिमेषु बद्धभूमिषु । आविष्टैरुपविष्टैः पारावतैः, बर्हिभिर्मयूरैः नादितां शब्दिताम् । सुगन्धोदकैः आसिक्ताः संसेचिताः रथ्याः राजमार्गाः आपणाः पण्यवीथयः मार्गाः तदन्यमार्गाः चत्वराः अङ्गणानि च यस्याम् । प्रकीर्णानि माल्यानि यस्यां ताम् ॥ २२ ॥

आपूर्णकुम्भैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ।
सवृन्तरम्भाक्रमुकैः सकेतुभिः स्वलङ्कृतद्वारगृहां सपट्टिकैः ॥ २३ ॥

सत्यधर्मीया — दधिचन्दनोक्षितैरापूर्णकुम्भैः प्रसूनदीपावलिभिः, सपल्लवैः सकिसलयैर्वृन्तैः प्रसवबन्धनैः सहिता रम्भाः, क्रमुकास्तैः सकेतुभिर्ध्वजसहितैः स्वलङ्कृतद्वाराणि गृहाणि यस्यां सा तां पट्टिकाभिरुल्लोचैः सहिता ताम् ॥ २३ ॥

सुमनोरञ्जनी — दधिचन्दनाभ्याम् उक्षितैः सिक्तैः । आपूर्णकुंभैः द्वारेषु उभयपार्श्वस्थापित-पूर्णकुम्भैः प्रसूनैः पुष्पैः दीपावलिभिश्च । सपल्लवैः किसलयसहितैः । सवृन्तरंभाक्रमुकैः, वृन्तैः फलप्रसूनबन्धैः सहिताः रम्भाः कदलीवृक्षाः क्रमुकाः पूगाश्च तैः । कीदृशैः सकेतुभिः ध्वजसहितैः । एतैः सुष्ठु अलङ्कृतानि द्वाराणि येषां तानि तथा । स्वलङ्कृतद्वाराणि गृहाणि यस्यां सा । पट्टिकया उपर्याततवितानवस्त्रेण सहिताम् । एतादृशीं पुरीं ददर्शेति पूर्वेणान्वयः ॥ २३ ॥

तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ।
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥

सत्यधर्मीया — तां मधुरां वसुदेवनन्दनौ वयस्यैर्वृतौ नरदेववर्त्मनैव प्रविष्टौ द्रष्टुं त्वरिताः पुरस्त्रियो हर्म्याण्युत्सुका आरुरुहुः ॥ २४ ॥

सुमनोरञ्जनी — तामेतां पुरीं नरदेववर्त्मना राजमार्गेण संप्रविष्टौ । वयस्यैः सवयस्कैः गोपैर्वृतौ वसुदेवनन्दनौ द्रष्टुमुत्सुकाः पुरस्त्रियः समीयुः मिलिताः । हर्म्याणि उपरितनगृहाणि च । आरुरुहुः । नृपेति परीक्षित्सम्बोधनम् ॥ २४ ॥

काश्चिद् विपर्यक्कृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ।
कृतैकवस्त्रश्रवणैकनूपुरा नाङ्क्त्वा द्वितीयं त्वपराश्च लोचनम् ॥ २५ ॥

सत्यधर्मीया — काश्चिद्योषितो विपर्यग्धृतवस्त्रभूषणा विपर्यग्विपरीतं धृतानि वस्त्राणि भूषणानि याभिस्ताः । युगलेषु प्रावरणौत्तरीयकर्णाभरणवलयकङ्कणमञ्जिरादियुग्मेषु । एकं विस्मृत्य । कृतैक-वस्त्रश्रवणैकनूपुरा एकं वस्त्रमेकं कर्णाभरणमेकं नूपुरं च यासां ताः । द्वितीयं स्वलोचनं नाङ्क्त्वाऽ-संसज्जितकज्जलं कृत्वा ॥ २५ ॥

सुमनोरञ्जनी — तासामौत्सुक्यत्वराभ्यामापन्नां दशां वर्णयति द्वाभ्याम् ॥ काश्चिदिति । विपर्ययेण व्यत्यासेन कृतानि वस्त्राणि भूषणानि च याभिस्ताः । परिधानीयमुत्तरीस्थाने । उत्तरीयं परिधानीयस्थाने । एवं करभूषणानि पादयोः पादभूषणानि करयोः कृत्वेति यावत् । अपराः काश्चित् युगलेषु वस्त्राभरणादिषु एकं विस्मृत्य । आगता इति सम्बन्धः । तदेव विशदयति ॥ कृतैकेति । कृतमेकमेव वस्त्रं श्रवणं कर्णभूषणं नूपुरं चरणाभरणं च याभिस्ताः । कृतैकपत्रेत्यपि पठन्ति । तत्पक्षे कृतमेकमेव पत्रं ताटङ्कं श्रवणे याभिस्ताश्च ता एकनूपूराश्चेत्यर्थः । अपराश्च स्वलोचनं द्वितीयं नाङ्क्त्वा अनंत्का एकमेव लोचनमञ्जयित्वेति यावत् ॥ २५ ॥

अश्नन्त्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ।
स्वपन्त्य उत्थाय निशम्य निःस्वनं निपाययन्त्योऽर्भमपोह्य मातरः ॥ २६ ॥

सत्यधर्मीया — अश्नन्त्यः काश्चिद्भोजनमपास्य निरस्य सोत्सवा उत्सवसहिता अभ्यज्यमाना-स्तैललेपनं कुर्वन्त्योऽकृतोपमज्जना अकृतनीरस्नानाः । बहुचिरन्तनकोशेऽकृतापमज्जना इति पाठो दृश्यते सोऽपि दृश्यः । अपां समूहो ह्यापं तेन मज्जनमापमज्जनमकृतमापमज्जनं याभिस्ता अकृताप-मज्जना इति तत्रार्थः । काश्चित्स्वपन्त्यो निःस्वनं निशम्योत्थायाययुः । काश्चिन्मातरोऽर्भं बालं निपाययन्त्यः स्तनक्षीरमपोह्य तिरस्कृत्याययुः । यमुनायाः पारे पुर्याः सत्त्वात्सत्वाच्च कृष्णस्यान्त-र्मातरस्तरपण्यं मा मास्त्वित्यायाता इति वा ॥ २६ ॥

सुमनोरञ्जनी — एकाः स्त्रियः अश्नन्त्यः भुंजन्त्यः तद्भोजनम् अपास्य त्यक्त्वा अभ्यज्यमानाः सखीहस्तेन क्रियमाणतैलाभ्यङ्गाः । अकृतोपमज्जनाः अकृतस्नानाः । मातरः स्तन्यं निपाययन्त्यः । अर्भं अर्भकम् । अपोह्य निरस्य ॥ २६ ॥

मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ।
जहार मत्तद्विरदेन्द्रविक्रमो दृशां दधच्छ्रीरमणो महोत्सवम् ॥ २७ ॥

सत्यधर्मीया — अरविन्दलोचनः कृष्णः । प्रागल्भ्येन धार्ष्ट्येन लीलाहसितेन तदवलोकनेन चेत्येतैस्तासां मनांसि जहार स्वाविषयाणि चकार । श्रीरमणो मत्तद्विरदेन्द्रविक्रमो दृशां नेत्राणामुत्सवं दधत्सन् ॥ २७ ॥

सुमनोरञ्जनी — श्रीरमणः । प्रागल्भ्ययुक्ताः या लीलाः, हसितं स्मितं अवलोकनं अपाङ्ग-निरीक्षणं च तैः । तासामुत्सवं दधत् । मनांसि जहारेति सम्बन्धः । गजेन्द्रस्य विक्रम इव पादविन्यासो यस्य सः ॥ २७ ॥

दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षितोत्स्मितसुधोक्षणलब्धमानाः ।
आनन्दमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥ २८ ॥

सत्यधर्मीया — मुहुः श्रुतं तमनुद्रुतचेतसस्तं दृष्ट्वा । तस्य प्रेक्षितं प्रेक्षणमुत्स्मितं मन्दहासस्स एव सुधाऽमृतं तया यदुक्षणं सेचनं तेन प्रतिलब्धो मानो याभिस्ताः । दृशा दृष्ट्याऽऽत्मलब्धमात्मनि मनसि लब्धं ध्यानाङ्कुरितमानन्दमूर्तिमुपगुह्यालिङ्ग्य हृष्यत्त्वचो रोमाञ्चनाञ्चिताः । हे अरिन्दम राजन् अनन्तमेतदितरापारमाधिं तद्दर्शनाभावजनितव्यथां जहुस्तत्यजुः । दमाधिं दमेनेन्द्रियनिग्रहेणाधि-र्दमाधिस्तत्प्रयोजको य आधिर्मनोव्यथा तमरिं तद्रूपारिं प्रकृतकार्यप्रतिबन्धकत्वात् । तं जहुः । यथेच्छं विहृतवत्य इत्यर्थः ॥ २८ ॥

सुमनोरञ्जनी — मुहुः वारं वारं श्रुतम् आकर्णितम् । कृष्णं दृष्ट्वा । अनुद्रुतचेतसः द्रवच्चित्ताः । तस्य कृष्णस्य प्रेक्षितं उत्कृष्टं स्मितं च तल्लक्षणसुधया उक्षणेन सेचनेन लब्धो मानो याभिस्ताः स्त्रियः । दृशा नेत्रद्वारा । आत्मनि मनसि लब्धम् । आनन्दमूर्तिं उपगुह्य आलिङ्ग्य । हृष्यत्वचः रोमाञ्चिताः अनन्तमपारम् । आधिं तदप्राप्तिनिमित्तां मानसीं व्यथाम् । जहुः तत्यजुः । अरिन्दमेति परीक्षित्सम्बोधनम् ॥ २८ ॥

प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखाम्बुजाः ।
अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥ २९ ॥

सत्यधर्मीया — सौमनस्यैः पुष्पराशिभिः सुमनसां भावा सौमनस्यानि तैश्च ॥ २९ ॥

सुमनोरञ्जनी — प्रीत्या उत्पुल्लानि विकसितानि मुखाम्बुजानि यासां ताः । सौमनस्यैः पुष्पसमूहैः । प्रमदाः अभ्यवर्षन् ॥ २९ ॥

दध्यक्षतैः सोदपात्रैः स्रग्गन्धैरभ्युपायनैः ।
तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥ ३० ॥

सत्यधर्मीया — दधिभिरक्षतैश्च, सोदपात्रैर्मध्य आचमनाद्यर्थं सजलैः पात्रैः । स्रजश्च गन्धाश्च तैरभ्युपायनैः सम्मुखाभिगमनैरितरैः पूजासाधनैर्वा तत्र तत्र द्विजातयो ब्राह्मणा आनर्चुरपूजयन् ।। ३० ।।

सुमनोरञ्जनी — तत्र द्विजातयो ब्राह्मणादयः । दध्यक्षतादिभिः तौ रामकृष्णौ । आनर्चुः पूजयामासुः ।। ३० ।।

रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः ।
दृष्ट्वाऽयाचत वासांसि धौतान्यत्युत्तमानि च ।। ३१ ।।

सत्यधर्मीया — गदाग्रजः कञ्चिद्रङ्गकारं रङ्गं वर्णं करोति स तथा तं रजकं चायान्तं दृष्ट्वा धौतान्यत्युत्तमानि वासांस्ययाचत ययाचे । चशब्दाद्यभावेऽपि रङ्गकारोऽयमन्य इति चशब्द-मध्याहृत्यान्वेतव्यम् । ततस्तु वापकः प्रीत इत्युत्तरग्रन्थानुकूल्यमन्यथा न स्यादिति ज्ञेयम् ।। ३१ ।।

सुमनोरञ्जनी — गदाग्रजः श्रीकृष्णः । रजकं वस्त्रनिर्णेजकम् । स एव, रङ्गं वस्त्राणां वर्णविशेषं करोतीति रङ्गकारः । तं दृष्ट्वा अयाचतेति सम्बन्धः ।। ३१ ।।

देह्यावयोः समुचितान्यङ्ग वासांसि चार्हतोः ।
भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ।। ३२ ।।

सत्यधर्मीया — अङ्ग रजक! आवयोः समुचितानि वासांसि देहि । दातुस्ते परं श्रेयो मङ्गलम् । न लाभो जीवनात्पर इत्युक्तेस्तल्लाभात्मकं श्रेय इति, भविष्यति । अत्र संशयो न नास्ति । राजार्हाणि वासांसि कथं देयानीति न वदेति वदति ।। अर्हतोरिति । मातुलस्यैतानीत्यर्हतोर्योग्ययो- स्तद्भागिनेय-योरित्यन्तर्बहिरङ्गतस्तु वासांसि धार्याणि केनचिदर्हतोरिति । तत्राप्येतन्मृतावर्हतोरिति चार्थो ज्ञेयः । अदातुस्तेनादाननिमित्तेन संशयः सम्यक् शयो हस्तो भविष्यति ताडयामीति यावत् ।। ३२ ।।

सुमनोरञ्जनी — याचनाप्रकारमाह ।। देहीति । हे अङ्ग । समुचितानि वासांसि । उत्तमवस्त्रधारणे अर्हतोः योग्ययोः आवयोः आवाभ्याम् । आवयोः समुचितानि योग्यानीति वा ।। ३२ ।।

स याचितो भगवता परिपूर्णेन सर्वतः ।
साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ।। ३३ ।।

सत्यधर्मीया — सर्वतः सर्वप्रकारेणापि परिपूर्णेन भगवता याचितः स साक्षेपं सतिरस्कारं रुषितो रुष्टो राज्ञो भृत्यः सुदुर्मदो राजा यथा तथा भृत्य इति प्राह ।। ३३ ।।

सुमनोरञ्जनी — सर्वतः सर्वसमृध्या परिपूर्णेन भगवता याचितः । सु अत्यन्तम् । दुर्मदः रुषितः कुपितः ॥ ३३ ॥

ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ।
परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥ ३४ ॥

सत्यधर्मीया — नित्यं गिरिवनेचरा यूयमीदृशान्येव वासांसि परिधत्त किमिति सम्भावनायां लोट् । उद्धृत्ता अतिक्रान्तमर्यादा राजद्रव्याण्यभीप्सथ प्रार्थयध्वे । गिरि वाच्युद्धृत्ता इदं प्रष्टव्यं न प्रष्टव्यमिदमिति विमर्यादा इति वा ॥ ३४ ॥

सुमनोरञ्जनी — आक्षेपवाक्यमाह ॥ ईदृशेति । हे उद्धृत्ताः ! यूयं नित्यं गिरौ वने चरन्तीति तथोक्ताः । ईदृशान्येव वासांसि परिधत्त किं परिधानीकुरुथ । येन यूयं राजद्रव्याणि राजयोग्य-वस्त्ररूपाणि । अभीप्सथ अपेक्षध्वम् ॥ ३४ ॥

याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ।
बध्नन्ति घ्नन्ति लुम्पन्ति दृप्तं राजकुलानि हि ॥ ३५ ॥

सत्यधर्मीया — यदि युष्माकं जिजीविषा जीवनेच्छा तर्हि हे बालिशा मूर्खा आशु यात । कुत इत्यत इत इत्याह । राजकुलानि राजसमूहा बध्नन्ति घ्नन्ति, ताडयन्ति, लुम्पन्ति लुठयन्ति । तत्र हेतुर्दृप्तमिति । यर्हि यतोऽत आशु यात । राजानश्च कुलानि तत्सजातीयाश्चेति वा । कुलं जनपदे गेहे सजातीयगणे गोत्र इति विश्वः ॥ ३५ ॥

सुमनोरञ्जनी — हे बालिशाः । यूयम् आशु यात गच्छध्वम् । यदि जिजीविषा जीवितु-मिच्छाऽस्ति तर्हि भवद्भिरेवं मा प्रार्थ्यं न प्रार्थनीयम् । हि यस्मात् राजकुलानि राज्ञां समुदायाः । दृप्तं मत्तं पुरुषं बध्नन्ति निगडादिना । घ्नन्ति ताडयन्ति नाशयन्ति च । लुंम्पन्ति निधनं कुर्वन्ति अत इति संबन्धः ॥ ३५ ॥

इत्थं विकत्थमानस्य कुपितो देवकीसुतः ।
रजकस्य कराग्रेण शिरः कायादपाहरत् ॥ ३६ ॥

सत्यधर्मीया — इत्थं विकत्थमानस्यासम्बद्धभाषिणः । देवकीसुतो राजानुबन्धमविगम्योक्त-वानिति विकत्थनतामनेन द्योतयति । कराग्रेण कायाद्विशिष्टाच्छरीराच्छिरोऽपाहरत् । येन दुर्व्यवहरणं हरणं तस्यैव न्याय्यम् । कोऽनुबन्धः कबन्धेनेति विहाय कायं जहार हरिः शिरस्तस्येत्यौत्प्रेक्षिकाः

प्रेक्षावन्तो वदन्ति । तथा सर्वज्ञत्वेन भाविरजकविरोधं मनसि निधाय सर्वदा तज्जननिर्णेजनमस्मद्वसनयोर्मेति पीतावरणक एको नीलाम्बरोऽभूदिवेति चोत्प्रेक्षयन्ति ॥ ३६ ॥

सुमनोरञ्जनी — विकत्थमानस्य अश्लीलं ब्रुवतः ॥ ३६ ॥

तस्यानुजीविनः सर्वे वासःकोशान् विसृज्य वै ।
दुद्रुवुः सर्वतो मार्गे वासांसि जगृहेऽच्युतः ॥ ३७ ॥

सत्यधर्मीया — तस्यानुजीविनो भार्या भृत्याद्याः । यथोक्तं हरिवंशे । तं हतं पतिदेवत्यो भार्यास्तस्य विचुक्रुशुः । त्वरितं मुक्तकेश्यश्च जग्मुः कंसनिवेशनमिति । वासः कोशान्वस्त्ररूपार्थौघान् । कोशोऽस्त्री कुड्मले दिव्यशास्त्रेऽर्थौघे गृहे तनाविति यादवः । सर्वतो मार्गे दुद्रुवुः । अच्युतो वासांसि जगृहे ॥ ३७ ॥

सुमनोरञ्जनी — तस्य रजकस्य । अनुजीविनः भृत्याः । वासःकोशान् वस्त्रग्रन्थीन् ॥ ३७ ॥

वसित्वाऽऽत्मप्रिये वस्त्रे कृष्णः सङ्कर्षणस्तथा ।
शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३८ ॥

सत्यधर्मीया — आत्मप्रिये स्वयोग्ये वस्त्रे कृष्णः सङ्कर्षणश्च वसित्वा शेषाणि गोपेभ्योऽदत्त । कानिचिदुर्वरितानि भुवि विसृज्य वितत्य पादन्यासं कुर्वन्तौ गताविति भावः । शिष्टान्यास्तीर्य तत्र पदं प्रणिधाय चागादित्याचार्योक्तेः । प्रायेण प्राहुणिकाः प्राप्तनूतनप्राहुणिकानां पादस्थापनार्थं स्थापयन्ति वासांसि कंसस्तु स्वयं न वेदितेति वयमेव कुर्म इति प्रचयार्थं चेमां कृतिमकृत देव इति ज्ञेयम् ॥३८॥

सुमनोरञ्जनी — कृष्णः तथा संकर्षणः । आत्मप्रिये वस्त्रे वसित्वा परिधाय । शेषाणि अवशिष्टानि । गोपेभ्यः आदत्त ददतुरित्यर्थः ॥ ३८ ॥

ततस्तु वापकः प्रीतस्तयोर्वेषमकल्पयत् ।
विचित्रवर्णैः शैलेयैराकल्पैरनुरूपतः ॥ ३९ ॥

सत्यधर्मीया — रजकेन सह रङ्गकारो दृष्टः कृष्णेनेत्युक्तम् । तत्र स कः किंकर्मा कां सेवां देवस्याकरोदथवा दुरात्मा चेत्किमतनोत्तं भगवानित्यतः स संस्तत्सेवा चेयं देवोऽप्येवं दयां ततान तदुपरीति परिकीर्तयति ॥ तत इति । वापको नापिता ततः स्वेन सह दृष्टरजकभञ्जनानन्तरं वायकश्चैलेयैरिति पठित्वा वायकस्तन्तुवायविशेषः । चैलेयैर्वस्त्रमयैरिति व्याख्या । रजको वस्त्रनिर्णेजकः

स एव वस्त्राणां रङ्गमपि कुर्वन्रङ्गकार इत्याकारया व्याख्यया न सख्यं भजते । किञ्च रजक एव रञ्जकश्चेन्मूले कृष्णदृष्टवतस्तनस्त्विति नानुवादः सम्भवति । अपि च न तान्तुवायिकव्यापारः स इत्युपेक्ष्या । उक्तं च-

ग्राह्यापहेयरहितैकचिदात्मसान्द्रस्वानन्दपूर्ववपुरप्ययशोषहीनः ।
लोकान्विडम्ब्य नरवत्समलक्तकाद्यैर्वप्त्रा विभूषित इवाभवदप्रमेयः । इति ।

तयो रामकृष्णयोर्वेषमकल्पयत् । प्रीत इति भक्ततोपोद्बलकम् । विचित्रवर्णैः शैलेयैर्गिरिभवैर्गौरिकादिभिराकल्पैर्भूषणैश्चानुरूपतः स्वतदुचिततया ॥ ३९ ॥

सुमनोरञ्जनी — वायकः तन्तुवायकः वप्त्रा विभूषित इवाभवदिति निर्णयानुसारेण । वापक इति पाठे तु स्पष्टोऽर्थः । विशेषवेषमलङ्कारम् । कैरिति तत्राह ॥ विचित्रेति । शैलेयैः पर्वतोत्पन्नैः धातुभिः आकल्पैः आभरणैः । चैलेयैरित्यपि पठन्ति । चैलं वस्त्रं तन्मयैः आकल्पैः उष्णीषादिभिरित्यर्थः ॥ ३९ ॥

नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः ।
स्वलङ्कृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४० ॥

सत्यधर्मीया — नानालक्षणं नानावेषश्च ताभ्यां यथा सितेतरौ सितश्चेतरः प्रस्तुतेतरोऽसितश्च तौ । बालगजावलङ्कृतौ पर्वण्युत्सवविशेष विरेजाते तथा रामकृष्णौ विरेजतुः । दृष्टान्तद्वयं वा बालगजौ । सितेतराविव सितो रामोऽसितः कृष्णश्चेति तादृशगजाविव । यथा पर्वणी वेति छेदः । पौर्णिमामावास्ये व इव ते यथा सितेतरे शुक्लकृष्णौ रेजाते तथा रेजतुरिति ॥ ४० ॥

सुमनोरञ्जनी — नाना लक्षणं अङ्कं वेषं अलङ्करणं ताभ्याम् । पर्वणि उत्सवे । सितेतरौ शुक्लकृष्णौ । यद्वा पर्वणीति प्रथमाद्विवचनान्तम् । पर्वणीव पौर्णमामावास्यावत् । सितेतराविति पदरत्नावली ॥ ४० ॥

तस्य प्रसन्नो भगवान् प्रादात् सारूप्यमात्मनः ।
श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियम् ॥ ४१ ॥

सत्यधर्मीया — तस्य वपुर्भगवान्प्रसन्नो लोके श्रियं च परमां, बलैश्वर्यस्मृतीन्द्रियं बलं चैश्वर्यं च स्मृतिं चेन्द्रियं तत्पाटवं च । एकवद्भावः । अन्ते चात्मनः सारूप्यं तद्रूपं मोक्षम् ॥ ४१ ॥

सुमनोरञ्जनी — तस्य वायकस्य । इह लोके तु । बलं शारीरबलम् । ऐश्वर्यम् अणिमादिकं स्मृतिं भगवत्स्मृतिम् । इन्द्रियाणि च तानि प्रादात् ॥ ४१ ॥

ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ।
तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥ ४२ ॥

सत्यधर्मीया — ततो वेषभूषणादिसम्पत्त्यनन्तरं सुदाम्नास्तन्नाम्नो मालां करोतीति मालाकारस्तस्य भवनं जग्मतुः । स सुदामा ॥ ४२ ॥

सुमनोरञ्जनी — सुदाम्नः सुदामनामकस्य ॥ ४२ ॥

तयोरासनमानीय पाद्यं चाथार्हणादिभिः ।
पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ॥ ४३ ॥

सत्यधर्मीया — पाद्यं चानीयेत्यन्वयः । अर्हणादिभिरुपचारैः स्रक्ताम्बूलानुलेपनैः पूजाञ्चक्रे ॥४३॥

सुमनोरञ्जनी — पाद्यं पादप्रक्षालनार्थमुदकं च । आनीय । अर्हणं पूजासाधनं द्रव्यम् । आदिपदेन विनयवचनादिकम् । तैः अनुलेपनं चन्दनम् ॥ ४३ ॥

प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो ।
पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम् ॥ ४४ ॥

सत्यधर्मीया — वां युवयोरागमनेन नो जन्म सार्थकं कुलं च पावितं पितरश्च देवाश्च ऋषयश्च मह्यं मदुपरि तुष्टाः । प्रभो इत्युक्तवक्ष्यमाणगुणा मुख्याः कृष्ण एव बले तूपचार इति ध्वनयति ॥ ४४ ॥

सुमनोरञ्जनी — आदिपदोक्तं सविनयवचनं दर्शयति ॥ प्राहेति । सार्थकं सफलम् । पावितं पवित्रीकृतम् ॥ ४४ ॥

भवन्तौ किल विश्वस्य जगतः कारणं परम् ।
अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ ४५ ॥

सत्यधर्मीया — भवन्तौ युवां वर्तमानकाल इत्यप्यर्थः । भवन्ति वर्तमानकाल इति कौमुदी । क्षेमाय, भवाय मङ्गलाय चावतीर्णौ ॥ ४५ ॥

सुमनोरञ्जनी — विश्वस्य समस्तस्य जगतः परं स्वतन्त्रं कारणम् । कर्ताराविति यावत् । भवाय सौख्याय । सज्जनानामिति शेषः ॥ ४५ ॥

न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः ।
समयोः सर्वभूतेषु भजन्तं भजतोरपि ॥ ४६ ॥

सत्यधर्मीया — समयोस्तत्तद्योग्यतामनुसृत्य समयोर्वा न हि विषमा दृष्टिर्जगदात्मनोर्जगत्स्वामिनोः सुहृदोर्बन्ध्वोः सुमनसोर्वा भजन्तं भजतोः फलदानेन ॥ ४६ ॥

सुमनोरञ्जनी — रजकवधवायकानुग्रहाभ्यां युवयोर्न विषमदृष्टिता सम्भावनीयेत्याह ॥ न हीति । जगदात्मनोः जगत्स्वामिनोः । ननु फलवैषम्यदर्शनात्कथं समत्वमिति तत्रोक्तम् ॥ भजन्तमिति । भजतोः फलदानेनानुग्रहं कुर्वतोः अपिना भजन्तं अभजतोरित्यपि लभ्यते । सेवानुरूपफलदानेन न वैषम्यमिति भावः ॥ ४६ ॥

शाध्याज्ञापय मां भृत्यं किमहं करवाणि वाम् ।
पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥ ४७ ॥

सत्यधर्मीया — शाधीत्येकं प्रति, एकं प्रति आज्ञापयेतीति नैकतरवैय्यर्थ्यं वा सामान्यविशेषकल्पं वेति ज्ञेयम् । भवद्भिर्भवदादिभिर्नियुज्यत इति यद्येष नियोगोऽत्यनुग्रहस्तद्रूपः । पुंस इत्यधिकारिणः ॥ ४७ ॥

सुमनोरञ्जनी — मया किमप्यविहितमाचरितं चेत् शाधि शिक्षय । नो चेत् भृत्यं मां, त्वत्सेवाया माज्ञापय । यन्नियुज्यत यत् एषः नियोगः अनुग्रहो हि अनुग्रह एव ॥ ४७ ॥

इत्यभिप्रेत्य राजेन्द्र सुदामा प्रीतमानसः ।
शस्तैः सुगन्धैः कुसुमैर्माला विरचिता ददौ ॥ ४८ ॥

सत्यधर्मीया — गन्धो येषामस्तीति गन्धानि सुशोभनानि च तानि गन्धानि च तैः । अतो न गन्धस्येदुत्पूतिसुसुरभिभ्य इतीत्त्वप्रसक्तिः । कुसुमैर्विरचिता माला ददौ । एकवचनान्तपाठो दुर्लेखमूलः । ताभिर्मालाभिरित्युक्तेः ॥ ४८ ॥

सुमनोरञ्जनी — इति प्राहेति पूर्वेणान्वयः । तदनन्तरमभिप्रेत्य तयोरभिप्रायं ज्ञात्वा । सुगन्धैः शोभनाः ये गन्धास्तैर्गुणैः । शस्तैः प्रशस्तैः ॥ ४८ ॥

ताभिः स्वलङ्कृतौ प्रीतौ कृष्णरामौ सहानुगौ ।
प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ ४९ ॥

सत्यधर्मीया — प्रणताय प्रपन्नाय शरणागताय ॥ ४९ ॥

सुमनोरञ्जनी — ताभिः मालाभिः सुष्टु अलङ्कृतौ । प्रपन्नाय शरणागताय ॥ ४९ ॥

सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ।
तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥ ५० ॥

सत्यधर्मीया — तस्मिन्नेवाखिलात्मन्यचलां भक्तिं वव्रे । तद्भक्तेषूत्तमेषु सौहार्दं भूतेषु स्वाधमेषु दयां चेति वव्रे ॥ ५० ॥

सुमनोरञ्जनी — सोऽपि वव्र इत्यतस्तदाह ॥ सोऽपीति । अखिलस्वामिनि तस्मिन् । भक्तिमेव वव्र इति सम्बन्धः ॥ ५० ॥

इति तस्मै वरं दत्वा श्रियं चान्वयवर्धिनीम् ।
बलमायुर्यशः कान्तिं निर्जगाम सहाग्रजः ॥ ५१ ॥

सत्यधर्मीया — अन्वयवर्धिनीं वंशपरम्परातो वृद्धिमतीम् । बलं यशः कान्तिं च तद्रूपं वरं दत्वाऽऽयुर्नित्यायुर्मोक्षं च दत्वा सहाग्रजो निर्जगाम तद्धामतः ।

माला अवाप्य च सुदामत आत्मन्तन्त्रस्तावक्षयोऽनुजगृहे निजपार्षदौ हि ।

पूर्वं विकुण्ठसदनाद्धरिसेवनाय प्राप्तौ भुवं मृजिनपुष्पकरौ पुराऽपीत्याचार्योक्तेः ॥ ५१ ॥

सुमनोरञ्जनी — इति तद्याचनाप्रकारेण । अन्वये वंशे वर्धिनीं दिने दिने वर्धिष्यमाणां श्रियं संपत्तिम् ॥ ५१ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकोनचत्वारिंशोऽध्यायः ॥

॥ अथ चत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम् ।
विलोक्य कुब्जां युवतीं वराननां पप्रच्छ धात्रीं वचसा रसप्रदः ॥ १ ॥

सत्यधर्मीया — अथ मालालाभानन्तरम् । राज्ञः पन्था राजपथस्तेन व्रजन्माधवो, गृहीतमङ्गविलेपस्य भाजनं पात्रं यया तां स्त्रियं कुब्जां त्रिवक्रां युवतीं तरुणीं वराननां धात्रीं सैरन्ध्रीं विलोक्य प्रहसन्रसप्रद आनन्ददः सुरतरसप्रदो वा पप्रच्छ ॥ १ ॥

सुमनोरञ्जनी — भगवदपरोक्षानन्तरम् अन्यथारूपप्रहाणेन सुस्वरूपाविर्भावलक्षणमोक्षं प्रसन्नो भगवानेव प्रयच्छतीतीममर्थं व्यंजयितुं तच्छक्तेरघटितघटकतां च व्यंजयन् कुब्जार्ज्वीकरणादिमाहात्म्यं निरूपयत्यस्मिन्नध्याये । अथ राजपथेन राजमार्गेण व्रजन् माधवः । गृहीतानि अङ्गविलेपनस्य चन्दनस्य भाजनानि यया ताम् । काञ्चन स्त्रियं विलोक्य पप्रच्छेत्यन्वयः । कीदृशीं, कुब्जां वक्राम् । किं सर्वाङ्गेषु, नेत्याह ।। वराननामिति । आननन्तु उत्तममिति भावः । वयसा युवतीं तरुणीं धात्रीं कंसस्येति शेषः । वचसा वाक्येन । रसप्रदः आनन्दप्रदः रागप्रदः सन् । कामरागोद्दीपकवचसा प्रपच्छेति भावः ।। १ ।।

का त्वं वरोर्वेतदिहानुलेपनं कस्याङ्गने वा कथयस्व साधु नः ।
देह्यावयोरङ्गविलेपमुत्तमं श्रेयस्ततस्ते नचिराद् भविष्यति ।। २ ।।

सत्यधर्मीया — हे अङ्गने वरोरु, सोल्लण्ठवचनम्, उत्तमोत्सङ्गे त्वं का? एतदनुलोपनं कस्य? कंसमुद्दिश्य नयसि? साधु सत्यं यथा तथा कथयस्व । निर्दोषे पेशले सत्ये साधुशब्दं प्रयुज्यत इत्युक्तेः । उत्तममङ्गविलेपनमावयोर्देहि ततो दानात्ते नचिराच्छीघ्रं श्रेयो भविष्यति ।। २ ।।

सुमनोरञ्जनी — हे अङ्गने ! हे वरोरु ! इदं च भविष्यद्वरोरुत्वाभिप्रायेण न तूपहासरूपम् । रसप्रद इति पूर्वोक्तविरोधात् । त्वं का ? एतदनुलेपनं कस्योद्देशेन नयसि ? एतदित्यावर्तते । एतत् नः साधु सत्यं कथयस्व । निर्दोषे पेशले सत्ये साधुशब्दं प्रयुज्यत इति । आवयोरुत्तममङ्गविलेपं देहि । ततः तद्दानेन नचिरात् शीघ्रमेव श्रेयो भविष्यतीति ।। २ ।।

सैरन्ध्र्युवाच—

दास्यस्म्यहं ते सुरवर्य सम्मता त्रिवक्रनाम्नी ह्यनुलेपकर्मणि ।
मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ।। ३ ।।

सत्यधर्मीया — कृष्णपृष्टा, सैरन्ध्री परवेश्मस्था शिल्पकृत्स्ववशा स्त्रियामिति विश्वात्सोवाचेत्याह ।। सैरन्ध्रीति । हे सुरवर्य अहं दास्यस्मि । अनुलेपकर्मणि गन्धलेपनक्रियायां सम्मता किञ्चित्प्रसिद्धा । त्रिवक्रेति नाम यस्याः सा त्रिवक्रनाम्नी । मद्भावितं विलेपनं भोजपतेः कंसस्यातिप्रियं सुरतरतिप्रियमिति वा । युवां विनाऽन्यतमोऽन्यः, अन्यतमो मुकुन्दात्को नाम लोक इतिवत्स्वार्थे तमप्प्रत्ययः । कोऽर्हति योग्यो भवति । अन्येषु प्रसक्तेष्वेकोऽन्यतमः कोऽर्हतीत्यपि वर्णयन्ति ।। ३ ।।

सुमनोरञ्जनी — हे सुरवर्य! अहं भोजपतेः दासी अस्मि । त्रिषु स्थानेषु ग्रीवोरःकटिषु वक्रत्वात्त्रिवक्रनाम्नी । अथापि अनुलेपकर्मणि चन्दनादिसुरभीकरणे । सम्मता । अतो त्या

भावितमनुलेपनं भोजपतेः कंसस्यातिप्रियम् । एतेन कस्योद्देशेन नयसीति द्वितीयप्रश्नोत्तरं लभ्यते । युवां विना अन्यतमोऽन्यः को अर्हति न कोपि । अतो युवाभ्यां ग्राह्यमिति भावः ॥ ३ ॥

रूपपेशलमाधुर्यहसितालापवीक्षितैः ।
धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम् ॥ ४ ॥

सत्यधर्मीया — रूपमाकारसौष्ठवं, पेशलं सुकुमारता, माधुर्यं सरसता, हसितं हासः, आलाप उक्तिः, वीक्षितं कटाक्षविक्षेपस्तैर्धर्षितात्मा धर्षित आत्मा मनो यस्याः सा गतम् । मोहितचित्तोभयोः सान्द्रं घनीभूतमनुलेपनं ददौ ॥ ४ ॥

सुमनोरञ्जनी — रूपमाकृतिः । पेशलं सौन्दर्यम् । माधुर्यहसिताभ्यां सहितो य आलापः स्मितपूर्वमधुरालाप इत्यर्थः । वीक्षितं च तैः धर्षितात्मा आकृष्टचित्ता । सान्द्रं घनीभूतम् ॥ ४ ॥

ततस्तावङ्गरागेण सुवर्णेतरशोभिना ।
सम्प्राप्तापरभागेन शुशुभातेऽनुरञ्जितौ ॥ ५ ॥

सत्यधर्मीया — ततस्तौ रामकृष्णौ सुवर्णेतरशोभिना सुवर्णादितरद्रजतं तद्वच्छोभाऽस्यास्तीति तदतिशुभ्रेणेत्यर्थः । स्ववर्णेतरशोभिनेति पाठे स्ववर्णौ सितासितवर्णौ ताभ्यामितरेण पीतेन केशरकुङ्कुमादिमिश्रेण शोभाऽस्यास्तीति व्याकुर्वन्ति । सम्प्राप्तापरभागेन सम्प्राप्तः परभागो यस्य क्लृप्तस्तद्भिन्नो भागोऽपरभागो येन तेन । सम्प्राप्तपरभागेनेति पाठे सम्प्राप्तः परो नाभेरूर्ध्वतनो भागो येन तेनेत्यर्थः । अनुरञ्जितौ शुशुभाते । सम्प्राप्तापरभागेनेत्यत्र मध्ये विद्यमाननञः पूर्वमन्वयः । तथा चासम्प्राप्तपरभागेनेति पदसम्पत्तिः । असम्प्राप्तः परस्य कंसस्य भागो येन स इति वा ॥ ५ ॥

सुमनोरञ्जनी — सुवर्णं तदितरं रजतम् । तद्वच्छोभितुं शीलमस्येति तथाविधम् । तेन सु समीचीनो वर्ण इतरः सुगन्धस्ताभ्यां शोभितुं शीलमस्येति वा । संप्राप्तः अपरभागो नाभेरुपरिभागो येन सः । संप्राप्तः आसमन्तात्परभागः गुणोत्कर्षो येन । प्रसरत्परिमलेनेति यावदिति वा । भगवदङ्ग सङ्गसंप्राप्तः परभागविशेषो येनेति वा । एतादृशेन अङ्गरागेण । अनुरञ्जितौ शुशुभात इत्यन्वयः ॥५॥

प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम् ।
ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम् ॥ ६ ॥

सत्यधर्मीया — दर्शने स्वस्य, दर्शयंस्त्रिवक्रां ग्रीवोरःकटितटानि वक्राणि यस्याः सेति त्रिवक्रा । रुचिराननाम् । इदं च ऋज्वीकरणकारणम् । ऋज्वीं कर्तुं मनश्चक्रे ॥ ६ ॥

सुमनोरञ्जनी — रुचिराननां सुन्दराननाम् । अथापि त्रिवक्राम् । कुब्जां ह्रस्वाम् । स्वस्य दर्शने अपरोक्षदर्शने । फलम् अन्यथारूपप्रहाणेन स्वरूपेण व्यवस्थितिरूपं फलं स्वभक्तानां ददामीति दर्शयन् व्यञ्जयन् । स्वभक्तानामिति शेषः अस्या अपि । या पिङ्गलान्यभव आत्मनि संस्थितं तं संस्मृत्य कान्तमुरुगायमभूत्त्रिवक्रेति निर्णयानुसारेण भक्तत्वं ज्ञेयम् । अनेन मतान्तराभिमत-मोक्षस्वरूपं निराकृतं भवति भगवता बादरायणेन ॥ ६ ॥

पद्भ्यामाक्रम्य प्रपदे द्व्यङ्गुलोत्तानपाणिना ।
प्रगृह्य चुबुके ह्यास्यमुदनीनयदच्युतः ॥ ७ ॥

सत्यधर्मीया — पद्भ्यां स्वपदाभ्यां तस्याः प्रपदे आक्रम्य । प्रह्वे इति पिङ्गलनागसूत्रात्प्रे परतः सतिम्यो न गुरुरिति न छन्दोभङ्गः । व्यङ्गुलं गतम् उत्तानमूर्ध्वीकृतं यस्य स पाणिस्तेन चुबुके हनुप्रदेशे प्रगृह्यास्यमुदनीनयदुन्नमयामास ॥ ७ ॥

सुमनोरञ्जनी — ततः किं चकारेत्यत आह ॥ पद्भ्यामिति । पद्भ्यां स्वपादाभ्यां कुब्जायाः प्रपदे आक्रम्य अवष्टभ्य । व्यङ्गुले उन्नते उत्ताने यस्मिन् पाणौ तेन द्व्यङ्गुलोन्नतपाणिना । चुबुके मुखस्याधोभागे । आस्यं प्रगृह्य । उदनीनयत् उन्नमयामास । ऊर्ध्वमाचकर्षेत्यर्थः ॥ ७ ॥

सा तदार्जुसमानाङ्गी बृहच्छ्रोणिपयोधरा ।
मुकुन्दस्पर्शनात् सद्यो बभूव प्रमदोत्तमा ॥ ८ ॥

सत्यधर्मीया — स तदैव । ऋजु समानमङ्गं यस्याः सा । बृहत्यौ बृहन्त्यौ चेति बृहन्तः श्रोणी च पयोधरौ च ते यस्याः सा । मुकुन्दस्पर्शात्सद्यः प्रमदोत्तमा बभूव ॥ ८ ॥

सुमनोरञ्जनी — सा तदा मुकुन्दस्य मोक्षप्रदस्य हरेः स्पर्शनात् । ऋजु अवक्रं समानं समुचितसंस्थानम् अङ्गं शरीरं यस्याः सा । बृहन्तौ श्रोणी नितम्बौ तत्सहितौ च पयोधरौ यस्याः सा। एवंविधा भूत्वा सद्य एव प्रमदानामुत्तमा बभूवेति ॥ ८ ॥

ततो रूपगुणौदार्यसम्पन्ना प्राह केशवम् ।
उत्तरीयान्तमाकृष्य सस्मयं जातहृच्छया ॥ ९ ॥

सत्यधर्मीया — ततो, रूपं गुणानामौदर्यं च ताभ्यां सम्पन्ना । उत्तरीयान्तं चैलाञ्चलमाकृष्य सस्मयं सगर्वं जातो हृच्छयो मन्मथो यस्याः सा केशवं प्राह ॥ ९ ॥

सुमनोरञ्जनी — उत्तरीयान्तं उत्तरीयवस्त्रप्रान्तम् । जातः उद्रिक्तो हृच्छ्रयः कामो यस्याः सा ॥ ९ ॥

एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे ।
त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ॥ १० ॥

सत्यधर्मीया — हे वीर एहि, गृहं यामस्त्वां त्यक्तुं नोत्सहे त्वयोन्मथितं चित्तं यस्याः सा तस्याः । हे पुरुषर्षभ प्रसीद ॥ १० ॥

सुमनोरञ्जनी — उन्मथितं आकृष्टं चित्तं यस्याः तस्याः ॥ १० ॥

एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः ।
मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ॥ ११ ॥

सत्यधर्मीया — एवं स्त्रिया याच्यमानः कृष्णो रामस्यार्यस्य पश्यतस्ततोऽनुगानां च मुखं वीक्ष्य । अनेनैकान्तिकं कार्यं नार्यादिसन्निधाने कार्यमियं च मन्मथमथितचित्तेति न जानमाना तत्कालं समाधेयेति कृत्वा वदति ॥ प्रहसन्निति ॥ ११ ॥

सुमनोरञ्जनी — अनुगानां रामस्य च । मुखं वीक्ष्य ॥ ११ ॥

एष्यामि ते गृहं सुभ्रु पुंसामाधिविकर्शनम् ।
साधितार्थोऽगृहाणां नः पान्थानां त्वं परायणम् ॥ १२ ॥

सत्यधर्मीया — हे सुभ्रु! पुंसामाधिविकर्शनं ते गृहम् । पुंसामाधिविकर्शनमिति पदमेकम् । पुंसां आधिविकर्शनं येन तदिति वा । साधितोऽर्थः कंसहिंसाद्यात्मा येन स सन् एष्यामि । अपदेशे-नोपदिशति । अगृहाणां स्वकीयत्वेन गृहरहितानां पान्थानां पथिकानां नस्त्वं परायणं मुख्याश्रय इति । आन्तरङ्गिको हरिभावस्त्वगृहाणामसहानीतवनितानां पान्थानां त्वं तत्त्वेन परायणमिति ॥ १२ ॥

सुमनोरञ्जनी — हे सुभ्रु ! अहं साधितार्थः सन् साधितोऽर्थः कंसवधलक्षणं प्रयोजनं येन सः । पुंसामाधेः मन्मथव्यथायाः विकर्शनं परिहारकम् । ते गृहं प्रति एष्यामि । किञ्च अगृहाणां गृहरहितानाम् । अकृतदाराणां वा । पान्थानां प्रवासिनाम् । नः अस्माकम् । त्वं मुख्याश्रय इत्यर्थः ॥ १२ ॥

विसृज्य माध्व्या वाण्या तां व्रजन् मार्गे वणिक्पथैः ।
नानोपायनताम्बूलस्रग्गन्धैः साग्रजोऽर्चितः ॥ १३ ॥

सत्यधर्मीया — माध्व्या मधुरया वाण्या तां त्रिवक्रां विसृज्य । वणिजां पन्थानो येषां ते तैर्जनैर्नानोपायनानि वक्ष्यमाणविलक्षणानि च ताम्बूलस्रग्गन्धैः करणैः । माध्व्या वाण्याऽप्यत्रान्वेति । मधुरया वाण्या च साग्रजः सबलोऽर्चितोऽभूत् ॥ १३ ॥

सुमनोरञ्जनी — माध्व्या मधुरया । तां विसृज्य प्रस्थाप्य । वणिक्पथैः वणिक्पथाश्रितैः जनैः नानोपायनताम्बूलादिभिः साधनैरर्चितः ॥ १३ ॥

ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः ।
तस्मिन् प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतम् ॥ १४ ॥

सत्यधर्मीया — ततस्तं पुरो गच्छन्तं कश्चिद्गोपमच्युतो धनुषः स्थानं पृच्छ नो माऽऽलस्यमिति शेषः । राक्षसैः गतम् । अब्रवीत् । तस्मिन्पृच्छन्तं प्रति लोकावेदिते स्थाने प्रष्टा पृच्छमानः पृच्छन् । व्यत्ययेन सर्ववेदितुरियं लीलेति ध्वनयति । ऐन्द्रं धनुरिवाद्भुतं धनुर्ददृशे ॥ १४ ॥

सुमनोरञ्जनी — धनुषः स्थानं धनुःशालां पृच्छमानः । तस्मिन् तस्यां शालायाम् । ऐन्द्रं धनुरिव इन्द्रचापमिव । अत्यद्भुतम् आश्चर्यकरम् ॥ १४ ॥

पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ।
वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥ १५ ॥

सत्यधर्मीया — बहुभिरनेकैः पुरुषैर्गुप्तं रक्षितं तैरर्चितं च परमा च ऋद्धिश्च सम्पच्च साऽस्यास्तीति तत् । (नृभिः) अनुभिरनोऽस्मच्छकटादिकं मा पृच्छ । तद्रक्षकैर्वार्यमाणो निवार्यमाणः प्रसह्य बलात्कृत्य धनुराददे न तु शक्यमित्यविदित्वा झडिति भगवान्कुतोऽकरोद्धरणमिति नेत्यप्याह । प्रसह्य धनुः स्वेन सोढुं शक्यं प्रकर्षेणेति ते च तद्धनुश्चेति ॥ १५ ॥

सुमनोरञ्जनी — गुप्तं रक्षितम् । प्रसह्य बलात् ॥ १५ ॥

करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यताम् ।
नृणां विकृष्य प्रबभञ्ज मध्यतो यथेक्षुदण्डं मदकर्युरुक्रमः ॥ १६ ॥

सत्यधर्मीया — करेणोद्धृत्य प्राग्व्यतनुत च गुणावेदनमसौ प्रभुः पादाघातं तदनु विरचय्याश्व्यनमयत् ।

अथो लीलाबालः करधृतधनुर्भग्नमकरोद्बलान्नम्रीभूते किमिह करुणा शुष्कहृदये ।

सद्वंशजातोऽपि गुणान्वितोऽपि शिक्षानुरूपोऽपि स तेन चापः ।
भग्नः शनैर्वक्रहृदो हि लोके को वा गुणः कोविदमानयोग्यः ।

इत्यभिप्रेत्याह ॥ करेणेति । वामेन करेण सलीलमिति तदलभ्यतया हेलनं ध्वनयति । उद्धृतं सज्जं

ज्यया गुणेन सहितं चात्कृत्वा निमिषेण क्षणार्थकालेनानिमिषेण निमिषौ निमीलनोन्मीलने न स्तो यस्य तेन चक्षुषा नृणां पश्यतामिति वा यथा मदकरीक्षुदण्डं मदवद्धस्ती तथोरुक्रमः कृष्णो मध्यतो मध्ये प्रबभञ्ज ॥ १६ ॥

सुमनोरञ्जनी — सलीलं लीलया अनायासेन सहितं यथा भवति तथा । वामेन करेणोद्धृतम् । निमिषेण निमिषपरिमितकालेन । सज्जं कृत्वा । नृणां पश्यतां सताम् । उरुक्रमः ज्यां विकृष्य मध्यत एव बभंज । तत्र दृष्टान्तः । मदेन युक्तः करी गजः इक्षुदण्डं यथेति ॥ १६ ॥

धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ।
पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥ १७ ॥

सत्यधर्मीया — भग्नश्चापः स्वभर्तुः प्रतिभयनिनदैर्धैर्यचौर्यं ततान
व्यग्रस्वान्तान्स्वपालान्दृढतरशकलद्वन्द्वघातैर्जघान ।
भङ्गेनैवोग्रमल्लप्रकरहृदि भयं भल्लकल्पं चखान
द्वैधीभावं विपक्षे विरचयति बत स्वीय एव स्वशत्रुः ।

इति भगवद्भग्नधनुर्ध्वनित इयदापदुपयातेत्याह ॥ धनुष इति । भज्यमानस्य धनुषः शब्दो ध्वनिः खंरोदसी द्यावापृथिव्यौ दिशः पूरयामास यं शब्दं श्रुत्वा कंसः स्वयं त्रासं भयमुपागमज्जगाम ॥ १७ ॥

सुमनोरञ्जनी — खं आकाशम् । रोदसी द्यावाभूमी । त्रासं भयम् ॥ १७ ॥

तद्रक्षिणः सानुचराः कुपिता आततायिनः ।
ग्रहीतुकामा आवव्रुर्गृह्यतां वध्यतामिति ॥ १८ ॥

सत्यधर्मीया — तद्रक्षिणो धनुरक्षकाः सानुचराः स्वस्वभृत्याः कुपिता आततायिन आयुधेष्वायुधधरा गृहीतुकामा हन्तुकामाश्च गृह्यतां वध्यतामित्याववुरावृण्वन् ॥ १८ ॥

अथ तान् दुरभिप्रायान् विलोक्य बलकेशवौ ।
क्रुद्धौ धनुष आदाय शकले तांश्च जघ्नतुः ॥ १९ ॥

सत्यधर्मीया — दुर्दुष्टो भावो येषां तान्विलोक्य धनुषः शकले आदाय ताभ्यामेव तांश्च जघ्नतुः ॥ १९ ॥

सुमनोरञ्जनी — तद्रक्षिणः तस्य धनुषो रक्षकाः । आततायिनः शस्त्रपाणयः गृह्यतामित्यादि

वदन्तो, दुरभिप्रायान् दुष्टः अभिप्रायः श्रीकृष्णग्रहणविषयो येषां तान् । धनुषः शकले द्वे खण्डे ॥ १८,१९ ॥

बलं च कंसप्रहितं हत्वा शालामुखात् ततः ।
निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः ॥ २० ॥

सत्यधर्मीया — कंसप्रहितं बलं सेनाम् । सेना नाप्ता चेत्स्वयं भवति भिन्ना विद्रुत्वा द्रुतं न तथेदमित्यप्याह ॥ प्रहितमिति । प्रकर्षेण हितमेव यस्मात्तदिति । शालामुखाद्धनुर्गृहद्वारात् । शाले गृहे, मुखं निःसरण इति विश्वौ । निष्क्रम्य पुरसम्पदो निरीक्ष्य हृष्टौ विचेरतुः ॥ २० ॥

सुमनोरञ्जनी — कंसेन प्रहितं प्रेषितं बलं सैन्यम् । शालामुखात् धनुःशालाद्वारात् शाला-श्रेष्ठादिति वा ॥ २० ॥

तयोस्तदद्भुतं वीर्यं निशम्य पुरवासिनः ।
तेजः प्रागल्भ्यरूपं च मेनिरे विबुधोत्तमौ ॥ २१ ॥

सत्यधर्मीया — वीर्यं पराक्रमं, तेजः कायकान्तिं, प्रागल्भ्यं धार्ष्ण्यं, रूपमाकारम् । एकवद्भावः । प्रागल्भ्येन सहितं च तद्रूपं चेति वा । पुरवासिनो निशम्य तौ विबुधोत्तमौ देववरौ मेनिरे व्यजानन् ॥ २१ ॥

सुमनोरञ्जनी — तत् वीर्यं पराक्रमं प्रागल्भ्येन धार्ष्ण्येन सहितं रूपम् । निशम्य विबुधोत्तमौ देवोत्तमाविति मेनिरे ॥ २१ ॥

तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् ।
कृष्णरामौ सुरवं रात्रीं ज्ञात्वा कंसचिकीर्षितम् ॥ २२ ॥

सत्यधर्मीया — स्वैरं मरणभीत्या केऽपि न न्यवारयन्निति यथेच्छम् । आदित्योऽस्तमुपेयिवान् । सोमवंशसम्भूतप्राभवावलोकनविलम्बमवलम्ब इति कंसायुरद्य वर्तत इति । वाऽस्तं गत उत देवानां वार्तामाख्यातुं वेति ध्वनिः । नावपि स्वमूलपुरुषद्विषामहनीयोऽहन्यस्मन्महिमेति गोपैर्वृतौ रामकृष्णौ पुराच्छकटमर्धचन्द्रीकृतशकटस्थानमीयतुः ॥ २२ ॥

सुमनोरञ्जनी — स्वैरं विचरतोः सतोः अस्तम् अस्तगिरिम् । पुरात् पुरं हित्वा । शकटं शकटमोचनस्थानम् ॥ २२ ॥

अवनिज्याङ्घ्रियुगलं भुक्त्वा क्षीरोपसेचनम् ।
ऊषतुस्तां वृतौ गोपैः पुराच्छकटमीयतुः ॥ २३ ॥

सत्यधर्मीया — अङ्घ्रियुगलं पादद्वन्द्वमवनिज्य प्रक्षाल्य क्षीरोपसेचनं क्षीरान्नं रात्रौ दधि-निषेधात् । कंसचिकीर्षितं कंसालोचितस्वहिंसादिकं ज्ञात्वाऽपि तां रात्रिं सुखं यथा तथोषतुः । सुखमिति श्रुतैतद्वृत्तयोरपि तदलभ्यतां सूचयति ॥ २३ ॥

सुमनोरञ्जनी — अवनिज्य प्रक्षाल्य । क्षीरम् उपसेचनं यस्य तत् । अन्नमिति शेषः । कंसेन चिकीर्षितं कर्तुमिच्छाविषयम् । सुखं यथा स्यात्तथा ॥ २३ ॥

कंसस्तु धनुषो भङ्गं रक्षिणां स्वबलस्य च ।
वधं निशम्य गोविन्दरामविक्रीडितं परम् ॥ २४ ॥

सत्यधर्मीया — रक्षिणां धनुषस्तथा धनुषश्च भङ्गं स्वबलस्य च वधं निशम्य परं केवलं रामकृष्णयोर्विक्रीडितं तल्लीलारूपम् ॥ २४ ॥

सुमनोरञ्जनी — रक्षिणां धनूरक्षिणाम् । बलस्य च स्वप्रेषितसैन्यस्य च वधम् । अपरं च गोविन्दरामादिभ्यो विक्रीडितं रजकवधादिकम् । यद्वा धनुर्भङ्गादिकम् । गोविन्दरामयोः परं केवलं विक्रीडितमेव । न तु पराक्रमरूपमेवेति निशम्येति सम्बन्धः ॥ २४ ॥

दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ।
बहून्यचष्टोभयथा मृत्योर्दूतकराणि च ॥ २५ ॥

सत्यधर्मीया — दीर्घं प्रजागरो जागरणं यस्य सोऽलब्धनिद्रः, कदाचित्तत्प्राप्तौ दुर्मतिर्दुर्निमित्तान्युभयथा दैहिकबाह्यभेदेन भीतो बहून्यचष्टापश्यत् । कीदृशानीत्यत ईदृशानीत्याह ॥ मृत्योर्दूतकराणि शीघ्रं मरणसूचकानीति ॥ २५ ॥

सुमनोरञ्जनी — तेन भीतः तत एव च दीर्घं प्रजागरो निद्राभावो यस्य स तथाविधः । मृत्योर्दौत्यकराणि आगतं मृत्युं कथयन्ति । मृत्युसूचकानीति यावत् । उभयथा स्वप्ने जागरे च दुर्निमित्तानि दुश्चिह्नानि । अचष्ट अपश्यत् ॥ २५ ॥

अदर्शनं स्वशिरसः प्रतिरूपेषु सत्स्वपि ।
असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २६ ॥

छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः ।
स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥ २७ ॥

सत्यधर्मीया — तान्येव वितत्य वक्ति ॥ अदर्शनमिति । प्रतिरूपेषु छायालक्षणप्रतिबिम्बेषु सत्स्वपि स्वशिरसोऽदर्शनम् । द्वितीये चन्द्रेऽसत्यपि वस्तुतद्वैरूप्यं चन्द्रयोः । तथा ज्योतिषां श्रवणादिद्वयदर्शनम् । छायायां सुषिरप्रतीतिः । प्राणघोषस्य कराभ्यां कर्णयोः पिधाने वायुकृत-प्रणवनादानुपश्रुतिरश्रवणम् । तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिवेत्यादि । तद्भाष्ये च । प्राणसंस्थः स वै विष्णुः प्राणाग्नौ संव्यवस्थितः ।

स्पर्शेन दृश्यते चाग्निस्तद्दृष्टिरिव सा ततः ।
स प्राणः स्तौति तं विष्णुं सा श्रुतिः श्रूयते सदा ।
कर्णौ पिधाय तद्विद्वान्दिव्यचक्षुः सुकीर्तिमान् ।
मुक्तो भूत्वा भवेद्यस्मादुपासीतैवं सन्ततम् । इति सत्तत्त्वे ।

इत्युक्तेर्मृतिरासन्ना चेदयं न श्रूयत इति प्राणघोषानुपश्रुतिरिति । वृक्षेषु स्वर्णप्रतीतिस्तद्वर्ण-प्रतिभानम् । रजस्वलायामपि भूमौ स्वपदानां तल्लाञ्छनानामदर्शनम् ॥ २६,२७ ॥

सुमनोरञ्जनी — तान्येवाह । प्रतिरूपेषु छायादिषु । सत्स्वपि सत्वेन प्रतीयमानेष्वपि । तत्र स्वशिरसः शिरश्छायायाः अदर्शनम् । ज्योतिषां चन्द्रादीनां मध्ये । द्वितीये चन्द्रादौ असत्यपि तत्र द्वैरूप्यं द्विरूपतादर्शनम् । तथा ज्योतिषां सूर्यादीनां मध्ये । छायायां प्रतिबिम्बे च छिद्रप्रतीतिः सुषिरप्रतीतिः । प्राणघोषानुपश्रुतिः । कर्णे पिहिते । अन्तःप्राणेन मुख्यप्राणेन क्रियमाणो यो घोषः श्रूयते जनैः तस्याश्रवणम् । वृक्षे स्वर्णवर्णप्रतीतिः । कर्दमादिस्थले स्वपदानां स्वपाद-लाञ्छनानामदर्शनम् ॥ २७ ॥

स्वप्ने प्रेतपरिष्वङ्गः खरयानं बिसादनम् ।
यायान्नलदमाल्येकस्तैलाभ्यङ्गो दिगम्बरः ॥ २८ ॥

सत्यधर्मीया — जागरित ईरयित्वा स्वप्नेऽप्याह ॥ स्वप्न इति । प्रेतपरिष्वङ्गः शवालिङ्गनम् । खरयानं खरोपर्युपविश्य गमनम् । बिसादनं कमलबीजभक्षणम् । नलदमाली पद्मविशेषसंज्ञा ।

पद्ममालां शिरः कृत्वा यो गच्छेद्दक्षिणामुखः ।
एवं पश्यन्निशि स्वप्ने तत्क्षणान्मृत्युमेष्यति । इति स्वप्ननिदर्शन इति ।

तदमृणालं चाभयं नलदं सेव्यममृणालं जलाशयमित्यमरः । अथवा जपाकुसुममालावान्रक्तकरवीरं नलदमित्यपरे । तैलस्याभ्यङ्गं यस्य स तथा । दिगम्बरश्च यायाच्चेदपशकुनमित्यर्थः ॥ २८ ॥

अन्यानि चेत्थम्भूतानि स्वप्नजागरितानि च ।
पश्यन् मरणसन्त्रस्तो निद्रां लेभे न चिन्तया ॥ २९ ॥

सत्यधर्मीया — इत्थम्भूतान्येतत्सजातीयानि मरणसूचकानि स्वाप्नजागरितानि च पश्यन्मरणात् त्वरया भविष्यतः सन्त्रस्तो भीतश्चिन्तयैवं सञ्चिन्तया निद्रां न लेभे । तत्रोभयथा जागरितस्वप्नविभेदत उभयेत्यप्यर्थः सम्भवतीति ज्ञेयम् ॥ २९ ॥

सुमनोरञ्जनी — जागरितान्युक्त्वा स्वाप्नान्याह ॥ स्वप्न इति । प्रेतस्य कुणपस्य परिष्वङ्गः आलिङ्गनम् । खरयानं खरमारुह्य गमनम् । बिसस्य कमलनालस्य अदनं भक्षणम् । विषभक्षणमिति केषाञ्चित्पाठकल्पनं मध्वश्नाति बिसानि भक्षयतीति ऐतरेयश्रुत्यनालोचनमूलम् । नलदमाली नलदपुष्पाणां रक्तकरवीरपुष्पाणां मालाधारी यायादिति यत् तत् इत्येतानि दुर्निमित्तानि ज्ञेयानीति शेषः ॥ २८,२९ ॥

व्युष्टायां निशि कौरव्य ! सूर्ये चाभिसमुत्थिते ।
कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३० ॥

सत्यधर्मीया — निशि व्युष्टायां तत्प्रातरादिभागे चेत्यर्थः । सूर्ये चाद्भ्यः समुत्थित इति पाठे, य उदगान्महतोऽर्णवाद्विभ्राजमानः सलिलस्य मध्यात् । समावृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति श्रुतेरद्भ्यः समुत्थितत्वं सूर्यस्य ज्ञेयम् । अभिसमुत्थित इति पाठेऽप्युदयपर्वतादित्यप्यर्थः ॥ ३० ॥

सुमनोरञ्जनी — निशि व्युष्टाव्यां निवृत्तायाम् । अभिसमुत्थिते अभ्युदिते ॥ ३० ॥

आनर्चुः पुरुषा रङ्गं तूर्यभेर्यश्च जघ्निरे ।
मञ्चाश्चालङ्कृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३१ ॥

सत्यधर्मीया — तूर्येण सहिता भेर्यो भेरीर्जघ्निरे । चैलतोरणैर्वस्त्रकृततोरणैरलङ्कृताः ॥ ३१ ॥

तेषु पौरा जानपदा ब्रह्मक्षत्त्रपुरोगमाः ।
यथोपजोषं विविशू राजानश्च कृतासनाः ॥ ३२ ॥

सत्यधर्मीया — ब्रह्माणि ब्राह्मणाः क्षत्राणि तज्जातय एतानि पुरोगमानि येषां ते पौरा जानपदाश्च यथोपजोषं यथेच्छं यथासुखं वा गतम् । विविशुः । कृतासना राजान इतरे पूर्वं कृतमासनं कंसेन येषां त एतर्ह्युत्सवदर्शनार्थे कृतान्यासनानि येषां त इति वा ॥ ३२ ॥

सुमनोरञ्जनी — रङ्गं रङ्गस्थानम् । तूर्याणि गोमुखादिवाद्यानि । जघ्निरे वादिताः । पताकाभिः चैलतोरणैः वस्त्रमयतोरणैः । ब्रह्मक्षत्रं च पुरोगमं मुख्यं येषां ते । यथोपजोषं यथासुखम् । राजानो मण्डलेश्वराः ॥ ३२ ॥

कंसः परिवृतोऽमात्यै राजमञ्च उपाविशत् ।
मण्डलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३३ ॥

सत्यधर्मीया — राजमञ्चे राज्ञोऽयमिति क्लृप्तो मञ्चो राजमञ्चस्तस्मिन्नुपाविशत् । मण्डलेश्वराः खण्डाधीशास्तेषां मध्यस्थो विदूयता तप्यमानेन हृदयेन ॥ ३३ ॥

सुमनोरञ्जनी — राजमञ्चं राजयोग्यं मञ्चम् उन्नतं मञ्चमिति । विदूयता तप्यमानेन हृदयेन युक्तः ॥ ३३ ॥

वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ।
मल्लाः स्वलङ्कृता दृप्ताः स्वोपाध्यायाः समाविशन् ॥ ३४ ॥

सत्यधर्मीया — मल्लानां तालाः करास्फाला एवोत्तरा येषां तानि तूर्याणि । तालः करतलेऽङ्गुष्ठ-मध्यमाभ्यां च सम्मिते । गीतकालक्रियामाने तालः खड्गादिमुष्टिषु । द्रुमभेदे करास्फाले तालं तु हरितालक इति विश्वः । मल्लानां तालो गीतकालक्रियामानं स एवोत्तरो येषामिति वा स्वोपाध्यायाः स्वस्वाचार्यसहिताः स्वलङ्कृता दृप्ताः समाविशन् ॥ ३४ ॥

सुमनोरञ्जनी — मल्लानां तालशब्द उत्तरः उच्चैः श्रूयमाणो येषु तूर्येषु ते तथा । दृप्ताः गर्विताः । उपाध्यायाः मल्लविद्याशिक्षकाः तैः सहिताः ॥ ३४ ॥

चाणूरो मुष्टिकः कूटः छलः कोसल एव च ।
त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३५ ॥

सत्यधर्मीया — कोसलस्तोसलो वा न नामकरणकालिका वयमिति नायव्ययौ । वल्गुवाद्य-प्रहर्षिताः सरोमाञ्चा उपस्थानं रङ्गसमीपस्थलमासेदुः प्रापुः ॥ ३५ ॥

सुमनोरञ्जनी — मल्लेषु मुख्यान्निर्दिशन्नाह ॥ चाणूर इति । चाणूरादयो ये ते वल्गुवाद्यैः मनोहरवाद्यैः प्रहर्षिताः । उपस्थानं रङ्गसमीपम् । आसेदुः प्राप्ताः ॥ ३५ ॥

नन्दगोपादयो गोपा भोजराजसमाहुताः ।
निवेदितोपायनास्त एकस्मिन् मञ्च आविशन् ॥ ३६ ॥

सत्यधर्मीया — कंसेन समाहूता विवृतैर्नेत्रैः पश्यन्त्विति प्राक् स्वोक्तरक्षणार्थमेवाह्वानं दुरात्मन इति ज्ञेयम् । निवेदितान्युपायनानि स्वानिव राजदृष्टिविषयवस्तूनि यैस्ते एकस्मिन्मञ्चे आविशन् ॥ अनेन नातिप्रसिद्धो नन्दः पुरेति द्योत्यते ॥ ३६ ॥

सुमनोरञ्जनी — भोजराजेन समाहुताः समाहूताः । निवेदितोपायनाः दत्तदार्शनिकाः । राजदर्शने दीयमानं फलादिकं दार्शनिकम् ॥ ३६ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे चत्वारिंशोऽध्यायः ॥

॥ अथ एकचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

अथ कृष्णश्च रामश्च कृतशौचौ परन्तपौ ।
मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥ १ ॥

सत्यधर्मीया — रामकृष्णौ किं नन्दादिभिः सहितौ मञ्चमुपयातौ किं वा लोकविलोककौ किं वा पृथक्पन्थानमाश्रित्य तस्थतुरित्यतस्तत्कर्म श्रावयति श्रीशुक इति वदति ॥ श्रीशुक इति । अथ सूर्योदयानन्दरं रामः कृष्णश्चेत्येतौ कृतशौचौ मुखप्रक्षालनमज्जनादिना गताङ्गशुद्धी लोकदृष्ट्या । मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुत्सवं समुपेयतुः ॥ १ ॥

सुमनोरञ्जनी — परस्परसमुच्चये चशब्दौ । कृतं शौचं मुखप्रक्षालनादिकं याभ्यां तौ । परं शत्रुं तापयत इति परंतपौ । मल्लानां दुन्दुभीनां च निर्घोषम् । मल्लानां ये दुन्दुभयस्तन्निर्घोषमिति वा ॥ १ ॥

रङ्गद्वारं समासाद्य तस्मिन् नागमवस्थितम् ।
अपश्यत् कुवलयापीडं कृष्णोऽम्बष्ठप्रचोदितम् ॥ २ ॥

सत्यधर्मीया — रङ्गद्वारं समासाद्य तस्मिन्द्वार्यम्बष्ठप्रचोदितं कुवलयापीडं तन्नामकं गजमपश्यत् । रङ्गतां गच्छतां वारं समूहं च दृष्ट्वेत्यर्थः ॥ रङ्गेर्गत्यर्थः ॥ २ ॥

सुमनोरञ्जनी — तस्मिन् रङ्गद्वारे । नाम्ना कुवलयापीडम् । अम्बष्टेन हस्तिपकेन ॥ २ ॥

बद्ध्वा परिकरं शौरिः समूह्य कुटिलालकान् ।
उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥

सत्यधर्मीया — परिकरमुत्प्लवनाद्यनुकूलदुकूलबन्धम् । भेर्यङ्कपरिवारयोः, प्रगाधे गात्रिकाबन्धे विप्रप्रारम्भयोरपीति विश्वः । कुटिलालकान्समूह्य समूहीकृत्य बद्ध्वा च । अनेन स्वकीयोऽपि कुटिलश्चेच्छिक्षणीय इति ध्वनयति । मेघनादगभीरया वाचा हस्तिपमुवाच ॥ ३ ॥

सुमनोरञ्जनी — परिकरं कटिबन्धम् । कुटिलानलकांश्च समूह्य एकीकृत्य । मेघनादवद्गभीरया गम्भीरया वाचा ॥ ३ ॥

अम्बष्ठाम्बष्ठ मार्गं नौ देह्यपक्राम माचिरम् ।
नो चेत् सकुञ्जरं त्वाऽद्य नयामि यमसादनम् ॥ ४ ॥

सत्यधर्मीया — अम्बष्ठाम्बष्ठेति द्विर्वचनमाक्रोशसूचकम् । नौ मार्गं देहि मा चिरम् । अपक्राम अपगच्छ । नो चेन्न गच्छसि चेद्यं असादनमनवसादनममृत्युमिति यावत् मनुषे तेन कुञ्जरेण सहितमिति सकुञ्जरं त्वा त्वामद्य यमसादनं यमसदनं नयामीत्युक्तावपि नयामीत्यावृत्त्याऽन्वयः ॥४॥

सुमनोरञ्जनी — हे अम्बष्ट ! नौ आवां मार्गं देहि । माचिरं शीघ्रं अपक्राम अपसर । यमसादनं यमसदनम् । यमः सादयति शिक्षयति यत्र तत्स्थलमिति वा ॥ ४ ॥

एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं गजम् ।
चोदयामास कृष्णाय कालान्तकयमोपमम् ॥ ५ ॥

सत्यधर्मीया — एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं कालान्तकयमोपमं कालेन क्लृप्तेनान्तकेन रुद्रेण । सोऽन्तकः स रुद्र इत्यादेः । यमेन चोपमा यस्य । कालान्तको यो यमस्तेनोपमा यस्य सः । कृष्णाय चोदयामास प्रेरयामास ॥ ५ ॥

सुमनोरञ्जनी — कालो मृत्युः,अन्तको रुद्रः,यमश्च तेषामुपमा सादृश्यं यस्य तम् ॥ ५ ॥

करीन्द्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत् ।
कराद् विगलितः सोऽमुं निहत्याङ्घ्रिष्वलीयत ॥ ६ ॥

सत्यधर्मीया — करेण शुण्डया। कराद्विगलितः स कृष्णोऽमुं निहत्याङ्घ्रिष्वलीयत लीनोऽभूत् ॥६॥

सुमनोरञ्जनी — करीन्द्रस्तं कृष्णम् । अभिद्रुत्य अभिमुखम् आगत्य । करेण शुण्डादण्डेन । सः कृष्णः करात् विगलितः च्युतः । अमुं गजं करेण निहत्य ताडयित्वा । अङ्घ्रिषु तत्पादेषु । अलीयत लीनोऽभूत् ॥ ६ ॥

संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम् ।
परामृशत् पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥

सत्यधर्मीया — सङ्क्रुद्धो, घ्राणेन पूर्वमवघ्राणनेनान्तरं पदार्थस्य दृष्टिर्दर्शनं यस्य स तथा, तं केशवमचक्षाणोऽपश्यन्पुष्करेण स्वकरेण । अष्टमे गतम् । परामृशत्पस्पर्श । स कृष्णः प्रसह्य बलान्निर्गतो बहिः ॥ ७ ॥

सुमनोरञ्जनी — स गजः । तं कृष्णम् । अचक्षाणः अपश्यन्सन् संक्रुद्धः । घ्राणेन अवघ्राणेन दृष्टिः ज्ञानं यस्य सः । केशवं प्रसह्य बलात् । पुष्करेण शुण्डाग्रेण परामृशत् जग्राह । स कृष्णः प्रसह्य बलादेव विनिर्ययौ शुण्डाग्राद्विनिर्गतः ॥ ७ ॥

पुच्छे प्रगृह्यातिबलं धनुषः पञ्चविंशतिम् ।
विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥

सत्यधर्मीया — अतिबलं तं गजं पुच्छे प्रगृह्य धनुषः पञ्चविंशतिं पञ्चविंशति यावत्तावन्तं देशं यथा सम्यग्विचकर्ष सुपर्णो गरुडो लीलया नागं सर्पमिव ॥ ८ ॥

सुमनोरञ्जनी — अति बलं यस्य तं गजम् । पुच्छे पुच्छदेशे प्रगृह्य । धनुषः पञ्चविंशतिर्यस्मिन् तावंतं देशं पञ्चविंशतिधुनुःपरिमितं देशमित्यर्थः । तत्र दृष्टान्तो यथेति । नागं सर्पं सुपर्ण इव । सुपर्णो नागं यथेति, कृष्यमाणत्वेन गजे नागसादृश्यम्, कर्षकत्वेन कृष्णे सुपर्णसादृश्यं च बोधयितुं सादृश्यार्थकं यथेवेति पदद्वयम् । यद्वा ना अगमिति पदच्छेदः नागमिति च । सुपर्णो नागं यथा विचकर्षति तथा अगमिव पर्वतमिव स्थितं गजम् । ना परमपुरुषः कृष्णो विचकर्षेति सम्बन्धः ॥८॥

स पर्यावर्तमानेन सव्यदक्षिणतोऽच्युतः ।
बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥

सत्यधर्मीया — सव्यदक्षिणतः पार्श्वद्वयेन पर्यावर्तमानेन सह भ्राम्यमाणेन गोवत्सेन बालक इव बभ्राम ॥ ९ ॥

सुमनोरञ्जनी — सव्यदक्षिणतः सव्यतो दक्षिणतश्च कृष्णं गृहीतुं पर्यावर्तमानेन भ्रमता गजेन सह अच्युतः स्वयमपि बभ्राम । बालको भ्राम्यमाणेन गोवत्सेनेव ॥ ९ ॥

ततोऽभिमुखमभ्येत्य पाणिनाऽऽहत्य वारणम् ।
प्राद्रवन् यापयामास स्पृश्यमानः पदे पदे ॥ १० ॥

सत्यधर्मीया — ततोऽभिमुखं करिमुखं करिपुरोभागमभ्येत्य वारणं पाणिनाऽऽहत्य प्राद्रवद्दुद्राव । पदे पदे स्पृश्यमान इति धरिष्यामीत इममित्याशां जनयिष्यंस्तं पृष्ठतो यापयामास गमयामास ॥ १० ॥

सुमनोरञ्जनी — ततः श्रीकृष्णः गजस्य अभिमुखम् । एत्य वारणं गजं पाणिनाऽऽहत्य सन्ताड्य स्वयं प्राद्रवत् । ततः पदेपदे तं स्पृशन् यापयामास स्वपृष्टतः आगमयामास ॥ १० ॥

स धावन् क्रीडया भूमौ पतित्वा सहसोत्थितः ।
तं मत्वा पतितं क्रुद्धो दन्ताभ्यां सोऽहनत् क्षितिम् ॥ ११ ॥

सत्यधर्मीया — स कृष्णो धावन्क्रीडया पतित्वा सहसोत्थितस्तं कृष्णं पतितं मत्वा क्रुद्धो गजो दन्ताभ्यां क्षितिमहनदहन् । अस्मन्नाशायेशं सम्प्रार्थ्यानीतवती त्वमस्मन्मूलपुरुषोद्धूतापीत्यनीतिमतीति क्षितिक्षतिमकृत करीत्युत्प्रेक्षयन्ति प्रेक्षावन्तः ॥ ११ ॥

सुमनोरञ्जनी — धावन् स कृष्णः क्रीडया भूमौ पतित्वा । सहसा अतिशीघ्रम् उत्थितः । गजस्य वञ्चनार्थं स्वेच्छयैवोत्थित इति यावत् । स गजोऽपि कृष्णमुत्थितम्, अजानन् पतितं मत्वा दंताभ्यां क्षितिम् अहनत् न तु कृष्णम् ॥ ११ ॥

स्वविक्रमे प्रतिहते कुञ्जरेन्द्रोऽत्यमर्षितः ।
चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद् रुषा ॥ १२ ॥

सत्यधर्मीया — कुञ्जरेन्द्रः स्वविक्रमे प्रतिहते नष्टे सति स्वयमत्यमर्षितोऽत्यसहिष्णुः सन् माहामात्रैरम्बष्ठश्रेष्ठैश्चोद्यमानो रुषा कृष्णमभ्यद्रवत् ॥ १२ ॥

सुमनोरञ्जनी — प्रतिहते व्यर्थे । महामात्रैः हस्तिपकैः ॥ १२ ॥

तमापतन्तमासाद्य भगवान् मधुसूदनः ।
प्रगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥

सत्यधर्मीया — तं स्वोपर्यापतन्तमासाद्य पूर्वमेव स्वयं प्राप्य पाणिना हस्तं प्रगृह्य भूतले पातयामास । कुवलयस्यापीडा येन स इति नामान्वर्थं व्यतानीत् ॥ १३ ॥

सुमनोरञ्जनी — हस्तं शुण्डादण्डम् ॥ १३ ॥

पतितस्य पदाऽऽक्रम्य मृगेन्द्र इव लीलया ।
दन्तमुत्पाट्य तेनेमं हस्तिपांश्चाहनद् हरिः ॥ १४ ॥

सत्यधर्मीया — पतितस्य गजस्य पदाऽऽक्रम्य मृगेन्द्र इव सिंह इव लीलया दन्तं तद्युगं विषाणयुग्ममुत्कृष्येत्याचार्योक्तेरुत्पाट्योत्कृत्य तेन दन्तेनैव हरिर्हस्तिपानहन् ॥ १४ ॥

सुमनोरञ्जनी — पतितस्य तस्य दन्तमुत्पाट्य तेनैव दन्तैनैव हस्तिपानहनत् ॥ १४ ॥

मृतकं द्विपमुत्सृज्य दन्तपाणी विरेजतुः ।
अंसन्यस्तविषाणासृङ्मदबिन्दुभिरङ्कितौ ।
विरूढस्वेदकणिकवदनाम्बुरुहावुभौ ॥ १५ ॥

सत्यधर्मीया — मृतकं द्विपमुत्सृज्य दन्तपाणी उभौ विरेजतुः । अंसयोः स्कन्धयोर्न्यस्ते विषाणे दन्तौ तयोरसृग्रक्तं च मदो दानोदकं तयोर्बिन्दुभिरङ्किताविति निरङ्कः पाठः । बिन्दुभिरञ्जिताविति पाठे बिन्दुभिरञ्जितौ अक्तावित्यर्थः । विरूढा व्याप्य स्थिताः स्वेदस्य कणिकाबिन्दवो यस्मिंस्तद्वदनाम्बुरुहं ययोस्तौ ॥ १५ ॥

वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ ।
रङ्गं विविशतू राजन् गजदन्तवरायुधौ ॥ १६ ॥

सत्यधर्मीया — गजदन्तावेव वरे आयुधे ययोस्ते ॥ १६ ॥

सुमनोरञ्जनी — द्विपं गजम् । दन्तौ गजदन्तौ पाण्योर्ययोस्तौ । अंसयोर्न्यस्तौ विषाणौ गजदन्तौ याभ्याम् तौ च तौ, असृजो रक्तस्य मदस्य मदजलस्य च बिन्दुभिः अञ्जितौ लिप्तौ च । विरूढाः उद्गताः स्वेदकणिकाः स्वेदबिन्दवो ययोस्तादृशे वदनाम्बुरुहे ययोस्तौ । बलदेवजनार्दनौ रामकृष्णौ गजदन्तवरायुधौ भूत्वा । रङ्गं मल्लरङ्गं विविशतुरिति सम्बन्धः ॥ १५,१६ ॥

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभृतां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विधातृविहितस्तत्त्वं परं योगिनां
वृष्णीनां च पतिः सदैव शुशुभे रङ्गेऽच्युतः साग्रजः ॥ १७ ॥

सत्यधर्मीया — कौतुक एतत्तुल इति कौतुकतोऽवलोककलोकानामेवं देवः सतामसतां च रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा । भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिक इत्युक्त-नवरसरुचिरोऽभादिति भाषते ॥ मल्लानामिति । मल्लानां चाणूरप्रमुखानामशनिर्वज्रो वा निर्घातो वा तथा भासमानो ये मल्ला नाम तेषां शनिः शनैश्चरवद्भासमानः । मल्लानामशनिरित्येकं पदम् । मल्लेषु ये नामा अनम्रास्तेषां शनिरिति वा । वज्राशन्यादिकं शक्यं परिहर्तुं विनाराधनेन न न बाधा शने-र्गच्छेदिति शनिरिवेति वा । आशन्यादिरपि शन्यादिदुर्ग्रहहेतुकः । तथा प्रपञ्चितं पञ्चमे । तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्मासान्विलम्बमानः सर्वानेवानुपुर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकर इत्यादिना । नृणां नरवरः स्त्रीणां मूर्तिमान्स्वानङ्गतां त्यक्त्वाकारं भृत्वायातः स्मर इवायताक्षीणां गोपानां स्वजनो बन्धुरसतां क्षितिभृतां शास्ता । उणादेरनिट्कत्वात् । शासिता स्वपित्रोर्देवकीवसुदेवयोर्यशोदानन्दयोर्वा शिशुर्बालो भोजपतेः कंसस्य मृत्युर्विधातृविहितो ब्रह्मणा सम्प्रार्थ्याभिव्यक्तीकृतो योगिनां नारदादीनां सदैव परं तत्त्वं साक्षा-न्नारायणो वृष्णीनां च पतिः प्रभुः साग्रजोऽच्युतो रङ्गे शुशुभेऽशोभत ॥ १७ ॥

सुमनोरञ्जनी — भगवान् सर्वभूतसमोऽपि त्रिविधेषु जनेषु तत्तद्योग्यतानुसारेण फलप्राप्तये तत्तदुपासनानुसारेण तेषां तेषां तथा तथा बुद्ध इत्याह । मल्लानामिति ॥ मल्लादीनाम् अशन्यादि-रिवावभातः सन् । साग्रजोऽच्युतः रङ्गे शुशुभ इत्यन्वयः । अशनिः अशनिवदवभासमानः । एवमुत्तरत्रापि । मल्लानामिति तमोयोग्यसङ्ग्राहकम् । नृणां मध्यमानां नरवरो राजा । अयं राजादि-वदस्मदपेक्षया उत्तम इति ज्ञातः । स्त्रीणामित्यादि भक्तोपसङ्ग्राहकम् । अनेन तेषां तेषां भक्ति-विशेषोऽपि सूचितः । कामाद्गोप्य इतिवत् । स्वजनः बन्धुः । भोजपतेः कंसस्य तदाविष्टभृगोः । विधात्रा ब्रह्मणा विहितः क्लृप्तो मृत्युः तद्वदवभासमानः । योगिनां ज्ञानिनां परं तत्वं स्वतन्त्रतत्वं ब्रह्म । पतिः पालकः । इत्येवमुपासना तेषां तेषां न कादाचित्कीत्याह ॥ सदैवेति । इदं चासुरावेश-वशात् ॥ १७ ॥

हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ।
कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥ १८ ॥

सत्यधर्मीया — मनस्यपि स्थिरः प्रशस्तचित्तोऽपि तदा भृशमुद्विविजे भीतोऽभूत् ॥ १८ ॥

सुमनोरञ्जनी — कुवलयापीडं हतं ज्ञात्वा । दुर्जयौ तौ रामकृष्णावपि दृष्ट्वा । मनस्व्यपि धीरोऽपि कंसः । भृशमत्यन्तम् । उद्विविजे भीतोऽभूत् ॥ १८ ॥

तौ रेजतू रङ्गगतौ महाभुजौ विचित्रवेषाभरणस्त्रगम्बरौ ।
यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षताम् ॥ १९ ॥

सत्यधर्मीया — निरीक्षतां निरीक्षमाणानां प्रभया मनः क्षिपन्तौ कर्षयन्तौ ॥ १९ ॥

सुमनोरञ्जनी — विचित्राणि वेषाभरणस्रगंबराणि ययोस्तौ । वेष आकृतिः । नटौ नर्तकौ । प्रभया स्वशरीरकान्त्या निरीक्षतां मनः क्षिपन्तौ आकर्षयन्तौ ॥ १९ ॥

निरीक्ष्य तावुत्तमपुरुषौ जना मञ्चस्थिता नागरराष्ट्रका नृप ।
प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम् ॥ २० ॥

सत्यधर्मीया — नागरा नगरागाराश्च राष्ट्रका जनपदस्थाश्च प्रहर्षवेगेन सन्तोषातिशयेनोत्कलितानि विकसितानीक्षणानि नयनानि तथाऽननानि येषां ते नयनैस्तदाननं न तृप्ता ययुस्तथाऽपि न तृप्ता इत्यन्वयो वा ॥ २० ॥

सुमनोरञ्जनी — मञ्चस्थिताः मञ्चोपविष्टाः । नागराः नगरवासिनः । राष्ट्रकाः देशवासिनोऽपि जनाः । प्रहर्षवेगेन आनन्दोद्रेकेण उत्कलितं विकसितं ईक्षणं नेत्रमाननञ्च येषां तादृशाः सन्तः, तदाननम्- तयोः रामकृष्णयोः आननम् । नयनैः पपुः अथापि न तृप्ता बभूवुः ॥ २० ॥

पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ।
जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः ॥ २१ ॥

सत्यधर्मीया — नासाभ्यां तत्पुटीभ्याम् ॥ २१ ॥

सुमनोरञ्जनी — लिहन्तः आस्वादनं कुर्वन्तः । श्लिष्यन्तः आलिङ्गनं कुर्वन्त इवावतस्थिरे इत्यर्थः ॥ २१ ॥

ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम् ।
तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥ २२ ॥

सत्यधर्मीया — तयो रूपं गुणा दृष्टं सौन्दर्यं रूपैः कान्त्यादयो बहिष्ठा गुणाः श्रुताश्चोत्तरत्र वक्ष्यमाणा माधुर्यं वाचि प्रागल्भ्यं धृष्णुता। एतैः स्मारिताः स्मृतिमन्तः कारित इव परस्परमूचुः ॥२२॥

सुमनोरञ्जनी — ते जनाः । तयोः रामकृष्णयोः रूपेण सौन्दर्येण, गुणैः गाम्भीर्यादिभिः माधुर्येण वाङ्माधुर्येण प्रागल्भ्यं गौरवम् । प्रागल्भ्यं गौरवे प्राप्ताविति शाश्वतः । तेन च स्मारिताः स्मृतिं प्रापिताः सन्तः यथाश्रुतं श्रुतमनतिक्रम्य । श्रीकृष्णचरितम् । यथा यथावस्थितत्वेन दृष्टमिव प्रत्यक्षतो दृष्टमिव परस्परमन्योन्यमूचुरिति योजना । प्रत्यक्षीकृतं वस्तु यथा वदन्ति तथा अवदन्निति भावः ॥ २२ ॥

एतौ भगवतः साक्षाद् हरेर्नारायणस्य हि ।
अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥

सत्यधर्मीया — साक्षान्नारायणस्यांशेनावतीर्णौ ॥ २३ ॥

सुमनोरञ्जनी — किमूचुरित्यतस्तेषां वाक्यान्याह ॥ एतावित्यादिना । साक्षात् मुख्यतः । भगवतः ॥ २३ ॥

स एष किल देवक्यां जातो नीतश्च गोकुलम् ।
कालमेतं वसन् गूढो ववृधे नन्दवेश्मनि ॥ २४ ॥

सत्यधर्मीया — नीतो वसुदेवेन । एतमेतावन्तं कालम् । नन्दवेश्मनि गूढस्सन्ववृधे ॥ २४ ॥

सुमनोरञ्जनी — यो देवक्यां जातः गोकुलं प्रति नीतश्च । स एष एव किल । एतं कालं एतावन्तं कालं एतावत्कालपर्यन्तमित्यर्थः । गूढः वसुदेवसूनुतया अज्ञातः ॥ २४ ॥

पूतनाऽनेन नीताऽन्तं चक्रवातश्च दानवः ।
अर्जुनौ धेनुकः केशी गुह्यकोऽन्ये च तद्विधाः ॥ २५ ॥

सत्यधर्मीया — अन्तं नाशम् । मेना सती सतीत्वं तं मोक्षं नीता गतम् । चक्रवातो दानवस्तृणावर्तासुरोऽर्जुनावन्तं नीतौ । धेन्वाः कं यस्यासौ धेनुको वत्सासुरः । यद्वा मुख्यो हन्ता कृष्ण एवेति धेनुकोक्तिः । उत्तरत्र तु बलो द्वारमिति धेनुकादय इत्युक्तिरिति न विरोधः । गुह्यकः शङ्खचूडस्तद्विधा अन्ये चान्तं नीता इति विपरिणतमन्वेति ॥ २५ ॥

सुमनोरञ्जनी — किलेति सर्वत्रानुवर्तते । पूतना अनेनैव अन्तं नाशं नीता प्रापिता । चक्रवातः

तद्रूपेणागतो दानवः अनेनैव अन्तं नीतः किलेति । अर्जुनौ यमलार्जुनौ । गुह्यकः शङ्खचूडः । अन्ये च तद्विधाः धेनुकादिसदृशाः व्योमबकादयः असुराः अन्तं नीताः किलेति योजना ॥ २५ ॥

गावः सपाला एतेन दावाग्नेः परिमोचिताः ।
कालियो दमितः सर्पः शक्रश्च विमदः कृतः ॥ २६ ॥

सत्यधर्मीया — सपालाः ससंरक्षकाः । विमदो हताहन्तः ॥ २६ ॥

सुमनोरञ्जनी — सपालाः गोपैः सहिताः । कालियः तदाख्यः सर्पः दमितः शिक्षितः । शक्रः इन्द्रः विमदः विगतमदः कृतः ॥ २६ ॥

सप्ताहमेकहस्तेन धृतोऽद्रिप्रवरोऽमुना ।
वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥ २७ ॥

सत्यधर्मीया — सप्ताहं गतम् । वर्षवाताशनिभ्य इन्द्रमुक्तेभ्यः ॥ २७ ॥

सुमनोरञ्जनी — अद्रिप्रवरः गोवर्धनः । तेनैव कर्मणा वर्षादिभिर्गोकुलं परित्रातं संरक्षितम् ॥ २७ ॥

गोप्योऽस्य नित्यमुदितहसितप्रेक्षणं मुखम् ।
पश्यन्त्यो विविधांस्तापांस्तरन्ति स्म श्रमं मुदा । २८ ॥

सत्यधर्मीया — नित्यमुदिते हसितप्रेक्षणे यस्य तत् । नित्यमुदितं हसितेन सहितं प्रेक्षणं यस्य तन्मुखमिति वा स्वयं विविधांस्तापांस्तरन्ति स्मातरन् । श्रमं चातरन् ॥ २८ ॥

सुमनोरञ्जनी — नित्यम् अनारतम् । उदितं हसितं तेन आविर्भूतस्मितेन सहितं प्रेक्षणं यस्मिन् तन्मुखम् । नित्यमुदितं सदा सन्तुष्टं च तत् हसितप्रेक्षणं चेति वा । मुखं नित्यं सदा । मुदा सन्तोषेण पश्यन्त्यः विविधांस्तापान् श्रमञ्च तरन्ति स्म विगतश्रमा भवन्ति स्मेति यावत् ॥ २८ ॥

वदन्त्यनेन वंशोऽयं यदोः सुबहुविश्रुतः ।
श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः ॥ २९ ॥

सत्यधर्मीया — अनेन श्रीकृष्णेन परिरक्षितो यदोर्वंशः श्रियं यशो महत्त्वं पूज्यत्वं लप्स्यत इति वदन्ति सन्तः ॥ २९ ॥

सुमनोरञ्जनी — सुबहु विश्रुतः अतिख्यातः यदोर्वंशः अनेन परिरक्षितः । श्रियादिकं लप्स्यत इति वदन्ति नारदादयः ॥ २९ ॥

अयं चास्याग्रजः श्रीमान् रामः कमललोचनः ।
प्रलम्बो निहतो येन बहवो धेनुकादयः ॥ ३० ॥

सत्यधर्मीया — येन बहवो धेनुकादयश्च निहता इत्यन्वेति ॥ ३० ॥

सुमनोरञ्जनी — अयं श्रीकृष्णस्य पार्श्वे वर्तमानः ॥ ३० ॥

जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ।
कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥ ३१ ॥

सत्यधर्मीया — संसदि समासीनेषु जनेष्वेवं ब्रुवाणेषु सत्सु तूर्येषु निनदत्सु च कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥ ३१ ॥

सुमनोरञ्जनी — तूर्येषु वाद्येषु । समाभाष्य सम्बोध्य ॥ ३१ ॥

हे नन्दसूनो हे राम भवन्तौ वीर्यसम्मतौ ।
नियुद्धकुशलौ श्रुत्वा राज्ञाऽऽहूतौ दिदृक्षुणा ॥ ३२ ॥

सत्यधर्मीया — हे नन्दसूनो । अनेन तव पित्रा वसुदेवेनेतो नीतस्तत्र स्थापित इति निकृतिषु युष्मासु निकृतिमाचरतो मदीश्वरस्य नापराध इति मर्म ध्वन्यते । हे राम भवन्तौ वीर्यसम्मतौ वीर्येण पराक्रमेण सम्मतौ सुख्यातौ नियुद्धे द्वन्द्वयुद्धे कुशलौ शिक्षिताविति श्रुत्वा दिदृक्षुणा राज्ञाऽऽहूतौ ॥ ३२ ॥

सुमनोरञ्जनी — तदेवाह । हे नन्दसूनो! इति । वीर्येण पराक्रमेण संमतौ प्रख्यातौ । नियुद्धे बाहुयुद्धे कुशलौ निपुणाविति श्रुत्वा दिदृक्षुणा भवतोर्नियुद्धं द्रष्टुमिच्छता । राज्ञा भवन्तौ समाहूतौ ॥ ३२ ॥

प्रियं राज्ञः प्रकुर्वन्त्यः श्रेयो विन्दन्ति वै प्रजाः ।
मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥

सत्यधर्मीया — राज्ञः प्रियं कुर्वत्यः प्रजाः श्रेयो विन्दन्ति प्राप्नुवन्ति । मनसा कर्मणा वाचेति । त एतस्मादन्यथा चेद्विपरीतं श्रेयो न विन्दन्ति ॥ ३३ ॥

सुमनोरञ्जनी — वक्ष्यमाणनियुद्धकरणे हेत्वन्तरं चाह ॥ प्रियमिति । विपरीतं अप्रियम् । प्रकुर्वन्त्यः अतोऽन्यथा भवन्ति श्रियं लभन्त इति ॥ ३३ ॥

नित्यं प्रमुदिता गोपा वत्सपालास्तथा स्फुटम् ।
वनेषु मल्लयुद्धेन क्रीडन्तश्चारयन्ति गाः ॥ ३४ ॥

सत्यधर्मीया — अस्मन्नियुद्धसन्नद्धता युष्मद्राजेनेव युष्माभिः कथमवगतेत्यत आह ॥ नित्यं प्रमुदिता इति । मल्लयुद्धेन क्रीडन्तो गाश्चारयन्ति स्वभावस्तेषामित्येवमूहयाम इति भावः ॥ ३४ ॥

सुमनोरञ्जनी — वयं गोपाः अत एवानभ्यस्तविद्याः कथं नियुद्धनिपुणाः स्मेत्यत आह ॥ नित्येति ॥ ३४ ॥

तस्माद् राज्ञः प्रियं यूयं वयं च करवामहे ।
भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ॥ ३५ ॥

सत्यधर्मीया — यस्मात्सर्वभूतमयो नृपो भूतानि नः प्रसीदन्ति तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे ॥ ३५ ॥

सुमनोरञ्जनी — तस्मात् नियुद्धकुशलत्वात्तु । राजप्रियकरणे श्रेयः प्राप्तेश्च । राज्ञः कंसस्य प्रियं मल्लयुद्धं यूयं वयं च मिलित्वा करवामहे कुर्मः । न केवलं राज्ञः प्रीतिः यतो नृपः सर्वभूतमयः सर्वभूतप्रधानः । अतस्तत्प्रसत्या भूतान्यपि प्रसीदन्ति ॥ ३५ ॥

तन्निशम्याब्रवीत् कृष्णो देशकालोचितं वचः ।
नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनन्द्य च ॥ ३६ ॥

सत्यधर्मीया — नियुद्धमात्मन इष्टं मन्यमानोऽभिनन्द्य मनसाऽनुमोद्य तद्वचनं निशम्य देशकालोचितं वचोऽब्रवीत् ॥ ३६ ॥

सुमनोरञ्जनी — नियुद्धम् आत्मनोऽभीष्टं मन्यमानः कृष्णः अभिनन्द्य श्लाघयित्वा ॥ ३६ ॥

श्रीभगवानुवाच—

प्रजा भोजपतेर्यूयं वयं चापि वनेचराः ।
करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥

सत्यधर्मीया — भोजपतेः प्रजा यूयं वयं चेति सत्यमुक्तं तस्य प्रियमतो नित्यं करवाम तत्तेन नः परमनुग्रहो राजप्रसादः सम्पादितप्रायो भवेत् । भगवदन्तरङ्गिको भावस्तु तत्तस्माद्युद्धकरणात्परस्यारेः कंसस्य मनुर्मन्त्र आलोचनं तस्य ग्रहो निग्रहो ज्ञानं वा भवति ॥ ३७ ॥

सुमनोरञ्जनी — यूयं भोजपतेः प्रजाः पुत्रवद्धियमानाः । वयं तु वनेचराः । अपि तथापि । तस्य प्रियं करवाम । तत् तेन अनुग्रह एव भवेत् ॥ ३७ ॥

बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ।
भवेन्नियुद्धं माऽधर्मः स्पृशेन्मल्ल सभासदः ॥ ३८ ॥

सत्यधर्मीया — तथाऽपि बालबलवद्युद्धमनुमन्तृराज्ञो बालिशता तथा सभासदामधर्मश्च तदनुवर्तिनां स्यादिति वदति ॥ बाला इति । वयं तुल्यबलैस्तुल्यं बलं येषां ते तैर्यथोचितं यथायोग्यं क्रीडिष्यामो नियुद्धं च तादृशैर्भवेत् । हे मल्ल सभासदोऽधर्मो मा स्पृशेन्न स्पृशतु ॥ ३८ ॥

सुमनोरञ्जनी — परन्तु वयं बालाः अतस्तुल्यबलैः मल्लैः क्रीडिष्यामः एवं चेन्नियुद्धं यथोचितं भवेत् । तेन च मल्लसभासदः सभानायकान् अधर्मः मा स्पृशेत् न स्पृशेत् । नो चेदधर्मो भवेदिति भावः ॥ ३८ ॥

चाणूर उवाच—

न बालो न किशोरस्त्वं बलश्च बलिनां वरः ।
लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥

सत्यधर्मीया — चाणूर आरादागतमृतिरिति परिहरति ॥ नेति । त्वं बालोऽपि न किशोरोऽपि न त्वं बलिनां वरो बलोऽपि तथैव । बलिबलीयस्त्वं मम त्वया कथं निरणायीत्यत इत इत्याह ॥ लीलयेति । सहस्रद्विपानां सत्त्वं बलं बिभर्ति स तथा । इभो लीलया येन हत इति बलिनां वरो हस्तैर्मुखैरम्बष्ठैः सहितः सहस्रः सत्त्वभृच्चासौ द्विपश्च द्विपसत्त्वभृत् । परनिपातः । स चासौ रायेति(?) वा ॥ ३९ ॥

सुमनोरञ्जनी — बलश्च बलरामोऽपि सहस्रसंख्यानां द्विपानां गजानां सत्वं बलं बिभर्तीति तथाविध इभः येन त्वया लीलयैव हतः स त्वं न बालः ॥ ३९ ॥

तस्माद् भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै ।
मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥

सत्यधर्मीया — तस्माद्भवद्भ्यां बलिभिः सहैव योद्धव्यमत्रानयोऽन्यायो न न विद्यते । वार्ष्णेय कृष्ण त्वं मयि विक्रम विक्रमस्व मुष्टिको बलेन सह विक्रमं करोतु ॥ ४० ॥

सुमनोरञ्जनी — तस्माद्भवद्भ्यां सह । बलिभिरस्मदादिभिरेव । योद्धव्यम् । अत्र अस्मिन्विषये अनयः अन्यायः नास्ति । तस्मात् त्वं मयि । विक्रम पराक्रमं कुरु । मुष्टिको बलेन सह विक्रमतु ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे एकचत्वारिंशोऽध्यायः ॥

॥ अथ द्विचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

एवं चिन्तितसङ्कल्पो भगवान् मधुसूदनः ।
आससाद ह चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥

सत्यधर्मीया — चिन्तितस्य स्वमनआलोचितस्य सङ्कल्पः सङ्क्लृप्तिः सिद्धिरिति यावत् यस्य स चिन्तितं चाणूरमरणं कल्पयति समर्थयतीति स तथा वा । हेत्यवधारणे ॥ १ ॥

सुमनोरञ्जनी — चाणूरकंसवधादिलक्षणमाहात्म्यं निरूपयत्यस्मिन्नध्याये । एवं प्रकारेण चिन्तितः विचारपूर्वकं निश्चितः सङ्कल्पः कंसादिमनोरथो येन सः । कंसादिमनोरथं ज्ञात्वेति यावत् । आससाद प्राप्तवान् ॥ १ ॥

आस्फोट्य हस्तौ हस्ताभ्यामूरू चैव परस्परम् ।
विसृज्य भूयः सङ्गम्य परिक्रम्य परस्परम् ॥
हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ।
विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥

सत्यधर्मीया — हस्तौ हस्ताभ्यामास्फोट्योरू ऊरूभ्यां चास्फोट्य पुनः पुनर्हस्तादि द्वयान्वयि । विसृज्य त्यक्त्वा भूयः सङ्गम्य परस्परं परिक्रम्य हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यां पादयोर्बद्ध्वा प्रसह्य बलाद्विजिगीषया जेतुमिच्छयाऽन्योन्यं विचकर्षतुः ॥ २ ॥

सुमनोरञ्जनी — मल्लयुद्धप्रकारमाह । आस्फोट्येति ॥ हस्तौ स्वबाहू । हस्ताभ्यां करतलाभ्याम् । आस्फोट्य ऊरू च आस्फोट्य । सङ्गम्य परस्परं सङ्गतौ भूत्वा । पुनः विसृज्य,परस्परमन्योन्यं परिक्रम्य प्रदक्षिणाकारं चरित्वा । प्रत्ययुध्यतामित्युत्तरेणान्वयः । बध्वा वेष्टयित्वा । प्रसह्य बलात् । अरत्नी मुष्टी । विक्षेपः दूरतः क्षेपणम् । परिरम्भः बाहुभ्यां पीडनम् । अवपातनं भूमौ पातनं तैः । उपसर्पणं परस्परसमीपगमनम् । अपसर्पणं पुनः पश्चाद्गमनम् । एतैश्च चेष्टितैः प्रत्ययुध्यताम् ॥२-४॥

अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ।
शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ॥ ३ ॥

सत्यधर्मीया — अरत्नी । अरत्निः कफणौ हस्ते स प्रकोष्ठतताङ्गुलाविति विश्वः । विहाय

कनिष्ठाङ्गुलिं कृतमुष्टिः करोऽरत्निरित्यर्थः । जानुभ्यां जानुनी च शीर्ष्णा च शिर उरसोरश्चाभ्यो-न्यमभिजघ्नतुः ॥ ३ ॥

परिभ्रामणविक्षेपपरिरम्भावपातनैः ।
उत्सर्पणापसर्पैश्चाप्यन्योन्यं प्रत्ययुध्यतम् ॥ ४ ॥

सत्यधर्मीया — परिभ्रामणं चक्रवत्, विक्षेपो दूरत उत्प्लवनं, परिरम्भ आश्लेषोऽवपातनमधः पातनमुत्सर्पणं पुरतोऽतर्कितः पातोऽपसर्पैस्तथैव पश्चाद्गमनैर्मल्लयुद्धरीतिरियम् ॥ ४ ॥

उत्थापनैरुन्नमनैश्चालनैः स्थापनैरपि ।
परस्परं जिगीषन्तावन्योन्यमभिचक्रतुः ॥ ५ ॥

सत्यधर्मीया — उत्थापनैरुन्नमनैरुत्तानीकरणैश्चालनैः पुनः स्थापनैः परस्परं जिगीषन्तावभि-चक्रतुः ।

मल्लयुद्धं नियुद्धज्ञा विंशद्भेदं प्रचक्षते ।
द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं तथा ॥

इति सङ्ग्रामविजयवचनात्तद्भेदोऽध्यवसेयः ॥ ५ ॥

सुमनोरञ्जनी — उत्थापनं अधोमुखं पतितस्य पुनरुत्तानीकरणम् । उन्नमनं हस्तपादौ गृहीत्वा शिरःपर्यन्तमुद्धरणम् । चालनं कण्ठादिलग्नस्य निःसारणम् । स्थापनम् उन्नीतस्य भूमौ प्रक्षेपः । एतैः अभिचक्रतुः नियुद्धं कृतवन्तौ । अपचक्रतुरित्यपि पठन्ति अपकारं चक्रुतुरित्यन्वयः ॥ ५ ॥

तद् बालबलवद्युद्धं समेताः सर्वयोषितः ।
ऊचुः परस्परं प्रेक्ष्य सानुकम्पा वरूथशः ॥ ६ ॥

सत्यधर्मीया — बालस्य कृष्णस्य बलवतश्चाणूरस्येत्येतयोर्युद्धं समेता उत्सवावलोकनमिलिता योषितः सानुकम्पाः सघृणा वरूथशः सङ्घशः परस्परमूचुः ॥ ६ ॥

सुमनोरञ्जनी — बालयोः कृष्णरामयोः । बलवद्भ्यां तरुणाभ्यां चाणूरमुष्टिकाभ्यां युद्धं प्रेक्ष्य । वरूथशः सङ्घशः समेताः मिलिताः ॥ ६ ॥

महानयं बताधर्म एषां राजसभासदाम् ।
ये बालबलवद्युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ॥ ७ ॥

सत्यधर्मीया — राज्ञः पश्यतः सतः । अनेन स त्वधर्मिष्ठ इत्यारेभ इति ध्वनयति । ये बालबलवद्युद्धमन्विच्छन्ति एषां तेषां राजसभासदामयं महानधर्मो बत खेदे ॥ ७ ॥

सुमनोरञ्जनी — किमित्यूचुरिति तत्राह ॥ महानिति । राजसभासदां राज्ञः सभानायकानां, राजा च सभासदश्च तेषामिति वा । अयं महानधर्मः । बत खेदे । कोऽयमधर्मः? ये सभासदः राज्ञः पश्यतः सतः ये बालयोः बलवद्भ्यां युद्धमन्विच्छन्ति अनुमन्यन्ते । स एवेति ॥ ७ ॥

क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ।
क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥ ८ ॥

सत्यधर्मीया — अबलास्तद्बलवत्तामिवैतदबलवत्तां च विशदयन्ति ॥ क्वेति । वज्रवत्साराणि स्थिरांशोपेतानि सर्वाण्यङ्गानि ययोस्तौ । शैलेन्द्रसन्निभौ मल्लौ क्व । अतिसुकुमाराङ्गौ किशोरौ यथाऽनाप्तयौवनौ । नसमासो वा । नाप्तयौवनाविति पदे वेति ज्ञेयम् ॥ ८ ॥

सुमनोरञ्जनी — कुतोऽधर्म इत्यत आह ॥ क्वेति । वज्रवत् साराणि कठिनानि सर्वाणि अङ्गानि ययोस्तौ । नाप्तयौवनौ अप्राप्तयौवनौ ॥ ८ ॥

धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ।
यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥

सत्यधर्मीया — समाजस्य सभ्यसमूहस्य ध्रुवं भवेत् । भवतु तेषामधर्मो युष्माकं किमित्यत आहुः ॥ यत्रेति । यत्राधर्मः समुत्तिष्ठेत्तत्र कर्हिचित्केनचिदपि न स्थेयं यत्राधर्मस्तत्र कोऽपि समुन्मुदा सहितो न तिष्ठेदिति वा । इतरदुक्तार्थः ॥ ९ ॥

सुमनोरञ्जनी — समाजस्य सभ्यसमूहस्य । धर्मव्यतिकरः धर्मोल्लङ्घनं भवेत् । कुतः । यत्र यस्यां सभायाम् । अधर्म उत्तिष्ठेत् अभिवर्धते तत्र न स्थेयम् । एते त्वत्रैव स्थिता अत इति ॥ ९ ॥

न सभां प्रविशेत् प्राज्ञः सभ्यदोषाननुस्मरन् ।
अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥

सत्यधर्मीया — अर्थतो मन्वादिसम्मतिमेतदर्थे दर्शयति ॥ नेति । सभ्यदोषाननुस्मरन्प्राज्ञस्तां सभां न प्रविशेत् । अब्रुवन्किमप्यवदन्विब्रुवन्विरीतं ब्रुवन् । अतोऽज्ञवन्नरः । किल्बिषं पापमश्नुते प्राप्नोति ॥ १० ॥

सुमनोरञ्जनी — अत एव यः प्राज्ञः प्रेक्षावान् स सभ्यानां दोषाननुस्मरन् सभां न प्रविशेत् । कुत इत्यतो विपक्षे बाधकमाह ॥ अब्रुवन्निति । नरः अज्ञः सभ्यदोषस्मरणहीनः सन्सभां प्रविशेच्चेत् तदा अब्रुवन् ज्ञात्वापि धर्माधर्ममकथयन् । विब्रुवन् विपरीतं ब्रुवन् । किल्बिषं पापम् । अश्नुते प्राप्नोति ॥ १० ॥

वल्गतः शत्रुमभितः कृष्णस्य वदनाम्बुजम् ।
वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवाम्बुभिः ॥ ११ ॥

सत्यधर्मीया — शत्रुम्, अत्र विरोधमात्रवाची शत्रुशब्दः । अभितः परितः । अभितः परित इति तद्योगे द्वितीया । वल्गतो भ्रमतः कृष्णस्य । श्रमवारिभिः श्रमजनितस्वेदोदबिन्दुभिः, पद्मकोशं कमलकोरकमम्बुभिरुदकैरिवोप्तं व्याप्तं वीक्ष्यतां सख्यो भवद्भिः ॥ ११ ॥

सुमनोरञ्जनी — शत्रुमभितः शत्रुं परितः । वल्गतः सञ्चरतः । श्रमवारिभिः स्वेदबिन्दुभिः उप्तं युक्तम् । वीक्ष्यताम् अवलोक्यताम् । पद्मकोशं कमलकुड्मलम् ॥ ११ ॥

किं न पश्यत रामस्य मुखमाताम्रलोचनम् ।
मुष्टिकं प्रति सामर्षहाससंरम्भशोभनम् ॥ १२ ॥

सत्यधर्मीया — आताम्रे समुद्रिक्तरक्तवर्णे लोचने यस्य तत् । अमर्षेण सहितो यो हाससंरम्भः कोपाटोपस्तेन च शोभनं मनोहरं रामस्य मुखं सख्यः किं न पश्यतेत्यन्वयः ॥ १२ ॥

सुमनोरञ्जनी — रामस्य मुखं न पश्यत किं ? कीदृशम् । आताम्रे ईषत्ताम्रे लोचने यस्मिन् तत् । मुष्टिकं प्रति तदुद्देशेन । सामर्षः अमर्षेण रोषेण सहितः यो हासः तेन संरंभेण च शोभनं चारुतरम् ॥१२॥

पुण्या बत व्रजभुवो यदयं नृलिङ्गगूढः पुराणपुरुषो वनचित्रमाल्यः ।
गाश्चारयन् सहबलः क्वणयंश्च वेणुं विक्रीडयाऽञ्चति गिरावमरार्चिताङ्घ्रिः ॥१३॥

सत्यधर्मीया — वनितास्ता एवमलवं लवल्लव्योऽनयन्निति धन्या इति श्रुततत्कथाऽनुवदन्त्य आदौ मेदिन्यादिमहिमामाहुः ॥ पुण्या इति । व्रजभुवो गोकुलभूमयो धन्या गतम् । तत्र निमित्तमाहुः ॥ यदिति । नृलिङ्गगूढो नृणां लिङ्गानि लक्षणानि तैर्गूढश्छन्नोऽप्रकाशितलक्षणोऽयं साक्षान्नारायणात्मा वनचित्रमाल्यः सहबलो वेणुं क्वणयंश्च यासु भूषु विक्रीड्य स्वलीलयाऽञ्चति गच्छति तथा गिरौ पर्वते चेति त एते धन्याः । किं तन्महत्त्वमित्यत आहुः ॥ अमरैर्देवैरर्चितावङ्घ्री यस्य सोऽपीति । बताश्चर्यम् । अयं तच्छुभदैवं निमित्तीकृत्यैवाञ्चतीति वा । वनचित्रमाल्य इत्यत्र चित्रं वनमाल्यं यस्येति योग्यतयाऽन्वयः । गाश्चारयन्निति जातिस्वभावोक्तिः । वेदवाणीश्चारयंस्त्वविषये प्रवर्तयन्न-पीत्वन्तरार्थः । भुवः पुण्याः । किमधिकोक्त्या त्वं व्रजेत्येकामुद्दिश्य वदन्तीति वा ॥ १३ ॥

सुमनोरञ्जनी — व्रजभुवः व्रजभूमयः पुण्या पावनाः धन्या वा । कुतः । यत् यस्मात् । यत् यत्र व्रजभूमिषु गिरौ गोवर्धने । पुराणपुरुषोऽप्ययं कृष्णः नृणां मनुष्याणां लिङ्गेन देहेन गूढः च्छन्नः सन् । वनस्थानि चित्राणि नानाविधानि माल्यानि पुष्पाणि यस्य सः सहबलः गाश्चारयन् वेणुं च क्वणयन् वादयन् विक्रीडया लीलया । अञ्चति सञ्चरति । अतस्ता एव पुण्या इति । अमरैः देवैः अर्चिताङ्घ्रिः गिरित्ररमार्चिताङ्घ्रिरिति पाठे गिरित्रः शिवः रमा च ताभ्यामर्चिताङ्घ्रिरित्यर्थः ॥ १३ ॥

गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमथनोत्थमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ईश्वरस्य ॥ १४ ॥

सत्यधर्मीया — गोप्योऽऽभीरनार्यो यद्यतो लावण्यसारमथनोत्थं सौन्दर्यरसमथनेनोत्थमाविर्भूतम् । तर्हि केन कृतमित्यतः स्वापराधोपरोधं तन्वङ्ग्यस्तन्वन्ति ॥ अनन्यसिद्धमिति । सहजम् । अनेन सञ्चीय सौन्दर्यरसान्समग्रानमुं विधाता व्यधितेति मिथ्या । हे सख्यः सोत्प्रेक्षा न प्रेक्षापूर्वोक्तिरिति दध्वनुः । यशसः श्रियश्चैकान्तधाम मुख्याश्रयमीश्वरस्य रूपमनुसवाभिनवं तद्गतश्रीविवक्षया मुख्यम् । नवनवसु विशेषोपलम्भेत्यादेः । अमुख्यं चैतद्विवक्षयेति ज्ञेयम् । दृग्भिः पिबन्ति । ततः किमेतत्सम्पत्प्रापकं तपः पूर्वमाचरंश्चक्रुः ॥ १४ ॥

सुमनोरञ्जनी — गोप्योऽपि धन्या इत्याहुः ॥ गोप्य इति । गोप्यः किं तपः आचरन् स्म । कुतः । यत् यस्मात् ईश्वरस्य सर्वस्वामिनः अमुष्य कृष्णस्य लावण्यसारस्य लवणसमुद्रस्य मथनेनोत्थमाविर्भूतमिव स्थितम् । अत्युत्कृष्टलावण्योपेतमित्यर्थः । लावण्यसारमसमोर्ध्वमित्यपि पठन्ति । लावण्येन सारम् । असमोर्ध्वं न विद्यते सममूर्ध्वमधिकं च यस्मात्तत् इत्यर्थः । अनन्यसिद्धम्, अन्येन भूषणादिना सिद्धं प्रतीयमानं न भवतीति तथा । अन्येषामविद्यमानमिति वा । अन्यस्मात्प्रकृत्यादेर्जातं न भवतीत्यप्राकृतमित्यर्थः । अनन्याया रमादेव्या एव सिद्धं प्रतीतमिति वा । पुनः कीदृशम् । अनुसवं प्रतिक्षणम् । अभिनवं नूतनम् । अनुग्रहमन्तरेण दुरवापं श्रियो यशसः ऐश्वरस्येति पाठे ऐश्वर्यस्य च । एकान्तधाम नियतस्थानम् । एतादृशं रूपं सौन्दर्यमाकृतिं वा । दृग्भिः नेत्रांजलिभिः पिबन्ति पिबन्ति स्म । अत इति योजना ॥ १४ ॥

या दोहनेऽवहनने मथनोपजल्पप्रेङ्खेङ्खनार्भरुदितोक्षणमज्जनादौ ।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यः पुण्या व्रजस्त्रिय उरुक्रमचित्तयामाः ॥ १५ ॥

सत्यधर्मीया — या दोहने क्षीरक्षारणकालेऽवहनने व्रीह्याद्यकुट्टने मथनं दध्नः । उपलेपेति पाठे गन्धलेपनमुपलेपो गोमयतो गृहलेपनम् । उपजल्पेति जल्पने । उपजल्पः परस्परसंवादः । प्रेङ्खाया

डोलाया इङ्खनं तत इतश्चालनं बालानां तथाऽर्भाणामर्भकाणां रुदितं तत्समाधानमुक्षणमङ्गण-जलसेचनं मज्जनं स्नानं चेत्यादिर्यत्सर्वत्र कालो ग्राह्यः । तत्समयेऽनुरक्तधिय आसक्तमतयोऽश्रुकण्ठ्य आनन्दजलकलिलकण्ठ्य उरुक्रमे भगवति चित्तस्य यामो गमनं यासां ता उरुक्रमचित्तेनैव यामः कालो यासां ता इति वा । एनं गायन्तीति व्रजस्त्रियः पुण्यास्तद्धत्यः । आदिशब्देन तत्सर्ववृत्तयो ग्राह्याः । प्रेङ्खा डोला च गमनमिति वचनात् । प्रेङ्खा पर्यटने नृत्ये भवेदश्वगतावपीति विश्वात्प्रेङ्खा नटनमिङ्खनं गतिरिति वा । यादसा जलजन्तुना हने नन्दनयने तत्समये इति वा । उरुर्महान्क्रमः पादविक्षेपो द्रुतगमनमिति यावत् तस्मिंश्चित्तं येषां ते उरुक्रमचित्ता यामा यमसम्बन्धिनो दूता यासां ता उरु ता उरुक्रमचित्तयामा अत एव पुण्याः ॥ १५ ॥

सुमनोरञ्जनी — या दोहने गवां दोहने क्रियमाणे तत्समय इत्यर्थः । अवहनने व्रीह्यादीनां वितुषीभावार्थ(ख)कण्डने । मथने दधिमथनकाले । उपलेपे गोमयादिना देवमन्दिराद्युपलेपनसमये । प्रेंखोंखने दोलंदोलने । अर्भरुदिते बालरोदनसमये तत्समाधानसमय इति यावत् । उक्षणे अङ्गणसेचन समये मज्जनादौ च । अनुरक्तधियः । अत एवाश्रुकण्ठ्यः गद्गदकण्ठ्यः सत्यः एनं एनमेव गायन्ति । एवम् ऊरुक्रमे श्रीकृष्णे यच्चित्तं तेनैव गतः यामः कालो यासां ताः व्रजस्त्रियः पुण्याः पावनाः॥१५॥

प्रातर्व्रजाद् व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ।
निर्गत्य तूर्णमबलाः पथि भूरिपुण्याः पश्यन्ति सस्मितमुखं सदयावलोकम् ॥१६॥

सत्यधर्मीया — प्रातर्व्रजाद्व्रजतः सायं गोभिः समं चाद्व्रजतः क्वणयतोऽस्य वेणुं निशम्य चाबलास्तूर्णं सत्वरं निर्गत्य पथि मार्गे सस्मितं मुखं दयावलोकसहितं पश्यन्ति यास्ता भूरिपुण्याः । हे सदय स्वामिन् लोकमवेति भावगर्भं पश्यन्ति यास्ता इति वा सत्समीचीनमयावलोकम् । अये शुभावहे देवे सति । अवलोको यस्य तदिति वा ॥ १६ ॥

सुमनोरञ्जनी — याः अबलाः । प्रातःकाले व्रजात् गोष्ठात् । वनं प्रति । व्रजतः गच्छतः पुनः सायं गोभिः सममाविशतः प्रविशतश्च तदैव वेणुं क्वणयतः अस्य श्रीकृष्णस्य । वेणुं वेणुरवं निशम्य । तूर्णं गृहाद्बहिरागत्य पथि मार्गे । सस्मितं सदयावलोकं मुखम् । पश्यन्ति स्म । ता एव भूरिपुण्या इति ॥ १६ ॥

एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ।
शत्रुं हन्तुं मनश्चक्रे भगवान् भरतर्षभ ॥ १७ ॥

सत्यधर्मीया — एवं स्त्रीषु मधुरावधूषु भाषमाणांसु सतीषु योगेश्वरो हरिः शत्रुं चाणूरं हन्तुं

मनश्चक्रे । इयत्समयमाचरिता मया लीला तद्बलिष्ठतास्पष्टनार्थमिति द्योतयत्यनेन । चाणूरेण चिरं कालं क्रीडित्वा देवकीसुत इति हरिवंशोक्तेः ॥ १७ ॥

सुमनोरञ्जनी — योगेश्वरः स्वभावसिद्धैश्वर्यवान् । योगेषु उपायेषु स्वतन्त्र इति वा ॥ १७ ॥

तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ।
युयुधाते तथाऽऽन्योन्यं तथैव बलमुष्टिकौ ॥ १८ ॥

सत्यधर्मीया — तैस्तैर्नियुद्धविधिभिः । कृतप्रतिकृतैश्चित्रैर्बहुभिश्च सकण्टकैरित्यादिभिर्हरिवंशशंसितैः । अच्युतश्चेतरश्चाणूरश्च । तैस्तथा मल्लरीत्या युयुधाते तथा बलमुष्टिकावप्यन्योन्यं युयुधाते ॥ १८ ॥

सुमनोरञ्जनी — ततः किमभूदिति तत्राह ॥ तैरिति । यदा तदेत्युपस्कर्तव्यम् । नियुद्धस्य बाहुयुद्धस्य विधिभिः प्रकारैः । अच्युतः इतरश्चाणूरश्चेत्युभौ बलमुष्टिकौ च यथान्यायं यदा युयुधाते तदा वज्रस्य यो निष्पेषः घर्षणं तीव्रपातो वा । तद्वत् निष्ठुरैः क्रूरैरित्यर्थः । भगवतः श्रीकृष्णस्य गात्राणां हस्तादीनां निष्पातैः भज्यमानाङ्गः ग्लानिं निर्विण्णतामापेति योजना ॥ १८ ॥

भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥ १९ ॥

सत्यधर्मीया — वज्रनिष्पेषवन्निष्ठुरैस्ततोऽपि क्रूरैर्भगवद्गात्रनिष्पातैर्भज्यमानान्यङ्गान्यवयवानि यस्य स चाणूरो मुहुः पुनः पुनर्ग्लानिं हर्षापकर्षमवाप ॥ १९ ॥

स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ ।
भगवन्तं वासुदेवं क्रुद्धो वक्षस्यताडयत् ॥ २० ॥

सत्यधर्मीया — स तादृशोऽपि श्येनवद्वेगो यस्य स उत्पत्योभौ करौ मुष्टीकृत्य भगवन्तं वासुदेवम् । ननु हरिवंशे चाणूरमारणात्पूर्वं

न्यवादयन्त तूर्याणि कंसः सव्येन पाणिना ।
प्रतिषिद्धेषु तूर्येषु मृदङ्गादिषु तेन वै ।
दिवं गतान्यवाद्यन्त देवतूर्याण्यनेकशः ।
युद्ध्यमाने हृषीकेशे पुण्डरीकनिभेक्षणे ।
स्वयमेव प्रवाद्यन्त तूर्यघोषा अनेकशः ।

अन्तर्धानगता देवा विमानैः कामरूपिभिः ।
चेरुर्विद्याधरैस्सार्धं कृष्णस्य जयकाङ्क्षिणः ।
जयस्व कृष्ण चाणूरं दानवं मल्लरूपिणम् ।
इति सप्तर्षयः सर्वे ऊचुश्चैव नभोगताः ।
चाणूरेण चिरं कालं क्रीडित्वा देवकीसुतः ।
बलमाहरयामास कंसस्याभावदर्शिवान् ।
ततश्चचाल वसुधा मञ्चाश्चैव जुघूर्णिरे ।
मुकुटाच्चैव कंसस्य पपात मणिरुत्तमः ।

इत्यादिना तूर्यनिवारणावगतेरत्र तु चाणूरमारणानन्तरं तदुक्तिस्तु कथमिति चेन्न । तेषां तु मल्लीयत्वान्निवारणं तत्रोक्तमत्र स्वेषामिति तदैककठ्यसम्भवात् । यद्वक्ष्यति स्वतूर्याणीति प्रस्थानभेदेन देवतावाद्यवादनं मुन्यभिवादनपूर्वकं याचनं कंसशिरोमुकुटमणिपात इत्यादेरुक्तस्यात्रानुक्तिर्न दोषायैव । तत्रैतदाद्यनुक्तिरपीति । तत्रैतदत्र तदप्यनुसन्धेयमिति न विरोधः ॥ २० ॥

सुमनोरञ्जनी — सः, श्येनस्य वेग इव वेगो यस्य सः ॥ २० ॥

नाचलत् तत्प्रहारेण स्रजा हत इव द्विपः ।
बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन् हरिः ॥ २१ ॥
भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ।
विस्रस्ताकल्पकेशस्रगिन्द्रध्वज इवापतत् ॥ २२ ॥

सत्यधर्मीया — स्रजा मालया हतो द्विप इव तत्प्रहारेण चाणूरताडनेन नाच लन्न चचाल बाह्वोः स्वबाहुभ्याम् । अथवा तद्बाह्वोर्निगृह्य । न च द्वितीयया भवितव्यमेतत्पक्षेऽत एव शृङ्गे कर्णे वा गृहीत्वेति तत्त्वनिर्णयटिप्पणे शृङ्गे कर्णे इति द्वितीयाद्विवचनमित्युक्तिरिति वाच्यम् । सप्तम्या अप्यधिकरणबोधनद्वारा चाणूररूपमुख्यकर्मसमर्पकत्वस्य मध्याभाष्ये वृध्यान्हिके यथोगोज्ञाय कश्चिद्गां सक्थिनि कर्णे वा गृहीत्वोपादिशतीत्युक्तियुक्तत्वात्तदनावश्यकता ध्रौव्याद्युपपद्यते सप्तमी बहुशः । हरिर्भ्रामयंस्तरसा क्षीणजीवितं भूपृष्ठे पोथयामासापोथयत् । विस्रस्ता विगलिता आकल्पाः केशाः स्रजश्च यस्य स इन्द्रध्वज इवापतत् ॥ २१,२२ ॥

सुमनोरञ्जनी — तस्य चाणूरस्य प्रहारेण ताडनेन । स्रजा मालया हतस्ताडितो द्विप इव गज इव । नाचलत् न चचाल । बाहू निगृह्य दृढं गृहीत्वा ॥ क्षीणजीवितं क्षीणश्वासं गतप्राणमिति यावत् । भूपृष्ठे

भूतले। पोथयामास आस्फालयामास। स चाणूरः विस्रस्ता विस्रंसिताः विक्षिप्ता इत्यर्थः। आकल्पाः अलङ्काराः केशाः स्रजश्च यस्य सः। इन्द्रध्वजः पतितश्चेद्यथा तथा अपतत्॥ २१,२२॥

तथैव मुष्टिकः पूर्वं स्वमुष्ट्याऽभिहतेन वै।
बलभद्रेण बलिना तलेनाभिहतो भृशम्॥ २३॥

सत्यधर्मीया — पूर्वं स्वमुष्टिना मुष्ट्याऽभिहतेन ताडितेन। गोमणियष्टिपाटलिवस्तिशाल्पलित्रुटिमसिमरीचय इति लिङ्गानुशासनाद्विलिङ्गो मुष्टिशब्दः स्त्रीपुंसयोरित्यधिकृतेः। बलिना बलभद्रेणातलेन तलभिन्नेन तलसदृशेन मुष्टिनेत्यर्थः। भृशमभिहतस्तथा च मुष्टिः के यस्य स इति व्युत्पत्त्या तन्नामान्वर्थकतयामास बल इति तात्पर्यं ज्ञेयमिति सूचितं भवति। तद्वद्बलस्य दृढमुष्टिनिपिष्टमूर्धा भ्रष्टस्तदैव निपपात स मुष्टिकोऽपीत्याचार्योक्तेः॥ २३॥

सुमनोरञ्जनी — तथैव चाणूरवदेव। पूर्वं स्वमुष्ट्या अभिहतेन ताडितेन बलेन बलभद्रेण। स्वयं तलेन करतलेन ताडितः॥ २३॥

प्रवेपितः स रुधिरमुद्वमन् मुखतोऽर्दितः।
व्यसुः पपातोर्व्युपस्थे वाताहत इवाङ्घ्रिपः॥ २४॥

सत्यधर्मीया — प्रवेपितः कम्पमानो मुखतो रुधिरमुद्वमन्नुद्गिरन्। उद्वहन्निति पाठे प्रवाहयन्नित्यर्थः। विगता असवो यस्मात्स सन् उर्व्युपस्थे भूपृष्ठे वाताहतोऽङ्घ्रिपः पादप इव पपात॥२४॥

सुमनोरञ्जनी — पूर्वं बलभद्रः स्वयं ताडयित्वा अनन्तरं तेन ताडित इत्यर्थः। प्रवेपितः आत्तकम्पः। उर्व्युपस्थे भूपृष्ठे॥ २४॥

ततः कूटमनुप्राप्तं रामः प्रहरतांवरः।
अवधील्लीलया राजन् सावज्ञं वाममुष्टिना॥ २५॥

सत्यधर्मीया — कूटं तन्नामकं मल्लं लीलया मल्ललीलापदेशेन सावज्ञं सतिरस्कारं तमलक्षयित्वेति यावत् रामो वाममुष्टिनाऽवधीज्जघान। सद्बुद्धौ दुर्बुद्धिमेवं कुतः कृतवान्बल इत्यतोऽप्याह कूटं यथा तथा। अनुप्राप्तमिति क्रियाविशेषणमेतत्। कूटस्य मनुना मन्त्रेण प्राप्तमिति वा॥ २५॥

सुमनोरञ्जनी — कूटं तन्नामकं मल्लम्। सावज्ञं सहेलनम्॥ २५॥

तथैव हि शलः कृष्णपदापहतशीर्षकः।
द्विधा विदीर्णस्तोसलक उभावपि निपेततुः॥ २६॥

सत्यधर्मीया — शलस्तन्नामा । तोसलको गतम् ॥ २६ ॥

सुमनोरञ्जनी — शलस्तन्नामा । कृष्णस्य पदा पादेन अपहृतं मर्दितं शीर्षं यस्य सः तोसलकोऽपि द्विधा विदारितः । एवमुभावपि पतितौ ॥ २६ ॥

चाणूरे मुष्टिके कूटे शले तोसलके हते ।
शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २७ ॥

सत्यधर्मीया — प्राणपरीप्सवः ॥ २७ ॥

सुमनोरञ्जनी — प्राणपरीप्सवः प्राणान् परीप्सन्ति रक्षितुमिच्छन्तीति तथोक्ताः ॥ २७ ॥

गोपान् वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ।
वाद्यमानेषु तूर्येषु वल्गन्तौ रुतनूपुरौ ॥ २८ ॥

सत्यधर्मीया — अवध्यानेनैव वध्यानां प्रस्तुतं (तस्य) समाप्तत्वान्न तूर्ष्णीं स्थातव्यमिति वयस्यान्गोपानुपविष्टानाकृष्य तैः संसृज्य सङ्गम्य विजह्रतुः । तूर्येषु वाद्यमानेषु वल्गन्तौ स्वयं तथा नटन्तौ तत्तालतुलतया रुतनूपुरौ च ॥ २८ ॥

सुमनोरञ्जनी — तैः गोपैः संसृज्य संगम्य । विजह्रतुः मल्लक्रीडां चक्रतुः । रुतानि मञ्जुलस्वनानि नूपुराणि चरणाभरणानि ययोस्तौ । वल्गन्तौ नृत्यन्तौ ॥ २८ ॥

जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ।
ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति ॥ २९ ॥

सत्यधर्मीया — ऋतेकं सं तमसन्तं विना सर्वे जना रामकृष्णयोः कर्मणा विप्रमुख्याः साधवो मरीच्याद्याः साधु सम्यगिति जहृषुः ॥ २९ ॥

सुमनोरञ्जनी — प्रजहृषुः हर्षिताः बभूवुः । विप्रा एव मुख्याः येषां ते साधवः । साधु साध्वित्यवदन्निति शेषः ॥ २९ ॥

हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ।
न्यवारयत् स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३० ॥

सत्यधर्मीया — मल्लवर्येष्वत्रोक्तेषु । तथा हरिवंशादिषु-

संकर्षणस्तु सुचिरं योधयित्वा महाबलः ।
आन्ध्रं मल्लं महामल्लो मण्डलानि व्यदर्शयत् ।
मुष्टिनैकेन तेजस्वी साशनिस्तनयित्नुना ।
शिरस्यभ्यहनद्वीरो वज्रेणेव महागिरिम् ।
स निष्पतितमस्तिष्को विस्रस्तनयनाननः ।

पपात निहतस्तेन ततो नादो महानभूदित्युक्तान्ध्रादिषु । केषु विद्रुतेषु च । भोजराट् स्वतूर्याणि न्यवारयत्स्ववचःश्रवणार्थमिदं वाक्यं चोवाच ॥ ३० ॥

सुमनोरञ्जनी — भोजराट् कंसः । पञ्चसु हतेषु । इतरेषु विद्रुतेषु पलायितेषु सत्सु ॥ ३० ॥

निस्सारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ।
धनं हरत गोपानां नन्दं बध्नीत दुर्मतिम् ॥ ३१ ॥

सत्यधर्मीया — वसुदेवात्मजौ दुर्वृत्तौ पुरान्निःसारयत गोपानां धनं हरत दुर्मतिं नन्दं बध्नीत । इति विंशत्यक्षौहिणी सेनाः प्रति । यथोक्तमाचार्यैः । अक्षौहिणीगणितमस्य बलं च विंशदासीद-सह्यमुरुवीर्यमनन्यवध्यं शम्भोर्वरादपीति ॥ ३१ ॥

सुमनोरञ्जनी — पुरान्निःसारयत निष्कासयध्वम् ॥ ३१ ॥

वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ।
उग्रसेनः पिता चापि सानुगः परपक्षगः ॥ ३२ ॥

सत्यधर्मीया — दुर्मेधा वसुदेव आशु हन्यतामसत्तमो मम पिता परपक्षग उग्रसेनश्च हन्यताम् ॥३२॥

सुमनोरञ्जनी — पिता मत्पितापि उग्रसेनः । परपक्षगोप्ता । ततः आशु हन्यतामित्युवाचेति सम्बन्धः ॥ ३२ ॥

एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ।
लघिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ॥ ३३ ॥

सत्यधर्मीया — एवं निर्नामाव्यादीन्प्रति(?) कंसे कत्थमाने सत्यव्ययो निर्नाशो नन्दवसुदेवादि-व्यथां दृष्ट्वा । यथोक्तं हरिवंशे-

ये च सम्प्रेक्षका गोपा नन्दगोपपुरोगमाः ।

भयक्षोभितसर्वाङ्गाः सर्वे तत्रावतस्थिरे ।
हर्षजं वारि नेत्राभ्यां वर्तमाना प्रवेपती ।
प्रस्नवोत्पीडिता कृष्णं देवकी समुदैक्षत ।

वसुदेवो जरां त्यक्त्वा स्नेहेन तरुणायित इत्यादिना । लघिम्ना लाघवेन तरसोत्पत्य मञ्चमारुहत् ॥ ३३ ॥

सुमनोरञ्जनी — कंसे एवं विकत्थमाने प्रलपति सति । लघिम्ना लाघवेन । तरसा एकोत्पातेनैव ॥ ३३ ॥

तमाविशन्तमालोक्य मृत्युमात्मन आसनात् ।
मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥ ३४ ॥

सत्यधर्मीया — आत्मनो मृत्युं तद्रूपमापतन्तं कृष्णमालोक्यासनात्सहसोत्थाय मनस्वी स कंसोऽसिचर्मणी जगृहे ॥ ३४ ॥

सुमनोरञ्जनी — मनस्वी धीरः सहसा वेगेन । आसनादुत्थाय ॥ ३४ ॥

तं खड्गपाणिं विचरन्तमाशु श्येनं यथा दक्षिणसव्यमम्बरे ।
समग्रहीद् दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥ ३५ ॥
प्रगृह्य केशेषु चलत्किरीटं निपात्य रङ्गोपरि तुङ्गमञ्चात् ।
तस्योपरिष्टात् स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ॥ ३६ ॥

सत्यधर्मीया — अम्बरे दक्षिणसव्यम् । सर्वो द्वन्द्व इत्येकवद्भावे वोत्तरपदलोपे समासे वा बोध्यम् । विचरन्तं श्येनमिव विद्यमानं खङ्गपाणिमसिहस्तं दुर्विषहोग्रतेजा दुर्विषहमुग्रं वैरितीक्ष्णं तेजो वीर्यं यस्य स तार्क्ष्यसुतो गरुडः प्रसह्य बलादुरगं यथा केशेषु निगृह्य चलत्किरीटं मुकुटं यस्य तं तुङ्गमञ्चाद्रङ्गोपरि निपात्य तस्य कंसस्योपरि स्वयमब्जनाभः पपात । तनुतरतनुमतः पोतस्य पाते किं स्यादित्यत आह ॥ विश्वाश्रयो विश्वम्भर इति । तदसम्भावना पराकृत्या आत्मतन्त्र इति ॥३५,३६॥

सुमनोरञ्जनी — अम्बरे आकाशे । श्येनं यथा श्येनमिव । दक्षिणसव्यं दक्षिणभागे सव्यभागे च चरन्तम् । खड्गं पाणौ यस्य तं कंसम् । दुर्विषहम् अविषह्यम् । उग्रं तेजो यस्य सः श्रीकृष्णः तार्क्ष्यस्य कश्यपस्य सुतो गरुडः उरगमिव समग्रहीत् जग्राह ॥ तुङ्गमञ्चाद्रङ्गोपरि रङ्गभूपृष्ठे । कंसं निपात्य पातयित्वा । तस्य कंसस्योपरिष्टात् तदङ्गोपरीत्यर्थः । अनेन कंसस्य द्विजीवत्वाद-

सुरस्याधोगतिः । तदाविष्टभृगोः स्वपादरजसा पुनीतत्वं च सूचयामासेति । विश्वस्य सर्वजगतः आश्रयः । आत्मतन्त्रः स्वतन्त्रः ॥ ३५,३६ ॥

कंसोऽपि कृष्णेन जगत्त्रयैकनिवासभूतेन निपात्य सोऽधः ।
तेनात्मतन्त्रेण च पीडितोऽसुं तत्याज राजन् निमिषान्तरेण ॥ ३७ ॥

सत्यधर्मीया — तदेव विशदयति ॥ कंसोऽपीति । जगत्त्रयैकनिवासभूतेन कृष्णेनाधो निपात्यात्मतन्त्रेण च पीडितो निमिषान्तरेणासुं तत्याज । पुंसि भूम्न्यसवः प्राणा इति तु प्रायिकाभिप्रायम् । अयं श्लोकस्तु प्रक्षिप्त इति बहवः ॥ ३७ ॥

सुमनोरञ्जनी — जगत्त्रयस्यैकनिवासः मुख्याश्रयः तेन निपात्य निपीडित इत्यन्वयः ॥ ३७ ॥

कंसं परेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ।
हाहेतिशब्दः सुमहांस्तदाऽभूदुदीरितः सर्वजनैर्नरेन्द्र ॥ ३८ ॥

सत्यधर्मीया — परेतं कंसं विचकर्षेत्यस्योत्तरं कंसं परेतं विचकर्षतीत्यपि योजयन्ति । हरिः सिंह इभं यथा हरिः कृष्ण इभं कुवलयापीडं यथा तथेति सर्वा हिंसिता ये तेषां जनाः स्वकीयास्तैर्हाहेति सुमहान् शब्दस्तदोदीरितोऽभूत् । अर्व–षर्व–हिंसायामिति स्मरणात् ॥ ३८ ॥

सुमनोरञ्जनी — हरिरित्यावर्तते । हरिः सिंहः कृष्णश्च ॥ ३८ ॥

स नित्यदोद्विग्नधिया तमीश्वरं पिबन्निदन् वा विचरन् स्वपन् श्वसन् ।
ददर्श चक्रायुधमच्युतं यतस्तदेव रूपं दुरवापमाप ॥ ३९ ॥

सत्यधर्मीया — भयात्कंस इति शंसिततदवस्थामाह ॥ स इति । उद्विग्नधिया भीतियुक्तमत्या तमीश्वरं पिबञ्जलं कलशं वाऽदन्फलादिकमन्नकवलं वा विचरन्स्वपन्रात्रौ दिवा वा श्वसन्नेवं नित्यदा यतश्चक्रायुधमच्युतं ददर्श ततस्तदेवरूपमन्यैः केवलदानवैर्दुरवापमाप । तदाविष्टो भृगुर्भगवदन्तनिविष्टोऽसुरस्तु क्रमात्तमो गच्छति । अतः समसमराकरणादनायुधघातान्न वीरस्वर्गस्तस्येति मन्तव्यम् । यथोक्तं हरिवंशे ।

असङ्ग्रामहतः कंसः स बाणैरपरिक्षतः ।
कण्ठग्राहान्निरस्तासुः स्वर्गमार्गान्निराकृतः ॥ इति ॥ ३९ ॥

सुमनोरञ्जनी — सः कंसः यतः नित्यदा सर्वदा उद्विग्ना भयसहिता धीः अन्तःकरणं तया

तमीश्वरमेव ददर्श । धिया दर्शनं ध्यानमेव । ध्यायति स्मेति यावत् । इदानीमन्तेऽपि चक्रं सुदर्शनमायुधं यस्य तमच्युतमेव्न ददर्श । अतस्तदेव रूपं श्रीकृष्णरूपमेव । आप प्रविष्ट इत्यर्थः । इदं च कंसाविष्टसज्जीवविषयकम् । तदुक्तं-

पौण्ड्रके नरके चैव साल्वे कंसे च रुग्मिणि ।
आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमापिरे ।। इति ।। ३९ ।।

तस्यानुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः ।
अभ्यधावन्नतिक्रुद्धा भ्रातुर्निर्वेशकारिणः ।। ४० ।।

सत्यधर्मीया — तस्य कंसस्यानुजा भ्रातरः परस्परं कङ्कन्यग्रोधकावेवादी येषां ते भ्रातृनिर्वेशकारिणो भ्रातुः कंसस्य निर्वेशो निष्कृतिरानृण्यमिति यावत् कर्तुं शीलमेषामस्तीति ते तथाऽतिक्रुद्धा अभ्यधावन् ।। ४० ।।

सुमनोरञ्जनी — निर्वेशम् आनृण्यं तत्कारिणः ।। ४० ।।

तथाऽतिरभसांस्तांस्तु संयतान् रोहिणीसुतः ।
अहन् परिघमुद्यम्य पशूनिव मृगाधिपः ।। ४१ ।।

सत्यधर्मीया — अतिरभसान्बहुवेगिनः । परिघं तद्वद्धिद्यमानं बाहुम् । सह नानीतो न वापि स उत्तरत्रेव स्मृतश्चेति । परितो हन्तीति परिघो वा बाहुस्तमुद्यम्य । उक्तं च तत्रैव ।

बलदेवोऽपि धर्मात्मा कंसभ्रातरमोजसा ।
बाहुभ्यामेव तरसा सुनामानमपोथयदिति ।
निदर्शनं चैवं सुदर्शनं मृगाधिपः पशूनिवेति ।। ४१ ।।

सुमनोरञ्जनी — अतिरभसानतिवेगान् । संयतान् सश्रद्धान् । मृगाधिपः सिंहो व्याघ्रो वा । सिंहव्याघ्रौ मृगाधिपावित्यभिधानात् ।। ४१ ।।

नेदुर्दुन्दुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ।
पुष्पैः किरन्तस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ।। ४२ ।।

सत्यधर्मीया — विभूतयो विशेषसन्निधाननिधानानि गतं च । स्त्रियो गान्धर्व्यः ।। ४२ ।।

सुमनोरञ्जनी — विभूतयः विशेषतो भगवत्सन्निधानपात्राणि ब्रह्मेशाद्यास्तं पुष्पैः किरन्तः वर्षयन्तः प्रशशंसुः । स्त्रियोऽप्सरसः ।। ४२ ।।

तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः ।
तत्राभीयुर्विनिघ्नन्त्यः स्वशीर्षाण्यश्रुलोचनाः ॥ ४३ ॥

सत्यधर्मीया — तेषां कंसादीनाम् ॥ ४३ ॥

सुमनोरञ्जनी — तेषां कंसादीनाम् । सुहृदः पत्युः मरणेन ॥ ४३ ॥

शयानान् वीर शय्यायां पतीनालिङ्ग्य शोचतीः ।
विलेपुः सुस्वरं नार्यो विसृजन्त्यो मुहुः शुचः ॥ ४४ ॥

सत्यधर्मीया — हे वीर परीक्षित्! शय्यायां नित्यं यथा तथा शयानान्पतीनालिङ्ग्य शोचतीः शोचन्त्यो नार्यो मुहुर्मुहुः शुचः पश्यतां विसृजन्त्यो ददत्यस्त्यागो विहापितं दानमुत्सर्जनविसर्जने इति हलः । शुचो बहिर्विसृजन्त्य उपर्युपर्युत्पादयन्त्यः सुस्वरं विलेपुः ॥ ४४ ॥

सुमनोरञ्जनी — शुचः शोकाश्रूणि शुचः शोकान् विसृजन्त्यः अन्येषां मनसि उत्पादयन्त्य इति वा । विलेपुः विलापश्चक्रुः ॥ ४४ ॥

हा नाथ प्रिय धर्मज्ञ करुणानाथवत्सल ।
त्वया हतेन निहता वयं ते सगृहप्रजाः ॥ ४५ ॥

सत्यधर्मीया — करुणयतीति करुणस्तत्सम्बुद्धिः । अनाथवत्सल तत्प्रीतिमन् । हतेन त्वया वयं सगृहप्रजास्तत्सहिता निहतास्त्वन्मूलकत्वादस्मद्गृहादेः ॥ ४५ ॥

सुमनोरञ्जनी — करुणया अनाथेषु जनेषु वत्सल स्निग्ध! हे करुणेति सम्बोधनं वा । ते त्वदीयाः गृहैः प्रजाभिश्च सहिताः वयं निहताः निहतप्रायाः ॥ ४५ ॥

त्वया विरहिता पत्या पुरीयं भरतर्षभ ।
न शोभते वयमिव निवृत्तोत्सवमङ्गला ॥ ४६ ॥

सत्यधर्मीया — त्वया पत्या नाथेन राज्ञा वयमिव निवृत्तोत्सवमङ्गला इयं पुरी मधुरा न शोभते ॥ ४६ ॥

सुमनोरञ्जनी — पत्या पालकेन । निवृत्तानि उत्सवमङ्गलानि यस्यां सा । इदं च स्वदृष्टा । न परमार्थतः ॥ ४६ ॥

अनागसां त्वं भूतानां कृतवान् द्रोहमुल्बणम् ।
तेनेमां भो दशां नीतो भूतध्रुक् को लभेत शम् ॥ ४७ ॥

सत्यधर्मीया — अनागसां निरपराधानां प्राणिनामुल्बणं द्रोहमत्युत्कटफलदम् । भो पते इमां दशां नीतः । सामान्यार्थान्तरं न्यस्यन्ति । कः भूतध्रुक् भूतेभ्यो द्रोग्धा शं सुखं लभेतेति ॥ ४७ ॥

सुमनोरञ्जनी — अनागसां निरपराधिनां भूतानाम् । द्रोहं कृतवान् तेन कारणेन ॥ ४७ ॥

सर्वेषामिह भूतानामेष हि प्रभवाप्ययः ।
गोप्ता च तदवध्यायी न क्वचित् सुखमेधते ॥ ४८ ॥

सत्यधर्मीया — यादृशतादृशभूतद्रोह एवंमहिमा महामहिमद्रोहे तु किं वक्तव्यमिति वदन्ति ॥ सर्वेषामिति । हि यतः सर्वेषां भूतानामेषः प्रकर्षेण भव उत्पत्तिरप्ययो नाशश्च यस्मात्स तथा गोप्ता रक्षिता च तदवध्यायी तदवज्ञाता क्वचिदपि सुखं यथा तथा नैधते ॥ ४८ ॥

सुमनोरञ्जनी — एषः कृष्णः । प्रभवन्त्यस्मादिति प्रभवः उत्पादकः स चासौ अपियन्ति लीयन्तेऽस्मादिप्ययः संहर्ता च । तदवध्यायी तस्य अवध्यानमवज्ञा तत्कर्तुं शीलमस्येति तथाविधः । सुखं यथा भवति तथा । नैधते न वर्धते ॥ ४८ ॥

श्रीशुक उवाच—

राजयोषित आश्वास्य भगवान् लोकभावनः ।
यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ॥ ४९ ॥

सत्यधर्मीया — लोकभावनो लोकोत्पादकस्तत्सत्ताप्रदो वा । राजयोषितो राजराजीवाक्षीराश्वास्य हतानां या लौकिकी लोकैः क्रियमाणेत्येव लौकिकी तां श्रौतीं स्मार्तीं संस्थां चरमकृतिमाहुः शिष्टास्तामकारयत्कारयामास ॥ ४९ ॥

सुमनोरञ्जनी — राजस्त्रियः आश्वास्य । लौकिकीं लोकसंप्रदायागतां यां द्विजा आहुस्तां संस्थां संस्कारम् ॥ ४९ ॥

मातरं पितरं चैव मोचयित्वाऽथ बन्धनात् ।
रामकृष्णौ ववन्दाते शिरसाऽऽस्पृश्य पादयोः ॥ ५० ॥

सत्यधर्मीया — आस्पृश्य ॥ ५० ॥

सुमनोरञ्जनी — मातरं देवकीम् । पितरं वसुदेवम् । शिरसा पादयोः आस्पृश्य संस्पर्शं कृत्वा ॥ ५० ॥

देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ।
कृतसंवन्दनौ पुत्रौ सस्वजाते न शङ्कितौ ॥ ५१ ॥

सत्यधर्मीया — देवकी वसुदेवश्च जगदीश्वरौ कृतपादाभिवन्दनौ विज्ञाय नशङ्कितौ शङ्काशून्यौ सस्वजाते पुत्रौ जगदीश्वरौ विज्ञाय शङ्कितौ न सस्वजात इति वा ॥ ५१ ॥

सुमनोरञ्जनी — जगदीश्वरौ विज्ञाय इमौ जगदीश्वराविति विज्ञाय । नशङ्कितौ भयरहितौ कृतवन्दनौ पुत्रौ रामकृष्णौ सस्वजाते आलिलिङ्गतुः । कृतवन्दनावपि पुत्रौ जगदीश्वरौ विज्ञाय । शङ्कितौ संशयत्रासयोः शङ्केति शाश्वतः । न सस्वजाते इति वा ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे द्विचत्वारिंशोऽध्यायः ॥

॥ अथ त्रिचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ।
मा भूदिति निजां मायां ततान जनमोहिनीम् ॥ १ ॥

तात्पर्यम् – 'सर्वोत्तमोऽपि भगवान् गुणा(ण)भावं जनार्दनः । दर्शयेद्वसुदेवादेरात्मनो जीवतामपि । अज्ञाशक्त्यादिभावस्तु कुतस्तस्याखिलेशितुः । कुतो दोषा सर्वगुणपूर्णस्यानन्द-वारिधेरि'ति वामने ॥

सत्यधर्मीया — पितरावुपलब्धार्थावित्यारभ्येति मायामनुष्यस्येत्यन्तैर्दशभिः श्लोकैर्लोकेशस्य वसुदेवाद्यवरत्वं परतन्त्रता चोच्यत इति प्रतीयतेऽतस्तत्तात्पर्यमाचार्यवर्यो मानेनानयति ॥ सर्वोत्तमोऽ-पीति । भगवान् जनार्दनः सर्वोत्तमोऽपि सन्गुणभावमप्राधान्यं वसुदेवादेः सकाशात्तथाऽऽत्मनः स्वस्माद्वरतां तेषां दर्शयेत् । अज्ञाशक्त्यादिकमज्ञेति मुक्तोपसृप्येत्यादिवद्भावप्रधानम् । नञ्-पूर्वाज्ज्ञानातेर्घञर्थे कविधानमिति भावेऽज्ञमज्ञानमिति वा । अशक्तिश्चेत्यादी यस्य स स्वभावः । न विद्यते शक्त्यादिर्यस्य सोऽज्ञश्च स चेत्यज्ञाशक्त्यादिस्तस्य भाव इति वा । तस्याखिलेशितुः कुतो

भवेत् । एतदादेर्दोषमूलकत्वात्तदभावादेवाभाव इत्याह ॥ कुतो दोषा इति । सर्वगुणपूर्णस्यानन्द-वारिधेः सुखसमुद्रस्य । सर्वोपिता च तद्दर्शनात् । अथातो ब्रह्मजिज्ञासा । आनन्दमयोऽभ्या-सादित्याद्युपयुक्तसूत्रोक्तानुवादरूपत्वान्न पौनरुक्त्यमिति मन्तव्यम् ॥ अथ मूलार्थः ॥ यथा खला-चरितः शृङ्खलाबन्धो व्यमोचि भगवता तथा संसारबन्धनमपि मोचयति हरिरिति सूचयत्यनेनाध्यायेन । तत्रादौ कंसहिंसानन्तरमनन्तः किं ततानेति क्षितिपतिशङ्कां मानसीं परिहरति ॥ पितराविति । पुरुषोत्तम उपलब्धोऽर्थो नित्यं प्राप्योऽयमिति ज्ञानविषयो हरिः स्वयं ययोस्तौ ज्ञातस्वरूपाविति यावत् विदित्वा ज्ञात्वा तयोरेवं ज्ञानमिदानीं मा भूदिति जनमोहिनीं मायां निजां स्वबन्धकशक्तिं ततान व्यतनोत् तया वृतवानिति यावत् ॥ १ ॥

सुमनोरञ्जनी — अचिन्त्याद्भुतशक्तेः भगवतः श्रीकृष्णस्य यदि ह्यहमित्युक्तरीत्या सुजन-शिक्षणाय कृतं गुरुकुलवासादिकं वदन् मृतपुत्रदानादिमहिमानं निरूपयत्यस्मिन्नध्याये । तत्रादौ देवकीवसुदेवयोः सदा स्वस्मिन् जगदीश्वरत्वज्ञानपूर्वकपुत्रस्नेहः । सार्वधिकः स्वाधिकारादधिकं साधनमिति मन्वानः स्वीयमायया तदावृणोदित्याह ॥ पितराविति । पितरौ, उपलब्धो ज्ञात अर्थः 'नायमस्मत्सुतः किन्तु साक्षाज्जगदीश्वर एवेत्यादिरूपः' याभ्याम् । अत एव उपलब्धः प्राप्तः अर्थः पुरुषार्थः स्वयोग्यमौक्तानन्दलक्षणः याभ्यां तथाविधौ विदित्वा । मा भूत् स्वयोग्यतातिक्रमेण साधनं मा भूदितीच्छया । निजां स्वाधीनां मायां स्वेश्वरत्वविषयामविद्यां आततान विस्तारयामास । वक्ष्यमाणवचनैरिति शेषः ॥ १ ॥

उवाच पितरावेत्य साग्रजः सात्वतर्षभः ।
प्रश्रयावनतः प्रीणन्नम्ब तातेति सादरम् ॥ २ ॥

सत्यधर्मीया — साग्रजः सबलः सात्वतर्षभः कृष्णः पितरौ गृहोपविष्टावेत्य प्राप्य । यथोक्तं हरिवंशे । ''तं हत्वा पुण्डरीकाक्षः प्रहर्षाद्द्विगुणप्रभः । ववन्दे वसुदेवस्य पादौ निहतकण्टकः । मातुश्च शिरसा पादावित्याद्युदीर्य । तौ जितारी जितक्रोधौ चिरविप्रोषितौ व्रजे । स्वपितुर्भवनं वीरौ जग्मतुर्हृष्टमानसाविति । प्रश्रयेणावनतः प्रीणन्स्वयं प्रीतियुतः प्रीणयन्वा । हे अम्ब हे तातेति सादरमुवाच । इदमेव मायाबीजमिति ज्ञेयम् ॥ २ ॥

सुमनोरञ्जनी — प्रश्रयेण विनयेन अवनतः नम्रः । प्रीणन् प्रीणयन् प्रीतिमुत्पादयन्निति यावत् ॥२॥

नास्मत्तो युवयोस्तात नित्योत्कण्ठितयोरपि ।
बाल्यपौगण्डकैशोराः पुत्राभ्यामगमन् क्वचित् ॥ ३ ॥

सत्यधर्मीया — अस्मत्तोऽस्मन्निमित्तम् । नित्यमुत्कण्ठितयोरुत्कण्ठतयोरुत्कण्ठयुतयोर्युवयोः पुरत इति शेषः । बाल्यपौगण्डकैशोरा इत्यवस्थाः । गतम् । पुत्राभ्यामावाभ्यां नागमन्न गमिता इति तच्चित्तज्ञानं युवयोः क्व कथं भवेन्न भवेत् ॥ ३ ॥

सुमनोरञ्जनी — अस्मत्तः अस्मन्निमित्तम् । नित्यमुत्कण्ठितयोरपि युवयोः पुरतः पुत्राभ्यामावाभ्यां चतुर्थीद्विवचनमिदम् । बाल्यपौगण्डकैशोरा अवस्थाः नागमन् नाययुः बाल्याद्यवस्थासु कृताः अस्मल्लीलाः भवद्भ्यां न दृष्टा इति यावत् ॥ ३ ॥

न लब्धो दैवहतयोर्वासो नौ भवदन्तिके ।
ये बालाः पितृगेहस्था विन्दन्ते लालिता मुदम् ॥ ४ ॥

सत्यधर्मीया — अस्मद्दुर्दैवतो, युष्मत्तो विवासनमिति न तल्लीला युष्मत्पुरो जातेति तात्पर्यं लोकविलोकनतो बहिः प्रकाशयन्नाह ॥ न लब्ध इति । दैवहतयोर्नौ भवदन्तिके युष्मत्समीपे वासो न लब्धः । यन्नाभूद्दैवं तद्दैवं क्व फलप्रदं दृष्टमित्यत आह ॥ ये बाला इति । पितृगेहस्था ये बाला लालिता मुदं विन्दन्ते सा याभ्यां न प्राप्तेति ॥ ४ ॥

सुमनोरञ्जनी — नेति । ये बालाः लोके पितृगेहस्थाः सन्तः पितृभ्यां लालिताः मुदं विन्दन्ते विन्दन्ति । आवयोस्तु दैवहतयोः अदृष्टेन प्रतिबद्धयोः भवदन्तिके वास एव न लब्धः । न केवलं पुत्रलीला भवद्भ्यां न दृष्टा आवाभ्यामपि पितृकृतलालनसुखं न लब्धमित्याह ॥ नेति ॥ ४ ॥

सर्वार्थसम्भवो देहो जनितः पोषितो यतः ।
न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥

सत्यधर्मीया — युष्मदुपकारस्य वयं न प्रत्युपकर्तुमीशा इतीशः शंसति ॥ सर्वार्थेति । सर्वार्थानां सम्भवो घटनाय यस्मात्सो मोक्षादिसकलपुरुषार्थसाधनं याभ्यां जनितोऽनन्तरं पोषितश्च तयोः पित्रोर्निर्वेशं मर्त्योऽपत्यं शतायुषा शतसंवत्सरात्मनाऽप्यायुषा न याति । मर्त्य इत्यानुकूल्याय शतायुर्वै पुरुष इति श्रुतेः शतायुषेति ॥ ५ ॥

सुमनोरञ्जनी — पितरौ स्तौति । सर्वार्थानां चतुर्विधपुरुषार्थानां सम्भव उत्पत्तिर्यस्मात्स देहः याभ्यां पितृभ्यां जनितः पुनः पोषितश्च । तयोर्मातापित्रोर्निर्वेशं निष्कृतिं आनृण्यमित्यर्थः । शतायुषा न याति मर्त्यः । एवं स्थिते आत्मजः पुत्रः कल्पः समर्थः सन्नपि आत्मना स्वशरीरेण धनेन च तयोर्माता पित्रोः वृत्तिं जीवनं न दद्याच्चेत्तं पुरुषं प्रेत्य मृत्वा स्थितं स्वमांसमेव खादयन्ति यमभटा इति ॥ ५,६ ॥

यस्तयोरात्मजः कल्प आत्मना च धनेन च ।
वृत्तिं न दद्यात् तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥

सत्यधर्मीया — यस्तयोरात्मजः शरीरजः सन्नात्मना तज्जन्येन देहेन धनेन तदपेक्षितधनेन वृत्तिं जीवनोपायं न दद्यान्न कुर्याच्चेत्पादसंवाहनाद्यात्मकन्नादिकं धनसाध्यं च न कुर्यात्तं प्रेत्य संयमिन्यां स्थितम् । लक्ष्मणः प्रेत्य सुग्रीवमित्यादेः । स्वं मांसं खादयन्ति यमभटा हि यतोऽतस्तत्सेवायां प्रयतितव्यम् । अनिर्वाहपक्ष आह । कल्प इति । समर्थश्चेदित्यसमर्थश्चेन्नैवं प्रत्यवेयादिति भावः ॥६॥

मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ।
गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः ॥ ७ ॥

सत्यधर्मीया — वृद्धौ च मातापितराविति मानमर्थतोऽनुकुर्वन्नाह ॥ मातरमिति । वृद्धमिति तावद्वार्धक्यं न मातुरिति ध्वनयितुमिति ज्ञेयम् । अन्यथा विपरिणामसाम्यात् पूर्वोक्तमातृविवक्षया वक्तव्यं वृद्धामिति स्यात् । साध्वीं स्वैकशरणां भार्याम् । शिशुम् । स्वोदरभरणासुशकं सुतं, गुरुं शास्त्रोपदेशकं विप्रं मेधाविनमन्यम् । विप्रा मेधाविनस्तन्नामसु पाठादित्यृग्भाष्यटीकाद्युक्तेः । प्रपन्नं शरणागतम् । कल्प एतदादिरक्षणदक्षोऽप्यबिभ्रदपोषयिता यः सः श्वसन्नेव मृतो मृतप्रतीकः । कश्चन वृद्धं काश्चन साध्वीं कश्चन शिशुं गुरुं विप्रमिति व्यातन्वते ॥ ७ ॥

सुमनोरञ्जनी — वृद्धौ च मातापितराविति स्मृतिं मनसि निधायाह ॥ मातरमिति । साध्वीं पतिव्रतां, सुतं, शिशुं स्वजीवप्रवृत्तावशक्तम् । गुरुं तत्वोपदेष्टारम् । विप्रम् अतिथ्यादिरूपम् । प्रपन्नं शरणागतं च । स्वयं कल्पः समर्थः सन् अबिभ्रन् भरणमकुर्वन् पुरुषः श्वसन् जीवन्नपि मृतः मृतप्राय इत्यर्थः ॥ ७ ॥

तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ।
मोघमेते व्यतिक्रान्ता दिवसा वामनर्चतोः ॥ ८ ॥

सत्यधर्मीया — लौकिकी रीतिरेवं भवतु भवन्तौ क्व निवेश्यावित्यतोऽधुनाऽप्यनुदञ्चितमधुमथनव्यतिरिक्ततामती वञ्चयन्तौ वदतः ॥ तदिति ॥ अकल्पयोः असमर्थयोः । कंसान्नित्यमुद्विग्नं चेतो ययोस्तौ तयोर्वामनर्चतोर्दिवसा वासरा मोघं वृथा यथा तथा व्यतिक्रान्ताः ॥ ८ ॥

सुमनोरञ्जनी — एवंस्थितेऽपि यदावयोः मातापितृसेवा न लब्धा तत्क्षन्तव्यमिति प्रार्थयतः ॥ तदिति । अकल्पयोः भवत्सेवां कर्तुमशक्तयोः । कुतः कंसात् नित्यमुद्विग्नं भयग्रस्तं चेतो ययोस्तयोः अतो वामनर्चतोः नौ । मोघं व्यर्थमेव । एते पूर्वे दिवसाः व्यतिक्रान्ताः ॥ ८ ॥

तत् क्षन्तुमर्हथस्तात मातर्नौ परतन्त्रयोः ।
अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदोर्भृशम् ॥ ९ ॥

सत्यधर्मीया — तात हे मातः पूर्वं पूर्वं मात्रुक्तिरत्र तु तातेति पुरा पित्रुक्तिश्च माता पूर्वरूपं तत्पूर्वोऽपि पितेति युक्ते । परतन्त्रयोर्वां शुश्रूषां सेवामकुर्वतोः क्लिष्टयोः क्लेशभागिनोर्दुर्हृदोर्मनः-शुद्धिरहितयोरियत्समयपर्यन्तं कृतं तदागः क्षन्तुमर्हथः । एवं क्लिष्टयोर्वामिति वाऽन्वयः ॥ ९' ॥

सुमनोरञ्जनी — तथापि हे मातः हे तात ! परतन्त्रयोः नौ तद्रूपमपराधं क्षन्तुमर्हथः । भवत्सेवामकृत्वापि नावां सुखिनावित्याहतुः । क्लिष्टयोः बहुभिः कंसभृत्यैः क्लेशितयोः अत एव दूयमानहृदययोः ॥ ९ ॥

इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ।
मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुदम् ॥ १० ॥

सत्यधर्मीया — विश्वात्मनः सर्वान्तर्नियामकस्य मायामनुष्यस्य हरेर्गिरा मोहितौ तौ मातापितरौ परिष्वज्य मुदमापतुः । अस्माभिरेतत्स्वारस्यवश्यतयाऽध्यायान्त्यश्लोके शङ्कितौ न सस्वजाते इत्यर्थापितं श्लिष्टतरमिति मन्तव्यम् ॥ १० ॥

सुमनोरञ्जनी — मायामनुष्यस्य मायया स्वेच्छया मनुष्यवद्देहधारिणः । गिरा वचनेन । मोहितौ स्वपुत्र एवायमिति मोहयुक्तौ । परिष्वज्य आलिङ्ग्य ॥ १० ॥

सिञ्चन्तावश्रुधाराभिः स्नेहपाशेन संवृतौ ।
न किञ्चिदूचतू राजन् बाष्पकण्ठौ विमोहितौ ॥ ११ ॥

सत्यधर्मीया — अश्रूणामानन्दजानां धारास्ताभिर्न किञ्चिद्बाष्पेणोष्मणा प्रतिरुद्धकण्ठत्वात् ॥ ११ ॥

सुमनोरञ्जनी — अश्रुधाराभिः आनंदबाष्पवृष्टिभिः तौ रामकृष्णौ सिञ्चन्तौ । स्नेहपाशेन पुत्रस्नेहाख्यपाशेन । संवृतौ युक्तौ । विमोहितौ प्रतिवचनमूढौ । न किञ्चिदूचतुरित्यन्वयः ॥ ११ ॥

एवमाश्वास्य पितरौ भगवान् देवकीसुतः ।
मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥

सत्यधर्मीया — उग्रसेनं मातामहं, यदूनां नृपं राजानम् ॥ १२ ॥

सुमनोरञ्जनी — यदूनां नृपं राजानम् ॥ १२ ॥

आह चास्मान् महराज प्रजाः स्वाज्ञप्तुमर्हसि ।
ययातिशापाद् यदुभिर्नासितव्यं नृपासने ॥ १३ ॥

सत्यधर्मीया — हे महाराज अस्मान्प्रजाः स्वाज्ञप्तुं समीचीनतया शिक्षापूर्वकमिति यावत् आज्ञप्तुमाज्ञां कर्तुमर्हसि । त्वमेव भव भगवन्नवन्यवनकर्तेत्यत आह ॥ ययातीति । अनेन वसुदेव-कुलोग्रसेनकुलयोर्यादवत्वायादवत्वे ध्वन्येते । एवमनङ्गीकारे वैवाहिकी क्रियाऽपि परस्परमनुपपन्ना स्यात् । ययातेः शापात् । यदुभिः साक्षात्तदीयैः प्रवर्तकैरस्मदादिभिर्नृपासने नासितव्यं नोपवेष्टव्यम् । त्वं त्वमुख्य इति यादवत्वेऽपि तव चिन्ता नास्तीति वा । पुत्रीपुत्रत्वादिमतामपि तत्त्वेन व्यवहारो दृष्टचरो लोक इति विवाहादिरुपपन्न इति भावः । अवोचच्च मातामहं तूग्रसेनमिति । यद्वक्ष्यति सर्वान्स्वज्ञातिसम्बन्धानिति । आचार्यगोत्रेण राजन्यो वृणीतेति प्रयोगकारोक्तेर्यादवत्वेऽपि गोत्रभेदेन विवाहादिसम्भव इति वा ॥ १३ ॥

सुमनोरञ्जनी — हे राजन् उग्रसेन ! प्रजाः अस्मान् । स्वाज्ञप्तुं सुष्ठु आज्ञप्तुम् । अर्हसि । त्वमेव नृपासने उपविशेत्युक्तः प्रत्याह ॥ ययातीति । नासितव्यं नोपवेष्टव्यम् ॥ १३ ॥

मयि भृत्य उपासीने भवतो विबुधादयः ।
बलिं हरन्त्यवनताः किमुतान्ये नराधिपाः ॥ १४ ॥

सत्यधर्मीया — वृद्धोऽहं न नृपासन उपविश्य शासने समर्थ इत्यत आह ॥ मयीति । भृत्ये मय्युपासीने सति विबुधादयो देवादयो बलिं भवतो हरन्ति । अवनताः प्रवणा अन्ये नराधिपा हरेयुर्बलिमिति किं वक्तव्यमिति भावः ॥ १४ ॥

सुमनोरञ्जनी — अहं वृद्धः कथं राज्यं करोमीति शङ्कां त्यजेत्याह ॥ मयीति । भृत्ये मयि उपासीने सेवमाने सति समीपे तिष्ठतीति वा । विबुधादयः देवादयः । बलिं करम् ॥ १४ ॥

सर्वान् स्वज्ञातिसम्बन्धान् दिग्भ्यः कंसभयाद् गतान् ।
यदुवृष्ण्यन्धकमधुदाशार्हकुकुरार्हकान् ॥ १५ ॥

सत्यधर्मीया — स्वज्ञातीन्स्वसम्बन्धानिति सर्वान्कंसभयाद्दिग्भ्यो गतान्यदुवृष्ण्यन्धकमधु-कुकुरार्हकान् । एवं विशेषाद्विशेषो बोध्यः ॥ १५ ॥

सुमनोरञ्जनी — स्वज्ञातीन् सम्बद्धान् सम्बन्धिनः मत्वर्थीयोऽच् । दिग्भ्यो गतान् दिग्भ्य आगतान् वा । वस्त्रालङ्कारादिना अन्नादिना प्रियसम्भाषणादिना वा सभाजितान् पूजितान् । विदेशावासेन कर्शितान् क्लिष्टान् । सन्तर्प्य सन्तोष्य ॥ १५,१६ ॥

सभाजितान् समाश्वास्य विदेशावासकर्शितान् ।
न्यवासयत् स्वगेहेषु वित्तैः सन्तर्प्य विश्वसृक् ॥ १६ ॥

सत्यधर्मीया — विदेशावासकर्शितान्सभाजितान्सत्कृतान्समाश्वास्य वित्तैः सन्तर्प्य तर्पयित्वा स्वगेहेषूत्सृष्टेषु न्यवासयद्वासयामास । अपेक्षितसर्वंवितरितुरीश्वरस्य कियदियद्दीनदीनारदानमित्याह ॥ विश्वसृगिति । विश्वं समस्तं सृजत्यत्ति सृजतीति स तथा । क एते कश्च स्वयं कोऽनुबन्ध इत्यतो वाऽऽह ॥ विश्वसृगिति । स्वप्रजारक्षणं पितुर्विहितमिति ॥ १६ ॥

कृष्णसङ्कर्षणभुजैर्गुप्ता लब्धमनोरथाः ।
गेहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥

सत्यधर्मीया — सिद्धा मुक्ता इवेति लुप्तोपमा । पूर्णा इति वा । कृष्णरामाभ्यां गतो ज्वर उपतापो येषां ते तथा ॥ १७ ॥

सुमनोरञ्जनी — गुप्ताः रक्षिताः । कृष्णरामाभ्यां निमित्ताभ्यां गतज्वराः नष्टसन्तापाः ॥ १७ ॥

वीक्षन्तोऽहरहः प्रीता मुकुन्दवदनाम्बुजम् ।
नित्यप्रमुदितं श्रीमत्सदयस्मितवीक्षणम् ॥ १८ ॥

सत्यधर्मीया — वीक्षन्तो वीक्षमाणाः । नित्यं प्रमुदितं, श्रीमत्कान्तिमत्सदयं तत्स्मितवीक्षणं यस्य तत् ॥ १८ ॥

सुमनोरञ्जनी — अहरहः प्रतिदिनम् । सदयं यत्स्मितं तत्सहितं वीक्षणं यस्य तत् ॥ १८ ॥

तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः ।
पिबन्तोऽक्षैर्मुकुन्दस्य मुखाम्बुजसुधां मुहुः ॥ १९ ॥

सत्यधर्मीया — प्रवयसो गतवयस्का युवानोऽतिबलौजसोऽप्यासन्नित्यन्वयः । तत्र तन्त्रमाह । अक्षैः सामान्यशब्दोऽत्राक्षिरूपरूपग्राहकग्राहकः । नेत्रैर्भृङ्गैरिति योजयन्ति ॥ १९ ॥

सुमनोरञ्जनी — तत्र मधुरायाम् । अक्षैः नेत्रैः । मुकुन्दस्य मुखाम्बुजे विद्यमानसुधां मुहुः पिबन्तः प्रवयसो वृद्धा अपि युवानस्तरुणाः आसन् । तच्चिह्नमाह ॥ अतीति । अत्यन्तं बलं शारीरं, ओजः अन्तःसामर्थ्यं च येषाम् ॥ १९ ॥

अथ नन्दं समासाद्य भगवान् देवकीसुतः ।
सङ्कर्षणश्च राजेन्द्र परिष्वज्येदमूचतुः ॥ २० ॥

सत्यधर्मीया — देवकीसुतः परिष्वज्येत्यनेनानास्था ध्वन्यते । अन्यथा प्रणम्येति वाऽवक्ष्यत् ॥२०॥

सुमनोरञ्जनी — इदं वक्ष्यमाणम् ॥ २० ॥

पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ।
पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥

सत्यधर्मीया — हे पितुर्युवाभ्यां दम्पतीभ्यां पोषितौ भृशं लालितौ च पित्रोरात्मनः स्वस्माद-प्यात्मजेषु स्वकीयपुत्रेषु चाभ्यधिका प्रीतिः ॥ २१ ॥

सुमनोरञ्जनी — हे पितः ! युवाभ्यां दम्पतिभ्याम् । आवां पोषितौ । अन्नादिना प्रिय-संभाषणादिना च लालितौ । कुत इत्यत आह ॥ पित्रोरिति । मातापित्रोः आत्मनः स्वस्मादपि आत्मुजेषु अभ्यधिका प्रीतिः । हि प्रसिद्धमेतत् ॥ २१ ॥

स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ।
शिशून् बन्धुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २२ ॥

सत्यधर्मीया — अर्थादुक्तं स्वापुत्रत्वं किञ्चिद्विवेचयति ॥ स पितेति । पोषरक्षणे पोषण-रक्षणयोः, पोषरक्षणे प्रति । अकल्पैरसमर्थैर्बन्धुभिः पित्रादिभिरुत्सृष्टान् शिशून्स्वपुत्रवद्यौ पुष्णीतां सा जननी स एव पिता च । अनेनान्नदानाद्युपाधिपितृताऽपि युवयोरस्तीति देवकीवसुदेवपुत्रौ किलेति दौर्मुख्यं न भजतमिति वाऽसूचि ॥ २२ ॥

सुमनोरञ्जनी — ननु नावां भवत्पितरौ । कथं त्वयि प्रीतिरस्माकं स्यादित्यतो युवामेव पितरौ । पितृवदस्मत्पोषणादित्याह ॥ या च यश्च यौ स्त्रीपुरुषौ स्वपुत्रवत् पुष्णीतां पोषणं कुरुतः स एव पिता सैव मातेति न्यायः । पोषणे अन्नादिना पालने, रक्षणे भयादितस्त्राणे च । अकल्पैः बन्धुभिः । उत्सृष्टान् त्यक्तान् शिशून् यौ युवां पुष्णीताम् । अतः स त्वमेव पिता । सा यशोदैव जननीति पूर्वार्द्धमावृत्य योजना ज्ञेया ॥ २२ ॥

यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ।
ज्ञातीन् नो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ २३ ॥

सत्यधर्मीया — हे तात यूयं व्रजं यात सुहृदां चिरायास्मद्विरहकातराणां सुखं विधाय स्नेह-दु:खितान्स्नेहनिमित्तदु:खयुतान्नौ ज्ञातीन्भवदादीन्द्रष्टुमेष्याम: प्रस्तुतं यूयं यात ॥ २३ ॥

सुमनोरञ्जनी — हे तात नन्द ! यूयं व्रजं यात । वयं च वयमपि । अत्रत्यानां सुहृदां सुखं विधाय । अस्मत्स्नेहेन दु:खितान् ज्ञातीन् युष्मान् । द्रष्टुमेष्याम इति ॥ २३ ॥

एवं सान्त्वय्य भगवान् नन्दं सव्रजमच्युतः ।
वासोऽलङ्कारकुप्याग्रैरर्हयामास सादरम् ॥ २४ ॥

सत्यधर्मीया — सान्त्वय्य समाधानं विधाय । सव्रजं तद्वासिजनसहितं वासांसि वस्त्राण्यलङ्कारा आभरणानि कुप्यानि रसपूरितपात्राणि सुवर्णदुर्वर्णाभिन्नान्येतान्येवाग्रे येषां तै: पदार्थै: सादरमर्चयामास । पुष्पाग्रैरिति च स्फुटार्थम् । अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकमिति हलायुधोक्ते: ॥२४॥

सुमनोरञ्जनी — सांत्वय्य सांत्वयित्वा । सव्रजं सगोपं वासोभिरलङ्कारैश्च कुप्याग्रै: सुवर्ण-रजताद्यतिरिक्तद्रव्यश्रेष्ठै: । अर्हयामास पूजयामास ॥ २४ ॥

इत्युक्तस्तौ परिष्वज्य नन्दः प्रणयविह्वलः ।
पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ २५ ॥

सत्यधर्मीया — इति कृष्णरामाभ्यामुक्तो नन्दस्तौ परिष्वज्य प्रणयविह्वलो नेत्रे अश्रुभिर्विरह-शोकोदकै: पूरयन्सहगोपैर्व्रजं ययौ ॥ २५ ॥

सुमनोरञ्जनी — इति 'पितर्युवाभ्याम्' इत्युक्तप्रकारेण ॥ २५ ॥

अथ शूरसुतो राजन् पुत्रयोः समकारयत् ।
पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृतिम् ॥ २६ ॥

सत्यधर्मीया — अथ नन्दगमनानन्तरं पुरोधसा तेनैव द्विजातिसंस्कृतिं स्वाध्यायोऽध्ययनोपयुक्त-मुपनयनलक्षणं यथावद्ब्राह्मणै: सह समकारयत् ॥ २६ ॥

सुमनोरञ्जनी — शूरसुतो वसुदेव: । पुत्रयो: रामकृष्णयो: द्विजसंस्कृतिं क्षत्रयोग्यसंस्कारं उपनयनाख्यं यथावत् विधिमनतिक्रम्य ॥ २६ ॥

तेभ्योऽदाद्दक्षिणां गावो रुग्ममालाः स्वलङ्कृताः ।
स्वलङ्कृतेभ्यः सम्पूज्य सवत्साः क्षौममालिनीः ॥ २७ ॥

सत्यधर्मीया — शूरसुतो रुक्ममालाः स्वलङ्कृताः सवत्साः क्षौममालिनीः । क्षोमाणां मालो मल धारणे घञ् । धारणमासामस्तीति क्षौममालिन्यस्ता गाः सम्पूज्य गन्धादिना स्वलङ्कृतेभ्यस्तेभ्यो ब्राह्मणेभ्यो वः सम्प्रददे न ममेति दक्षिणामदात् ॥ २७ ॥

सुमनोरञ्जनी — रुक्ममालाभिः सुष्ठु अलङ्कृताः । क्षौमाणि कौशेयानि मालाः पुष्पमालाश्चासां सन्तीति तथोक्ताः । सवत्साः गावः गाः संपूज्य । स्वलंकृतेभ्यः स्वदत्तालङ्कारैरलङ्कृतेभ्यः तेभ्यो ब्राह्मणेभ्यः ददौ । दक्षिणां च ददौ ॥ २७ ॥

याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ।
ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥

सत्यधर्मीया — जन्मर्क्षे जन्मनक्षत्रे मनोदत्ता मनसा दत्ताः, कंसेनाधर्मतो हृतास्ताश्चानुसंस्मृत्य स्मृतिपथं नीत्वाऽऽनाय्याददात् ॥ २८ ॥

सुमनोरञ्जनी — याः गावः कृष्णरामयोः जन्मर्क्षे मनसा दत्ताः दानार्थं सङ्कल्पिताः । अनुस्मृत्य । याश्च कंसेनाधर्मतो हृताः अपहृताः ताश्च अददात् ॥ २८ ॥

ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ।
गर्गाद् यदुकुलाचार्याद् गायत्रं व्रतमास्थितौ ॥ २९ ॥
प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ।
नान्यसिद्धामलं ज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥

सत्यधर्मीया — द्विजत्वमुपनीततां प्राप्य लब्धसंस्कारौ व्रतोपयुक्तप्राप्तगात्रनैर्मल्यौ गायत्रं व्रतं यदुकुलाचार्याद्गर्गादास्थितौ तदुपदिष्टमार्गेण व्रतरतावभूतामित्यर्थः । अनेनापातप्रतीताविज्ञत्वं ग्रन्थकृ- द्दूरयति ॥ प्रभवाविति । सर्वविद्यानां प्रभवौ व्यञ्जकावुत्पादकौ च सर्वज्ञौ जगदीश्वरौ नान्यसिद्धं सहजममलं ज्ञानं नरेहितैर्मानुषचेष्टाभिर्गूहमानौ आच्छादयन्तौ ॥ २९,३० ॥

सुमनोरञ्जनी — यदुकुलस्य आचार्यात् गर्गात् । लब्धसंस्कारौ प्राप्तोपनयनौ कृतोपनयना- वित्यर्थः । द्विजत्वं प्राप्य । सुव्रतौ अग्निपरिचर्यादिव्रतोपेतौ । गायत्रं व्रतं गायत्रीजपनियमम् ॥ सर्वविद्यानां प्रभवौ उत्पादकौ । नान्यसिद्धं नसमासोऽयम्,अनन्यसिद्धं स्वाभाविकमित्यर्थः । अमलं यत् ज्ञानं तत् । नरयोरिव ईहितैश्चेष्टितैः गूहमानौ आच्छादयन्तौ सन्तौ । गुरुकुले वासमिच्छन्तौ । उपजग्मतुः मधुरापुरादिति शेषः । काश्यं सान्दीपनिं तन्नामानम् । अवन्तिपुरे उज्जयिन्यां वसन्तम् ॥ २९-३१ ॥

अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः ।
काश्यं सान्दीपनिं नाम अवन्तिपुरवासिनम् ॥ ३१ ॥

सत्यधर्मीया — काश्यं नामैकदेशेन येन कश्यपगोत्रे वा स्वतन्त्रे काशगोत्रे वा भवमवन्तिनामपुवासिनं नाम्ना सान्दीपनिं गुरुकुले वासमिच्छन्तौ सन्तावुपजग्मतुः ॥ ३१ ॥

यथोपसाद्य तौ दान्तौ गुरौ वृत्तिमनिन्दिताम् ।
ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥

सत्यधर्मीया — यथोपसाद्य यथावत्समित्पाणित्वादिना प्राप्य दान्तौ । गुरावनिन्दितां वृत्तिमन्यान्ग्राहयन्तौ शिक्षयन्तौ भक्त्या सुदामादीन्देवमिवादृतावुपेतौ । न सर्वात्समाम्यम् । देवे यथा तद्योग्यतानुसारेणेति यथा देवे तथा गुराविति सूचितः श्रुत्यर्थः ॥ ३२ ॥

सुमनोरञ्जनी — यथा यथावत् । आसाद्य प्राप्य । दान्तौ निगृहीतेन्द्रियौ । गुरौ तद्विषये । अनिन्दितां वृत्तिमनुवृत्तिम् । न केवलं स्वयं किन्तु अन्यानपि सतीर्थान् ग्राहयन्तौ 'अस्माभिरप्येवं गुर्वनुवृत्तिः कार्या' इति बुद्धिमुत्पादयन्तौ । भक्त्या देवमिव देवं प्रतीव आदृतौ आदरं कुर्वन्तौ । उपेतौ स्म प्राप्तौ तौ । आदृतौ आदरेण स्वीकृतौ । गुरुणेति शेषः । यद्वा देवमिव देव इव । षट्सु द्वितीयेति सूत्रात् । गुरावनुवृत्तिं प्राप्य । भक्त्या भक्तिपूर्वम् । अनिन्दितां क्षत्रियाणामनिन्दिताम् । भिक्षाटनादिभिन्नामिति यावत् । तस्य क्षत्रियाणां निन्दितत्वात् । वृत्तिं अनुवृत्तिं गुरुसेवायामिति । देव इवेति सप्तम्यन्तपाठोऽपि दृश्यते ॥ ३२ ॥

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ॥ ३३ ॥

सत्यधर्मीया — शुद्धभावानुवृत्तिभिः शुद्धभावाः शुद्धभक्तिपूर्विका अनुवृत्तयः परिचर्यास्ताभिस्तुष्टो गुरुर्द्विजस्तयोरखिलान्वेदान्प्रोवाच । साङ्गोपनिषदः– शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गैः सहिता उपनिषदः ॥ ३३ ॥

सुमनोरञ्जनी — तयोः शुद्धः भावो भक्तिः, अनुवृत्तयः सेवाः । शुद्धभावेन शुद्धमनसा अनुवृत्तयस्ताभिर्वा । अङ्गानि शिक्षादीनि । उपनिषदश्च ताभिः सहितान् । अङ्गैः सहिताः उपनिषदश्चेति वा ॥ ३३ ॥

सरहस्यं धनुर्वेदं धर्मन्यायपथांस्तथा ।
तथा चांन्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥
सर्वं तदमरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ।
सकृन्निगदमात्रेण तौ सञ्जगृहतुर्नृप ॥ ३५ ॥

सत्यधर्मीया — प्रयोगोपसंहाररूपरहस्यसहितं धनुर्वेदम् । धर्मस्य पन्था धर्मपथो वर्णाश्रमाचाररूपो न्यायपथो नीतिमार्गास्तानान्वीक्षकीं तत्त्वविद्याम् । आन्वीक्षकी कुतर्काख्या तथैवान्वीक्षकी परेति मात्स्य इति प्रथमतात्पर्योक्तेरत्र तत्त्वविद्येत्यर्थः । षड्विधां राजनीतिम् । सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणान्कवयो विदुरित्युक्तप्रकारोपेतावमरश्रेष्ठौ सर्वविद्याप्रवर्तकौ तौ सर्वं सान्दीपन्युद्दीपितम् । सकृन्निगद एव निगदमात्रं तेनैकवारमुक्तित एव सञ्जगृहतुः ॥ ३४,३५ ॥

सुमनोरञ्जनी — सरहस्यं अस्त्रप्रयोगोपसंहारसहितम् । धर्मपथः धर्मशास्त्रम् । न्यायपथः ब्रह्मतर्कादितर्कशास्त्रम् । आन्वीक्षकीम् अन्वीक्षा मीमांसा । तत्सम्बन्धिनीं विद्यां शास्त्रम् । षड्विधां,

सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणान् कवयो विदुः ॥

इत्युक्तरीत्या षड्विधाम् ॥ ३४ ॥

अहोरात्रैश्चतुःषष्ट्या संयातौ तावतीः कलाः ।
गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप ॥ ३६ ॥

सत्यधर्मीया — चतुःषष्ट्या । वैशिष्ट्यं तृतीयार्थः । तत्सङ्ख्यापरिच्छेद्यैतावद्भिरहोरात्रैः कालावयवैस्तावतीर्विद्याः कलाः काश्चिदत्रोक्ताः काश्चिच्च वेदविद्यां नक्षत्रविद्यां सर्पविद्यामित्यादिनोक्ताश्चेति तावतीः । गीतादिविद्यानां ज्ञानमित्यन्तशैवतन्त्रगीताः कला इत्यपरे । संयातौ प्राप्तौ । आचार्यं गुरुदक्षिणया छन्दयामासतुः । वरय गुरो का च दक्षिणाऽपेक्षिता तामिति प्रार्थयामासतुः । अन्यथा न फलनं विद्यानामिति भावः ॥ ३६ ॥

सुमनोरञ्जनी — सकृन्निगदमात्रेण एकवारमुच्चारणमात्रेणैव । चतुःषष्ट्या तावत्संख्यायुक्तैः अहोरात्रैः । तावतीः तावत्सङ्ख्या कलाः विद्याः चतुःषष्टिविद्या इत्यर्थः । संयातौ सम्यक् प्राप्तौ । कृतविद्यौ शिक्षितविद्यौ । गुरुदक्षिणया तन्निमित्तं छन्दयामासतुः प्रार्थयामासतुः ॥ ३६ ॥

द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ।
सम्मन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयाम्बभूव ह ॥ ३७ ॥

सत्यधर्मीया — तयो रामकृष्णयोरद्भुतं तं महिमानं तथाऽतिमानुषीं मानुषीमतिक्रान्तां मतिं च संलक्ष्य द्विजः पत्न्या सम्मन्त्र्यालोच्य महार्णवे तत्रापि प्रभासक्षेत्रे मृतं बालं स्वपुत्रं वरयाम्बभूवा-वृणोत् ॥ ३७ ॥

सुमनोरञ्जनी — अतिमानुषीं मानुषीमतिक्रान्तां विलक्षणामित्यर्थः । मतिं संलक्ष्य । महार्णवे प्रभासे प्रभासक्षेत्रे । बालं स्वपुत्रम् । वरयांबभूव याचितवान् ॥ ३७ ॥

तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ ।
वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्विदित्वाऽर्हणमाहरत् तयोः ॥ ३८ ॥

सत्यधर्मीया — तथैव भवत्वित्युक्त्वा महारथौ रथमारुह्य प्रभासमासाद्य वेलां तीरमुपव्रज्य च क्षणं निषीदतुः । सिन्धुर्विदित्वा तयोरर्हणमहरत् । रामवदिमावपि मां शुष्कीकर्तुं क्षमाविति भीतः स स एवायात इति क्षणोक्त्या ध्वनयति ॥ ३८ ॥

सुमनोरञ्जनी — वेलां समुद्रस्य तीरम् । उपव्रज्य आगत्य । क्षणं निषीदतुः उपविशतुः । अर्हणं पूजां आहरत् कृतवानिति यावत् ॥ ३८ ॥

तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् ।
योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥

सत्यधर्मीया — तं वरुणं महतोर्मिणा तरङ्गेण । तरङ्ग ऊर्मिर्वा स्त्रियामित्यमरः । तदीयेन कृतमपि तेन कृतं भवतीति विदितपञ्चजनाह्वयव्यापारोऽपि तन्मुखेन वादयितुं त्वयेत्युक्तवानिति ज्ञेयम् ॥ ३९ ॥

सुमनोरञ्जनी — यो बालकः महता ऊर्मिणा त्वया ग्रस्तः असौ गुरुपुत्रः प्रदीयतामिति सम्बन्धः ॥

तमाह वरुणो देवो विनयावनतः स्थितः ।
नैवाहार्षमहं देव दैत्यः पञ्चजनोऽहरत् ॥ ४० ॥

सत्यधर्मीया — विनयावनतो देवो वरुणो हे देवेति सम्बोधनेन तद्धनन एक एव समर्थ इति ध्वनयति । अहं नाहार्षम् । कस्तर्ह्यपाहार्षीत्तं वदेत्यतो वदति । पञ्चजनाह्वयो दैत्योऽहार्षीदिति ॥ ४० ॥

सुमनोरञ्जनी — हे देव! अहं नाहार्षं नापहार्षं किं तु पञ्चजनाह्वयः दैत्यः अपाहार्षीत् ॥ ४० ॥

अन्तर्जलचरः कृष्ण शङ्खरूपधरोऽसुरः ।
जलमाविश्य तं हत्वा गृह्यतामित्युवाच सः ॥
ततस्तौ जलमाविश्य हत्वाऽन्तर्जलवासिनम् ।
विदार्य जठरं तस्य नापश्यदुदरेऽर्भकम् ॥ ४१ ॥

सत्यधर्मीया — अन्तर्जलं चरतीति स तथा । तदाकारमीरयति । शङ्खरूपस्य, धरतीति धर इति । जलमाविश्य तं दितिसुतं हत्वा गृह्यतां त्वया सुतः सान्दीपनेरिति स उवाच ॥ ४१ ॥

सुमनोरञ्जनी — तच्चिह्नमाह ॥ शङ्खयुक्तं रूपं शरीरम् । तस्य धरः शङ्खचिह्नित इत्यर्थः । स्वयन्तु मत्स्याकृतिर्गृह्यतां गुरुपुत्रः ॥ ४१ ॥

तदङ्गप्रभवं शङ्खमादाय रथमागमत् ॥ ४२ ॥

सत्यधर्मीया — जठरं विदार्य तत्र दीर्णे उदरे नापश्यन्न ददर्श । तदङ्गात्प्रभवतीति स तथा तं शङ्खम् ॥ ४२ ॥

सुमनोरञ्जनी — अन्तर्जलवासिनं जलान्तर्वासिनम् । तस्य पञ्चजनस्य अङ्गप्रभवं शरीरोद्भवम् ॥

ततः संयमनीं नाम यमस्य दयितां पुरीम् ।
गत्वा जनार्दनः शङ्खं प्रदध्मौ सहलायुधः ॥ ४३ ॥

सत्यधर्मीया — संयमिनीं नाम तन्नाम्नीम् । सहलायुध इति गमनमात्रे सहितता ॥ ४३ ॥

सुमनोरञ्जनी — संयमिनीं तत्संज्ञाम् ॥ ४३ ॥

शङ्खनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ।
तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितः ॥ ४४ ॥

सत्यधर्मीया — आकर्ण्यागत्य चेति शेषः ॥ ४४ ॥

सुमनोरञ्जनी — शङ्खस्य निह्रादं आध्वानम् । सपर्यां पूजाम् । भक्त्या उपबृंहितः पूर्णः ॥ ४४ ॥

उवाचावनतः कृष्णं सर्वभूताशयाश्रयम् ।
लीलामनुष्य हे विष्णो युवयोः करवाम किम् ।
इत्युक्तस्तेन देवेशो देवकीनन्दनोऽब्रवीत् ॥ ४५ ॥

सत्यधर्मीया — सर्वभूतानामाशयोऽन्तःकरणं हृदयमिति यावत् स एवाश्रयो यस्य तम् । हे लीलामनुष्य नीलचैल हे विष्णो कृष्ण युवयोः किं करवाम इति यम उवाच ॥ ४५ ॥

सुमनोरञ्जनी — सर्वभूतानामाशयो हृदयस्थानमालयो यस्य स तथा तम् । लीलार्थं मनुष्यवद्वर्तमान! तेन यमेन ॥ ४५ ॥

श्री भगवानुवाच—

गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम् ।
आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४६ ॥

सत्यधर्मीया — गुरुपुत्रमानीतं, स्वामिन्नानयो मया कृतस्तत्कृतं कर्म तथाऽवर्ततेति स आनीत इति सत्यं तथाऽपि मच्छासनं पुरस्कृतं येन स सन्निजकर्मबन्धनम् । एवं त्वत्तो मयाऽऽनीय पित्रे देयत्वे च निजकर्मनिबन्धनम् । आनयस्व ॥ ४६ ॥

सुमनोरञ्जनी — निजं स्वीयं कर्मैव निबन्धनं निमित्तमिहानयने यस्य तम् । मच्छासनं पुरस्कृतं येन सः । मदाज्ञां पुरस्कृत्येति यावत् ॥ ४६ ॥

तथेति तेनोपनीतं गुरुपुत्रं यदूत्तमौ ।
दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४७ ॥

सत्यधर्मीया — तेन यमेन सादृश्यसम्भाषणस्मृत्यादिकं सर्वं श्रीकृष्णकृपातो नचिकेतोवदिति ज्ञेयम् ॥ ४७ ॥

सुमनोरञ्जनी — तथेत्युक्त्वा । तेन यमेन उपनीतमानीतं गुरुपुत्रं दत्वा । भूयः पुनरपि । वृणीष्वेति वरयेति ॥ ४७ ॥

ततः प्रीतमना राजन्निदं वचनमब्रवीत् ।
सान्दीपिनि महाभागो रामकृष्णावरिन्दमौ ॥ ४८ ॥

सत्यधर्मीया — प्रीतमनास्सन्तुष्टमनाः ॥ ४८ ॥

सुमनोरञ्जनी — अरिन्दमौ शत्रुसंहारकौ ॥ ४८ ॥

सम्यक् सम्पादितौ वत्स भवद्भ्यां गुरुनिष्क्रिया ।
को नु युष्मद्विधगुरोः कामानामवशिष्यते ।
गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ ४९ ॥

सत्यधर्मीया — मुखतो मुख्योऽयमिति वत्सेति सम्बोधितवान् । यद्वा वत्सौ च तौ भवन्तौ चेति ताभ्याम् । गुरुनिष्क्रिया गुरुकृतप्रतिक्रिया सम्यक् सम्पादिता । वत्साविति पाठो निर्वत्सनाभिः । युष्मद्विधानां गुरोः कामानां काम्यानां विषयाणां मध्ये कः कामोऽवशिष्यते सर्वः सम्पूर्ण एव । स्वगृहं गच्छतं वां पावनी कीर्तिः पावनी लोकपावनी अस्तु ॥ ४९ ॥

सुमनोरञ्जनी — गुरुनिष्क्रिया गुरोर्निष्क्रिया प्रत्युपकृतिः । सम्यक् संपादिता कृता । युष्मद्विधानां यो गुरुः तस्य कामानां मध्ये को नु कामः अवशिष्यते अपूर्णो भवति न कोऽपि । सर्वकामपूर्तिर्भवतीति भावः ॥ ४९ ॥

गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ।
आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥ ५० ॥

सत्यधर्मीया — एवं साशीर्वचनम् ॥ ५० ॥

सुमनोरञ्जनी — अनिलरंहसा वायुवेगेन । पर्जन्यस्य मेघस्य निनदवत् निनदो घोषो यस्य तेन रथेन । तातेति परीक्षित्सम्बोधनम् ॥ ५० ॥

समनन्दन् प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ।
अपश्यन्त्यो बह्वहानि नष्टलब्धधना इव ॥ ५१ ॥

सत्यधर्मीया — बह्वहानि बहुदिनान्यपश्यन्त्यः प्रजा नष्टलब्धधना इव समनन्दंस्तुतुषुः ॥ ५१ ॥

सुमनोरञ्जनी — बहून्यहानि । अपश्यन्त्यः सर्वाः प्रजाः रामजनार्दनौ दृष्ट्वा । पूर्वं नष्टं अथ च लब्धं धनं यासां ताः । समनन्दन् आननन्दुः ॥ ५१ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे त्रिचत्वारिंशोऽध्यायः ॥

॥ अथ चतुश्चत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा ।
शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥

सत्यधर्मीया — भक्तिमत्यस्ता अहं च भक्त्यनुरक्तोऽतस्त्वं गोकुलं गत्वा मत्सन्देशैः समाधत्स्वे त्युद्धवं प्रेषयामासेति सकरुणो देव इति प्रतिपाद्यतेऽस्मिन्नध्याये । तत्रादौ तमुपदिदेशैवमिति शंसति शुक इत्याह ॥ श्रीशुक इति । वृष्णीनां प्रवरो मन्त्री अमात्य आलोचनापर इति वा दयितः सखा च बृहस्पतेः साक्षाच्छिष्यो बुद्धिसत्तमो बुद्धिः सती येषु ते बुद्धिसन्तस्तेषां श्रेष्ठ इति बुद्धिसत्तमः ॥ १ ॥

सुमनोरञ्जनी — भगवतो भक्तानुकंपिता निरूपयत्यस्मिन्नध्याये । दयितः प्रेष्ठः दयापात्रं वा । सखा मित्रम् ॥ १ ॥

तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् ।
गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥

सत्यधर्मीया — एकान्तिनमेकान्तभक्तं रहस्यप्रमेयनिरूपणयोग्यमिति वा ॥ २ ॥

सुमनोरञ्जनी — एकांतिनं भक्तम् । क्वचित् रहस्यस्थाने ॥ २ ॥

गच्छोद्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावह ।
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥ ३ ॥

सत्यधर्मीया — नः पित्रोर्यशोदानन्दयोस्तथा गोपीनां मद्वियोगाधिं मत्सन्देशैरेष आयस्यती-त्यादिभिर्विमोचय ॥ ३ ॥

सुमनोरञ्जनी — पित्रोः यशोदानन्दयोः । आवह प्रापय । मद्वियोगेन मद्विरहेण य आधिः मानसी व्यथा ताम् । मत्सन्देशैः मद्वचनैः ॥ ३ ॥

ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसाऽगताः ॥ ४ ॥

सत्यधर्मीया — तत्स्वभाववेदितारमप्युद्धवं प्रेमातिशयवशाद्देव आवेदयति ॥ ता इति ।

मन्मनस्काः मयि मनो यासां ताः । मत्प्राणा अहमेव जीवनं चेष्टको वा यासां ताष । मदर्थे मन्निमितं त्यक्तो दैहिको लज्जादिर्धर्मो याभिस्ताः । दयितं प्रेष्ठादपि प्रेष्ठं मामेवमात्मानं स्वामिनं मनसाऽत्रैवागता गात्रमात्रं तत्रेति तात्पर्यम् । पूर्वोक्ततन्मनस्कताविवरणपरमिदमिति केऽपि ॥ ४ ॥

सुमनोरञ्जनी — मय्येव प्राणाः इन्द्रियाणि यासां ताः । त्यक्ताः दैहिकाः देहानुबन्धिनो देहालङ्करणादयो वा याभिस्ताः । मामेव । प्रेष्ठं मुख्येष्टं दयितं पतिम् । आत्मानं स्वामिनं च । मनसा गताः ज्ञातवत्यः ॥ ४ ॥

ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम् ।
मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ ५ ॥
स्मरन्त्यङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविक्लवाः ।
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ॥ ६ ॥

सत्यधर्मीया — तद्वृत्तिरित्थं तत्र मद्वृत्तिरेवमिति सामान्यतस्तान्समान्यतासु पर्यवसाययन्देवो वक्ति ॥ य इति । लोकस्य देहस्य स्वर्गादिर्वा धर्मास्ते त्यक्ता यैस्ते । तेन त्यक्तेनेत्यादिवन्मद्दत्ता लोकधर्मा यैरिति वा । सर्वत्राप्यकेवलत्वान्नानिच् । मदर्थे मद्रूपार्थे विषये एतानहं बिभर्मि पोषयामि । बिभेमीति पाठे तान्निमित्तीकृत्य भीतामाप्रवानीति(?) वा । प्रेयसां प्रेष्ठेऽतिप्रियतमे मयि दूरस्थे त्रुटियुगीभवनवत्कोशाल्पतायामपि तदाक्रोशस्येत्थम्भवतीति दूरस्थ इत्युक्तिः । ता गोकुलस्त्रियो विरहौत्कण्ठ्यविक्लवा विरहेणोत्पन्नमौत्कण्ठ्यं दिदृक्षोत्कलिकता तेन विक्लवा विह्वलाः स्मरन्ति विमुह्यन्ति प्राणान्कथञ्चन दुर्दशातोऽतिकृच्छ्रेण बहुकष्टेन प्रायो धारयिष्यन्ति ॥ ५,६ ॥

सुमनोरञ्जनी — स्वस्य भक्तवत्सलतां प्रदर्शयन्नाह ॥ य इति । ये जनाः मदर्थे मन्निमित्तं मद्भजनार्थमिति यावत् । त्यक्तलोकधर्माः त्यक्तः लोकधर्मः स्रक्चन्दनादिविषयभोगलक्षणो यैस्ते । त्यक्तः लोकानां यो धर्मः फलकामनया कर्मकरणलक्षणो धर्मो यैस्त इति वा । ग्राम्यविषयविरक्ताः सन्तः काम्यकर्माकुर्वाणाः मामेव भजन्त इत्यर्थः । तान् बिभर्मि रक्षिताऽस्मि । गोकुलस्त्रियश्च, प्रेयसां पुत्रादीनां सकाशात्प्रेष्ठेऽतिप्रिये । तदेतत्पुत्रात्प्रेयो मित्रात्प्रेय इति श्रुतेः । एतादृशे दूरस्थेऽपि मयि ताः तादृशाः त्यक्तलोकधर्मा इत्यर्थः । पुत्रमित्रादिभ्यो मामेवातिप्रेयांसं मन्वानाः मदर्थं स्रक्चन्दनाद्यैहिकविषयाननुभवन्त्यो मदन्यफलकामनया किमपि कर्म न कुर्वन्तीति भावः ॥ मां स्मरन्ति । अथ च विरहेणोत्पन्नमौत्कण्ठ्यम् । तेन विक्लवाः विह्वलाः मुह्यन्ति । कथंचन कथमपि ॥ ५,६ ॥

प्रत्यागमनसन्देशैर्वक्तव्या मे मदात्मिकाः ।
इत्युक्त उद्धवो राजन् सन्देशान् भर्तुराद्दतः ॥ ७ ॥
आदाय रथमारुह्य प्रययौ नन्दगोकुलम् ।
प्राप्तो नन्दव्रजं श्रीमान् निम्लोचति विभावसौ ॥ ८ ॥

सत्यधर्मीया — मदात्मिका मन्मनस्काः प्रत्यागमनसन्देशैरायताक्ष्य आयाति नायको भजत त्यजत शोकमित्यादिरूपैर्वाक्यैर्वक्तव्यास्त्वया । सन्देशानाज्ञावचनानि श्रीमानुद्धवो विभावसौ सूर्ये । विभावसुर्दिनमणौ हारभेदे च पावक इति विश्वः । निम्लोचत्यस्तं गच्छति सति नन्दव्रजं प्राप्तः । विभौ सूर्ये निम्लोचति सत्यसौ उद्धवः प्राप्त इत्यन्वयः । दिवाकर इत्यपि पठन्ति ॥ ७,८ ॥

सुमनोरञ्जनी — मे प्रत्यागमनसन्देशैः श्रीकृष्ण आगमिष्यति युष्मन्निकटमित्यादिरूपैर्मम प्रत्यागमनबोधकवचनैः । मदात्मकाः मय्येव मनो यासां ताः । भर्तुः कृष्णस्य सन्देशान् आज्ञारूप-वचनानि । आद्दतः आदरयुक्तः सन् । आदाय स्वीकृत्य । विभावसौ सूर्ये । निम्लोचति सति अस्तंगते सति ॥ ७,८ ॥

छन्नयानः प्रविशतां पशूनां खुररेणुभिः ।
वासितार्थे नियुद्ध्यद्भिर्नादितं शुष्मिभिर्वृषैः ॥ ९ ॥

सत्यधर्मीया — गोधूलिलग्नसमय इति गोधूल्यो लग्ना इत्याह ॥ व्रजं प्रविशतां पशूनां खररेणुभिश्छन्नं यानं यस्य स वासितार्थे वृषानभिलषन्त्यो वासितास्तदर्थे नियुध्यद्भिर्द्वन्द्वयुद्धं कुर्वद्भिः शुष्मिभिर्वीर्यवृद्धिमद्भिर्बलिष्ठैर्वा गतम् । वृषैर्नादितम् ॥ ९ ॥

सुमनोरञ्जनी — प्रविशतां व्रजं प्रविशताम् । पशूनां खुररेणुभिः छन्नमाच्छादितं यानं रथो यस्य तथाविधः नन्दव्रजं प्राप्त इत्यन्वयः । कीदृशं व्रजमित्यतस्तं वर्णयति पञ्चभिः । वासितायाः कामुकायाः गोः अर्थे नियुध्यद्भिः परस्परं युद्धं कुर्वद्भिः । शुष्मं वीर्यं येषामस्ति ते शुष्मिणः तैः । वृषभैः नादितम् ॥ ९ ॥

धावन्तीभिश्च वास्राभिरूधोभारेण वत्सकान् ।
इतस्ततो विलङ्घद्भिर्गोवत्सैर्मण्डितं सितैः ॥ १० ॥
गोदोहशब्दाभिरवैर्वेणूनां निस्स्वनेन च ।
गायन्तीभिश्च कर्माणि शुभानि बलकृष्णयोः ॥ ११ ॥

स्वलङ्कृताभिर्गोपीभिर्गोपैश्च सुविराजितम् ।
अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ १२ ॥

सत्यधर्मीया— ऊधोभारेणान्विताभिर्वत्सकांस्तर्णकान्प्रति धावन्तीभिर्वास्राभिर्हम्बारवं कुर्वन्तीभिः सकृत्प्रसूता गावो वास्रास्ताभिः । तथा हि वास्रा अभिङ्वित्यृग्भाष्यटीकाटिप्पणेषु । वास्रा वचनशीलिनः । शब्दमात्रे वाश्यतिमङ्गीकृत्य ताच्छीलिको रो विहितः । वाशृ शब्दकुत्सायामित्युक्तेः । कथमत्र वचनं शास्त्रव्याख्यानमित्यत आह ॥ शब्दमात्र इतीति । प्रस्थानान्तरे तत्रैव वस्रेव विद्युदित्यत्र गौर्वत्समिव वस्रेव वत्सला माता गौरित्युक्तेः । परोऽप्येतद्व्याख्याने वत्सशब्दप्रयुक्तप्रस्रुतस्तनवती गोः स्फायितंचीत्यादिना वासृशब्द इत्यतो रगिति व्याजहार । तालव्यपाठः । इतस्ततो विलङ्घद्भिः सितैः शुभ्रैर्गोवत्सैर्मण्डितं गोदोहशब्दाज्जातोऽभितो रवः शब्दोत्पन्नशब्दान्तरं तद्युतं वेणूनां निःस्वनेन च बलकृष्णयोः शुभानि कर्माणि गायन्तीभिः स्वलङ्कृताभिर्गोपीभिर्गोपैश्च सुविराजितम् । गोपव्यापारं निरूपयति ॥ अग्न्यर्केत्यादिना ॥ १०-१२ ॥

सुमनोरञ्जनी — वास्राभिः वत्सलोलुपाभिः । ऊधोभारेण युक्ताभिः वत्सान् प्रति धावन्तीभिः गोभिः तथा इतस्ततो विलङ्घद्भिः उत्पतद्भिः शितैः शुभ्रैः गोवत्सैश्च मण्डितम् अलङ्कृतम् ॥ गवां दोहशब्दैः अभिरवं प्रतिध्वनियुक्तम् । शुभानि मङ्गलानि कर्माणि रासोत्सवादीनि । गायन्तीभिः गोपीभिः सुविराजितम् । धूपादिभिः पूजासाधनैः अग्न्यादीनामर्चनम् । तदन्वितैः गोपैः गोपावासैश्च गोपगृहैश्च मनोरमम् ॥ १०-१२ ॥

धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ।
सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥ १३ ॥

सत्यधर्मीया — गोपावासैर्गोपगृहैर्द्विजा अलयो भ्रमराश्च तेषां कुलैर्नादितम् ॥ १३ ॥

सुमनोरञ्जनी — द्विजाः शुकपिकादयः अलयो भ्रमरास्तेषां कुलं समुदायः ॥ १३ ॥

हंसकारण्डवाकीर्णैः पद्मषण्डैश्च मण्डितम् ।
तमागतं समालोक्य कृष्णस्यानुचरं प्रियम् ॥ १४ ॥

सत्यधर्मीया — पद्मषण्डैः पद्मखण्डैरिति पाठौ ॥ १४ ॥

सुमनोरञ्जनी — पद्मखण्डैः पद्मानां खण्डैः षण्डैः समूहैः । पद्मानां खण्डानि येषु तैः सरोभिर्वा ॥ १४ ॥

नन्दः प्रीतः परिष्वज्य वासुदेवधियाऽऽर्चयत् ।
भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ॥ १५ ॥

सत्यधर्मीया — वासुदेवधियाऽस्मिन्सत्कृते वासुदेव एव सत्कृतो भवतीति धीस्तयाऽऽचर्यद-पूजयत् । यथासुखं कशिपौ कार्पासगर्भास्तरणविशेषे ॥ १५ ॥

सुमनोरञ्जनी — वासुदेवधिया अस्मिन् पूजिते तदन्तर्गतो वासुदेव एव पूजित इति धिया ॥ कशिपौ तल्पे । सुखं यथा तथा । संविष्टम् । पादसंहननादिभिर्गतश्रमम् ॥ १५,१६ ॥

गतश्रमं पर्यपृच्छत् पादसंवाहनादिभिः ॥ १६ ॥

सत्यधर्मीया — पादसंवाहनादिभिर्गतश्रमं पर्यपृच्छत्पप्रच्छ ॥ १६ ॥

नन्द उवाच—

कच्चिदङ्ग महाभाग सखा नः शूरनन्दनः ।
आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १७ ॥

सत्यधर्मीया — मुक्तो निगडतः ॥ १७ ॥

सुमनोरञ्जनी — कच्चिदिति प्रश्नसूचकस्वरद्योतकम् । शूरनन्दनो वसुदेवः । बन्धनान्मुक्तः । अपत्याद्यैः पुत्राद्यैः युक्तः । सहृद्वृतः बन्धुयुतः । कुशल्यास्ते कच्चित् इति ॥ १७ ॥

दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना ।
साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥ १८ ॥

सत्यधर्मीया — यः सदा साधूनामित्यादिका कर्मणि षष्ठी । य इत्यावृत्तम् । यः स्त्रिय इति द्वितीया बहुवचनान्तं तत्कर्मसमर्पकमिति वा सम्पदो द्वेष्टीति यावत् ॥ १८ ॥

सुमनोरञ्जनी — यदूनां यदुभ्यः । यदूनिति वा । यः सदा द्वेष्टि स कंसः । स्वेन पाप्मना स्वपापकर्मणा । हत इति यत् तत् दिष्ट्या परमानन्दकरम् । दिष्ट्या दैवेनेति वा ॥ १८ ॥

अपि स्मरति नः कृष्णो मातरः सुहृदः सखीन् ॥
गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिम् ॥ १९ ॥

सत्यधर्मीया — गावो गा मातरो यास्ता वः समीपवर्तिन इवेति वा ॥ १९ ॥

सुमनोरञ्जनी — अपिशब्दः स्वरविशेषद्योतकः । कृष्णमातरः मातॄः मात्रादीन् । आत्मा स्वयमेव नाथो यस्य तं व्रजं वृन्दावनम् । गिरिं गोवर्धनं गावो गाश्च । अपि स्मरति स्मरति किम् ॥ १९ ॥

अप्यायास्यति गोविन्दः स्वजनान् सकृदीक्षितुम् ।
तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥ २० ॥
दावाग्नेर्वातवर्षाच्च वृषात् सर्पाच्च रक्षिताः ।
दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥ २१ ॥

सत्यधर्मीया — सकृदेकवारमपि । तर्हि सुनसं सु शोभना नासा यस्य तत् । टाबन्तता हलन्तत्वात् । सुस्मितेक्षणं तद्वक्त्रं द्रक्ष्याम । तत्कृतं सोपस्करं तं प्रति शंसति ॥ दावाग्नेरिति । अङ्गस्मरणाभावात्कथापूर्वापरीकारादिकं युक्तम् ॥ २०,२१ ॥

सुमनोरञ्जनी — सकृदपि एकवारमपि आयास्यति किम् । यद्यायास्यति तर्हि तद्वक्त्रं द्रक्ष्यामि ॥ दावादिभ्यः ततोऽन्येभ्यो दुरत्ययेभ्यो मृत्युभ्यश्च कृष्णेन रक्षिताः ॥ २०,२१ ॥

स्मरतां कृष्णवीर्याणि लीलापाङ्गनिरीक्षणम् ।
हसितं भाषितं चाङ्ग सर्वा नः शिथिलाः क्रियाः ॥ २२ ॥

सत्यधर्मीया — सर्वा नः क्रिया गृह्यकर्माणि शिथिला मनःप्राशस्त्याभावात् ॥ २२ ॥

सुमनोरञ्जनी — कृष्णस्य वीर्याणि पूतनावधादीनि । लीलया अपांगनिरीक्षणं कटाक्षवीक्षणम् । हसितं भाषितं कलभाषितं प्रौढभाषितं च स्मरतां नः सर्वा अपि क्रियाः शिथिलाः लुप्ताः असंपूर्णा वा ॥ २२ ॥

सरिच्छैलवनोद्देशान् मुकुन्दपदभूषितान् ।
आक्रीडानीक्षमाणानां मनो याति तदात्मताम् ॥ २३ ॥

सत्यधर्मीया — मुकुन्दपदभूषितांस्तच्चरणचिह्नान् आक्रीडानि क्रीडास्थानानि तत्साधनानीति वा मनस्तदात्मतां तद्व्याप्तताम् ॥ २३ ॥

सुमनोरञ्जनी — सरिच्छैलवनानामुद्देशान् प्रदेशान् । कथंभूतान् । मुकुन्दस्य पदैः पादविन्यासैः भूषितान् । आक्रीडानि क्रीडासाधनानि कन्दुकादीनि च । ईक्षमाणानां पश्यतां नः मनः, तदात्मतेव तदात्मता । तां तदेकलग्नतां याति ॥ २३ ॥

मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ।
सुराणां महदर्थाय गर्गस्य वचनं यथा ॥ २४ ॥

सत्यधर्मीया — पुरोधा यदुपदिदेश तदुपदिशति ॥ मन्य इति । सुराणामर्थाय प्रयोजनमुद्दिश्य सुरोत्तमावेवेह प्राप्ताविति गर्गस्य महदनन्यथाभवदिति वचनं यथा तथाऽहं सुरोत्तमौ मन्ये । अविस्मरणमात्रं ममालमिति ध्वनिः ॥ २४ ॥

सुमनोरञ्जनी — गर्गस्य वचनं यथा तथैव अहमपि मन्ये । किमिति । इह भूमौ । सुरोत्तमौ प्राप्तौ अवतीर्णाविति । कुतोऽवतीर्णावित्यत आह । सुराणां महते अर्थाय प्रयोजनायेति । आन्महत इत्यस्य स्थान्यादेशव्यत्ययेन समानाधिकरणजातीययोरित्यल्पाच्तरस्य पूर्वनिर्देशातिक्रमेण चानित्यत्वात् महदर्थायेति साधु ॥ २४ ॥

कंसं नागायुतबलं मल्लौ गजपतिं तथा ।
अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥ २५ ॥

सत्यधर्मीया — गजपतिं गजराजं गजेन सहितपतिरम्बष्ठस्तं वा । नागानामयुतस्येव बलं यस्य स तम् । मृगाधिपः सिंहः ॥ २५ ॥

सुमनोरञ्जनी — महापराक्रमेणापि इमौ सुरोत्तमौ मन्य इत्याह ॥ कंसमित्यादिना । नागायुतस्य प्राणो बलं यस्य तम् । मल्लावपि तथाविधौ । तथाविधं गजपतिं कुवलयापीडं चेत्येतान् लीलयैवावधिष्टाम् । मृगाधिपो व्याघ्रः ॥ २५ ॥

तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ।
बभञ्जैकेन हस्तेन सप्ताहमदधाद् गिरिम् ॥ २६ ॥

सत्यधर्मीया — यत्प्रसादात्सम्पादितं तन्महापुरुषतालत्रयपरिमितं कृतयुगीयतालत्रयपिरिमितं वाऽधुनातनांगुष्ठमध्यमाङ्गुलिवितत्यात्मकतालस्याल्पीयस्त्वात्तत्परिमाणतायां धनुषस्तनुत्वापत्तेः । ततश्चाद्भुतमित्यत्र हरिवंशे च तद्धनुः स्तम्भसन्निभमित्याद्युक्तिश्चानुपपन्ने स्यातामिति मन्तव्यम् । महासारं बहुदृढं धनुरिभराड्गजो यष्टिमिवेक्षुदण्डं वा कश्चित्काष्ठविशेषं वैकेन हस्तेन बभञ्ज । सप्ताहं गोवर्धनं गिरिम् ॥ २६ ॥

सुमनोरञ्जनी — अङ्गुष्ठमारभ्य मध्यमाङ्गुल्यग्रपर्यन्तं यत्परिमाणं तालः ।

प्रादेशः स्यात्प्रदेशिन्या तालो मध्यमया भवेत् ।
गोकर्णोऽनामया प्रोक्तो वितस्तिस्तु कनिष्ठया ।। इत्यभिधानात् ।

महासारं अतिदृढम् । इभराट् गजश्रेष्ठः । यष्टिं दण्डम् । इतोऽप्यधिकं कृतमित्याह ।। एकेनेति । सप्ताहं सप्ताहपर्यन्तम् ।। २६ ।।

प्रलम्बो धेनुकोऽरिष्टस्तृणावर्तो बकादयः ।
दैत्याः सुरासुरजितो हता येनेह लीलया ।। २७ ।।

सत्यधर्मीया — सुरासुरजितः सुराश्चासुराश्च सुरासुरं तज्जयन्तीति सुरासुरजितो येन लीलया हताः ।। २७ ।।

सुमनोरञ्जनी — येन रामेण । प्रलम्बो धेनुकश्च हतौ । येन च, सुरासुरान् जयन्तीति तथोक्ताः तृणावर्तादयः लीलयैव हताः । अतस्तावुभावपि सुरोत्तमौ मन्य इत्यन्वयः । येनेति हेत्वर्थं वा । यस्मादेताभ्यां हताः तस्मात्सुरोत्तमौ मन्य इति ।। २७ ।।

श्रीशुक उवाच—

इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः ।
अश्रुकण्ठोऽभवत् तूष्णीं प्रेमप्रसरविह्वलः ।। २८ ।।

सत्यधर्मीया — प्रेम्णां प्रसर आनन्दोदप्रवाहस्तेन विह्वलश्चश्चलोऽप्रतिभानात्पुरस्तूष्णीमभवत् ।। २८ ।।

सुमनोरञ्जनी — प्रेम्णः प्रसरो विस्तृतिः तेन विह्वलः विवशः । अश्रुपूरितकण्ठो वक्तुमक्षमः सन् तूष्णीं बभूवेति ।। २८ ।।

यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ।
शृण्वन्त्यश्रूण्यवास्राक्षीत् स्नेहस्नुतपयोधरा ।। २९ ।।

सत्यधर्मीया — स्नेहेन स्नुतौ पयोधरौ स्तनौ यस्यां साऽश्रूणि शीतान्यशीतानि चावास्रक्षीदुत्ससर्ज ।। २९ ।।

सुमनोरञ्जनी — यशोदा च नंदेन वर्ण्यमानानि कृष्णस्य चरितानि शृण्वन्ती अश्रूणि अस्राक्षीत् अमुंचत । स्नेहेन स्नुतौ द्रुतौ पयोधरौ यस्याः सा ।। २९ ।।

तयोरित्थं भगवति कृष्णे नन्दयशोदयोः ।
वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ ३० ॥

सत्यधर्मीया — तयोर्नन्दयशोदयोर्नन्दगोपयशोदयोर्नन्दश्चानन्दश्च यशश्च तौ ददत इति तयोः स्वकुलानन्दयशःप्रदयोरिति यावत् ॥ ३० ॥

सुमनोरञ्जनी — परमं निरतिशयं वीक्ष्य । मुदा युक्तः ॥ ३० ॥

उद्धव उवाच—

युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ।
नारायणेऽखिलगुरौ यत् कृता मतिरीदृशी ॥ ३१ ॥

सत्यधर्मीया — यद्यतोऽखिलगुरौ साक्षान्नारायणे युवाभ्यामीदृशी मतिः कृता तस्माद्युवामिह हे नन्द मानद यशोदे च देहिनां प्रशस्तशरीरभाजां तन्मध्ये श्लाघ्यतमौ सुस्तुत्यौन्नत्यौ नूनं निश्चयः । इहैतद्विषये मा नदाहं कियानिति विपरीतं न वदेत्यप्यर्थः ॥ ३१ ॥

सुमनोरञ्जनी — इह भूमौ । देहिनां देहधारिणां मध्ये । युवां श्लाघ्यतमौ अतीव श्लाघनीयौ प्रशंसनीयावित्यर्थः । कुतः । यत् यस्मात् अखिलगुरौ पितृभूते । यो नः पितेति श्रुतेः नारायणे ईदृशी परमस्नेहपूर्विका महत्वबुद्धिः कृता अत इत्यन्वयः ॥ ३१ ॥

एतौ हि विश्वस्य च बीजयोनी रामो मुकुन्दः पुरुषः प्रधानम् ।
अन्वीय भूतेषु विलक्षणेषु विज्ञाय चेशात इमौ पुराणौ ॥ ३२ ॥

सत्यधर्मीया — अखिलगुरुत्वं चैतस्मादित्याह ॥ एताविति । छत्रिनयेनेयमुक्तिर्वाऽऽवेशविवक्षया बलं सङ्कलय्येति ज्ञेयम् । एतौ रामकृष्णौ विश्वस्य प्रपञ्चस्य, बीजं च व्यञ्जकत्वान्नित्यं प्रति, योनिश्चानित्यं प्रति कारणत्वाद्बीजयोनी इत्युच्येते । अत्र मानं किमित्यतो वेदादिरेवेतीदमप्याह । बीजं नित्यं भगवद्व्यञ्जकमिति वेदादिशास्त्रं तदेव योनिरेतदाद्यर्थविनिगमकं ययोरिति शास्त्रयोनीत्यर्थः । प्रकृतिकृतताकथनं ब्रह्मस्रष्टृता कथमित्यत आह । प्रधानं प्रकृतिः पुरुषो हिरण्यगर्भः समवर्तताग्र इति श्रुतः, पुरुषावपीमाविति । परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युक्तेरेकशेषस्यापि तद्विशेषत्वादेतद्विस्तृतमधिकारश्च तद्धानिः प्रसङ्गादेव चिन्तिताविति साधुतट्टिप्पणीषु प्राच्युदञ्चितमस्माभिः स्कन्धान्तरविवृताविति ततोऽप्यनुसन्धेयम् । ईदूद इति प्रगृह्यतां प्रगृह्य प्लुतप्रगृह्या इति प्रकृतिभावः । पुरुषशब्दं स्वयं मूलकृव्द्याचर्करीति ॥ पुराण इति ॥ यथोक्तं गीताभाष्ये । पुरं देहमणतीति पुराणः पुरि शेत

इति पुरुष इति व्युत्पत्तिः सर्वासु एषपूर्षुस्त्र्येष पुरुष इति श्रुतेः । प्रकृतिकारणतावादस्तु प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः '। क्षोभयामास भगवान्सृष्ट्यर्थं जगतो विभुरित्याद्यावेदितगतिरेव। स्वसृष्टव्यक्तिं कृतेषु च विलक्षणेषु सुरनरतिर्यगादिनानाभेदकधर्मवत्सु । अन्वीयान्तः प्रविश्य विज्ञाय नित्यज्ञानावपि तद्विषयतां नीत्वेवेति विज्ञायेत्युक्तिः । एतद्ध्वननार्थमेवासन्धिः । इमौ प्रत्यक्षसिद्धौ । पुराणावादिकालिकौ । ईशाते प्रेरयतः । मानमिदमत्रेत्याह । भूतेषु विलक्षणेषु ब्रह्मलक्षणेष्विमौ इः इच्छाविषयस्य मा ज्ञानं ययोस्तौ पुराणौ देहाद्यन्तर्गतौ ईशाते इति ये विज्ञा विशेषज्ञानिनो व्यासादयो यः पुराणस्तत्रावदन्निति वेति । पुराणौ पद्मनाभदेहगतौ केशाविति यावत् । विलक्षणेषु दुर्लक्षणवत्सु दैतेयेषु भूतेषु भुव्यूतेषु प्रोतेषु पुरुषो ब्रह्माऽन्वीय प्रार्थयामास । तद्विज्ञायेशापद्मनाभेनोत्सृष्टाविमौ ते सकाशाज्जाताविति योजयन्ति । पुराणशब्दस्य पुल्लिङ्गता त्वितिहासपुराणाः पञ्चमो वेदानां वेद इति तत्त्वनिर्णये तथा पुराणशब्दस्य विशेष्यलिङ्गत्वाद्ग्रन्थविशेषणत्वेन पुल्लिङ्गत्वमेवाश्रितमिति तट्टीकायां चोक्तेः । ग्रन्थ इत्यध्याहृत्यान्वयः । ये विज्ञास्त एवैवमभ्यधुरिति वा । भूतेषु नित्यसत्ताकेषु विलक्षणेषु नानाशब्दलिङ्गादिविभिन्नेषु वेदादिष्वन्वीयोपक्रमादितात्पर्यलिङ्गैः सम्यग्विचार्य ये विज्ञाः ते इमौ पुराणौ ईशाते इत्यवदन्नत एतौ । उर्वरितं पूर्ववत् । तत्तु समन्वयादित्यादेरिति वा । विलक्षणेषु विगतं लक्षणं येषां तानि तेषु भूतेषु ये विज्ञाः तद्रक्षणादेर्विश्वस्य च तं कर्तुमिमौ पुराणौ मानवतनू-माप्तवन्तावन्वीय ईशाते इति ये विज्ञाः शिष्टं स्पष्टम् ॥ ३२ ॥

सुमनोरञ्जनी — इमौ सुरोत्तमौ मन्य इति यत्त्वयोक्तं तत्र न केवलं कंसहननादिबाह्यव्यापारेण इमौ सुरोत्तमौ मन्तव्यौ अपि तु जगत्सृष्ट्यादिमहामहिमोपेतत्वेनापीत्याह ॥ एताविति । एतौ रामकृष्णौ । विश्वस्य सर्वजगतः बीजयोनी उपादाननिमित्ते । कथम् । यतः इमौ रामकृष्णौ । प्रधानं पुरुषश्च । रामस्तु शेषांशत्वात्प्रधानैकदेशः । अहङ्काराभिमानित्वेन प्रधानमित्युच्यते । अभिमान्यभिमन्यमानयोर-भेदव्यपदेशदर्शनात् । कृष्णस्तत्प्रवर्तकः पुराणपुरुष इत्यर्थः । इमावेव विलक्षणेषु नानाविधेषु सुरनरतिर्यगादिषु भूतेषु प्राणिषु अन्वीय प्रविश्य, रामस्य मनोमानितया सर्वभूतसम्बन्धो ज्ञेयः । विज्ञाय तत्तद्योग्यतां ज्ञात्वा ईशाते प्रवर्तयतः अत एव पुराणौ । पुराणि अणयतः चेष्टयत इति । यद्वा कृष्णबलरामाविष्टभगवदंशयोर्विवक्षयैवेयं स्तुतिः । एतै पुरुषस्य बीजयोनी पूर्ववत् एताविति द्वित्वोक्त्याऽभेदो न शङ्क्य इत्याह ॥ इमौ द्वावपि पुराणः पुरुषः इति पुराणपुरुषभगवदंशावेवेत्यर्थः । कथं बीजत्वयोनित्वे इत्यतः प्रधानगतत्वादीक्षापूर्वप्रवृत्तित्वाच्चेत्याह ॥ प्रधानमिति । विज्ञाय बहुस्यां प्रजायेयेति । विज्ञाय आलोच्य स ईक्षांचक्र इति श्रुतेः । प्रधानं जगदुपादानभूतां प्रकृतिम् । अन्वीय प्रविश्य प्रकृतावनुप्रविश्येति श्रुतेः । तां प्रकृतिं विलक्षणेषु भूतेषु अन्वीय संयोज्य प्राकृतं स्थूलदेहं दत्वेति यावत् । तत्र स्वयमप्यन्वीय बहुप्रविश्य ईशाते प्रेरयत इति । अत एव इमौ पुराणाविति पूर्ववत् ॥ ३२ ॥

यस्मिन् जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धम् ।
निगृह्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥ ३३ ॥

सत्यधर्मीया — इतराशक्यापवर्गनिसर्गदातृत्वाज्जगतो जन्मादिकर्तेत्युक्तं युक्तमिति वक्ति ॥ यस्मिन्निति । जनो यज्जातो, यस्मिन्भगवति तव तोके । प्राणवियोगस्य कालः समयस्तस्मिन्विशुद्धं प्राक् साधनासादनेन, मनः क्षणमावेश्य कर्माशयं निगृह्य बहुशरीरापादकः कर्मसङ्घस्तं निगृह्योपमर्द्याशु परां गतिं ब्रह्ममयो हरिप्रधानोऽर्कवर्णः स्फटिकवर्णो वासुदेववर्णस्य तत्त्वादर्शनेन गच्छतोऽपि स एव वर्णो न्याय्यः । शुद्धस्फटिकसङ्काशं वासुदेवमित्यादेः । अर्के वर्णे स्फटिके रवाविति विश्वः । अर्कवर्णः सूर्यवर्ण इति । तस्यापि अथ येऽस्य दक्षिणा रश्मय इत्यारभ्य तद्वा एतद्यदेतदादित्यस्य शुक्लं रूपमित्यन्तेन छन्दोगोपनिषदुक्तेः शुक्लोऽपि वर्णः सम्भवतीति वा ॥ ३३ ॥

सुमनोरञ्जनी — मोक्षप्रदोऽप्ययमेवेत्याह ॥ यस्मिन्निति । विशुद्धं कामादिदोषविधुरम् । मनो यस्मिन्क्षणं निवेश्य । तेन कर्माशयं कर्मबन्धम् । निगृह्य विनाश्य । अर्कवर्णः सूर्य इव प्रकाशमानः आविर्भूतस्वरूप इति यावत् । ब्रह्ममयः ब्रह्मैकप्रधानकः । परां गतिं यातीति ॥ ३३ ॥

तस्मिन् भवन्तावखिलात्मयोनौ नारायणे कारणमर्त्यमूर्तौ ।

भावं व्यधत्तां नितरां महात्मन् किं वाऽवशिष्टं युवयोः सुकृत्यम् ॥ ३४ ॥

सत्यधर्मीया — अखिलानामात्मनां योनौ कारणे नारायणे कारणमर्त्यमूर्तौ कारण एव मर्त्या मूर्तिर्यस्य तस्मिन्कृष्णे महात्मन्महात्मनि परमे व्योमन्निितिवत् नितरां भावं भक्तिं व्यधत्तां व्यधतां कुरुतम् । युवयोः सुकृतमवशिष्टमुर्वरितं वा न किमपि सर्वं सुकृतं कृतमेवेत्यर्थः । भवन्तौ वर्तमाने काले हि महात्मन्नन्द त्वय्यखिलात्मनः सर्वस्वामिनो योनौ प्रादुर्भावस्थाने यशोदायां चेति युवयोः ॥ ३४ ॥

सुमनोरञ्जनी — यदा क्षणमात्रं मनोनिवेशेन जनाः परां गतिं प्राप्नुवन्ति तदा किं वक्तव्यं तस्मिन्नेव सदा समाविष्टचित्तौ युवां कृतकृत्याविातीत्याह ॥ तस्मिन्निति । तस्मिन् एवंविधे । अखिलानामात्मनां योनौ कारणे । अखिलस्य आत्मा स्वामी अन्तर्यामी वा आदानादिकर्ता वा । योनिः कारणं च तस्मिन् । कारणेन भूभारहरणलक्षणनिमित्तेन मर्त्यवत्प्रतीता मूर्तिर्यस्य तस्मिन्महात्मन् महात्मनि नारायणे । अतितरां निरन्तरम् । भावं भक्तिं व्यधत्तां व्यदधताम् । अतः युवयोः सुकृत्यं किमवशिष्टं न किमपीति ॥ ३४ ॥

आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ।
प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ॥ ३५ ॥

सत्यधर्मीया — पुष्कलशुष्ककथया क उद्धवो भवितोद्धवेत्यत आह ॥ आगमिष्यतीति । पित्रोर्युवयोः ॥ ३५ ॥

सुमनोरञ्जनी — अदीर्घेण अल्पेन । पित्रोः भवतोः प्रियं विधास्यते करोति ॥ ३५ ॥

हत्वां कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् ।
यदाह वः समागम्य कृष्णः सत्यं करोति तत् ॥ ३६ ॥

सत्यधर्मीया — प्रतीपं प्रतिकूलम् । वः समागम्य सङ्गम्य कृष्णो यदाह तत्सत्यं करोति । सर्वसात्वतां प्रतीपं विरोधं निमित्तीकृत्य यो यदाहावो य आहवो युद्धं यस्य तं कंसं हत्वा समागम्य यदाह च वचस्तत्सत्यं करोतीति वाऽन्वयः । यदाह वः कृष्णः कंसं समागम्य तं हत्वा यदाह तदिति वा ॥ ३६ ॥

सुमनोरञ्जनी — प्रतीपं प्रतिकूलम् । वः युष्मान् प्रति यदाह 'ज्ञातीन् नः द्रष्टुमेष्यामः' इति तत् सत्यं करोति ॥ ३६ ॥

मा खिद्येतां महाभागौ द्रक्ष्यथः कृष्णमन्तिके ।
अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३७ ॥

सत्यधर्मीया — हे महाभागौ! मा खिद्येतामन्तिकेऽल्पकाल एव द्रक्ष्यथः । ज्ञानिनां नायं पन्था इत्याह ॥ अन्तर्हृदीति । एधसि काष्ठे ज्योतिरग्निर्यथा तत्र मथनेनाभिव्यक्तस्तथाऽत्र विचारेऽभिव्यज्यत इति तद्ध्यानं कुरुतमिति तात्पर्यम् ॥ ३७ ॥

सुमनोरञ्जनी — अन्तिके समीपे । वस्तुतस्तु तस्य दूरस्थत्वमेव नास्तीत्याह ॥ अन्तरिति । स भूतानां हृद्यन्तरास्ते । एधसि अरणीरूपे काष्ठे ज्योतिरग्निरिव ॥ ३७ ॥

न ह्यस्यातिप्रयः कश्चिन्नाप्रियो वाऽस्त्यमानिनः ।
नोत्तमो नाधमो वाऽपि समानस्य समोऽपि वा ॥ ३८ ॥

सत्यधर्मीया — स च वर्तमानः प्राक् प्रियत्वादत्रेति सत्यमिदानीं तत्रत्याः प्रीतिपात्रमिति तद्धृदये वसेदिति न योग्यतामतिहाय प्रियादयस्तस्येत्याह ॥ न हीति । अस्यातिप्रियः कश्चिन्नास्त्यप्रियो वा न । तत्र तन्त्रममानिनोऽभिमानहीनस्येति । उत्तमो नाधमोऽपि न समो नासमोऽपि नह्यस्य स्वेच्छाबद्धद्वयप्रपञ्चस्य मध्य इति वा ॥ ३८ ॥

सुमनोरञ्जनी — सत्यं सर्वभूतानामन्तर्हृदयेऽस्तीति । स इदानीं न दृश्यते । श्रीकृष्णरूपेण च सर्वेषां दृश्यमानोऽपि स मधुरां गतः । स्वस्यातिप्रियात् मातापित्रादीन् विहाय किमिति जात्याप्यधमानस्मान्प्रत्यागच्छेतेत्यत आह ॥ अस्त्यमानिन इति । समानस्य सर्वभूतसमानस्य । यस्य अनुग्रहे विषये । जात्या उत्तमः अयं जात्या अधमः अयं सम इति नास्ति । तत्तद्योग्यतानुसारेण सर्वेष्वप्यनुग्रहं करोत्येवेत्यर्थः ॥ ३८ ॥

न माता न पिता तस्य न भार्या न सुतादयः ।
नात्मीयो न परश्चास्य न देहो जन्म कर्म वा ॥ ३९ ॥

सत्यधर्मीया — यशोदानन्दयोः कथान्तरकथनापदेशेनोभयोर्युवयोर्न मातृत्वपितृत्वे वस्तुकृते इत्युपदिशति ॥ नेति । सुतो धाता वर्तते न सुतादय इति कथं कथयसीत्यतोऽप्याह । यतः सुतादयो न विद्यते दया यस्य सोऽदयः सुते ब्रह्मण्यप्यदय इति सुतादयो नेत्युक्तिः॥ ब्रह्मचर्मशिरः पट्टीत्यादेः। नञ् योग्यतया सम्भवदन्वयः । उपपादितश्चायं प्रकारः प्राक् । नदेहो जन्म कर्म वा न । तर्हि कोऽयमित्यतोऽन्तरङ्गतो जल्पति ॥ न देह इति । नदे क्षीरवारिधावीहा चेष्टा यस्य स इति ॥ ३९ ॥

सुमनोरञ्जनी — शुक्लशोणितसम्बन्धाभावान्न मातापितरौ तस्येति भावः । भार्या रतिप्रदापि न नित्यतृप्तत्वादिति भावः । सुतादयोऽपि न । तज्जन्यागन्तुकसुखाभावात् । देहः प्राकृतः ॥ ३९ ॥

लोकेऽस्य जन्मकर्माणि सदसन्मिश्रयोनिषु ।
क्रीडार्थं सोऽपि साधूनां परित्राणाय कल्पते ॥ ४० ॥

सत्यधर्मीया — मत्तो जन्म साक्षात्सिद्धं कथमपलपसि उद्धवेत्यत आह ॥ लोक इति । सदसन्मिश्रयोनिषु सुरतिर्यङ्नरादिषु जन्म देहग्रहः कर्माणीति तदनुरूपाणि क्रीडार्थम् । लोकवत्तु लीलाकैवल्यमित्यादेः । न तेनास्यालब्धलाभ इति भावः । सोऽपीति जन्मपदार्थदेहपरामर्शः । साधूनां परित्राणाय रक्षायै कल्पते समर्थो भवति हेतुतयोपतिष्ठत इति यावत् । बृहद्भाष्यऋग्भाष्यटीका-गीतातात्पर्यादिकमुदाहृत्य प्राग्विवृतस्य विलोकनार्थपरामर्शसङ्गततावगता स्यादिति नापूर्वता ॥ ४० ॥

सुमनोरञ्जनी — जन्म देहान्तरप्राप्तिः । कर्म च नास्ति । अक्लिष्टकारित्वादिति भावः अकर्माऽ-क्लिष्टकारित्वादित्यादेः । तर्ह्येवंविधो भगवान् किमिति लोकेऽवतरतीत्यत आह ॥ लोक इति । लोके भूलोके । सदसन्मिश्रयोनिषु, सन्तो देवाः, असन्तः तिर्यग्जातयः, मिश्राः मनुष्याः तेषां योनि-ष्वित्यर्थः । अस्य यज्जन्म यानि च कर्माणि स सर्वोऽपि व्यापारः क्रीडार्थमेव कल्पते भवति । स कृष्णः जन्मादीनि क्रीडार्थं कल्पते कल्पयति करोतीति वा । किमिति निष्फला क्रीडा क्रियत इत्यतः

स्वप्रयोजनाभावेऽपि परप्रयोजनमस्तीत्याह ।। साधूनां परित्राणायेति । परित्राणाय साधूनां सम्भवामि युगे युग इत्युक्तेः ।। ४० ।।

सत्त्वं रजस्तम इति भजते निर्गुणो महान् ।
क्रीडन्ननीहोऽनुगुणैः सृजत्यवति हन्त्यजः ।। ४१ ।।

सत्यधर्मीया — सृजत्यवति हन्तीत्यानुगुण्येन रजस्सत्त्वं तम इति विनिमयो ज्ञेयस्तत्तत्कर्मानुगुणैः ।। ४१ ।।

सुमनोरञ्जनी — अनीहः अक्लिष्टकारी भगवान् । स्वयं निर्गुणोऽपि गुणबन्धशून्योऽपि क्रीडन् लीलयेति यावत् । सत्वरजस्तम इत्युक्तान् गुणान् भजते स्वीकरोति । स्वयं गमनसमर्थस्यापि लीलया दण्डमवष्टभ्य गमनवत् । अत्र गुणस्वीकारो नाम गुणानां कार्योन्मुखतया उज्जृंभणमेव । निर्गुणस्य गुणादानं प्रकृतेर्गुणवर्धनमित्याचार्यचरणैर्वक्ष्यमाणत्वात् । अनुगुणैः स्वाधीनैः सत्वादिभिः सृष्ट्यादिकं करोतीत्यर्थः ।। ४१ ।।

युवयोरेव नैवायमात्मजो भगवान् हरिः ।
सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ।। ४२ ।।

सत्यधर्मीया — आत्मज आत्मनि जायते प्रादुर्भवतीत्यन्तर्बहिस्तु सर्वोद्धारकत्वात् ।। ४२ ।।

सुमनोरञ्जनी — युवयोरेवात्मज इति न किंतु सर्वेषामात्मजादिः । कुतः । आत्मा । हि यस्मात् आत् आदेयं सुखं मा मापयति अनुभावयतीति । आत्मजादिषु स्थित्वा आनन्ददानादिति भावः ।।४२।।

दृष्टं श्रुतं भूतभवद्भविष्यत् स्थास्नु चरिष्णुमहदल्पकं च ।
विनाऽच्युताद् वस्तुतया न चान्यत् स एव सर्वं परमार्थरूपः ।। ४३ ।।

सत्यधर्मीया — इदानीं रहस्यमुपदिश्य समादधति ।। दृष्टमिति । दृष्टं प्रात्यक्षिकं श्रुतं धर्माद्यतीन्द्रियं भूतेनातीतेन सहितं च तद्भवद्वर्तमानं भविष्यद्भावि स्थास्नु स्थावरं चरिष्णु जङ्गमं महद्गगनादिकमल्पकं परमाण्वादिकमन्यन्मध्यमपरिमाणोपेतं चेत्येतत्सर्वमच्युताद्विना वस्तुतया शक्तत्वेन । अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विति भण्यत इति प्रथमतात्पर्योक्तेः । न चास्ति । परमार्थो मुख्यार्थस्तदात्मेति परमार्थरूपः स एव भगवानेव माता पितेश्वर आत्मजश्चेत्यतीतेनान्वयः ।। ४३ ।।

सुमनोरञ्जनी — किं बहुनोक्तेन निष्कृष्टं तत्त्वं ब्रवीमीत्याह ।। दृष्टमिति । भूतं अतीतम् । भवत् वर्तमानम् । भविष्यच्च यच्छ्रुतं दृष्टं वा । स्थास्नुः स्थावरम् । चरिष्णुः जङ्गमम् । महत् अव्याकृता-

काशम् । अल्पकं भूतसूक्ष्मम् । अन्यत् एतदन्यच्च । तत्सर्वं अच्युताद्भिना वस्तुतया च स्वातन्त्र्येण नास्ति । किं तु सर्वं स एव तदधीनमेव । अतः स एव परमार्थरूपः सर्वोत्तमवस्तुरूप इत्यर्थः । यद्वा सर्वम् अच्युताद्भिना नास्तीत्युक्ते तर्हि किमच्युतात्मकमेवेत्यतो नेत्याह ॥ अन्यदिति । तद्भिन्नमित्यर्थः ॥ ४३ ॥

श्रीशुक उवाच—

एवं निशा सा ब्रुवतोर्व्यतीता नन्दस्य कृष्णानुचरस्य राजन् ।
गोप्यः समुत्थाय निरूप्य दीपान् वास्तून् समभ्यर्च्य दधीन्यमन्थन् ॥ ४४ ॥

सत्यधर्मीया — सा निशा रात्रिर्यदा नन्दस्य कृष्णानुचरस्यैवं संवदतोरेतयोर्व्यतीता गता । तदा गोप्यः समुत्थाय दीपान्निरूप्य स्तम्भाद्युपरि स्थापयित्वा । रूप उपरिभाव इति धातुः । सुभद्रां रथमारोप्येत्यादिवदिति प्रथमतात्पर्योक्तेः । वास्तून्गृहद्वाराधस्तनकाष्ठादिनिष्ठदेवताः समभ्यर्च्य दध्यक्षतादिभिः पूजयित्वा दधीन्यमन्थन्ममन्थुः ॥ ४४ ॥

सुमनोरञ्जनी — कृष्णानुचरस्य उद्धवस्य नन्दस्य चेत्येतयोः ब्रुवतोः एवं श्रीकृष्णकथालापं कुर्वतोः तेनैव सा निशा व्यतीता यदा तदा गोप्यः तल्पात्समुत्थाय । दीपान्निरूप्य प्रबोध्य । वास्तून् गृहान् समभ्यर्च्य अनुलेपनादिना । अमन्थन् ममन्थुः ॥ ४४ ॥

ता दीपदीप्तैर्मणिभिर्विरेजू रज्ज्वाविकर्षोज्वलकङ्कणाः स्रजः ।
चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः ॥ ४५ ॥

सत्यधर्मीया — दीपैर्दीप्ताश्च ते मणयश्च तैर्दीपा दीप्ता यैस्ते च ते तैरिति वा मणिभिर्विरेजुः । रज्जुविकर्षणोच्चलकङ्कणाः स्रज इति पाठः । रज्ज्वा विकर्षेणोज्वलाः कङ्कणा यासां ताः । रज्ज्वा-विकर्षच्चलकङ्कणाः स्त्रिय इति पाठे रज्जुमाकर्षन्तः करास्तेषु चलाः कङ्कणा यासां ताः स्त्रिय इत्यर्थः । चलन्ति नितम्बस्तनहारकुण्डलानि तैस्त्विषन्तः काशमानाः कपोला यासां ताश्चारुणं कुङ्कुमं तेन युतमाननं यासां ता अमन्थन्नित्यतीतेनान्वयः ॥ ४५ ॥

सुमनोरञ्जनी — रज्ज्वा विकर्षतः इतस्तत आकृष्टः अत एव चलाः चञ्चलाः कङ्कणाः कर-भूषणानि यासां ताः रज्ज्वाविकर्षादिति पाठः सुगमः पन्थाः । रज्ज्वाः मथनरज्ज्वोः विकर्षात् विकर्ष-णात् इति । चलन्नितम्बस्तनहाराश्च कुण्डलैः त्विषन्ति कान्तियुक्तानि कपोलानि येषु तानि च तानि अरुणकुङ्कुमाननानि यासां ताश्च ॥ ४५ ॥

उद्गायतीनामरविन्दलोचनं व्रजाङ्गनानां दिवमस्पृशद् ध्वनिः ।
दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममङ्गलम् ॥ ४६ ॥

सत्यधर्मीया — अरविन्दलोचनं श्रीकृष्णमुद्गायन्तीनां सा ध्वनिर्दिवमस्पृशत् । उच्चैष्ट्वे तात्पर्यम् । सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यत इति प्रथमतात्पर्योक्तेः । स च दध्नश्च निर्मन्थनशब्देन मिश्रितः । दध्नां चेति क्वाचित्कोऽपि पाठो दधीन्यमन्थन्नित्यनुगुणः । दध्नश्चेति पाठ एकवचनं मथनसमकालीनतां ध्वनयति । येन श्रुतेन ध्वनिना दिशां तद्गतजनानाममङ्गलं निरस्यते । न केवलमनिष्टनिवृत्ति-रिष्टप्राप्तिरप्यस्तीत्यप्याह ॥ दिशामेति । उद्गायन्तीनां मङ्गलं दिशामेति दिशां दिग्देवतानां ध्वनिश्च भुवमस्पृशत इति वा ॥ ४६ ॥

सुमनोरञ्जनी — अरविन्दलोचनं कृष्णम् उद्गायतीनाम् उच्चैर्गायन्तीनां व्रजाङ्गनानां ध्वनिः । दध्नो निर्मन्थनशब्देन मिश्रितः दिवमस्पृशत् । येन ध्वनिना । दिशां तद्वासिनाम् । अमङ्गलम् अशुभं निरस्यते नश्यति ॥ ४६ ॥

भगवत्युदिते सूर्ये व्रजद्वारि व्रजौकसः ।
दृष्ट्वा रथं शातकौम्भं कस्यायमिति चाब्रुवन् ॥ ४७ ॥

सत्यधर्मीया — भगवति पूज्ये सूर्ये उदिते सति व्रजौकसौ गोप्यो व्रजद्वारि शातकौम्भं सुवर्णमयं रथं दृष्ट्वा कस्यायं रथ इति चाब्रुवन् ॥ ४७ ॥

सुमनोरञ्जनी — शातकौंभं सुवर्णमयम् ॥ ४७,४८ ॥

अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः ।
येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥ ४८ ॥

सत्यधर्मीया — यः कंसस्यार्थसाधक एकदेशान्वयस्तु नित्यसापेक्षत्वाद्युक्तः । सोऽक्रूरः किं वाऽऽगतो येन कमललोचनः कृष्णो मधुरापुरीं नीतः सः ॥ ४८ ॥

किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिम् ।
इति स्त्रीणां वदन्तीनामुद्धवोऽगात् कृताह्निकः ॥ ४९ ॥

सत्यधर्मीया — कर्तव्यान्तरं न दृश्यते ? स कुत आगच्छेदित्यतः प्रेतस्याभिप्रेतं किं वा कर्तुमिति प्राचीनभीतित उत्प्रेक्ष्योत्पलाक्ष्यो वदन्ति ॥ किमिति । प्रेतस्य मृतस्य भर्तुः स्वस्वामिनः

कंसस्य निष्कृतिमानृण्यमस्माभिः प्रत्यक्षतो हताभिः साधयिष्यति किमित्यन्वयः । इति स्त्रीणां वदन्तीनां कृताह्निकः कृतप्रातःसन्ध्योपास्त्यादिक उद्धवोऽगाद्यत्र ता आसते तं देशम् ॥ ४९ ॥

सुमनोरञ्जनी — किंशब्दो वितर्के । काश्चिदाहुः । आगच्छतु नाम । प्रेतस्य मृतस्य भर्तुः स्वभर्तुः कंसस्य । अस्माभिः निष्कृतिं किं साधयति न किमपि । कृताह्निकः कृतप्रातराह्निकः ॥ ४९ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे चतुश्चत्वारिंशोऽध्यायः ॥

॥ अथ पञ्चचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलम्बबाहुं नवकञ्जलोचनम् ।
पीताम्बरं पुष्करमालिनं लसन्मुखारविन्दं परिमृष्टकुण्डलम् ॥ १ ॥

सत्यधर्मीया — गोपस्त्रीव्याजोक्तिरप्यव्याजभक्तिपूर्विकेति निरूपयत्यस्मिन्नध्याये । तत्रादौ तासामुद्धवदर्शनात्सोद्धवानां प्रश्नप्रकारं वक्तुमाह ॥ तं वीक्ष्येति । व्रजस्त्रियः प्रलम्बवाहुं नवकञ्जलोचनं पीताम्बरं पुष्कराणां मालाऽस्तीति तं लसन्मुखारविन्दं यस्य स तं परिमृष्टे निष्टप्ताष्टपदवद्द्योतमाने कुण्डले यस्य तम् । एतद्विशेषणैस्तत्किङ्करीभवनयोग्यताऽस्य ध्वन्यते ॥ १ ॥

सुमनोरञ्जनी — भगवति भक्तिः कार्येत्युक्तम् । भक्तिर्नाम स्वात्मात्मीयसमस्तवस्तुभ्योऽनेकगुणाधिकोऽन्तरायसहस्रेणाप्यप्रतिबद्धनिरन्तरप्रेमप्रवाह एव । तस्य चासम्भावनाशङ्कामपाकर्तुं गोपस्त्रीनिष्ठां निरन्तरां प्रेमपरंपरां प्रदर्शयति तद्व्यामोहोक्त्यनुवादव्याजेनास्मिन्नध्याये । तत्रादौ गोपस्त्रीणामुद्धवदर्शनं तेन सह संवादं च दर्शयति ॥ तमित्यादिना । प्रलम्बौ बाहू यस्य तम् । नवकंजे इव लोचने यस्य । पीतमम्बरं परिधानीयं यस्य तम् । पुष्कराणां कमलानां माला यस्य । प्रशंसायामिनिः । परिमृष्टे निर्णिक्ते द्योतमाने इति यावत् कुण्डले यस्य तं उद्धवं वीक्ष्य ॥ १ ॥

सुविस्मिताः कोऽयमतीवदर्शनः कुतश्च कस्याच्युतवेषभूषणः ।
इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदाम्बुजाश्रयम् ॥ २ ॥

सत्यधर्मीया — अतीवदर्शनोऽतीवेति निपातोऽखण्डः प्रशस्त्यर्थेऽतीव प्रशस्ततमं दर्शनं यस्य सः । कुत आगतः कस्य किंसम्बन्धी । अच्युतस्येव वेषो भूषणानि च यस्य सोऽयं क इति सर्वाः सुविस्मिता उत्सुका उदन्तश्रवणसमुत्सुका उत्तमश्लोकपदाम्बुजाश्रयं तं वेषभूषादिभिस्तथोहितं परिवव्रुः ॥ २ ॥

सुमनोरञ्जनी — सुविस्मिताः संजातविस्मयाः सत्यो अयं, अतीव दर्शनः दृश्यत इति दर्शनः दर्शनीय इत्यर्थः । तत्रापि अच्युतस्य कृष्णस्येव वेषभूषणानि यस्य सः एवंविधः कः, कुतो देशादागत इति ब्रुवन्त्यः । ज्ञातुमिच्छायां त्वराद्योतकं द्विर्वचनम् । सर्वाः गोप्यः उत्तमश्लोकस्य पदाम्बुजे आश्रयो यस्य तं हरिभक्तमित्यर्थः । तं परिवव्रुः परितो वलयाकारेण स्थिता इत्यर्थः ॥२॥

तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ।
रहस्यपृच्छन्परिविष्टमासने विज्ञाय सन्देशहरं रमापतेः ॥ ३ ॥

सत्यधर्मीया — प्रश्रयेण भक्त्याऽवनताः । सव्रीडहासेक्षणसूनृतादिभिः प्रियं सत्यं च सूनृतमित्यादेर्यथार्थवाग्भिः प्रियवाग्भिर्वा सुसत्कृतमासने स्वदत्ते परिविष्टं रमापतेः सन्देशहरं विज्ञाय रहस्येकान्तेऽपृच्छन् ॥ ३ ॥

सुमनोरञ्जनी — रमापतेः कृष्णस्य सन्देशहरं आज्ञाधारकं विज्ञाय । प्रश्रयेण विनयेन अवनता नम्राः । सव्रीडहासेक्षणे सूनृतानि प्रियवचनानि । प्रियं सत्यं च सूनृतमित्यभिधानात् । आदिशब्देनार्घ्यादीनि तैः सु सत्कृतम् । रहसि, आसने परिविष्टमुपविष्टम् । अपृच्छन् प्रश्नवचनम् अब्रुवन् ॥३॥

गोप्य ऊचु—

जानीमस्त्वां यदुपतेः पार्षदार्यमनुव्रतम् ।
भर्त्रेह प्रेषितः पित्रोर्भवान् प्रियचिकीर्षया ॥ ४ ॥

सत्यधर्मीया — सेर्ष्यप्रेमनिर्भरचित्ताः प्रियप्रेषितत्वं निश्चित्यात्मानमतद्विषयीकृत्य कृत्यान्तरमेवोत्प्रेक्ष्याप्राक्षुरुद्धवमित्याह ॥ गोप्य इति । यदुपतेः पार्श्वदेष्वार्यस्तं प्रेष्यप्रमुखम् । अनुव्रतं सदा तदनुचरं त्वां वयं जानीमः प्रायः भवान्भर्त्रा स्वामिना पित्रोर्यशोदानन्दयोः प्रियचिकीर्षयेह प्रेषितः ॥ ४ ॥

सुमनोरञ्जनी — किमब्रुवन्निति तदाह ॥ जानीम इत्यादिना । त्वां यदुपते! पार्षदेषु भृत्येषु आर्य श्रेष्ठम् । अनुव्रतम् अनुकूलम् । जानीमः । स भवान्, पित्रोः यशोदानन्दयोः प्रियचिकीर्षया । भर्त्रा स्वामिना श्रीकृष्णेन प्रेषित इत्यपि जानीमः ॥ ४ ॥

अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ।
स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यजः ॥ ५ ॥

सत्यधर्मीया — अन्यथा पित्रर्थं न प्रेषणं चेत् । गोव्रजे । स कीचकैर्मारुतपूर्णरन्ध्रैरित्यादिवद्व्रजपदं स्थानमात्रवाचीति गोस्थाने गोष्ठ इति यावदिति केऽपि । तत्स्मरणीयं रमणीयं किञ्चिन्न

चक्ष्महे । पश्यामः । गवां व्रजः समूहो यत्र तस्मिन्नित्यपरे । तस्य स्मरणीयं व्रजे न च चक्ष्महे अन्यथा सति पित्रादिकं विना रमणीये स्मरणीये नेति वदन्ति । नास्माकं मिथ्यावादित्वेनागोऽपराधः स्यादित्यन्वयो वा । तस्य तत्सम्बन्ध्यागो व्रजेऽस्मत्समूहे स्यादिति वा । आगो मन्तुरिति गतम् । पित्रादिरपि कृत्याभावाद्धामिन्यः कुतः स्मरणीयतेत्यतः कैमुत्येन तद्दुस्त्यजतामावेदयति । स्नेहानुबन्धो मुनेरपि दुस्त्यजः सन्यासिनो दुस्त्यजः कथा का कन्याशिनः कृष्णस्येति ॥ ५ ॥

सुमनोरञ्जनी — अन्यथा यशोदानन्दयोः प्रियचिकीर्षाभावे । अन्यथा यशोदानन्दौ विहाय गवां व्रजः समुदायो यस्मिंस्तस्मिन् । तस्य स्मरणीयं स्मारकं स्मरणयोग्यं वा वस्तु । न चक्ष्महे न पश्यामः। गोव्रजे इति नन्दयशोदे विहाय अन्यान्पशुप्रायान्मन्यते । कथं स्मरतीति सेर्ष्या कोपोक्तिः । युक्तं च तत्स्मरणमित्याहुः । बन्धूनां यः परस्परं स्नेहानुबन्धः बन्धुत्वप्रयुक्तः स्नेहानुबन्ध इति भावः ॥ ५ ॥

अन्येष्वर्थकृता मैत्री यावदर्थविडम्बना ।
पुम्भिः स्त्रीषु कृता यद्वत् सुमनस्स्विव षट्पदैः ॥ ६ ॥

सत्यधर्मीया — अन्येषु पित्रादिव्यतिरिक्तेषु मैत्री यावदर्थविडम्बना यावदर्थं प्रयोजन-निष्पत्ति-पर्यन्तं विडम्बनमनुकरणं यस्याः सा स्वप्रयोजनानन्तरं पुनर्न स्मरतीति यावत् । तत्र निदर्शनं स्वानुभूतमन्यापदेशेन वदन्ति ॥ पुम्भिरिति । अनेन प्रातिस्विकमेकामेकामुद्दिश्यैवैकमेकमाकारं स्वीकृतवन्तं भगवन्तं कटाक्षयन्तीति ध्वनिः । पुरुषैः स्त्री यद्वदर्थकृता तथेति । केचित्काश्चिल्लक्षीकृत्य प्राक्तनीस्त्यजन्ति । केचिच्च विरक्तास्त्यजन्तीत्यनिर्णयरत्यस्वरसादन्या दृष्ट्वा त्यजन्तीति । एतदनुरूपं दृष्टान्तान्तरमाहुः । सुमनस्सु पुष्पेषु षट्पदैर्भ्रमरैरिवेति । अर्थान्नापराध आचरितोऽस्माभिर्वयं शोभन मनस्कास्तास्वप्येवं कृतमिति नाथघ्नतां ध्वनयन्ति । सरसं कुसुमान्तरं दृष्ट्वैव पूर्वतरं पुष्पं त्यजन्तो भजन्ति भृङ्गास्तद्वदेते पुमांस इति भावः । सत्यां षट्समयपदतायां प्रतिपाद्यतायामपि तैर्महात्मभिरिमां दशां नीता वयमहोऽस्मद्दौर्भाग्यमिति षट्पदैरित्यनेन ध्वन्यते । स्त्रीषुकृतेति पदमेकं वा । स्त्रीष्विषुभिः पञ्चबाणकृता तत्पीडानिमित्ता मैत्रीति वा ॥ ६ ॥

सुमनोरञ्जनी — युष्मास्वपि स्नेहानुबन्धसत्वात्कथमुच्यते बन्धूनामिति तत्राहुः । अन्येषु बन्धुव्यतिरिक्तेषु । या मैत्री सा अर्थकृता प्रयोजननिबन्धना । अत एव यावदर्थं प्रयोजनावाप्तिपर्यन्तं विडम्बनं अनुकरणमात्रं यस्याः सा । मैत्र्या अनुकरणमात्रमेव न तु वस्तुतः । तदपि यावदर्थमेवेति भावः । तत्र दृष्टान्तद्वयमाह ॥ पुंभिः परपुरुषैः स्त्रीषु कृता मैत्री यद्वत् यावदर्थविडम्बना तथा । एवं षट्पदैः भ्रमरैः सुमनस्सु इव पुष्पेषु मकरन्दावाप्तिपर्यन्तमेव तेषु स्नेहो भृङ्गानां यथा तथेति ॥ ६ ॥

निस्स्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ।
अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥ ७ ॥

सत्यधर्मीया — बहुदृष्टान्तैः कृष्णान्तःकरणस्योपलतुलतां ललनाः स्फोरयन्त्यो विरहाग्निमस्फोरयन्त्यश्च सन्देशश्रवणालुतया वदन्ति ॥ निःस्वमिति ॥ सकारद्वयं वा स एको वाऽर्थः समः । निःस्वं निर्वृत्तं गणिका वारनार्यः । प्रजा नृपतिमकल्पं स्वरक्षणादक्षमधीतविद्या विनेया आचार्यमुपदेशकं दत्ता दक्षिणा येन तम् । यजमानमृत्विजस्त्यजन्ति ॥ ७ ॥

सुमनोरञ्जनी — इदं लोके दृष्टमित्याहुः ॥ निःस्वमिति । गणिकाः वाराङ्गनाः निःस्वं द्रव्यहीनम् । अकल्पं प्रजापालनादावसमर्थम् । अधीतविद्याः शिष्याः । दत्ता दक्षिणा येन तं यजमानम् ॥ ७ ॥

खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ।
दग्धं मृगास्तथाऽरण्यं जारो भुक्त्वा परस्त्रियम् ॥ ८ ॥

सत्यधर्मीया — खगा वीतफलं गलितफलं वृक्षम् । अतिथयो भुक्त्वा तद्गृहम् । मृगा दग्धं दावतोऽरण्यम् । यदर्थं निःस्वमित्याद्युक्तिस्तं पक्षमधिक्षिपन्ति ॥ जार इति । जारः परस्त्रियं भुक्त्वा त्यजतीति । एकल एकलां किल संल्लाल्य त्यजञ्जारानरोचत उच्च इत्यस्मभ्यं ह्यस्तनप्रमेयं हा किं कथनीयमित्येकवचनेन ध्वन्यते ॥ ८ ॥

सुमनोरञ्जनी — वीतफलम् अपगतफलम् । जारः उपपतिः । यथायोग्यं वचनव्यत्ययेन यजन्तीत्याकृष्यते । इत्यब्रुवन्नितीतिशब्दाध्याहारेण योज्यम् ॥ ८ ॥

श्रीशुक उवाच—

ददर्श गोपीर्गोविन्दमनोवाग्देहचेष्टितैः ।
कृष्णदूतो व्रजं प्राप्त उद्धवस्त्यक्तलौकिकाः ॥ ९ ॥

सत्यधर्मीया — एवं सुदतीषु वदन्तीषु सद्धवनिमित्तमुद्धवः किं पुरतोऽकरोदित्यत ईरयति शुकः ॥ ददर्शेति । गोविन्दमनोवाग्देहचेष्टितैर्गोविन्दस्य तत्रार्पितत्वेन तत्सम्बन्धीनि मनोवाग्देहचेष्टितानि तैर्निमित्तैस्त्यक्तलौकिका मुक्तलौकिकव्यापारा व्रजं प्राप्तः कृष्णदूत उद्धवो गोपीर्ददर्शेत्यन्वयः ॥ ९ ॥

सुमनोरञ्जनी — शुकः परीक्षितं प्रति वक्ति । व्रजं प्राप्तः उद्धवः एवंभूताः गोपीः ददर्शेत्यन्वयः । कथंभूताः । गोविन्दे गतमनोवाक्कायवृत्तयः । गोविन्दे इति सप्तम्यन्तपाठे गोविन्दार्थम् । मनसा वाचा देहेन चेष्टितैः क्रियाभिश्च । त्यक्तलौकिकाः परित्यक्तलोकाचाराः ॥ ९ ॥

गायन्त्यः प्रियकर्माणि रुदन्त्यश्च गतह्रियः ।
तस्य संस्मृत्यसंस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥

सत्यधर्मीया — गायन्त्यो गायतीर्यानि कैशोरबाल्ययोः प्रियकर्माणि तानि संस्मृत्य रुदतीर्गतह्रियो गतलज्जाः ॥ १० ॥

सुमनोरञ्जनी — तस्य कृष्णस्य । यानि कैशोरबाल्ययोः कृतानि प्रियकर्माणि प्रियाणि सुखावहानि कर्माणि । संस्मृत्य संस्मृत्य । गता अपगता ह्रीः लज्जा यासां तथाविधाः सत्यः । रुदन्त्यो रुदतीः गायन्त्यो गायन्तीः ॥ १० ॥

काचिन्मधुकरं दृष्ट्वा ध्यायन्ती कृष्णसङ्गमम् ।
प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥

सत्यधर्मीया — कृष्णसङ्गमं ध्यायन्ती काचिद्गोपी मधुकरं भ्रमरं दृष्ट्वा प्रियप्रस्थापितं प्रियेण नाथेन प्रस्थापितं सान्त्वनेन स्वप्रियं कर्तुं प्रेषितं वा दूतं कल्पयित्वेदं वक्ष्यमाणमब्रवीदवोचत् । कृष्णसङ्गमं रतिमतीव जनयित्वा निजां विधाय विहाय गत इति कलुषस्य कलुषो वा सङ्गमस्तमितीर्ष्योक्तिरनेन ध्वन्यते ॥ ११ ॥

सुमनोरञ्जनी — एवं स्थिते श्रीकृष्णसंगमं ध्यायन्ती मुग्धा काचित् स्त्री दैवादागतं विकसितारविन्दवृन्देषु मन्दमरंदपाद्मेनारुणायमानश्मश्रुं मंजु गुंजन्तं मधुपं दृष्ट्वा । तं कृष्णप्रस्थापितं दूतमुद्धवं कल्पयित्वा आरोप्य । लब्धावसरा इदं वक्ष्यमाणम् । अब्रवीत् । उद्धवमेव कटाक्षीकृत्य भृङ्गमब्रवीदिति यावत् ॥ ११ ॥

गोप्युवाच—

मधुप कितवबन्धो मा स्पृशास्मान् सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिस्त्वम् ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥

सत्यधर्मीया — हे मधुप अमात्य इति मधुपतोद्धवस्यापि ज्ञेया । मद्यपायिन्निति ध्वनिः । कितवस्य कपटिनो बन्धुः कितवः कृष्णो बन्धुर्यस्येति वाऽस्मान्मा स्पृश न स्पृश । अङ्घ्रिमिति पाठेऽस्मत्सान्त्वनार्थं पादस्पर्शं न कुर्वित्यर्थः । पुनरनन्यजोत्तेजकतयाऽङ्घ्रिं ज्ञानं न स्पृशास्मज्ज्ञानविषयो न भवेति कटाक्षितोऽर्थः । कोऽपराधो मयाऽऽचारीति रीतिरियमादृतेत्यत आह । सपत्न्या एकाप्रियत्वं प्रेयसः परमानिष्टमित्येकवचनं पुरतस्तु विद्यमानस्थितिकथनमिति बोधयितुम् ।

तथा रमणस्थितिं वा तन्मानिनीनामिति बहुवचनमिति विशेषोऽवसेयः । मधुरास्थायाः । कुचाभ्यां विलुलिता रतिलव इतस्ततो लोला माला तस्या मालायाः कुचकुङ्कुमं येषां तानि च तानि श्मश्रूणि मुखरोमाणि च तैर्युक्तोऽस्पर्शने हेतुवचनम् । सपत्न्या इत्येकवचनेन नेत्यनुदीर्य मेत्युदीरणेन च या मा लक्ष्मीस्तस्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिरञ्चितस्त्वं कितवानां बन्धो येन स त्वमस्मानपि स्पृशाङ्घ्रिं ज्ञानं वा स्पृश सदाऽस्मज्ज्ञानविषयोऽपि भव । त्वां तत्सपत्न्या अन्यं स्त्रीजनं मा स्पृशेति स्वानुमतिमेकत्र ध्वनयति । अननुमतमतेः करणात्कितववतां स्फोरयति । तन्मानिनीनां तन्नगरगाङ्गनानां स्वसत्कारास्पदानामिति ध्वनिः । मधुपतिस्तव स्वामी प्रसादं वहतु । यदुसदसि यादवसभायामेतादृशं मृगदृशं सुन्दरीमहमगममिति वचनानुकरणयोग्यामाभिराभीरभामिनीभिर्ममाङ्सङ्ग इत्यस्येदानीं मानहानिनिदानतेति ध्वनिः । अस्मदीयं सज्जनं उसदसि रुद्रसभायां पिशाचभूतायां विडम्ब्य-मनुकरणीयमित्यान्तरङ्गिको भावः ।

यस्य दूतस्त्वमीदृक् स्वामिसमः कितवः इत्यतो न तव नाथेन त्वयापि कृत्यं गच्छेति तात्पर्यम् । यस्य दूतस्त्वमपि तादृगिति यद्यपि वक्तव्यं तथाऽपि ई लक्ष्मीं सम्पदमेव पश्यतीति ई दृक् दुर्भगाङ्गनावलोको न तवापि संमतमिति ध्वनयितुमीदृगितीदृगुक्तिरिति युक्तिमत्य इति मन्तव्यम् । भृङ्गं भृङ्गे प्रसक्तिमपि केवलमज्ञा अप्येवं कुर्वन्ति किङ्करीणामेतत्सर्वज्ञता किङ्करीति वक्ति ॥

मधुपेति । मधुप प्रागस्मदनुरक्तभृङ्ग! सपत्न्याः कुचविलुलितानि मालातः पङ्क्तितो विद्यमानानि कुङ्कुमकुसुमानि जपाकुसुमानि तेन तद्रसो लक्ष्यते । रसरक्तश्मश्रुभिरुपलक्षितस्तथा कितवबन्धो कितवो धुत्तूरपुष्पं स एव बन्धुर्यस्य तत्सम्बुद्धिः । अनेन चित्तभ्रंश सम्भाविततामाचष्टे । कितवो धूर्त उन्मत्तवञ्चके कनकाह्वये । कनकश्चम्पके स्वर्णे किं शुके नागकेसरे । धुत्तूरे काञ्चनारे चेत्युपयुक्त-तदुपयुक्तविश्वौ । अस्मान्मा स्पृश । मधुर्वसन्तः पतिर्यस्य स तन्मानिनीनां प्रसादं वहतु वसन्तरूपः सोऽपि यस्य दूतस्तदनुसारतो वर्तमानस्त्वमपीदृक् येषां पुष्पाणामुवाच्यं यत्सदस्तस्मिन् विडम्ब्य-मनुकार्यमित्यर्थः । उवाच्ये चापि कुत्सायामिति विश्वः । उत्कृष्टं सद इति वा । यदस्ति तत उच्चत्वाद्यदुरित्यृग्भाष्योक्तेः । भगवत्सभायां विडम्ब्यमिति पारमार्थिकोऽर्थः । यत्कितवो मधुपतिं तत्तस्मान्मानिनीनां न उ सदसि विडम्ब्य प्रसादं विशीर्णतां वहतु पुनरपि ददातु । इयताऽपि न तृप्तिस्तस्येति रुषाऽऽभाषेति भाव इति वा ॥ १२ ॥

सुमनोरञ्जनी —— दूत मधुप ! त्वमस्मान् मा स्पृश । कुतः । यतः हे कितवबन्धो ! कितवस्य धूर्तस्य श्रीकृष्णस्य दूतत्वादिति भावः । यतश्चास्मत्सपत्न्याः । कुचयोः विलुलिता लोलायमाना कुचाभ्यां च्युता वा या माला तस्यां लग्नं कुङ्कुमं कुचालिप्तकुङ्कुमं येषु तानि । श्मश्रूणि । श्मनि मुखे श्रयन्त इति श्मश्रूणि मुखालङ्काररोमाणि तैः । यतोऽञ्चितः अतः श्मश्रुभिर्मा स्पृशेति वा ।

भवदतिप्रियेण श्रीकृष्णेन प्रेषितोऽहं किमिति धिक्क्रियत इत्यत आह ।। वहत्विति । यस्य दूतस्त्वं ईदृक् अस्मत्सपत्नीकुचकुङ्कुमालङ्कृतः स मधुपतिरपि । तन्मानिनीनां ताश्च ता मानिन्यश्च । ताः मधुरापुरवासिन्यो, मानो गर्व आसामस्तीति तथोक्ताः गर्विताः युवतयः तासाम् । प्रसादं प्रसन्नताम् । वहतु संपादयतु । कीदृशम् । यदूनां सदसि विडंब्यं अनुकर्तुं योग्यं, हास्यसमये अनुकरणयोग्यमित्यर्थः । सर्वप्रकारेण तस्मिन्नेवानुरक्तधियोऽस्मान् विहाय अतिगर्वितपौरनारीष्वासक्तचित्तस्तत्प्रसन्नीकरण एवोपक्षीणसर्वव्यापारः किं फलमनुभवति तदेवानुभवतु किमस्माभिरिति सेर्षाकोपवचनम् ।। १२ ।।

सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यः कस्त्यजेन्मां भवादृक् ।
परिचरति कथं तत्पद्मकिञ्जल्कपादमपि बत हृतचित्ता उत्तमश्लोकजल्पैः ।। १३ ।।

सत्यधर्मीया — तदेव देवकितवत्वं व्यक्तं व्यनक्ति ।। सकृदिति । सकृदेकवारमधरसुधां स्वां मोहयतीति मोहिनी । ल्युडन्ततया ङीपि पाठः मोहिनी मोहोऽस्या देयत्वे नास्तीति मोहिनीत्यपि । पाययित्वा । तर्हि मनोरथपूर्तिर्जाता किमतोऽपि कैतवं पश्यसीत्यतो रुचिमुत्पाद्यातृप्तायाः पुनरप्राशने कथं न कितवस्तव देव इति बोधयति सकृदित्यनेन । मां सुमनस इव, पुष्पं सकृदेकदैवाघ्राय यथा त्यजन्ति तथा कस्त्यजेत् । स यथोदास्ते त्वमपि तथोदास्येत्यतः श्रीरपि न शक्ता त्यक्तुं कथा काऽस्माकमिति कथयति ।। भवादृगिति । भवं संसारं न पश्यतीति नित्यमुक्ता रमाऽपि । समाना चासृत्युपक्रमादमृत्वं चानुपोष्य । नित्यमुक्ता इत्यादेर्भवादृग्रमा । तत्पद्मकिञ्जल्कपादं तस्य पद्मकिञ्जल्कवद्विद्यमानः पादस्तं कथं परिचरति कथं सेवते । एवमव्यवस्थितं मत्वा सेवते संसाररहिताऽपि वयं तु सांसारिक्यः कथं कथय त्यक्ष्याम इति भावेनाह ।। अपीति । अपि किञ्चोत्तमश्लोकस्य जल्पैर्हृतानि चित्तानि यासां तास्तव्द्याहृतहृतचेतसः कथं त्यक्ष्यामो बत खेदे । अपि मधुरीस्था अप्युत्तमश्लोकजल्पैर्हृतचित्ता एवं भवेयुर्बत हर्ष इति वा । पाययित्वा यूयमपि बत किलेति कस्त्वदन्यो निर्घृणस्त्यजेदिति वा । हे अबला बलाद्युष्माभिः पीतं मया प्रीतिपूर्वकं पायितमिति नेत्यप्याह । हे अ भगवन्पिबतेति पायायित्वेति मामिति मदाद्या इत्यर्थः । सुमनसस्त्यागहेतुदौर्मनस्यरहिता इत्यप्यर्थः । सौन्दर्याभावादित्यपि न त्याज्या इत्याह । सुमवत्तिलकुसुमवन्नासिका यासां ताः । प्रथमाबहुवचनम् । प्रभृतिग्रहणस्य प्रकारार्थत्वाज्ज्ञापकं त्वत्र ककुद्दोषणी इति भाष्यम् । तदनुगमानीतराङ्गानीति सुन्दरीरिति न स्मरपरवशतेति त्यागः कथमसम्भावित इत्यत आह । ईर्मन्मथो वसत्यास्मिन्स वसन्निति यः यशो यस्य स इव सद्य इति । यं यशो यानयोस्त्यागे वाते यातरि दातरीति विश्वः । इति धाष्ण्यदिव देवत्याग इति भावः ।। १३ ।।

सुमनोरञ्जनी —— कितवबन्धो इत्यनेन सूचितं कृष्णस्य कितवत्वं व्यनक्ति ।। सकृदिति । यदा अहमुत्तमश्लोकस्य जल्पितैः सम्भाषणैः हृतचित्ता सती । तस्य पद्मकिञ्जल्कवत् अरुणं पादं परिचरति स्म संवहति स्म तदा एतादृश्या अपि सुमनसः अकपटमनसः विश्वस्तचित्ताया इति यावत् । मोहिनी सन्तोषातिशयेन व्यामोहयन्ती स्वां स्वीयाम् अधरसुधाम् । सकृदेकवारं पाययित्वा भवादृगिव त्वादृशभृङ्गः सुमनस इव पुष्पमिव । स्त्रियः सुमनसः पुष्पमित्यमरः । यथा पुष्परसं सकृदेवास्वाद्य विसृजति तद्वत् मां सद्यः अस्यामवस्थायाम् । कथं केन प्रकारेण को लोकः त्यजेत् । बत खेदे । मा इति पाठे मा इति एकोऽस्मच्छब्दः । अपरो लक्ष्मीवाचक आबन्तः । तथा चैवं योजना । मा रमा । तस्य पद्मकिंजल्कपादं परिचरति । उत्तमश्लोकजल्पैः हृतचित्ता सती यामधरसुधाम् अपिबत अपिबत् तामधरसुधां सुमनसोऽस्मान् सकृदेव पाययित्वेति । शेषं पूर्ववत् । यद्वा अन्यथा स्वां अधरसुधां सकृदेव पाययित्वा । अनेन स्वस्यातृप्ततां ध्वनयति । कः पुरुषः त्यजेत् । तत्र दृष्टान्तः सुमनस इव विरक्ता इवेति । यथा विरक्ताः खलु तृप्ताः अतृप्ता वा नारीः सद्य एव त्यजन्ति तथेति । एवं स्थिते भवादृक् त्वत्सदृशः पुरुषः त्वमेवेति यावत् । तस्य पद्मकिंजल्कपादं कथं वा परिचरति । अपि मानिनीनामित्येतद्विपरिणामेनानुवर्तते । मानिन्यो मधुरांगनाः उत्तमश्लोकस्य कृष्णस्य जल्पैः मधुरालापमात्रैः कथं हृतचित्ता अभूवन् । अस्माकं वनौकसां चातुर्यहीनानां हृतचित्तता युक्ता । तास्तु अतीव चतुराः कथं परवशा अभवन्निति भावः । बत खेदे । मामिव ता अप्यतृप्ता एव केन निमित्तेन त्यजति । ते तु न विदुरिति मम खेद इति ।। १३ ।।

किमिह बहु षडङ्घ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां गायतां तत्प्रसङ्गः क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ।। १४ ।।

सत्यधर्मीया —— कृष्णविनेयमनुनयनायायातमिव सञ्चारं कुर्वन्तं निरीक्ष्य न तव गानेनात्र लभ्यं तत्र गच्छानच्छ्रेष्ठ सिद्धिः स्यादिति वक्ति ।। किमिति । हे षडङ्घ्रे षट्पद! षट्सु कामक्रोधादिष्वङ्घ्रिर्यस्य तत्सम्बुद्धिर्वा । अधः कामादेः । हे उद्धव यदूनामधिपतिं किं बहु यथा तथा । उद्धवसम्बोधनपक्षे ईषदूनः षडङ्घ्रिरिति बहुषडङ्घ्रिः । बहुच्प्रत्ययो वा । तस्य सम्बुद्धिः । नोऽग्रतः पुरतो गायसि । अङ्गनागानयोग्य इति युष्माकं धुरि मया क्रियत इति नेत्याह ।। अगृहाणां न इति । न विद्यते गृहं यासां तास्तासाम् । सोऽपि निर्जनसदन इत्यतो नेदानीं तथेत्याह ।। पुराणमिति । पुरे मधुरापुरेऽणतीति स तं यदूनां येन ऊना उज्झिता तां मां निरीक्ष्य पुराणमतीतं वृत्तमिह किं बहु गायसीति वा । न त्वत्पुरत आसामग्रत इति न वदता अपि मद्धृदयोग्या इत्याह ।। अगृहाणामिति । मम स्वभावोऽयं न हातुं शक्य इत्यतस्तत्स्थाने स्थानं वदामस्तत्र गच्छ यथेच्छं गायेति वक्ति ।।

विजयसखेति । विजयोऽयं कंसहिंसासादितो जयो विशिष्टस्तस्य सखा तस्य कृष्णस्य सख्योऽधुना मधुनगरीचन्द्रमुख्यस्तासामग्रतस्तत्प्रसङ्ग: कृष्णवार्ता त्वया गायताम् । ताश्च क्षपितकुचरुजः क्षपिता कुचानां रुक् तदपीडनजो रोगो यासां ताः श्रुतस्वालिङ्गितकृष्णकथा इति ते इष्टा प्रेमपात्राणि ते इष्टं कल्पयन्ति । गातुस्तवाभिलषितं योषितस्ता ददतीति भावः । विजयोऽर्जुनस्तस्य सखेति विजय-सखस्तत्य सखीनामग्रतस्तां कथां त्वं गाय । परस्मैपदे लोट् । तत्प्रसङ्गक्षपितेति पाठे तत्प्रसङ्गेन क्षपिता कुचरुग्यासां ता इति पदमेकं वा । विजयसखसखीनामित्यनेनैष्यज्ज्ञत्वं पुंसखिता-विषयेऽस्माकमेवं देवस्तनुयादिति स्वविषये मतिहीनतां ध्वनयति । विजयसखसखीनां गायतामन्येषां भ्रमराणां ते च तत्प्रसङ्ग क्षपितरुज इष्टाः पुनरार्य इष्टं कल्पयन्तीति वा ॥ १४ ॥

सुमनोरञ्जनी — यदुवरस्य वार्तां वर्णयन्तमुद्धवमेव मनसा लक्षीकृत्य स्वाग्रे झंकुर्वन्तं भ्रमरमुद्दिश्याह ॥ किमिति । हे षडङ्घ्रे भ्रमर! त्वम् अगृहाणां गृहरहितानां वनौकसामित्यर्थः । नः अस्माकं अग्रतः इहास्मिन्प्रदेशे पुराणं पुरे नगरे अणति चरतीति तथोक्तम् । नः अस्माकं पुराणं पुरातनम् । इदानीमत्रावर्तमानत्वात् । पुरस्य मधुरायां स्थितस्य जनस्य आ संपूर्णः णः आनन्दो यस्मात्तमिति वा । यदुपतिं, किं किमर्थम् । बहु यथा स्यात्तथा गायसि । मदनोद्दीपकतयाऽ-स्मत्क्लेशावहत्वाच्च मा गायेति भावः । क्व गातव्यमित्यत आह ॥ विजयेति । विजयोऽर्जुनस्तस्य सखा कृष्णस्तस्य सखीनां मधुरांगनानामग्रतः गायतां त्वयेति शेषः । तासामपि मदनोद्दीपकत्वात्तत्पुरतः कथं गेयमित्यत आह ॥ तत्प्रसङ्गेति । तस्य कृष्णस्य प्रसङ्गेन प्रकृष्टांगसङ्गेन क्षपिता निरस्ता कुचानां रुक् सन्तापो यासां ताः । उद्दीपितमदनानामपि तच्छामकः श्रीकृष्णांगसङ्गस्तवास्तीति त्वद्गानं तासामनुकूलमेवेति भावः । कुतस्तदङ्गसङ्गो लभ्यस्तेषामित्यत उक्तम् ॥ इष्टा इति । कृष्णस्येति शेषः। मम किं फलमित्यतस्तवाप्यस्तीत्याह । ते तव इष्टं ईप्सितम् । कल्पयन्ति कुर्वन्तीत्यर्थः । यद्वा इष्टाः प्रसन्नाः सत्यस्तुभ्यमिष्टं कल्पयन्तीति । गानमात्रेण कथमिष्टं कल्पयन्तीत्यत उक्तम् ॥ तत्प्रसङ्गेति । तस्य कृष्णस्य प्रसङ्गः प्रसक्तिस्तत्कथाकथनमिति यावत् । तेन क्षपिता नाशिता कुचरुक् येन तथाविधस्य ते इत्यर्थः । त्वमपि तासामुपकारक एव । अतस्तवेष्टदानं किं चित्रमिति भावः ॥ १४ ॥

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे उत्तमश्लोकशब्दः ॥ १५ ॥

सत्यधर्मीया — मन्मथमथितो मधुमथनः स्वत एव स्मृतत्वत्सङ्गः सङ्गरुचिरचिरेणागमिष्यति किं चिन्तया कान्ता इति न वदेति वदन्ति । दिवि स्वर्गे भुवीह रसायां भोगिन्यादिलोके विद्यमानाः स्त्रियः कास्तद्दुरापास्तद्दुष्प्रापाः सर्वा अपि सुमिलास्तस्योपायमुपदिशन्ति ॥ कपटेति । कपटो वक्रो

रुचिरश्चासौ हासश्च तेन सहितो भ्रूविजृम्भस्तस्य याः यान्तीति पात्र्यः स्युः । अरेर्यश्च कपट-रुचिर्वस्तुतस्तु नास्मत्सङ्गरुचिता रमारतेरितीरयन्ति ।। अह आसेति । अहेति खेदे । इयमपीयत्कृत्वा लभतेऽस्मत्कथा केति कथयन्ति ।। भूतिरिति । भूतिर्महालक्ष्मीर्यस्य चरणरज उपास्ते । स्वरतस्य स्वरतिपात्रत्वमात्रघटनायोपासनां करोति । एतादृशे वयं काः किं तनुपत्राण्यपि शृणु । आगमिष्यतीति वचनं दन्धनमात्रम् । कृपणानां दीनानां नः पक्षे । उत्तमश्लोकस्य शब्दः कृष्ण-कृष्णेत्यादिरूप एव न तदर्थं प्रत्यक्षसन्धिरित्युत्तरत्र भावीति भावः । तन्नाममात्रोच्चारणं तद्ध्यान-मेवानुष्ठेयमहेति वा । अह खेदविषादयोरिति विश्वः । पक्षे उत्तमेत्यत्र सन्ध्यभाव एवैतत्सर्वस्य मूलमिति मन्तव्यं । हे मधुप कपट तददर्शकत्वाद्रुचिरकथाकथकत्वाद्दिवि भुवि वा चर नास्मत्समीपे । भ्रूविजृम्भस्य याः स्युरिति ताः स्त्रियः का न का अपि । न च दृश्यते तत्र प्रागदर्शि च दर्शनीये सङ्गस्तस्येत्यत आह ।। सेति । सा रमा यां पश्यति तत्र स्वयमेवासातो वयं तद्दुरापाः स दुरापो दुष्प्रापो याभिस्ता हा लोकावलोकनतोऽपि तन्नास्तीति खेदः । हासेत्याद्यैकपद्ये यां पश्पति तां स्वयमेवोपास्त इत्यन्वयः । यस्य पक्षे हे कृष्ण वयं का अवगमोऽस्ति किम्? भूतिरेवेति चरणरज इव चेति वाऽध्यात्ममन्वयः । स यामुपास्ते सा दिवि भुवि चर का न काऽपि । यस्य भ्रमतस्ते चरणरज एवोपास्ते धूलिधूसरतस्तव चरणे स्यातामिति तादृशी नोपलभ्यतेऽतो वृथा श्रमस्तवेति तात्पर्यम् । वयं सायाङ्काः सायो हि स स एवाङ्को यासां ता इति वा पदोऽस्मत्पक्षसायकवद्यमिति भावः । आसायाङ्कमित्यृग्भाष्यटीकाटिप्पणीषु सायङ्करं लयकृज्ज्ञानमेव । षोन्तकर्मणीत्यस्येदं रूपम् । सायमन्तं करोतीति ङ इत्यस्य रूपमिति । अस्माद्भावे घञि आदेच इत्यात्वे युगागमे सायमिति रूपम् ।। १८ ।।

सुमनोरञ्जनी — भवतीष्वपि स्नेहपारवश्येनाकलय्य पुनरत्रागमिष्यतीत्यतो रमालालितपाद-पल्लवस्य हरेः वयं काः विषयाः । येनास्मन्निकटमागमिष्यतीति सम्भावयाम इत्याह ।। दिवीति । दिवि तदुपलक्षितोर्ध्वलोके । भुवि भूलोके । रसायां पाताललोके च याः स्त्रियः स्युः तासु कपटः भावगर्भितः रुचिरश्च यो हासः तत्सहितो यो भ्रूविजृम्भः भ्रूविलासो यस्य सः तत् तस्य कृष्णस्य काः स्त्रियो दुरापाः प्राप्तुमशक्याः । यद्वा याः स्त्रियः कृष्णस्य कपटहासभ्रूविजृंभस्य विषयाः स्युः तासां मध्ये कास्तद्दुरापाः तस्य कृष्णस्य दुरापाः दुष्प्रापा इति । कुत इत्यत उक्तम् । श्रीः भूतिः महालक्ष्मीः यस्य चरणरजः उपास्ते सेवते तस्येति । एवंभूतस्य कृष्णस्य वयं काः किंविषया इत्यर्थः। यद्यप्येवम्, अपि तथापि, उत्तमश्लोक इति शब्दो यस्य सः कृष्णः । कृपणानां दीनजनानां पक्षे सहाये तिष्ठति अतः पुनरागन्तेति किञ्चिद्धैर्यमस्तीति भावः । यद्वा यूयमविषयाश्चेत् कुत एतावत्पर्यन्तं भवन्निकटे स्थित इत्यत उक्तम् ।। कृपणेति । चो यस्मादित्यर्थे । यस्मात्कृपणपक्षे स्थितिः स्वभावः कृपणपक्षपातीति यावत् । अतः कृपणानामस्माकं पक्षेऽन्तिके स्थित इत्यावृत्त्या योज्यम् । पक्षः सहायमरुदन्तिकभित्तिसाध्येत्यभिधानम् ।। १८ ।।

विसृज शिरसि पादं वेद्‌म्यहं चाटुकारैरलमनुनयसारैर्याहि दूत्ये मुकुन्दम् ।
स्वकृत इह विसृष्टापत्यपत्याप्तलोका व्यसृजदकृतचेताः किं नु सन्धेयमस्य ॥ १६ ॥

सत्यधर्मीया — क्रमात्क्रीडता षट्पदेन शिरसि पादस्थापने कृष्णपादं तं ध्वनयन्त्युपात्तकोपा वदति ॥ विसृजेति । शिरसि स्थापितं तव पादं विसृज त्यज निष्कासयेति यावत् । अनेनोद्धवोऽपि कटाक्षितः । त्वामपि कितवदूतत्वात्कितवं वेद्मि । अनुनयसारैः प्रणयिनीप्रणयमेलकालाप-श्रेष्ठैश्चाटुकारैरापातप्रियवचनैरलम् । अफलपर्यवसायित्वात् । दूत्ये पुनरपि मुकुन्दं याहि । दौत्ये इति लेखकप्रमादः दूतवणिग्भ्यामिति भावकर्मणोर्यतो यतो विधानम् । किं तव विषये कितवता त्वयाऽदर्शि देवस्येत्यत आहुः ॥ स्वकृते स्वनिमित्तमिति । विसृष्टास्त्यक्ता अपत्यानि पुत्राः पतयो भर्तार आप्तलोका बन्धवश्च याभिस्ता अस्मान्यो व्यसृजत तत्याज । सन्धिं कर्तुमेवायातः, किमायताक्ष्य एवं तर्जनमित्यतः किं दुर्जनेन सन्ध्यार्जनेनेत्याहुः । अकृतचेता अकृतज्ञ इत्यस्यानेन किं सन्धेयमिति । इह स्वकृतेऽस्मत्कर्मण्येवं विघटके सति हे सन्धे विरहजबाधे! पादमित्यनुवर्तते । किं नु नुमः सोऽपीदानिं संयमिनीं नयत्वित्यान्तरङ्गिको भावः । इन्द्रावरुणनूनुवामित्यृग्माष्ये अद्य वां नु नुमो लोप इत्याद्युक्तेर्नु नुम इत्यर्थः । विस्तृतं च स्कन्धान्तरेऽस्माभिर्मन्तव्यम् । सन्धा स्थितौ प्रतिज्ञायां बाधादुःखनिषेधयोरिति विश्वः । शरणीकृतमरणानां न तेन सन्धानकृत्यमिति तात्पर्यम् । अयमस्यासदृशस्य कृष्णस्य हे सन्धे युष्मदायुष्मत्ता यावत्तावन्न यावत्तावन्न त्यक्ष्यामीति प्रतिज्ञे त्वां नु नुमस्त्वया वयं वञ्चिता इति वा । अस्य सन्धा इयं किं नु इति । उद्धवं शिरःस्थापितस्वाङ्घ्रिं मत्वा निष्कासयेति वदन्तीति वा ॥ १६ ॥

सुमनोरञ्जनी — कलहान्तरितायाः स्वस्याः सन्धानार्थमागतं मत्वा वक्ति । शिरसि अस्मच्छिरसि । पादं विसृज स्थापय । त्वां नमस्करोमीति यावत् । यद्वा विसृज तद्वार्तां त्यज । पादं शिरसि करिष्यामि नमस्करोमीत्यर्थः । अनुनयसारैः अनुनयः सांत्वनं सारं प्रधानं येषां तैः सांत्वन-मात्रफलैरिति यावत् । चाटुकारैः चमत्कृतिवचनैः । अलं पर्याप्तम् । त्वं तु दूत्ये नियुक्तः मुकुन्दं प्रति याहि । कुत एतावान् कोप इत्यत आह ॥ स्वकृतेति । यः कृष्णः, स्वकृते स्वनिमित्तम् । विसृष्टाः त्यक्ताः अपत्यानि पतयः आप्तलोकाश्च याभिस्तथाविधा अपि स्त्रियो व्यसृजत् परित्यक्तवान् । अतो अकृतचेताः कृते उपकारे चेतः चित्तं यस्य स कृतचेताः उपकारज्ञः तदितरः अकृतचेताः अकृतज्ञ इत्यर्थः । अस्य एतादृशस्य सन्धेयं किं नु स्यात् न किमपीत्यर्थः ॥ १६ ॥

मृगयुरिव कपीन्द्रं विव्यधे यः किरातः स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बिलवासं वेदविद्वर्गवन्द्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥

सत्यधर्मीया — माधवस्य धवस्यासन्धेयत्वे समाधेयानो महान्प्रकारानवतारयुगलीलाः सङ्गृह्य बहिरन्तस्तुतिगर्भितश्लोकेनोपश्लोकयन्ति ॥ मृगयुरिति । यो रामो यश्चैकाप्रियः शमादिसहितस्तस्यापीयं दशा चेदस्मदीशानां कृतपुरतरुणीविहाराणां का कथेति द्योतयितुं रामा रामाचरितं वर्णयन्त्यो ध्वनयामासुः । कपीन्द्रं वालिनं मृगयुरिव लुब्धक इवादृश्यः सन्विव्यधे । मृगव्यादयश्चेति यातेः कुप्रत्ययान्तत्वे निपातितः शब्दः । यो मृगयुरिव कपीन्द्रं सुग्रीवं विव्यधे स्त्रियं तत्स्त्रियं रुमां कामयानामिच्छया यानं गमनं यस्याः सा तां विरूपां विगतं रूपं यशो यस्यास्ता मकृतेति तं कपीन्द्रं विव्यधे । नानयोऽनेनानुष्ठित इति भावः । यः किरात इव निषाद इव कामयानां पतिमपेक्षमाणां स्त्रियं शूर्पणखाम् विरुपामकृत । किमर्थमित्थं कृतवानानतवतीमित्यतो वदन्ति ॥ स्त्रीजित इति । यः स्त्रिया स्वभार्यया जितः पराभूतः । अनेन तद्वचनादनागस्या नाशिकाकर्णछेदनं कारयित्वा विरूपां चक्रे । स्त्रियो जिता येनासवतद्वश्यः कामयानां स्वैरिणीस्त्रियम् । किनो वायुजयवन्तः सुखवन्तो वा । रातिशब्दपर्यायोऽयं रातशब्दः । रातं मित्रं यस्य स विरूपामकृत शिक्षायोग्यशिक्षायां न दोष इति भावः । रूपं स्वभावे सौन्दर्ये चालोके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारे श्लोकयोरपीति विश्वः । स्त्रीजितो गौतमभार्यां प्राप्तः सन्विरूपां कामयानामिन्द्रमिति पत्या शापतो जाता शिलातुलेति विरूपा ताम् । देवराजकुतूहलात्प्रहृष्टेनान्तरात्मनेत्यादिरामायणोक्तेस्तां स्त्रियमकृतेति स्तुतिः । स

संस्तुत्यारातयो बोधं तु शूररातय इत्यृग्भाष्ये बोधं तु चैवमित्राणीत्युक्तेः । कामयानां कामं यानं गमनं वीथ्यां यस्याः सा तां विरूपां त्रिवक्रेति तां स्त्रियं स्ववधूमकृतैवं स्त्रीजित स्त्रैण इति किरातस्तद्वदिति । आन्तरङ्गिकोऽर्थस्तु कामयानां स्त्रियं मां नः स्त्रीजितः प्राप्तपुरयेषिदिति विरूपामप्रतिष्ठामकृतेति किरात इवेत्यपि द्वितीयार्थवादपरतयाऽपि योजना ज्ञेया । यः स्वस्वामित्वं वेद तमपि बलिं स्वाज्ञामनुसृत्य परिवर्तमानमपि बिलवासं पातालवासमकृत यो विद्वद्वर्गवन्द्य इति काकुः । नेत्यर्थः । यत्तदसितसख्यैरसितः श्यामवर्णोऽनेन कलुषताऽपि ध्वन्यते । तस्य सख्यैरलं, न प्रयोजनमित्यर्थः तर्हि तद्वार्ताविति कुतुकता कुत इत्यत आहुः । तत्कथार्थस्तच्चरितश्रवणादिरूपो विषयो दुस्त्यज-स्त्यक्तुमशक्यः । बलिमप्यहन्तायुततया गर्हितमपि बिलवासं तत्र राजानमकृतातो वेदविद्वर्गेण ज्ञानिसमूहेन वन्द्य इति । अलमसितो नित्याबद्धस्तस्य सख्यैः सहाऽऽसनाशनादिभिः प्राचीनै-स्तत्कथार्थो दुस्त्यज इत्यान्तरङ्गिकः । प्रथमार्थवादश्च । बिलवासमिति कपीन्द्रपक्षेऽपि किष्किन्धा बिलवासमित्यर्थकं सदन्वेतव्यम् । असितः षिञ् बन्धनेऽसितोऽबद्धो नित्यमुक्तस्तस्य सख्यैरलं भूषणमित्यपि व्याकुर्वते । मन्वन्तरान्तरे बलिमपि बिलवासं उच्चैःश्रवो हयवासं तद्वाहनकमिन्द्रमिति यावत् अकृत निश्चितत्वेनैवमुक्तिः । बिलं छिद्रे गुहायां च बिल उच्चैःश्रवो हय इति विश्वः । बलिम-स्मन्मध्यप्रदेशं तदुपलक्षितमङ्गं बिलवासं स्वाङ्गसङ्गायोग्यंतया बिलवासं गुहनिहितमकृतेत्यान्तरङ्गिको

भावश्च । बलिः पूजोपहारः स्याद्बलिर्दानवपुङ्गवः । बलिः स्त्रीमध्यभागः स्यादित्यनेकार्थध्वनिपदमञ्जरी । वेदविद्वर्गैर्वेदज्ञवर्जितैर्वन्द्यो वेदबाह्यसहवासयोग्य इति वर्णयन्ति । विटोत्कतां घटयन्ती स्वैरत्वमीश्वरस्य कथयति ।। कामिति । विरूपामसुन्दरीमपि स्त्रियं कां अयानां न विद्यते यानं स्वगमनं यस्यास्तामकृत कृतवान् । न काश्चन, जित इति भावः । न तु तद्वत्त्वमश्चितवतीति त्वां त्यक्तवानित्यपि नारद उद्धवेति वक्ति ।। बलिमिति । अस्मद्दत्तं बलिं स्वपूजोपहारं च बिलवासमकृत गर्ते प्राक्षिपदित्याक्रोशोक्तिरिति वा । सख्यान्येवैतादृशानि तस्यास्मद्विषय इत्यपि वक्ति ।। तदिति । तानि च तान्यलमत्यन्तमसिता, तालव्याश्चैव दन्त्याश्च शम्बशूकरपांशव इति वचनादसिरप्यशिरिति मन्तव्यं, खड्गता येषां तान्यलमसितानि तानि च तानि सख्यानि तैः । स्त्रियं जातावेकवचनम् । इतरद्यथापूर्वम् । विव्यधे, तर्हि तत्कथास्त्यजतेत्यत आहुः ।। दुस्त्यजस्तत्कथार्थ इति ।। १७ ।।

सुमनोरञ्जनी — प्रणयकोपे अभिव्यञ्जयती निन्दाव्याजेन स्तौति । यः रामावतारे । कपीन्द्रं वालिनं मृगयुरिव लुब्धक इव च्छन्नः सन्नित्यर्थः । विव्यधे संहृतवान् । न निर्निमित्तं कपिवधः कृतः किंतु कपेः सुग्रीवस्य ईं ऐश्वर्यं द्रावितवानित्यपराधं दृष्ट्वेति स्तुतिर्ज्ञापितेति रत्नावल्याम् । यः कामयानां स्वमेव पतिमिच्छन्तीं स्त्रियं शूर्पनखां विरूपां विकृतरूपाम् । अकृत अकरोत् । यश्च स्वयं स्त्रीजितः स्त्रैणः । किञ्च वामनावतारेऽपि बलिं बिलवासं पातालवासिनमकृत । अत्रापि अपिना इन्द्रैश्वर्यापहारित्वेन गर्हा सूचिता । अतः । तत् तस्मात् असितस्य कृष्णस्य सख्यैः मैत्रीभिरलम् । एवं कोपमभिव्यज्य प्रणयं व्यनक्ति ।। असितेति । अपिरावर्तते । एवमसितसख्यैः निरस्तसख्यैरप्यस्माभिः स्त्रीजनैः । तत्कथार्थं तस्य श्रीकृष्णस्य कथया योऽर्थः मनसि जायमानः सुखविशेषः स दुस्त्यजः । अध्यात्मं तु यः कं परमानन्दस्वरूपं परमात्मानं पिबन्त्यनुभवन्ति जानन्ति ते कपयो ज्ञानिनः । तेषां ईं शोभां द्रावयतीति कपीन्द्रं ज्ञानप्रतिबन्धकासुरवर्गम् । विव्यधे परिहृतवान् । स्त्रियं स्वगुणाच्छादिकां विरूपां विगतशरीराम् । अकृत हननं कृतवान् । इतरापि स्त्री परमाच्छादिका लक्षणा जिता पराभूता अपसारिता येन सः । एवं कृत्वा किरातः किनः परमानन्दिनो मुक्ताः तेषां रातः मित्रम् । अभवत् । मोक्षप्रद इत्यर्थः । बलि बलपरिवर्तन इति धातोः । अन्यथास्वरूपं कलिं बिलवासं अन्धन्तमोगतम् अकृत । अत एव वेदविदां ज्ञानिनां वर्गेण समूहेन वन्द्यः । तत् तस्मात् असितं निरस्तं सख्यम् आत्मात्मीयेषु स्नेहः येषां तैः विरक्तैरिति यावत् । असिते कृष्णे सख्यं स्नेहः भक्तिर्येषां तैः भक्तिमद्भिरित्यर्थः । तत्कथारूपः अर्थः दुस्त्यजः त्यक्तुमशक्यः अवश्यं कार्य एवेति ।।१७।।

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना बहव इह विहङ्गा भैक्षचर्यां चरन्ति ।। १८ ।।

सत्यधर्मीया — स्फुटं प्रथमाद्द्वितीयाभ्यामर्थवादाभ्यां स्वनायकगुणावगुणौ कथयन्ति ॥ यदिति । येन अनु अवतारानुचरिता लीला सैव कर्णानां पीयूषममृतं तस्य या विप्लुट् बिन्दुस्तस्या विप्लुषः सकृदेकदाऽदनं श्रवणरूपं तेन विधूता द्वन्द्वधर्मा रागादयो येषां ते । विनष्टाः । भावे क्तः । नष्टं नष्टिः सा विगता येभ्यस्ते । ते च तेऽविनष्टा इत्यैकपद्यं वा । अर्थात्तेषां तद्धर्माणां चानुच्छित्तिरुक्ता भवति । विधूतद्वन्द्वा दूरीकृतशीतोष्णास्तद्बाधाश्च ते धर्मैरविनष्टाश्चेति वा । अयमात्मानुच्छित्तिधर्मेति श्रुतेः । दीनमभिमानेन तप्तं गृहकुटुम्बं सपदि विरक्त्यङ्कूरणानन्तरमेवोत्सृज्य स्वयं दीनाः क्षीणाभिमाना विहङ्गा इति गतम् । आकाशनामकभगवन्तं गच्छन्ति तदाधारेण गच्छन्तीति यावत् । सन्यासिनो भैक्षचर्यां ज्ञानभिक्षाचरणमुद्दिश्य चरन्ति न त्वैहिककामा एतादृशोऽपि परस्पर्शास्मानित्यहो दयालुतेति । यथोक्तं बृहदारण्यकशारीरब्रह्मणे । तमेवं विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्त्येतद्ध स्म वैतत्पूर्वे विद्वांसः प्रजां न कामयन्ति किं प्रजया करिष्यामो येषां नायमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः । स एव नेति नेत्यात्मा गृह्यो न हि गृह्यते शीर्यो न हि शीर्यते सङ्गी न हि सज्यते शितो न व्यथते न रिष्यत्येतमु हैवेते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैषणे एते तरति नैनं कृताकृते तपत इति । भावबोधे व्याख्यातोऽयं खण्डः । सकृदेकदा यददनं तेन विधूता द्वन्द्वधर्माः पतिपत्नीधर्मास्त आविनष्टा यासां ताः । दीनमस्मन्निमित्तं दैन्योपेतं गृहसहितं कुटुम्बं बन्धुसन्दोहं च विसृज्य विहङ्गा इव पक्षिण इव निराधारा दीनास्तद्विरहेण क्षीणास्तप्ता वा बहवो गोप्यो मदादिकं दृष्वा भैक्षचर्यां भिक्षुकधार्टी स्वामी नस्त्यक्त्वा गतः किं कार्यं यूयं गत्वा वदतेति याचनां चरन्त्याटीकन्त इति स त्वं पदि पतित्वा वदेति शेषः । अवदन्निति च ॥ १८ ॥

सुमनोरञ्जनी — किं च एतस्मिन्कृतसौहृदानामवस्थां पश्येति स्तुतिगर्भां निन्दामाह ॥ यदिति । येन अनुरचिता अनुकृता या लीला सैव कर्णपीयूषं कर्णामृतम् । तस्य विप्रुट् बिन्दुः तस्य सकृददनं एकवारं श्रवणलक्षणं भोजनं तेन विधूताः द्वन्द्वधर्माः रागद्वेषादिलक्षणाः धर्माः येषां तथाविधाः सन्तो विनष्टाः विगतं नष्टं नाशो येषां तथाविधाः । सपदि तत्काले दीनं दुःखापादकं गृहकुटुम्बं गृहदारादिकमुत्सृज्य विरक्ताः सन्त इति यावत् । इह जीवराशौ च बहवो लोकाः विहङ्गा इव । भैक्ष्यचर्यां चरन्तीति । यल्लीलाऽऽकर्णनमात्रेण बहवो लोकाः दारापत्यादीन् विहाय दीनाः सन्तो भिक्षामटन्तीत्युत्तानतो निन्दाऽवगम्यते । वस्तुतः यल्लीलाश्रवणमात्रेण रागद्वेषादिमुक्ताः विषयविरक्ताः सन्तो ज्ञानार्थं गुरुकुलवासं कुर्वन्तीत्यर्थो गर्भितः ॥ १८ ॥

**वयमृतमिव जिह्मं व्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ।
ददृशिम सकृदेतत्तन्नखस्पर्शतीव्रस्तनरुजपरमार्तिं भण्यतामस्य वार्ता ॥ १९ ॥**

सत्यधर्मीया — वयं कृष्णवध्वो हरिण्यो हरिणतरुण्यः कुलिकस्य वशयितुं स्वविश्वासकर्तुर्व्याधस्य रुतं गीतं यथा श्रद्दधतेऽज्ञा इत्युभयान्वपि । अनेन व्याहृतं जिम्हं वक्रं मिथ्याभूतमिति यावत् ऋतं यथार्थमिति श्रद्दधाना विश्वसन्त्यः । तदानृत्यमर्यादां वेदयन्ति ॥ सकृदिति । सकृदेकवारमेवैषा चासौ स च तस्य नखस्पर्शोत्पन्नेन तीव्रेण दृढेन स्तनानां रुजेन भङ्गेन परमा याऽऽर्तिः पीडा तां ददृशिम । अनेनानेकवारप्रतिश्रवस्तेन कृत इति तदनृतवत्ता द्योत्यते । वार्तायां वा वर्तामहे तां भणेति भणन्ति ॥ अस्य वार्ता त्वया भण्यतामिति । आर्तिरिति सुखपीडा ग्राह्या । बन्धोज्झिताया अपि सिन्धुपुत्र्याय माङ्गल्यसूत्रं किल नित्यबद्धमितिवत् । जिह्मं मन्देभवक्रयोरित्यभि- धानान्मन्दं वचनं व्याहृतमृतमिव गतम् । श्रद्दधाना अज्ञा अपि हरिण्यः कुलिकः कुलसत्तमो रागालापकलापज्ञस्तद्रुतमिव निश्शङ्कं श्रद्दधत इति दृष्टान्तदार्ष्टान्तिकभावो भावनागम्यः सकृद्वैतदयोग्या अपि तन्नखस्पर्शे तीव्रस्तनरुजपरमार्तिमेतन्नखस्पर्शेन तीव्राः कठिणा ये स्तनास्तेषां रुजः कृष्णकरानर्पणजो भङ्गस्तस्य परमार्तिर्भङ्ग इति यावत् तां ददृशिम पूर्ववदुर्वरितम् । एतत्तन्नखानां स्पर्शनतीव्राः दृढाः कठिणा इति यावत् स्तनास्तेभ्यो रुजस्तज्जातां परमार्तितां ददृशिम । अनेन कोमलानां नखाङ्कुराणामस्मद्दृढदृषतुलस्तेन स्पर्शेन तत्परमार्तिं ददृशिमेति तन्मन्युपरिहृत्यै अस्य वार्ता भण्यतामित्युक्तिरिति वा । बाल्ये मामधिरोप्य वक्षसि शिशुं सन्नर्तयन्त्यास्तव स्थूलोरोजसमागमेन तदिति प्रौढिं स दद्यान्ममेति रुक्मिणीशविजयोक्तेः । कृष्णनखस्पर्शतीव्रस्तनरुजपरमेव ददृशिम । अत्रेन्द्रियसामान्यवाचकखशब्देन योग्यः करो गृह्यते । न जिह्मं कुवलयापीडवक्त्रं नाप्यार्तिं कंसोपस्थापितचापकोटिं वा ददृशिमेति । तस्य श्रीकृष्णस्य नखस्पर्शेन तीव्रो यः स्तनरुः स्वकुचशब्दस्तस्य जपो जपनं तच्चिन्तनमिति यावत् यस्याः सा च सा रमा च तस्या आर्तिस्तां सकृदेव ददृशिम । एकदा मत्सम्भोगे तस्या आर्तिर्जातेत्यर्थः । लोकदृष्टचैतदिति वा । अस्य वार्ता का मधुरायां मधुनाथस्य मधुरा वृत्ता साऽधुना वर्ण्यतामिति वा । तीव्रैकान्तनितान्तानि गाढबाढदृढानि चेत्यमरः । कुलिकश्च कुलश्रेष्ठे वल्मीके काकतुण्डके । कुलिको व्याधभेदे स्याद्द्रुभेदे कुलसत्तम इति विश्वः । आर्तिः पीडा धनुष्कोट्योरिति च । रुज उपमन्त्रिन्भण्यतामन्यवार्तेति पाठश्चतुरस्रो नेति ज्ञेयम् । अस्य सकाशाद्वयमिव केति शेषः । का वाऽऽर्ता ऋतं यथार्थं यथा तथा भण्यतामित्यन्वयः । भण्यं तामस्यमज्ञानं यस्य तत्सम्बुद्धिः ॥ १९ ॥

सुमनोरञ्जनी — यथा कृष्णमृगवध्वो हरिण्यः । कुलिकरुतं कुलिकस्य लुब्धकस्य रुतं गानं श्रद्धास्यन्ति तथा वयं कृष्णवध्वः जिह्मं कुटिलम् । व्याहृतं भाषितम् । ऋतमिव सत्यमिव श्रद्धधानाः

श्रद्धाङ्कुर्वन्त्यः । हरिण्यो यथा परमार्तिं भजन्ते तथा सकृत् । एतत् तत् इति भिन्ने पदे । तस्य एतस्य कृष्णस्येत्यर्थः । अव्यये च । नखस्पर्शेन तीव्रो यः स्तनरुजः मदनाग्निसन्तापलक्षणः तेन परमार्तिं परमपीडाम् । ददृशिमदृष्टवत्यः । न किमपि सुखमित्यौत्तानिकोऽर्थः । वास्तविकस्तु ऋतं परब्रह्म-स्वरूपं जिह्मं मायामानुषं कृष्णं व्याहृतमिव विशेषेण आहृतमिव संपादितं वस्त्विव श्रद्धधानाः स्म । अयमस्माभिः संपादितोऽस्मान्विहाय न गच्छतीति मन्वाना इत्यर्थः । अत एवाज्ञाः । ब्रह्मादीनामपि मनोवाचामगोचरोऽस्माकं कथं लभ्य इत्यजानमानाः स्म । एतत् एतदवस्थायां तस्य श्रीकृष्णस्य नखस्पर्शेन तीव्रो यः स्तनरुजः तस्य परमार्तिं परमां विपत्तिं तन्नाशमित्यर्थः । सकृदेव ददृशिम अनुबभूविम । न पुनः पुनः स्वल्पेनैव कालेनास्मान्विहाय मधुरां गत इति भावः । अतः अस्य कृष्णस्य । वार्ता अस्मत्पुरतो भण्यतां कथ्यतां त्वयेति । तद्वार्ताश्रवणेनापि हृदयज्वरं परिहराम इति । एवंस्थितानामस्माकं वार्ता तस्य पुरतः भण्यतामिति वा । एवमवस्थां शृण्वानः सञ्जातकरुणो भगवान् कदाचिदप्यागमिष्येतेति भाव इति ।। १९ ।।

प्रियसख पुनरागाः प्रेयसा प्रेषितस्त्वं वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ।
नयसि कथमिहास्मान् दुस्त्यजं बन्धुपार्श्वं सततमुरसि सौम्य श्रीवधूः साकमास्ते ॥ २० ॥

सत्यधर्मीया — भ्रमतो भ्रमन्तं भ्रमरमिव पुनरागतं मत्वा देहस्मृतिः काचिद्वदति ।। प्रिय-सखेति। प्रियस्य वल्लभस्य सखेति तत्सम्बुद्धिः । प्रेयसा प्रेषितस्त्वं पुनर्गत्वाऽऽगा आगतवानसि किं? किञ्च भवाननुरुन्धेऽनुवाञ्छति तत्त्वं वरय । कुत इयत्यायताक्षिप्रव्हती त्वयीत्यत आह । मेऽङ्ग दूत स्वामिदूतत्वान्माननीयोऽसि । प्रायेणाभिप्रायेणानेनायात इव भासि भो त्वमिति वक्ति ।। नयसीति। इहावस्थायां बन्धुपार्श्वं कृष्णसमीपं कथं नयसि । नादरस्तत्र तवेति नेति वक्ति ।। दुस्त्यजमिति । कुतः कौतुकं तवेत्यतः साऽप्येवं लुब्धा का कथा न इति प्रोचे ।। सततमिति । हे सौम्य साऽऽकं सुसुखं यथा तथा यस्योरसि श्रीवधू रमारूपिणी भार्याऽऽस्तेऽस्माकं तदाशा नालौकिकीति भावः । गमनेऽपि सपत्न्या उरसि सत्त्वान्नास्मदभिलषितलाभ इत्यास्तामस्मन्नयन-कथेति ध्वनिं वर्णयन्ति । सदा मायां सत्यामपि प्राक् तदनुभवित्रीणां सोऽनुपपन्न इवाभाति । आनन्दानुभव उत्कृष्टानुभवात्स्मृतः । तद्युक्तत्वं तथा सौम्यं गुणानामधिकं तदित्येकादश-तात्पर्योक्तानन्दनिर्भरसौम्य वा । प्रियश्चा सखा चेति सोऽस्मत्स्वामिप्राप्यसुखसखे । यथोक्तं छान्दोग्यभाष्ये । यं सुखं प्रोक्तं प्रियमित्येव पण्डितैरिति । स श्रीमाञ्जात इदानीं वयं दरिद्रा इति कथं नयसीत्युक्तिः । स्वकीयप्रेषितत्वमारोप्य तथा मधुमथनांगमं च वक्ति ।। प्रियेति । प्रेयसा केनचिद-

स्मत्प्रीतिपात्रेण प्रेषितो नायकानुनयनाय पुनः प्रेया श्रीकृष्णेन सहागाः किम् । अतोऽङ्ग हे उद्धव माननीयोऽसि सत्कारर्होऽसि किमनुरुन्धे तद्वरय । दुस्त्यजं बन्धुपार्श्वमस्मान्नयसि किं कथं नयसि । उपसर्गा धातुलीनार्थद्योतका इति अनुनयसि त्वन्तु उः उत्कृष्टोऽसि । न च स्तुत्या कृत्यं प्रस्तुतं न रमासमासत्तिर्युष्मास्विति कथमहं यामनुनयमिति न वदेति वदति ॥ सौम्येति । सततं श्रीवधूः साकमस्माभिरास्त इति सम्भावितमनुनयनमिति वा भावः । सततमुरसिसौम्यश्रीवधूरिति पदमेकम् । ततेन वेणुवादनेन सहितः सततः । ततं वीणादिवादनमिति विश्वः । स चासौ मुरस्यासुरस्य सो वारणं वा । सः कोपे वारणे चेति विश्वः । सोऽस्यास्तीति सततमुरसी स चासौ सौम्यः प्रसादोन्मुखस्तस्य श्रीमती वधूस्तद्रूपिणी वधूर्वा साकमास्त इति वा । एतादृशे, नयसीत्यत्र ने असीति छेदः । ने नेतरि श्रीकृष्णे कथमसि केन प्रकारेणासि । नो नेता समुदीरित इति विश्वः । किं वा भवतु किमनुरुन्धे तद्वरय ॥ २० ॥

सुमनोरञ्जनी — कृष्णेनास्मदानयनार्थं प्रेषितोऽयमुद्धव इति संभ्रान्तचित्ता वक्ति ॥ प्रियेति । हे प्रियसख प्रियस्य कृष्णस्य सखे ! त्वं प्रेयसा अस्मत्प्रियेण कृष्णेन । प्रेषितः आगाः पुनः आगन्तासि किं । पुनःशब्दः प्रश्नार्थे । पुनरप्रथमे प्रश्ने व्यावृत्तावधारणे इत्यभिधानात् । आमिति चेत्तर्हि मे माननीयोऽसि प्रेष्टप्रेषितत्वात् । किमनुरुन्धे किमिच्छसि । तं वरं वरय । यद्यस्मान् भवान् नेतुमागतः तर्हि दुस्त्यजं त्यक्तुमशक्यं बन्धोः कृष्णस्य पार्श्वं सन्निधिं प्रति । अस्मान् कथं नयसि । किं दौर्घट्यमित्यतः सपत्नीसन्निधानसद्भावादिदमशक्यमित्याह ॥ सततमिति । श्रीवधूः श्रीनाम्नी वधूः, तेन साकं आस्ते । सा यदा गृहे नास्ति तदा नेष्यामीत्यत उक्तम् । सततं उरसि वक्षःस्थले आस्त इति ॥ २० ॥

अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहं सौम्य बन्धूंश्च गोपान् ।
क्वचिदपि स कथं नः किङ्करीणां गृहीतो भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥ २१ ॥

सत्यधर्मीया — स्वाभीप्सितं स्मरपरवती प्रकाशयति ॥ अपीति । अधुनाऽऽर्यपुत्रः श्वसुरसुतो मधुपुर्यामपि गुरुकुलवासत आगत्याप्यास्ते बत सुखेन । हे सौम्य स पितृगेहं स्मरति किं पित्रा सहितं च तद्गेहं गृहिणीं यशोदां च । बन्धून्गोपांश्च क्वचिदपि । स वासुदेवो नोऽस्माभिर्यः प्राग्गृहीतस्तम-गुरुसुगन्धं सु शोभनश्चासौ सौगन्धश्च । अगुरुणा सुगन्धो यस्य स तम् । अगुरोरपि सुगन्धो येन तं वा भुजं किङ्करीणां मूर्ध्नि शिरसि कथं कदाऽन्वधास्यदिति पृच्छामि त्वामिति भावः । स कथं ससल्लापं गृही गृहस्थाश्रमी इतः प्राप्तः कदा नु नः किङ्करीणां मूर्ध्न्यगुरुसुगन्धं चम्पककुसुम-सौरभ्यमिव, न नाशिकावमर्दहेतुगन्धसहितं, भुजं क्वचिदपि । त्वं करं धारयितुर्माधवस्य किमुपकुरुप इत्यत आह ॥ हे कदेति । सुखदेति आनु आनुमो गते उ सगन्धं नारायणीतरुतरुणीरूपधारणसमये

शोभनश्चासौ गन्धश्च ओ रुद्रस्य सुगन्धो येन तं मधुपुर्यामधुनाऽगुरङ्गनास्तमिति वा । भवद्भर्तारो वर्तन्ते गृहे किमेतत्कामनया कामिन्य इत्यत आहुः । यः स्मरति मन्मथवदाचरति स इति सौन्दर्य-सागर इति न तत्स्पृहा हातुं शक्येति भावः अगुरुरित्यपपाठः । रूपं प्राङ्निरूपितमनुसन्धेयम् । धन्याकमगुरुर्वा पुंसि लघु चेति वोपालितः । अगुरुर्जाङ्गके लघाविति हैमः । अगुरु क्लीबे शिंशुपायां जोऽङ्गके लघुनि त्रिष्विति रुद्रः ॥ २१ ॥

सुमनोरञ्जनी — स्वस्थचित्ता सती इदानीमनामयं पृच्छति ॥ अपीति । हे सौम्य! अधुना इदानीम् । आर्यस्य नन्दस्य पुत्रः श्रीकृष्णः मधुपुर्यां बत हर्षेण । आस्ते किम्? पितुः नन्दस्य गेहं भार्यां यशोदां गृहं वा, स्वबाललीलास्थानत्वात् बन्धून् गोपांश्च स्मरति किम्? क्वचित् कदाचित् किंकरीणां नः अस्माकं कथमपि स्मरति किम्? गृहीतापि स्मरन्नपि अस्माभिर्गृहीतः आश्लिष्ट इति वा । पादैः गृहीतः नमस्कृत इति वाऽर्थः । कृष्णः अगरुवत्सुगन्धं भुजम् । अस्मन्मूर्ध्नि कदा अधास्यत् अधास्यति । नु वितर्के ॥ २१ ॥

श्रीशुक उवाच—

अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ।
सान्त्वयन् प्रियसन्देशैर्गोपीरिदमभाषत ॥ २२ ॥

सत्यधर्मीया — प्रियस्य सन्देशैराज्ञारूपैर्वचनैः सान्त्वयन्गोपीः प्रतीदमभाषत ॥ २२ ॥

सुमनोरञ्जनी — कृष्णदर्शने लालसाः उत्कण्ठिताः गोपीः । प्रियस्य कृष्णस्य सन्देशैः आज्ञा-रूपैर्वचनैः । सांत्वयन् समाधास्यन् ॥ २२ ॥

अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ।
वासुदेवे भगवति यासामित्यर्पिता मतिः ॥ २३ ॥

सत्यधर्मीया — पूर्णार्थाः कृतकृत्याः । तत्र तन्त्रं यासां मतिर्भगवति वासुदेव इत्येवमर्पिता तत एवेति ॥ २३ ॥

सुमनोरञ्जनी — पूर्णार्थाः लब्धप्रयोजनाः । कुतः । यासां युष्माकम् । इति एवं प्रकारेण । वासुदेवे । मतिरर्पिता । सर्वप्रकारेण तदेकविषयिणी । अतः ॥ २३ ॥

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोविधिभिरन्यैश्च कृष्णे भक्तिर्हि साध्यते ॥ २४ ॥

भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ।
भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा ॥ २५ ॥

सत्यधर्मीया — द्वाभ्यां श्लोकाभ्यामितरदुर्लभा भक्तिः सुलभा भवतीनामित्याह ॥ दानेति । व्रतमेकादश्यादिव्रतं तपः कृच्छ्रचान्द्रायणदिकं स्वाध्यायो वेदाध्ययनं संयम इन्द्रियनिग्रहो अन्यैः प्रवचनादिभिः श्रेयोविधिभिस्तत्साधनोपायैर्हि यतो भक्तिरुत्तमश्लोके भगवति साध्यते या मुनीनां पूर्वोक्तसाधनसम्पन्नानां दुर्लभा साऽप्यनुत्तमा भक्तिर्भवतीभिर्दिष्ट्या प्रवर्तिता अहो मुनिदुर्लभता-वचनमवश्यकर्तव्यतारुचिं जनयितुं न तु तेषां दुर्मिलतापरम् । यद्वा कामादित्याद्युक्ता भक्तिर्मुनीनां दुर्लभेति तत्परम् ॥ २४,२५ ॥

सुमनोरञ्जनी — व्रतं शास्त्रोक्तनियमानुष्ठानम् । संयमः इन्द्रियनिग्रहः । अन्यैश्च श्रेयोविधिभिः श्रेयसे विधीयन्त इति श्रेयोविधयः तैः श्रेयःसाधनानुष्ठानैः । साध्यते साधकैः ॥ प्रवर्तिता कृतास्ति । मुनीनां दुर्लभा कष्टसाध्या न त्वसाध्या ॥ २४,२५ ॥

दिष्ट्या पुत्रान् पतीन् देहान् स्वजनान् भवनानि च ।
हित्वा वृणीत यूयं यत् कृष्णाख्यं पुरुषं परम् ॥ २६ ॥

सत्यधर्मीया — यूयं देहान् लज्जादिवर्जनेन कृष्णाख्यं परं पुरुषं साक्षान्नारायणं वृणीतेति यत्तद्दिष्ट्या दैवतः ॥ २६ ॥

सुमनोरञ्जनी — कृष्णे प्रेमातिशयमात्रमस्माकं न भक्तिरित्यतो इयमेव भक्तिरित्याह ॥ दिष्ट्येति । पुत्रादीन् हित्वा कृष्णाख्यं परं पुरुषं मत्वा वृणीत स्नेहपूर्वं स्वीकुरुतेति यत् सैव भक्तिरित्यर्थः ॥ २६ ॥

सर्वात्मभावोऽधिगतो भवतीनामधोक्षजे ।
विरहेण महाभागा महान् वोऽनुग्रहः कृतः ॥ २७ ॥

सत्यधर्मीया — सर्वात्मभावः सर्वस्वामित्वपूर्विका भक्तिः । पत्याद्यत्वस्थानेऽयमेवेति भावोऽनुसन्धानं वा । विरहेण हे महाभागा व उपरि महाननुग्रह एव कृत इति मन्ये ॥ २७ ॥

सुमनोरञ्जनी — हे महाभागाः! विरहेण वो महाननुग्रह एव कृतः । यस्मात् भवतीनाम् । अधोक्षजे सर्वात्मभावः सर्वस्यात्मा अन्तर्यामी स्वामीति भावो बुद्धिरधिगतः प्राप्तः। सर्वेभ्यः आत्मा प्रिय इति वा ॥

श्रूयतां प्रियसन्देशो भवतीनां सुखावहः ।
यमादायागतो भद्रा अहं भर्तुर्हि किङ्करः ॥ २८ ॥

सत्यधर्मीया — नानयसि तं न नयसि नः किन्तु होद्धव विरहेण योऽनुग्रहः कृत इति वदसि महानसीति न वदत सुदत्यः'समर्थितार्थसारं तद्वचनं च शृणुतेति तच्छ्रावयति ॥ श्रूयतामित्यादिना । भवतीनां सुखावहो भर्तुः किङ्करोऽहं यमादायागतोऽहं प्रियसन्देश इष्टवाची प्रियशब्दः । हे भद्रा युष्माभिः श्रूयताम् । भर्तुरहस्कर इति पाठे एकान्तकार्यकर्तेत्यर्थः । कस्कादिः ॥ २८ ॥

श्रीभगवानुवाच—

भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् ।
यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ॥ २९ ॥

सत्यधर्मीया — भवतीनां मे वियोगः क्वचिदपि सर्वात्मना सर्वथा न हि सर्वप्रकारेणोपपादयत वियोगं तथाऽपि संयोग उपपादयितुं शक्य इति वाक्यतात्पर्यम् । तत्र निदर्शनं दर्शयति ॥ यथेति । भूतानि । तानि नामनिर्देशपूर्वकमाह ॥ खमित्यादिना । खमाकाशो वाय्वित्यविभक्तिको निर्देशो वायुरग्निर्जलं मही चेति भूतेषु सर्वशरीरेष्वनुगतानि तथाऽहं सर्वानुगत इति कथं वियोगो मयेति भावः । वायुना सहितश्चासावग्निश्च वाय्वग्निरिति वा ॥ २९ ॥

तथाऽहं च मनःप्राणभूतेन्द्रियगुणाश्रयः ।
आत्मन्येवात्मनाऽऽत्मानं सृजे हन्म्यनुपालये ॥ ३० ॥

सत्यधर्मीया — साम्मुग्ध्यं विशिनष्टि ॥ मन इति ॥ तथा भूतवदहं वो मनश्च प्राणश्च बुद्धिश्चेन्द्रियाणि च गुणास्तद्विषयाश्च तेषामाश्रयस्तथाऽऽत्मन्येवानन्यथारतया स्थितः । आत्मना स्वेच्छयैवात्मानं देहादिकं सृजे हन्म्यनुपालये । सर्जनं पालनं संहरणमिति क्रमतो वक्तव्ये व्युत्क्रमत उक्तिर्विधाता धाता हर्ता हर इत्यपप्रथां श्लथयितुम् । पालनं त्वामरपामरं भगवत्कर्तृकमिति निश्चितमिति नान्ते निवेशेऽपि चिन्तेति ॥ ३० ॥

सुमनोरञ्जनी — एवमुक्त्वा श्रीकृष्णसन्देशं वक्तुमुपक्रमते ॥ श्रूयतामिति । हे भद्राः सुवासिन्यः! यं कृष्णसन्देशम् । सन्देशमनुवदति ॥ भवतीनामिति । भवतीनां मे मया वियोगः सर्वात्मना न हि । कथमित्यतः सदृष्टान्तं निरूपयति ॥ यथेति । यथा भूतेषु प्राणिनां शरीरेषु खमाकाशं तदादीनि भूतानि पञ्चमहाभूतानि अनुगतानि तथा अहं च अहमपि मन आदीनि नियामकतया अनुगतः । मनः प्राणबुद्धीन्द्रियगुणा एवाश्रया यस्य सः । मन आदिनियामकतया तत्र स्थित इत्यर्थः । अत्र भूतान्यपि ग्राह्याणि । भूतेन्द्रियेत्यनुवादात् । प्राणाः श्वासवायवः । इन्द्रियाणि मनोबुध्यतिरिक्तानि दश । तयोः पृथक् ग्रहणात् । गुणाः शब्दादयः । ननु भवत एकत्वात्

भूतेन्द्रियादीनामनेकत्वेन कथं तत्र स्थितिरित्यतो रूपविशेषैर्युक्तेत्याह ।। आत्मनीति । आत्मनि देहसमुदाये । भूतेन्द्रियगुणात्मना । अत्र पूर्वोक्तमनःप्राणबुद्धयो ग्राह्याः । भूतेन्द्रियगुणाद्यन्तर्यामिबहुरूपस्वरूपेण । आत्मानं स्वात्मानम् । यद्वा भावप्रधानोऽयम् । इत्थंभूतलक्षणे तृतीया । भूतेन्द्रियाद्यन्तर्यामित्वेनेत्यर्थः । सृजे दीपाद्दीपान्तरमिव व्यक्तीकरोमि । अनिरुद्धादिरूपविशेषानाविर्भावयामीति यावत् । आत्मनि हन्मि स्वाप्ययसूत्रोक्तरीत्या प्रलये मूलरूप एकीकरोमि । अनुपालये एतावत्कालपर्यन्तं मानुषेषु स्थास्य इति सङ्कल्पं करोमि । तदुक्तमेकादशतात्पर्ये ।

दीपाद्दीपान्तरं यद्वत्सृष्टिरीशस्य कीर्त्यते ।
एतावत्कालमासिष्ये मानुषेष्विति चिन्तनम् ।
विष्णोस्त्राणं समुद्दिष्टं स्वस्यैव स्वेच्छयैव तु ।
दीपो दीपान्तरस्येव ह्येकीभावश्च संहृतिरिति ।। ३० ।।

आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ।
आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तो गुणान्वयः ।। ३१ ।।

सत्यधर्मीया — आत्मनेति स्वोक्तं विशदयति ।। आत्मेति । आत्मनो मायेच्छा गतम् । तस्यानुभावेन सामर्थ्येन । तत्स्वरूपम् निरूपयति । भूतेन्द्रियगुणात्मना भूतेन्द्रियगुणादीन्व्याप्य वर्तमानेन । अनेन स्वस्य मुख्यकारणतामवान्तरकारणतां भूतानामभिप्रैतीति न विरोधः । भूतेन्द्रियगुणात्मनेत्यनेनापाततः प्रतीतजडतादात्म्यं निराकर्तुं व्यावर्तकधर्मानाह ।। आत्मेति । ज्ञानमयो ज्ञानात्मकः । शुद्धोऽप्राकृतो निरञ्जनो वा । गुणान्वयो न विद्यते गुणानां सत्त्वादीनामन्वयो यस्य सः, शुणानामानन्दादीनामन्वयो यस्य सोऽप्रधानसम्बद्धः कार्यं कारयतीति गुणान्वयो वाऽतो व्यतिरिक्तस्तद्भिन्न इत्यर्थः ।। ३१ ।।

सुमनोरञ्जनी — ननु भवानपि देहादिमानुपलब्धः कथं मन्मन आदिप्रवर्तक इत्यत आह ।। आत्मेति । यः आत्मा मन आदिनियामकः सोऽहमगुणान्वयः अगुणाश्रयः सत्वादिगुणबन्धरहितः प्राकृतदेहादिमान्नेत्यर्थः । शुद्धः निर्दोषः । ज्ञानमयः ज्ञानपूर्णः सर्वज्ञ इति यावत् । अत एव व्यतिरिक्तः युष्मदादिविलक्षण इत्यर्थः । मम शरीरादिमत्वेऽपि मच्छरीरादेरप्राकृतत्वेन मम च निर्दोषत्वसर्वज्ञत्वाभ्यां च युष्मदादिभ्यो विलक्षणत्वाद्युक्तं मन आदिप्रवर्तकत्वमिति भावः । अस्मिन्नर्थे प्रमाणमाह ।। सुषुप्तीति । मायावृत्तिभिः मायया भगवदिच्छया वृत्तिः वर्तनं यासां ताभिः सुषुप्तिस्वप्नजागृद्भिः तदाख्यावस्थाविशेषैः । आत्मा ज्ञानमय इत्यादि । ईयते अनुमीयते । तथा हि । अवस्थात्रयं तावत्सर्वेषामनुभवसिद्धम् । न च तज्जीवकर्तृकम् । जीवस्यास्वातन्त्र्यदर्शनात् । अतो भगवदिच्छाधीनमङ्गीकार्यम् । स च भगवानल्पज्ञानादिमांश्चेज्जीवतुल्यः स्यात् । अतः पूर्णज्ञानादि-मानङ्गीकार्य इति ।। ३१,३२ ।।

सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३२ ॥

सत्यधर्मीया — स केनावसीयत तत्राह ॥ सुषुप्तीति । सुषुप्तिश्च स्वप्नश्च जाग्रच्च तैर्माया च, मुख्यतो विष्णुशक्तिस्तु मायाशब्देन भण्यत इति द्वितीयतात्पर्योक्तेः स्वशक्त्या । वृत्तयः (मायया हरीच्छया वृत्तिः स्वरूपलाभो यासां तास्तथा ताभिः । विजयध्वजीव्याख्या) । सोऽयमात्मा चतुष्पा-ज्जागरितस्थानेऽन्तः प्रज्ञः । बहिः प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः । घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृत इत्यारभ्य त्रिधा तृप्तिमित्यन्तमण्डूकोपनिषदा । तथा जाग्रद्दर्शनरूपत्वादित्यादीकृत्येति मार्कण्डेय इत्यन्ततद्भाष्येण । तथा स्वप्नस्यान्तः सुषुप्तिः, स्वातन्त्र्यात्स्व इति प्रोक्तो विष्णुः सर्वेश्वरेश्वरः । तं प्राप्नोति मनोनामा संसारी स्वपितीत्यत इत्यादि छान्दोग्यादिभाष्येण चोक्ता वृत्त्रयस्ताभिरीयते । स्वप्नादिकं सकर्तृकं कार्यत्वात् घटवदित्यनुमानेन ज्ञायते ॥ ३२ ॥

एतदन्तः समाम्नायो योगः साङ्ख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥ ३३ ॥

सत्यधर्मीया — नैतच्छुष्कमनुमानमिति तन्मूलयति ॥ एतदन्त इति । एतस्यानुमानिकार्थस्यान्तो निर्णयो येन स समाम्नाय आगम उदाहृतः । स विश्वकृत्स हि सर्वस्य कर्तेत्यादेः । समा निष्पात-निकार्थतया सम्यक्त्वमाम्नायस्य ज्ञेयम् । योगः समाध्यादिः साङ्ख्यं पञ्चरात्रं त्यागो दानं दुःसमयवर्जनं वा तपो दमः सत्यमित्यादिः । सर्वोऽप्येतदन्त एष भगवदपरोक्षावगमोऽन्ते यस्य स तत्पर्यवसायीति यावत् । यथाऽऽपगा अपगा वा नद्यः समुद्रान्तर्नदीनां सागरो गतिः । आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रति गच्छतीत्यादेः । सर्वसर्गादिरूपव्यापारे भगवदवगमके सति किं सुषुप्त्यादिग्रहणमिति चेत् सत्यम् । गोपीः प्रतीदं वचनमिति ताश्च कामतः सह सय्या इति तदाद्युक्तिरिति मन्तव्यमू । सुषुप्तिर्मोक्षस्तदर्थं स्वप्ने स्वापगमके स्वापं नयन्निति तथा स्वर्गः सुषुप्तिरित्याख्या मुक्तेरपि समा यत इति च बृहद्भाष्योक्तेः । स्वप्ने हरौ जाग्रद्भिर्जागरणवद्भिस्तत्रैव निरतैर्मायावृत्तिभिर्भगवदिच्छयैव वृत्तिर्वर्तनं येषां ते तैरीयते तत्प्रत्यक्षतो विषयीक्रियत इति मनीषिणां समाम्नायः । सर्वोऽप्यभ्यासस्तथा योगं साङ्ख्यं त्यागस्तपो दमः सत्यमित्यादिरापगाः ससुद्रान्ता इवैतदपरोक्षज्ञानमेवान्ते जन्यत्वेन यस्य तथेति वा ॥ ३३ ॥

सुमनोरञ्जनी — समाम्नायः सर्वोऽपि वेदतन्मीमांसादिः । एतदन्तः एतस्य पूर्वोक्तार्थस्य विष्णोः पूर्णज्ञानत्वादिरूपस्य अन्तो निर्णयो येन सः उक्तार्थनिश्चायक इत्यर्थः । ननु वेदे क्वचिद्ज्ञानोपायः क्वचिच्च ज्ञानम् । क्वचिच्च त्यागादि । तत्कथं सर्वोऽप्येतदन्त इत्यत आह ॥ योग इत्यादि । योगो ज्ञानोपायः । एतदन्तः एतद्ज्ञानपर्यन्तः । एतद्ज्ञानार्थमेवोपदिश्यत इति यावत् ।

सांख्यं ज्ञानम् । एतदन्तम् एतदर्थनिश्चयरूपमेव । त्यागादिकमपि एतदन्तं एतद्ज्ञानपर्यन्तमेवेति । त्यागः फलकामनावर्जं दानं वा । सत्यं मनोवाक्कर्मणामवैपरीत्यम् । तत्र दृष्टान्तः ।। समुद्रेति । आपगाः नद्यः समुद्रान्ता समुद्रपर्यवसायिन्यः ।। ३३ ।।

यत्त्वहं भवतीनां वैदूरे वर्त्यपि यो दृशाम् ।
मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ।। ३४ ।।

सत्यधर्मीया — कत्स्यजेन्मां भवादृगिति मृगदृशो वदिष्यन्तीति विदितवृत्तः सर्ववित्तदुत्तरयति ।। यत्त्विति । भवतीनां वैदूरे विदूरमेव वैदूरं तस्मिन्समीपे वर्त्यपि दृशां दूरेऽहमभवमिति यत्तन्मदनुध्यानकाम्यया ममानुध्यानमखण्डं ध्यानं तत्काम्यया तदिच्छया । मदं नुदतीति मदनुदहङ्कारपरिहारकं यद्ध्यानं तत्काम्ययाऽहङ्कृता इत्येवमहङ्कृतवानिति वा युष्मन्मनसः सन्निकर्षार्थं मनःसंयोजनार्थमेवेति ।। ३४ ।।

सुमनोरञ्जनी — सत्यं, सर्वदा सर्वत्र सुसन्निहितो भवानिति तथापि दृशां दूरत्वात्खेद इत्यतस्तदपि भवतीनामनुग्रहार्थमेव कृतमित्याह ।। यदिति । यदपि भवतीनां दृशां दूरे वर्ती दूरे अस्मि तदपि यदनुध्यानं मदुपासनं तस्य काम्यया भवतीनां भूयादितीच्छया । मनसः सन्निकर्षार्थं मयि मनोनिवेशनार्थमेवेति ज्ञेयम् ।। ३४ ।।

यथा दूरतरे प्रेष्ठे मन आविश्य वर्तते ।
स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ।। ३५ ।।

सत्यधर्मीया — किमस्माकं समीपे सति भगवति भगवन्मनस्सन्निकर्षो दुष्कर इत्यतः सत्यमित्युत्तरयति ।। यथेति । दूरतरे प्रेष्ठे मन आविश्य वर्तते लग्नं भवतीति यावत् तथा स्त्रीणां चेतः सन्निकृष्टे पूर्वं सङ्गसहितेऽक्षिगोचरे चक्षुर्विषये । अक्षगोचर इति पाठ इन्द्रियविषय इत्यर्थः । नाविश्य वर्तत इत्यनुवर्तते । चशब्दात्पुरुषाणामित्यपीति । स्वयं तु लोकविलक्षणः पुमानिति सूचयितुं कण्ठतोऽनुक्तिरिति ज्ञेयम् ।। ३५ ।।

सुमनोरञ्जनी — तदेवोपपादयति ।। तथेति । स्त्रीणां, चशब्देन पुरुषाणां मनः दूरतरे प्रेष्ठे वस्तुनि आविश्य प्रविश्य यथा वर्तते चेतः, सन्निकृष्टे तस्मिन्नेवाक्षिगोचरे चक्षुर्विषये न तथेति ।।३५।।

मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान्मामुपेष्यथ ।। ३६ ।।

सत्यधर्मीया — कृत्स्नं स्ववृत्तिनिकुरम्बं तन्मनो मय्यावेश्य । कीदृक् तदित्यत ईदृगित्याह । विमुक्ता अशेषवृत्तयो येन तत्तथा । मां नित्यमनुस्मरन्त्योऽचिरात्त्वरया मामुपेष्यथ तत्र मां श्रियं स्वरूपसम्पदमुपेष्यथेत्यप्यन्वयसूचनार्थं पुनर्मामित्युक्तिरिति ज्ञेयम् ॥ ३६ ॥

सुमनोरञ्जनी — यत् यदा । कृत्स्नं यथा स्यात्तथा । विमुक्ताः अशेषवृत्तयः कामसंकल्पादयो यस्मात्तथाविधं मनो मय्याविश्य । असंप्रज्ञातसमाधिस्था इति यावत् । नित्यं मामनुस्मरन्त्यो यूयं तदा अचिरात् शीघ्रं मामुपेष्यथ ॥ ३६ ॥

यन्मया क्रीडिता रात्रीर्वनेऽस्मिन् व्रज आस्थिताः ।
अलब्धरासा कल्याण्यः आपुर्मां मद्विचिन्तया ॥ ३७ ॥

सत्यधर्मीया — रोचनार्थं रसनाग्रोपरितनी वाणीति नेति भवदनुभूतमिदं प्रमेयमित्युक्त्या ता विश्वासं जनयन्नाश्वासयति ॥ यदिति । यद्यस्मादस्मिन्वने आगताभिर्गोपीभी रात्रीः क्रीडिता मया व्रजे आस्थिताः पतिप्रतिषिद्धा व्रजाद्व्रजन्त्योऽलब्धरासोऽलब्धो रासो रासक्रीडा याभिस्ताः कल्याण्यो मद्विचिन्तया किं तया तन्वेति तां त्यक्त्वा मामापुः प्राप्ताः । एवमनुवादेन सैका पतिविधृता पदमाप विष्णोरितिवत्काश्चन स्वधवप्रतिषिद्धा भगवन्तमगुरिति । अन्तर्गेहगता इत्यारभ्य जहुर्गुणमयं देहमित्यन्तोक्तमनुसन्धेयम् । व्रज आस्थिता इति च सुलग्नमेतत्पक्षे । उपेष्यथेतीदं कायं विहायेत्यर्थकमिति तदानुगुण्यं च गुण्यैरस्मत्पक्षे वर्तत इति विभावनीयम् । अलब्धवासकल्याणा इति पाठोऽपि कल्याणकरः अलब्धं रासक्रीडाकल्याणां याभिस्ताः सत्य इत्यर्थ ॥ ३७ ॥

सुमनोरञ्जनी — व्रजे आस्थिताः भवत्यः अलब्धावासकल्याणाः अलब्धमावासकल्याणं गृहसुखं याभिस्ताः । मामापुः । मया सह रात्रीः वने क्रीडिताश्चेति यत् तत् मद्विचिन्तया प्राग्भवीय-मदनुचिन्तनेनैवेति । अतः सन्ततं मदनुचिन्तनेनैव मत्प्राप्तिर्भवतीति ज्ञेयमिति भावः ॥ ३७ ॥

श्रीशुक उवाच—

एवं प्रियतमादेशमाकर्ण्य व्रजयोषितः ।
ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतयः ॥ ३८ ॥

सत्यधर्मीया — प्रियतमस्य पुत्रात्प्रेयो वित्तात्प्रेय इत्यादेरतिप्रियस्यादेशमाज्ञारूपं वचनम् । तत्सन्देशेनागता स्मृतिर्विशेषतो यासां ता आगतस्मृतयः प्रीता उद्धवं प्रत्यूचुः ॥ ३८ ॥

सुमनोरञ्जनी — प्रियतमस्य कृष्णस्य आदेश उपदेशः । तस्य सन्देशेन आगता स्मृतिर्भगव-न्माहात्म्यविषयिणी स्मृतिर्यासां ताः ॥ ३८ ॥

गोप्य ऊचुः—

दिष्ट्याऽऽहितो हतः कंसो यदूनां सानुगोऽघकृत् ।
दिष्ट्याऽप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ३९ ॥

सत्यधर्मीया — यदूनां सानुगः सदासोऽघकृत्पापकार्योऽहितः कंसो दिष्ट्या हतः । दिष्ट्यैव । आप्तैर्वसुदेवादिभिर्लब्धाः सर्वार्था येन स सन् अधुनाऽच्युतः कुशल्यास्ते कच्चित् । अच्युत इति वचनेन कुशलप्रश्नो लोकमपेक्ष्येति सूचयन्ति ॥ ३९ ॥

सुमनोरञ्जनी — यदूनां अहितः अघकृत् बालहत्याद्यघकृत् । लब्धः सर्वार्थः सर्वपुरुषार्थो यैस्तैराप्तैः वसुदेवादिभिः सह । अच्युतः कुशली क्षेमवानास्ते । तद्दिष्ट्या आनन्दकरम् ॥ ३९ ॥

कच्चिद् गदाग्रजः सौम्य करोति पुरयोषिताम् ।
प्रीतिं सुस्निग्धसव्रीडहासोदारेक्षणार्चितः ॥ ४० ॥

सत्यधर्मीया — पुरयोषितां गदाग्रजः प्रीतिं करोति कच्चित् । ताभिः पुरयोषिद्भिः सुस्निग्धानि सव्रीडानि हाससहितान्युदाराणीक्षणान्यवलोकनानि तैरञ्चितः सन् एवं तत्सत्कृतः स्वयं तत्फलरूपां प्रीतिं करोति कच्चिदित्यन्वयः । क्वचिदिति पाठे क्वचित्करोति किमित्यर्थः ॥ ४० ॥

सुमनोरञ्जनी — गदाग्रजः गदनाम्नो वसुदेवपुत्रस्य अग्रजः श्रीकृष्णः । सु अत्यन्तं स्निग्धः स्नेहसहितः सव्रीडः व्रीडायुक्तो यो हासः तेन उदारमुत्कृष्टमीक्षणं तेनार्चितः सन् पुरयोषितां प्रीतिं करोति कच्चित् ॥ ४० ॥

कथं रतिविशेषज्ञः प्रियश्च पुरयोषिताम् ।
नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुभाजितः ॥ ४१ ॥

सत्यधर्मीया — अनुभाजितः सभाजितः पात्रीकृत इति वा रतिविशेषज्ञः पुरयोषितां प्रियश्च संस्तद्वाक्यैः परयोषितां विभ्रमैर्विलासैः कथं नानुबद्ध्येत न बद्धः स्यात्स्याच्च बद्ध एवेति भावः ॥ ४१ ॥

सुमनोरञ्जनी — रतेर्ये विशेषाः तान् जानातीति तथाविधः । अत एव पुरयोषितां प्रियश्च । पुरयोषितामित्यनेन तासामपि तदभिज्ञता ध्वनिता । विभ्रमैः श्रङ्गारचेष्टाभिः अनुभाजितः सभाजितः कथं नानुबध्येत ॥ ४१ ॥

अपि स्मरति नः साधो गोविन्दः प्रस्तुते क्वचित् ।
गोष्ठीमध्ये पुरस्त्रीणां ग्राम्यस्वैरकथान्तरे ॥ ४२ ॥

सत्यधर्मीया — केवलमेकान्तिको देवस्येति परमरहस्यं पृच्छन्ति ॥ अपीति । गोविन्दः पुरस्त्रीणां गोष्ठीमध्ये व्यवहरणान्तरे तथा ग्राम्यस्वैरकथान्तरे सुरतकालिकेच्छाप्रवृत्तकथान्तरे प्रस्तुते वा कच्चिन्नः स्मरति ॥ ४२ ॥

सुमनोरञ्जनी — पुरस्त्रीणां गोष्ठीमध्ये सभामध्ये । ग्राम्ये इन्द्रियग्रामविषये । स्वैरकथान्तरे स्वच्छन्देन व्यवह्रीयमाणकथाविशेषे प्रस्तुते सति ॥ ४२ ॥

ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृन्दावने कुमुदकुन्दशशाङ्करम्ये ।
रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ४३ ॥

सत्यधर्मीया — यासु निशासु कुमुदकुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणश्चरणनूपुर-रासगोष्ठ्यामीडितमनोज्ञकथस्तदा प्रियाभिरस्माभिरित्युभयान्वयि । अस्माभिः सह रेमे ता निशाः कदाचित्स्मरति किमित्यन्वयः ॥ ४३ ॥

सुमनोरञ्जनी — तदा वृन्दावनावासकाले । कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने । क्वणन्ति चरणनूपुराणि यस्यां सा च सा रासगोष्ठी रासक्रीडास्थानं तस्याम् । तदा तस्मिन् । प्रियाभिः अस्माभिः । ईडिताः स्तुतिपूर्वं कथिता मनोज्ञा कथा यस्य सः । यासु रात्रिषु रेमे ताः निशाः कदाचित् स्मरति ॥ ४३ ॥

अप्येष्यतीह दाशार्हस्तप्तं स्वकृतया शुचा ।
सञ्जीवयन् व्रजं गात्रैर्यथेन्द्रो वनमम्बुदैः ॥ ४४ ॥

सत्यधर्मीया — स्वकृतया स्वनिमित्तया शुचा तप्तं व्रजं तत्स्थं स्त्रीजनं गात्रैः स्पृष्टैः सञ्जीवयन्निहैष्यत्यपि किम् । अनेनामृतमयतामवयवानां कटाक्षयन्ति । तत्र निदर्शनमाहुः ॥ यथेति । इन्द्रस्तप्तं निदाघतो वनमम्बुदैर्मेघैर्यथेति । गात्राणामप्यम्बुदसाम्यं ध्वनयन्ति ॥ ४४ ॥

सुमनोरञ्जनी — स्वकृतया स्वनिमित्तया । स्वविरहनिमित्तेनेति यावत् । शुचा तप्तं सन्तप्तं व्रजम् । गात्रैः अवयवैः संजीवयन् आप्याययन् ॥ ४४ ॥

कस्मात् कृष्ण इहायाति प्राप्तराज्यो हताहितः ।
विहृत्य नगरस्त्रीभिः प्रीतः सर्वसुहृद्वृतः ॥ ४५ ॥

सत्यधर्मीया — तां प्रति वा साम्मुग्ध्येन वा काचित्प्रौढा दीर्घेण कालेनागमिष्यामीति प्रलोभन-मात्रमिति सहेतुकं वक्ति ॥ कस्मादिति । प्राप्तराज्यो हताहितो नगरस्त्रीभिर्विहृत्य प्रीतः सर्वसुहृद्वृत्त-श्चेत्यनागमनहेतवः । कस्मादिहायाति न कारणं पश्याम इत्याशयः ॥ ४५ ॥

सुमनोरञ्जनी — प्राप्तराज्यादिः कृष्णः कस्मान्निमित्तादिहायाति । हताः अहिताः शत्रवो येन सः ॥ ४५ ॥

किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ।
श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ॥ ४६ ॥

सत्यधर्मीया — तत्रोद्धवद्वारा स्वधवमाधवबोधनोद्बुद्धस्मृतिमती काचिद्वदति ॥ किमिति । वनमोको यासां ताभिः किं किं प्रयोजनम् । तथाऽन्याभिर्नगराङ्गनाभिरप्यर्थः क्रियेत किं नेत्यर्थः । महात्मत्वं श्रीपतित्वमाप्तकामत्वं कृतात्मत्वं च तत्कृतार्थाभावे हेतवः ॥ ४६ ॥

सुमनोरञ्जनी — परमार्थबुध्या त्वाहुः ॥ वनौकाभिः वनवासिनीभिः । अन्याभिः पुरस्त्रीभिर्वा किं किं प्रयोजनम् । तत्र हेतुत्रयम् ॥ श्रीपतेरिति । आप्तकामस्य अवाप्तपरमानन्दस्य । कृतात्मनः पूर्णस्य । अर्थः किं क्रियेत किं सुखं कुर्यात् ॥ ४६ ॥

परं सुखं हि नैराश्यं स्वैरिण्यप्याह पिङ्गला ।
तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥ ४७ ॥

सत्यधर्मीया — इत आशा कुतस्तथाऽपि सा नात्येतुं शक्येत्याहुः ॥ परमिति । नैराश्यं परं सुखम् । स्वैरिणी पिङ्गला तन्नाम्नी वारनार्याह । एकादशे प्रोक्ता तत्कथाऽनुसन्धेया । तत्तद्वचनं जानतीनामप्यस्माकं कृष्णे तथाऽपि । तथाप्येति छेदः । आशा दुरत्यया । साऽप्येतमेव परोक्षतः कान्तं मत्वा नश्यत्कान्तान्तराशां तत्याज । वयं त्वपरोक्षतः सम्प्राप्तसङ्गाः कथय कथं त्यक्ष्यामाशा-मित्याशयः । यथोक्तमेकादशे । सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय । अकामदं दुःखभंयादिशोकमोहप्रदं जारमहं भजेऽज्ञेति ॥ ४७ ॥

सुमनोरञ्जनी — तथा स्वैरिण्यपि पिङ्गला तन्नाम्नी वेश्या । नैराश्यं परं सुखमित्याह । तथापि तत्पिङ्गलोक्तं जानतीनां नः आशा तृष्णा दुरत्यया त्यक्तुमशक्या ॥ ४७ ॥

क उत्सहेत सन्त्यक्तुमुत्तमश्लोकसंविदम् ।
अनिच्छतोऽपि यस्य श्रीरङ्गान्न च्यवते क्वचित् ॥ ४८ ॥

सत्यधर्मीया — इत उत्तरत्र तद्गात्रसङ्गो नास्माकमिति पुंस्त्वमेवारोप्य स्त्रीजनो वक्ति ॥ क इति । उत्तमश्लोकसंविदं तेनैकान्तव्यवहरणं सन्त्यक्तुं कः स्त्रीजन उत्सहेत । या श्रीः साऽपि यस्याङ्गा-त्क्वचिदपि न च्यवते । सोऽपि तदाकाङ्क्षते इति सा तदाकाङ्क्षेति नेत्याह ॥ अनिच्छतोऽपीति ।

स्वरतत्वान्मुनिवर्य शैल इति पञ्चमोक्तिवदङ्गस्मरणाभावेन क इत्युक्तिर्वाऽतो न दृष्टान्तदार्ष्टान्तिक-व्यत्यासः ॥ ४८ ॥

सुमनोरञ्जनी — न केवलमस्माकमेव श्रीकृष्णतृष्णा दुरत्यया किं तु सर्वेषामपीत्याहुः ॥ क इति । उत्तमश्लोकेन सहसंविदं मैत्रीम् । अनिच्छतोऽपि आप्तकामत्वेनेच्छारहितत्वेऽपि । अङ्गात् वक्षसः ॥ ४८ ॥

सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ।
सङ्कर्षणसहायेन कृष्णेनाक्रीडिताः प्रभो ॥ ४९ ॥

सत्यधर्मीया — न तद्विस्मरणे शक्ता इति वदन्ति ॥ सरिदिति । तत्प्रदेशा गावस्तदङ्कितनाम्न इमे तत्किञ्चित्सजातीयो बुद्धिसन्निधानादिम इत्युक्तिः । वेणुरवाः सङ्कर्षणसहायेनाक्रीडिताः सरिच्छैलवनोद्देशाश्च तं याचितमस्मारयन्तीति वा ॥ ४९ ॥

सुमनोरञ्जनी — कृष्णेन आक्रीडिताः क्रीडारङ्गत्वेन कृताः इमे सरिच्छैलवनानामुद्देशाः प्रदेशाः ॥

पुनःपुनः स्मारयन्ति नन्दगोपसुतं बत ।
श्रीनिकेते तत्पदके विस्मर्तुं नैव शक्नुमः ॥ ५० ॥

सत्यधर्मीया — श्रीनिकेते तत्पदके धूल्यङ्किते पदके ॥ ५० ॥

सुमनोरञ्जनी — बत हर्षे । श्रियो निकेते तस्य कृष्णस्य पदके पादौ वयं विस्मर्तुं नैव शक्नुमः ॥५०॥

गत्या ललितयोदारहासलीलावलोकनैः ।
माध्व्या गिरा हृतधियः कथं तद् विस्मरामहे ॥ ५१ ॥

सत्यधर्मीया — तद्गत्यादि विस्मराम हे प्रभवित्यन्वयः ॥ ५१ ॥

सुमनोरञ्जनी — स्नेहातिशयवशेन पुनरप्याह ॥ गत्येति । ललितया मनोहरया । माध्व्या मधुरया । तत् गत्यादिकम् ॥ ५१ ॥

हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ।
मग्नमुद्धर गोविन्द गोकुलं वृजिनार्णवात् ॥ ५२ ॥

सत्यधर्मीया — सर्वा अपि पारवश्येन सम्बोध्य प्रार्थयन्ते ॥ हे नाथेति । नाथेदानीमस्मत्प्रेष्ठ याचितैश्वर्यमूर्ते वा । व्रजनाथ तत्स्वामिन् । व्रजनाथस्य नन्दस्यार्तिनाशनेति वा । अविशेषेणार्तिनाशन

वा । मग्नं तत्रैव तस्माद्वृजिनार्णवाद्गोविन्द त्वमुद्धर । गोविन्देति वचनेन गिर्युद्धरणादिकं कृत्वा स्वावनं प्राग्यथा कृतं तथोत्तरत्रापि स्वानुभवं हेतुं ध्वनयन्ति ।। ५२ ।।

सुमनोरञ्जनी — भक्त्युद्रेकेणाहुः ।। हे नाथेति । वृजिनं दुःखम् । वृजिनं दुःखमकं तोद इत्यभिधानात् ।। आर्तिनाशन सांसारिकार्तिपरिहारक ! व्रजनाथानां गोपानां आर्तिनाशनेति वा ।। ५२ ।।

।। इति श्रीमद्भागवते दशमस्कन्धे पञ्चचत्वारिंशोऽध्यायः ।।

।। अथ षट्चत्वारिंशोऽध्यायः ।।

श्रीशुक उवाच—

ततस्ताः कृष्णसन्देशैर्व्यपेतविरहामयाः ।
उद्धवं पूजयाञ्चक्रुर्ज्ञात्वा स्निग्धमधोक्षजे ।। १ ।।

सत्यधर्मीया — उद्धवस्तद्भक्तिं निशाम्य चित्रचेतस्क एवं ताः स्तुवन् दिनानि कानिचिद्रमयित्वा मधुरामगादित्यादि कथ्यतेऽस्मिन्नध्याये । तत्रादौ गोपीकृतसत्कारमुद्धवस्य वक्ति शुक इति वक्ति ।। श्रीशुक इति । व्यपेतो नष्टो विरहजनित आमयो रोगो यासां ता अधोक्षजे स्निग्धं स्नेहसहितं भक्तमिति ज्ञात्वा । अनेनास्मिन्पूजितेऽजितः पूजितो भवतीति तासां भावो ध्वन्यते ।। १ ।।

सुमनोरञ्जनी — उद्धवस्य भक्तिं निरूपयत्यस्मिन्नध्याये । तत्र तावत्प्रसक्तां कथां समापयति । व्यपेतः विरहामयः विरहज्वरो याभ्यस्ताः गोप्यः । अधोक्षजे । स्निग्धं भक्तियुक्तं ज्ञात्वा ।। १ ।।

उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः ।
कृष्णलीलाकथा गायन् रमयामास गोकुलम् ।। २ ।।

सत्यधर्मीया — कृष्णस्य लीला यासु ताः कथा गायन् गोपीनां शोकान्विनुदन्परिहरन्गोकुलं रमयामास ।। २ ।।

सुमनोरञ्जनी — विनुदन् परिहरन् । कृष्णस्य लीलाविषयिण्यः कथाः । रमयामास सुखयामास ।।

यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत् स उद्धवः ।
व्रजौकसां क्षणप्रायाण्यासन् कृष्णस्य वार्तया ।। ३ ।।

सत्यधर्मीया — तावन्त्यहानि सन्तोषातिशयेन क्षणप्रायाणि तत्सदृशान्युत्सवभूयिष्ठानि वा ॥ ३ ॥

सुमनोरञ्जनी — यावन्ति अहानि दिनानि । अवात्सीत् उवास । तावंति कृष्णवार्तया क्षण-प्रायाणि क्षणतुल्यानि ॥ ३ ॥

सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितान् द्रुमान् ।
कृष्णं संस्मारयन् रेमे हरिदासो व्रजौकसाम् ॥ ४ ॥

सत्यधर्मीया — सरिद्वनगिरिद्रोणीर्वीक्षन्वीक्षमाणः । कृष्णं संस्मारयन्रेम इति सरलः पाठः । कृष्णक्रीडाः स्मरन्निति पाठे व्रजौकसां तैः सह कृष्णक्रीडां स्मरन्रेम इत्यन्वयः ॥ ४ ॥

सुमनोरञ्जनी — सरितो वनानि गिरिद्रोणीः पर्वतनिम्नप्रदेशान् । तत्र तत्र । कुसुमितान् द्रुमांश्च वीक्षन् । तत्सर्वं व्रजौकसां गोपगोपीनां या कृष्णेन सह क्रीडा तस्याः समं योग्यं मत्वा । रेमे सुखितोऽभूत् । व्रजौकसां गोपीनां या क्रीडा तस्याः समं यथा भवति तथा । स्वयमप्यन्याभिः रेमे इति च ॥ ४ ॥

दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मविक्लवम् ।
उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५ ॥

सत्यधर्मीया — एवमादि कृष्णावेशात्मविक्लवं कृष्णावेशेन निवेशेनात्मनो मनसो विक्लवं क्लैब्यं दृष्ट्वा परमप्रीत उद्धवस्ता नमस्यन्निदं वक्ष्यमाणं जगौ ॥ ५ ॥

सुमनोरञ्जनी — एवमादि । कृष्णो आवेशः प्रवेशो यस्य तस्यात्मनो मनसो विक्लवं विवशतां दृष्ट्वा । ताः गोपीः नमस्यन् मनसा नमस्कुर्वन् ॥ ५ ॥

उद्धव उवाच—

एताः परं तनुभृतां भुवि गोपवध्वो गोविन्द एवमखिलात्मनि रूढभावाः ।
वाञ्छन्ति यद् भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथा न यत्र ॥ ६ ॥

सत्यधर्मीया — भुव्येता गोपवध्वो यद्यतोऽखिलात्मनि पूर्णात्मनि गोविन्दे रूढभावा रूढो दृढनिरूढो भावो भक्तिर्यासां तास्तनुभृतां शरीरधारिणां मध्ये । परमित्यव्ययम् । उत्तमा इत्यर्थः । परं तनुभृत इति पाठे सफलजन्मान इत्यर्थः । भवधियो मङ्गलबुद्धयो वाञ्छन्ति । वयमपि वाञ्छामः किं तन्निन्दनं क्रियत इत्यत आह । ब्रह्मजन्मभिश्च किं प्रयोजनम् । यत्र ब्रह्मजन्मस्वनन्तकथा न तत इति । भवधिय संसारबुद्धय इति वा ॥ ६ ॥

सुमनोरञ्जनी — तनुभृतां देहिनां मध्ये । एवमुक्तरीत्या । अखिलात्मनि पूर्णात्मनि गोविन्दे । निरूढः अतिदृढ इति यावत् । भावो भक्तिर्यासां ताः दृढभक्ता एता एवेति यावत् । वयं मुनयश्च यद्भवे येषां गोपीनां भवो जन्म तस्मिन् धीर्बुद्धिर्येषां तथाविधाः सन्तो यत् भक्तिदार्ढ्यमेव वाञ्छन्ति । जन्मान्तरेऽपि गोपी भूत्वैव भक्तिदार्ढ्यं संपादयाम इति वाञ्छन्तीति भावः । उत्तमं ब्रह्मजन्मैवापेक्षणीयम् । किमर्थं वैश्यजन्मापेक्षेत्यत आह ॥ किमिति । यत्र येषु जन्मसु अनन्तकथा नास्ति तादृशैर्ब्रह्मजन्मभिः किं न किमपि । यद्वा भवधियः संसारे बुद्धिमन्तः वयं मुनयश्च यत् भक्तिदार्ढ्यम् । वाञ्छन्ति वाञ्छन्त्येव न तु प्राप्तवन्तः । अस्मदादीनामेवंरीतिः का कथाऽन्येषामित्याह ॥ किमिति । यत्र अनन्तस्य कथैव नास्ति तादृशैर्ब्रह्मजन्मभिः ब्राह्मणैः प्राप्यमिति किं किं वक्तव्यमिति ॥ ६ ॥

केमाः स्त्रियो वनचरीर्व्यभिचारशीलाः कृष्णे क्व चैष परमात्मनि रूढभावः ।
नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ७ ॥

सत्यधर्मीया — इमाः स्त्रिय वनचरीर्वनचर्यः क्व । ननु च तपोर्थं वनचरणं तासां किन्न भवेदित्यत आह ॥ व्यभिचारशीला अनैकान्तिकस्वभावा इति कृष्णे परमात्मन्येष रूढभावः क्व । अविदुषोऽपि वेदान्तजनिताज्ञानस्यानुभजतो जनस्य साक्षादीश्वरः श्रेयस्तनोति ननु । अनभिज्ञेनापि वैद्येनोपयुक्तोऽगदराजश्चिन्तामण्यादिमात्रागुणानुगुणं श्रेयस्तनोति तथेति ॥ ७ ॥

सुमनोरञ्जनी — इमाः स्त्रियः क्व, कृष्णे निरूढभावः क्व ? कुत इत्यतो वनचरा इत्यनेन गुरूपदेशादिसाध्यभक्तेः स्वप्राप्तिसाधनत्वज्ञानाभावं सूचयति । व्यभिचारः परपुरुषाभिगमनमेव शीलं स्वभावो यासां ता इत्यनेन ज्ञानप्रतिबन्धकं च सूचयति । तथापि भगवान्, अविदुषोऽपि एतज्जन्मनि शास्त्रेण भक्तिर्भगवत्प्राप्तिसाधनमित्यजानतोऽपि । अनुभजतः स्वभावादेव भक्तिं कुर्वतः पुंसः । साक्षात्स्वयम् । श्रेयः स्वप्राप्तिलक्षणं श्रेयः तनोति प्रयच्छति । तत्र दृष्टान्तः ॥ गदराज इति । गदराजः रोगपरिहारकौषधविशेषः विघ्नराज इतिवत् । उपयुक्तः सेवितः यथा श्रेयः आरोग्यं तनोति न तु रोगिणस्तद्गुणज्ञानमपेक्षत इति । नन्वित्यनेन यमेवैष वृणुते । भक्त्या त्वनन्यया लभ्य इति श्रुतिस्मृती सूचयति ॥ ७ ॥

नायं श्रियो ननु नितान्तरतेः प्रसादः स्वर्योषितां च ललिताङ्गरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद् व्रजवल्लवीनाम् ॥ ८ ॥

सत्यधर्मीया — रासोत्सवे भुजदण्डैर्गृहीतकण्ठा इति लब्ध आशिषोऽभिलाषो याभिस्तास्तासाम् । व्रजवल्लवीनां व्रजस्य गोपीनामुपर्यस्य कृष्णस्य यः प्रसाद उदगादयं प्रसादो नितान्तरतेः

सदा तदासक्तायाः स्त्रियः श्रियो रमाया न । शाश्वतिकस्तत्प्रसाद एवमिदानीमेव नेति तात्पर्यम् । सप्तमतात्पर्यादौ वर्णितमनुसन्धेयम् । स्वर्योषितामप्सरसां ललिताङ्गरुचां ललिता मनोज्ञाऽङ्गस्य रुग्यासां तासां न ननु । अन्या योषितः कुतो लभन्ते नेति भावः । उदगादुद्भूतादगाद्वेवर्धनाच्च यः प्रसाद इत्यप्यावृत्त्याऽन्वयो ज्ञेयः । भुजदण्डगृहीतकण्ठलब्धाशिषां व्रजवल्लवीनां यः प्रसादः स नितान्तरतेः श्रिय एव तथा ललिताङ्गरुचां स्वर्योषितां च श्रिय एव । यतोऽयं श्रिय एव ना परमपुरुषोऽन्या वल्लव्योऽप्सरसः कुतस्तत्पात्रं भवेयुरित्यन्तर्भाव उद्धवस्येति ज्ञेयम् ॥ ८ ॥

सुमनोरञ्जनी — रासोत्सवे अस्य कृष्णस्य भुजदण्डेन गृहीतकण्ठा तत एव लब्धाः आशिषो मनोरथाः यासां ताश्च । तासां व्रजवल्लवीनां गोपीनां यः प्रसादः अनुग्रहः उदगात् उदितः । अयं नितान्तरतेः श्रियः स्वर्योषितां च नेत्यर्थः । अन्याः कुतस्तादृशप्रसादभागिन्यः । रासोत्सवे व्रजवल्लवीनां यः प्रसादः सुखविशेषः उदगात् सः श्रियादीनां च नेति वा । रमायाः जन्यसुखस्यैव निषेधो ज्ञेयः ॥ ८ ॥

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥ ९ ॥

सत्यधर्मीया — स्वयं तासां भक्तिं दृष्ट्वोत्तेजयितुं ताः पारोक्ष्यतस्तद्दास्यं स्वस्य नानाप्रकारेणाशास्ते त्रिभिः श्लोकैरुद्धव इत्यभिधत्ते ॥ आसामिति ॥ आसां गोपीनां चरणरेणुजुषां पादधूलीः सेवमानानां वृन्दावने तदवनौ गुल्मलतौषधीनां मध्ये किमपि गुल्मादि किमप्येकतमं स्याम् । किं तच्चरणरेणुमाहात्म्यामित्यतस्ता एवं महानुभावा इत्याह ॥ या इति । दुस्त्यजमभिमतेस्त्यक्तुमशक्यं स्वजनं हित्वा यथाऽऽर्यपथमार्याणां पन्थाः पत्या नियत्या सार्धमर्धाङ्गिन्या वर्तितव्यमिति यः स आर्यपथस्तं मृहित्वा श्रुतिभिर्विमृग्यां मुकुन्दपदवीं भेजुर्या आसामित्यन्वयः । अहो नीचानामाभीरभामिनीनामिदं च चित्रमिति ॥ ९ ॥

सुमनोरञ्जनी — अहं आसां गोपीनां चरणरजोजुषां पादरजः स्पर्शवतां गुल्मलतौषधीनां मध्ये किमपि गुल्मादिकं स्याम् ? किं तासां माहात्म्यमित्यत आह ॥ या इति । याः स्वजनं भर्त्रादिकम् । आर्यपथं भर्तृसङ्गादिरूपार्यमार्गं हित्वा । श्रुतिभिर्वेदैरपि विमृग्यां मार्गणीयां मुकुन्दपदवीं मुकुन्दस्य हरेः प्रापकं मार्गं भेजुः । अहो अमीषां किं पूर्वार्जितं स्यादिति ॥ ९ ॥

या वै श्रियाऽर्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतश्चरणारविन्दं न्यस्य स्तनेषु विजहुः परिरभ्य तापम् ॥ १० ॥

सत्यधर्मीया — श्रियाऽर्चितं ब्रह्मादिभिश्चार्चितम् । आप्तकामैरिति योग्यान्वयि । योगेश्वरैर्योगैनैवेश्वरा राजान इति वा योगवदधिकैर्जनकादिभिर्वा सनकादिभिरात्मनि हृदयेऽर्चितं यत्तत्कृष्णस्य भगवतश्चरणारविन्दं रासगोष्ठ्यां स्तनेषु न्यस्य किञ्च परिरभ्य चाङ्गं, तापं या विजहुरासामित्यतीतेन वोत्तरेण वाऽन्वयः ॥ १० ॥

सुमनोरञ्जनी — याः गोप्यः श्रिया । आप्तकामैः पूर्णकामैः ब्रह्मादिभिः योगेश्वरैः योगप्रभावलब्धैश्वर्यवद्भिः । आत्मनि हृदये अर्चितं भगवतश्चरणारविन्दं, रासगोष्ट्यां स्तनेषु स्वस्वस्तनेषु न्यस्य स्थापयित्वा । तापं त्रिविधसन्तापं जहुः । आसामिति पूर्वेणान्वयः ॥ १० ॥

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ११ ॥

सत्यधर्मीया — यासां हरिकथाया उद्गीतं गानं भुवनत्रयं पुनाति तासां नन्दव्रजस्त्रीणामभीक्ष्णशः पादरेणूनहं वन्दे शिरसा वहामि स्तौमि च ॥ ११ ॥

सुमनोरञ्जनी — नन्दव्रजे विद्यमानस्त्रीणां पादरेणुं, अभीक्ष्णशः पुनः पुनरपि वन्दे नमामि स्तौमि वा । कुतः । यासां हरिकथासहितमुद्गीतम् । यद्वा यद्विषयकं हरिकथासहितमुद्गीतं स्तोत्रम् । भुवनत्रयं पुनाति ॥ ११ ॥

श्रीशुक उवाच—

अथ गोपीरनुज्ञाप्य यशोदां नन्दमेव च ।
गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ १२ ॥

सत्यधर्मीया — चाद्यशोदां नन्दमप्यनुज्ञाप्येत्यन्वयः सूच्यते । यास्यन्मधुराम् ॥ १२,१३ ॥

सुमनोरञ्जनी — अनुज्ञाप्य तासामनुज्ञां गृहीत्वा । आमन्त्र्य गमिष्यामीति सम्भाव्य ॥ १२ ॥

तं निर्गतं समासाद्य नानोपायनपाणयः ।
नन्दादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ १३ ॥

सुमनोरञ्जनी — राज्ञे निवेदनीयनानाविधोपायनपाणयः ॥ १३ ॥

मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः ।
वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रवणादिषु ॥ १४ ॥

सत्यधर्मीया — पारवश्यादिदं च व्यापारं गोपानां वदति ॥ मनस इति द्वाभ्यां । अस्माकं नो मनसो वृत्तयो धर्माः कृष्णपद्मदाम्बजाश्रयाः स्युः । नो वाचः कृष्णनाम्नामभिधायिनीरभिधायिन्य उच्चारयन्त्यः स्युः । कायस्तत्प्रवणादिषु तन्नमस्कारादिषु स्यात् ॥ १४ ॥

सुमनोरञ्जनी — नः अस्माकं मनोवृत्तयः मनोव्यापाराः कृष्णस्य पादाम्बुजविषयाः स्युः । वाचः वागिन्द्रियाणि कृष्णस्य नाम्नामभिधायिनीः उच्चारयित्र्यः स्युः । कायः देहः तत्प्रवणादिषु तन्नमस्कारादिषु स्यादित्यन्वयः ॥ १४ ॥

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ।
मङ्गलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥ १५ ॥

सत्यधर्मीया — कर्मभिर्जन्मान्तरसञ्चितैर्भ्राम्यमाणानां नानायोनिषु । न तेषां स्वातन्त्र्यं चेतनानामचेतनानां वेति वेदयितुमीश्वरेच्छया मुख्ययाऽमुख्यैः कर्मभिरित्युक्तिः । तत्रापि यत्र क्व च मङ्गलाचरितै स्तथा दानैः सद्भ्यो वित्तवितरणैः कृष्णे इश्वरे नो रतिर्भक्तिः स्यात् ॥ १५ ॥

सुमनोरञ्जनी — न केवलमेतज्जन्मन्येवं किन्तु जन्मान्तरेऽपि कृष्ण एव रतिः स्यादित्याहुः ॥ कर्मभिरिति । कर्मभिः तदुद्बोधकेश्वरेच्छया च भ्राम्यमाणानां नानायोनिषु परिभ्रमतामस्माकं यत्र क्वापि जन्मनि यानि मङ्गलाचरितानि सुकर्माणि दानानि वा तैः निमित्तैः कृष्णे रतिः स्यादिति ॥ १५ ॥

एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ।
उद्धवः पुनरागच्छन्मधुरां कृष्णपालिताम् ॥ १६ ॥

सुमनोरञ्जनी — एवं गोपैः कृष्णे या भक्तिः तया निमित्तया सभाजितः पूजितः ॥ १६ ॥

सत्यधर्मीया — एवमित्यनेनैवमुद्धव दयां कुरु यथाऽस्माभिर्मनसो वृत्तय इत्याद्याशंसितं स्यात्तथेति सूचयति । सभाजितः पूजितः । कृष्णाय उग्रसेनाय चोपायनानि दत्तान्यदात् ॥ १७ ॥

कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम् ।
वासुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ १७ ॥

सत्यधर्मीया — पुरपुरन्ध्रीषु सतीषुसैरन्ध्रीं त्रिवक्रामवक्रां विधाय केवलं करुणापरवांस्तया याचित उचितकाले आगच्छाम्यगारमिति स्वोक्तं स्मरंस्तद्भक्तिप्रसन्नः सहोद्धवेनागादित्यादि प्रतिपाद्यतेऽत्र ॥ अथेत्यादिना । अथोद्धवागमनानन्तरं भगवान्सर्वात्मा सर्वदर्शनो विज्ञाय तत्प्रार्थनाम् ॥ १७ ॥

सुमनोरञ्जनी — भक्त्युद्रेकः भक्त्युत्कर्षः । राज्ञे उग्रसेनाय ॥ १७ ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे षट्चत्वारिंशोऽध्यायः ॥

।। अथ सप्तचत्वारिंशोऽध्यायः ।।

श्रीशुक उवाच—

अथ विज्ञाय भगवान् सर्वात्मा सर्वदर्शनः ।
सैरंध्र्याः कामतप्तायाः प्रियमिच्छन् गृहं ययौ ।। १ ।।

सत्यधर्मीया — स्मृत्वाऽनुग्रहोन्मुखो भूत्वेति यावत् कामतप्तायाः सैरन्ध्र्याः प्रीतिं यच्छन्गृहं ययावित्यन्वयः ।। १ ।।

सुमनोरञ्जनी — अथ उद्धवागमनानन्तरम् । विज्ञाय सैरन्ध्र्याः वरदानं स्मृत्वा सैरन्ध्रीं स्वागमनकाङ्क्षिणीं ज्ञात्वेति वा । सैरन्ध्र्याः मनोभावं वा । कामतृप्तायाः प्रीतिं यच्छन् ददन् ।। १ ।।

महार्होपस्करोपेतं कामोपायोपबृंहितम् ।
मुक्तादामपताकाभिर्वितानशयनासनैः ।। २ ।।

सत्यधर्मीया — महार्होपस्करोपेतं महान्त्यर्हाणि मूल्यद्रव्याणि येषां ते चोपस्करा आस्तरणादिकं तेनोपेतं युतम् । उपस्करेति गतम् । कामोपायैस्तदुद्रेककरैर्जातीफलादिभिरुपबृंहितं पूर्णम् । मुक्तादामभिः पताकाभिर्मुक्तादामात्मकपताकाभिरिति वा वितानैरुल्लोचैः शयनैरासनैश्चोपबृंहितमिति वा मण्डितमिति वाऽन्वयः ।। २ ।।

सुमनोरञ्जनी — महार्हैः महामौल्यैः उपस्करैः उपकरणैः उपेतं युक्तम् । कामस्य ये उपायाः उद्दीपकाः पदार्थविशेषाः तैः उपबृंहितं पूर्णम् । वितानम् उपर्याततं वस्त्रम् ।। २ ।।

धूपैः सुरभिभिर्दीपैः स्रग्गन्धैरपि मण्डितम् ।। ३ ।।

सत्यधर्मीया — धूपैः सुरभिभिः कृष्णागुर्वादिकाष्ठजैर्दीपैर्मण्यात्मकैर्मुक्तादामानुरूप्यात् प्रसिद्धैर्वा धूपानुकूल्यात् । स्रजश्च गन्धाश्च तैर्मण्डितमलङ्कृतम् । गन्धानां वैतदनुबन्धसाधनत्वादुपसंहारे निबन्ध इति केऽपि । यत्र कुत्र वा निबन्धः इति ।। ३ ।।

सुमनोरञ्जनी — सखीभिः सह । उपसङ्गम्य समीपं गत्वा । सखीभिर्मिलित्वेति यावत् । सदासनादिभिः सद्भिः आसनाद्युपचारैः सभाजयामास पूजयामास ।। ३ ।।

गृहं तमायान्तमवेक्ष्य साऽऽसनात् सद्यः समुत्थाय हि जातसम्भ्रमात् ।
यथोपसङ्गम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ।। ४ ।।

सत्यधर्मीया — सा गृहमायान्तं तं कृष्णम् । कदेत्यतोऽप्याह ॥ तमायान्तमिति । रात्र्यामित्यर्थः । औचित्यात् । अवेक्ष्यासनार्त्स्वोपविष्टात्सद्यः समुत्थाय सम्भ्रमादादराद्दराच्च । सम्भ्रमस्त्वादरे भय इत्यमरः । उत्थाय हि जातसम्भ्रमेत्यपि पठन्ति । सखीभिः सह यथा येन प्रकारेणागन्तव्यं तथोपसङ्गम्य सम्यगिति वा सच्च तदासनं च तदेवादिर्येषां तैः सभाजयामासापूपुजत् ॥ ४ ॥

तथोद्धवः साधु तयाऽभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनम् ।
कृष्णोऽपि दान्तं शयनं महाधनं विवेश लोकाचरितान्यनुव्रतः ॥ ५ ॥

सत्यधर्मीया — केवलं नैकलसभाजनं सा कृतवतीति चतुरोद्धवमपि यथोचितमानर्चेत्याह ॥ तथेति । साधु सम्यक् तयाभिपूजित आसनं चाभिमृश्य स्वामिसमीपे नोपवेष्टव्यं विष्टर इत्यभिमृश्येत्युक्तिः । उर्व्यां न्यषीदन्निषसाद दान्तं दन्तिदन्तविकृतं मृद्विति वा महाधनं बहुधनलभ्यं शयनं लोकाचरितानि विटकटकघटिताचारानन्नुव्रतोऽनुकुर्वन्विवेश । उद्धवं बहिरुपवेशयित्वेति सम्भावकोऽपि ॥ ५ ॥

सुमनोरञ्जनी — तथा उद्धवः तया सैरन्ध्र्या साधु यथायोग्यमासनं अभिमृश्य स्पृष्ट्वा उर्व्यां न्यषीदत् उपविवेश । दान्तं गजदन्तनिर्मितं महद्धनं मौल्यरूपं यत् शयनं शयनीयं मञ्चं, लोकाचरितानि मानुषचर्याणि । अनुव्रतः अनुरुन्धानः ॥ ५ ॥

सा मज्जनालेपदुकूलभूषणस्रग्गन्धताम्बूलसुधासवादिभिः ।
प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ॥ ६ ॥

सत्यधर्मीया — यथोपविष्टा सिपिविष्टमुपससार सारसाक्षी किं वाऽऽत्मानमलङ्कृत्येत्यत आद्यमनभ्युपगमेन द्वितीयमभ्युपगमेन परिहरति ॥ सेति । मज्जनमभ्यञ्जनमालेपो गन्धयक्षकर्दमादिना लेपनं दुकूलमेतदनुकूलं वासो भूषणान्यलङ्काराः, सुधामृतं तदासवादिभिः शोभनं गन्धादिभिः सुधाभोजनं भुक्तपदार्थसौरभ्यजनित आमोद आसवो वा । सुधामृतं सुधा च भोजनं ज्ञेयं सुधा रात्रिरित्यनेकार्थध्वनिपदमञ्जरी । एतदादिभिः प्रसाधितात्मा प्रसाधितः सुरतोचितसाधनतामापादित आत्मा देहो यया सा । सव्रीडं यथा तथा लीला तयोद्गतं स्मितं च विभ्रमाश्चेक्षितानि च तैरुपलक्षिता माधवमुपससार उपसृताऽभूत् ॥ ६ ॥

सुमनोरञ्जनी — सा सैरन्ध्री । मज्जनादिभिः प्रसाधितात्मा परिष्कृतदेहा सती । सव्रीडा या लीला अपाङ्गकुञ्चनादिचेष्टा, उत्स्मितम् उदितं स्मितं च, विभ्रमः शृङ्गारचेष्टा एतैः सहि(तानि)तम् ईक्षितानि अवलोकनानि । तैः । आससार प्राप्तवती ॥ ६ ॥

आहूय कान्तां नवसङ्गमह्रिया विशङ्कितां कङ्कणभूषिते करे ।
प्रगृह्य शय्यामधिवेश्य रामया रेमेऽनुलेपार्पणपुण्यलेशया ॥ ७ ॥

सत्यधर्मीया — नवः सङ्गमस्तज्जनिता ह्रीर्लज्जा तया विशङ्कितां शङ्कासहितां कान्तामाहूय कङ्कणभूषिते करे प्रगृह्य शय्यामधिवेश्य तया रामया रमण्या रेमे चिक्रीड । अनुलेपस्यार्पणेन पुण्यस्य महाधिकारिसम्पाद्यस्यैकदेशो लेशः स्वविषये स एव पूर्णो यस्याः सा तयेतः परं सद्यः फलविशेषस्य प्राप्यस्याभावाद्येन स एकदेशः सफलो भविष्यतीत्येकदेशोक्तिर्युक्ता स्यादित्यवधेयम् । अनुलेपार्पणस्य पुण्यं लात्यादत्ते ददाति चानुलेपार्पणपुण्यलः स ईशो यस्याः सेति वा ॥ ७ ॥

सुमनोरञ्जनी — नवसङ्गमे या ह्रीः लज्जा तया शङ्कितां रामया सैरन्ध्र्या रेमे । भगवदङ्गसङ्ग-साधनं किं सुकृतं तया चरितमित्यतस्तदाह ॥ अनुलेपेति । अनुलेपः सुगन्धद्रव्यं तस्यार्पणेन पुण्यलेशो यस्याः सा तयेति ॥ ७ ॥

साऽनङ्गतप्तकुचयोरुरसस्तथाऽक्ष्णोर्जिघ्रन्त्यनन्तचरणेन रुजो मृजन्ती ।
दोर्भ्यां स्तनान्तरगतं परिरभ्य कान्तमानन्दमूर्तिमजहादतिदीर्घतापम् ॥ ८ ॥

सत्यधर्मीया — योग्यतया समस्तमप्यनङ्गतत्पदमुरोक्षिविशेषणत्वेनानङ्गतप्तकुचयोरनङ्गतप्तो-रसोऽनङ्गतप्तयोरक्ष्णोरिति सम्बन्धनीयम् । रुजो विरहजज्वरांश्चरणेन कुचादिस्थापितेनैतेषां कमलतया चरणस्य सूर्यतया रोगमार्जनं युक्तमिति मृजतीत्युक्तिर्युक्ता । अनन्तमाकाशस्तत्र चरणं यस्य द्युमणेस्तद्रूपेणानन्तचरणेनेति तन्त्रावृत्त्यन्यतरेणान्वयः । नवपदरविभासेत्यादेः । अनन्तचरणे नेति च छेदः । अनन्तचरणे पादौ । पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः । जिघ्रन्ती न इव गन्धानुबन्धाद्वा घ्राणन-पौरस्कर्यं युक्तमित्येवमुक्तिः । स्तनान्तरं वक्षस्तद्गतमानन्दमूर्तिं कान्तं दोर्भ्यां परिरभ्यातिदीर्घताप-मजहाज्जहौ । अल्पीयो दिनगमनेऽपि तदनिष्पत्तिप्रयुक्तमतिदीर्घत्वं ज्ञेयम् । बहिः कान्तं परिरभ्यान्त-र्मूर्तिं तदाकारमानन्दं बबन्धेति वा । इयत्सम्पत्सुधाममुक्तादामादिरूपिणी गन्धकर्त्र्या दास्यास्त-त्राप्यनितरनररहोविषयत्रिवक्रकायायाः कथमिति चेत् । यतो वक्रा जाताऽवक्रा तत एव सर्वसमृद्धिः किं दुश्शकेति पृच्छसि महात्मन्किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन इत्यादेः ॥ ८ ॥

सुमनोरञ्जनी — अनन्तस्य श्रीकृष्णस्य चरणेन । अनङ्गेन तप्तयोः कुचयोः । उरसः कुचमध्य-देशस्य च रुजः ज्वरान् मृजन्ती परिहरन्ती । तथा अक्ष्णोरित्यावर्तते । अक्ष्णोः अक्षिभ्यां जिघ्रन्ती पश्यन्तीति यावत् । अक्ष्णोः रुजश्च मार्जयन्ती । स्तनान्तरे गतं प्राप्तमानन्दमूर्तिं कृष्णं परिरभ्य आलिङ्गच दीर्घतापं बहुकालीनतापम् । अजहात् तत्याज ॥ ८ ॥

सैवं कैवल्यनाथं तं प्राप्य दुष्प्रापमीश्वरम् ।
अङ्गरागार्पणेनाहे दुर्भगेदमयाचत ॥ ९ ॥

सत्यधर्मीया — इतरापेक्षया तस्याः पुण्यं लेश इति द्रढयितुं तस्या मूढतां द्वाभ्यां श्लोकाभ्यामाह ॥ सेति ॥ कैवल्यनाथं मुक्त्यधिपतिं तद्दातारमिति यावत् । दुष्प्रापमितरैः । अङ्गरागार्पणेन गन्धसमर्पणेन दुर्भगा दुर्दैवा सेदमयाचताहो ॥ ९ ॥

सुमनोरञ्जनी — कैवल्यस्य मोक्षस्य नाथम् । बहुसाधनैर्दुष्प्राप्यम् । अङ्गरागस्य अर्पणेन तन्मात्रेण प्राप्यापि । इदं वक्ष्यमाणम् । अयाचत । अहो तस्मात् दुर्भगा ॥ ९ ॥

आहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया ।
रमस्व नोत्सहो त्यक्तुं सङ्गं तेऽम्बुरुहेक्षण ॥ १० ॥

सत्यधर्मीया — तदेव विशदयति । हे प्रेष्ठ! इह मम गृहे कतिचिद्दिनानि भवतोष्यतां मया सह रमस्व च । हे अम्बुरुहेक्षण ते सङ्गं त्यक्तुं नोत्सह इत्याह ॥ १० ॥

सुमनोरञ्जनी — किमयाचतेति तदाह ॥ आहेति । उष्यतां वासः क्रियताम् । नोत्सहे नेच्छामि

॥१०॥

तस्यै कामवरं दत्वा मानयित्वा च मानदः ।
सहोद्धवेन सर्वेशः स्वधामागमदृद्धिमत् ॥ ११ ॥

सत्यधर्मीया — तस्यै एवं याचमानायै कामवरो हि काम एव वरस्तं दत्वा तां मानयित्वा सत्कृत्य मानदः उद्धवेन सह सर्वेशो ऋद्धिमत्स्वधाम स्वगृहमगमत् ॥ ११ ॥

सुमनोरञ्जनी — काम्यत इति कामः । कामम् अपेक्षितं वरम् । मानयित्वा वस्त्रालङ्कारादिदानेन संमान्य । ऋद्धिमत् सकलसमृद्धम् ॥ ११ ॥

दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरम् ।
यो वृणीते मनोग्राह्यमसत्त्वान् कुमतिर्ह्यसौ ॥ १२ ॥

सत्यधर्मीया — सिंहावलोकनन्यायेन ग्रन्थकृत् मौर्ख्यं सकौतुकचेताः स्मरन्विवृणोति ॥ दुराराध्यमिति । सर्वेश्वरं दुराराध्यं मनोऽग्राह्यं साकल्येनातद्विषयं विना प्रसादं समाराध्य गन्धार्पणेन तर्पयित्वा या एवं वृणीत साऽसौ कुमतिर्हि निश्चयः । तस्या मतेरसत्त्वादमोक्षाधायकत्वाद्रागादि-

दोषदुष्टत्वाद्वा कुमतिरिति । मनोऽग्राह्यं यथेष्टं या वृणीत वरयामासासत्त्वात् कुमतिर्हीत्यन्वयो वा । यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसाविति पाठः प्रस्तुतासङ्गतः ॥ १२ ॥

सुमनोरञ्जनी — श्री शुकाचार्यः पुनरपि तां संस्मृत्य अनुतप्यति । दुराराध्यम् अनेकसाधनैरपि प्रसन्नीकर्तुमशक्यम् । समाराध्य प्रसन्नीकृत्यापि मनोऽग्राह्यं मनसा अग्राह्यं अनपेक्षणीयम् । एहिक-सुखमित्यर्थः । कुतोऽनपेक्षणीयमित्यतः असत्वात् असाधुत्वादिति । अतोऽसौ कुमतिरिति ॥ १२ ॥

अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः ।
किञ्चिच्चिकीर्षन् स प्रागादक्रूरप्रियकाम्यया ॥ १३ ॥

सत्यधर्मीया — ननु ग्रामागमनात्प्रागक्रूरस्य वचो दत्तं दत्तं चानन्तरमनन्तेन मध्येऽध्वनः कुब्जायास्तत्कस्माद्व्यत्यासः । न च योषिदभिलाषतः प्राग्गमनमिति स्वरतस्य युक्तम् । न वा सर्ववेदितुर्विस्मरणं सम्भवत्यतः कथमिति चेत्सत्यम् । अद्य श्वो वा श्वाफल्किर्गमनेऽपि वेदान्त-निष्णात इति ध्यानपरः सन्वर्तेत । कामार्ता नेयं जीवेद्राजीवलोचनेत्यालोच्य तथा पुण्यमल्पमल्पं च फलं चपलाक्ष्या अक्रूरस्य तु न तथेति सूचीकटाहन्यायेन वा मृदुः सर्वत्र बाध्यत इत्यादेः कथं वाऽक्रूरोऽयमिति वा स इति विजानीहि । स्ववचनं सत्यं विधातुमक्रूरागारगमनं वक्ति ॥ अक्रूरभवनमिति । सहरामोद्धवो रामोद्धवाभ्यां सहितः कृष्णः । आर्यरामसाहित्यं न तस्य रहस्यकार्यत्वात्सैरन्ध्रीगेहगमन इवेत्यनेन ध्वन्यते । अक्रूरभवनं किञ्चिद्वक्ष्यमाणमावश्यकं कार्यं चिकीर्षन्कर्तुमिच्छन् अक्रूरप्रियकाम्यया च प्रभुः प्रागात् ॥ १३ ॥

सुमनोरञ्जनी — रामोद्धवाभ्यां सहितः सहरामोद्धवः । किञ्चित् पाण्डववृत्तान्तज्ञानायाक्रूर-प्रेषणलक्षणकार्यं चिकीर्षन् कर्तुमिच्छन् स्वगृहं प्रत्यागमनस्याक्रूरेण पूर्वं प्रार्थितत्वात्तत्प्रियकाम्यया च अक्रूरभवनं प्रागात् ॥ १३ ॥

स तान् नरवरश्रेष्ठानाराद् वीक्ष्य स्वबान्धवान् ।
प्रत्युत्थाय प्रमुदितः परिष्वज्याभ्यनन्दत ॥ १४ ॥

सत्यधर्मीया — आराद्दूरतोऽभ्यनन्दत । अहो सत्यमकार्षीद्वचनं हरिरिति ननन्द ॥ १४ ॥

सुमनोरञ्जनी — आरात् दूरात् ॥ १४ ॥

ननाम कृष्णं रामं च स तैरप्यभिवादितः ।
पूजयामास विधिवत्कृतासनपरिग्रहान् ॥ १५ ॥

सत्यधर्मीया — कृष्णं राममुद्धवं च तैरित्युत्तरानुकूल्यात् ॥ १५ ॥

सुमनोरञ्जनी — तैरपि रामकृष्णोद्धवैरपि । अभिवादितः वन्दितः । कृतः यदासनस्य परिग्रहः स्वीकारो यैस्तान् । आसने उपविष्टानिति यावत् ॥ १५ ॥

पादावनेजनीरापो धारयन् शिरसा नृप ।
अर्हणेनाम्बरैर्दिव्यैर्गन्धस्रग्भूषणोत्तमैः ॥ १६ ॥

सत्यधर्मीया — पादवनेजनीरापः शिरसा सम्यग्धारयन्नम्बरैर्दिव्यैर्गन्धस्रग्भूषणोत्तमै- रित्यर्हणेन पूजोपयुक्तपदार्थेन ॥ १६ ॥

सुमनोरञ्जनी — पादावनेजनीः पादौ अवनेजयन्ति प्रक्षालयन्ति इति पादावनेजनी । आ अप इति च्छेदः । अपः आ ईषत् शिरसाऽधारयत् । आ इत्यास्वाद्येति पदरत्नावल्याम् । अर्हणेन पूजा-साधनेन मधुपर्कादिना । दिव्यैर्द्युतिमद्भिः अम्बरैः, गन्धादिभिश्च ॥ १६ ॥

अर्चित्वा शिरसाऽऽनम्य पादावङ्कगतौ मृजन् ।
प्रश्रयावनतोऽक्रूरः कृष्णरामावभाषत ॥ १७ ॥

सत्यधर्मीया — अर्चित्वा शिरसाऽऽनम्य चाङ्कगतावुत्सङ्गगतौ । अङ्काविति प्राग्गतौ । धूल्यामवगताविति च । अनेन तथा पादावित्यनेन च कृष्णचरणसंवाहमेवेति ध्वन्यते । मृजन् शोधयन्संवाहयन्निति यावत् । प्रश्रयावनतो भक्तिनम्रः ॥ १७ ॥

सुमनोरञ्जनी — अर्चित्वा पूजयित्वा । अङ्कगतौ कृत्वा मृजन् मृदु पीडयन् ॥ १७ ॥

दिष्ट्या पापो हतः कंसः सानुगः पावितं कुलम् ।
भवद्भ्यामुद्धृतं कृच्छ्राद् दुरन्ताच्च समेधितम् ॥ १८ ॥

सत्यधर्मीया — भवद्भ्यामवतरिताभ्यां कुलं पावितं तथा कृच्छ्रात्कंसकृतकष्टादुद्धृता दुरन्ताद्भिना युवां दुष्पारात् । समेधितमभिवृद्धं च ॥ १८ ॥

युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ।
भवद्भ्यां न विना किञ्चित् परमस्ति न चापरम् ॥ १९ ॥

सत्यधर्मीया — प्रधानपुरुषौ मुख्यत एकोऽमुख्यत एक इति । जगद्धेतू जगन्मयौ जगद्व्याप्तौ भवद्भ्यां विना परं चेतनमपरमचेतनं चानियम्यं न चास्ति सर्वं नियम्यमेवास्तीति भावः । प्रभुर्हि जीवो जडमपेक्ष्येत्यादेश्चेतनस्य परत्वम् ॥ १९ ॥

सुमनोरञ्जनी — प्रधानपुरुषौ उत्तमपुरुषौ । जगन्मयौ जगद्व्यापिनौ । तदेवोपपादयति ॥ भवद्भ्यामिति । भवद्भ्यां विना रहितं परं ब्रह्मादि अपरं तृणादि च नास्ति ॥ १९ ॥

आत्मसृष्टमिदं विश्वमन्वावेश्य स्वशक्तिभिः ।
ईयते बहुधा ब्रह्मन् श्रुतिप्रत्यक्षगोचरः ॥ २० ॥

सत्यधर्मीया — आत्मसृष्टं स्वनिर्मितमिदं विश्वं स्वशक्तिभिरिच्छादिस्वरूपशक्तिभिः । सु अशक्तिभिस्तत्त्वदेवैश्च सहेत्यप्यर्थः । हे ब्रह्मन्पूर्ण । ब्रह्मेति वा पाठः सम्बुध्यन्तः । बहुधाऽणुत्वान-गुणत्वादिबहुप्रकारेण । श्रुतिश्च, तत्सृष्ट्वा तदेवानुप्राविशत् । एकं सन्तं बहुधा कल्पयन्तीत्ये-तदेतत्सजातीया तस्याः प्रत्यक्षस्य च ब्रह्मादिज्ञानिप्रत्यक्षस्य गोचरो विषयः सन्मीयसे भवान्ज्ञायते । घटोऽयमित्यादिनिर्दोषार्थेन्द्रियसन्निकर्षणलक्षणं वेति व्याकुर्वते ॥ २० ॥

सुमनोरञ्जनी — स्वशक्तिभिः स्वांशैः । आत्मसृष्टमिदं जगत् । अन्वाविश्य तत्तदाकारानुसारेण प्रविश्य । बहुधा ईयसे व्यवह्रीयसे । घटपटादिशब्दैर्भवानेवोच्यते । अत्र प्रमाणमाह ॥ श्रुतीति । तत्सृष्ट्वा तदेवानुप्राविशत् । ज्ञानिनां प्रत्यक्षम् । तयोर्गोचर इति ॥ २० ॥

यथा हि भूतेषु चराचरेषु मह्यादयो योनिषु भान्ति नाना ।
एवं भवान् केवल आत्मयोनिष्वात्माऽऽत्मतन्त्रो बहुधा विभाति ॥ २१ ॥

सत्यधर्मीया — तमेवार्थं सदृष्टान्तमाचष्टे ॥ यथेति । योनिषु भोगशरणेषु चराचरेषु भूतेषूत्पत्तिमत्सु चराचरेषु जङ्गमाजङ्गमेषु वस्तुषु मह्यादयो नाना नानावर्णात्मना यथा भात्येव-मात्मयोनिष्वात्मैव योनिः कारणं येषां तानि तेष्वात्मा व्याप्त आत्मतन्त्रः स्वतन्त्र इत्येतत्प्रवेशमात्रे मह्यादिनिदर्शनम् । स्वातन्त्र्यादिकं न तत्रास्त्यत्रेति विशेषसूचकमिति ज्ञेयम् । केवलो जडामिश्रो बहुधा विभाति । एक ईयते बहुधेयते स पुरुषः स ईश्वर इति श्रुतेः ॥ २१ ॥

सुमनोरञ्जनी — तदेव सदृष्टान्तमाह ॥ नानायोनिषु नानाकारणकेषु सुरनरतिर्यगादि-नानाजन्मस्विति वा । चराचरेषु स्थावरजङ्गमसंज्ञकेषु भूतेषु प्राणिषु । मह्यादयः पृथिव्यादयः पञ्चमहाभूतानि यथा भान्ति नानातत्तदाकारतया अन्तर्बहिर्व्याप्ततया भान्ति । व्याप्तिमात्रे दृष्टान्तोऽयम् । एवं भवान् आत्मयोनिषु आत्मा स्वयं योनिः कारणं येषां तेषु त्वया सृष्टेष्वित्यर्थः । प्रविश्य । आत्मतन्त्रः स्वतन्त्रः बहुधा विभाति । ज्ञानिनां केवलः जडामिश्रः ॥ २१ ॥

सृजस्यथो लुम्पसि पासि विश्वं रजस्तमस्सत्त्वगुणैः स्वशक्तिभिः ।
न बध्यसे त्वं गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च नैव हेतुः ॥ २२ ॥

सत्यधर्मीया — विश्वयोनित्वं स्पष्टयति ।। सृजसीति । रजस्तमःसत्त्वगुणैस्त्वं विश्वं सृजसि पास्यथो लुम्पसि संहरसि । स्वतन्त्राभिः स्वशक्तिभिश्च । केवलत्वं स्पष्टयति ।। नेति ।। गुणकर्मभिर्न बद्ध्यसे ते ज्ञानात्मनस्ते क्व च देशे काले वा हेतुः कारणं न नास्ति त्वमेव सर्वहेतुरित्यर्थः ।। २२ ।।

सुमनोरञ्जनी — जगत्कारणत्वं नोपादानत्वं किन्तु कर्तृत्वमेवेत्याह । सृजसीति । लुम्पसि संहरसि । स्वस्य शक्तयः अंशाः येषु नियामकत्वेन वर्तन्ते ते स्वशक्तयः तैः रजस्तमःसत्वगुणैः विश्वं सृजसि लुंपसि पासि । रजसा सृजसि । सत्वेन पासि । तमसा लुंपसीत्यर्थः । त्वं तु गुणैः कर्मभिर्वा न बध्यसे । कुतः । ज्ञानात्मने ज्ञानात्मकदेहाय ते क्व च कस्मिंश्चिद्देशे काले हेतुः कारणं नेत्यर्थः । अनादिरिति भावः ।। २२ ।।

देहाद्युपाधेरनिरूपितत्वाद् भवो हि साक्षान्न चिदात्मनः स्यात् ।
अतो न बन्धस्तव नैव मोक्षः स्यातां निकामं त्वयि नो विवेकः ।। २३ ।।

सत्यधर्मीया — कुतो भगवत उत्पत्त्यादिकं नास्तीत्यत आह ।। देहाद्युपाधेरिति । देहादेर्जन्मादेर्मुख्यस्योपाधेः प्रयोजकस्य कर्मादेरनिरूपितत्वाच्छास्त्रे हि यतो निरूपणं ततश्चिदात्मनो ज्ञानानन्दात्मकात्मवतः साक्षादुद्भवः कर्मनिर्मितशरीरप्राप्तिरूपो न हि स्यात् । अतो देहाभावादेव न बन्धस्तत एव मोक्षस्तदधीनसत्त इति तौ नैव स्यातामिति नोऽस्माकं त्वयि त्वद्विषये विवेको विचारो रहस्यं प्रमेयमिति वा । विवेकः स्याज्जले द्रोण्यां विचारेऽपि रहस्यपीति विश्वः । निकाममस्मद्योग्यतामनुसृत्यास्तीति विशेषः ।। २३ ।।

सुमनोरञ्जनी — कुत उत्पत्त्यादिकं नास्तीत्यत आह ।। देहेति । उत्पत्तिर्द्विधा । देहतः स्वरूपतश्चेति । तत्र चिदात्मनः ज्ञानमूर्तेः साक्षात् भवः स्वरूपत उत्पत्तिः नास्तीति हि प्रसिद्धम् । देहत उत्पत्तिस्तु देहाद्युपाधेः शास्त्रेऽनिरूपणात् अप्रतिपादनात् नास्तीति योजना । आदिपदेनेन्द्रियादेर्ग्रहणम् । उपाधिपदेन तस्य प्राकृतत्वमुक्तं भवति । अतो देहादेरभावादेव बन्धः संसारः नास्ति तत एव मोक्षोऽपि न स्यात् । स्यातामिति द्विवचनेन एकवचनान्तं पदद्वयं लक्ष्यते । ताभ्यां नञोरन्वयः ।। इत्येवं नः अस्माकं विवेकस्तत्वनिश्चयः । त्वया उदितः प्रकाशित इत्युत्तरेणान्वयः ।। २३ ।।

त्वयोदितोऽयं जगतो हिताय यदा यदा वेदपथः पुराणः ।
बाध्येत पाखण्डपथैरसद्भिस्तदा भवान् सत्त्वगुणं बिभर्ति ।। २४ ।।

सत्यधर्मीया — यस्मिन्समये तव भवो निरूपितः समयः पौरुषेयो यश्चेतरैरसुरप्रायैरन्यार्थतया नेष्यते तदा त्वमेव व्यासाद्यात्मनाऽवतीर्य समीकर्तुं सत्त्वोज्जृम्भको भवसीत्याह ।। त्वयेति । त्वयोदितो

राशीभूतो ऋङ्निगदाद्यात्मना व्यक्तीकृतः पञ्चमो वेदपथो निर्मितः । एकोऽनादिरिति पुराणः परोऽर्थतः पुराणः । पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु । क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् । पुराणानामन्यथारचनमेवानित्यत्वमित्यादेः । जगतो हितार्थमाशीर्विवक्षया । चतुर्थी चाशिषीत्यनेन न षष्ठीति ज्ञेयम् । तेन न तव कृत्यमिति भावः । यदा यदा पाषण्डानां पन्था ईश्वरोऽहमहं भोगीत्यादिमार्गो येषां तैरसद्भिर्बाध्येत दुरर्थलोडितो भवेत्तदा भवान्सत्त्वगुणं ज्ञानोत्तेजकं बिभर्ति पोषयति तेन तानसतः खण्डयित्वा सन्मार्गं स्थिरीकरोषीति यावत् । स भवांस्त्वगुणं गुणाद्यविकृतं देहं बिभर्ति स्वीकरोतीति यावत् । यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमित्यादेः । द्वीपे भगिन्याश्च यमस्येत्यारभ्य ये ये च सन्तस्तमसानुविष्टास्तांस्तान्सुवाक्यैस्तमसो विमुञ्चन् । चचार लोकानित्यन्तेन श्रीमदाचार्योक्तमत्रानुसन्धेयम् । दत्तव्यासादिरूपेषु ज्ञानकार्यो जनार्दन इत्यादेः ॥ २४ ॥

सुमनोरञ्जनी — जाग्रत्प्रवर्तकोऽपि भवानेवेत्याह ॥ जगत इति । यदा यदा वेदपथः वेदोक्तमार्गः । पाषण्डपथैः पाषण्डमार्गनिरतैः असद्भिर्बाध्येत तदा जगतां हिताय भवान् सत्वगुणं ज्ञानप्रवर्तनाय बिभर्ति । हयग्रीवव्यासादिरूपो भूत्वा सत्वगुणेन ज्ञानं प्रवर्तयसीति भावः ॥ २४ ॥

स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ।
अक्षोहिणीशतवधेन सुरेतराणां राज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २५ ॥

सत्यधर्मीया — कृष्णरामादिरूपेण बलकार्य इत्युक्तेः स व्यासात्मैव त्वं प्रभो! अद्येदानीं वसुदेवगृहे देवक्यां स्वांशेन स्वः पद्मनाभात्मा स्वतन्त्रत्वात्तदंशेन केशेन कृष्णेन भूमेः सुरेतराणां दैत्यानां राज्ञामक्षौहिणीशतानां वधेन भारमपनेतुमवतारयितुं किञ्चामुष्य कुलस्य यदुकुलस्य यशो वितन्वन्नवतीर्णोऽसि । सुरा इतरे येभ्यस्ते सुरेतरास्तेषामतो न सर्वनामकार्याभावशङ्का । सुरेतरांशराज्ञामिति पाठे सुरेतरेषामंशा ये राजानस्तेषाम् । समासान्तानित्यतया नायातष्टजिति ज्ञेयम् । प्रभोद्य प्रभया उद्लोकविलक्षण इति व्यवहर्तव्यं यद्वसुदेवगृहं भार्या तत्रैकपद्यं वा । वदः सुपि क्यप्चेत्येतद्व्याख्यायां कर्मणि प्रत्ययावित्येक इत्युक्तेः कौमुद्यां क्यपि यजादित्वात्सम्प्रसारणम् । उक्तं चात्र । सा देवकी सर्वजगन्निवासनिवासभूता नितरां विरेजे । प्रभया जितम्भरामित्यादेः ॥ २५ ॥

सुमनोरञ्जनी — स एतादृशः त्वं अक्षोहिणीनां शतस्य राज्ञां च कंसादीनां वधेन । अमुष्य कुलस्य यदुकुलस्य यशो वितन्वन् विस्तारयन् । वसुदेवस्य गृहे भार्यायां स्वांशेन अवतीर्णोऽसि ॥ २५ ॥

अद्येश नो वसतयः खलु भूरिभागा यत् सर्वदेवपितृभूतनृदेवमूर्तिः ।
यत्पादशौचसलिलं त्रिजगत् पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥ २६ ॥

सत्यधर्मीया — हे ईश! सर्वे इति सर्वान्वयि । सर्वे देवाः पितरः सर्वाणि भूतानि सर्वे च नृदेवा राजानश्च त एव मूर्तौ शरीरे यस्य स विश्वम्भर इति यावत् । अनेन त्वय्यायाते ते सर्वेऽपि समायाताः पूजिते पूजिता एवेति न तत्सपर्यानाचरणन्यौन्यमिति ध्वनयति । यत्पादशौचसलिलं गङ्गा त्रिजगत्पुनाति पावयति । जगद्गुरु हे अधोक्षज स त्वं यद्यतो याः प्रविष्टस्ता नो वसतयो गृहा भूरिभागा महासम्पत्प्रदा अभूवन्खलु निश्चयः । जगतो मातरिश्वनस्तेन व्याख्यातो मरुता विधिस्तद्गुरुरिति वा गतम् । अङ्गावबद्धास्त्वित्यादेः ॥ २६ ॥

सुमनोरञ्जनी — हे ईश ! अद्य नो वसतयः गृहाः भूरिभागाः अतिभाग्योपेताः । कुतः । हे अधोक्षज ! यत् यस्मात् । सर्वे च ते देवाः ब्रह्माद्याः, पितरः अर्यमादयः, भूतानि ऋषयो मनुष्याश्च, नृदेवाश्चक्रवर्तिनश्च एते मूर्तय प्रतिमाः यस्य सः । यस्य पादशौचसलिलं पादप्रक्षालनोदकं भागीरथीजलं त्रिजगत्पुनाति स त्वं जगद्गुरुः याः अस्मद्वसतीः प्रविष्टः तस्मादिति ॥ २६ ॥

कः पण्डितस्त्वदपरं शरणं समीयात् भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्वान् ददाति सुहृदो भजतोऽपि कामानात्मानमप्युपचयापचयौ न यस्य ॥ २७ ॥

सत्यधर्मीया — भजतः सुहृदः शोभनमनसोऽभजतः फलमलक्षयित्वा सेवमानस्यापि यस्योपचयापचयौ वृद्धिह्रासौ न तमात्मानं देहं ददाति सर्वांस्तद्योग्यान्कामान्ददातीति किमिति योजयन्ति । सर्वान्कामान्ददात्यनन्तरमात्मानमपि । उर्वरितं पूर्ववत् । यद्वाऽऽत्मानं सारूप्यरूपमिति वा मनुष्याणां क्लृप्तस्य मनुष्यव्यतिरिक्तानां देवानां तु न क्लृप्तस्य प्राप्यस्य तौ स्त एवेति विवेको ज्ञेयः । तथोक्तमनुव्याख्याने । प्राप्तह्रासो भवेत्कापि महता तु विकर्मणेत्यादिना । सङ्क्षेपे च वृद्धिह्रासौ विमुक्तिगौ । नृणां सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रममित्यादिना । प्रस्थानान्तरेऽनुव्याख्याने । ह्रासोऽपि मानुषादीनामानन्दस्य विकर्मणा । भवेन्मुक्तौ विशेषेण स्वोच्चानामपराधत इत्यादिना च । विस्तरस्तत्सुधादितोऽवसेयः । यस्तस्माद्भक्तप्रियादृतगिरः सत्यवचनात् । ऋ गताविति धातोस्तु पूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्तमित्युक्तमित्युक्तेर्ऋतमिति ब्रह्मेति गीर्यस्य तस्मादिति वा । भक्तप्रियश्चासावादृतगीश्च तस्मादिति वा । सुहृदः प्रत्युपकारमनपेक्ष्योपकर्तुः कृतज्ञात्कृतस्मरणवतस्त्वदपरमन्यं कः पण्डितः शरणं समीयाद्गच्छेद्यदि समीयात्सोऽपण्डित इति तुर्विशेषं सूचयति ॥ २७ ॥

सुमनोरञ्जनी — भक्तप्रियात् ऋताः गिरः सङ्कल्परूपाः वाचो यस्य सः । सत्यसङ्कल्प इत्यर्थः। तस्मात् । ऋताः यथार्थाः गिरः वेदवाचः प्रतिपादकाः यस्य स इति वा । वेदवेद्यादित्यर्थः । सुहृदः अनिमित्तोपकारिणः । कृतं कर्म जानाति फलं दातुमिति कृतज्ञः तस्मात् । कृतं कर्म ज्ञात्वा तद्योग्यफलदातुरित्यर्थः । एतादृशात् त्वत् त्वत्तः अपरम् अवरम् अवमं वा देवं कः पण्डितः शरणम्

इयात् प्राप्नुयात् । ननु ऐहिकफलेच्छयाऽन्यदेवताभजनं किं न कार्यमित्यतः समस्तैहिकामुष्मिकफल-प्रदानधुरीणे जाग्रति तत्र युज्यत इत्याशयेनाह ॥ सर्वानिति । सुहृदः फलाकाङ्क्षारहितस्य । भजतः सेवमानस्य । फलानाकाङ्क्षया सेवमानस्येति यावत् । भवान् सर्वानपि कामान् इष्टान् ददाति । न केवलमेतावत् किन्तु स्वात्मानमपि ददाति । यस्य तव उपचयापचयौ वृद्धिक्षयौ सुखदुःखादि-कृतोच्चत्वनीचत्वे वा न स्तः ॥ २७ ॥

दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ।
छिंध्याशु नः सुतकलत्रधनाप्तगेहदेहाभिमोहरशनां भवदीयमायाम् ॥ २८ ॥

सत्यधर्मीया — हे जनार्दन! इहैतदवस्थायां योगेश्वरैः सुरेशैरपि दुरापगतिर्दुरापा गतिर्यस्य सो भवान्नोऽस्माभिर्दिष्ट्या प्रतीतो ज्ञातोऽतो नः सुताः कलत्राणि भार्या धनान्याप्ता बन्धवो गेहानि देहश्चैतेष्वभिमोहोऽभिमानस्तदाख्यां रशनां रज्जुरूपिणीं भवदीयां मायामाशु छिन्धि । त्वद्दर्शनोत्तरं नायमर्थः स्थातव्य इति तात्पर्यम् ॥ २८ ॥

सुमनोरञ्जनी — योगेश्वरैरपि महायोगिभिरपि दुरापा गतिः गम्यत इति गतिः स्वरूपं यस्य स भवान् । नोऽस्माकं दिष्टा दैवेन प्रतीतो दृष्टिविषयो जातः । दिष्टशब्दपर्यायो दिष्टिशब्दः । तस्मात् त्वं नः सुतादिषु अभिमोहः अहं ममताभिमानः तद्रूपां रशनां रज्जुम् । छिन्धीति । कीदृशीम् । मोहरशनां भवदीयमायां भवदीया त्वदधीना या माया अविद्या तत्कृतां कार्यकारणभावेऽभेदव्यपदेशः । ब्राह्मणोस्य मुखमितिवत् ॥ २८ ॥

इत्यर्थितः संस्तुतश्च भक्तेन भगवान् हरिः ।
अक्रूरं सस्मितं प्राह गीर्भिः सम्मोहयन्निव ॥ २९ ॥

सत्यधर्मीया — भक्तेनाक्रूरेण भगवान् हरिरित्यर्चितः संस्तुतश्च तं सस्मितं गीर्भिः सम्मोहयन्न-कालत्वादङ्कूरितं विवेकमाच्छादयन्निवाह ॥ २९ ॥

सुमनोरञ्जनी — संमोहयन्निव उत्पन्नज्ञानस्य तिरोभावं कुर्वन्निव न तु कुर्वन्नेवेति ॥ २९ ॥

श्रीभगवानुवाच—

त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा ।
वयं तु रक्ष्याः पोष्याश्च अनुकम्प्याः प्रजा हि वः ॥ ३० ॥

सत्यधर्मीया — त्वं नो गुरुर्हितोपदेष्टा पितृव्यः पितृभ्राता श्लाघ्यः स्तुत्यो बन्धुश्चेत्यादयो मान्यता प्रयोजकाः प्रजा वो वयं हि यतो रक्ष्या रोगादितः पोष्या एवमनुकम्प्या इति मोहनार्थमत्युक्तिः ॥ ३० ॥

सुमनोरञ्जनी — गुरुः हितोपदेष्टृत्वात् । श्लाघ्यो बन्धुः अनुरूपो ज्ञातिः । रक्ष्याः भयाद्रक्षणीयाः । पोष्याः अपेक्षितदानादिना ॥ ३० ॥

भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ।
श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥ ३१ ॥

सत्यधर्मीया — तमेव धार्टीं नट इव नटयति ॥ भवद्विधा इति । अर्हसत्तमा अर्हणीयोत्तमाः । श्रेयस्कामैर्नृभिस्सेव्या न तु देवा एव सेव्याः । कुत एवमादय इत्यत आह । देवाः स्वार्थाः स्वप्रयोजनपरफलदा इति । साधवस्तु न स्वार्था अतो भवद्विधा निषेव्याः । अक्रूरस्य साधु साध्वन्यतमत्वं कटाक्षयत्यनेनेति ॥ ३१ ॥

सुमनोरञ्जनी — अर्हेषु पूज्येषु सत्तमाः श्रेष्ठाः भवद्विधाः साधव एव । श्रेयस्कामैः नित्यं निषेव्याः । ननु देवान् विहाय किमर्थं साधवो निषेव्या इत्यत उक्तं देवाः स्वार्था इति । स्वप्रयोजननिरता इत्यर्थः । साधवस्तु तथा नेति । ननु देवाः केचनाम्मयाः यथा भागीरथ्यादयः । केचिन्मृच्छिलामयाः यथा विघ्नेशादयः । एवंविधानामचेतनानां किं स्वार्थत्वमित्यत आह । न हीति । तीर्थानि भागीरथ्यादीनि अम्मयानि न किन्तु तदभिमानिनो देवाः । मृच्छिलामयाः देवाः न किन्तु तदतिरिक्ता एव । अतस्तेषां स्वार्थत्वं युक्तमिति भावः । किं तत्स्वार्थत्वमित्यत आह ॥ ते पुनन्तीति । ते देवाः उरुकालेन सेविताः पुनन्ति । इदमेव स्वार्थत्वं नाम । यत्स्वयं बहुकाले सेवां गृहीत्वा फलदानम् । साधवस्तु नेत्युक्तं व्यनक्ति ॥ दर्शनादेवेति । साधवस्तु दर्शनात्पुनन्ति अन्यथाज्ञानमपगमयन्ति न तु सेवामपेक्षन्ते ॥ ३१ ॥

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ३२ ॥

सत्यधर्मीया — देवा इत्युक्तौ प्रतिमादय एव तथेह विवक्षिता इति भ्रमं भ्रंशयन्स्वयं विवृणोति ॥ न हीति । अम्मयानि जलजडमयानि तीर्थानि पावित्र्यादीनि न । मृच्छिलामयाः प्रतिमादयो देवा न किन्तु तत्र सन्निहिता देवा एव । तर्हि तेऽर्हिताः फलं यच्छन्ति किं साधुसभाजनेनेत्यत आह । ते जलशिलादिगता उरुकालेन व्यवधानेन सेवादिना पुनन्ति साधूनां दर्शनादेव । जलशिलादिनिलयदेवानां विलम्बेन पावकत्वमितीयदन्तरमिति भावः । देवाश्च न साधव इत्यत्र न तात्पर्यं किन्तु पृथक् सभाजिताश्चेत्तेऽपि दर्शनादेव पवित्रयन्ति । तथाऽपि ते दुर्दर्शाः, जगत्यटन्ति नात्मार्थं भास्करा इव भास्वरा इत्यादेः सुमिलाः साधव इति झडिति पवित्रणमित्यवधेयम् । अग्नौ क्रियावतां विष्णुः,

प्रतिमास्वप्रबुद्धानामित्यादेरधिकारवैशेष्यादियमुक्तिः । उरुणा कृतेन कालेनोपदेशेन गुरूपदिष्टेन कालेनेत्यप्यर्थापयन्ति । अम्मयानि तीर्थानि नेति तान्यपि स्वान्तर्निहितदेवताद्वारोरुकालेन पुनन्तीति । तथा मृच्छिलामया अपि देवा नेति न तेऽपि तथैव । साधवस्तु स्वोचितापचित्यादिकमनपेक्ष्य पुनन्तीति दर्शनादेवेत्युक्तिरिति व्यातन्वते । व्यवधानाव्यवधानकृतौ विशेष इति तेषां भावः ॥ ३२ ॥

स भवान् सुहृदां वै नः श्रेयः श्रेयश्चिकीर्षया ।
जिज्ञासार्थं पाण्डवानां गच्छ स्वगजसाह्वयम् ॥ ३३ ॥

सत्यधर्मीया — किञ्चिच्चिकीर्षन्स प्रागादिति सूचितं व्यक्तीकुर्वन्नुपपादितसाधुत्वं त्वय्यस्तीदं कुर्वित्याह ॥ स इति । श्रेयाञ्छ्रेयश्चिकीर्षयेति श्रेयान्पाठः । नः सुहृदां मध्ये स भवान् श्रेयान् श्रेष्ठः श्रेयश्चिकीर्षया पाण्डवानां जिज्ञासयाऽर्थः फलरूपं ज्ञानं तमुद्दिश्य गजसाह्वयं गजेन सम आह्वयः पर्यायशब्दो वाचकतया यस्य तत्पुरं गच्छ । हे स्वेति सम्बोधनं वा । किञ्चिच्छ्रेयश्चिकीर्षयेति पाठे सुहृदां मध्ये स भवान्सुहृदन्तःपातीत्यर्थः । लोके लोकाः स्वत्त्वेन ग्रामादिकं प्रति व्यवहरन्तीति स्वगजसाह्वयमस्मदीयं हस्तिनपुरमित्यैकपद्यं वा ॥ ३३ ॥

सुमनोरञ्जनी — स एतादृशो भवान् । नः अस्माकं किञ्चित् श्रेयश्चिकीर्षया गजसाह्वयं गजेन समः आह्वयो नाम यस्य तत् गजसाह्वयं हस्तिनपुरमिति यावत् । गच्छेत्यन्वयः । किं श्रेय इति तदाह । पाण्डवानां जिज्ञासार्थं विचारार्थमिति ॥ ३३ ॥

पितर्युपरते बालाः सह मात्रा सुदुःखिताः ।
आनीताः स्वपुरं राज्ञा वसन्त इति शुश्रुम ॥ ३४ ॥

सत्यधर्मीया — पितरि पाण्डावुपरते मृते सति मात्रा सह सुदुःखिता बालाः पञ्च वसन्तः शतशृङ्गगिराविति शेषः । राज्ञा स्वपुरमानीता ऋषिभिरिति शुश्रुमः । वसन्ते इति वसन्तीति शुश्रुम इति वा ॥

सुमनोरञ्जनी — किं विचार्यमित्यत आह ॥ पितरीति । पितरि पाण्डौ । ऋषिभिः पुरं प्रत्यानीताः । राज्ञा सह वसन्ते वसन्तीति ॥ ३४ ॥

तेषु राजाम्बिकापुत्रो भ्रातृपुत्रेषु दीनधीः ।
समो न वर्तते नूनं दुष्पुत्रवशगोऽन्धदृक् ॥ ३५ ॥

सत्यधर्मीया — तेषु पाण्डवेषु भ्रातृपुत्रेषु दीनधीस्तसबुद्धिः समो न वर्तते नूनं निश्चयः । तत्र तन्त्रं दुष्पुत्रवशगोऽन्धे दृशौ यस्य स इति । यद्यप्यन्ध इत्येवालं तथाऽपि ''अन्धाः पूर्वोत्तराना-लोचनपरा'' इति दृग्ज्ञानं यस्य स इत्यपि सूचनार्थमेवमुक्तमिति ज्ञातव्यम् ॥ ३५ ॥

सुमनोरञ्जनी — तेषु पाण्डुवेषु । अम्बिकापुत्रः धृतराष्ट्रः समो न वर्तते । स्वपुत्रसाम्येन न प्रवर्तते । दुष्पुत्राणां दुष्टपुत्राणां दुर्योधनादीनां वशगः वशे विद्यमानः सन्नित्यपि शुश्रुम ॥ ३५ ॥

गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ।
विज्ञाय तद् विधास्यामो यथा शं सुहृदां भवेत् ॥ ३६ ॥

सत्यधर्मीया — गच्छ, तद्वृत्तं तस्य धृतराष्ट्रस्य तेषु वृत्तमिति वा साध्वसाधु वा जानीहि । अधुना गतात्त्वत्तस्तथाऽऽगताद्विज्ञाय ज्ञात्वा सुहृदां शं यथा भवेत्तथा विधास्यामः ॥ ३६ ॥

सुमनोरञ्जनी — तद्वृत्तं तेषां पाण्डवानां राज्ञो वा वृत्तं वर्तनम् । अस्माभिः श्रुतं साधु वा असाधु वा जानीहि । सुहृदां पाण्डवानां शं सुखम् ॥ ३६ ॥

इत्यक्रूरं समादिश्य भगवान् हरिरीश्वरः ।
सङ्कर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३७ ॥

इति श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशोऽध्यायः ॥

सत्यधर्मीया — भगवान् हरिरीश्वरः । अनेन लोकरीतिरियमिति ध्वनयामास । अक्रूरमिति समादिश्य सङ्कर्षणोद्धवाभ्यां सह स्वभवनं ततो ययौ ॥ ३७ ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमस्कन्धपूर्वार्धे सप्तचत्वारिंशोऽध्यायः ॥ १०-४७ ॥

सुमनोरञ्जनी — ततः अक्रूरभवनात् ॥ ३७ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां सप्तचत्वारिंशोऽध्यायः ॥ १०-४७ ॥

॥ अथ अष्टचत्वारिंशोऽध्यायः ॥

श्रीशुक उवाच—

स गत्वा हस्तिनपुरं पौरवेन्द्रयशोऽङ्कितम् ।
ददर्श तत्राम्बिकेयं सभीष्मं विदुरं पृथाम् ॥ १ ॥

सत्यधर्मीया — सोऽक्रूरः । पौरवेन्द्राणां यशसाऽङ्कितं चिह्नितं हस्तिनपुरं गत्वा तत्र सभीष्ममाम्बिकेयमम्बिकापुत्रं सभीष्मं विदुरं वा पृथां कुन्तीं च ददर्श ॥ १ ॥

सुमनोरञ्जनी — अधिकारिभिर्भक्तिसाधनतया 'मौनं स्वाध्यायमार्जवम् ' इत्यादिना भागवतधर्मेषु परिगणितं निष्कापट्यापरपर्यायमार्जवं संपाद्यमिति सूचयत्यस्मिन्नध्याये । तत्र तावदक्रूरस्य

भगवदाज्ञया हस्तिनपुरं प्रति गतस्य धृतराष्ट्रेण संवादमाह ॥ स इति । पौरवेन्द्राणां पुरुवंशोद्भवानां यशसा अङ्कितं तत्रत्यजनाः पौरवेन्द्रकीर्तिमेव कीर्तयन्ति स्मेति यावत् । आम्बिकेयं धृतराष्ट्रम् ॥ १ ॥

सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमम् ।
कर्णं सुयोधनं द्रौणिं पाण्डवान् सुहृदोऽपरान् ॥ २ ॥

सत्यधर्मीया — बाल्हीकबाल्हिकावित्येकनामनी । प्रतीपपुत्रं बाल्हीकं सहपुत्रं सोमदत्तसहितम् । प्रतीपस्याभवन्पुत्रास्त्रयस्त्रेताग्निवर्चसः । देवापिरथ बाल्हीकः सोमदत्तोऽस्य चात्मज इत्याचार्योक्तेः । भारद्वाजं भरद्वाजात्मजं द्रोणं सगौतमं सकृपं सुहृद इत्युभयान्वयि ॥ २ ॥

सुमनोरञ्जनी — बाह्लिकं तन्नामकं शन्तनोरनुजम् । भारद्वाजं भरद्वाजस्यापत्यं द्रोणम् । सगौतमं गौतमेन कृपेण सहितम् । द्रौणिं द्रोणस्यापत्यमश्वत्थामानम् ॥ २ ॥

यथावदुपसङ्गम्य बन्धुभिर्गान्दिनीसुतः ।
सम्पृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययम् ॥ ३ ॥

सत्यधर्मीया — यथावत् वय आद्यनुसारेण तैर्बन्धुभिः सुहृद्वार्तामुद्दिश्य सम्पृष्टोऽव्ययमुक्त्वा स्वयं चाव्ययमनामयमपृच्छदित्यन्वयः ॥ ३ ॥

सुमनोरञ्जनी — गान्दिन्याः सुतोऽक्रूरः । तैर्भीष्मादिभिः । सुहृदां वसुदेवादीनां वार्तां प्रति संपृष्टः स्वयं च अव्ययं क्षेमम् । अपृच्छत् ॥ ३ ॥

उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया ।
दुष्प्रज्ञस्याल्पसारस्य खलच्छन्दानुवर्तिनः ॥ ४ ॥

सत्यधर्मीया — झडिति कौटिल्यमकौटिल्यं वा नावगन्तुं शक्यमिति कतिचिन्मासानित्युक्तिः । तत्स्वभावमावेदयति । दुष्प्रज्ञस्य दुर्बुद्धेरल्पसारस्येदं वा निर्वाहयितुं बलविकलस्य । कलिरेवैतन्मूलमित्यालपति ॥ खलच्छन्दानुवृत्तिन इति । पुत्रेच्छानुवर्तिन इत्यर्थः । राज्ञो वृत्तं पाण्डवदुर्योधनादिवर्तनं तद्विवत्सया वेदितुमिच्छा विवत्सा तया विविदिषया विचारेच्छया वा ॥ ४ ॥

सुमनोरञ्जनी — राज्ञः धृतराष्ट्रस्य । वृत्तविवित्सया वृत्तस्य स्वपुत्रेषु पाण्डवेषु च प्रवृत्तिप्रकारस्य स्वभावस्य वा विवित्सया वेत्तुमिच्छया । कीदृशस्य राज्ञः । दुष्प्रज्ञस्य दुष्टा प्रज्ञा यस्य सः । तदेवाह ॥ अल्पसारस्येति । अल्पं सारं श्रेष्ठं यस्येति । अल्पं सारत्वेन मन्यमानस्येत्यर्थः । तत्र निमित्तं खलानां स्वपुत्राणां छन्दं इच्छां अनुसृत्य वर्तितुं शीलमस्येति ॥ ४ ॥

तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ।
प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥ ५ ॥

सत्यधर्मीया — तेजः शारीरवर्च ओजोऽवष्टम्भशक्तिर्बलं शारीरं वीर्यं पराक्रमः प्रश्रयादीन् सद्गुणान्प्रजानुरागं प्रजाकर्तृकं स्नेहं च न सहद्भिः । स एवायं नागः सहति कलभेभ्य इत्युदाहृत्य धात्वन्तररूपमिति प्राग्विस्तृतं विलोक्यम् । चिकीर्षितं कर्तुमिष्टमुत्तरेणान्वयः ॥ ५ ॥

सुमनोरञ्जनी — तेजः दीप्तिः । ओजः अन्तःसामर्थ्यं धैर्यापरपर्यायम् । बलं शारीरसामर्थ्यम् । वीर्यं पराक्रमः। प्रश्रयो विनयम् । न सहद्भिः सहनमकुर्वाणैः धार्तराष्ट्रैः चिकीर्षितं उत्तरत्र कर्तुमिच्छाविषयं पुरान्निर्वासनादिकं यच्च कृतं गरदानाद्यकौशलम् एतत्सर्वम् ॥ ५,६ ॥

कृतं च धार्तराष्ट्रैर्यद् गरदानाद्यकौशलम् ।
आचख्यौ सर्वमेतस्मै पृथा विदुर एव च ॥ ६ ॥

सत्यधर्मीया — तथा धार्तराष्ट्रैः कृतं च तदेवाह ॥ यदिति । गरदानादि यदकौशलमक्षेमव्यापारम् । अपेशलमिति पाठोऽपि पेशलः । अपेशलममनोहरमन्यायमिति यावत् आचख्यौ । पृथा विदुर एव चाचख्याविति पृथगन्वयः ॥ ६ ॥

पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तम् ।
उवाच जन्मनिलयं स्मरन्त्यश्रुकुलेक्षणा ॥ ७ ॥

सत्यधर्मीया — पृथा भ्रातरं प्राप्तं तमक्रूरम् । तुरेकान्तादिविशेषसूचकः । जन्मनिलयं जन्मगृहं मातृसद्मेत्यर्थः । इदानीं पुत्रजन्मनिलयं गिर्युपरीति तत्स्मरन्तीति वा । अश्रूणां कुलं सङ्घो ययोस्ते ईक्षणे लोचने यस्याः सा सत्युवाच । जन्मनि सति पुत्राणां लयोऽप्ययः पाण्डोरिति पदतदर्थौ वा । अश्रुकलेक्षणेति पाठेऽऽश्रूणां कला बिन्दवो ययोस्ते ईक्षणे यस्याः सेत्यर्थः ॥ ७ ॥

सुमनोरञ्जनी — जन्मनिलयं स्वजन्मगृहम् । अश्रूणां कुलं समूहो ययोस्ते ईक्षणे यस्याः सा ॥ ७ ॥

अपि स्मरन्ति नः सौम्य पितरौ भ्रातरश्च मे ।
भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥

सत्यधर्मीया — पितरौ श्वफल्कादिकौ भ्रातरौ वसुदेवादिकौ भगिन्यौ भ्रातृपुत्रा जामयस्तव । जामयो वयमित्यृग्व्याख्यायामायुष्करो भ्रातरस्ते वयं चेत्यृग्भाष्ये । तथाम्बयोयन्त्यध्वभिर्जामय इति भाष्ये च, कारणत्वात्सहोदराः जगतो जामय इत्युक्त्या भगिन्यो भ्रातरौ चेति मातृभगिनीपुत्रीपुत्राणां

ग्रहणमत्र, साक्षात्सहोदरीणां सहोदराणां चाग्रहणमिति विवेकः । सख्य एव च नः स्मरन्त्यपि स्मरन्ति किमिति ॥ ८ ॥

सुमनोरञ्जनी — हे सौम्य! पुत्रादयो नः अस्मान् अपि स्मरति किमिति सम्बन्धः । भगिन्यः ज्येष्ठभगिन्यः । जामयः स्वसृः । जामयः कुलस्त्रीभूताः सख्यो वा । जामिस्वसृकुलस्त्रियोरित्यमरः । भ्रातृभार्या इति पदरत्नावल्याम् ॥ ८ ॥

भ्रात्रीयो भगवान् कृष्णः शरण्यो भक्तवत्सलः ।
पैतृष्वस्रीयान् स्मरति रामश्चाम्बुरुहेक्षणः ॥ ९ ॥

सत्यधर्मीया — यद्यपि पूर्वं कुन्त्योपजीव्यतामुपजीव्य कृष्णकुशलप्रश्नः कुशलया कर्तव्यो यद्यार्या विचार्या मर्यादयेति हन्त तर्हि रामश्चाम्बुरुहेक्षण इति तदनन्तरमनन्तप्रश्नोऽनुपपन्नः स्यादिति चेत् । सत्यम् । तथाऽपि बहुविज्ञाप्यं कृष्णं प्रत्यस्तीति सूचीकटाहन्यायेन बलस्य शुक्लकेशावेशेन साक्षाद्भगवदात्मकृष्णानन्तरतया बोधनं चावश्यकमिति द्वावपि केशावेकस्यैवेति सूचयितुं चार्धाभ्यां पप्रच्छेति तात्पर्यमवधेयम् । भ्रात्रीय इति कृष्णवद्रामोऽपि ज्ञेयः । भ्रातृव्यश्चेति चकाराच्छोणपवादेन ज्ञेयः । भ्रातृव्यो भ्रात्रीयश्चेति काशिकोक्तेः । भ्रातृपुत्र इत्यर्थः । भ्रात्रेय इति क्वाचित्कः पाठः । तत्र शुभ्रादिनिवेशनेन ठक्, किति चेत्यादिवृद्धिः । गणितत्वेनानाकृतिगणत्वान्न स्वच्छन्दत उक्तिः सम्भवतीति तु चकारोऽनुक्तसमुच्चयार्थः । आकृतिगणतामस्य बोधयति । तेन गाङ्गेय इत्येवमादि-सिद्धमिति काशिकाप्रतिषिद्धम् । शरण्यो भक्तवत्सलः पैतृष्वस्रीयान्पितुर्वसुदेवस्य स्वसुर्ममापत्यानीति पञ्च मत्पुत्रान् । पितृस्वसुश्छणिति छण् । तस्येयादेशे आदिवृद्धौ च पैतृष्वस्रीय इति भवति । पितृष्वसेय इति पाठे तु ठकि लोप इत्यन्तलोप इयादेशे च पितृष्वसेय इत्यवसेयम् । न च केन ठगिति वाच्यम् । यतो लोपस्तस्मिन्परतोऽन्वकाशाच्छाकृतेनैव ठकं प्रत्ययमन्वजिज्ञपदिति ज्ञेयम् । भ्रात्रेयोऽम्बुरुहेक्षणो रामश्च स्मरति किमिति पृथगन्वयः । कर्णरहिताहिमहीमहदवतारत्वं ध्वनयितुं श्रवणदर्शनकार्यस्य तत्र नेत्रमात्रनिर्वाह्यत्वरूपमहत्त्वं बोधयितुं चाम्बुरुहेक्षण इत्युक्तिरिति मन्तव्यम् ॥ ९ ॥

सुमनोरञ्जनी — भ्रात्रीयः भ्रातृपुत्रः पैतृष्वसेयान् पितृष्वसुर्मम पुत्रान् धर्मादीन् ॥ ९ ॥

सपत्नमध्ये शोचन्तीं वृकाणां हरिणीमिव ।
सान्त्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥

सत्यधर्मीया — सपत्नानां वैरिणामित्यनेनान्वयः । वृकाणां मध्य इत्यस्य विश्लिष्टस्य हरिणीमिव शोचन्तीं मां भर्तृहीनामित्युत्तरदृष्ट्या सिद्धमेवेत्यनुक्तिः । वाक्यैः सान्त्वयिष्यति । पितृहीनान्बालकांश्च सान्त्वयिष्यति किमित्यन्वेति ॥ १० ॥

सुमनोरञ्जनी — वृकाणां मध्ये शोचन्तीं हरिणीमिव सपत्नमध्ये शोचन्तीं माम् । पितृहीनान् बालकान् धर्मादींश्च सांत्वयिष्यति किमिति ।। १० ।।

कृष्ण कृष्ण महायोगिन् सर्वात्मन् विश्वपालक ।
प्रपन्नां पाहि गोविन्द शिशुभिश्चावसीदतीम् ।। ११ ।।

सत्यधर्मीया — पारवश्येन चिरवरिवस्या फलतया प्रतिफलितं साक्षात्कृत्येव कुन्त्याह ।। कृष्णेति । महोपाय सर्वव्यापिन् जगद्रक्षकेति क्रमार्थः । शिशुभिः सहावसीदन्तीं प्रपन्नां मां पाहि ।। ११ ।।

सुमनोरञ्जनी — एवमुक्त्वा भक्तिपरवशा सती कुन्ती मनस्याविर्भूतं कृष्णं स्तौति ।। कृष्णेति । महान् योगः सामर्थ्यं उपायो वाऽस्यास्तीति तत्सम्बुद्धिः महायोगिन् ! सर्वात्मन् सर्वान्तर्यामिन् सर्वमाप्नोतीति वा सर्वमातनोतीति वा । विस्तारयसि सृजसीति यावत् । तनोतेर्ङ्वन् । शिशुभिः सह । अवसीदतीं क्लिश्यन्तीं प्रपन्नां मां पाहीति ।। ११ ।।

नान्यत् तव पदाम्भोजात् पश्यामि शरणं नृणाम् ।
बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ।। १२ ।।

सत्यधर्मीया — मृत्युरूपात्संसाराद्बिभ्यतां नृणामधिकारिणामीश्वरस्य तवापवर्गिकान्मुक्तिसाधनात्पदाम्भोजादन्यच्छरणं न पश्यामः ।। १२ ।।

सुमनोरञ्जनी — मृत्युवद्भयहेतोः संसाराद्बिभ्यताम् । आपवर्गिकात् अपवर्गो मोक्षः तत्साधनात् तव पदाम्भोजादन्यत् शरणं न पश्यामः ।। १२ ।।

नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ।
योगेश्वराय योगाय त्वामहं शरणं गता ।। १३ ।।

सत्यधर्मीया — शुद्धाय निरञ्जनाय । ब्रह्मणे पूर्णगुणाय । परमात्मने अत्यन्तादानकर्त्रे । योगेश्वराय योगाय सर्वान्युङ्क्ते इति योगो मा तूक्ता प्राक् नमस्त्वामहं शरणं गता ।। १३ ।।

सुमनोरञ्जनी — शुद्धाय निर्दोषाय । ब्रह्मणे देशकालगुणैरपरिच्छिन्नाय । परमात्मने परा उत्कृष्टा मा ज्ञानं तदेव आत्मा शरीरं यस्य तस्मै । योगेश्वराय योगे अघटितघटनायां ईश्वराय समर्थाय अचिन्त्यशक्तिमत इत्यर्थः । योगाय उपायभूताय । मोक्षस्येति शेषः । युज्यत इति योगः प्राप्यः । तस्मै मुक्तगम्यायेति वा ।। १३ ।।

इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् ।
प्रारुदद् दुःखिता राजन् भवतां प्रपितामही ॥ १४ ॥

सत्यधर्मीया — स्वजनं वसुदेवादिकं सु अजनमुत्पत्तिरहितम् । इयति स्वलाघवेऽपि ते नायाता इति द्योतयितुं स्वो लघुः पठितोऽन्यथा वृत्तविच्छित्त्यापत्तेः । इत्येवं गुणकत्वेनानुस्मृत्य हे राजन्! भवतां प्रपितामही दुःखितान्तः प्रारुदत् । इदितो वेत्यङ् । रुरोद । प्रपितामही प्रपितामहस्य पाण्डोः पत्नी । भवत इति राजन्नित्यानुकूल्येन वक्तव्ये बहुपुत्रस्थानेऽभिमन्योस्त्वमेकोऽनेकगुणकः पुत्र इति भावं ध्वनयितुं भवतामित्युक्तिरिति हृदयम् ॥ १४ ॥

सुमनोरञ्जनी — भवतामिति परीक्षितं प्रत्युक्तिः ॥ १४ ॥

समदुःखसुखोऽक्रूरो विदुरश्च महायशाः ।
सान्त्वयामासतुः कुन्तीं तत्पुत्रोत्पत्तिहेतुभिः ॥ १५ ॥

सत्यधर्मीया — समदुःखसुखः समे दुःखसुखे यस्य स महाज्ञानित्वादक्रूरो विदुरश्चैवमेव महायशा इति । विदुरोऽक्रूरश्च कुन्तीं, तत्पुत्रोत्पत्तिहेतुभिस्तस्याः पुत्राणां धर्मादीनामुत्पत्तौ हेतवोऽश्विनीयमाद्यास्तैस्त एवैतेऽवतीर्णा न चिन्ता कर्तव्येति तत्पुत्रोत्पत्तिहेतुभिरित्यर्थः । सान्त्वयामासतुः । तस्याः पुत्रोत्पत्तौ तत्त्वेन यमानिलेन्द्रनासत्यानामुत्पत्तौ हेतवः कारणानि तैर्निमित्तानि देवताकार्याणि तैर्निरूपितैरिति वा ॥ १५ ॥

सुमनोरञ्जनी — तस्याः पुत्राणां युधिष्ठिरादीनामुत्पत्तिहेतुभिः उत्पत्तौ ये हेतवः भूभारपरिहरणादयः तैः । नैते साधारणाः किन्तु देवोत्तमाः भूभारपरिहारार्थमवतीर्णाः । एषां धृतराष्ट्रादिभिः किमपि भयं नास्तीत्येवमादिभिरिति भावः ॥ १५ ॥

यास्यन् राजानमभ्येत्य विषमं पुत्रलालसम् ।
प्रावदत् सुहृदां मध्ये बन्धुभिः सौहृदोदितम् ॥ १६ ॥

सत्यधर्मीया — यास्यन्मधुरां गन्तुमिच्छन्पुत्रलालसं तद्वर्धिनमतो विषमं राजानमभ्युपेत्य सुहृदां मध्ये । अनेन नैकान्त इति सूचयति । बन्धुभिः कृष्णादिभिः सौहृदेन सुहृद्भावेनोदितमुक्तं प्रावदद्दुवाच ॥

सुमनोरञ्जनी — यास्यन् गन्तुमिच्छन् । विषमं पाण्डवेषु वैषम्येण वर्तमानम् । तत्र निमित्तं पुत्रेषु लालसं स्नेहपरवशं राजानं धृतराष्ट्रं बन्धुभिः कृष्णरामादिभिः । सौहृदेन सुहृद्भावेन उदितम् ॥ १६ ॥

भो भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन ।
भ्रातर्युपरते पाण्डौ बन्धूनां सममास्थितः ॥ १७ ॥

सत्यधर्मीया — कुरूणां कीर्तिवर्धन । यशः शब्दं विहाय निधाय कीर्तिपदं कुलपङ्क्तिलतैव किलानेन कृता भविष्यतीति ध्वनयति । गतम् । भो भो वैचित्रवीर्य तत्क्षेत्राम्बिकापुत्र! भ्रातरि पाण्डावुपरते मृते सति समयमप्यनेनैवाह । उप माद्रा सहासन्ने रते सुरते सतीति । उप हीनेऽधिके प्रोक्तमासन्नेऽप्युपकीर्तितमिति विश्वः । बन्धूनां पाण्डवानां विषये । बन्धुभिरूनामुज्झितां कुन्तीं समं यथा तथाऽऽस्थितः सन् मम ममतया सहितः समः सन्नास्थित इति वा । पालयन्नुर्वीं च पालयन्प्रजाः शीलेन सच्चरित्रेण रञ्जयन्दार्ढ्याय पुनरप्याह । स्वेषु समः वर्तमानः श्रेयः कीर्तिं चावाप्स्यसि । कीर्तिच्छेदकेति वाऽन्तरङ्गिको भावः ॥ १७,१८ ॥

सुमनोरञ्जनी — वैचित्रवीर्य विचित्रवीर्यस्य पुत्र ! बन्धूनां समं बन्धुभिः सह ॥ १७ ॥

धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रञ्जयन् ।
वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥ १८ ॥

सुमनोरञ्जनी — उर्वीं पृथ्वीम् । शीलेन स्वभावेन रंजयन् तोषयन् । स्वेषु पाण्डवेषु समः सन् वर्तमानः पुत्रसाम्येन वर्तमान इत्यर्थः । श्रेयः सुकृतम् ॥ १८ ॥

अन्यथा त्वाचरँल्लोके गर्हितो यास्यसे तमः ।
तस्मात् समस्त्वं वर्तस्व पाण्डवेष्वात्मजेषु च ॥ १९ ॥

सत्यधर्मीया — अन्यथाऽऽचरन्वैषम्यमाचरन् त्वं तु लोके गर्हितः सन् तम आविष्टदुष्टविवक्षया, लोकं गन्धर्वविवक्षया । इह ग्लानिमुत्तरत्रैतत्सहवाससम्भूतं दुःखं यास्यसे । तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तर इति विश्वः । तस्मात्पाण्डवेष्वात्मजेषु समो वर्तस्व ॥ १९ ॥

सुमनोरञ्जनी — अन्यथा पूर्वोक्तादन्यथा । लोके गर्हितः निन्दितः सन् । मृत्युर्वै तमोज्योतिरमृतमिति श्रुतेः तमः मृत्युं यास्यसे । अथवा तमः अन्धन्तमः । इदं च तदाविष्टासुर-विषयम् । यस्मात् तस्मात् पाण्डवेषु आत्मजेषु दुर्योधनादिषु च समः सन् वर्तस्वेति ॥ १९ ॥

नेह चात्यन्तसंवासः कस्यचित् केनचित् सह ।
राजन् स्वेनापि देहेन किमु जायात्मजादिभिः ॥ २० ॥

सत्यधर्मीया — न चासावस्ति विशेष आत्मजैः सहावस्थानं सुस्थिरमस्थिरमितरैरिति येन विषमता मता स्यादित्याह ॥ नेति । इह कस्यचित्केनचित्सहात्यन्तं संवासो वैषम्यमूलभूतो न नास्ति । कैमुत्येनैतमेवार्थमाह ॥ राजन्निति । स्वेन स्वत्त्वेन सम्प्रतिपन्नेन देहेनानेन किमु जायात्मजादिभिर्नेति वक्तव्यमिति ॥ २० ॥

सुमनोरञ्जनी — सर्वस्यानित्यत्वात् स्नेहद्वेषाभ्यां किं सम्पाद्यमस्तीत्याह ॥ नेहेति । इहास्मिन् लोके कस्यचित् केनचिदपि सह अत्यन्तसंवासः सर्वदा सहवासः न हि । कैमुत्येन दृढयति । स्वेन स्वकीयेन देहेनापि अत्यन्तसंवासो नास्ति किमु जायादिभिरिति ॥ २० ॥

एकः प्रसूयते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥ २१ ॥

सत्यधर्मीया — तत्कृतफलमप्येवमेवेति निश्चित्य वर्तस्वेत्याह ॥ एक इति । एको जन्तुः प्रसूयते एक एव जन्तुः प्रलीयते एक एव जन्तुः सुकृतं तच्छुभफलं तथा दुष्कृतं तदशुभफलमनुभुङ्क्ते । दृश्यमान इदानीं नश्यमाने स्वयं केऽपि सह न संयन्ति । कस्य के पतिपुत्राद्या इत्यादेः ॥ २१ ॥

सुमनोरञ्जनी — दारापत्यादीनामुपकारकतया आनुभाविकत्वात् स्नेहः त्यक्तुं शक्य इत्यतो नेत्याह ॥ जन्तुः एकः प्रसूयते प्रसवदुःखमनुभवति । प्रलीयते मरणदुःखमनुभवति । एवेत्यनेन तद्दुःखं केऽपि दारादयो नापहरन्तीति भावः । किन्तु सुकृतं सुकृतफलम् । दुष्कृतं दुष्कृतफलम् ॥ २१ ॥

अधर्मोपचितं वित्तं हरन्त्यन्येऽल्पचेतसः ।
सम्भोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥

सत्यधर्मीया — न्यायार्जितमूर्जितताहेतुर्वित्तमन्यथा चेदित्थम्भवतीत्याह ॥ अधर्मेति । अधर्मेणोपचितम् । आर्जयत्येवं कुतः स इत्यत आह ॥ अल्पमेधस इति । षष्ठी प्रथमा च । अल्पबुद्धेरस्यान्येऽल्पचेतसः । सम्भोजनीयापदेशैः सम्भोजनीया बन्धव एत इत्यपदेशा व्याजास्तैर्हरन्ति । अधर्मो ह्यर्थं कृतो धर्मोऽधर्मस्तेनोपचितं वर्धितं चित्तम् । अल्पचेतसोऽन्ये महाचेतस्काः सम्भोजनीयाश्च तेऽपदेशाश्च तैः सहैतद्देशस्था एत इति न विदिता अपदेशा इति यावत् हरन्ति । तत्र तर्हि ममता स्यात्किमित्यतो नेतीत्यप्याह ॥ हरन्तीति । हरवदाचरन्ति स यथाऽकिञ्चनस्तेऽपि निष्किञ्चना इदं मुखतो व्रतं तन्वत इति भावः । अकिञ्चन न किञ्चन व्रजिनमस्त्यभस्मीभवदित्यादेः । तत्र निदर्शनमाह ॥ जलानीवेति । जलौकस उक्तात्सम्भोजनीयापदेशैस्तर्पणादिना सम्भोजनीया इत्यपदेशा निमित्तानि लक्ष्याण्युद्देशा वा तैः सह हरन्त्युपयुक्तानि तन्वते ॥ २२ ॥

सुमनोरञ्जनी — वित्तमपि अनित्यं न स्वोपकारकमित्याह ॥ अधर्मेति । अधर्मेण उपचितं वर्धितम् । अल्पचेतसो 'धर्मार्थं विनियोक्तुमजानतः मनुष्यस्य वित्तम् अन्ये बन्ध्वादयः । सम्भोजनीयापदेशैः सम्भोजनीयाः बन्धवः अपदेशैः व्याजैः स्वभोगार्थमिति यावत् । हरन्ति । जलौकसः तटाकादेः सकाशात् कर्षकाः जलानीव केदाराद्यर्थमिति ॥ २२ ॥

पुष्णाति यानधर्मेण स्वबुद्ध्या तमपण्डितम् ।
अन्तेऽकृतार्था हिन्वन्ति प्राणा रायः सुतादयः ॥ २३ ॥

सत्यधर्मीया — यो यान्स्वबुद्ध्या स्वकीया एत इति बुद्धिर्ममता भ्रान्तिस्तया पुष्णाति पोषयति । द्रव्यपोषणं च वार्धुषिकतया । प्राणा रायः सुतादेः प्राक् प्राणानन्तरं निर्देशोनार्था बहिश्चराः प्राणा इत्यादिस्मार्ततत्समतां ध्वनयति । कृतार्थाः सम्पन्नस्वप्रयोजना अकृतार्था अननुष्ठितैतदिष्टास्तम-पण्डितमनागमज्ञमन्ते हिन्वन्ति ॥ २३ ॥

सुमनोरञ्जनी — स्वबुध्या स्वीयबुध्या । यान् सुतादीन् अधर्मेण पुष्णाति ते रायः वित्तानि सुतादयश्च स्वयं कृतार्थाः स्वकार्यं कृत्वेति यावत् । अन्ते इममपण्डितं हिन्वन्तीति अधर्म एव परं भवतीति भावः ॥ २३ ॥

स्वयं किल्बिषमादाय तैस्त्यक्तो नार्थकोविदः ।
असिद्धार्थो विशत्यन्धं स्वधर्मविमुखस्तमः ॥ २४ ॥

सत्यधर्मीया — प्राणादिहानानन्तरं तद्गतिं वक्ति ॥ स्वयमिति । स्वयं किल्बिषमेतत्पोषणाद्याया-तपातकमादाय । अनेन तस्यावर्जनीयतां ध्वनयति । तैः प्राणादिभिस्त्यक्तो नार्थकोविदः शाश्वति-केश्वररूपार्थानभिज्ञोऽसिद्धार्थोऽनिष्पन्नमनोरथः स्वधर्मविमुख इतीयदापत्तिहेतुकथनम् । अन्धन्तम उक्तरूपमुक्तरूपो विशतीति । अन्धं धृतराष्ट्रं प्रतीत्युत्तरेण सत्पक्षेऽन्वयः । अन्धयतीत्यन्धमज्ञानमिति वा ॥ २४ ॥

सुमनोरञ्जनी — तत्फलमाह ॥ स्वयमिति । नार्थकोविदः स्वप्रयोजनेऽकुशलः । स्वयं किल्बिषम् अधर्मम् आदाय । असिद्धार्थः अप्राप्तप्रयोजनः सन् अन्धं विशति अतिदुःखमनुभवतीत्यर्थः । कुतः । यतः स्वधर्मे विमुखः पराङ्मुखः ॥ २४ ॥

तस्माल्लोकमिमं राजन् स्वप्नमायामनोरथम् ।
सम्भजन्नात्मनाऽऽत्मानं समः शान्तो भव प्रभो ॥ २५ ॥

सत्यधर्मीया — न शृणोति न वा वृणोति समतामिति मतिमानप्येनादूरीकृत्य सतः शासितुं श्वाफल्किः किं बहुनेति परमार्थमुपदिश्योपसंहरति ॥ तस्मादिति । इमं लोकं देहं स्वप्नमायामनोरथं स्वप्नवद्भगवदधीनं मायया निर्मितमैन्द्रजालिकं तद्वन्मनोरथवच्च । अनेन भगवन्मात्राधीनं न मम स्वातन्त्र्यं किमप्यत्रास्तीत्यत्र स्वप्नो मायामनोरथौ च क्रमादविश्वसनीयतायां निदर्शनानीति ज्ञेयम् । आत्मना मनसाऽऽत्मानं हरिं सम्भजन्समः सञ्छान्तो भगवन्निष्ठबुद्धिर्भव प्रभो इति सौमुख्यं सम्पादयितुमित्यन्धं जगाद गान्दिनीतनय इत्यन्वयः ॥ २५ ॥

सुमनोरञ्जनी — उपसंहरति ॥ तस्मादिति । इमं पुत्रादिकम् । स्वप्नमाया स्वप्ने प्रतीयमानो मायोपादकगजतुरगादिः मनोरथश्च । तमिव मत्वा । आत्मना मनसा । आत्मानं परमात्मानं सम्यक् भजन् । शान्तः भगवदेकनिष्ठबुद्धिः सन् स्वपुत्रेषु पाण्डवेषु च समो भवेति सम्बन्धः । सर्वं च भगवदधिष्ठानमिति पाण्डवान् स्वपुत्रसाम्येन रक्षस्वेति भावः ॥ २५ ॥

धृतराष्ट्र उवाच—

यथा वदति कल्याणीं वाचं दानपते भवान् ।
तथाऽनया न तृप्यामि मर्त्यः प्राप्य यथाऽमृतम् ॥ २६ ॥

सत्यधर्मीया — मनस्येकं वचस्येकमिति न निरूढमूढपुत्रममतः स्वमनोगतमक्रूरं प्रति धृतराष्ट्रो वक्तीति वक्ति ॥ धृतराष्ट्र इति । हे दानपते! भवान्कल्याणीं मङ्गलप्रापकतया तद्रूपिणीं वाचं यथा येन प्रकारेण वदति यथावदकृत्रिमं वदसीति वा तथा तेनैव प्रकारेणानया वाचा न तृप्यामि । तत्र निदर्शनं दर्शयति । यथा मर्त्यो मरणधर्मा अमृतं देवान्नमभूतोपमतायां सुधां वा प्राप्य यथा तृप्तिं नाप्नोति तथेति । अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे चेति यादवविश्वौ ॥ २६ ॥

सुमनोरञ्जनी — हे दानपते अक्रूर ! त्वं यथा यथाऽनुपूर्व्या । कल्याणीं श्रवणमनसां आनन्द-करीं वाचं वदसि तथा तादृशानुपूर्व्ययुक्तया । त्वद्वाचा न तृप्यामि अलंबुद्धिं न प्राप्नोमि । मर्त्यो अमृतं सुधां प्राप्येव ॥ २६ ॥

तथापि सूनृता सौम्य हृदि न स्थीयते जले ।
पुत्रानुरागविषमे विद्युत् सौदामिनी यथा ॥ २७ ॥

सत्यधर्मीया — एवं वचनेन मम ममता सुतेषु गता समतोत्पन्नेति भ्रमतः सम्भ्रमं न भज भो भोजपते इति जल्पति ॥ तथाऽपीति । सूनृता विद्युद्वाणी द्यौर्नाम देवी विद्युत्स्यात्साक्षादेव सरस्वती ।

द्योतनात्सर्ववस्तूनामिति बृहद्भाष्ये । तथा सूत्रभाष्ये । विद्युत्पतिं वायुमिति । तथा कर्मनिर्णयभाष्ये । द्यौर्वाव विद्युत् द्यौरेव विद्युत् । तट्टीकायाम् ''ननु वरुणावराया विद्युतः कथं चन्द्रादपि परत्वमित्यत आह । द्योरितीत्युक्तेः'' विद्युद्वाणी । सौम्य मम हृदि न स्थीयते स्थिरतया न स्थास्यति । तत्र तन्त्रम् ॥ चल इति । चञ्चलता कुत इत्यत आह ॥ पुत्रानुरागविषम इति । तत्र निदर्शनमाह । यथा सौदामिनी सुदामपर्वताकारादिसम्बन्धिनी तेनैकदिग्गतं विद्युदिति वा विशेषतो द्योतमानत्वेन सुदामाद्येकदिक्तयोरन्यतरयोगरूढितो वाऽर्थो ज्ञेयः ॥ २७ ॥

सुमनोरञ्जनी –– यद्यप्येवं तथापि सूनृता वाक् मम चले चंचले हृदि मनसि न स्थीयते । पुत्रानुरागेण विषमे वक्रे । विद्युत् विशेषेण द्योतमाना सौदामिनी तटित् यथा न स्थीयते तथेति ॥ २७ ॥

ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान् ।
भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥ २८ ॥

सत्यधर्मीया –– छद्म चरन्पद्मनाभोपरि भारं निधाय विधाय स्वदुष्कर्मावज्ञां बुध इव वक्ति ॥ ईश्वरस्येति । यो भूमेर्भारावताराय यदोः कुलेऽवतीर्णस्तस्येश्वरस्य विधिं नियमं कः पुमानन्यथै-तदन्यथा स्त्री का नु विधुनोति कम्पयति तिरस्करोतीति यावत् । भूमेर्भारावतारायैवावतीर्णोऽन्यथा पूर्वश्लोकान्नेत्यनुवर्त्यान्यथेत्यनेनान्वेतव्यम् । कर्मादिना न जननं जनार्दनस्येति भावः । को नु विधुनोतीत्यन्वयो वा ॥ २८ ॥

सुमनोरञ्जनी –– अथापि श्रीकृष्णाज्ञां करोमीत्याह ॥ ईश्वरस्येति । यो यदोः कुलेऽवतीर्णः तस्येश्वरस्य विधिं आज्ञां को नु अन्यथा विधुनोति तिरस्करोति न कोऽपीत्यर्थः ॥ २८ ॥

यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गुणान् विभजते तदनुप्रविष्टः ।
तस्मै नमो दुरवबोधविहारतन्त्रसंसारचक्रगतये परमेश्वराय ॥ २९ ॥

सत्यधर्मीया –– गन्धर्वराट् पवनावेश इत्याद्युक्तेः स्वस्वरूपानुरूप्येण हरिं नमस्यति ॥ य इति । यो दुर्विमर्शः पन्था यस्याः सा तया निजमाययेच्छया स्वाधीनया प्रकृत्योपादानभूतया गुणान्द्वारीकृत्वा चेदं जगत्सृष्ट्वा तदनुप्रविष्टः सन् तत्तत्कर्मानुगुणान्गुणान्फलादींश्च विभजते विभज्य ददाति । दुरवबोधो दुर्ज्ञेयो विहारो लीला सैव तन्त्रं कारणं यस्याः, संसारचक्रस्य तच्चक्रवालस्य गतिर्येन स तस्मै चक्रं परिवर्तनं वा तस्मै परमेश्वराय नमः । गुणान्विभजत इति चतुर्थ्यन्तं वा । य इदं सृष्ट्वा तदनुप्रविष्टस्तस्मै गुणान्विभजते । दुरवबोधसंसारचक्रगतये परमेश्वराय नम इत्यन्वयः ॥ २९ ॥

श्रीशुक उवाच—

इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ।
सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ॥ ३० ॥

सत्यधर्मीया — स यादवोऽक्रूरो नृपतेर्धृतराष्ट्रस्याभिप्रायमाशयमित्यभिप्रेत्य ज्ञात्वा सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीं मधुरामगात् ॥ ३० ॥

सुमनोरञ्जनी — इत्युक्त्वा श्रीकृष्णं नमति ॥ य इति । यः दुर्विमर्शपथया विचारेण ज्ञातुमशक्यः पन्थाः यस्याः सा तया इत्थमिति ज्ञातुमशक्यया । वाचा । निजमायया स्वेच्छया । गुणान् सत्वादीन् सृष्ट्वा तदनुप्रविष्टः । इदं जगत् नानाप्रकारेण विभजते । दुरवबोधः दुर्विज्ञेयः यो विहारः क्रीडा तत्तन्त्रा तदधीना संसारचक्रस्य गतिः भ्रमणं यस्य तस्मै । एतत्संसारचक्रभ्रमणं यल्लीलाधीनमिति भावः । अभिप्रेत्य ज्ञात्वा । यदुपुरीं मधुरापुरीम् । जगामेति । सर्वं सुमङ्गलम् ॥ ३०,३१ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां अष्टचत्वारिंशोऽध्यायः ॥ १०-४८ ॥

शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम् ।
पाण्डवान् प्रति कौरव्य यदर्थं प्रेषितः स्वयम् ॥ ३१ ॥

इति श्रीमद्भागवते दशमस्कन्धे अष्टचत्वारिंशोऽध्यायः ॥

सत्यधर्मीया — हे कौरव्य परीक्षित्! यदर्थं स्वयं प्रेषितः पाण्डवान्प्रति धृतराष्ट्रविचेष्टितं रामकृष्णाभ्यां शशंस । रामकृष्णाभ्यामिति प्राग्रामनामग्रहणेन दुर्योधनादिपक्षपातो रामस्येति तथा सन्धिर्नाभिसन्धित्सितस्ते इति जिह्मगतिमनोजिह्मं च विशेषं ध्वनयामासेति तात्पर्यं ज्ञेयम् । यस्य शेष एव द्वारं हर्यपरोक्षस्येति तदवतारपुरस्करणमिति राम आदौ गृहीत इति च मनोहरम् । मधुनाथाधुना तव दयोदयं नेयाच्चेद्भैक्षचर्यैव तेषामिति सूचयितुं रामकृष्णाभ्यामित्युक्तिरित्यपि पक्षः सुमनोहर इत्यलम् ॥

इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमपूर्वार्धेऽष्टचत्वारिंशोऽध्यायः ॥ १०-४८ ॥

इति दशमपूर्वार्धः समाप्तः ॥

अथ दशमस्कन्धः दुर्घटभावदीपिका

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक लक्ष्मीहयग्रीवाय नमः ॥ कृत्वा तरन्वत्सपदं स्म यत्प्लवा इत्यस्यायं भावः । यथा वत्सपदतरणं प्लवारोहणादिक्लेशं विनैव भवति तथा दुरत्ययकौरव सैन्यसागरतरणं प्लवारोहणादिक्लेशं विनैव जातम् । भगवद्रूपप्लवस्य सुखमात्रसाधनत्वादिति । एतेन वत्सपदतरणे प्लवो नास्ति । कौरवसैन्यसागरतरणे भगवद्रूपप्लवोऽभूदतो दृष्टान्तदार्ष्टान्तिकयो-र्वैषम्यमिति दूषणस्यानवकाशः । प्लवारोहणादिक्लेशाभावेनैव साम्यमित्यभ्युपगमात् ॥ ५ ॥

वेधा गगने, समाधौ समाधानविषये समीरितां प्रयुक्तां देवानां समाधानं कर्तव्यमिति प्रत्युक्तमिति यावत् । गिरं निशम्य त्रिदशानुवाचेत्येत्तद्धि प्रसिद्धम् । हे अमराः । मे मम पौरुषीमुत्तमपुरुष-भगवदभिप्रेतार्थविषयीर्णीं गां वाचं श्रृणुत तथा मया यथोच्यते तथैवाशु विधीयताम् । चिरं विलम्बो मा भूत् । न केवलं श्रृणुत किंतु विधीयतां चेति । क्रियासमुच्चये पुनः शब्द इति । एतेन पौरुषीं गां श्रृणुतेत्यनुपपन्नम् । पुरैव पुंसावधृतो धराज्वर इत्यादि वक्ष्यमाणवाक्यविरोधात् । तत्र हि पुरैव मया धराज्वरोऽवधृत इत्यादि नोच्यते किंतु पुरैव पुंसा धराज्वरोऽवधृत इत्याद्युच्यते । अत इदं चतुर्मुखस्यैव वाक्यं न विष्णुवाक्यमिति दूषणं परिहृतम् । पौरुषीमित्यनेन पुरैवेत्यादिवाक्यस्य भगवद्वाक्यत्वमुच्यत इत्यनङ्गीकृत्य पौरुषीमित्यस्य पुरुषाभिप्रेतार्थविषयिणीमित्यङ्गीकारेण म इत्यनेन चतुर्मुखवाक्यत्वमुच्यत इत्यूरीकरणात् ॥ २१ ॥

प्राप्तकालं प्रतिव्योढुं प्रसक्तमरणं परिहर्तुमित्यर्थः । एतेन कालस्य परिहर्तुमशक्यत्वात् । कालं परिहर्तुमनुपपन्नमिति चोद्यं निराकृतम् । प्राप्तशब्दस्य प्रसक्त्यर्थं, कल कामधेनुरिति वचनेन कामधेनुर्यथा सर्वार्थान्ददाति तथा कल धातुः सर्वार्थवाचीत्युक्तत्वात्कलधातोर्मरणार्थकत्वं चाङ्गीकृत्य प्राप्तकालं प्रतिव्योढुमित्यस्य प्रसक्तमरणं परिहर्तुमित्यर्थ इत्युक्तत्वात् ॥ ४७ ॥

इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ १०-१ ॥

वसुदेवेन दुःसहपुत्रवियोगसहनं कथं कृतमित्यत उक्तम् ॥ **किं दुःसहमिति** । अनेन साधूनां सदाचाराणां दुःसहं किं न किमपि । अतोऽयमपि साधुरिति दुःसहपुत्रवियोगसहनं कृतवानित्युक्तं भवति । सर्वापेक्षितपुत्रलालनाद्यपेक्षा वसुदेवेन कथं त्यक्तेत्याशङ्कापरिहारायोक्तम् ॥ **विदुषामिति** । अनेन विदुषां भगवत्ज्ञानिनामपेक्षितं किं न किमपि । अतोऽयमपि भगवत्ज्ञानीति पुत्रलालनादिक-मपेक्षितं न जातमित्युक्तं भवति । ननु वसुदेवेनाकार्यं हननार्थं पुत्रसमर्पणं कथं कृतमित्याशङ्कां परिहर्तुमुक्तम् ॥ **किमकार्यमिति** । अनेन कदर्याणां कदर्यभयविशिष्टानामकार्यं किं न किमपि ।

अतोऽस्यापि कदर्यं कंसभयविशिष्टत्वाद्धननार्थमकार्यपुत्रसमर्पणं कृतमित्युक्तं भवति । ननु वसुदेवेन दुस्त्यजपुत्रत्यागः स्वहस्तेन कथं कृतमित्याशङ्कां निराकर्तुमुक्तम् ॥ **दुस्त्यजमिति** । अनेन सत्यात्मनां स्ववाक्यं सत्यं कर्तव्यमित्यन्तःकरणसंपन्नानां दुस्त्यजं किं न किमपि । अतो वसुदेवोऽपि प्राणभये-नोत्पन्नानां पुत्राणां समर्पणं करिष्य इत्युक्तं स्ववाक्यं सत्यं कर्तव्यमित्यन्तःकरणवानिति पुत्रत्यागः स्वहस्तेन कृत इत्युक्तं भवति । एतेन वसुदेवस्य कदर्यत्वाभावात्किमकार्यं कदर्याणामित्ययुक्तमिति चोद्यं निराकृतम् । कदर्यशब्दस्य मत्वर्थीयाजन्तत्वात्कदर्याणामित्यनेन भयसाधनत्वेन कदर्यविशिष्टाना-मित्यर्थो लभ्यत इति भावेन कदर्यभयसंपन्नानामिति तात्पर्यस्योक्तत्वात् ॥ ४ ॥

हर्षशोकविवर्धन इत्यस्य देवानां हर्षविवर्धनोऽसुराणां शोकविवर्धन इत्यर्थः ॥ एतेन हर्षशोक-विवर्धन इत्येतद्विरुद्धमिति दूषणं परास्तम् ॥ ५ ॥

इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ १०-२ ॥

स्त्रियः स्वसुर्गुरुमत्या वधोऽयं यशःश्रियं हन्त्यनुकूलमायुरित्यनेनोक्तमत्र सामान्यव्याप्त्योपपाद्यते । योऽत्यन्तनृशंसितेनात्यन्तनृशंसनेन वर्तेत स एषो जीवन्नपि संपरेतो मृत इत्येतत्खलु निश्चितम् । योऽत्यन्तहिंसकस्तद्यशोभाग्ययोर्हानिर्भवतीति यावत् । अभिमानिनः सम्यग्देहाभिमानवतः । जीवनापेक्षावत इति यावत् । तस्य हिंसकस्य देहो मृतः प्राणवियुक्तो भवति । अनेन नानुकूल-मायुर्हन्तीत्येतदपेक्षितमायुर्हन्तीत्येवं व्याख्यातं भवति । देहे मृते तमनु देहमनु । अर्थकामौ जन्मान्तरीयार्थकामसंपादकपुण्ये गच्छन्तोऽमलं यशो जन्मान्तरीयामलं यशः संपादकपुण्यं च गच्छति । गौर्विद्यावगच्छतीत्येतद्ध्रुवमिति । अनेनायुर्हन्तीत्यत्रायुरित्येतज्जन्मान्तरीयार्थकामसंपादक-पुण्यादेरुपलक्षणमित्युक्तं भवतीत्येतद्धि प्रमाणप्रसिद्धमिति । एतेन देहवियोगस्य परमात्मनिष्ठत्वाद्देहो मृतो भवतीति चोद्यस्यानवकाशः ॥ २३ ॥

हे धातर्जगद्धारक विष्णो । इदं निजं स्वकीयं सत्त्वं ब्रह्मादिदेहाख्यः सत्त्वगुणः । सात्विक-ब्रह्मादिशरीरमिति यावत् । यस्य चेति चशब्दो येन वेति वाशब्द इत्येतौ परस्परसमुच्चयौ । अज्ञान-भिदापमार्जनमज्ञानमिथ्याज्ञाननिवर्तकं च, विज्ञानं विशिष्टः सर्वोत्तम इति ज्ञानकारणं च यदि न स्यादिति यावत् । तर्हि येन केनाधिकारिणा यस्य कस्य साधनस्य सकाशाद्भवान्सर्वोत्तम इति प्रकाशते ज्ञायेत न केनापि न कस्य साधनस्य सकाशात्ज्ञायेत । मत्सर्वोत्तमत्वज्ञानमनुमानेन भवतीत्या-शङ्कापरिहारायोक्तम् ॥ **गुणप्रकाशैरनुमीयते भवानिति** । गुणप्रकाशैः पूर्णज्ञानानन्दादिगुणानां ज्ञानैर्ज्ञातैः । पूर्णज्ञानानन्दादिगुणैरिति यावत् । भवान्सर्वोत्तम इत्यनुमीयते । अनेन विष्णुः पूर्णज्ञानानन्दादिमानिति ज्ञानं विष्णुसर्वोत्तमत्वानुमितेरयोगात्पूर्णज्ञानानन्दादिज्ञानार्थं विष्णुरपेक्षित

एवेति विष्णुरेव विष्णुसर्वोत्तमत्वज्ञानकारणत्वमित्युक्तं भवति । अन्यत्राविद्यमानं सर्वोत्तमत्वं मम कुत इत्यत उक्तम् ।। **अगुण इति ।** यतो भगवानगुणः सत्त्वादिगुणरहितोऽतः सर्वोत्तम इति ।। ता.अर्थः ।। ब्रह्मादिदेहाख्यं सत्त्वं सत्त्वगुणः सात्विको ब्रह्मादिस्थितो विष्णुरिति यावत् । तमोनुदमज्ञान-मिथ्याज्ञाननिवृत्तिकारणम् । ज्ञानरूपं ज्ञानं विष्णुसर्वोत्तमत्वज्ञानं रूपयति निरूपयतीति ज्ञानरूपं विष्णुसर्वोत्तमत्वज्ञानकारणं यदि न स्यात् तदा तर्हि विभुर्विष्णुः परः सर्वोत्तम इति तस्य जिज्ञासुभिः कथं ज्ञायेत न कथमपि । विष्णुसर्वोत्तमत्वज्ञानमनुमानेन भविष्यतीत्यत आह ।। **सत्त्वप्रकाशानुमित इति ।** अधोक्षजो विष्णुः सत्त्वप्रकाशानुमितः सत्त्वस्य साधुत्वस्य गुणपूर्णत्व-स्येति यावत् प्रकाशेन ज्ञानेनानुमितः सर्वोत्तम इत्यनुमितो भवति । अतो गुणपूर्णत्वज्ञानार्थं विष्णुरपेक्षितः । गुणपूर्णत्वज्ञानार्थं विष्णुरपेक्षित इत्यनङ्गीकारे बाधकमाह ।। **यदीति ।** विष्णुः स्वगुणपूर्णत्वज्ञानकारणं यदि न स्यात्तर्हि गुणपूर्णत्वज्ञानं कस्य साधनस्य सकाशात्स्यात् । न कस्यापि साधनस्य सकाशात्स्यात् । विष्णुसर्वोत्तमत्वज्ञानाभावे बाधकमाह ।। **कथमिति ।** यदि विष्णुः सर्वोत्तम इति ज्ञातो न स्यात्तर्हि विद्वज्जना अमुं विष्णुं कथमर्चयन्त्यर्चयेयुः । विष्णुसर्वोत्तमत्वसम्भावकमाह ।। **निर्गुणत्वादिति ।** विभुर्विष्णुर्निर्गुणत्वात्सत्त्वादिगुणरहितत्वात्परः सर्वोत्तम इति ।। ३६ ।।

अस्याः भवतः पदो भुव इत्यस्य भवतः पदश्चरणभूताया अस्या भुवो भूम्या इत्यर्थः । एतेन भगवतः पृथिव्याश्रयणाभावाद्भवतः पदाश्रयभूताया अस्या भुव इत्यनुपपन्नमिति दूषणं निरस्तम् । यच्छब्दस्याश्रयत्वमनङ्गीकृत्य पदार्थस्योक्तत्वात् ।। ता. अर्थः ।। खं नाभिश्चरणौ क्षितिरित्यनेन पृथिव्या भगवच्चरणत्वस्योक्तत्वाद्भवतः पदो भुव इत्यनेन पृथिव्या भगवच्चरणत्वमेवोच्यते न तु भगवदाश्रयत्वम् । खं नाभिश्चरणौ क्षितिरित्यनेन भवतः पदो भुव इत्यनेन च पृथिव्या यद्भगव-च्चरणैक्यमुक्तं तन्मुख्यं न भवति किन्तु तदाश्रितत्वतज्जन्यत्वतत्सादृश्यत्वरूपं गौणमित्यस्मिन्नर्थे प्रमाणमाह ।। **पदाद्याश्रयणादिति ।** विष्णोः पदाद्याश्रयणात्तज्जन्यत्वात्पादादिजन्यत्वाद्वा । अथवा सादृश्यात्पदादिसादृश्यात्पृथिव्यादि विष्णोः पदादिकं पादादिकमिति खं नाभिश्चरणौ क्षितिरित्या-दावुच्यन्ते । अत्र दृष्टान्तमाह ।। **यथेति ।** यथा नुः पुरुषस्य भूमिगं भूमौ विद्यमानं पदं प्रतिपदं पुरुषपादजन्यत्वात्पुरुषपादसदृशत्वाद्वा पुरुषस्य पदमित्युच्यत इति । एतेन भगवतः पदो भुव इति सामानाधिकरण्येनैव पृथिव्या भगवत्पादत्वस्य प्रतीयमानत्वात् । खं नाभिश्चरणौ क्षितिरिति भवतः पदो भुव इति तात्पर्यं व्यर्थमिति दूषणस्यानवकाशः । भवतः पदो भुव इत्यनेन पृथिव्या भगव-त्पादत्वस्य बाधितत्वाद्भगवदाश्रयत्वमुच्यत इति भ्रमं परिहर्तुं खं नाभिश्चरणौ क्षितिरिति भवतः पदो भुव इति तात्पर्यं प्रवृत्तमित्यभ्युपगमात् ।। ३९ ।।

मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रबुधत्वैर्युक्तःसन् कृतोऽवतारो येन स तथेति । एतेन मत्स्येति वाक्यस्य मत्स्येषु कृतावतारोऽश्वेषु कृतावतार इत्याद्यर्थो वक्तव्यः । तत्र भगवद्व्यतिरिक्तानां मत्स्यादीनां विद्यमानत्वात् मत्स्येषु कृतावतार इत्याद्युपपद्यते । भगवद्व्यतिरिक्तनृसिंहहंसस्याभावान्नृसिंहेषु कृतावतार इत्यनुपपन्नमिति शङ्का परिहृता । मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेष्विति सप्तमी बहुवचनं तृतीया बहुवचनोद्देशः । भावप्रधानोऽयं निर्देश इति चाङ्गीकृत्य मत्स्यत्वेन युक्तः सन् कृतावतार इत्याद्यर्थ उच्यत इत्यभ्युपगम्य मत्स्यत्वादियोगवन्नृसिंहत्वयोगः सम्भवतीत्यूरीकरणात् ।। ४१ ।।

इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ।। १०-३ ।।

स भगवान् त्वमेव । प्रकृत्या स्वाधीनया प्रकृत्या । अग्रे त्रिगुणात्मकमिदं जगत्सृष्ट्वा जगदनु जगत्सर्जानन्तरमेवाप्रविष्टो बहिर्विद्यमानत्वात् । प्रविष्टोऽन्तर्विद्यमानत्वात्प्रविष्ट इव जगत्समपरिमाणतया जगति विद्यमानत्वाद्भाव्यसे ज्ञायस इत्येतद्धि बहिश्च विद्यमानत्वादिति प्रमाणप्रसिद्धमिति । अयं भावः । गृहे प्रविष्टं घटादिकं गृहाद्बहिस्तिष्ठति गृहेऽपि गृहान्यूनपरिमाणतया तिष्ठति । भगवांस्तु जगतो बहिस्तिष्ठतीति कारणादप्रविष्ट इत्युच्यते । जगतोऽऽन्तस्तिष्ठतीति कारणात्प्रविष्ट इत्युच्यते । जगत्यपि जगत्समपरिमाणतया तिष्ठतीति कारणादप्रविष्ट इत्युच्यते इति । एतेन सृष्ट्वेत्यनेनैव जगत्सर्जनानन्तरमित्यर्थ इत्यस्य प्राप्तत्वात् तदन्वित्येतत्पुनरुक्तमिति चोद्यस्यानवकाशः । सृष्ट्वेत्यनेन जगत्सर्जनान्तर्यमुच्यते । तदन्वित्यनेन जगत्सर्जनानन्तरमेव न तु कालाव्यवधानेनेत्युच्यत इत्यभ्युपगमात् । एतेनैव प्रविष्ट इवेति प्रविष्टसादृश्योक्त्या बहिर्विद्यमानस्य प्राप्तत्वाद्बहिर्विद्यमानत्वाद प्रविष्ट इत्युच्यमाने पुनरुक्तिः स्यादिति दूषणमपास्तम् । प्रविष्ट इवेत्यनेन बहिर्विद्यमानत्वं नोच्यते किन्तु समपरिमाणत्वमुच्यत इत्यभ्युपगमात् ।। ता. अर्थः ।। विभुर्हरिर्जगतो बहिश्च बहिरन्तश्च विद्यमानत्वाज्जगदप्रविष्टो जगत्प्रविष्ट इति चोच्यते । जगत्येव पूर्णरूपत्वतो जगत्पूर्णरूपत्वात् जगत्समपरिमाणरूपत्वादिति यावत् । प्रविष्ट इव प्रविष्टसदृश इत्युच्यते । उक्तार्थे शब्दवेदिनां संमतिमाह ।। **अप्रवेश इति ।** बहिरन्तर्गतस्येति हेतुगर्भविशेषणम् । बहिरन्तर्गतस्येति जगत्समपरिमाणस्याप्युपलक्षणम् । भगवतो बहिर्गतत्वादप्रवेशोऽप्रवेशोक्तिर्युक्ता स्यात् । जगदन्तर्गतत्वात्प्रवेशः प्रवेशोक्तिर्युक्ता स्यात् । जगत्समपरिमाणत्वात्तथा प्रविष्टोपमता प्रविष्टोपमतोक्तिर्युक्ता स्यादिति शब्दवेदिनः शब्दार्थवेदिन आहुरिति । एतेन बहिश्च विद्यमानत्वादिति श्लोकेनैवाप्रविष्टत्वस्य प्रविष्टोपमत्वस्य चोपपादित्वादप्रवेश इति श्लोकः पुनरुक्त इति चोद्यं परिहृतम् । प्रमाणकारेणाप्रवेश इत्यनेन स्वोक्तार्थे शब्दवेदिनां संमतिरुच्यत इत्यङ्गीकारात् ।। १५ ।।

हे अव्यक्तबन्धो लक्ष्मीपते । येन कालेन विश्वं चेष्टतेऽयं निमेषादिर्वत्सरान्तो महीयान्कालस्य ते त्वां चेष्टाम् । चेष्टतेऽनेनेति चेष्टाम् । आहुः । तं कालचेष्टकमीशं ब्रह्मादीनां स्वामिनं क्षेमधाम आत्यन्तिकक्षेमप्रदवैकुण्ठादिस्थानस्वामिनं त्वां प्रपद्य इति । एतेन कालस्य भगवच्चेष्टैक्याभावात् तं कालं चेष्टामाहुरित्यनुपपन्नमिति दूषणस्यानवकाशः । चेष्टामाहुरित्यनेन कालस्य भगवच्चेष्टैक्यं नोच्यते किंतु चेष्टाशब्दस्य चेष्टतेऽनेनेति व्युत्पत्तिमङ्गीकृत्य ते इति षष्ठ्यास्त्वामिति द्वितीयादेशत्वं च स्वीकृत्य तस्य कालस्य त्वां चेष्टकमाहुरित्यर्थ उच्यत इत्यभ्युपगमात् ॥ ता. ॥ कालश्चेष्टतेऽनेन भगवतेति हेतोर्भगवांश्चेष्टेत्युच्यत इति ॥ २७ ॥

निशान्त इत्येतन्निशायां दिवसस्यान्ते निशाया आदिभाग इति व्याख्येयम् । एतेन निशाया आदाविति वक्तव्यम् । निशाया अन्त इति कथनमनुपपन्नं इति दूषणं निरस्तम् ॥ ३२ ॥

अहं तयोः पृश्निसुतयोर्वां युवयोरेकः पुनरास । तयोरित्युक्तं विवृणोति ॥ **अदित्यामिति** । अदित्यां अदितिनामिकायां त्वयि कश्यपात्कश्यपनामकात्सुतपस आसेति । एतेन तयोर्वामिति द्विवचनान्तशब्दयोरदित्यां कश्यपादित्येकवचनान्तयोश्चानन्वय इति दूषणं प्रत्युक्तम् । देहान्तरावच्छिन्नयोः पृश्निसुतपसोः पुनरासेति वक्तुं तयोरित्यस्यादित्यामित्येतद्विवरणमित्यूरीकरणात् ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ १०-४ ॥

मा हिंसीः कृपणां वृथेत्यस्य कृपणामिव वृथा मा मामहिंसीरित्यर्थः । ममावध्यत्वात्त्वदीयहननव्यापारो व्यर्थ इति भावः । एतेन कंसेन शिलापृष्ठे पोथने कृतेऽपि तद्धस्तात्समुत्प्लुत्याम्बरगतत्वेनावध्यत्वस्य कार्पण्याभावस्य च नित्यत्वात् कृपणां मां वृथा मा हिंसीरिति प्रार्थनं व्यर्थमिति चोद्यं पराकृतम् । कृपणामित्यतः परमिवेत्यस्य शेषमङ्गीकृत्वा मेत्यस्मच्छब्दद्वितीयैकवचनान्तत्वं चाभ्युपगम्याहिंसीरिति पदच्छेदं च स्वीकृत्य कृपणामिव वृथा मा मामहिंसीरित्यर्थस्योक्तत्वात् ॥ १२ ॥

शोकादियुक्ता मिथो घ्नन्तो भावैः शोकादिधर्मैर्निमित्तैर्भावान् जीवेश्वरभेदादिधर्मान्न पश्यन्ति किन्तु पृथग्दृशो भगवद्दर्शनविषयजीवेश्वरभेदादिविरुद्धजीवेश्वराभेदादिविषयज्ञानवन्तो भवन्तीति । एतेन भावैरित्येतद्व्यर्थमिति चोद्यं निराकृतम् । शोकादीनां मिथो हनन एव निमित्तत्वमिति भ्रमं परिहर्तुं मिथो हनने जीवेश्वरभेदादिज्ञानाभावे च निमित्तत्वमिति वक्तुं भावैरित्युक्तमिति स्वीकारात् । पृथग्दृश इत्यस्योक्तार्थे भगवद्दर्शनाद्यस्य विरोधाद्दर्शनमित्यादि ॥ ता. अर्थः ॥ भगवद्दर्शनाद्भगवत्कर्तृकजीवेश्वरभेदादिदर्शनात् । विरोधाद्विरोधेन विशिष्टं यद्दर्शनम् । जीवेश्वराभेदादि दर्शनमिति यावत् । तत्पृथग्दर्शनम् । यस्य पुरुषस्य स पुरुषः पृथग्दृष्टिरिति विज्ञेयः । सद्भेददर्शनोऽबाधितजीवेश्वरभेदादिदर्शनः पृथग्दृष्टिर्न तु नैवेति ॥ २७ ॥

इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ॥ १०-५ ॥

कालेन द्रव्याणि भूम्यादिद्रव्याणि शुद्ध्यन्ति । स्नानशौचाभ्यां द्रव्याणि देहादिद्रव्याणि शुद्ध्यन्ति । संस्कारैर्द्रव्याणि गर्भादिद्रव्याणि शुद्ध्यन्ति । तपसा द्रव्याणीन्द्रियाणि शुद्ध्यन्ति । भगवत्ज्ञानानुकूल्यानि भवन्ति । इज्यया द्रव्याणि ब्राह्मणादिद्रव्याणि शुद्ध्यन्ति । ब्राह्मणादिनिष्ठब्राह्मण्यादिकं स्थिरं भवतीति यावत् । सन्तुष्ट्या दानेन द्रव्याणि गवादिद्रव्याणि शुद्ध्यन्ति । अभिवृद्धानि भवन्ति । आत्मविद्यया परमात्मविद्ययाऽऽत्मा जीवः शुद्ध्यति मुक्तो भवतीति विचार्य नियुतगवादिकं प्रादादिति । एतेन कालेनेति पद्यं पूर्वोत्तरपद्याभ्यामनन्वितमिति दूषणं निरस्तम् । आत्मविद्ययेत्यतः परमिति विचार्येति विशेषणमङ्गीकृत्य गवादिकं प्रादादिति पूर्वेणान्वय इत्यभ्युपगमात् । अत्र कालेनेत्यादि दृष्टान्तार्थम् । एतेन नियुतगवादिकं कथं प्रादादित्याशङ्कापरिहारोपयोगित्वात्सन्तुष्ट्या दानैर्द्रव्याणि शुद्ध्यन्तीत्येव वक्तव्यं न तु कालेन द्रव्याणि शुद्ध्यन्तीत्यादि इति चोद्यं परिहृतम् । कालादिना यथा द्रव्याणि शुद्ध्यन्ति तथा सन्तुष्ट्या दानैर्द्रव्याणि शुद्ध्यन्तीति दृष्टान्तं वक्तुं कालेनेत्यादिकं प्रवृत्तमित्यूरीकरणात् ॥ ४ ॥

गोपा हृष्टाः सन्तो दधिक्षीरघृताम्बुभिः परस्परमासिञ्चन्तो दधिक्षीरघृताम्बुभिर्नवनीतैश्च परस्परं विलिंपन्तो नवनीतानि परस्परं विचिक्षिपुरिति । एतेन नवनीतानि चिक्षिपुरिति वक्तव्यं नवनीतैश्चिक्षिपुरिति वचनमयुक्तमिति चोद्यं निरस्तम् । नवनीतैरिति तृतीयाबहुवचनस्य नवनीतानीति द्वितीयाबहुवचनान्ततयाऽर्थवशाद्विपरिणाममङ्गीकृत्य नवनीतानि चिक्षिपुरित्यर्थस्योक्तत्वात् ॥ १३ ॥

महामना नन्दस्तेभ्यो गोपेभ्यो भूतमागधबन्दिभ्यश्च वासोलङ्कारगोधनान्पदान् । अदीनात्मोत्कृष्टान्तःकरणो नन्दो येऽन्ये विद्योपजीविनास्तान्वासोऽलङ्कारगोधनैस्तैस्तैः कामैस्तत्तदपेक्षितपदार्थैश्च यथोचितं भवति तथाऽपूजयत् । एतेन तानपूजयदिति वक्तव्यम् । तेभ्योऽपूजयदिति कथनमनुपपन्नमिति दूषणं निरस्तम् । तेभ्य इत्यस्यापूजयदित्यनेनान्वयमनङ्गीकृत्यादादित्यध्याहृतेनान्वयस्योक्तत्वात् । एतेनैव वासोऽलङ्कारगोधनानीति वक्तव्यम् । वासोलङ्कारगोधनैरिति कथनमयुक्तमिति चोद्यं निरस्तम् । वासोऽलङ्कारगोधनैरिति तृतीयाबहुवचनान्तस्य वासोऽलङ्कारगोधनानीति द्वितीयाबहुवचनानन्ततयाऽर्थवशाद्विपरिणाम इत्यङ्गीकारात् ॥ १४ ॥

नन्दः प्रियतममागतं वसुदेवं दृष्ट्वा प्रेमविह्वलःसन् प्राणं प्राप्य देह इव सहसोत्थाय प्रीतः सन् दोर्भ्यां सस्वज इति । एतेन देहस्य प्राणदर्शनाभावात् । प्राणं दृष्ट्वा देह इवेति कथनमनुपपन्नमिति दूषणं परास्तम् । प्राणमित्यस्य दृष्ट्वेत्यनेनान्वयमनङ्गीकृत्याध्याहृतेन प्राप्येत्यनेनान्वयमङ्गीकृत्य प्राणं प्राप्य देहो यथोत्थितो भवति तथा सहसोऽत्थायेत्यर्थस्योक्तत्वात् ॥ २० ॥

पुनर्भवे पुनर्भवतीति पुनर्भवं तस्मिन्संसारचक्रे वर्तमानानां प्रियदर्शनं प्रियाणां दर्शनं दुर्लभमतः

संसारचक्रे वर्तमानो भवानद्य मयोपलब्धः संसारचक्रे वर्तमानोऽहं त्वयोपलब्ध इति च यद्दिष्टयाऽदृष्टप्रेरकेश्वरानुग्रहेणेति ॥ २३ ॥

इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ १०-६ ॥

गिरेत्यस्य गिरमित्यर्थः । एतेन भाषणक्रियां प्रति गिरःकर्मत्वात् । गिरं प्रभाषिणीति वक्तव्यं गिराप्रभाषिणीत्ययुक्तमिति चोद्यं परिहृतम् । गिरेति तृतीया द्वितीयादेश इति स्वीकृत्य गिरेत्यस्य गिरमित्यर्थ इत्युक्तत्वात् ॥ १२ ॥

कृष्णस्यार्भकचेष्टितमित्यस्यार्भकस्य कृष्णस्य चेष्टितमित्यर्थः । तेनार्भकस्येति वक्तव्यमिति दूषणस्यानवकाशः । अर्भकस्येति षष्ठ्याः सुपां सुलुगित्यनेन लुगित्यङ्गीकारात् ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ १०-७ ॥

ते गोपाः, इति रुदितानेन पादेन क्षिप्तमिति यद्बालभाषितं बालानां वाक्यं तन्नोत नैव श्रद्दधिर इति। एतेन बालभाषितमित्यस्य हेतुगर्भत्वात् । बालभाषितं न श्रद्दधिर इत्यनेनैव बालभाषितत्वान्न श्रद्दधिर इत्यर्थस्य लाभादितिशब्दो व्यर्थ इति दूषणं पराकृतम् । इतिशब्दस्य हेत्वर्थकमनङ्गीकृत्य पूर्वोक्तवचनपरामर्शार्थकत्वाङ्गीकारात् । एतेनैवोत शब्दो व्यर्थ इति दूषणं परास्तम् । उत शब्दस्यैवार्थकत्वाङ्गीकारात् ॥ १२ ॥

प्राग्जातेश्चान्वयुञ्जतेत्यस्य प्राग्जातेः प्राग्जातयः प्राक् क्षत्रियादिभ्यः पूर्वं जातिरुत्पत्तिर्येषां ते प्राग्जातयो ब्राह्मणाश्चाशिषोऽन्वयुञ्जत सम्यग्यजुरित्यर्थः । एतेन प्राग्जातयश्चाशिषोऽन्वयुञ्जतेति वक्तव्यं प्राग्जातेश्चान्वयुञ्जतेति कथनमनुपपन्नमिति शङ्का परिहृता । प्राग्जातेरिति षष्ठ्यैकवचनं प्रथमाबहुवचनादेशः । आशिष इत्यस्य शेष इति च स्वीकृत्य प्राग्जातयश्चाशिषोऽन्वयुञ्जतेत्यर्थस्योक्तत्वात् ॥ १८ ॥

यशोदा एनं कृष्णं महापुरुषं नारायणमादध्यौ व्यजानात् । कर्मस्विति सप्तमी तादर्थ्ये । गृहकर्मार्थमाशु जगाम चेति । अयं भावः । यशोदाऽयं कृष्णः साक्षान्नारायण एवेति निश्चित्य शङ्कां परित्यज्य गृहकार्यार्थं जगामेति । एतेन ग्रहादिशङ्कया भगवद्ध्यानं कृतं चेद्ग्रहादिशङ्कापरिहारार्थं पूर्ववद्बहुप्रयत्नः कर्तव्यः । पुत्रं परित्यज्य गृहकार्यार्थं शीघ्रगमनमनुपपन्नमिति चोद्यं निरस्तम् । ग्रहादि शङ्कापरिहारार्थं भगवद्ध्यानं कृतमित्युच्यत इत्यङ्गीकारात् ॥ २१ ॥

स्वबन्धून्प्रणयन्नित्यस्य स्वबन्धून्हर्षं प्रकर्षेण प्रापयन्नित्यर्थः । एतेन स्वबन्धून्हर्षयन्निति वक्तव्यम् ।

प्रणयन्निति कथनमनुपपन्नमिति दूषणं परिहृतम् । हर्षमित्यस्य शेषेण प्रकर्षेण प्रापयन्नित्यर्थस्योक्तत्वात् ॥ ३४ ॥

इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ १०-८ ॥

यतः पापमतिः कंसो देवकीदारकीवचो देवकीकन्यायास्तव पूर्वशत्रुः कचिद्वर्तत इति श्रुत्वा देवक्या अष्टमे गर्भे स्त्रीभवितुं नार्हतीति सदा सञ्चितयन्भवति । तवानकदुन्दुभेः सख्यं मन्यते च । यतश्चाहं यदूनामाचार्यः पुरोहित इति भुवि सर्वतः सर्वदेशेषु ख्यातोऽतो मया संस्तुतं ते सुतं मन्यते मन्येत । अनन्तरं गताशङ्कः सन् हन्ता भवेत्तर्हि तत्तेन हननेन नोऽस्माकं महाननर्थो भवेदिति ॥ ७-९ ॥

रोहिणीपुत्रेण निमित्तेन यदूनामपृथग्भावादपृथक्त्वात् । एकविषयमिति मत्वेति यावत् । ज्ञानिनो रोहिणीपुत्रम् । उतशब्दश्चार्थे । संकर्षणमुत सङ्कर्षणनामकं चोशन्तीच्छन्तीति । एतेनापृथक्त्वस्य यदुनिष्ठत्वेन संकर्षणनिष्ठत्वाभावाद्यदूनामपृथग्भावात्सङ्कर्षणमुशन्तीति कथनमनुपपन्नमिति दूषण-मपास्तम् । यदुनिष्ठापृथक्त्वहेतुं रोहिणीपुत्रात्सङ्कर्षणवाच्यत्वे निमित्तमित्युच्यत इत्यभ्युपगमात् ॥१३॥

तद्वदतिशयेन दध्यादिस्वीकारोपायवित्कृष्णो यर्हि यस्मिन्काले गोप्यो गृहकृत्येषु सुव्यग्रचित्ता भवन्ति तस्मिन्काले ध्वान्तागारे धृतमणिगणं स्वांगमर्थप्रदीपं दध्यादियुक्तभाण्डलक्षणार्थज्ञानहेतुं कृत्वा दध्यादौ हस्ताग्राह्ये हस्तेन गृहीतुमशक्ये सति शिक्यभाण्डेषु शिक्यस्थापितभाण्डेष्वन्तर्निहितानां स्थापितानां दध्यादीनां चयुनार्यं ज्ञानार्थम् । छिद्रमित्यतः परं कृत्वेत्यादीनां शेषः । छिद्रं कृत्वा छिद्रेण शिक्यभाण्डस्थितदध्यादिकं ज्ञात्वा दध्यादि प्राप्त्यर्थं पीठकोलूखलाद्यैर्विधिमुपायं रचयति करोतीति । एतेन तद्विदिति वक्तव्या । तद्वदिति कथनमनुपपन्नमिति चोद्यं परिहृतम् । तृतीयोऽतिशय इत्यनेनातिशयार्थतद्विदितीकारस्याकारादेशे तद्वदिति रूपं निष्पन्नमित्यभ्युपेत्य तद्वद्वित्यस्यातिशयेन दध्यादिस्वीकारोपायज्ञानवानित्यर्थ इत्युक्तत्वात् । एतेनैवान्तर्निहितज्ञानार्थमित्यर्थलाभार्थमन्तर्निहित-वयुनार्थमिति वक्तव्यम् । अन्तर्निहितवयुन इति सप्तमीप्रयोगोऽनुपपन्न इति चोद्यं पराकृतम् । अन्तर्निहितवयुन इति सप्तमी तादर्थ्ये इत्यभ्युपगमात् ॥ ३० ॥

क्रीडामनुजबालक इत्यस्य क्रीडाप्रदर्शनार्थं मनुजानां बालक इत्यर्थः । एतेन क्रीडार्थमिति चापर इत्यादिना परमेश्वरप्रवृत्तिः क्रीडार्थमिति पक्षस्य दूषितत्वात्क्रीडामनुजबालक इत्यनुपपन्नमिति चोद्यं परास्तम् । क्रीडाशब्देन क्रीडाप्रदर्शनं गृहीत्वा क्रीडामनुजबालक इत्यस्य क्रीडाप्रदर्शनार्थं मनुजबालक इत्यर्थ इत्युक्तत्वात् ॥ ३५ ॥

औत्पत्तिक आत्मयोग इत्यस्य स्वाभाविकः परमात्मप्रसादाधीनाणिमादियोग इत्यर्थः ।

एतेनात्मेत्येतद्व्यर्थमिति दूषणं परिहृतम् । अन्यत्राविद्यमान औत्पत्तिको योगः कृष्णस्य कथमागत इत्याशङ्कापरिहारार्थमौत्पत्तिकयोगस्य भगवत्प्रसादाधीनत्वमुच्यत इत्यभ्युपगमात् ।। ४० ।।

इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ।। १०-९ ।।

न चान्तरित्यस्य भगवतोऽन्तः किमपि न चैवास्तीत्यर्थः । सर्वापेक्षया भगवानेवाणुर्भगवदपेक्षयाऽन्योऽणुपदार्थो नास्तीति भावः । एतेन सर्वजगतो भगवतोऽन्तर्विद्यमानत्वाद्भगवतोऽन्तः किमपि नास्तीति कथनमयुक्तमिति चोद्यं निरस्तम् । भगवदपेक्षया सर्व पदार्थानां स्थूलत्वं नाणुत्वमित्यत्र तात्पर्यमित्यभ्युपगमात् ।। १३ ।।

गोप्यो यशोदाविमुक्तिदात्कृष्णाद्यं प्रसादं प्राप्तास्तत्तमिमं प्रसादं विरिञ्चो ब्रह्मा पुत्रोऽपि न लेभिरे न लेभे । भवो रुद्रः पौत्रोऽपि न लेभे । श्रीर्महालक्ष्मीरङ्गसंश्रया भार्याऽपि न लेभे इत्यविद्यमानविषयकीर्तिं यशोदायाः कृष्णो दैत्यमोहनार्थं व्यञ्जयामासेति । एतेन गोप्यो ब्रह्माद्यपेक्षयाऽधिकप्रसादस्याप्राप्तत्वात् । गोपी ब्रह्माद्यपेक्षयाऽधिकं प्रसादं प्रापेति वचनमनुपपन्नमिति दूषणं परिहृतम् । इत्यविद्यमानविषयकीर्तिमित्यादीनां शेषेण इत्यविद्यमानविषयकीर्तिं यशोदायाः कृष्णो दैत्यमोहनार्थं व्यञ्जयामासेत्यर्थस्योक्तत्वात् ।। २० ।।

इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ।। १०-१० ।।

भूतध्रुक् स्वार्थं किं कुरुते । किमाक्षेपे । स्वार्थं न कुरुते । भूतध्रुक् स्वार्थं वेद किं न वेद प्रत्युत स्वानर्थं कुरुते । स्वानर्थं न वेद चेति शेषः । तत्र हेतुमाह ।। **निरय इति** । यतो यस्मात्कारणाद्भूतद्रोहान्निरयो भवति तस्माद्भूतध्रुक् स्वानर्थं कुरुते न वेद चेति । यद्यपि भूतध्रुक् ऐहिकं स्वार्थं कुरुते वेद च तथा चैहिकार्थस्याल्पत्वादविवक्षामाश्रित्य भूतध्रुक् स्वार्थं न कुरुते न वेदेत्युक्तमिति द्रष्टव्यम् ।। १० ।।

काकुस्वरविशिष्टं स्यादित्येतत्सर्वत्र सम्बध्यते । किं शब्द आक्षेपे । देहोऽत्र दातुः स्यात् । अन्नदातुर्न भवतीत्येतत्किम् । न । किं त्वन्नदातुर्भवत्येव । देहो निषेक्तुः स्यादिति किं निषेक्तुर्नेति न किं तु निषेक्तुर्न भवत्येव । वाशब्दोऽप्यर्थे । देहो मातुरपि स्यादेव किं मातुरपि नैवेति किम् । मातुरपि स्यादेव । देहो मातुः पितुर्वा मातुः पितुरपि स्यात्किं मातुः पितुरपि नेति । न । किन्तु मातुः पितुरपि भवत्येवं । देहे बलिनः स्यात्किं बलिनो नेति । न । किन्तु बलिनो भवत्येव । देहः क्रेतुः स्यात्किं क्रेतुर्नेति । न । किंतु क्रेतुर्भवत्येव । देहोऽग्नेः स्यात्किमग्नेर्नेति । न । किं त्वग्नेर्भवत्येव । शुनोऽपि वेति । वाशब्द एवार्थे । देहः शुनोऽपि स्यात्किं शुनोऽपि नैवेति । न किन्तु शुनोऽपि भवत्येव । एवं

साधारणमव्यक्तप्रभवाप्ययं देहे को विद्वानात्मसात्कृत्वाऽऽत्ममात्राधीनं ज्ञात्वाऽसतोऽसज्जना नृते जन्तून्हन्तीति । एतेन देहस्य साधारण्येनोपपादनार्थं देह आत्मदात्रादीनां न स्यादिति वक्तव्यं देहः किमन्नस्य स्यादित्यादिना । अन्न दातादीनां न भवतीति कथनमनुपपन्नमिति दूषणं निरस्तम् । स्याच्छब्दस्य निषेधार्थककाकुस्वरविशिष्टत्वं किं शब्दस्याक्षेपार्थत्वं चाङ्गीकृत्य द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति न्यायमाश्रित्य देहोऽन्नदात्रादीनां न भवतीति न किं त्वन्नदात्रादीनां भवत्येवेत्यर्थस्योक्तत्वात् ॥ ११ ॥

असत उपाधितोऽसतोऽत एव श्रीमदान्धस्य भाग्यमदेन ज्ञानरहितस्य दारिद्र्यं परमुत्कृष्टमञ्जनं ज्ञानसाधनमिति । अयं भावः । यस्यासत्त्वमौपाधिकं तस्य भाग्येन मद आन्ध्यं च भवति । दारिद्र्यप्राप्तावान्ध्यं च गच्छति । यस्यासत्त्वं स्वाभाविकं वौपाधिकं वा नास्ति तस्य भाग्येन मदो बाध्यं वा न भवति । आन्ध्यं परिहारार्थं दारिद्र्यं च नापेक्षितमिति । एतेन सतां दारिद्र्यप्राप्तावप्यान्ध्यनिवृत्तेरभावादसतो दारिद्र्यं परमाञ्जनमिति कथनमनुपपन्नमिति दूषणं पराकृतम् । उपाधित इत्यस्य शेषेण यस्यौपाधिकमसत्त्वं तस्य दारिद्र्यं परमाञ्जनमित्यर्थस्योक्तत्त्वात् ॥ १४ ॥

स्वात्मना गृह्यमाणस्त्वं विकाराभिमानिभिर्ब्रह्मादिभिः प्राकृतैर्गुणैः प्रकृतिकार्यसत्त्वरजस्तमोभिमानिश्रीभूदुर्गाभिरग्राह्यः । तदेवोपपादयति ॥ **क इति** । गुणसंस्थितेर्गुणानां गुणाभिमानिश्रीभूदुर्गाणाम् । उपलक्षणमेतत् । विकाराणां च विकाराभिमानिब्रह्मादीनां च संस्थितेरुत्पत्तेः प्राक् सिद्धं त्वामिह जगति कोऽनु सम्यक् । साकल्येनेति यावत् । किं ज्ञातुं अर्हति । न कोऽपीति । किञ्चित्ज्ञानं लक्ष्म्यादीनामस्तीति भावः । गुणानां प्रकृतिजन्यत्वेन विकारित्वेऽपि पृथग्ग्रहणं महदाद्यपेक्षयाऽऽल्पविकारित्वज्ञापनार्थम् । तदुक्तं मधुश्छन्दसशाखायाम् । कार्याकार्या गुणास्तिस्रोऽतः स्वल्पोद्भवोऽजनाविति । तिस्र इति लिङ्गव्यत्ययः छान्दसः ॥ ३३ ॥

इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ १०-११ ॥

शकटान्युङ्ध्व माचिरमित्यस्याचिरं शीघ्रं शकटानायुङ्ध्वमित्यर्थः । एतेन शीघ्रं शकटान्युङ्ध्वमिति वक्तव्यम् अचिरं शकटान्युङ्ध्वमिति कथनमयुक्तमिति दूषणं परिहृतम् । युङ्ध्वं आ अचिरमिति पदच्छेदमङ्गीकृत्य आ इत्यस्य युङ्ध्वं इत्यनेनान्वयमङ्गीकृत्याचिरं शीघ्रं शकटानायुङ्ध्वमित्यर्थस्योक्तत्वात् ॥ १८ ॥

अच्युतः कृष्णो वत्सासुरस्यापरपादाभ्यां सह लाङ्गूलं गृहीत्वा वत्सासुरं भ्रामयित्वा गतजीवितं कृत्वा कपित्थाग्रे प्राहिणोत्स्थापितवानिति । एतेन गतजीवितमित्येतदनन्वितमिति दूषणं परास्तम् । कृत्वेति शेषेणान्वयस्योक्तत्वात् ॥ ४३ ॥

समीडिरे चानकशङ्खसंस्तवैरित्यस्यानकशङ्खसंस्तवैः समीडिरे पूजयाञ्चक्रुश्चेत्यर्थः । एतेनानकशङ्खानां स्तुतिसाधनत्वाभावात् आनकशङ्खसंस्तवैः स्तुतिं चक्रुरिति कथनमनुपपन्नमिति दूषणं परास्तम् । धातूनामनेकार्थत्वेन ईड धातोः पूजार्थत्वमङ्गीकृत्य समीडिर इत्यस्य पूजयांचक्रुरित्यर्थस्योक्तत्वात् ॥ ५२ ॥

बालस्यास्य कृष्णस्य मरणार्थं बहुमृत्यवो मरणहेतव आगता अभवन् । यतो यैर्मृतिहेतुभिरन्येषां बालानां पूर्वं भयं मरणभयम् मरणमिति यावत्, कृतं तेषामपि विप्रियं मरणदुःखमासीत् । अहो बत अत्याश्चर्यमिति । एतेन कृष्णस्य मरणाभावात् । अस्य कृष्णस्य बहवोमृत्यवोऽभवन्नित्येतदनुपपन्नमिति दूषणं निरस्तम् । मृत्युशब्देन मरणहेतूनां ग्रहणात् । एतेनेवास्य मरणार्थं मरणहेतव आगता अभवन्निति वक्तव्यम् अस्य मृतिहेतवोऽभवन्निति कथनमनुपपन्नमिति चोद्यं पराकृतम् । मरणार्थम् आगता इत्यनयोः शेषेण मरणार्थं मृतिहेतव आगता अभवन्नित्यर्थस्योक्तत्वात् । एतेनैव कृष्णस्य भयाभावेन यैः पूर्वं कृष्णस्य भयं कृतमिति वचनमनुपपन्नमिति चोद्यं परिहृतम् । अन्येषां बालानामित्यस्य शेषेण यैरन्येषां बालानां पूर्वं भयं कृतमित्यर्थस्योक्तत्वात् ॥ ५५ ॥

इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ १०-१२ ॥

रमालालितपादपल्लवः श्रीकृष्णो ग्राम्यैर्मूर्खजनैः समं सह ग्राम्यजनवन्मूर्खजनवद्रेमे । एवमीशचेष्टितमीशस्य सर्वेशस्य कृष्णस्य चेष्टितमिति चित्रमिति । एतेनेशचेष्टितमित्येतदनन्वितमिति दूषणं परास्तम् । एवमिति चित्रमित्यनयोः शेषेणान्वयस्योक्तत्वात् ॥ १८ ॥

रामकेशवयोः सखा श्रीदामा नाम गोपालः । सुबलाशोककृष्णाद्यानित्यत्र कृष्णशब्देन कृष्णादन्यः कृष्णनामा कश्चन विवक्षितः । सुबलाशोककृष्णाद्यान्गोपालानुद्दिश्य तेषां प्रेरणया । तेषां फलभोगार्थमिति यावत् । रामकृष्णौ प्रति प्रेम्णेदमब्रवीदिति । एतेन रामेत्यादिना रामकृष्णयोरेव सम्बोधनाद्रामकृष्णावब्रवीदिति वक्तव्यं न तु सुबलादीनब्रवीदिति वक्तव्यमिति चोद्यं परास्तम् । उद्दिश्य रामकृष्णावित्यनयोः शेषेण सुबलाशोककृष्णाद्यानुद्दिश्य रामकृष्णावब्रवीदित्यर्थस्योक्तत्वात् । सुबलादीनां प्रेरणयोक्तत्वादेव सुहृद्वचः श्रुत्वेत्यनेन रामरामेत्यादिवचनस्य सुबलादि सर्वसुहृत्सम्बन्धत्वं वक्ष्यति ॥ २० ॥

पक्षिसङ्घविवर्जितमित्यस्य पक्षिसङ्घैर्विवजितमित्यर्थः । एतेन पक्षिसङ्घैर्विवर्जितत्वस्य वनविशेषणत्वात्पक्षिसङ्घैर्विवर्जितमिति वक्तव्यम् पक्षिसङ्घविवर्जितमिति कथनमनुपपन्नमिति दूषणं परिहृतम् । विवर्जितैरिति तृतीयाबहुवचनं विवर्जितमिति प्रथमवचनादेश इत्यङ्गीकारात् ॥ २४ ॥

यथायोगादित्येतत् यथामनोयोगं यथाकाममिति यावदिति व्याख्येयम् ।। ४४ ।।

इति भागवतटिप्पण्यां त्रयोदशोऽध्यायः ।। १०-१३ ।।

हे ब्रह्मन् । गोपालोदारचरितं गोपालेभ्य उदारस्योत्कृष्टस्य कृष्णस्य चरितम् । सर्पनिग्रहानन्तरं भाविसर्पानुग्रहादिचरितं कथ्यतामिति पूर्वेण सम्बन्धः । कृष्णमाहात्म्यं पुनः पुनः कुतो वक्तव्यमित्यत आह ।। **भगवत इति** । भूम्नः पूर्णस्य स्वच्छन्दानुवर्तिनः स्वेच्छानुसारेण प्रवर्तमानस्य तस्य भगवतोऽमृतं कथामृतं जुषन् कस्तृप्येतत् न कोऽपीति । एतेन भगवत इत्यादिषष्ठ्यन्तानां भिन्न-पदत्वात् । गोपालस्येति वक्तव्यं गोपालोदारचरितमिति समस्तपदप्रयोगोऽनुपपन्न इति दूषणं परिहृतम् । गोपालोदारचरितमित्यस्य कथ्यतामित्यनेनान्वयः । भगवत इत्यादीनाममृतमित्यनेनान्वय इत्युक्तत्वात् । एतेनैव भगवान् कथमहिं न्यगृह्णादिति प्रश्नवत् भगवान् कथमहिमन्वगृण्हादित्यादि-प्रश्नोऽपि कर्तव्य इति चोद्यं परिहृतम् । गोपालोदारचरितमित्यस्य कथ्यतामित्यनेनान्वयमङ्गीकृत्यानु-गृण्हादिप्रश्नो लब्ध इत्यभ्युपगमात् ।। ३ ।।

गाढरशन इत्यस्य गाढा दृढा रशना कटिप्रदेशो यस्यासौ गाढरशन इत्यर्थः । दृढया रशनया कटिं बबन्धेति भावः ।। ६ ।।

पुष्पैः स्तुतोऽथ भगवान् पुरुषः पुराण इत्यस्य पुरुषः पुराणो भगवान्देवादिभिः पुष्पैर्वृष्टः । अथशब्दः समुच्चये । स्तुतश्चेत्यर्थः । एतेन पुष्पैः स्तुत इत्यनुपपन्नमिति दूषणं परिहृतम् । देवादिभि-र्वृष्ट इत्यनयोः शेषमङ्गीकृत्य देवादिभिः पुष्पैर्वृष्टः, स्तुत इत्यर्थस्योक्तत्वात् ।। २९ ।।

कायं निधाय भुवि भूतपतिं प्रणेमुरित्यस्य जले दण्डवत्कायं निधाय दुष्टनिग्रहार्थं भुव्यवतीर्णं भूतपतिं भूतानां ब्रह्मादीनां पतिं प्रणेमुरित्यर्थः । एतेन नागपत्नीनां जले विद्यमानत्वाद्भुवि कायं निधाय प्रणेमुरिति वचनमनुपपन्नमिति दूषणमपास्तम् । दुष्टनिग्रहार्थमवतीर्णमित्यनयोः पदयोः शेषमङ्गीकृत्य भूतपतिरत्र कुत आगत इत्याशङ्कापरिहारार्थं दुष्टनिग्रहार्थं कृष्णो भुव्यवतीर्ण इत्युच्यत इत्यभ्युपगमात् ।। ३२ ।।

त्वत्पादरजः प्रपन्नाः कृष्णपादरजः प्रपन्नाः, अपुनर्भवं, मोक्षवान्भवतीत्युक्त्या संसारे ये कृष्ण-पादरजः प्रपन्नास्तत्सुखापेक्षयाऽल्पाधिकारिणां मोक्षसुखमल्पमित्युक्तं भवति । एतेन सर्वसुखापेक्षया मोक्षसुखस्याधिकत्वात् त्वत्पादरजः प्रपन्ना मोक्षं वा न वाञ्छन्तीत्यनुपपन्नमिति दूषणं निरस्तम् । अपुनर्भवशब्देनाल्पाधिकारिमोक्षस्य विवक्षितत्वात् ।। ता. अर्थः ।। अपुनर्भवमात्रान्मोक्षमात्रात् । अल्पाधिकारिमोक्षसुखादिति यावत् । उत्तमाधिकारिभिः संसारप्राप्तं हरिसामीप्यमुत्तमसुखजनकम् ।

तत्रापि हरिसामीप्यप्राप्तेष्वपि यैरुत्तमाधिकारिभिः संसारे स्पर्शयोग्यत्वं हरिपादस्पर्शयोग्यत्वं प्राप्तं तेषां सुखमधिकं संसारे हरिपादस्पर्शप्राप्तानां सुखमधिकमिति किमु वक्तव्यमिति वेदविदो यथावेदार्थविदो विदुरिति ॥ ३७ ॥

पुमानित्यस्य चेतन इत्यर्थः । एतेन पुमान् स्त्री चेति वक्तव्यमिति दूषणस्यानवकाशः ॥ ५३ ॥

इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ १०-१४ ॥

मायामनुजमित्यस्येच्छयैव मानुषवेषं न तु कर्मणेत्यर्थः ॥ २३ ॥

इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ॥ १०-१५ ॥

द्रुमपिप्पलमण्डितमित्यस्य द्रुमैर्नानाद्रुमैः पिप्पलैश्च मण्डितमित्यर्थः । प्राचुर्यात्प्राधान्याच्च पिप्पलानां पृथग्ग्रहणम् । एतेन पिप्पलानां द्रुमत्वस्य सिद्धत्वात् द्रुमेत्येतद्व्यर्थमिति दूषणमपास्तम् । पिप्पलातिरिक्तनानावृक्षा अपि वर्तन्त इति वक्तुं द्रुमेत्युक्तमित्यभ्युपगमात् ॥ ३ ॥

इति श्री भागवतटिप्पण्यां षोडशोऽध्यायः ॥ १०-१६ ॥

एतेन कृष्णरामावित्यनयोः सम्बोधनैकवचनान्तत्वात् त्वमर्हसीति वक्तव्यमर्हथ इति द्विवचनप्रयोगोऽनुपपन्न इति दूषणं परिहृतम् । त्वमिति शब्दद्वयानन्तरमित्येतौ युवामित्यध्याहृत्यार्हथ इति द्विवचनेनान्वयस्योक्तात् ॥ ९ ॥

सर्वधर्मज्ञेत्यस्य त्वं सर्वाधारकज्ञानसंपन्न इत्यर्थः । एतेन सर्वधर्मज्ञेत्येतद्व्यर्थमिति दूषणस्यानवकाशः । सर्वपरित्यागेन मत्प्रार्थनं कुतः क्रियत इत्याशङ्कापरिहारार्थं सर्वाधारकत्वेन निश्चयो रक्षणं त्वया कर्तव्यमिति प्रार्थनहेतुत्वेनोच्यत इत्यूरीकरणात् ॥ १० ॥

योगमायानुभावितमित्यस्य योगिभिर्योगमायया योगसामर्थ्येनानु सम्यग्भावितं ध्यातमित्यर्थः । एतेन योगमायानुभावितमित्येतद्व्यर्थमिति दूषणं निरस्तम् । यद्योगवीर्यं योगिभिरपि योगसामर्थ्येन ध्यातमेव न तु द्रष्टुं तद्वीर्यं गौपालैर्दृष्टमिति वक्तुं योगमायानुभावितमिति विशेषणं सार्थकमिति स्वीकरणात् ॥ १४ ॥

गोपास्तयोः कृष्णरामयोः तयोस्तदद्भुतकर्म, स्त्रीभ्यः समाचख्युः प्रलम्बवधमेव चेति श्लोकस्तस्यार्थः । गोपास्तयो कृष्णरामयोस्तदद्भुतं कर्म स्त्रीभ्यः समाचख्युः । एतदेव विवृणोति ॥ **दावाग्नेरिति ।** गोपा आत्मन आत्मनां कृष्णस्य दावाग्नेर्मोक्षं मोक्षसाधनं कर्म रामस्य च प्रलम्बवधसाधनं कर्मैव स्त्रीभ्यः समाचख्युरिति । दावाग्नेर्मोक्षः प्रलम्बवध इत्युभयं प्रति कृष्णस्य हेतुत्वं रामस्य

प्रलम्बवधं प्रत्येव हेतुत्वमिति ज्ञापयितुं प्रलम्बवधमेवेत्येवशब्दः प्रयुक्तः । कृष्णस्य प्रलम्बवधं प्रति हेतुत्वं रामनिष्ठशुक्लकेशरूपेणेति द्रष्टव्यम् । एतेन दावाग्निं गोपमोक्षस्योभयकर्तृत्वाभावात्तयोर्दावाग्नेर्मोक्षं कर्म समाचख्युरिति कथनमनुपपन्नमिति चोद्यं परिहृतम् । गोपा इत्यादीनामावृत्तिं स्वीकृत्य तयोः कर्म समाचख्युरित्येतद्विवरणरूपत्वं दावाग्नेरित्यादेरित्यभ्युपगमात् । एतेनैव दावाग्निमोक्षस्य गोपाल-निष्ठत्वेन कृष्णनिष्ठत्वाभावात् कृष्णस्य दावाग्नेर्मोक्षं कर्मेत्यनुपपन्नं प्रलम्बवधस्य प्रलम्बनिष्ठत्वेन रामनिष्ठत्वाभावात् रामस्य प्रलम्बवधं कर्मेति चानुपपन्नमिति चोद्यं परास्तम् । मोक्षशब्देन मोक्षसाधनं ग्राह्यम् । प्रलम्बवधशब्देन प्रलम्बवधसाधनं ग्राह्यमित्यभिप्रायात् ।। १७ ।।

इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ।। १०-१७ ।।

सविद्युत्स्तनयित्नुभिर्विद्युद्गर्जनसहितैः सान्द्रनीलाम्बुदैर्जलनिबिडनीलमेघैराच्छन्नोऽस्पष्टज्योति-रस्पष्टसूर्यादिज्योतिर्व्योम बभौ । अत्र दृष्टान्तमाह ।। **ब्रह्मेति** । सविद्युत्स्तनयित्नुभिर्विद्युद्गर्जनाभिमानि-देवतासहितैः सान्द्रनीलाम्बुभिमानिदेवैराच्छन्नं युक्तमस्पष्टज्योतिरस्पष्टसूर्यादिज्योतिः सगुणं गुणकार्य-शरीरसहितं ब्रह्मेव चतुर्मुखाख्यं ब्रह्म यथा बभौ तथेति । चतुर्मुखज्योतिषा सूर्यादिज्योतिषां तिरोहितत्वादस्पष्टत्वाज्ज्योतिरित्युक्तम् ।। २ ।।

यथा कलौ युगे पाखण्डाः पापेन भान्ति । वेदा वैदिकाः । हिशब्दोऽवधारणे । न हि नैव भवन्तीति । एतेन पाखण्डा इत्यनेनावैदिकानां गृहीतत्वात् वैदिका इति वक्तव्यम् वेदा इति कथनमयुक्तमिति चोद्यं पराकृतम् । वेदा येषामर्थे सन्तीत्यर्थे वेदशब्दान्मत्वर्थीयाच् प्रत्यये कृते वेदा इत्यनेन वैदिका इत्यर्थो लभ्यत इत्यूरीकरणात् ।। ६ ।।

उडुपश्चन्द्रः स्वज्योत्स्नाराजितैः स्वचन्द्रिकया किञ्चित्प्रकाशमानैर्मेघैः छन्नः सन् न रराज । अत्र दृष्टान्तमाह ।। **अहंमत्येति** । पुरुषः स्वभासाः स्वरूपज्ञानेन भासितया प्रकाशमानेन । स्वरूप-ज्ञानमाश्रितेनेति यावत् । अहं मत्या । अहमित्युपलक्षणम् । अहं ममेति ज्ञानेन युक्तः स तु यथा न राजत इति । वृत्तिज्ञानस्य स्वरूपज्ञानमिश्रितत्वं तु जडजत्वान्मानमुक्तं पृथग्धीत्यादिनाऽऽचार्यैरुक्तं मानं ज्ञानम् ।। १७ ।।

प्रमुदिताः सन्तुष्टा गोपाला वनौकसः प्राणिनो ददृशुः । मधुश्च्युतो वनराजीर्वनपङ्क्तीर्ददृशुः । हरेः सिंहस्य गभीरसन्नादसन्नादा गम्भीरसन्नादेन सन्नादविशिष्टा गुहा ददृशुरिति । एतेन ददृशुरिति क्रियायाः कर्तारो नोक्ता इति शङ्कानवकाशः । प्रमुदिता इत्यनेन योग्यतया गोपालान्गृहीत्वा तेषां कर्तृत्वमित्यङ्गीकारात् ।। २५ ।।

शरदागमे शरदागमने सति समुद्रः समुद्रेकात्कारणात्समुद्रस्य तटादिर्निश्चलाम्बुः सन् तूष्णीमघोषोऽभूदिति । एतेन समुद्रस्य सर्वदा चलनघोषविशिष्टत्वात् शरदागमने समुद्रो निश्चलाम्बुस्तूष्णी मभूदिति कथनमनुपपन्नमिति दूषणं परिहृतम् । समुद्रशब्देन प्रसिद्धसमुद्रस्याग्रहणात् समुद्रो न व्यचोदध इतिवत् । समुद्रेकात्समुद्राख्यप्रकृतिर्वचोऽपि किं प्रभावं नैव दधुरिति । तस्यार्थः । समुद्रेकात् समुद्राख्यप्रकृतिश्च महत्वत इति ऋग्भाष्योक्तेः ॥ ३८ ॥

इति श्रीभागवतटिप्पण्यामष्टादशोऽध्यायः ॥ १०-१८ ॥

हे गोप्यः । यः सरसाग्र्यगेयं सरसा ज्ञानरसेन सहितास्तेषामग्र्यैर्गेयं स्तुत्यम् । दामोदराधररसं दामोदरस्य कृष्णस्याधरोष्ठरसं स्वयमेव भुङ्क्ते । यदवशिष्टरसौघमार्गे यत्पीतावशिष्टो दामोदररसौघो यस्मिन् यदवशिष्टरसौघः । यदवशिष्टरसोघश्चासौ मार्गश्च यदवशिष्टरसौघमार्गस्तस्मिन्यदवशिष्टरसौघमार्गे विद्यमानाः सदर्भास्तरवोऽस्मद्वयस्येन वेणुना दामोदराधरोष्ठरसपानं कृतमिति सन्तोषेण हृष्टत्वचः सन्तोऽश्रुं मुमुचुः । सोऽयं वेणुः किं कुशलं पुण्यमाचरत्स्मेति । अत्र वेण्वादिशब्देन वेण्वादिजीवा ग्राह्यास्तेनाचेतनानां वेण्वादीनां कथं दामोदराधरोष्ठरसपानादिकमिति शङ्काऽनवकाशः । अचेतनेषु चेतनानां प्रवेशेन दामोदराधरोष्ठरसपानादिकमसम्भावितमित्याशङ्क्या चेतनेषु वेण्वादिषु प्रवेशेन चेतनानां महालक्ष्म्यादीनां दामोदराधरोष्ठरसपानमस्ति । अतो नासम्भावितमिति परिहारमभिप्रेत्याचेतनेषु वेण्वादिषु प्रवेशेन चेतनानां लक्ष्म्यादीनां दामोदराधरोष्ठरसपानमस्तीत्यस्मिन्नर्थे तात्पर्यमुक्तम् । तस्यार्थः । देवी श्रीकृष्णमुखाम्बुजे विद्यमानं वेणुमाविश्य रेमे । तद्गतं वेणुगतं गीतं गानाभिव्यक्तकृष्णाधरोष्ठरसं पपौ च । सुरा इतरभाण्डगा वेण्वितरपाञ्चजन्यशङ्खादिभाण्डं प्रविष्टाः पाञ्चजन्यशङ्खादिगतकृष्णाधरोष्ठरसं पपुरिति । एतेन वेणुशब्देन लक्ष्मीग्रहणे तस्या भार्यात्वेन कृष्णाधरोष्ठरसपानस्य युक्तत्वेनासम्भावितत्वाभावाद्वेणुः किं कुशलमाचरदिति प्रश्नोऽनुपपन्न इति चोद्यं परास्तम् ॥ १० ॥

पूजां दधुर्विरचितां प्रणयावलोकैरित्येतत् प्रणयावलोकैः स्नेहसहितावलोकैर्विरचितां कृतां पूजां दधुर्धृतवत्यो न त्यक्तवत्य इति यावदिति व्याख्येयम् । एतेन कृतस्य करणायोगात् प्रणयावलोकैः कृतां पूजां चक्रुरिति कथनमनुपपन्नमिति दूषणं परिहृतम् । दधुरित्यस्य चक्रुरित्यर्थ इत्यनङ्गीकारात् ॥१२॥

कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषांऽबुद आतपत्रमित्यस्याम्बुदो मेघः सख्युः कृष्णस्य स्ववपुषा स्वदेहेनातपत्रं छत्रं व्यधात् । कुसुमावलीभिर्वृष्टिं च व्यधादित्यर्थः । एतेन कुसुमावलीभिरित्येतदनन्वितमिति दूषणं निरस्तम् । वृष्टिमित्यस्य विशेषेण कुसुमावलीभिर्वृष्टिं व्यधादित्यन्वयस्योक्तत्वात् ॥ १७ ॥

तद्दर्शनस्मररुजः कृष्णदर्शननिमित्तककामरोगयुक्ताः पुलिंद्यो दयितास्तनमण्डितेन दयितास्तन-मण्डितं दयिताया भार्याया महालक्ष्म्यास्तनयोर्मण्डितमलङ्कारभूतं तृणरूषितेन तृणरूषितं सञ्चारसमये तृणेषु सम्बन्धमुरुगायपदाब्जरागश्रीकुङ्कुमेनोरुगायकृष्णपदाब्जसम्बन्धरागशोभाविशिष्टं कुङ्कुममान-नकुचेषु लिंपंत्यस्तदाधिं कामोत्पन्नाधिं जहुरतः पूर्णाः कृतकृत्या इति । एतेन गोपीरमणस्य तद-भावात् दयितास्तनमण्डितेत्यनेनानुपपन्नमिति दूषणं परिहृतम् । दयिताशब्देन गोपीनामग्रहणात् । एतेनैव लेपनक्रियां प्रति कुङ्कुमस्य कर्मत्वात् कुङ्कुममित्यादिद्वितीयाप्रयोगः कर्तव्यः । तृतीया-प्रयोगोऽनुपपन्न इति चोद्यं प्रत्युक्तम् । कुङ्कुमेनेत्यादि तृतीया द्वितीयादेश इत्यङ्गीकारात् ॥ १८ ॥

इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः ॥ १०-१९ ॥

कुमार्यः! इयं स्त्री नन्दस्नुषा भूयादित्युक्त्वा भद्रकालीं समानर्चुरिति । एतेन नन्दस्नुषा इतीत्यत्र नन्दस्नुषाशब्दस्य बहुवचनान्तत्वाद्भूयादित्येकवचनान्तप्रयोगोऽनुपपन्न इति दूषणस्यानवकाशः । नन्दस्नुषा इतीत्यत्र विवक्षाभावात्सन्ध्यभाव इत्यङ्गीकृत्य नन्दस्नुषा इत्येकवचनान्त इत्यभ्युपगमात् । एतेनैव भूयान्नन्दस्नुषा इतीति वाक्यं कुमारीवाक्यत्वादुत्तमपुरुषप्रयोगः कर्तव्यः भूयादिति प्रथम-पुरुषप्रयोगोऽनुपपन्न इति चोद्यमपास्तम् । इयं स्त्री नन्दस्नुषा भूयादिति परोक्षनिर्देशं कृत्वा सर्वाभिः कुमारीभिः प्रत्येकं प्रार्थितमित्यभ्युपगमात् ॥ ७ ॥

इति श्रीभागवतटिप्पण्यां विंशोऽध्यायः ॥ १०-२० ॥

हे महाबाहो राम राम । त्वं, दुष्टनिबर्हण कृष्ण त्वमित्येतौ युवामेषा क्षुन्नोऽस्मान्बाधत इत्येतद्धै स्पष्टम् । अतस्तच्छान्तिं क्षुच्छान्तिं कर्तुमर्हथ इति । एतेन रामकृष्णेत्यनयोः सम्बोधनैकवचनान्तत्वात् त्वं तच्छान्तिं कर्तुमर्हसीति वक्तव्यम् अर्हथ इति द्विवचनप्रयोगोऽनुपपन्न इति शङ्का परिहृता । त्वमिति शब्दद्वयानन्तरमित्येतौ युवामित्यध्याहृत्यार्हथ इति द्विवचनेनान्वयस्योक्तत्वात् ॥ १ ॥

प्राणादयो यत्संपर्काद्यस्य परमेश्वरस्य संपर्कात्प्रियाः प्रीतिविषया अभवन् । ततः परमेश्वराद-परोऽन्यो ज्ञानिनां कः प्रियो न कोऽपि किन्तु भगवानेव प्रिय इत्येतन्नु निश्चितमिति । एतेन सर्वेषां भगवति प्राणाद्यपेक्षयाऽधिकप्रीतेरभावात् भगवान्सर्वापेक्षयाऽधिकप्रिय इति कथनमयुक्तमिति दूषणं निराकृतम् । ज्ञानिनामिति शेषः । प्राणादिनिष्ठप्रियत्वं भगवत्संपर्कजन्यमिति ज्ञानिनां भगवान्सर्वा-पेक्षयाऽधिकप्रिय इत्यत्रोच्यत इत्यभ्युपगमात् ॥ २७ ॥

इति श्रीभागवतटिप्पण्यामेकविंशोऽध्यायः ॥ १०-२१ ॥

साधूनामिह वक्तव्यार्थेषु गोप्यं न ह्यस्ति । हिशब्दोऽवधारणे । नैवास्ति किंतु सर्वं सर्वात्मना कीर्त्यम् । तुशब्दोऽवधारणे । कीर्त्यमेवेत्येतद्धि प्रसिद्धम् ॥ ४ ॥

साधूनां गोप्यं नास्तीत्येतत्कुत इत्यत आह ॥ **अस्वपरेति** । अस्वपरदृष्टीनामयं स्वोऽयं पर इति बुद्धिरहितानाम् । मित्रादिसद्भावे स्वपरबुद्धिराहित्यं कथं स्यादित्यत आह ॥ **अमित्रेति** । मित्रं चोदास उदासीनश्च विद्विषश्च मित्रोदासीनविद्विषो न विद्यन्ते मित्रोदासविद्विषो येषां तेऽमित्रोदासविद्विषस्तेषाम् । अनेन तव साधुत्वात् मित्रादेरभावेन स्वपरदृष्टेरभावात् गोप्यं नास्तीति सर्वं वक्तव्यमेवेत्युक्तं भवति । मित्रादिकमस्तीति पक्षेऽपि मां प्रति सर्वं वक्तव्यमेवेत्याह ॥ **उदासीन इति** । यस्य मित्रादिकं वर्तते नारिवदुदासीनो वर्ज्यः । अरिं प्रति यथावत्सर्वं न वक्तव्यमेव । उदासीनं प्रति सर्वं न वक्तव्यम् । सुहृन्मित्रमात्मवदुच्यते । अतो मम तव मित्रत्वात्तव मित्रादिकमस्तीति पक्षेऽपि त्वया मां प्रति सर्वं वक्तव्यमेवेति ॥ ५ ॥

इति श्रीभागवतटिप्पण्यां द्वाविंशोऽध्यायः ॥ १०-२२ ॥

अत्रैवं योजना । मर्त्यं कृष्णमुपाश्रित्य ये देवहेलनं चक्रुः कृष्णाश्रयेण देवहेलननिमित्तकापत्तरणं भविष्यतीति निश्चित्य देवहेलनं चक्रुरिति यावत् । तेषां काननौकसां गोपानां श्रीमदमाहात्म्यमहो आश्चर्यम् । देवहेलननिमित्तकापत्तरणं कृष्णाश्रयेण भविष्यतीति निश्चित्य देवहेलनकरणमविवेककृतमित्यभिप्रेत्यात्र दृष्टान्तमाह ॥ **यथेति** । यथा केचन ज्ञानमानिनोऽस्माकं भवार्णवतरणोपायज्ञानमस्तीत्यभिमानिनः । मूर्खा इति यावत् । आन्वीक्षिकीं भगवदपरोक्षज्ञानानुकूलां विद्यां ब्रह्मविद्यां हित्वाऽदृढैरस्थिरफलकैः कर्ममयैः कर्मात्मकैः कुप्लवैः कुत्सितप्लवैर्भवार्णवं तितीर्षन्ति तर्तुमिच्छन्ति । भगवदपरोक्षज्ञानं विना कर्मभिरेव भवाम्बुधितरणं भविष्यतीति निश्चयं कृत्वा कर्म कुर्वन्तीति यावत् । इति ॥ ३-४ ॥

शिरः सुतांश्च कायेन प्रच्छाद्येत्यस्य सुतान्कायेन प्रच्छाद्य सुतानां शिरश्च विशेषतः कायेन प्रच्छाद्येत्यर्थः । एतेन सुतानामित्यनेन पदाद्यवयवाच्छिरोरूपोऽवयवस्यापि प्राप्तवात् शिर इत्येतद्व्यर्थमिति भ्रमानवकाशः । विशेषत इत्यस्य शेषेण शिरो विशेषतः प्रच्छाद्येत्यर्थस्योक्तत्वात् ॥ १२ ॥

इति श्रीभागवतटिप्पण्यां त्रयोविंशोऽध्यायः ॥ १०-२३ ॥

यद्यस्मात्कारणाद्बालकस्यैतानि कर्माण्यत्यद्भुतानीत्येतद्वै प्रसिद्धम् । तस्मात्कारणादसौ बालो ग्राम्येषु कथं जन्मार्हति । ग्राम्येषु जन्म स्वेच्छया किं न स्यादित्याशङ्कापरिहारार्थमात्मजुगुप्सितमित्यनेन ग्राम्येषु स्वजुगुप्सितत्वमुक्तम् । अनेन महासमर्थेन स्वेच्छया महाकर्माण्येव कर्तव्यानि न तु स्वजुगुप्सितं कर्म । तस्मान्महासमर्थस्यास्य बालस्य महाकर्माण्येव स्वेच्छया कर्तुमुचितानि न तु स्वजुगुप्सितं ग्राम्येषु जन्मेत्युक्तं भवति । एतदेव विवृणोति ॥ **य इति** । यो बालः सप्तहायनः सन् गजराट् पुष्करमिवैकेन करेण लीलया गिरिवरं बिभ्रद्धृतवान् स बालः कथं ग्राम्येषु जन्मार्हतीति ।

एतेन यदेतानीति पूर्वश्लोके कृष्णस्य महासमर्थत्वात् महाकर्माण्येव कर्तुमुचितानि न तु स्वजुगुप्सितं ग्राम्येषु जन्मेत्युक्तत्वात् । उत्तरश्लोके कथं गिरिवरं धृतवानिति कथनं व्याहतमिति चोद्यं परास्तम् । कथमित्यनन्तरं ग्राम्येषु जन्मार्हतीत्यस्यावृत्तिमङ्गीकृत्य यो गिरिवरं धृतवान्स ग्राम्येषु कथं जन्मार्हतीत्यर्थस्योक्तत्वात् । एवं तोकेनामीलिताक्षेणेत्याद्युत्तरश्लोकेष्वपेक्षितयच्छब्दाध्याहारेण स कथं जन्मार्हतीत्यस्य सम्बन्धो द्रष्टव्यः ॥ २-३ ॥

शङ्केत्यस्य विस्मय इत्यर्थः । तत्कर्मसु न विस्मय इति, कृष्णं च गतविस्मया इति च वक्ष्यमाणत्वात् ॥ १४ ॥

इति श्रीभागवत टिप्पण्यां चतुर्विंशोऽध्यायः ॥ १०-१४ ॥

हे शक्र ते भद्रमस्तु । त्वया गम्यताम् । त्वया मेऽनुशासनं क्रियताम् । युक्तैर्मयि मनोयुक्तैः । सद्भक्तैरिति यावत् । विस्रम्भवर्जितैः स्वाधिकारेषु नित्यत्वादिविश्वासवर्जितैर्भृत्यैः सह युक्तेन विस्रम्भवर्जितेन त्वया स्वाधिकारेषु स्थीयतामिति । एतेन भृत्यैरित्यस्य विशेषणयुक्तैर्विस्रम्भ-वर्जितैरिति विशेषणद्वयं किं शक्रभृत्यानां किं वा शक्रस्य । नाद्यः । शक्रनिष्ठतया युक्तत्वादेरलाभात् । न द्वितीयः । बहुवचनानुपपत्तेरिति दूषणं परास्तम् । युक्तैर्विस्रम्भवर्जितैरित्यनयोः शुक्रभृत्यविशेषणत्व मित्यङ्गीकृत्यार्थवशादेकवचनान्ततया विपरिणामेन शक्रस्यापि विशेषणमित्यभ्युपगमात् ॥ १७ ॥

हे विश्वात्मन् । त्वं भूमेर्भारापुनत्तये यो नारायणोऽवतीर्णः सोऽसीति । एतेन नारायणस्य कृष्णरूपेणावतीर्णनारायणैक्यं कृष्णस्योच्यत इत्यङ्गीकारात् ॥ २१ ॥

इति श्रीभागवतटिप्पण्यां पञ्चविंशोऽध्यायः ॥ १०-२५ ॥

अकार्यवेदिना कृष्णसम्बन्धिनामुपद्रवः कार्यो नेति वेदिनाऽपि मूढेनात एवाजानताऽयं तव पितेति ज्ञानरहितेन मामकेनायं तव पिताऽऽनीतस्तत्तस्मात्कारणात्प्रभो त्वं क्षन्तुमर्हसीति । एतेनाकार्य-वेदिनेत्येतद्व्यर्थमिति दूषणं पराकृतम् । अकार्यवेदिनेत्यतः परं अपिशब्दमध्याहृत्य यद्यपि कृष्ण-सम्बन्धिनामुपद्रवो न कार्य इति जानाति तथाऽपि तव पितेति ज्ञानाभावादुपद्रवः कृत इत्यभिप्रायो वक्तव्य इति भावेनाकार्यवेदिनेत्युक्तमित्यभ्युपगमात् ॥ ७ ॥

इति श्रीभागवतटिप्पण्यां षड्विंशोऽध्यायः ॥ १०-२६ ॥

तां रात्रिं वीक्षेत्यस्य रमणानुकूलत्वेन प्रसिद्धां रात्रिं वीक्ष्येत्यर्थः । एतेन रात्रेः पूर्वमप्रकृतत्वात् तामिति तच्छब्देन परामर्शोऽनुपपन्न इति दूषणं पराकृतम् । तामित्यस्य पूर्वप्रकृतामित्यर्थमनङ्गीकृत्य प्रसिद्धामित्यर्थस्योक्तत्वात् ॥ १ ॥

काश्चिद्दुहन्त्योऽभिययुः काश्चित्सुमुत्सुकाः सत्यो दोहं हित्वाऽभिययुरिति । एतेन दुहन्त्योऽभिययुरित्यनेनैवार्थाद्दोहं हित्वाऽभिययुरित्यर्थस्य प्राप्तत्वाद्दोहं हित्वेत्येतद्व्यर्थमिति चोद्यस्यानवकाशः । दुहन्त्य इत्यनेन काश्चिदारब्धदोहं हित्वाऽभिययुरित्युच्यते । दोहं हित्वेत्यनेन काश्चिदभिययुरित्यनयोरावृत्तिमङ्गीकृत्य काश्चित्कर्तव्यदोहारम्भं हित्वाऽभिययुरित्युच्यत इति स्वीकरणात् । एवं परिवेषयंत्यस्तद्धित्वेत्यादावपि द्रष्टव्यम् ॥ ५ ॥

यमुनाया अनिलस्य वायोर्या नीरा लीला मन्दगतिस्तयैजद्भिः कंपमानैस्तरुपल्लवैश्च शोभितामिति । एतेन वायुमात्रस्य कंपनहेतुत्वमुच्यत इत्यङ्गीकारात् । एतेनैव वायोः साक्षात्कंपनहेतुत्वेनोदकद्वारा कंपनहेतुत्वाभावात् । अनिलर्नीरैजदिति वाय्वानीतोदकस्य कंपनहेतुत्वाभिधानमयुक्तमिति दूषणं निरस्तम् । लीलेत्यत्र छान्दसे प्रथमलकारस्य नकारे द्वितीयलकारस्य रेफादेशे नीरेति रूपं निष्पन्नमित्यङ्गीकृत्य तरुपल्लवानां वायुमन्दगतिनिमित्तकं कंपनं शोभाहेतुरुच्यत इत्यङ्गीकारात् ॥ २१ ॥

अथवाऽथाप्यागमनप्रतिबन्धकानां बहूनां सत्त्वेऽपि हि यस्माद्भवत्यो मदभिस्नेहाद्यन्त्रिताशया मय्यर्पितान्तःकरणा अत आगता इति यदि तर्ह्यागमनमुपपन्नम् । त्वयि स्नेहे किंकारणमित्यत आह ॥ **प्रीयन्त इति** । जन्तवो मम सकाशात्प्रीयन्ते । मय्यन्यत्र च स्नेह विशिष्टा भवन्ति । अनेन मम सर्वस्नेहकारणत्वात् । भवतां मयि स्नेहस्याहमेव कारणमित्युक्तं भवति । एतेन पूर्वमागमनकारणस्यानुक्तत्वात् । अथवा मदभिस्नेहादित्यागमने स्नेहो वा कारणमिति कथनमयुक्तमिति दूषणमपास्तम् । वाशब्दोऽप्यर्थ इति स्वीकृत्याथवेत्यस्याथापीत्यर्थ इत्युक्तत्वात् ॥ २३ ॥

स्त्रीणाममाययाऽवचंनया भर्तुः शुश्रूषणं परो धर्मस्तद्बन्धूनां भर्तृबन्धूनां शुश्रूषणं च कल्याणं धर्मः प्रजानां पुत्रपौत्रादीनामनुपोषणं च कल्याणं धर्म इत्येतद्धि प्रमाणप्रसिद्धमिति । एतेन कल्याणमित्येतद्व्यर्थमिति दूषणं परास्तम् । कल्याणमिति पदाभावे भर्तृशुश्रूषणवत्तद्बन्धुशुश्रूषणप्रजानुपोषणयोरपि परधर्मत्वमिति भ्रान्तिः स्यात् । सा माभूदिति कल्याणमित्यनेन धर्मत्वमेव न तु परधर्मत्वमित्युच्यत इत्यङ्गीकारात् ॥ २४ ॥

इति श्रीभागवतटिप्पण्यां सप्तविंशोऽध्यायः ॥ १०-२७ ॥

कृष्णस्य प्रियास्तदात्मकाः कृष्णान्तःकरणाः प्रियस्य कृष्णस्य गतिस्मितप्रेक्षणभाषणादिषु च चित्तं स्थापयित्वा कदाचित्प्रतिरूढमूर्तयो निश्चेष्टशरीराः कदाचित्कृष्णविहारे विभ्रमाः कृष्णक्रीडाविलासवत्क्रीडाविलासविशिष्टा अबला अहमसाविति नावेदिषुरित्येतन्नु निश्चितमिति । एतेन गतिस्मित प्रेक्षणभाषणादिष्वेत्येतदनन्वितमिति दूषणं परिहृतम् । चित्तं स्थापयित्वेत्यस्य शेषं स्वीकृत्यान्वयस्योक्तत्वात् । एतेनैव प्रतिरूढमूर्तय इत्यनेन निश्चेष्टशरीरत्वमुक्त्वा कृष्णविहारविभ्रमा इति चेष्टाकथनं व्याहतमिति चोद्यं परास्तम् । कालभेदेन निश्चेष्टत्वसचेष्टत्वे उच्येते । इत्यभ्युपगमात् ॥ ३ ॥

अङ्घ्रिसम्भवे भगवत्पादोत्पन्नेऽत एवापि लोकसम्भाविते क्षिति अस्मात्त्वं पूर्वमुरुक्रमविक्रमाद्वा विक्रमपादविक्षेपादिव वराहवपुषा वराहदेहविशिष्टेन नारायणेन कृतेन परिरम्भणेन वाऽऽलिङ्गनेन वेदानीं केशवाङ्घ्रिस्पर्शोत्सवोत्पुलुकिताङ्घ्रिरुहैर्विभासि । अतस्ते त्वया कृतं पर्याप्तमङ्गोपाङ्गपूर्णमहो आश्चर्यकरं किं शुभं बत । आमन्त्रितमादरपूर्वकम् । कृतमिति यावदिति । एतेन बतेत्येतद्व्यर्थमिति दूषणं निरस्तम् । खेदानुकंपासन्तोषविस्मयामन्त्रणे बतेत्यमरानुसारेण बतेत्यस्यामन्त्रितमित्यर्थ इत्युक्तत्वात् । एतेनैवापिशब्दो व्यर्थ इति चोद्यं परास्तम् । अपिः सम्भावनायामिति वचनानुसारेणापि शब्दस्य सम्भावनार्थत्वमङ्गीकृत्य लोके इत्येतद्योग्यतया सम्बध्यत इति चाङ्गीकृत्य लोकसम्भावित इत्यर्थस्योक्तत्वात् । एतेनैवेदानीं भूम्याः कृष्णपादस्पर्शसन्तोषनिमित्तकरोमोद्गमनेन विभातमित्यर्थस्य निश्चितत्वात् । किं केशवाङ्घ्रिस्पर्शोत्सवोत्पुलिकिताङ्गरुहैर्विभास्यथवोरुक्रमविक्रमाद्विभास्याहोस्विद्वराहवपुषा परिरम्भणेन विभासीति विकल्पोऽनुपपन्न इति दूषणं पराकृतम् । वाशब्दस्योपमानार्थकत्वमहो इत्यत्राहो इति पदच्छेदेनात्याश्चर्यकरत्वार्थकत्वमङ्गीकृत्य विकल्पार्थत्वमित्यनङ्गीकारात् ॥ १० ॥

इति श्रीभागवतटिप्पण्यामष्टाविंशोऽध्यायः ॥ १०-२८ ॥

व्यालराक्षसादित्यस्य सर्पलक्षणराक्षसादित्यर्थः । यद्यपि व्यालराक्षसान्नन्दगोपमोचनं भावि तथाऽपि कृष्णप्रसादान्नन्दगोपमोक्षणं ज्ञात्वा निश्चितत्वाभिप्रायेण व्यालराक्षसाद्रक्षिता इत्यतीतप्रयोगः कृतः । एष्यत्तु निश्चितं यत्तदतीतत्त्वेन भण्यत इति वचनात् । अतो व्यालराक्षसाद्रक्षिता इत्युक्तिरुपपन्नेति द्रष्टव्यम् ॥ ४ ॥

हे अङ्ग । यद्यस्मात्ते व्यक्तिर्व्रजवनौकसामलं सम्यक् व्रजिनं हन्ति विश्वमङ्गलं समस्तमङ्गलकरणं च स्वजनहृद्रुजां स्वजनहृन्निष्ठचिन्तादिरोगाणां निषूदनं नाशकारणम् । तस्माच्च त्वत्स्पृहात्मनां त्वयि स्पृहा यस्य सः त्वत्स्पृहः आत्माऽन्तःकरणं यासां तासां नोस्माकं दुःखादिपरिहारार्थं मनागीषद्व्यक्तिर्व्यक्तिं भजेति । एतेन त्वत्स्पृहात्मनामित्येतदनन्वितमिति दूषणं पराकृतम् । दुःखादिपरिहारार्थमित्यस्य शेषं व्यक्तिरित्यर्थवशाद्विपरिणामेन द्वितीयैकवचनान्तत्वं चाङ्गीकृत्यान्वयस्योक्तत्वात् ॥१८॥

इति श्रीभागवतटिप्पण्यामेकोनत्रिंशोऽध्यायः ॥ १०-२९ ॥

तन्वः प्राणमिवागतमित्यस्यागतं प्राप्तमित्यागतं प्राणम् । निमित्तीकृत्येति यावत् । तन्व इव तन्वो यथोत्थिता भवन्तीत्यर्थः । एतेनागतं प्राणमित्येतदनन्वितमिति दूषणं परास्तम् । निमित्तार्थकप्रतीत्यध्याहारेणान्वयस्योक्तत्वात् ॥ ३ ॥

काचित्तन्व्यञ्जलिना संहतहस्तद्वयेन ताम्बूलचर्वितं भक्षितताम्बूलोच्छिष्टमगृण्हात् । एका तन्व्युत्ता-

नतया शायितत्त्वादङ्घ्रियुगलं कृष्णाङ्घ्रियुगलं सन्तप्तस्तनयोरधादिति । एतेन स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे । तत्रोपविष्टो भगवान्सर्वेश्वरो योगेश्वरान्तर्हृदि कल्पितासन इत्यनेन यदा स्त्रीभिरासनं दत्तं तदा कृष्ण उपविष्टवान् । इति वक्ष्यमाणत्वेनासनदानात्पूर्वमनुपविष्टत्वात् । काचित्तदङ्घ्रियुगलं सन्तप्तस्तनयोरधादित्यर्थस्योक्तत्वात् ॥ ५ ॥

अपरा दृग्द्वयमनिमिषं यथा भवति तथा दृग्भ्यामापीतमपि तच्चरणं तस्य कृष्णस्य चरणं पुनः पुनर्जुषाणा न तृप्यन्तीति । एतेनानिमिषत्वस्य दृङ्निष्ठत्वेन पानक्रियानिष्ठत्वाभावात् अनिमिषं यथा भवति तथाऽऽपीतमित्येतदनुपपन्नमिति दूषणं परिहृतम् । चक्षुर्निष्ठानिमिषत्वसंपादकत्वं पानक्रियाविशेषणमित्यूरीकरणात् ॥ ७ ॥

इति श्रीभागवतटिप्पण्यां त्रिंशोऽध्यायः ॥ १०-३० ॥

याः स्वनिकटं स्त्रियो भोगार्थं स्वसमीपं प्राप्य स्थिताः स्त्रि यस्तासां सर्वासां स्त्रीणां मध्ये स्वेन कण्ठेन गृहीतानां गृहीतयोर्द्वयोर्द्वयोर्मध्ये प्रविष्टेन योगेश्वरेण कृष्णेन गोपीमण्डलमण्डितो रासोत्सवः संप्रवृत्त इति । एतेन स्वनिकटं स्त्रिय इत्येतद्व्यर्थमिति दूषणं परास्तम् । तत्रागतानां सर्वस्त्रीणां समबहुमान एव कृतो न तु वैषम्यमिति वक्तुं स्वनिकटं स्त्रिय इत्युक्तमित्यङ्गीकारात् । एतेनैव गृहीतयोरिति वक्तव्यमिति दूषणस्यानवकाशः । गृहीतानामिति षष्ठीबहुवचनं गृहीतयोरिति षष्ठीद्विवचनोद्देश इत्यभ्युपगमात् ॥ ३ ॥

अलमित्यस्य समर्था नेत्यर्थः । एतेन केशादिकं वोढुं तदर्थं पतिं कृष्णमित्युक्तं वा त्यक्तुं च समर्था नेति वक्तव्यं सामर्थ्यार्थिकालं शब्दप्रयोगोऽनुपपन्न इति चोद्यं परास्तम् । अलमित्यत्र काकुस्वरमङ्गीकृत्यालमित्यस्य समर्थानेत्यर्थ इत्युक्तत्वात् ॥ १८ ॥

इति श्रीभागवतटिप्पण्यामेकत्रिंशोऽध्यायः ॥ १०-३१ ॥

एतेन तत इत्येतद्व्यर्थमिति दूषणं निरस्तम् । यत इत्यध्याहारेणार्थस्योक्तत्वात् ॥ २४ ॥

अविदूर इवेत्यस्यातिदूरे स्थितः पुरुष इवेत्यर्थः । एतेन भगवतः सर्वदा समीपस्थितत्वात् । अविदूर इव समीपे स्थितः पुरुष इवेति समीपस्थितपुरुषसादृश्याभिधानमयुक्तमिति चोद्यं परिहृतम् । अविदूर इत्यत्र विशब्दस्य नञर्थत्वम् । द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति न्यायं चाश्रित्याविदूर इवेत्यनेनातिदूरस्थपुरुषसादृश्यमुच्यत इत्यभ्युपगमात् ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां द्वात्रिंशोऽध्यायः ॥ १०-३२ ॥

तच्चित्तास्तन्मनस्का इत्यस्य तच्चित्तास्तद्विषयकान्तःकरणसंपन्नास्तन्मनस्कास्तन्माहात्म्यविशेषविषयकज्ञानसंपन्ना इत्यर्थः । एतेन तच्चित्तास्तन्मनस्का इत्येतत्पुनरुक्तमिति दूषणमपास्तम् । तन्मनस्का इत्यत्र मनःशब्दो मनु अवबोधन इत्यस्य रूपम् । अतो मनःशब्देन ज्ञानमुच्यत इति स्वीकृत्य तन्मनस्का इत्यनेन भगवद्विषयकान्तःकरणं कार्यं यद्भगवन्माहात्म्यविशेषविषयकं ज्ञानं तद्वत्त्वमुच्यत इत्यभ्युपगमात् ॥ २६ ॥

इति श्रीभागवतटिप्पण्यां त्रयस्त्रिंशोऽध्यायः ॥ १०-३३ ॥

कट्याक्षिप्येत्यस्य कटाक्षेणाक्षिप्य तिरस्कृत्येत्यर्थः । एतेन कटाक्षेणाक्षिप्येति वक्तव्यं कट्याक्षिप्येति कथनमयुक्तमिति चोद्यं पराकृतम् । कटाक्षेणाक्षिप्येति स्थिते छान्दसे क्षेणेत्यस्य लोपे अकःसवर्णे दीर्घ इति दीर्घे कट्याक्षिप्येति रूपं निष्पन्नमित्यङ्गीकारात् ॥ १० ॥

अवधार्येत्यस्य निश्चित्येत्यर्थः । एतेनावधार्येत्येतद्व्यर्थमिति दूषणं निरस्तम् । जलादयो वर्तन्त इति निश्चये विद्यमानेऽपि जलादीनतिक्रम्य मलिनीकृतेत्यर्थलाभार्थमवधार्येत्युक्तमित्यभिप्रायात् ॥ ४१ ॥

यशस्विनी सन्तप्ता क्रुद्धा मम माता सुदुर्लभं पातिव्रत्यं सन्त्यज्य सम्यक् त्याजयित्वेति वादिनमेनं प्राहेति । एतेन तया पातिव्रत्यस्य त्यक्तत्वात् । सन्त्यज्येत्यनुपपन्नमिति चोद्यमपहस्तितम् । सन्त्यज्येत्यन्तर्णीत ण्यर्थ इत्यङ्गीकृत्य सन्त्यज्येत्यस्य सम्यक् त्याजयित्वेत्यर्थ इत्युक्तत्वात् ॥ ४६ ॥

इति श्रीभागवतटिप्पण्यां चतुस्त्रिंशोऽध्यायः ॥ १०-३४ ॥

रहस्येदमित्यस्य रहस्यं च तदिदं च रहस्येदमित्यर्थः । एतेन रहसीदमिति स्थिते अकः सवर्णे दीर्घे इति दीर्घे रहसीदमिति वक्तव्यं रहस्येदमिति वचनमयुक्तमिति चोद्यं परास्तम् । रहसीति पदच्छेद इत्यनङ्गीकारात् ॥ १० ॥

इति श्रीभागवतटिप्पण्यां पञ्चत्रिंशोऽध्यायः ॥ १०-३५ ॥

यः क्षेत्रज्ञः परमेश्वरश्चेतोऽन्तर्बहिश्च स्थितः सन् एतदीहितमेत्यस्य चेतस ईहितं चेष्टितममलेन चक्षुषेक्षतीति । एतेन चेतस ईहितमीक्षतीत्यनेन पूर्णत्वादन्तर्बहिरेतदिति पदत्रयं व्यर्थमिति दूषणस्यानवकाशः । स्थित इति शेषपूरणेन चेतसोऽन्तर्बहिश्च स्थितः सन् चेतस ईहितमीक्षतीत्यर्थस्योक्तत्वात् ॥ १७ ॥

किं चान्यच्च यदूत्तमोऽग्रजः कृष्णस्याग्रजो बलरामो गृहीतसञ्चितौ गृहीतपशुपादबन्धनरज्जौ स्वस्मिन्नवनतं मा स्मयन्सन् परिष्वज्याप्तसमस्तसत्कृतं गृहं प्रविश्य स्वबन्धुषु कंसकृतं संप्रेक्ष्यत इति । एतेन गृहीतसञ्चितावित्यस्याग्रज इत्येतद्विशेषणत्वाद्गृहीतसञ्चितिरिति वक्तव्यं गृहीतसञ्चिताविति

कथनमनुपपन्नमिति दूषणं निरस्तम् । गृहीतसञ्चितावित्यस्याग्रज इत्यनेनान्वयमनङ्गीकृत्याध्याहृतेन स्वस्मिन्नित्यनेनान्वय इत्यभ्युपगमात् ॥ २२ ॥

कृष्णं राममित्यनयोर्ददर्शेत्यनेनान्वयमुक्त्वा व्रजे गोदोहनं गतावित्यादीनां बलकेशवावित्यनेनान्वयमुक्त्वा बलकेशवावित्यस्य ददृशेत्यनेनान्वयो वक्तव्यः । एतेन व्रजे गोदोहनं गतावित्यादि द्विवचनान्त शब्दानां कृष्णं राममित्येकवचनान्तशब्दाभ्यामनन्वय इति शङ्का परास्ता । रामं कृष्णं ददर्शेत्युक्त्वा तद्विवरणं व्रजे गोदोहनं गतावित्यादिना क्रियत इत्यभ्युपगमात् ॥ २६ ॥

हे राजन् । स्वया प्रभया दिशो वितिमिरा विगतान्धकाराः कुर्वाणौ कनकाचितौ सौवर्णाभरणसंपन्नौ बलकेशवौ ददर्शेति पूर्वेणान्वयः । बलकेशवयोर्मध्ये केशवो यथा कनकाचितौ कनकाचितः कनकसम्बन्धो मरकतः शैलस्तथा । तत्सदृशः । बलो यथा कनकाचितौ रौप्यः शैलस्तथा तत्सदृश इति । एतेन मरकत इत्यादि प्रथमैकवचनान्तशब्दानां बलकेशवाविति द्वितीयाद्विवचनान्तशब्देनानन्वयः कथमिति चोद्यं निरस्तम् । बलकेशवावित्यस्यार्थवशाद्बलकेशवयोरिति विपरिणामं कनकाचितावित्यस्य कनकाचित इति विपरिणाममावृत्तिं च मध्य इत्यादीनां शेषं चाङ्गीकृत्य मरकत इत्यादिशब्दानामन्वयस्योक्तत्वात् ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां षट्त्रिंशोऽध्यायः ॥ १०-३६ ॥

आत्मलोकमात्मनः प्राज्ञनामकपरमात्मनो लोकं देहं गताः प्राप्ताः सुप्ता इवेमं लोकं देहं नाभ्यजानन्निति ॥ ११ ॥

क्रूरस्त्वमक्रूरसमाख्यया स्मृत इत्यस्याक्रूरान्तर्यामी त्वं क्रूरोऽथाऽप्यक्रूरसमाख्यया स्मृत इत्यर्थः । एतेनाकठिनेत्यादिशब्दान्तरपरित्यागेनाक्रूरेति शब्दग्रहणे निमित्तं नास्तीति शङ्काऽनवकाशः । चक्षुर्हरणादावक्रूरस्य स्वातन्त्र्यं नास्ति किं त्वक्रूरान्तर्गतस्य तवैव स्वातन्त्र्यमिति ज्ञापनार्थमक्रूरसमाख्ययेत्युक्त इत्यभ्युपगमात् ॥ १७ ॥

भावपरिक्लिन्नात्मलोचन इत्यस्यात्माऽन्तःकरणं च लोचने चात्मलोचनानि भावेन भक्त्या परिक्लिन्नान्यात्मलोचनानि यस्य स्वभावपरिक्लिन्नात्मलोचन इत्यर्थः । अन्तःकरणस्य परिक्लिन्नत्वं नाम द्रवीकृतत्वम् । लोचनद्वयस्य परिक्लिन्नत्वं नामानन्दाश्रुजलस्नातत्वमिति द्रष्टव्यम् । एतेन परिक्लिन्नलोचन इत्यनेनैव पूर्णत्वादात्मेति पदं व्यर्थमिति चोद्यं परिहृतम् । अन्तःकरणलाभार्थमात्मेत्युक्तमित्यङ्गीकारात् ॥ ५२ ॥

इति श्रीभागवतटिप्पण्यां सप्तत्रिंशोऽध्यायः ॥ १०-३७ ॥

मरुत्प्राणबलं प्रकल्पितमित्यस्य मरुद्वायुःप्राणबलं प्राणो बलं चाग्निर्मुखमित्यादिनाऽग्न्यादीनां भगवन्मुखाद्यैक्यमुक्तमिति भ्रमं वारयितुमग्निर्मुखमित्यादि स्ववाक्यस्याभिप्रायं स्वयमेवाह ॥ **प्रकल्पित मिति ।** अग्न्यादिकं सर्वं त्वन्मुखादिभ्यः प्रकल्पितमुत्पन्नमित्येतदग्निर्मुखमित्यादिनोक्तमित्यर्थः । प्राणादुत्पन्नस्य वायोरूपविशेषबलादुत्पन्नत्वान्मरुद्बलं चेत्युक्तम् ॥ ता. अर्थः ॥ त्वयैव प्रकल्पिता इत्यनेन प्रकल्पितमित्यस्य तात्पर्यार्थ उक्तः । अत्र प्रकल्पितमित्यनेनोत्पन्नत्वमेवोक्तं न तु कल्पित-मित्यभिप्रेत्य भगवदङ्गोत्पन्नत्वात् देवानां भगवदङ्गैक्यं पुराणादिषूच्यत इत्यस्मिन्नर्थे प्रमाणमाह ॥ **विष्णोरिति ।** विष्णोरङ्गसमुद्भूतास्तु । तुशब्द एवार्थे । मुखाद्यङ्गोत्पन्नत्वादेव स्वरूपा-द्भगवत्स्वरूपमुखाद्यङ्गात्तु भेदिनोऽपि देवता अग्न्यादिदेवताः सर्ववेदेषु । उपलक्षणमेतत् । सर्व-पुराणादिषु चेत्यपि द्रष्टव्यम् । सर्ववेदपुराणादिषु विष्णोरङ्गानि मुखाद्यङ्गानीत्युच्यन्त इति ॥ १४ ॥

इति श्रीभागवतटिप्पण्यामष्टत्रिंशोऽध्यायः ॥ १०-३८ ॥

यावन्ति भूतानीह प्रत्यक्षसिद्धायां भूमौ वियत्याकाशे जले । वाशब्दोऽनुक्तसमुच्चये । अन्यत्र यावन्ति भूतानि सन्ति तानि विश्वात्मके विश्वनियामके त्वयि सन्त्यतस्त्वां विपश्यतो विपश्यता मे मयाऽदृष्टमभूतं किमस्ति न किमपि । हे ब्रह्मन् । भूमौ वियति जले वा यानि सर्वाण्यद्भुतानि तानि यत्र यस्माद्भवन्ति तं त्वानुपश्यतोऽनुपश्यता मे मयाऽदृष्टमद्भुतं किमस्तीति । अनेन विश्वात्मक इत्यस्य विश्वनियामक इत्यर्थ उक्तो भवति । एतेन भगवतो विश्वैक्याभावाद्विश्वात्मके त्वयि सर्वाण्यद्भुतानि सन्तीति कथनमयुक्तमिति दूषणं परास्तम् । एतेनैव यत्रेति पद्यमद्भुतानीहेति पद्येन पुनरुक्तमिति चोद्यं पराकृतम् । यत्रेति पद्यस्याद्भुतानीहेति पद्यविवरणरूपत्वमित्यभ्युपगमात् ॥४,५॥

अहमादौ यदुवर्गद्रुहं कंसं हत्वा सुहृत्प्रियं वितरिष्ये । अनन्तरमार्यसमन्वितः सन् भवतो गेहमायास्य इति । एतेनास्मिंल्लोकेऽर्थद्वयं परस्परमनन्वितमिति दूषणं परिहृतम् । आदावनन्तरमिति पदयोः श्लेषं कृत्वाऽन्वयस्योक्तत्वात् ॥ १७ ॥

काश्चिद्विपर्यक्कृतवस्त्रभूषणा विपर्येण वैपरीत्येन कृतानि धृतानि वस्त्रभूषणानि याभिस्ता विपर्यक्कृत-वस्त्रभूषणाः सत्यः समीयुः । अथान्यच्च । अपरा युगलेष्वेकं विस्मृत्य । चशब्दोऽनुक्तसमुच्चये । एकं धृत्वा च समीयुरपराः कृतैकवस्त्रश्रवणैकनूपुरा एकं च तद्वस्त्रं चैकं च तन्नूपुरं चैकनूपुरम् । श्रवणे करणे एकनूपुरं श्रवणैकनूपुरमेकवस्त्रं च श्रवणैकनूपुरं चैकवस्त्रश्रवणैकनूपुरे कृते धृते एकवस्त्रश्रवणैक-नूपुरे याभिस्ताः कृतैकवस्त्रश्रवणैकनूपुराः सत्यः समीयुः । अपर एकं स्वलोचनमङ्क्त्वा द्वितीयं स्वलोचनम् । तुशब्दोऽवधारणे । नांक्त्वा तु नांक्त्वैव समीयुरिति । एतेन श्रवणभूषणे त्विति वक्तव्यं श्रवणेति कथनमयुक्तम् । एकवस्त्रेत्येकशब्दश्रवणशब्देनैव नूपुरशब्देनापि सम्बन्धस्य सम्भवात् ।

एकनूपुरेत्येकशब्दो व्यर्थ इति दूषणं प्रत्युक्तम् । एकश्रवणभूषणमेकं नूपुरं धृतमित्यर्थमित्यनङ्गीकृत्य पादाभरणमेकं नूपुरमेककर्णोर्ध्वभागे धृतमित्यर्थ इत्यङ्गीकारात् ॥ २५ ॥

नारायणस्यांशेनांशत्वेन युक्तौ विश्वस्य जगतः परं मुख्यं कारणं च भवन्तौ विश्वस्य जगतो भक्ति संपन्नसमस्तजगतः क्षेमाय भवाय मङ्गलाय च भूम्यामवतीर्णौ प्रादुर्भूतावित्येतत्किल प्रमाण-प्रसिद्धमिति । एतेन कृष्णरामयोर्नारायणांशत्वात् । अंशाविति वक्तव्यमंशेनावतीर्णाविति कथन-मनुपपन्नमिति दूषणमपास्तम् । अंशेनेति भावप्रधानो निर्देशः । नारायणस्य युक्तावित्यनयोः शेष इति चाङ्गीकृत्य नारायणस्यांशावित्यर्थ इत्यभ्युपगमात् ॥ ४५ ॥

इत्यभिप्रेत्येत्यस्येति यद्वक्तव्यं तत्सर्वं कृष्णानुग्रहेण मनसा निश्चित्येत्यर्थः । एतेनेति प्राहेत्यनेन पूर्णत्वात् । अभिप्रेत्येत्येतद्व्यर्थमिति दूषणं परास्तम् । अन्यैरनुक्तं नः सार्थकं जन्मेत्यादि कृष्ण-राममाहात्म्यं सुदाम्ना कथमुक्तमित्याशङ्कापरिहारार्थमितीत्यतः परं वक्तव्यं तत्सर्वं कृष्णानुग्रहेण मनसेत्यस्य शेषमङ्गीकृत्वेत्यभिप्रेत्येत्यनेन यतः कृष्णानुग्रहेण कृष्णाय माहात्म्यं मनसा ज्ञातमतः कृष्णराममाहात्म्यमुक्तमित्युच्यत इत्यूरीकरणात् ॥ ४८ ॥

इति श्रीभागवतटिप्पण्यामेकोनचत्वारिंशोऽध्यायः ॥ १०-३९ ॥

ततोऽनुलेपनदानानन्तरं तौ रामकृष्णौ सुवर्णेतरशोभिना सुवर्णवदितरवत्सुवर्णेतररजतवच्छोभिना संप्राप्तापरभागेन संप्राप्तौ रामकृष्णौ देहापरभागौ येन तेन संप्राप्तापरभागेनाङ्गरागेणानुरञ्जितौ सन्तौ शुशुभाते इति । एतेन संप्राप्तापरभागेनेत्येतद्व्यर्थमिति दूषणं निरस्तम् । एकस्मिन्भागे सुवर्ण-वर्णाङ्गरागलेपनं कृतमिति वक्तुं संप्राप्तापरभागेनेत्युक्तमित्यभ्युपगमात् ॥ ५ ॥

दर्पणादिषु प्रतिरूपेषु प्रतिबिम्बेषु सत्स्वपि स्वशिरसः स्वशिरःप्रतिबिम्बस्यादर्शनं जातम् । द्वितीये विरोधिनि द्वितीयपुरुषेऽसत्यपि द्वितीयं चाचष्ट । तथा ज्योतिषां चन्द्रादिज्योतिषां द्वैरूप्यं द्वित्वमाचष्टेति । एतेन द्वितीयचन्द्रादेः कदाऽपि सत्त्वाभावात् । द्वितीये चन्द्रादौ ज्योतिष्यसत्यपीति कथनमनुपपन्नमिति दूषणं परास्तम् । द्वितीय इत्यावृत्तिमर्थवशाद्द्वितीयामिति विपरिणाममाचष्टेत्य-नेनान्वयं चाङ्गीकृत्यासत्यपि द्वितीयपुरुषे द्वितीयपुरुषमाचष्टेत्यर्थस्योक्तत्वात् ॥ २६ ॥

इति श्रीभागवतटिप्पण्यां चत्वारिंशोऽध्यायः ॥ १०-४० ॥

कृष्णोऽतिबलं गजं पुच्छे प्रगृह्य लीलयैव धनुषः पञ्चविंशतिं विचकर्ष । अत्र दृष्टान्तमाह ॥ **यथेति ।** सुपर्णो नागं यथा कर्षति तथेति । एतेन यथेत्यनेन पूर्णत्वात्सुपर्ण इवेतीवशब्दो व्यर्थ इति दूषणं निरस्तम् । इवशब्दस्यैवार्थत्वं लीलयेत्यनेनान्वयं चाभ्युपगम्यायासलेशोऽपि नास्तीति वक्तुं लीलयैव विचकर्षेत्युच्यत इत्यूरीकरणात् ॥ ८ ॥

एतौ कृष्णरामौ साक्षाद्भगवतः सकलानिष्टपरिहारकस्य नारायणस्यांशेनांशत्वेन युक्ताविह भूमौ वसुदेवस्य वेश्मन्यवतीर्णौ प्रादुर्भूतावित्येतद्धि प्रमाणप्रसिद्धमिति । एतेन रामकृष्णयोर्नारायणांशत्वात् नारायणांशत्वेन युक्ताविति वक्तव्यं नारायणस्यांशेनावतीर्णाविति कथनमनुपपन्नमिति दूषणं परिहृतम् । अंशेनेति भावप्रधानो निर्देशः । युक्तावित्यस्य शेष इति च स्वीकृत्यांशत्वेन युक्तावित्यर्थ-स्योक्तत्वात् ॥ २३ ॥

विविधांस्तापांस्तरन्ति स्म श्रममित्यस्य श्रमं दुःखं तत्साधनभूतां विविधांस्तापांस्तरंति स्मेत्यर्थः । एतेन श्रममित्येतद्विविधांस्तापानित्यनेन पुनरुक्तमिति चोद्यमपास्तम् ॥ २८ ॥

इति श्रीभागवतटिप्पण्यामेकचत्वारिंशोऽध्यायः ॥ १०-४१ ॥

किशोरौ नाप्तयौवनावित्यस्य किशोरौ किशोरावस्थासंपन्नौ नाप्तयौवनौ अनारब्धयौवनावित्यर्थः । एतेन किशोरावित्यनेनैव नाप्तयौवनावित्यर्थस्य लाभात् । नाप्तयौवनावित्येतद्व्यर्थमिति दूषणं परिहृतम् । किशोरावस्थायौवनावस्थासन्धिकालेऽपि किशोराविति वक्तुं शक्यत्वात् । यौवनावस्थाया आरम्भोऽपि नास्तीति वक्तुं नाप्तयौवनावित्युक्तमित्यभ्युपगमात् ॥ ८ ॥

यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचिदित्यनेन यस्यां सभायामधर्मः समुत्तिष्ठेत् । तत्सभां परित्यज्य गन्तव्यमित्युक्तम् । न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन्नित्यनेनास्यां सभायामधर्मो भविष्यतीति पूर्वं विचार्य सभाप्रवेश एव न कर्तव्य इत्युक्तम् । अत्र तु पक्षान्तरसमुच्चये । यत्र सभायामधर्मः समुत्तिष्ठेत्तत्सभां प्रविश्यास्यां सभायामधर्मः प्राप्त इति प्राज्ञो ब्रूयात् । पक्षत्रयाकरणे बाधकमाह ॥ **अब्रुवन्निति** । अज्ञः पूर्वोक्तपक्षत्रयज्ञानरहितः सभां प्रविश्य सभामपरित्यज्याब्रुवन् अस्यां सभायामधर्मः प्राप्त इत्यब्रुवन् विब्रुवन् अस्यां सभायां धर्म एव वर्तत इति विरुद्धं ब्रुवन्नरः किल्मिषमश्नुते । अतः पूर्वोक्तपक्षेष्वेकं पक्षं कुर्यादिति । एतेन सभापरित्यागसभाप्रवेशाभावरूप-पक्षद्वयवत्सभायां यथावस्थितं वक्तव्यमिति पक्षोऽपि वक्तव्यः । स नोक्त इति न्यूनतेत्याशङ्का परिहृता । यत्रेत्यादीनामनुवृत्त्या तत्सभामित्यादीनां शेषेण च तृतीयपक्षस्याप्युक्तत्वात् ॥ ९ ॥

लावण्यसारमथनोत्थमनन्यसिद्धमित्यस्य लावण्येन साराः श्रेष्ठा ये पदार्थास्तेषां मथनेनोत्पन्नमिति प्रतीयमानं वस्तुतोऽनन्यसिद्धमित्यर्थः । एतेन लावण्यसारमथनोत्थमनन्यसिद्धमित्येतद्व्याहतमिति दूषणं निराकृतम् । इति प्रतीयमानमित्यस्य शेषमङ्गीकृत्य लावण्यसारमथनोत्थितमिति प्रतीयमानमित्युच्यत इत्यङ्गीकारात् ॥ १४ ॥

रामकृष्णयोः कर्मणा कंसमृते सर्वे जनाः प्रजहृषुर्जनानां मध्ये ये विप्रमुख्याः साधवस्ते न केवलं रामकृष्णयोः कर्मणा प्रजहृषुः किं तु साधुसाध्वित्यवदंश्चेति । एतेन साधवो जना रामकृष्णयोः कर्मणा

प्रजहृषुरित्युक्ते कंसस्यासाधुत्वेन कंसव्यावृत्तेर्जातत्वात् । कंसमृत इत्येतद्व्यर्थमिति दूषणं पराकृतम् । साधव इत्यस्य प्रजहृषुरित्यनेनान्वयमनङ्गीकृत्याध्याहृतेनावदंश्चेत्यनेनान्वयस्योक्तत्वात् ।। २९ ।।

इति श्रीभागवतटिप्पण्यां द्विचत्वारिंशोऽध्यायः ।। १०-४२ ।।

हे तात । अस्मत्तोऽस्मद्विषये नित्योत्कण्ठितयोरपि युवयोः पुरतः पुत्राभ्यां पुत्रयोरावयोर्बाल्य-पौगण्डकैशोरबाल्याद्यवस्था नागमन्निति ।। ३ ।।

दुर्हृदोरित्यस्य भवत्सेवा नास्तीति चिन्ताजनितक्लेशयुक्तमनसोरित्यर्थः । एतेन दुर्हृदोरित्यस्य किं दुष्टान्तःकरणयोरित्यर्थः । किं वा दुःखयुक्तान्तःकरणयोरिति । नाद्यः । तन्नावकल्पयोरित्यादि पूर्ववाक्यविरोधात् । न द्वितीयः । क्लिष्टयोरित्यनेन पुनरुक्तिप्रसङ्गादिति चोद्यमपास्तम् । क्लिष्टयोरित्यस्य पूतनादिनिमित्तकक्लेशयोरित्यर्थः । दुर्हृदोरित्यस्य भवत्सेवा नास्तीति चिन्ताजनितक्लेशयुक्तमनसोरित्यर्थ इत्यभ्युपगमात् ।। ९ ।।

हे नृप रामकेशवौ गुरुदक्षिणया गुरुदक्षिणाप्रतिपादकवाक्येनाचार्यं छन्दयामासतुस्तोषयामा-सतुरिति। एतेन गुरुदक्षिणया अदत्तत्वात् । गुरुदक्षिणाया आचार्यं छन्दयामासतुरित्यनुपपन्नमिति दूषणं निरस्तम् । गुरुदक्षिणाशब्देन भवदपेक्षितगुरुदक्षिणा दीयत इति वाक्यं गृह्यत इत्युरीकरणात् ।। ३६ ।।

तावित्यस्य स कृष्ण इत्यर्थः । एतेनापश्यदित्येकवचनात्स इति वक्तव्यम् । तावित्यनुपपन्नमिति शङ्का परास्ता । सुपां सुपो भवन्तीति वचनात् स इति प्रथमैकवचनस्य ताविति प्रथमाद्विवचनादेश इत्यभ्युपगमात् ।। ४२ ।।

इति श्रीभागवतटिप्पण्यां त्रिचत्वारिंशोऽध्यायः ।। १०-४३ ।।

अतिकृच्छ्रेण वियोगनिमित्तकातिक्लेशेन निमित्तेन यद्यपि प्राणधारणं दुर्घटं तथाऽपि कथञ्चन प्रायः प्राणान्धारयन्तीति । एतेन कथञ्चनेत्येतदतिकृच्छ्रेणेत्यनेन पुनरुक्तमिति चोद्यं पराकृतम् । अतिकृच्छ्रेणे त्यस्य प्राणान्धारयन्तीत्यनेनान्वयमनभ्युपगम्याध्याहृतेन यद्यपीत्यादिनाऽन्वयस्योक्तत्वात् ।। ६ ।।

कृष्णं च रामं च गर्गस्य वचनं यथा तथा मन्ये । एतदेव विवृणोति ।। **प्राप्ताविति** । इह भूलोके । कृष्णरामौ सुरोत्तमौ । अत एव सुराणां महदर्थाय महार्थाय प्राप्तौ मन्य इति । एतेन कृष्णं राममित्येकवचनान्तयोः सुरोत्तमौ प्राप्ताविति द्विवचनान्ताभ्यामनन्वय इति दूषणं परिहृतम् । कृष्णं राममित्यनयोः सुरोत्तमौ प्राप्तावित्येताभ्यामन्वयमनभ्युपगम्य गर्गस्य वचनं यथा तथेत्यनेनान्वय-स्योक्तत्वात् । एतेनैव कथं मन्य इत्याकाङ्क्षाशान्तेर्गर्गस्य वचनं यथा तथेत्यनेन जातत्वात् । सुरोत्तमौ

प्राप्तावित्येतद्व्यर्थमिति दूषणं निरस्तम् । तथा कथं मन्य इत्याकाङ्क्षाशान्त्यर्थं कृष्णरामावित्यध्याहारेण सुरोत्तमावित्यादिना तथा मन्य इत्यस्य विवरणं क्रियत इत्यभ्युपगमात् ।। २३ ।।

तान्मृगाधिपः पशूनिव लीलयैवावधीत् । एतदेव विवृणोति ।। **कंसमिति** । नागयुतप्राणं कंसं मल्लो तथा गजपतिमवधीदिति । एतेन कंसमित्याद्येकवचनान्तानां तानिति बहुवचनान्तेनानन्वय इति दूषणं प्रत्युक्तम् । तान्कानित्याशङ्कापरिहारार्थं तानवधीदित्युक्तस्यैव विवरणं कंसमित्यादिना क्रियत इत्यूरीकरणात् ।। २५ ।।

समानस्य सेवानिमित्तकातिशयरहितस्य कृष्णस्योत्तमसेवानिमित्तकोत्तमसुखजनकः । वाशब्द एवार्थे । नैवास्ति । अधमोधमसेवानिमित्तकाधमसुखजनकोऽपि नैवास्ति । समः समसेवानिमित्तक-समसुखजनकोऽपि नैवास्ति । इति । एतेन भगवत्क्रुस्यनुसारेण जीवानामुत्तमाधममध्यमभावस्य विद्यमानत्वात् । कृष्णस्योत्तमोऽधमः समोऽपि नास्तीत्यनुपपन्नमिति चोद्यं परिहृतम् ।। ३७ ।।

न देहो जन्म कर्म वेत्यस्य देहः प्राकृतदेहो जन्मोत्पत्तिः । वाशब्दश्चशब्दार्थे । कर्म वाऽदृष्टं च नास्तीत्यर्थः । एतेन लोकेऽस्य जन्मकर्माणीति कृष्णस्य जन्मकर्मणां वक्ष्यमाणत्वात्कृष्णस्य जन्म कर्म नास्तीत्येतद्व्याहतमिति शङ्का परिहृता । लोकेऽस्य जन्मकर्माणीत्यत्र जन्मशब्देनोत्पत्तिः कर्मशब्देनादृष्टमुच्यत इत्यभ्युपगमात् ।। ३८ ।।

अस्य कृष्णस्य क्रीडां कर्तुं लोके भूलोके सदसन्मित्रयोनिषु सुरनरतिर्यग्योनिषु जन्म प्रादुर्भावो भवति । अनन्तरं कर्माणि दैत्यहननादिक्रीडा अपि भवन्ति । स दैत्यहननादिव्यापारः साधूनां परित्राणाय कल्पत इति । एतेन क्रीडार्थमिति चापर इति भगवत्कर्मणां क्रीडार्थत्वस्य निषिद्धत्वात् । क्रीडार्थं कर्माणीत्ययुक्तमिति चोद्यस्यानवकाशः । क्रीडार्थमित्यस्य कर्माणीत्यनेनान्वयमनङ्गीकृत्य जन्मेत्यनेनान्वय इत्यभ्युपगमात् ।। ४० ।।

इति श्रीभागवतटिप्पण्यां चतुश्चत्वारिंशोऽध्यायः ।। १०-४४ ।।

अतीवदर्शन इत्यस्यातीवमत्यन्तमखण्डं दर्शनं यस्य सोऽतीवदर्शन इत्यर्थः । एतेनातिसुखकरदर्शन इति वक्तव्यमतीवदर्शन इत्यनुपपन्नमिति चोद्यं परास्तम् । अत्यन्तत्ववाचकेनातीवशब्देन दर्शनस्या-खण्डत्वोक्त्याऽर्थाद्दर्शनस्य सुखकरत्वलाभात् ।। २ ।।

वेदविद्वर्गवन्द्य इत्यनेन कविज्ञानत्वमुपपद्यत इति द्रष्टव्यम् । तेन वेदविद्वर्गवन्द्य इत्येतद्व्यर्थमिति दूषणस्यानवकाशः ।। १७ ।।

हिरण्यः कुलिकरुतमिव कुलिकस्य मृगयो रुतमिव गानशब्दमिवाज्ञाः कृष्णवध्वो वयं ऋतमिव

सत्यमिव विद्यमानं जिह्मं वञ्चनकरं व्याहृतं कृष्णवचनं श्रद्दधानाः सत्य एतत्तन्नखस्पर्शतीव्रस्तनरुजपरमार्तिमेतस्य कृष्णस्य तेषां सुखकरं प्रसिद्धानां नखानां स्पर्शेन तीव्रस्तनरुजस्य तीव्रस्तननिष्ठकामपीडायाः परमार्तिं परमपीडां स्तननिष्ठकामनिमित्तदुःखस्यात्यन्तिकनिवृत्तिमिति यावत् । उपलक्षणमेतत् । परमसौख्यं च सुहृद्दशिमानुभूविम । अनन्तरं कृष्णयोगेन परमदुःखमेवानुभूयतेऽतस्तद्दुःखपरिहारार्थमस्य कृष्णस्य वार्ता भण्यतामिति । एतेन कृष्णस्य स्तनक्षतेन परमदुःखहेतुत्वे तद्योगप्रार्थनमनुपपन्नं स्यात् । अस्य वार्ता भण्यतामित्येतद्विरुद्धं च स्यात् । अनेन कृष्णस्य सुखहेतुत्वाप्रतीतेरिति दूषणं पराकृतम् । एतत्तन्नखस्पर्शतीव्रस्तनरुजपरमार्तिमित्यस्यैतस्य कृष्णस्य तेषां नखानां स्पर्शेन जातेन तीव्रस्तनरुजेन तीव्रस्तनक्षतेन परमार्तिं परमदुःखमित्यर्थस्यानङ्गीकारात् । एतेनैवास्य वार्ता भण्यतामित्येतदनन्वितमिति चोद्यं परिहृतम् । अनन्तरं कृष्णवियोगेनेत्यादीनां शेषेणान्वयस्योक्तत्वात् ॥ १९ ॥

सततमुरसि सोम्य श्रीवधूः साकमास्त इत्यस्य हे सोम्य श्रीवधूः सततं सर्वदा भगवता साकमुरसि चास्त इत्यर्थः । एतेन भगवत उरसि इत्यनेन भगवता साकमित्यर्थस्य लाभात् । भगवता साकमित्येतद्व्यर्थमिति दूषणं निरस्तम् । भगवता साकमित्यस्य भगवतः पार्श्वभाग इति तात्पर्यार्थ इत्यभ्युपगमात् ॥ २० ॥

स कथं नः किंकरीणां गृहीतो भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत्कदान्वित्यस्य भगवान्किंकरीणां नो मूर्ध्न्यगुरुसुगन्धं भुजं कदान्वधास्यत् । अन्यथा किङ्करीणां किङ्करीभिर्नोऽस्माभिः कथं गृहीत इत्यर्थः । एतेन कथमित्येतदनन्वितमिति दूषणं परास्तम् । अन्यथेति शेषपूरणेनान्वयस्योक्तत्वात् । एतेनैव गृहीत इति ग्रहणक्रियां प्रति कर्तृत्वात् । किङ्करीणां न इत्यर्थवशात्किङ्करीभिरस्माभिरिति विपरिणाम इत्यभ्युपगमात् ॥ २१ ॥

दृशां दूरे वर्तीत्यस्य दृशामविषय इत्यर्थः । एतेन भगवतः सर्वगतत्वेन दृशां समीपे विद्यमानत्वात् दृशां दूरे वर्तीति कथनमयुक्तमिति चोद्यं निराकृतम् । दृशां दूरे वर्तीत्यनेन दृग्दूरवर्तित्वकार्यस्य दृगविषयत्वस्य गृहणात् ॥ ३४ ॥

यतः कृष्णो रतिविशेषज्ञो रतौ प्रीतिमांश्च पुरयोषितां प्रियश्चातस्तद्वाक्यैः पुरयोषित्प्रयुक्तवाक्यैर्विभ्रमैर्विलासैश्चानुभाजितः सम्यक् पूजितःसन् कथं नानुबद्ध्येतेति । एतेन रतिविशेषज्ञानवद्रतौ प्रीतिमत्त्वस्यापि स्त्रीवाक्यादिना बद्धत्वं प्रति योजकत्वाद्रतौ प्रीतिमांश्चेति वक्तव्यमिति शङ्काऽनवकाशः । रतिविशेषज्ञशब्दस्य रतिप्रीतिमत्वोपलक्षकत्वमित्यङ्गीकारात् । एतेन पुरयोषित्प्रियत्वस्य

पुरयोषिद्वाक्यादिना बद्धत्वं प्रति योजकत्वाभावात् । पुरयोषिदित्येतद्व्यर्थमिति चोद्यं निरस्तम् । पुरयोषितां प्रियत्वस्य पुरयोषिद्वाक्यप्रयोगादिकं प्रति हेतुत्वमित्यभ्युपगमात् ॥ ४१ ॥

इति श्रीभागवतटिप्पण्यां पञ्चचत्वारिंशोऽध्यायः ॥ १०-४५ ॥

पुनरित्यस्य सभाजित इत्यनेनान्वयः । एतेन वृन्दावनान्मधुरां प्रत्यागमनस्यावृत्तेरभावात्पुनरागच्छदिति कथनमनुपपन्नमिति दूषणं प्रत्युक्तम् । पुनःशब्दस्य सभाजित इत्यनेनान्वयमभ्युपेत्य पुनः सभाजित इत्युच्यत इत्यूरीकरणात् ॥ १६ ॥

इति श्रीभागवतटिप्पण्यां षट्चत्वारिंशोऽध्यायः ॥ १०-४६ ॥

अनुलेपार्पणपुण्यलेशयेत्येत्यस्यानुलेपार्पणस्य क्रियारूपपुण्यलेशो यस्याः सा तयेत्यर्थः । एतेनानुलेपार्पणक्रियाजन्यपुण्यस्य महत्त्वात् । अनुलेपार्पणपुण्यलेशयेति कथनमनुपपन्नमिति दूषणं परास्तम् । अनुलेपार्पणक्रियाजन्यादृष्टरूपपुण्यस्याल्पत्व मुच्यत इत्यनङ्गीकृत्यानुलेपार्पणाख्यक्रियारूपपुण्यस्याल्पत्वमुच्यत इत्यङ्गीकारात् ॥ ७ ॥

सा सैरन्ध्री एवं पूर्वोक्तरीत्याऽङ्गरागार्पणेन गन्धार्पणक्रियाजन्यादृष्टरूपमहापुण्येन कैवल्यनाथं दुष्प्रापं प्राप्तुमशक्यमीश्वरं श्रीब्रह्मरुद्रेन्द्रादिसर्वेश्वरं प्राप्य दुर्भगा दुरदृष्टा सतीदं वक्ष्यमाणमयाचत । अहोऽत्याश्चर्यम् । इदं किमयाचतेत्यत आह ॥ **अहो इति** । हे प्रेष्ट अतिशयेन प्रिय । इह मद्गृहे कतिचिद्दिनान्या सम्यक् । अविच्छेदेनेति यावत् । मया सहोष्यतां रमस्व । हेऽम्बुरुहेक्षण ते सङ्गं त्यक्तुं नोत्सह इति । एतेनेदमयाचतेत्यनेन पूर्णत्वात् । आहेत्येतद्व्यर्थमिति दूषणं पराकृतम् । आहोष्यतामित्यत्र आह उष्यतामिति पदद्वयमित्यनङ्गीकृत्य आ अहो उष्यतामिति पदत्रयमुष्यतामित्युकारस्य छान्दसपूर्वरूपत्वं चेत्यभ्युपगमात् ॥ ९,१० ॥

अवतीर्णः स्वांशेनेत्यस्य स्वस्य स्वतन्त्रस्य नारायणस्यांशत्वेन युक्तस्त्वमवतीर्णःप्रादुर्भूत इत्यर्थः । एतेन कृष्णस्य नारायणांशत्वेन कृष्णांशत्वाभावात् । स्वांशेनावतीर्ण इति कथनमयुक्तमिति चोद्यं निरस्तम् । स्वातन्त्र्यात्स्व इति प्रोक्त इति प्रमाणानुसारेण स्वशब्देन नारायणं गृहीत्वांऽशशब्दस्य भावप्रधानत्वं युक्त इत्यध्याहारं च स्वीकृत्य नारायणांशत्वेन युक्तस्त्वमवतीर्ण इत्यर्थस्योक्तत्वात् ॥ २५ ॥

यद्यस्मात्सर्वदेवपितृभूतनृदेवमूर्तिः सर्वदेवादिनियमनार्थं सर्वदेवादिशरीरान्तर्गतो यस्माज्जगद्गुरुश्चातो भगवान् याः प्रविष्टस्ता नो वसतय आद्य भूरिभागा इत्येतत् खलु प्रसिद्धमिति ॥ २६ ॥

स पूर्वोक्तगुणविशिष्टो भगवान् सुहृदां नोऽस्माकं किञ्चिच्छ्रेयश्चिकीर्षया कस्यचिच्छ्रेयसः कर्तुमिच्छया सर्वदा तिष्ठति । अतः पाण्डवानां जिज्ञासार्थं विचारार्थं गजसाह्वयं त्वं गच्छस्वेति । एतेन

भवान्गच्छति इति वक्तव्यं भवान्गच्छस्वेति वचनमयुक्तमिति चोद्यं परास्तम् । भवानित्यस्य गच्छस्वेत्यनेनान्वयमनङ्गीकृत्याध्याहृतेन सर्वदा तिष्ठतीत्यनेनान्वयस्योक्तत्वात् । एतेनैव महाश्रेयश्चिकीर्षयेति वक्तव्यं किं चिच्छ्रेयश्चिकीर्षयेति कथनमनुपपन्नमिति दूषणं परास्तम् । किञ्चिदित्यस्याल्पत्वार्थमित्यनङ्गीकारात् ॥ ३३ ॥

इति श्रीभागवतटिप्पण्यां सप्तचत्वारिंशोऽध्यायः ॥ १०-४७ ॥

कुरूणां कीर्तिवर्धन । भो भो विचित्रवीर्य । सत्पुरुषो भ्रातर्युपरते सति बन्धूनां विषये समं यथा भवति तथाऽऽस्थितोऽवस्थितो भवति । अतो भ्रातरि भ्रातुः पाण्डौ पाण्डोरुपरतत्वात् । बन्धूनां पाण्डवानां विषये त्वं सममास्थितो भव । अधिकं वदन्साम्यावस्थानस्य फलमाह ॥ **धर्मेणेति** । एतेन भ्रातुः पाण्डोः पूर्वमेवोपरतत्वाद्भ्रातुः पाण्डोरुपरत्वात्समास्थितो भवेदिति वक्तव्यम् । भ्रातरि पाण्डावुपरते सति समास्थितो भवेति कथनमनुपपन्नमिति दूषणं पराकृतम् । भ्रातरीत्यस्यार्थवशाद्विपरिणामः पाण्डाविति सप्तमी षष्ठ्यादेश उपरतत्वादित्यस्याध्याहार इति चाङ्गीकृत्य भ्रातुः पाण्डोरुपरतत्वाद्बन्धूनां विषये समास्थितो भवेत्यर्थस्योक्तत्वात् ॥ १७ ॥

हे प्रभो राजन् धृतराष्ट्र । तस्मात्स्वधर्मविमुखानां तमःप्रवेशस्य विद्यमानत्वात् । स्वप्नमायामनोरथमनित्यत्वादिना स्वप्नादिसदृशमिमं लोकं दुर्योधनादिलोकं सम्भजन् सम्यक् भजन् । पाण्डवान्क्रमेण भञ्जन्निति यावत् । भवांस्तमो वेक्ष्यति । अतो दुर्योधनादिषु पाण्डवेषु समः सन् आत्मनाऽन्तःकरणेनात्मानं परमात्मानं सम्भजन् सम्यक् भजन् शान्तो भवमुक्तो भवेति । एतेनेमं लोकमित्येतदनन्वितमिति दूषणं परास्तम् । तमो विशतीत्यत्र विशतीत्यस्यार्थवशाद्वेक्ष्यतीति विपरिणाममङ्गीकृत्येमं लोकं सम्भजन् भवांस्तमो वेक्ष्यतीत्यन्वयस्योक्तत्वात् ॥ २५ ॥

वदसीत्यस्य वदतीत्यर्थः । एतेन भवान्वदतीति वक्तव्यं भवन्वदसीति कथनमयुक्तमिति दूषणं परिहृतम् । तिङा च तिङिति वचनात् । वदतीति प्रथमपुरुषैकवचनस्य वदसीति मध्यमपुरुषैकवचनादेश इत्यभ्युपगमात् ॥ २६ ॥

स यादवोऽक्रूरो नृपतेरभिप्रायमिति पूर्वोक्तरीत्या पुनः पुनरभिप्रेत्यातिप्रकर्षेण ज्ञात्वा सुहृद्भिः समनुज्ञातःसन् यदुपुरीमगादिति । एतेन नृपतेरभिप्रायं ज्ञात्वेति वक्तव्यम् । नृपतेरभिप्रायमभिप्रेत्येति कथनमयुक्तमिति चोद्यं परास्तम् । अभिप्रेत्येत्यस्याभिप्रायं कृत्वेत्यर्थमनङ्गीकृत्याभिप्रेत्येत्यस्यातिप्रकर्षणार्थत्वं गत्यर्थे अण्धातोर्ज्ञानार्थत्वं चाङ्गीकृत्याभिप्रेत्येत्यस्यातिप्रकर्षेण ज्ञात्वेत्यर्थ इत्युक्तत्वात् । एतेनैव पूर्वं यदुपुरीं प्रति गमनाभावात् । यदुपुरीं पुनरगादिति कथनमनुपपन्नमिति दूषणं निरस्तम् ।

पुनःशब्दस्यागादित्यनेनान्वयमनङ्गीकृत्यावृतिमभिप्रेत्येत्यनेनान्वयं चाङ्गीकृत्य पुनः पुनर्ज्ञात्वेत्यर्थ-स्योक्तत्वात् ॥ ३० ॥

इति श्रीभागवतटिप्पण्यामष्टाचत्वारिंशोऽध्यायः ॥ १०-४८ ॥

इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाऽभिनवताण्डवाभिनवगदाऽभिनवामृतादि बहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथश्रीचरणानां शिष्येण सत्याभिनवयतिना त्वया भागवतटिप्पणिं कारयिष्यामीति तदीयामोघसंकल्पमात्रमवलंब्य कृतायां श्रीमद्भागवतटिप्पण्यां दुर्घटभावदीपिकायां दशमस्कन्धे पूर्वार्धः समाप्तः ॥ १० ॥

श्रीकृष्णार्पणमस्तु ॥

श्रीभागवते पाङ्गरी श्रीनिवासाचार्यकृतविरोधोद्धारे दशमस्कन्धः

श्रीमद्धनुमद्भीमध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ अत्र विरोधोद्धारे दशम स्कन्धस्य क्रमप्राप्तेऽपि प्रसङ्गादघासुरवधाद्यध्यायत्रयस्य प्रक्षिप्तत्वं श्रीश्रीनिवासार्यैरेव साधितमत्र लिख्यते । अथ केचन श्रीमद्भगवन्मायामोहिता अघासुरवधप्रतिपादकाध्यायत्रयं भागवताङ्गं ब्रुवते । तन्न । प्रक्षिप्तत्वात् । तथा हि । सर्वसंमतेन श्रीधरेण भागवतटीकारम्भसमये कल्पद्रुमसाम्येन भागवत स्तुतिः कृता । तत्रेदं पद्यम् । श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः सज्जनिः स्कन्धैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः । द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्ट-दशेष्टदोऽतिसुलभोवर्वर्ति सर्वोपरीति । अत्र द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखा इत्यनेन भागवतस्थत्रिंशदधिकशतत्रयाः प्रोक्ताः । कृतायां तु गणनायां पञ्चत्रिंशाधिकत्रिशताध्याया भवन्ति । तदित्थम् । प्रथमस्य(१९) ॥ द्वितीयस्य(१०) ॥ तृतीयस्य(३३) ॥ चतुर्थस्य(३१) ॥ पञ्चमस्य (२६)॥ षष्ठस्य (१९)॥ सप्तमस्य(१५) ॥ अष्टमस्य(२४) ॥ नवमस्य(२४) ॥ दशमस्य (९०) ॥ एकादशस्य(३१) ॥ द्वादशस्य(१३) ॥ एवं मिलित्वा त्रिशतोपरिपञ्चत्रिंशत्सङ्ख्या भवति (३३५) । तस्मात्पूर्वप्रतिज्ञाताध्यायापेक्षयाऽध्यायत्रयस्याधिक्यात्ज्ञायतेऽध्यायत्रयमिदं प्रक्षिप्तमिति ।

न च वाच्यं च कारेणाध्यायत्रयस्यापि सङ्ग्रहः पूर्वप्रतिज्ञायामेव कृतमिति । चशब्दोपात्तसङ्ग्रहस्य निरङ्कुशत्वेनाधिकस्य न्यूनस्य वा कर्तुं सुशकत्वात् । चशब्दस्य सङ्ग्रहार्थत्वे समुच्चयार्थकत्वाभावेन द्वात्रिंशतमित्यस्य द्वात्रिंशद्गुणितं त्रिशतमित्यर्थप्रसङ्गाच्च । दाशरथिवनवासप्रकरणे वर्षाणि नवपञ्च चेत्यत्रापि चकारेण चतुर्वर्षाधिक्यप्रसङ्गाच्च । अत्राध्यायत्रयोपलब्ध्याऽन्यत्र चतुर्वर्षाधिक्यानुपलब्ध्या च

नैवमिति चेन्न । उपलब्धेरेव सर्वासंमतत्वेन सन्दिग्धत्वादसिद्धेः । अन्योन्याश्रयत्वाच्च । सत्यां चाध्यायत्रयोपलब्धौ चकारस्याध्यायत्रयसङ्ग्रहार्थकत्वनिश्चयसिद्धिः । तत्सिद्धौ चाध्यायत्रयनिश्चयोपलब्धिसिद्धिरिति । ननु मास्तु चशब्देनाध्यायत्रयसिद्धिः । तथाऽपि द्वात्रिंशत्त्रिशतमित्यत्र त्रिशब्दस्य पुनरावृत्त्या त्र्यधिकं त्रिशतमित्यर्थोपपत्त्या पञ्चत्रिंशदधिकत्रिशताध्यायसिद्धेरिति चेत् । मैवम् । कल्पनागौरवात् । पद्ये द्वितीयत्रिशब्दाभावेन त्रिशब्दस्य कल्पनैव कार्या । ततोऽधिकशब्दस्यापि कल्पनम् । तेन पञ्चत्रिंशदधिकत्रिशताध्यायकल्पनमिति । न च वाच्यं गौरवं न दूषणम् । अन्यथाऽनुपपत्तेरिति । अध्यायत्रयाभावकल्पनस्यैव लाघवादन्यथाऽप्युपपत्तेः । ननु व्यासप्रोक्तस्यैव वस्तुतत्वात् द्वात्रिंशत्त्रिशतमित्युक्तिः पूर्वप्रतिज्ञातायाम् गणनायामध्यायत्रयाधिक्यं तु भागवतान्ते सूतप्रोक्तत्वादिति चेन्न । अन्त्याध्यायद्वयस्यैव सूतप्रोक्तत्वात् । अन्यथा महापुरुषविन्याससूर्यादिसप्तकप्रतिपादकाध्यायस्य व्यासप्रणीतत्वेनाख्यानद्वयस्यानुक्रमणिकायामभावः प्रसज्येत । न हि तथाऽत्रास्ति । महापुरुषविन्यासः सूर्यस्य जगदात्मन इति चोक्तम् । द्विजश्रेष्ठोऽहमिहास्मि व इत्युक्तेः । अत्रेतिशब्दस्य सूर्यादिसप्तकाख्यानान्ते भागवतसूचकत्वाच्च । ननु भागवतस्य द्वात्रिंशदधिकत्रिशताध्यायत्वेऽपि नाघासुरवधवत्सहरणब्रह्मस्तुतिप्रतिपादकाध्यायप्रक्षेपः सिध्यति । किंतु त्र्यध्यायात्मकस्याजामिलोपाख्यानस्य भागवतानन्तर्भूतत्वाद्द्वात्रिंशत्त्रिशतमित्युक्तिः । यत इतिहासमिमं मह्यं भगवान्कुम्भसम्भवः । कथयामास मलय आसीनो हरिमर्चयन्निति शुकोक्तेरिति चेत् । मैवम् । षष्ठस्कन्धस्यैकोनविंशत्यध्यायप्रतिज्ञाव्याहतेः । न च वाच्यं षष्ठस्तु षोडशाध्यायात्मकोऽध्यायत्रयं तु बाह्यमिति । तथा सूचितत्वाभावात् । अस्येतिहासस्य शुकायागस्त्योक्तत्वेऽपि व्यासग्रथितत्वसम्भवाच्च । कृष्णोक्ताया अपि व्यासग्रथितत्ववत् । किञ्चेतिहासारम्भस्तु कान्यकुब्जो द्विजः कश्चिदित्येतस्माच्छ्लोकादेव । तत्पूर्वश्लोकानां तु भागवतसम्बन्धोऽस्ति वा नास्ति । नाद्यः । अध्यायानां षोडशत्वानुपपत्तेः । न चोत्तराध्यायस्याङ्गम् । असङ्गतेः । न द्वितीयः । निवृत्तिमार्गः कथित इत्याद्यनुवादानुपपत्तेः । तस्मादजामिलाऽख्यानस्य बाह्यत्वासिध्या द्वात्रिंशत्त्रिशतमित्यध्यायसङ्ख्यासिध्यर्थं सेत्स्यत्येवाध्यायत्रयप्रक्षेपः । स्यादेवं यदि वयं श्रीधरोक्तस्य श्लोकस्यैव प्रामाण्यमङ्गीकुर्मः । येनाध्यायत्रयप्रक्षेपसिद्धिः । तदेव नास्तीति चेत् । तथात्वे सर्वटीकाया एवाप्रामाण्यसङ्गात् । यस्य हि ग्रन्थस्य प्रारम्भ एव ग्रथिताप्रामाण्यं तद्ग्रथितस्य सर्वस्याप्यप्रामाण्यं कथं न भवेत् । स्यादेतत् । यदि ग्रन्थारम्भेऽप्रामाण्यं स्यात् । तन्नास्त्येव । यतो द्वात्रिंशच्च त्रयश्च त्रिशतानि चेति व्युत्पत्तेर्विवक्षा । अनयाऽपि कथं सङ्ख्यासिद्धिरिति चेत् । मैवम् । शतानीति बहुवचनस्य त्रित्वे पर्यवसानात् । अपर्यवसितबहुत्वस्य त्रित्वे पर्यवसानमिति न्यायात् । इति चेन्न । गौरवानिस्तारात् । त्रिशब्दस्य पार्थक्यकल्पनम् । शतशब्दस्य बहुवचनकल्पनम् । बहुवचनस्य त्रित्वकल्पनमिति । गौरवं न दोषाय ।

अन्यथाऽनुपपत्तेरिति चेन्न । द्वात्रिंशदधिकत्रिशताङ्गीकारेण लाघवस्याप्युपपत्तेः । किंच न्यायः सर्वत्रोपादीयते अथवा क्वचित् । नाद्यः । ब्राह्मणान्भोजयेत्पश्चात्साङ्गतार्थं हि कर्मण इत्यत्रापि ब्राह्मणत्रयस्यैव भोज्यत्वापत्तेः । द्व्यवरान्भोजयेद्विप्रानित्यत्र विप्रशब्दबहुवचनेनैव त्रित्वलाभे पुनर्द्व्यवरशब्दस्य वैयर्थ्यप्रसङ्गाच्च । द्वौ अवरौ अल्पौ येभ्य इति व्युत्पत्तिः । चतुर्थ प्रभृतीनां तु अपर्यवसितत्त्वेनाङ्गीकारायोगात् द्व्यवरशब्देन त्रित्वमेव सिध्यतीति । तस्य बहुवचनेनैव सिद्धत्वे विशेषणवैयर्थ्यं सुस्थमेव । त्रीणि त्रीणि वै देवानामृद्धानि त्रीणि छन्दा॑ँसि त्रीणि सवनानि त्रय इमे लोका इत्यत्र सर्वत्र त्रिशब्दानां वैयर्थ्यप्रसङ्गाच्च । फलानि समिधः कुशानित्यत्रापि फलादीनां त्रयस्यैव हरणापत्तेश्च । यो भूतानामधिपतयो रुद्रस्तंतिचरो वृषेत्यत्र च भूतत्रयाधिपतित्वमेव रुद्रस्य श्रुतिप्रतिपादितं स्यात् । अन्येषां भूतानां च रुद्रानधीनता स्यात् । अस्तु क्वचित्कपिञ्जलाहरणादौ सार्थकमुपादानम् । अत्र मास्तु । नियामकाभावात् । अत्र शतत्रयोपलब्धिरेव नियामिकेति चेत् । सा च श्रवणादिना विना न भवति । श्रवणादिप्रवृत्तिश्च सुलभेष्टसाधनताज्ञानं विना न भवति । सुलभेष्टसाधनज्ञानं तु एतस्मात्पद्यादेव । इष्टदोऽतिसुलभ इत्युक्तत्वात् । एतत्पद्यप्रामाण्यसिद्धिस्तु तदाशयाध्यायोपलब्ध्वा । एवं चक्रकापत्त्या तस्याप्यसिद्धेः । सुलभेष्टसाधनताज्ञानहेतुत्वं नास्यैव पद्यस्य अन्यस्यापि सम्भवान्न चक्रकापत्तिरिति चेन्न । इष्टदत्वातिसुलभत्वप्रतिपादनस्य व्यर्थत्वेनाप्रामाण्यप्रसङ्गात् । इष्टदत्वादिप्रतिपादनं हि श्रोतृप्रवृत्तिजननार्थमेव । तस्मादुभयथाऽपि न्यायस्योपादेयताभावाद्व्युत्पादितार्थासिध्या प्रामाण्याभावो शक्यसाधन इति । किं चाद्यादि विषयाध्यायत्रयान्तिमश्लोकस्य तत्पूर्वाध्यायान्तिमश्लोकस्य च । एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः । इत्याकारकस्यैकत्वेनापि प्रक्षेपोऽध्यायत्रयस्य सिध्यति । प्रक्षेपकेण हि सङ्गत्यर्थं पूर्वाध्यायान्तिमश्लोकस्य गृहीतत्वात् । अन्यथाऽसङ्गत्यैव । प्रक्षेपज्ञानस्य सुशक्त्वात् । नन्वेकस्यैव श्लोकस्य पुनर्ग्रहणेन तन्मध्यवर्तिनो ग्रन्थस्य प्रक्षेपाभ्युपगमे नामकर्णप्रकरणे आसन्वर्णास्त्रयो ह्यस्येत्यादीनां श्लोकानां पुनर्गोवर्धनोद्धरणप्रकरणे गृहीतत्वेन तन्मध्यवर्तिग्रन्थस्यापि तथात्वं स्यात् । न च तथा । तस्मादेतस्याप्यध्यायत्रयस्य तद्दृष्टान्तेन प्रक्षेपासिद्धिरिति । मैवम् । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । दृष्टान्ते हि आसन्वर्णा इत्यादीनां नामकर्णप्रकरणे गर्गोक्तत्वेन गोवर्धनोद्धारणप्रकरणे च नन्दानूदितत्वेन वक्तृभेदः । दार्ष्टान्तिके च वक्तृभेदाभावः । उभयत्रापि शुकोक्तेरेवेति गर्गनन्दवाक्ययोः शुकेनानूदितत्वात् ।

अपि च समाख्याभावाच्च प्रक्षेपः सिध्यति । तथा हि । द्वितीये ब्रह्मणा कृष्णकर्माणि नारदायोपदिष्टानि । तृतीये उद्धवेन विदुराय । दशमे गोवर्धनोद्धारे गोपोक्तानि रङ्गसभायां च सभास्थैर्वर्णितानि । द्वादशे च सूतेन सङ्ग्रहोक्तानि । तेषां मध्ये अघाद्याख्यानस्य क्वाप्यदृष्टत्वात् । न

च वाच्यं दशम एव प्रलम्बकचाणूरतृणावर्तमहाशनैरित्यत्र महाशनशब्देनाघासुरगृहीतत्वात्समाख्याऽस्तीति । महाशनैशब्दस्याघासुरशब्दवाच्यत्वे प्रमाणाभावात् । तर्हि महाशनशब्देन को गृह्यते । कुवलयापीड इतिं ब्रूमः । कुतः । महान्पूज्यत्वेन वा स्वजातिश्रेष्ठत्वेन पिप्पलः सोऽशनं भक्षणं यस्येति व्युत्पत्त्या युक्तत्वात् । कुञ्जरः पिप्पलाशन इत्युक्तेः । यद्वा । प्रलम्बादीनामेव महाशन शब्दवाच्यकामक्रोधादिरूपम् । उक्तं च गीतासु । काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मेत्यादि । कामक्रोधादयो दैत्या देवाः शमदमादय इति च । ननु मास्तु भागवते समाख्या । तथाऽपि अन्येषां बहूनां ग्रन्थानां विद्यमानत्वेन स्यात्कचिदिति चेन्न । भारते हरिवंशे चाघासुरवधाख्याभावेन सर्वत्राप्यभावात् । उक्तं च ब्रह्माण्डे । तस्माद्धि भारते नोक्तं तद्धि नैवास्ति कुत्रचित् । अत्रोक्तं सर्वशास्त्रेषु न हि सम्यगुदाहृतमिति । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्कचिदिति च महाभारते । एवमेतत्प्रक्षेपसिद्धौ ग्रन्थसङ्ख्याऽपूर्तिः स्यादिति चेन्न । प्रक्षेपकेण हि पूर्वमिदं प्रक्षिप्य ग्रन्थसङ्ख्यालोचने आधिक्यभिया पारिजातहरणस्योद्धापात् । न च वाच्यं तस्यैव प्रक्षेप इति । हरिवंशादौ समाख्यासद्भावात् । तस्मादिदमेव प्रक्षिप्तमिति सिद्धम् ॥

इत्यघासुरवधाद्यध्यायत्रयप्रक्षेपसाधनं समाप्तम् ॥

कथितेति । अत्र राज्ञा श्रुतनवमस्कन्धानुवादः कृतः । तत्र पूर्वं सूर्यवंशकथनेऽत्र सोमसूर्ययोरिति व्यत्ययेनोक्तमतो विरोधोऽत उच्यते । अल्पाच् तरमिति सूत्रेण सोमशब्दस्य सूर्यशब्दादर्धमात्रालाघवेन सायंप्रातःशब्दयोर्मध्ये सायंशब्दस्येव पूर्वनिपातौचित्यम् । यद्वा । अभ्यर्हितं पूर्वमिति सूत्रेण सोमवंशस्य स्वसंनिहितकृष्णावतारेणाभ्यर्हितत्वात्तच्छब्दस्य पूर्वमुक्तिः । अथवा । सोमस्य स्ववंशमूलपुरुषत्वेनाभ्यर्हितत्वाभिमानात्तथोक्तिरतो न विरोधः ॥ १ ॥

यदोरिति । अत्र यदोर्नितरां धर्मशीलत्वमुक्तम् । तदयुक्तम् । जरायौवनव्यत्यासार्थं पितृकृताज्ञालङ्घनात् । मैवम् । स्वयौवने स्वमातृभोगापेक्षया पित्राज्ञाभङ्गस्यानधिकपापवहत्वात् । तर्हि पुरोरयं दोषः स्यादिति चेन्न । सापत्नमातुः पितृद्वारा सम्बन्धसत्वेन तदाज्ञापालनस्यैवौचित्यात् । तस्माद्यदुकृतपित्राज्ञाभङ्गेन न धर्मशीलत्वहानिः । प्रकृतयदोरिति विचारवत्त्वादेव नितरामिति विशेषितम् । अन्यथा तद्वंशे कृष्णावतारासम्भवात् ॥ २ ॥

अवतीर्येति । पूर्वश्लोके विष्णोर्वीर्याणि शंस न इत्युक्तत्वेऽपि अत्र तानि नो वदेत्युक्त्या पुनरुक्तिरित्यत उच्यते । पूर्वश्लोके कृते प्रश्ने जातो गतः पितृगृहादिनोक्तमेव पुनः किं पृच्छसीत्याशङ्क्य पृच्छति । यद्यपि पूर्वस्कन्धान्ते संक्षिप्योक्तं तथापीदानीं विस्तराद्वदेति प्रश्नेन न पुनरुक्तिः ॥ ३ ॥

ननु विस्तारकथने विषयतृष्णया प्रवाहितस्य वक्तुः सांसारिकतापपरिजिहीर्षोः प्रष्टुर्योग्ययोगिभेदेन

द्विविधश्रोतॄणां मध्ये मनःसमाधानापेक्षकानां योगिनामिन्द्रियतृप्त्यपेक्षकाणामयोगिनां चावसराभावात्कथमिदं घटत इत्याशङ्क्य समाधत्ते ।। **निवृत्तेति** । यद्यपि पापापरिहारकाल्पकीर्तेः पुंसो गुणानुवादे कश्चन विरज्येत तथाप्युत्तमश्लोकगुणानुवादात्पापनाशकमहाकीर्तेर्विष्णोर्गुणानामद्भुत चरितानुवादात् पुनः पुनः कथनप्रश्नश्रवणादिरूपात्मकः पुमान् विरज्येत अलम्बुद्धिमान् भवेत् । न कोऽपीत्यर्थः । तत्र हेतुगर्भाण्यधिकारिभेदेन त्रीणि विशेषणानि निवृत्ततर्षैर्भवद्भिः । उपगीयमानात् कथ्यमानात् । भवतां विषयतृष्णाभावेन कथने वक्तुरवसरप्राप्तिरिति भावः । भवस्य तज्जन्यतापानां च औषधात् । उष दाह इति धातोः । दाहकत्वादित्यर्थः । अनेन पृच्छकस्य ममाप्यवसरसिद्धिश्च सूचिता। श्रोत्रमनोभिरामात् । योगिनामत्रागतानां श्रोतॄणां मुनीनां मनःसमाधानहेतोरयोगिनां केवलेन्द्रियतर्पकाणां श्रोतॄणां श्रोत्रेन्द्रियरुचिकरात् । अनेन द्विविधश्रोतॄणामप्यवसरप्राप्तिः सूचिता । तस्माद्विस्तरकथनादिषु न विराग इति भावः । नन्वत्र विरक्तोऽपि कश्चिद्दृश्यत इत्यत आह ।। **विनेति** । पशुघ्नात् । पशुरिति विष्णुदीक्षाराहित्येन जीवन्मृत इति ज्ञायते । स पशुघ्नः । हन हिंसागत्योर्गत्यर्थानां च ज्ञानार्थत्वात् । उक्तं च । ''ते नराः पशवो लोके किं तेषां जीवने फलम् । यैर्न लब्धा हरेर्दीक्षा सर्वबन्धविमोचनीति'' कृष्णामृतमहार्णवे । तस्माद्विना न कोऽपि विरज्येतेति । यस्तत्र विरक्तः स तु जीवन्मृत इति भावः । यद्वा । पशुघ्नः पशुहत्यादिभिः केवलयज्ञादिकर्मणि

निष्ठावान्ज्ञानशून्यः । यद्वा । अपशुघ्नादिति पदम् । अपगताः शुचो जीवगतशोकोपलक्षितसर्वदोषा यस्मात्तं हरिं हन्तीति । ईश्वरोऽहमहं भोगी यस्त्वया मन्दभाग्योक्तो, मदन्यो जगदीश्वरः कोऽसावित्यादिना चेश्वराभावकल्पनरूपां हत्यामाचरति तस्मात्पापरूपाद्विनेति । अथवा । पुमान् पुवर्ण आदौ यस्यास्तीति पुरुषोत्तम इत्यर्थः । यद्वा पूर्णषड्गुणः । पुंनामा भगवान्विष्णुर्यतोऽसौ पूर्णषड्गुण इत्युक्तेः । तादृशो विष्णुः । श्लोकगुणानुवादात् स्वकीर्त्यादिगुणाद्धेतोस्तमुद्दिश्येत्यर्थः । शुघ्नात् शोकनाशकवैकुण्ठात् । विना गरुडेन । आप प्राप्तोऽभूत् । विनेत्यावृत्तिपक्षे गरुडेन विनेत्यर्थः । अनेन कथाश्रवणे उत्सुकता मर्यादा च सूचिता । अतस्तस्मात्क उत्तमो विरज्येत । यो विरज्येत स नोत्तमः किन्तु नीच इति भावः । किंवा । भवौषधात् रुद्रस्यौषधाद्विषतापहारकाद्रामायणात् । श्रोत्रमनोभिरामात् कर्णान्तःकरणमनोहरात् भारतात्सकाशादपि । पशुघ्नात् पस्य व्यासस्य शोकनाशकात् । तथाऽपि नात्मा परितुष्यते इत्यादिना व्यासमनस्तोषसाधकत्वात् । निवृत्ततर्षैः । न मे कर्मफले स्पृहेत्यादिभिस्तृष्णारहितैः भगवद्ब्रह्मनारदव्यासशुकैः । उपगीयमानादुत्तमश्लोकगुणानुवादात् । अत्रानुवर्ण्यतेऽभिक्ष्णम् इत्यादिना पुण्यश्लोकगुणानामनुवेलं वादो वर्णनं यस्मिंस्तस्मात् भागवतात् के सुखविषये । अपेक्षक इति शेषः । यः पुमान्नरः विरज्येत सः विना विरुद्धः पुरुषः पुरुषो न भवति किंतु पशुरिति भावः ।। ४ ।।

द्रौण्यस्त्रेति । अत्र धार्तराष्ट्रस्य सन्तानस्यानपेक्षितत्वेऽपि कुरुशब्देन तेषां ग्रहणं कथमित्याक्षेपापाकरणायार्थ उच्यते । यः श्रीकृष्णः दौण्यस्त्रदग्धमिदं मदंगं पाण्डवानाम् सन्तानबीजं वंशयव्यञ्जकम् । कुर्विति शरणं गताया मे मातुः । कुक्षिंगत उदरं प्रविष्टः । तत्रापि । आत्तचक्रः । चक्र दीप्ताविति धातोः । दीप्तगदाभ्रमणेनालातचक्रवद्दर्शनादात्तचक्र इत्युक्तिः । अन्यथा प्रथमस्कन्धोक्तेन परिभ्रमन्तमुल्काभां भ्रामयन्तं गदा मुहुरित्यनेन विरोधः स्यात् । तस्मात्तथा सन् जुगोप । तस्य वीर्याणि वदस्वेत्युत्तरेणान्वयः ॥ ६ ॥

वीर्याणीति । पूर्वत्र वीर्याणि शंस न इत्यनेन सामान्योक्तौ वद विस्तरादित्यनेन च विस्तररूपविशेषप्रश्नसिद्धौ पुनरत्र वदस्व विद्वानित्यनेन पुनरुक्तापात इति चेन्न । पूर्वत्र यद्यपि सामान्यविशेषविषयौ प्रश्नौ द्वावपि कृतौ ताववतारविषयौ । तत्रांशेनावतीर्णस्येति यदोर्वंश इति चोक्तेः । तथाप्यत्र देह्यन्तर्बहिष्ठत्वोक्तेर्मूलरूपवीर्यविषयकप्रश्नेन विशेषसिद्धेः । न च मायामनुष्यस्येत्यनेन विरोधः । मायेतीच्छा समुद्दिष्टेति वचनान्मायया स्वेच्छया मनुष्या मनुष्यावतारा यस्मादिति व्युत्पत्त्या मूलरूपस्यैव सिद्धेः । नाप्युत्तराभावात्प्रश्नवैयर्थ्यमत्र शङ्क्यम् । शिवसंकटमोचकत्वभृगुवत्सलत्वश्रुतिस्तुतित्वाद्युक्तेः । ततश्चायं श्लोकार्थः ॥ **अखिलदेहभाजाम्** । सर्वप्राणिनाम् । अन्तर्बहिः । पुरुषकालरूपैः । नन्वत्रान्तर्बहिरेकैकरूपसत्त्वेन द्विवचनसम्भवेऽपि रूपैरिति बहुवचनमयुक्तमिति चेन्न । शरीरान्तःस्थद्विसप्ततिसहस्रनाड्यादिषु प्रातिस्विकत्वेन स्थितसूक्ष्मादिद्विपरार्धपर्यन्तकालावयवादिषु प्रातिस्विकत्वेन स्थितरूपाणामनेकत्वात् । तथा च शरीरान्तःस्थनाडीन्द्रियादिगतैरत एव पुरुषशब्दवाच्यै रूपैः ॥ **मृत्युम्** । देहवियोगलक्षणरूपमृत्यूपलक्षितदेहसम्बन्धरूपजन्मादिलक्षणसंसारम् । प्रयच्छतः प्रकर्षेण यमयतः । यावद्भगवान्स्थूलनाडीन्द्रियान्तःस्थित्वा तानि देहभाग्भिः प्रवर्तयति तावत्संसारोऽत्रापगच्छतीति भावः । तथैव शरीरबहिःस्थातिसूक्ष्मतमादिपरान्तकालावयवस्थैरत एव कल छेदने कल कामधेनावित्यादिधातुभ्यः । संसारच्छेदकत्वेन मोक्षकामपूरकत्वेन कालसंज्ञकै रूपैः ॥ **अनामयम् आरोग्यं मोक्षं वा** । नास्ति नाम मृत्यु नामापि यस्मिन्सोऽनामा विष्णुर्वा । अ इति ब्रह्मेति श्रुतेः । अ शब्दवाच्यत्वाद्वा । तं याति प्राप्नोत्यनेनेति अनामयं ज्ञानं प्रयच्छतः ददतः । अमनुष्यस्य । मनुष्योपलक्षितसर्वजीवभिन्नस्य । तस्य वीर्याणि । माया । सप्तसु प्रथमेति सूत्रात् । बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यत इत्युक्त्या बहुकालसिद्धज्ञानेन भगवत्प्राप्तिरूपमोक्षो भवतीति भावः ।

अथवा । अन्तर्बहिः पुरुषकालरूपैः । अन्तःपुरुषरूपैः अन्तराकर्षणेन पुरुषसंज्ञकै रूपैरुच्छ्वासैरित्यर्थः । बहिः कालरूपैः बहिर्विसृष्टत्वेन कं कायं न लान्ति । ला आदान इति धातोः । नाङ्गीकुर्वन्तीति व्युत्पत्त्या कालसंज्ञकै रूपैर्निश्वासैः । आयुर्गणनायां तेषामेव निमित्तत्वात् । अखिलदेह-

भाजां अखिलः पूर्णो विष्णुर्देहाः संत्येषामिति देहाः । अर्श आद्यच् । जीवा इत्यर्थः । विष्णुरेव जीवा इति । भजन्ति । उपासन्ति । तेषाम् । मृत्युं संसारं तमो वा । प्रयच्छतः । मायामनुष्यस्य । महामायेत्यविद्येति नियतिर्मोहिनी चेत्यारभ्य विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्यत इति नारायणश्रुतेः । माया ज्ञानं तद्युक्तो मनुष्य इति मध्यमपदलोपीसमासः । तस्य । अनामयं मोक्षम् । प्रयच्छतः । ज्ञानिनां मोक्षदश्च इत्यनुव्याख्यानोक्तेः । मनुष्याणां सहस्रेषु कश्चिद्यतत सिद्धय इत्युक्तेर्देह-भाग्मनुष्ययोर्बहुवचनैकवचने क्रमात्ज्ञेये । अनामयं क्षेमं प्रति । क्षेमार्थमिति यावत् । अपि वा । अखिलदेहभाजां अखिलं सर्वमिष्टं ददातीति अखिलदा तथाविधा ईहा यस्य सोऽखिलदेहो हरिः तं भजताम् । अन्तर्बहिः पुरुषकालरूपैः परमाण्वंशान्तःस्थब्रह्माण्डबहिष्ठपुरुषकालख्यरूपैः । ज्ञातैरिति शेषः । पुरुषाख्यस्य भगवतो रूपैः रूप्यते एभिरिति ज्ञानैरित्यर्थो वा तैः । अमृत्युं मोक्षम् । प्रयच्छतो ददतः । अमनुष्यस्य मनुष्योपलक्षितसर्वजीवभिन्नस्य तस्य वीर्याणि । माया । सप्तसु प्रथमेति सूत्रात् । इच्छां कामितं च वदस्वेति । यद्वा । मायेति शुकं प्रति सम्बुद्धिः । मः शिवे मा रमायां चेति विश्वात् । मः शिवः आ आत्मत्वेन याति प्राप्नोतीति स तथा । मां ज्ञानं वा यातीति स तथेत्यर्थे विद्वन्नित्यनेन पुनरुक्तिः । अतो मातीति मः सर्वज्ञः स चासौ अश्च व्यासश्च तस्मात् यं ज्ञानं यस्य तत्सम्बुद्धिरित्यर्थः ॥ ७ ॥

नैषेति । अत्रोत्प्रेक्षितकमलपर्यायादम्भोजादमृतस्रवणमसम्भावितमतो विरोधोऽतोऽर्थ उच्यते । अत्रांभोजशब्दश्चन्द्रवाचकः । अब्जो जैवातृकः सोम इत्यभिधानात् । विधुः सुधांशुः शुभ्रांशुरित्य-नेनामृतकराच्चन्द्रादमृतस्रवणं युक्तमेवेति न विरोधः । किञ्च एतदन्यच्चेति पूर्वश्लोके विस्तृतं वक्तु-मर्हसीत्युक्तम् । तत्र क्षुत्तृट्पीडितस्य तव कथमवसर इत्याशङ्कय एषाऽतिदुःसहा क्षुत् त्यक्तोदमपि मां न बाधते । तत्र हेतुगर्भविशेषणं त्वन्मुखांभोजसृतं हरिकथामृतं पिबन्तमिति समाहितम् । अनेन ममापि क्षुत्तृट्परीतत्वात्कथमवसर इत्यपि परास्तम् । यद्यस्माद्बहिर्गच्छति तत्तस्मिन्नस्त्येवेति व्याप्त्या क्षुदुपशमस्यानुमेयत्वात् । यद्वा । अम्भोजशब्दः कमलार्थक एव । द्रवद्रव्ये भाजनस्थे जाते तस्य तल्लेपेन न्यूनतादर्शनेऽपि पद्मपत्रमिवांभसीत्युक्त्या तत्र लोपासम्भवेन कमलोत्प्रेक्षा मुखस्येति ज्ञेयम् । व्यासमुखाद्यावत्प्राप्तं तन्मध्ये किञ्चिदपि ऊनं न भूत्वैव सर्वं मत्कर्णोपरि पतिष्यतीत्यर्थः ॥ १३ ॥

वासुदेवेति । अत्र केचिदुपमायामुक्तकर्मासङ्गतिं ब्रुवते । तदर्थमयमर्थः । कीदृशः प्रश्नः ॥ **तत्पाद-सलिलं यथा ।** गङ्गाजलतुल्य इत्यर्थः । ननु तत्कर्मक्रिययोः सम्बन्धोऽत्रान्वेषणीयः । उपमायां सर्वसाम्याभावात् । यद्वा । तत्सम्बन्धावश्यकत्वे तु स्नानं कुर्वाणं तत्पितृपुत्रौ चेति त्रीन्पुरुषान्यथा गङ्गा पुनातीति उपमायां योज्यम् । उपमेये च वक्त्रादींस्त्रीनिति केचित्स्नातुः पितृपितामहप्रपितामहा-निति । अन्ये पितृमातृमातामहानिति वदन्ति । तदयुक्तम् । स्नातुः फलायोगप्रसङ्गात् । तस्याप्यङ्गीकारे

त्रित्वसङ्ख्योक्त्यनुपपत्तेः । अथवा । वक्त्रादीनामेवोभयत्र सम्बन्धसत्त्वापेक्षायां तु वक्तारं शुकं पृच्छकं राजानं श्रोतॄनृषिसूतादीन् त्रयाणामपि गङ्गामध्यस्थत्वेन पवित्रीकर्तुं शक्यत्वात् । जटास्थगङ्गा रुद्रावतारत्वेन शुकं वक्तारं गङ्गामध्ये प्रायोपविष्टत्वेन परीक्षितं पृच्छकं सदा यात्राप्रसङ्गात्स्नान-पानादिना ऋषीन् श्रोतॄनिति योजना । उत वा । गङ्गा यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छतीति वचनाद्वक्तारं कियद्दूरेऽस्ति गङ्गेतः, किं योगात्साऽघहारिणीति पृच्छकम् । श्रुणुयाद्गङ्गामाहात्म्यं स याति परमां गतिमिति फलश्रुतेः श्रोतॄंस्तत्पादसलिलं यथा पुनातीत्यर्थः । ननु प्रश्नादिकृतिः स्वकर्तारमेव पावयेत् । अन्यथाऽतिप्रसङ्गात् । तस्मात्प्रश्नस्य पृच्छक पावकत्वमस्तु । वक्त्रादिपावकत्वं तु कुत इति चेत् । उच्यते । वासुदेवकथाप्रश्नः श्रूयतां देवदेवेशेति वक्तृप्रार्थनया वासुदेवस्य श्रोतृत्वे सिद्धे शक्यसम्बन्धेन लक्षणया वासुदेवपदेन तद्रतश्रवणरूपो धर्मो गृह्यते । कथाशब्देन वक्तृधर्मः । प्रश्नशब्देन पृच्छकधर्मः । एकवद्भावेन वासुदेवकथाभ्यां सहित-तद्रतिः । मध्यमपदलोपीसमासेन वैकवचनोपपत्तिः । अभ्यर्हितत्वाद्वा सुदेवस्यादौ ग्रहणम् । अत एवाल्पाच्तरविरोधाभावः । ननु सहपठितेष्वेकस्यैव लक्षणायां किं निमित्तमिति चेत् । इदं ज्ञेयम् । वक्तृपृच्छकयोः प्रार्थनाभावेन वासुदेवत्वासिध्या कथंचिदपावित्र्यसम्भवेऽपि श्रोतृत्वाय प्रार्थित-वासुदेवेऽपावित्र्यस्य सर्वथाऽसम्भवात् । तत्रैव लक्षणाश्रयणं युक्तम् । तस्माच्छ्रवणादयः स्वस्वकर्तारं पुनन्तीति भावः । तत्र दृष्टान्तः ॥ **तत्पादसलिलमिति** । तनोति जगदिति तच्चतुर्मुखः । तनु विस्तारे ततःक्विप् । पातीति पो विष्णुः अत्ति जगद्भक्षयतीत्यदो रुद्रः । एते तत्पादास्तेषां सलिलं कमण्डलुजं पादजं जटोद्भवं च तत्र द्वितीयं ध्रुवादीन् आद्यं शवादीन् । तृतीयं सगरादीनिति त्रीन्पथेत्यर्थः । गिरिजादिभिस्तत्त्ववक्तृत्वाद्रुद्रस्य, नारदाय कृतप्रश्नत्वाद्ध्रुवादेः, पितुराज्ञाश्रवणात्सगरादेः । एवं विवेकेन वत्क्रादिकमप्येतेषु युज्यते इति भावः । किं चैतद्वक्तृत्वादिकर्मत्रिके वक्तरि प्रश्नश्रवणा-दुत्तरदानाच्च प्रश्नं विना वक्तृत्वश्रोतृत्वधर्मद्वयसत्त्वाच्छ्रोतरि च प्रश्नोत्तराभावादेकस्य श्रवणस्यैव सत्त्वात्पृच्छके तूत्तरदानरूपवक्तृत्वाभावरूपेऽपि प्रश्नकरणरूपवक्तृत्वस्य प्रश्नस्याप्रयोजकत्व-प्रसङ्गाच्छ्रवणस्य निजधर्मरूपस्य च सत्त्वेन धर्मत्रयस्यापि सद्भावात्पृच्छकाद्वक्तुराधिक्येऽपि परीक्षित्संमानार्थे शुकेन प्रश्नस्यैव प्राधान्यसमर्थनार्थं श्रोतृत्ववक्तृत्वाभ्यां सहेति विवक्षया प्रश्नैक-वचनप्रयोगः । यद्वा । वासुदेवकथाप्रश्नो यजुः प्रसिद्ध प्रश्न इति गुणप्रतिपादकग्रन्थैकदेशः । सप्तसु प्रथमेति सूत्रात् षष्ठ्यर्थे । तस्य वक्तारं पृच्छकं श्रोतॄंश्च तत्पादसलिलं गङ्गा यथा यथावत्पुनाति । अतो वत्क्रादीनां गङ्गया कृतपावित्र्यरूपफलप्राप्तेरयं प्रश्नस्तव समीचीन इति भावः । अथवा । वासुदेवकथाप्रश्नस्तत्पादसलिलगङ्गा यथावत्पुनाति किं पुनर्वत्क्रादींस्त्रीनिति योजना द्रष्टव्या । हिशब्दः किंस्वर्थे यच्छब्दस्य किमर्थकाद्वा यथाशब्दस्य किमर्थकत्वम् ॥ १६ ॥

गौर्भूत्वेति । पूर्वश्लोके ब्रह्माणं शरणंययावित्युक्तम् । तत्र जडरूपाया भूम्या यानासम्भवेऽत्र गौर्भूत्वेत्याद्युक्तम् । तथाप्यवोचतेत्यनेन विरोधः । गोजातेरपि वचनासम्भवात् । अत उच्यते । ससंकेतेनावोचतेत्यर्थः । स्वमिति पाठे स्वं व्यसनमवोचतेति लुप्तोत्प्रेक्षा । उः शङ्करः । उका:शङ्करः प्रोक्त इत्येकाक्षरः । सः पः पालको येषां तेषां कंसबाणजरासन्धादीनाम् । स्थितेन स्वतले स्थित्वा यत् अन्तिकं नाशवत्सुखं तद्विषये व्यसनं अवोचत वेत्यर्थः । अन्यथा । उपान्तिकब्दाभ्यां पुनरुक्ति-प्रसङ्गः । ननु भूम्या रूपान्तरग्रहणशक्तौ गत्युक्तिसाधनरूपमगृहीत्वा केवलगतिसाधनगोरूपधरणे किं निमित्तमिति चेत् । स्त्रीरूपापेक्षया गोरूपस्यातिदयोत्पादकत्वात् । न च वचनं विना दयाहेतु-दुःखज्ञानाक्षम् । दयावशेन पुंसां तल्लिङ्गादिनाऽनुमेयत्वात् । अत एव करुणक्रन्दनादीनि लिङ्गा-न्यभिहितानि । तस्माद्गोरूपस्यैव स्वभावात्पावित्र्यात् दयाजनकत्वाच्चौचित्यमिति भावः ॥ १८ ॥

तत्रेति । अत्र यद्यपि न वैकेनाक्षरेण छन्दांसि वियन्तीति श्रुतेरक्षराधिक्यं न दोषाय । तथाऽपि यत्र गत्यन्तरं नास्ति तत्रैव तत् । अन्यथा सर्वछन्दोच्छेदप्रसङ्गात् । तस्मात्पुरुषं पुरुषसूक्तेनोपतस्थे समाहित इति पाठाङ्गीकारे गत्यन्तरसत्त्वात् नात्र यतिभङ्गः शङ्क्यः । तस्य काव्यविषयत्वोक्त्या शास्त्राविषयत्वात् । भक्त्या भागवतं शास्त्रमित्युक्त्याऽस्य च शास्त्रत्वात् । तदुक्तं टीकाचार्यैश्च । न गीतार्थं वक्ष्यामि लेशत इति गीताभाष्ये मङ्गलव्याख्याने इति चेत् । तस्य काव्यविषयत्वात् । नाप्यत्र सन्धिभङ्गः । अजायन्त एके चोभयादत इत्यादेर्बहुशो दृष्टत्वात् ॥ २० ॥

गिरमिति । अत्र समीरितामित्यस्य तृतीयासापेक्षत्वात्तदभावेन न्यूनता स्यादित्यतोऽर्थ उच्यते । अकथप्रविसम्भूमसखहाविष्णुवाचका इत्यभिधानात् । संशब्दवाच्येन भगवता ईरिताम् । यद्वा । सः विष्णुः मा रमा । यद्वा । मया सहितः समो भगवान् । ते वासवा उत्तमत्वेन स्तोवा अस्ति यस्येति समी समीरणः तेन ईरिताम् । उदीरिताम् । गिरं हे अमराः यूयं मे मत्तः पौरुषीम् विष्णूक्तां वायूक्तां वा । गाम् वाचम् । आशृणुत । पुनः अनन्तरम् । तथैव भगवदुक्तानुसारिणैव ॥ **माचिरम् अविलम्बितम् ।** विधीयताम् क्रियताम् । अन्यथा पुनरुक्तापातः । न तूक्तयोजनायामुभयोराशु-माचिरमित्येतयोर्मध्ये एकस्य श्रवणक्रियायामन्यस्य विधानक्रियायामिति पार्थक्येन सङ्गतत्वात् ॥२१॥

देह इति । वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देहीति गीतासु जीर्णशरीरत्यागान्ते नवग्रहणोक्तिप्रतीत्याऽत्र च भूतार्थकसत्सप्तमीक्तप्रत्ययोक्त्या देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुरित्यस्य विरोधोऽत उच्यते । सप्तम्यादेरतिसामीप्यार्थकत्वात् । क्तस्य च वर्तमानार्थकत्वात् ॥ **देहे पञ्चत्वम् ।** पञ्चरूपतयाऽदर्शनं आपद्यमाने सतीत्यर्थः । अनेनात्रत्यो विरोधः परिहृतः । जडत्वेन स्वतोऽग्रे गन्तुमशक्यत्वात् ।

कर्माणि अनुगानि यस्य स देही देहाभिमानी जीवः ॥ **अवशः विष्णुवशः सन्** । अनेन जीवदेहाभिमानिकर्माणि विष्ण्वधीनानीति सूचितम् ॥ **देहान्तरम्** । अन्तरे भव आन्तरः देहस्य स्थूलदेहस्य आन्तरः अन्तःस्थो लिङ्गदेहः ॥ **तमनुप्राप्य** । धृत्वैवेति यावत् ॥ **प्राक्तनम् जीर्णस्थूलशरीरम्** । त्यज्यते । गीतोक्तिविरोधोऽपि नास्ति । तस्याः स्थूलशरीरद्वयविषयत्वात् । अस्य च लिङ्गदेहाश्रयणेनैव प्राक्तनदेहविसर्जनपरत्वात् । ननु गीतायां जीर्णदेहान्ते एव नवदेहप्राप्तिरुक्ता । अत्र तु जीर्णदेहविसर्जनमेवोक्तम् । अतो विरोध इति चेन्न । तत्रापि हि जीर्णदेहविसर्जनकाल एव नवदेहप्राप्तिर्न विवक्षिता । मध्ये स्वर्गनरकभोगकालस्यापेक्षितत्वात् । ततः शेषेणेमं लोकं व्रजतीति श्रुतेः । कालान्तरेणैव नवदेहप्राप्त्याऽत्रापि लिङ्गदेहस्थित्युक्तावपि तथैव स्थातुमशक्यत्वात् । अग्रे नवदेहस्यापेक्षितत्वाच्चैकवाक्यतासम्भवात् । न च व्रजंस्तिष्ठन्पदैकेन यथैवेकेन गच्छति । यथा तृण-जलूकैवं देही कर्मगतिं गत इत्यग्रिमश्लोके नास्यार्थस्य विरोधः । प्रातिकूल्याभावात् । तथा हि । व्रजनान्ता पुमान् एकेनैकसंख्याश्रयेण पदा दक्षिणाद्यन्यतमेन पादेन तिष्ठन् भारं स्थापयन् । अन्तर्णिच् । सर्वशरीरभारमेकस्मिन्नेव पादे निधायेति यावत् । एकेन अन्येन । एके मुख्यान्यकेवला इत्यभिधानात् । पदा पादेन गच्छति पूर्वस्थापितभूमिं विसृजति यथा तथा स्वदेहान्तःस्थं लिङ्गदेह-मनुप्राप्य दीपज्योतिःसदृशाणुरूपेणाश्रित्य प्राक्तनं प्रकाशसदृशव्याप्त्याऽधिष्ठितं पूर्वं जीर्णं वपुः शरीरं त्यज्यते । यद्वा । पञ्चत्वमनु मरणानन्तरम् । गोवशः इन्द्रियाधीनः कर्म । सप्तसु प्रथमेति सूत्रात् । कर्मणा आपन्ने प्राप्ते । अथवा । इकर्मा । इ विचित्रे स्मरे पुमानिति यादवकोशात् । विचित्र-कर्मेत्यर्थः । नवे देहे आपन्ने प्राप्ते सति देही तद्देहाभिमानी भवतीत्यर्थः । तस्मात्कदाऽपि देहेन विनाऽनवस्थानात् तद्वियोगभियाऽकीर्तिकरं स्त्रीवधं कर्तुं नार्हसीति भावः । नन्वत्रोक्तोऽयमयुक्तो दृष्टान्तः । तत्र पादान्तरप्राप्त्या दार्ष्टान्तिके च देहान्तरप्रतीत्या स्वारस्याभावादित्याशङ्क्य दृष्टान्तान्तर-माह ॥ **यथेति** । तृणजलूका तृणसंचारी शामनामा कीटविशेषः । देही शामकीटदेहवान्सन्नेव । भृङ्गाकारदेहमनुप्राप्तशामदेहाकारं त्यज्यते । एवं देही उत्तरदेहबीजभूतवृक्षान्तराङ्कुरजनकत्वानुमेय-बीजसदृशलिङ्गाख्यदेहावृत एव । कर्मगतिं कर्मानुरूपा गतिः प्राप्तिर्यस्य तं नवदेहं गतः प्राप्तो भवतीति । तस्मात्प्राक्तनमनादिं देहान्तरं स्थूलदेहान्तःस्थलिङ्गदेहमनुप्राप्याधिष्ठायैव नवं सादिं पूर्वमुत्तरं च स्थूलदेहं त्यजते गृह्णाति चेत्यर्थः । अतः कदाऽपि देहेन विनाऽनवस्थानात्तद्वियोगभिया कीर्तिनाशकं स्त्रीवधं कर्तुं नार्हसीति भावः ॥ ३९,४० ॥ (१०-१)

कीर्तिमन्तमिति । अत्र वसुदेवस्यानृतादतिविह्वलत्वमुक्तम् । तत्कृष्णसमर्पणेन विरुद्धमतोऽर्थ उच्यते । स आनकदुन्दुभिः ॥ **अनृतात्** । नास्ति ऋतं सत्यम् । ऋगताविति धातोर्गत्यर्थानां च ज्ञानार्थत्वात् । ज्ञानं वा यस्मिंस्तस्मात्कंसात् ॥ **अतिविह्वलः बहुविद्विग्नः सन्** ॥ **कीर्तिमन्तम्**

तन्नामकम् । आद्यजं पुत्रम् ।। **कंसाय** । कसि हिंसायामिति धातोः हिंसनार्थम् ।। **कृच्छ्रेण अतिकष्टेन** । अर्पयामासेत्यन्वयः । ननु स्वभोगसाधनदारकृते हिंसाविषये पुत्रदातुर्वसुदेवस्यानृतादिदोषभीतिः कथं युज्यत इत्यतः कृच्छ्रेणेत्युक्तम् । एतदुपलक्षणम् । कृच्छ्रादिप्रायश्चित्तपूर्वकमित्यर्थः । यद्वा । अनृतं नाम भगवत्प्रीतिविरोधि । अन्यत्सर्वं तत्प्रियत्वाद्गुणो दोषो तथा प्रियम् । एवं ज्ञानवतो दृष्टिरज्ञस्तन्नावगच्छतीत्युक्तेः । भगवद्वचः सत्यत्वाविश्वस्तेन धर्मराजेनाश्वत्थामा हत इति भाषणे निःसन्देहानाचरणे न तस्य दोषवत्त्वदर्शनाच्च । अतः श्रीकृष्णानर्पणस्य भगवद्विरोधित्वाभावेनावृतत्वाभावाद्वसुदेवस्यानृतादतिविह्वलत्वं न विरुद्धमिति भावः । अथवा । पुत्रान्समर्पयिष्येऽस्या इति प्रतिज्ञातुर्वसुदेवस्य हत्यार्थं पुत्रोत्पादनमेवायुक्तमिति न शङ्क्यम् । सोऽनृतादित्येकं पदम् । उना उन्प्रत्ययेन सहितः ऋतुशब्दः ऋतुरिति भवति । तस्मादृतोः रजोदर्शनलक्षणात् । अतिविह्वलः दुस्त्यजं किमृतात्मनामित्युक्त्या वसुदेवस्य कामत्यागशक्तत्वेऽपि प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमामिति विचारितपुत्रदानापेक्षया देशकालाद्यनापदि भार्याऋतोर्वन्ध्यत्वकारणे भ्रूणहत्यारूपदोषस्य स्वात्मकृत्याधिक्यं ज्ञात्वाऽतिभीतः सन्नित्यर्थः । कंसाय अन्तं लक्षणया बालवधदोषम् । स्वस्मै चेति शेषः । धर्मज्ञत्वेन कीर्तिमाप । दयितुमित्यध्याहार्यम् । प्रथमजं पूर्वगर्भम् । कृच्छ्रेण धर्मसंकटेन । अर्पयामास देवक्यामधात् । तस्मात्स्वेन केवलदत्तानां परेण हिंसा कृता चेत्तत्र स्वमनीषितस्याभावात्तदपेक्षया भार्याऋतोर्वन्ध्यत्वकरणेन सभ्रूणहत्यायाः स्वकृतत्वसिध्या महादोषत्वमिति विचारेण पुत्रदाने केवलविह्वलत्वेऽपि भार्याऋतुवन्ध्यत्वकरणेऽतिविह्वलः सन् तेन कथंचित्पुत्रसम्भवेऽपि तदाचारस्य युक्तत्वमेवेति भावः । अनेन कंसायान्तमित्यादिना जातमात्रसुतार्पणे नामकरणकालासम्भवेन नामानुपपत्त्या कीर्तिमन्तमिति नामककथनेन प्राप्तविरोधोऽपि परिहृतो भवति। ततश्च शौरिभिर्भगवत्प्रचोदित इत्युक्तेः । परप्रेरणयाऽविहितकर्मकरणेऽपि कर्तुर्दोषाभावः । अन्यथा विश्वामित्रप्रेरितावावसिष्ठपुत्रहन्तुः कल्माषपादस्य ब्रह्महत्याप्रसङ्गात् । न च तथा । किन्तु प्रेरकस्य विश्वामित्रस्यैव ब्रह्महत्याप्राप्तिदर्शनात् । यद्वा । अनृतत्वं नाम प्रतिज्ञाया अपारगम् । प्रतिज्ञा तु पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितमिति । समभेदे समीचीने इति यादवकोशात् । देवकीशोणितोपादानकशरीरत्वेन सं अभिन्नानामेव पुत्राणामर्पणप्रतिज्ञया, काष्ठा यथाऽऽनन्दकरं नभस्त इति दृष्टान्तेन तमद्भुतं बालकमित्यादिना च भगवतः शोणितोपादानकशरीराभावेन भिन्नत्वसिध्या तददानेऽपि वसुदेवस्य नानृतभाषित्वप्राप्तिः । यतस्ते भयमित्यत्र अभयमिति पदच्छेदो वा । यतः येभ्यो पुत्रेभ्यस्ते तुभ्यं अभयमुत्थितं तान्प्रदास्यामीति प्रतिज्ञायां सत्यां भयहेतुपुत्रानर्पणे को दोषः । उत वा । तसेः सार्वविभक्तिकत्वात् । यतो येषां पुत्राणां ते त्वत्तो भयमुत्थितं तान्पुत्रान्समर्पयिष्य इति कंसयोग्यतानुरोधेन पूर्वमेव सविप्रलम्भप्रतिज्ञायां कंसजभयोत्थानरहितस्य भगवतोऽनर्पणे कथमसत्याचारित्वम् । नास्त्येवेत्यर्थः ।। ३,४ ।।

सर्वे इति । अत्र नारदेन कंसं प्रति भाषणाद्भारतेति सम्बुद्धिर्न युज्यतेत्यतोऽर्थ उच्यते । अत्र भारतेति सम्बुद्धिस्तु न कंसं प्रति नारदोक्ता । किंतु राजानं प्रति शुकोक्ता । तादृशसम्बुद्धेरत्र बहुशो दृष्टत्वात् । यद्वा । भं ज्ञानं तत्र अरत ज्ञानशून्येत्यर्थः । इति कंसं प्रत्येव सम्बुद्धिः । अन्यथा कंसं प्रति भाषणे द्वितीयानुपपत्तिः । नेयं नारदोक्तिः किन्तु शुकोक्तिरेवेति चेन्न । एतत्कंसायेत्यादिनाऽग्रे उपसंहारात् ॥ **मनुव्रताः ।** त्वन्नाशविषये यो मनुर्मन्त्रस्तस्मिन्व्रतं नियमं येषान्ते, तस्य व्रतं कर्म वा येषां ते । अथवा । कं ब्रह्माणं सं विष्णुं अनुव्रताः अनुसृतकर्माणः हिरण्यगर्भः कः प्रोक्तः इति । अकथप्रविसंभूमसखहा विष्णुवाचका इति चाभिधानात् । तथा च ॥ **उभयोः ।** गोपवृष्णिकुलयोः । नन्दवसुदेवयोर्वा । अपिशब्दाद्यशोदादेवक्योरपि ॥ **ज्ञातयः कुलजाः ॥ बन्धवः सम्बन्धिनः ॥** सुहृदो, मित्राणि । ये च कं विष्णुम् । कं ब्रह्म खं ब्रह्मेति श्रुतेः ॥ **समनुव्रताः अत्यनुकूलाः ।** सुधामादयस्ते सर्वे देवताप्रायाः प्रायो देवांशा वै । वसुदेवादीनां कश्यपर्ष्यादित्वात् । शतधन्ध्वादीनां देवेतरत्वात् । तद्व्यावृत्तये प्रायःशब्दः ॥ १० ॥

असुरा इति । अत्र पूर्वासङ्गतिर्न शङ्क्या । यतः सम्बन्धिनां देवत्वेऽस्मदादीनामपि तत्सम्बन्धित्वाद्देवत्वं स्यादित्याशङ्कानिरासार्थं तद्व्यावर्तकविशेषणेन विवेचयति ॥ **असुरा इति ।** ये लोकोपद्रवकारिणस्त्वदादयस्ते सर्वेऽसुरा एवेति सङ्गतिरित्यन्तं नारदवाक्यम् ॥ **गत इति ।** अत्रापि तृतीयार्धस्य नासङ्गतत्वम् । तस्य क्रियाविशेषणत्वात् । यद्वा । उद्दिश्येत्यर्थकप्रतिरूपं द्वितीयाविभक्त्यर्थाङ्गीकारात् । दैत्यवधोद्यममुद्दिश्य शंसयामासेत्यर्थः ॥ ११ ॥ (१०-२)

॥ **प्रलम्बेति ।** अत्र महाशब्दोऽप्रसिद्धार्थोऽत उच्यते ॥ **महान् स्वजातिश्रेष्ठोऽश्वत्थः ।** अश्वत्थः सर्ववृक्षाणामिति विभूक्तेः । स अशनं भक्षणं यस्य स कुवलयापीडः कुञ्जरः । कुञ्जरः पिप्पलाशन इत्युक्तेः । यद्वा । काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विध्येनमिह वैरिणमिति गीतोक्तेः कामक्रोधाभिमानी कश्चन दैत्यः । प्रलम्बादय एव कामाद्यभिमानिनो वा । अथवा । महाशनः क्रोधरूपः कालयवनः । गर्गक्रोधेत्यादित्वात् । किंवा महो मीनोत्सवाचार्याः स्युरिति कोशान्तरात् । महस्य तिमिङ्गलस्य अशनं भक्ष्यरूपः हंसः डिभिकाग्रजः । तस्य तिमिङ्गिलग्रस्तत्वस्य हरिवंशोक्तेः । केचिदघासुरं ब्रुवन्ति । तदसमंजसम् । तदाख्यानस्य सर्वशिष्टासंमतेः संवादाभावाच्च । तदेतदग्रे प्रदर्शयिष्यते । उत वा । महस्य क्रीडोत्सवस्य आशा येषां ते महाशा गोपास्तान्नयति बिलमिति । महाशनो व्योमासुरः । मेषायितानपोवाहेत्याद्युक्तेः ॥ १ ॥

सप्तम इति । अत्र देवकीसप्तमगर्भरूपरामस्य विष्णुशेषांशत्वं दृश्यते । न ह्येकस्य भिन्नयोर्द्वयोरंशत्वं युज्यतेऽतो विरोध इत्यत उच्तये ॥ **वैष्णवम् ।** विष्णोरिदम् । धाम शय्यासनभूतम् ।

शेषश्च शय्यासन इत्युक्तेः । यं अनन्तं प्रचक्षते बुधाः स शेषो देवक्याः सप्तमो गर्भो बभूवेत्यर्थः । यद्वा । विष्णोः शुक्लकेशरूपावेशस्थानम् । गयश्च लक्ष्मणाद्याश्च त्रयो रोहिणिनन्दनाः । नरः फल्गुन इत्याद्या विशेषावेशिनो हरेरिति वचनात् । असाधारण्येन व्यपदेशा भवन्तीति न्यायोपेतत्वाच्च ॥ ५ ॥

अथेति । हे ॥ **शुभे योगमाये ।** अथबा । जगत्कल्याणविषये । अथवा उत्तमकुले मुहुर्ते वा । स्वांशभागेन । स्वांशस्य भागो भजनम् स्वीकार इति यावत् । तेन । अनेन बलरामस्य भिन्नांशत्वं सूचितम् । अत्रैव स्वशब्दप्रयोगात् । यद्वा । स्वः स्वरूपभूतो योंऽशः तस्य भां द्युतिं गच्छति प्राप्नोतीति तेन रूपेण । अनेन कृष्णस्य पूर्णरूपत्वाभावशङ्का निरस्तेति बोध्यम् ॥ ९ ॥

नामधेयानीति । अत्र भविष्यत्क्रियापेक्षितत्वे कुर्वन्तीति लटा विरोधोऽत उच्यते । नामस्थानानां निश्चयेन भावित्वाद्वर्तमानव्यपदेशः । यद्वा । नरानराणां सप्तसु प्रथमेति सूत्रेण षष्ठ्यर्थकत्वात् ॥ **भुवि ।** आश्रयोपलक्षितोपासनाविषये ॥ **नामधेयानि दुर्गेत्यादीनि ।** स्थानानि विंध्यादीनि । कुर्वन्ति कुर्वाणे इति योगमायासम्बोधनं न तु लट्रूपक्रियाऽतो न विरोधः ॥ ११ ॥

आविवेशेति । अत्रांशभागेनेत्यनेन पूर्णत्वस्य विरोधोऽतोऽर्थान्तरम् ॥ **अंशभागेन ।** अंशः किञ्चित्वं तस्य भां प्रकाशनं न गच्छति न प्राप्नोतीति तेन रूपेण पूर्णरूपेणेत्यर्थः । अतो न विरोधः ॥ १७ ॥

इतीति । स्वतो दुष्टस्य प्रभुशक्तिमतश्च कंसस्य दुष्टभावनिवृत्तिकथने विरोधोऽतोऽर्थ उच्यते ॥ **सन् सचेतनः ॥ इति विचारसमाप्तौ । घोरतमात् अतिभयङ्करात् ।** भावात् चेतनात् कंसात् । चेतनोऽचेतनश्चेति भावश्च द्विविधः स्मृत इति तत्त्वविवेकोक्तेः । निवृत्तः कंसं विसृज्य गतः । अयं सद्विचारस्तु सचेतनावेशेनैव जात इति भावः । ततः स्वयमावेशरहितत्वात् आत्मैवेत्यर्थः । अकथप्रविसम्भूमसखहाविष्णुवाचका इत्यभिधानात् । प्रशब्दवाच्याद्विष्णोर्भवतीति प्रभुः कामः । यद्वा । प्रकर्षेण भवते व्याप्नोतीति प्रभुः । भू व्याप्ताविति धातोः । तथा तेनेदमावृतमिति गीतोक्तेश्च काम इत्यर्थः । तदभिमानित्वात्कालनेमिः । काममानी कालनेमिरित्युक्तेः । तस्य भगवतो जन्म प्रतीक्षन्सन् हरेर्वैरानुबन्धवित् वैरस्यैवानुबन्धनकर्ता । विद कृताविति धातोः । स्वभावतो द्वेष्टेति भावः ॥ **आस्ते अस्ति ।** अन्धे तमस्यपि भगवद्द्वेषयुक्तत्वाद्वर्तमाने लट् । स्वयं शब्देन स्वाभाविकद्वेषं द्योतयितुमात्मने पदम् । यद्वा । स्वयं प्रभुः कालनेमिरूपोऽपि । इति विचारेण घोरतमाद्भावाद्वधरूपकर्मणः सकाशात् । भावो लीलाक्रिया चेष्टा इति हि यादवः । सदा विद्यमानत्वान्निर्दोषत्वात्सच्छब्दवाच्येन भगवता निवृत्तः । अत्रान्तर्णिच् । निवर्तित इत्यर्थः ॥ २४ ॥

चिन्तयान इति । अत्र सत्यत्वमिथ्यात्वयोर्व्यावहारिकभेदाङ्गीकारे तस्यानित्यत्वेनान्ते तयोरैक्यापत्या मिथ्यात्वस्यापि ब्रह्मण्यापत्तिरिति भयेनाद्वैतिभिरपि जगदीशयोरपि पारमार्थिकभेदस्य स्वीकारार्ह-

त्वात्किं पुनर्भेदवादिभिरत उभयेषामपि तन्मयशब्दस्य स्वरूपार्थोक्तौ विरोधप्रसङ्गोऽतोऽर्थान्तरम् ॥ **तन्मयम्** । मद्धन्ता विष्णुरत्रैव स्यात्किमिति भयेन तत्तत्पदार्थस्थतया तत्प्रतिमं जगदपश्यत् । यद्वा । जगत् । अहृषीकेशं विष्णुरहितं कर्तव्यमिति विशेषेण या चिन्ता तया तन्मयं तस्य विष्णोर्हिंसोपायम् । मिनु हिंसायामिति धातोः । लक्षणोपगमाच्च । नोऽपश्यत् न दृष्टवान् । अतो नोक्तविरोधः ॥ २५ ॥

ब्रह्मेति । अत्र स्तोत्रक्रियाकर्तुर्मुन्यादिसाहित्योक्तौ बहुत्वापत्त्याऽस्तुवदित्येकवचनं विरुद्धमिति मन्दाशङ्कापरिहारार्थं उच्यते । तथात्वे पुच्छं जग्राह सामर इति प्रतिबन्दी दुर्वारा स्यात् । अतः कर्तुर्वचनानुरूपेण कर्तरि क्रियावचनेन भवितव्यमिति नियमादत्र ब्रह्मणः कर्तुरेकवचनात्तु क्रियैकवचनं युज्यते । न च भवश्चेत्यनेन बाधः । तस्याप्येकवचनेन समुच्चये न नियमभङ्गः । तत्रागतो नारद-स्तुंबरुश्चेति भारतादिष्वेतादृशप्रयोगस्य बहुशो दृष्टत्वात् । केचिदत्र गीर्भिर्वृषणमैड्यन्निति पाठं कल्पयन्ति । तदयुक्तम् । कर्तुर्बहुवचनान्तत्वाभावेनैकवचनान्तस्य तृतीयस्याप्यभावेन बहुवचनान्त-क्रियाऽसङ्गतत्वात् । न च सेति पदेन भूम्या ग्रहणं युक्तम् । तस्याः स्वरूपतो जडत्वेन स्तवना-योगात् । गोरूपिण्याश्च पशुत्वेन वचनायोगात् । नापि व्यसनं समवोचतेत्यत्र वचनलाभः । तत्रापि ससंकेतेनावोचल्लक्षणयाऽसूसुचदित्यस्यैवौचित्यात् । अत्रापि लक्षणाऽस्त्विति चेन्न । अर्धजरतीयानु-पपत्तेः । ब्रह्मभवयोर्वचनवृत्त्या गोरूपिण्याः सूचनवृत्त्येत्येकक्रियाया अर्थद्वयाङ्गीकारानर्हत्वात् । श्रीधरेणाप्यैड्यदिति पाठे क्लृप्तेऽपि तद्व्याख्यानुसारिणो लेखकहस्तदोषादैड्यन्निति लाभेन तथैव पठन्तीति । एतच्चिन्त्यम् । न हि व्याख्यातैवमसम्बद्धं लिखेत् ॥ २६ ॥

सत्यव्रतमिति । अन्यत्र विश्वस्य मिथ्यात्वोक्त्याऽत्र च सत्यत्वोक्तेर्विरोधः । पूर्वत्रास्तुवदित्येक-वचनेनात्रोक्तस्य प्रपन्ना इत्यस्य बहुवचनस्य विरोधान्तरं चातोऽर्थ उच्यते । विश्वमिथ्यात्वस्य विश्वान्तर्वर्तित्वेन मिथ्यात्वासिध्या सिद्धां विश्वसत्यतां दृढीकर्तुं स्कान्दोक्तविश्वसृष्ट्त्वाद्यष्टलक्षणेष्वपि विश्वसत्यतां ब्रवीति ॥ **सत्येति** । विश्वं सत्यमिति श्रुतेरत्राष्टौ सत्यशब्दा विश्वार्थकाः । तस्य विश्वस्य व्रतम् आवरकत्वाव्द्याप्तत्वाच्च ज्ञानं यस्मात्तम् । वृञ् वरणे । अत सातत्यगमने इति च धातोः । अनेनाज्ञानदत्वं लक्षणम् ॥ **सत्यपरम्** । सत्यस्य परं अज्ञानविरुद्धत्वात्संसारतः पालकत्वात्परम-साधनत्वाद्वा ज्ञानं यस्मात्तम् । अनेन ज्ञानदत्वं लक्षणम् ॥ **त्रिसत्यम्** । अतीतानागतवर्तमानरूपेण त्रिविधं सत्यं विश्वं यस्मिन्निति संहारकत्वं लक्षणम् ॥ **सत्यस्य योनिम्** । तस्य योनिं कारणमिति स्रष्टृत्वलक्षणम् ॥ **सत्ये निहितम्** स्थितमित्यनेन पालकत्वलक्षणम् ॥ **सत्यस्य सत्यम्** । सत्यं पुनरावृत्त्यादिदोषवर्जितत्वात्सत् निर्दोषं मोक्षं यापयति प्रापयति तम् । अनेन मोक्षदत्वलक्षणम् ॥ **सत्यनेत्रम्** । तस्य नेत्रं मन्थनरज्जुरूपं बन्धनं यस्मात्तम् । इत्यनेन बन्धकत्वलक्षणम् ॥ **सत्यात्मकम्** । तस्यात्मत्वात्स्वामित्वा- न्नियामकत्वं लक्षणमिति । तं त्वां शरणं प्रपन्ना इत्यन्वयः ।

न वचनमिव शरणागतिर्द्वयोः किंतु सर्वेषामिति भावेन बहुवचनम् । अस्तुवदिति कर्तृत्ववचनानुरोधादेकवचनात्मकस्यापि कर्तुर्द्वित्त्वदर्शनात् ब्रह्मभवावूचतुरित्युभाभ्यामपि सर्वदेवाभिप्रायं स्वमनसोरानीयोक्तत्वात्प्रपन्ना इति बहुवचनम् । अतो न विरोधः । सच्छब्द उत्तमं ब्रूयादित्यादितात्पर्यानुसारेणार्थस्य तु व्याख्यातृप्रदर्शितत्वान्नेह प्रपञ्चः । अग्रिमस्यापि श्लोकस्य सङ्गतिरित्थम् । हि यस्मात् । असौ बन्धनहेतुर्देहादिरूपः प्रपञ्चः । आदिवृक्षः आदिना सर्वकारणरूपेण त्वया वृश्चयते छेद्यते स तथा । अतस्त्वां शरणं प्रपन्ना इति योजना ॥ २७-२८ ॥

बिभर्षीति । अत्र अव बोधेति सम्बोधनपक्षे सन्धिभङ्गः । प्रथमायामात्मविशेषणानुपपत्तिः । सप्तम्यामन्वयानुपपत्तिः । किं च निर्गुणस्य भगवतः सत्त्वोपपन्नत्वमपि न युज्यते । अपि च चरशब्देन सतां खलानां च ग्रहणसिध्या पुनः सत्खलग्रहणात्पुनरुक्तिप्रसङ्गः । पूर्वं चरान्तर्वर्तिखलानामपि क्षेमायेत्यनेन क्षेमकारकत्वे सिद्धे पुनरभद्राणीत्यनेनाशुभत्वकथने व्याघातश्चेति चेन्न । अभिप्रायसद्भावात् । तथा हि । रूपाणि बिभर्षीत्यनेनास्मत्सदृशजडशरीरात्मकरूपग्रहणं प्रसज्येतेत्यतोऽवबोधे ज्ञानात्मके ॥ **आत्मन् आत्मनि स्वरूपे ।** इयं विषयसप्तमी तृतीयार्थे । द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च सप्तमी । चतुर्थ्यर्थे च विज्ञेया विषयेति च यां विदुरिति महाव्याकरणे । आत्मन्निति तु सप्तमी छान्दसी । परमेव्योमन्नित्यादौ दृष्टत्वात् । ज्ञानात्मकस्वरूपेणेत्यर्थः । रूपाणि मत्स्याद्यवतारान् । बिभर्षि धत्से । यद्वा । हे आत्मन् अवबोधो ज्ञानस्वरूपस्त्वम् । अनेन कस्मिन्नप्यवतारे जडशरीरसम्बन्धो नास्तीति ध्वनितम् । चराचरस्य भूमिर्दृप्तेत्यादि व्यसनं समवोचतेत्यन्तेन भूलोकस्य चरत्वसिद्धेर्महाभूतात्मकत्वेनाचरत्वसिद्धेश्च चराचरस्य लोकस्येत्यनेन भूलोको गृह्यते । तस्य मोक्षायेत्यनेनाधिकरणक्षेममेवाभ्युपेयते नाधेयक्षेमम् । सत्त्वं स्वातन्त्र्यमुद्दिष्टमिति भागवततात्पर्योक्तेः ॥ **सत्त्वोपपन्नानि स्वातन्त्र्योपेतानीत्यर्थः ।** इदानीमाधेयविशेषाणां क्षेमाक्षेमकरत्वमाह ॥ **सुखेति ।** सतां सुखावहानि खलानामभद्राणीति । मुहुरित्यनेन सार्वकालिकोऽयं नियमः सूच्यते इत्यतो न कश्चित्क्षुद्रशङ्कावकाशः ॥ ३० ॥

इतीति । अत्रादौ ब्रह्माभवश्चास्तुवत् । मध्ये ब्रह्माभवावूचतुः । अन्ते इत्यभिष्टूय देवताः प्रतिययुरिति । अतो विरोधः । तस्मादर्थान्तरम् । पुरुषं गर्भस्थम् । यदित्यव्ययम् । यस्यां देवक्यामित्यर्थः । अनिदम् । इदंशब्दवाच्यजगद्विलक्षणम् । रूपम् भगवद्रूपम् । स्थितं तं च ॥ **यथा योग्यतामनतिक्रम्य ॥ इति उक्तप्रकारेण ॥ अभिष्टूयम् स्तुत्वा ।** यद्वा । यस्य भगवतः । रूपम् । अनिदं अनः प्राणो गुरुत्वेनास्त्येषामिति अनिनो वैष्णवाः । तान् दयति पालयति तत् अनिदम् । देङ् पालन इति धातोः । तं पुरुषमभिष्टूय स्थिताविति ब्रह्मेशानविशेषणत्वेन शेषं कल्पयेत् । अन्यथा ल्यबन्तक्रिययोरेककर्तृकत्वनियमात्स्तवनरूपक्रियायाः सर्वदेवकर्तृकत्वे ब्रह्माभवावूचतुरिति पूर्ववाक्यस्य

विरोधापत्तिस्तस्मात्स्थितशब्दस्य स्थानरूपक्रियायामेव ब्रह्मेशानकर्तृकल्यबन्तान्वयं कृत्वा तत्पुरोधानार्थकेन पुरोधायेति ल्यबन्तेन सहयानरूपक्रियाया देवमात्रकर्तृकत्वं ज्ञेयम् । तस्मान्न कोऽपि विरोधः ॥ ४३ ॥

इति श्रीभागवते तृतीयोऽध्यायः ॥ १०-३ ॥

अथेति । अत्र कालस्य सामान्येन परमशोभनत्वमुक्तम् । तदयुक्तम् । कंसादिभ्योऽशोभनत्वात् । अतो विरोधः । तस्मादर्थान्तरम् । अथसर्वगुणोपेत इत्येकं पदम् । नास्ति थं अन्नं यस्य सोऽथः । यस्मादन्नं थमुच्यते इति कौर्मे । निरशनो भगवानित्यर्थः । अनश्नन्नन्योऽभिचाकशीतीति श्रुतेः । अन्यो निरन्नोऽपि बलेन भूयानिति स्मृतेश्च । तं सरन्ति जानन्ति ते सर्वाः । सृ गतौ ततो वः । गत्यर्थानां च ज्ञानार्थत्वात् । अनुसरन्तो वा । तेषां गुणोपेतः सुखकारक इत्यर्थः । यद्वा । अथ भगवदवतारारम्भ एव । सर्वान्प्रति गुणोपेतोऽपि कालः ॥ **परं शत्रुं प्रति ।** अशोभनः । आसीदिति शेषः । परं अत्यर्थम् । अशोभनः कालः । अपेतः परावृत्तः । किन्तु । सर्वगुणः सर्वगुणा एव यस्मिन्स तथा । अभूदिति शेष इति वा ॥ अजनस्य विष्णोः जन्म यस्य तस्य ब्रह्मणः ऋक्षः रोहिणीनक्षत्रम् ॥ **यर्हि यस्मिन्समये ।** स कालः सर्वगुणोपेत इति योजना । यद्वा । अजनजन्म जनविलक्षणस्य जन्मरहितस्य वा भगवतो जन्मऋक्षम् । ऋकारो देवमाता स्यादित्येकाक्षरात् । ऋशब्दवाच्या दितिरूपदेवकी क्षं क्षेत्रं यस्य तत् । क्षः क्षेत्रे राक्षसे क्षये इति वररुचिकोशात् । क्षा भूमिर्यस्य वा । क्षा शब्दस्य पृथिवीनामसु पाठात् । देवक्यां भगवज्जन्म यदासीदित्यर्थः ॥ **यर्ह्येव यदैव ।** आसीत्तदा कालः ॥ **शान्तर्क्षग्रहतारकोऽभूत् ।** शान्ताः प्रसन्नाः । ऋक्षाणि अश्विन्यादीनि । ग्रहाः सोमादयः । तारका अन्यभानि । यस्मिन्काले सः । यर्हि यदा । एवं कालः । तदा दिशः प्रसेदुरित्यादिरन्वयः । यद्वा । अथशब्दावृत्तिः कार्या । तथा च । यर्हि यदा । अथ सर्वम् । अथ मङ्गलम् । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथोऽथेत्यमरः । तदा कालः सर्वगुण इति योजना । केचित् । शान्तर्क्षग्रहतारकमिति पाठं कल्पयित्वा ऋक्षविशेषणत्वेनोत्तरचरणं च शान्ता ऋक्षादयो यस्मिंस्तदिति बहुव्रीहिणा योजयन्ति । तच्चिन्त्यम् । ऋक्षादेस्तच्छान्तत्वस्य वा रोहिण्याश्रयत्वानुपपत्तेः ॥ १ ॥

दिश इति । अग्रे मन्दमन्दं जलधरा जगर्जुरिति सद्भावादत्र निर्मलोडुगणोदयमिति विरुद्धम् । अतोऽर्थान्तरम् ॥ **निर्मलः ।** निर्दोषः उडुगणोदयं लग्नम् यस्मिन्गगने तत् । उडूनां गणः अनेकत्वं यस्मिंस्तद्राशेः उदयो लग्नमिति विग्रहः । राशीनामुदयो लग्नमित्यमरः । यद्वा । निर्मलः तिमिररहितः उडुगणोदयः रोहिण्यादिनक्षत्रोदयः यस्मिन्निति । चन्द्रोदयाभावेन तत्तिथौ कृत्तिकान्तानामुडूनां तमस्युदयेऽपि रोहिण्यादीनां चन्द्रोदयसद्भावान्न तमस्युदय इति भावः ॥ **अथवा ।** निर्मलः

पुण्यरूपः यः उडुगणः कृत्तिकादिविशाखान्ताश्चतुर्दशनक्षत्रगणः । तन्मध्येऽग्निदैवतत्वेनाद्यान्तयोर्यज्ञाद्युपयोगित्वाभावस्य क्वचिदुक्तत्वेन रोहिण्यादेरेव प्राशस्त्यात् । यत्पुण्यं नक्षत्रमित्यादिश्रुत्या तदादेर्देवनक्षत्रोक्तेः । तस्योदयो यस्मिंस्तत् । अभ्रपिधानेऽप्युदयाचलोर्ध्वागमनरूपोदयस्याप्रतिबद्धत्वान्न विरोधापत्तिरिति भावः । किंवा । निर्मलोडु मलैः पापग्रहैः सहितान्युडूनि मलोडूनि निर्गतानि मलोडूनि यस्मात्तत् । तत्काले रोहिण्युदयात्तत्पूर्वाणि दृश्यमानानि चतुर्दशनक्षत्राणि पापग्रहानधिष्ठितान्याकाशेऽभवन्नित्यर्थः । गणोदयम् । नामैकदेशग्रहणेन नामग्रहणमिति न्यायात् । गणो गणेशः । तस्याकाशाभिमान्युदय आविर्भावो यस्मिंस्तद्गगनमासीत् । इदमप्युपलक्षणम् । कालादीनां सर्वेषामप्यभिमानिदेवताव्यक्तिः स्वस्वाभिमन्यमानस्थानेऽभूदिति ग्राह्यम् ॥ २ ॥

द्विजावलीति । अत्र रात्रौ पक्षिशब्दासंभवाद्विरोधोऽतोऽर्थान्तरम् । द्विजानां ब्राह्मणानाम् । आलिः पंक्तिः । तस्याः । कुः आश्रयभूमिः । तत्र यः । लसन् शोभमानः । नादः शब्दः । यस्य सः । स्तवः स्तुतिः । यासु तादृश्यो वनराजयस्तदा आसन् । स्वार्थे कः । बवयोरभेदश्च ॥ ३ ॥

अग्नय इति । अत्र निशीथे ब्राह्मणाग्नीनां प्रदीपनासम्भवाद्विरोधोऽत उच्यते । कंसादिभयाद्ये पूर्वम् ॥ शान्ताः । विनष्टाः । ते ॥ तत्र । भगवज्जननकाले ॥ सं । स्वतएव ॥ इंधत । प्रदीप्ताः । इति वैलक्षण्यज्ञापनायैव अडागमस्यापेक्षितत्वेऽपि समिंधतेति विलक्षणः प्रयोगः । अन्यथा समैंधतेति स्यात् । अथवा । ये च पूर्वं द्वीजातीनामग्नयः कोपाग्नयः संतापाग्नयो वा । समिंधत प्रदीप्ता आसन् । ते । तत्रं जन्मकाले । शान्ताः शमं प्राप्ताः ॥ ४ ॥

मनांसीति । अत्र द्रोग्धुर्वै परतो भयमित्युक्त्या परद्रोहिणां भयसद्भावेन मनःप्रसादः साधुत्वं च कथम् । जडस्य स्वतः प्रवृतिः कथम् । अतो विरोधोऽत उच्यते ॥ असुरद्रुहाम् । सुरद्रोहो न भवन्तीति तेऽसुरद्रुहस्तेषामिति विग्रहेण द्रोहाभावे तात्पर्यसिद्धेर्न विरोधद्वयमपि । यद्वा । आसन्नित्यत्र अ आसन्निति पृथक् पदद्वयम् । नैषा तर्केण मतिरापनेयेत्यत्रत्यापेतिवत् । तथा च साधूनां मनांसि प्रसन्नानि नावसन्नानि आसन् । असुरद्रुहां अः विष्णुः सुरा देवास्तान् द्रुह्यन्ति ये तेषां तु । प्रसन्नानि प्रकर्षेण खिन्नानि आसन् ॥ अजने । जन्मरहिते जनविलक्षणे वा । भगवति जायमाने सति ॥ तस्मिन्निति । विषयसप्तम्यास्तृतीयार्थकत्वात् । भगवज्जन्मनिमित्तेनेत्यर्थः । दिवि दुन्दुभयो नेदुः स्वयमेव शब्दमकुर्वन् । यद्वा । देववादिता इति विशेषेणान्वयः । अतो न विरोधोऽपि तृतीयः ॥ ५ ॥

निशीथ इति । पूर्वं जायमाने जने तस्मिन्निति वाक्यसद्भावादत्र जायमाने जनार्दने इति पुनरुक्तिः । अतोऽर्थान्तरम् । द्विर्वचनस्य जन्म-वैलक्षण्यप्रदर्शनार्थत्वात् । सत्प्रयोजनत्वेन सत्यामपि पुनरुक्तावदोषः । वैलक्षण्यं हि प्राकृत-देहविधुरत्वाच्चतुर्भुजादियुक्तत्वाच्च । जन्मनो

लोकातिशयितत्वाद्वा । व्यत्ययोऽतिशयकुत्सनाभेदेष्विति हि सूत्रम् । यद्वा ॥ **जनार्दने** । अर्द गतौ याचने चेति धातोः । जनैरर्द्यते प्रार्थ्यते यस्तस्मिन् । तथा ॥ **अतमसः तमोविरोधिनः प्रकाशस्य ॥ उद्भूतम्** । उद्भवम् । यस्मात्तथाविधे ॥ **निशीथे नितरां शीते चन्द्रे इत्यर्थः** । उद्गीथवत्तस्य थः ॥ **जायमाने उदयं प्राप्नवति सति** । विष्णुर्देवक्यां प्रादुरासीदिति सम्बन्धः । अथवा इथे विचित्रभयलक्षणे । निशि रात्र्याम् । उद्भूते सति । जनार्दने विष्णौ च जायमाने सति । तमोऽन्धकारः । यदा बभूवेति शेषः । तदा प्रादुरासीदिति सम्बन्धः । इ विचित्रे स्मरे पुमानिति हि यादवः । थकारो भयलक्षे इत्येकाक्षरे । षट्पादत्वात्सार्धोऽयं श्लोकः । तम उद्भूते तमसा उद्भूते उत्कृष्टे । निशीथे मध्यरात्रे । अधिकरणे सप्तमी वा । जनार्दने जनान् असत्प्राणिनः अर्दयति पीडयतीति स तथा । अनेकार्था हि धातव इत्युक्तेः । धातूनामनेकार्थत्वात् रूढत्वाच्च । अर्द हिंसायामिति धातोः । असत्प्राणिहिंसको वा । शृण्वे वीर उग्रमुग्रं दमायन्निति श्रुतेः । जनेषु जन्मवत्सु अर्दनं गमनम् यस्येति तथा । प्रवेश इति यावत् । जनैरर्द्यते प्रार्थ्यतेऽसौ तथा वा । अर्द गतौ याचने चेति धातुः । अथवा । न जायते अर्दयति च संसारमिति जनार्दनः । सभूतः स जनार्दन इति स ह्यासीत्स नासीत्सोऽर्दयदिति श्रुतेः । उत वा । अजनार्दन इति विच्छिद्य जन्मरहिते संसारनाशके चेत्यर्थः । अपि वा । अजनैर्मुक्तैरर्द्यते गम्यते प्रार्थ्यत इति वा । किंवा । न जायतेऽनेनेति अजनम् । अर्दनं गतिः ज्ञानं वा

यस्येति । गत्यर्थानां ज्ञानार्थत्वात् । उक्तगुणविशिष्टविष्णौ । जायमाने आविर्भवति सति । जलधरा मन्दं मन्दं जगर्जुरिति पूर्वेण सम्बन्धः । ननु जायमाने जने तस्मिन्निति वाक्यस्य पूर्वं विद्यमानत्वेनेयं पुनरुक्तिः प्रसज्येते चेति चेन्न । अस्य श्लोकान्तरस्थत्वेनादोषात् । अथवा । अजाय ब्रह्मणे । जनार्दने विष्णुविषये । माने ज्ञाने । अतमः मोहरहितम् । यथा भवति तथा । उद्भूते उत्पन्ने सति । निशीथे मध्यरात्रे । प्रादुरासीदिति वा । उत वा । जनार्दनविषये । तमसः अज्ञानस्य । उद्भूते उद्भवे । जायमाने सति । निशीथे प्रादुरासीदिति । किं वा । उद्भूतानि भूतानि यस्मात्तादृशे जनार्दने जायमाने सति । निशीथेऽपि अतमः प्रकाशो बभूवेति । स्वरोचिषा भारत सूतिकागृहं विरोचयन्तमिति वक्ष्यमाणत्वात् । अथवा । जनार्दने । जन हिंसायाम् । जायमाने जायमानायां सत्यां तमसोत्कृष्टे निशीथे आविरासीदिति । यद्वा । अजा कालशक्तिः । यमः अन्तकः । ताभ्यां सकाशात् । एजनं कंपः । एजृ कंपने । भयमिति यावत् । येषां तेभ्यो असुरेभ्यः सकाशात् । अर्दने पीडने । भूते जाते सति । यदा तु सताम् । उत् उत्कृष्टम् । तमः ग्लानिः । बभूव । तमु ग्लानौ । तदा निशीथे आविरासीदिति । अपि वा । अजायमाने जनानामसुराणामर्दने हिंसाविषये तम उद्भूते निशीथे आविरासीदिति । जनार्दने जनपीडके तमसोत्कृष्टे निशीथे जायमाने सतीति वा । उत वा । उद्भूते उत्कृष्टभूते जीवजात इत्यर्थः । जडस्यापि भूतशब्दवाच्यत्वात्तद्व्यावृत्तये विशेषणम् । जडस्य जीवापकृतत्वात् स्वापायोगाच्च । निशीथेन निमित्तेन

इता गता । इण् गताविति धातोः । मा ज्ञानं यस्य तादृशे सति निशीथे । सर्वजीवेषु सुप्तेष्वित्यर्थः । आत् वासुदेवाज्जन्यत इति अजनो ब्रह्मा । अकारो वासुदेवः स्यादित्येकाक्षरः । यो ब्रह्माणं विदधाति पूर्वमिति श्रुतेश्च । तस्य । अर्दने याचने जायमाने सति च । आविरासीदित्यन्वयः । आहोस्वित् । जन्यन्ते ते जनाः । प्रकरणाद्देवकीपुत्राः । तेषाम् । अर्दने हिंसने । भूते जाते सति । निशि प्रलये । इ विचित्रं विश्वं थं अन्नं यस्य तादृशे भगवति । प्रलये विश्वोपसंहारक इत्यर्थः । यस्मादन्नं थमुच्यत इति कौर्म्ये । उत् ऊर्ध्वम् । षट्गर्भहिंसानन्तरमित्यर्थः । जायमाने सति दुर्गादेवी यदा बभूव तदा आविरासीदिति । सर्वाधिकत्वेन तमो हि दुर्गा इत्यौद्दालिकायनश्रुतिः । दुर्गेति भद्रकालीतीति च । या योगमायाऽजनि नन्दजाययेति वक्ष्यमाणत्वात् । ग्रन्थबाहुल्यभिया विस्तरेणालमिति सद्भिः सन्तोष्टव्यम् ॥ ८ ॥

अथोत्तरत्र पादचतुष्टयार्थोऽपि लिख्यते । यथेवेत्युपमाद्वयं वैयर्थ्यनिरासार्थम् । यथा प्राच्यां दिशि पुष्कल इन्दुः प्रादुरासीत्तथा देवक्यां विष्णुः प्रादुरासीत्तथा प्राच्यामिन्दुः प्रादुरासीदिति परस्पर प्रमेयत्वप्रदर्शनार्थमुपमाद्वयम् । यद्वा । यथाशब्द उपमार्थः । इवशब्द उत्प्रेक्षार्थः । तथा हि । इन्दोः कृष्णाष्टम्यामुदितत्वेन पूर्णकलात्वाभावात्पुष्कल इत्युत्प्रेक्षितेन्दुर्यथा प्राच्यां तथा देवक्यां विष्णुरित्यनेनोत्प्रेक्षणेन तद्दिने चन्द्रस्यापूर्णकलात्वेन पूर्णावतारत्वेन च भगवतश्चन्द्रोपमानयोग्यत्वं नास्तीति ध्वनितम् । अथवा । यथा विष्णुश्चतुर्भुजत्वादिगुणोपेतस्तथैव सन् प्राच्यामिन्दुरिव देवक्यां प्रादुरासीत् । चतुर्भुजं शङ्खगदाद्युदायुधमिति वक्ष्यमाणत्वात् । न प्राकृतशिशुवदिति भावः । उत वा । स्ववंशे भगवदवतारेण तद्दिनेऽपूर्णकलोऽपि चन्द्रो यथा यथावत्पुष्कलः पूर्णकल इन्दुरिव विष्णुर्देवक्यां प्रादुरासीदिति । किंवा । यथा सर्वगुहाशयस्तथैव भूत्वेन्दुरिव देवक्यां प्रादुरासीत् । हरेर्देवक्युदराद्बहिः प्रादुर्भावेऽपि तदुदरं विष्णुव्याप्तिहीनं नासीदिति भावः । आहोस्वित् । इवपुष्कल इत्येकं पदम् । इ विचित्रे स्मरे पुमानिति यादवकोशात् । इशब्दवाच्यो मदनस्तत्सदृशं वपुः शरीरं कलयतीति स तथा । दग्धशरीरमदनं वपुषा कलयति बन्धयतीति स तथेति वा । कल बन्धन इति धातुः । अपि वा । इन्दुरिव किञ्चित् चन्द्रोऽल्पकलावानित्यर्थः । प्रादुर्बभूव । विष्णुस्तु यथावत्पुष्कलः प्रादुरासीत् । एककाले उभयोः सत्यपि जन्मनि न साम्यमिति भावः । किञ्चित्वे चोभयत्वे च संशये सदृशे तथा । इवशब्दः प्रयुज्येत न्यक्कारेऽपि च पण्डितैरिति शब्दनिर्णये । यद्वा । यदा विष्णुर्देवक्यां प्रादुरासीत्तदा पुष्कलोऽपि चन्द्र इव न्यक्कृतस्तिरस्कृत इति यावत् । अथवा इवपुः कलः इति पदद्वयं भगवद्विशेषणम् । इवपुः विचित्रशरीरः । शुक्लशोणितसम्बन्धविधुरशरीर इत्यर्थः । तमद्भुतमिति वक्ष्यमाणत्वात् । अत एव प्रागुदितचन्द्रदृष्टान्तः । चन्द्रस्य प्रागुदयेऽपि शुक्लशोणितादिराहित्यम् । एवं देवक्यामुत्पन्नत्वेऽपि शुक्लशोणितादिराहित्यं भगवत इति भावः । कलः कं सुखमेव

लाति आदत्ते स तथा । ला आदान इति धातुः । आनन्दस्वरूप इत्यर्थः । इदमेवालौकिकशरीरत्वे हेतुरपीति । तस्मान्नात्र पुनरुक्तादिदोषगन्धोऽपीति भावः ॥ ९ ॥

एवमिति । अत्र भद्रे इत्येकवचनम् । सम्बुद्धौ सत्यां वां तप्यतोरिति द्विवचनेन विरोधोऽत उच्यते । मातापित्रोर्मध्ये मातुरपत्यकृतपरमश्रमप्राप्त्या मातृदेवो भवेति श्रुतावपि मातुरेव पूर्वग्रहणाच्चात्रापि देवक्या एवाव्यवहितस्तुत्या वसुदेवस्य निर्व्यूह्यमानां निहनिष्यसे चमूमित्युक्त्या भावाभावेन स्वयमेव सन्मुखत्वाद्देवक्यास्तु समुद्विजे भवेद्धेतोः कंसादहमधीरधीरित्युक्त्या स्त्रीजात्या च सभयत्वदर्शनात् । अतिकृपया देवक्या एव सम्बुध्या तामेव संमुखीकृत्योभौ प्रति भाषणम् । अतो न विरोधः । यद्वा । भद्रे स्वकल्याणविषये परमं दुष्करं तपस्तप्यतोर्वां युवयोरिति योजना । अग्रेऽनघे इत्यत्रापि पापाभावे इत्यर्थो ज्ञेयः । अथवा । मातापित्रापरपर्यायतीर्थे शब्दविवक्षया भद्रे अनघे इति नपुंसकसम्बुद्धिद्विवचनप्रयोगः । अतो न विरोधः ॥ ३७ ॥

तयोरिति । अत्र तयोर्वामित्यनयोरन्वयानुपपत्तिः । न चादितिकश्यपयोर्विशेषणत्वेन योजना । सप्तमीपञ्चमीभ्यां सामानाधिकरण्यानुपपत्तेः । नापि वां सकाशात् अहं पुनरेवासमिति योजना । अदितिकश्यपपदयोरसंगतत्वप्रसङ्गात् । तयोरेवैताभ्यां विवरणमिति चेन्न । तच्छब्देन प्रश्निसुतपसोर्गृहणेनादित्यादेर्ग्रहणायोगात् । तयोरेव तद्रूपताङ्गीकारेऽहं कश्यपाददित्यामास युवामेवादितिकश्यपौ जाताविति भावः । सत्तार्थकासधातोः कर्तरि लिडुत्तमपुरुषैकवचनरूपम् । ननु ब्रह्ममानसपुत्रमरीचिपुत्रत्वात्कश्यपस्य सृष्ट्याद्यभाग एव जन्मनः श्रुतत्वात्तत्काले सुतपसोः श्रुतत्वात्कथं सुतपसः कश्यपजन्म युज्यते इति चेन्न । पूर्वकल्पे यः सुतपा नाम प्रजापतिः स एवास्मिन्कल्पे कश्यपो जात इत्यङ्गीकारात् । न च पूर्वकल्पेऽपि एवंविधः कश्यप आसीदेवेति वाच्यम् । तत्पूर्वकल्पीयसुतपसोऽभ्युपगमात् । सृष्टेर्यथा पूर्वस्य श्रुतिसिद्धत्वात् । तस्मान्न क्षुद्रशङ्कावकाशः ॥ ४३ ॥

युवामिति । अत्र पुत्रभावेन चिन्तयतो भगवद्गतिप्राप्तिरुक्ता । तन्न युज्यते । ममताज्ञानयोः सद्भावेन विरुद्धत्वादर्थान्तरम् । उपमायां विकल्पे वेत्यमरोक्त्या वाशब्दस्योपमार्थकत्वात् । सर्ववस्तुतः पुत्रस्याधिकप्रेमास्पदत्वात्पुत्रभावेनेव ब्रह्मभावेनासकृन्मां चिन्तयन्तौ युवां परां मद्गतिं यास्येथे गमिष्यतः । चिन्तनमपि द्वेषभक्तिभ्यामसकृद्भवति । तत्र द्वेषात् दैत्यानामिव मद्गतिप्राप्तिरिति सूचयितुं कृतस्नेहावित्युक्तम् । अतो न कश्चिद्विरोधः ॥ ४६ ॥

पित्रोरिति । अत्र प्राकृत इत्युक्तस्य पुरुषः प्रकृतेः पर इत्यनेन विरोधोऽतोऽर्थान्तरम् । प्राच इव पूर्वबालमुकुन्दवत् कृतं शयनकर्म यस्य तादृशः शिशुर्बालो बभूवेत्यर्थः । अथवा । अत्रोपमालोपेन प्राकृतवदित्यर्थः । अतो न विरोधः ॥ ४७ ॥

''मार्गं ददौ सिन्धुरिव श्रियःपतेः'' अत्र श्रियःपतिशब्देन दाशरथेर्ग्रहणं न सम्भवति । श्रीशब्दस्य सीतावाचकत्वेऽनुशासनाभावात् । न च श्रीसीतयोश्चैतन्याभेदेन युक्तता । कीर्त्यादीनामपि तदभेदाद्धामनादीनामपि ग्रहणापातात् । नापि समुद्रेण मार्गदानं तत्रैव युज्यत इति । विप्रगुरुपुत्रानयनवेलायां कृष्णायापि समुद्रेण मार्गदानात् । तस्माद्रामार्थकत्वे श्रियः पतिशब्दस्य न निश्चय इत्यत उच्यते । त्रिभुवनजयलक्ष्मीर्मैथिली तस्य दारा इति नाटकेऽनुशासनसद्भावात् श्रीः सीतेति युज्यते । यद्वा पतेरित्यावृत्त्या योज्यम् । समुद्रस्य सरित्पतित्वेन यमुनापतित्वे सिद्धेऽपि । पतेः । स्वपतेः । अनुसारेणेति शेषः । श्रियः स्वकन्यायाः लक्ष्म्याः । पतेः भगवतः । पारिबर्हरूपं स्वयमनुस्मृत्य मार्गं ददाविति समुद्रेण स्वकन्यायां दत्तायां तदनुस्मृत्येदानीं पारिबर्हरूपमार्गदानं यमुनया कृतमिति भावः । अथवा । कालिन्दीति समाख्याता वसामि यमुनाजल इति कालिन्द्युक्तेः । पूरेण सिन्धुरिव वर्तमानाऽपि यमुनास्वाश्रितत्त्वाच्छ्रीनाम्न्याः स्वानुजायाः कालिन्द्याः पतेः भविष्यभर्तुर्लज्जयेति शेषः । मार्गं ददौ । स्त्रीजातिमत्याः स्वशालागमने स्वोद्धत्यप्रदर्शनं न न्यायमिति मत्वा लज्जया संकुचितत्वेन मार्गदानमर्थसिद्धमिति भावः । शालकत्वस्य भविष्यकत्वेनार्थवैलक्षण्यद्योतनायैव पतेरिति वैलक्षण्यप्रयोगः कृतः । अन्यथा पत्युरिति युक्तं स्यात् । सा सूर्यपुत्री यमुनानुजाता तपश्चरन्ती कृष्णपत्नीत्वकामेति हि तात्पर्यनिर्णये ॥ ५१ ॥

इति श्रीभागवते चतुर्थोऽध्यायः ॥ १०-४ ॥

॥ **इतीति ।** अत्र बाहुनामेति पाठः साधु । तस्य स्त्रियां ङीषोऽपेक्षितत्वात् । अतो विरोधस्तस्मादुच्यते । बहून् अनेकान्नामयति प्रह्वीकरोतीति बहुनामा तस्याभिधानार्थकत्वे ङीषोऽपेक्षितत्वेऽपि प्रह्वीभावार्थकत्वे टापोऽपि युक्तत्वात् न बहुनाम्नीति पाठस्यावश्यकत्वमित्यर्थः । यद्वा । बहुनामेति क्रियाविशेषणम् । बहुनाम यथा स्यात्तथा आबभूवेत्यर्थः । अथवा । बहुना दुर्गाभद्राकालीत्याद्यनेकनामविशेषेण । अमा सह । बभूव । अमा सह समीपे चेत्यमरः । बहुमाने सहवा । अपि वा । मः शिवो मा रमायां चेति विश्वात् । मा रमा बहुनामनिकेतेषु बहूनि त्रीणि नन्दभीष्मसत्राजिदिति नामानि येषां तेषां निकेतेषु गृहेषु दारेषु वा बहुना योगनिद्रा रुक्मिणी सत्यभामेत्यादिरूपत्रयेण । अपर्यवसितबहुत्वस्य त्रित्वे पर्यवसानमिति न्यायात् । पूर्णरूपेण वा । बहुः पूर्णतायामित्युक्तेः । भुवि बभूव । श्रीभूदुर्गेति त्रीणि रूपिणी रमा त्रिरूपैर्भगवत्सेवार्थमवतीर्णा बभूवेति भावः । कृष्णजन्मकाले रुक्मिणीसत्यभामयोरवताराभावेन लिटोऽनुपपत्तिरिति चेन्न । वक्तुः शुकस्य कथनसमयात्पूर्वमेव तिसॄणामप्यवतीर्णत्वात् । तस्मान्न प्रयोगासाधुत्वम् ॥ १३ ॥

अत्र केचित् पुरुषाद इवापत्यमिति पाठं कल्पयन्ति । तदयुक्तम् । कर्त्रोर्वैयधिकरण्यापातात् । न चात्रापि वचनासाम्यम् । तस्यान्वयानुपपत्त्यभावेनादोषत्वात् ॥ २२ ॥

क्षमध्वमिति । अत्रैतत्पद्यपूर्वार्धे देवकीवसुदेवयोः क्षमापनाङ्गीकारे तयोर्द्वित्वेन क्षमध्वमित्यादि-बहुवचनानुपपत्तिः । न च तयोर्बहुमानार्थं तदिति वाच्यम् । मा शोचतं महाभागावित्यत्र तदभावेनात्रैव तदङ्गीकारस्य नियामकाभावात् । किञ्च स्त्रीपुंसयोरुच्चारणे स्त्रीपूर्वकस्यैव दृष्टत्वात् । श्याल-शब्दस्य चानल्पमात्रकत्वात् श्यालस्वस्रोरिति कथम् । अपि च । श्यालशब्दस्य भार्याभ्रातृवाचकत्वेन भगिनीभर्तृभामशब्दवाच्यत्वेन च वसुदेवस्यच भार्याभ्रातृत्वाभावेऽपि कथं श्यालशब्दवाच्यत्वम् । अतोऽनेकविधविरोधोऽत उच्यते । ननु आवयोस्त्वद्दुरात्मतासहनेन शोकाभावेऽपि बाधकस्य दुःख-मजानतस्तव बाध्यानामस्मत्पुत्राणां षण्णां मृतिजन्यदुःखप्रापकत्वात्कथं ते तव दुरात्मतां सहेयुरिति चेत् । तानेव क्षमापयामीत्याशयेन तान्स्वमनस्यभिमुखीकृत्याह ॥ **क्षमध्वमिति** । हे साधवः । परदुःखमसहमानाः । अत एव दीनवत्सलाः । हे देवकीपुत्रा मम दौरात्म्यं क्षमध्वम् । यतोऽहमिति शेषेणाश्रुमुख इति योज्यम् । पूर्वजन्मकालिकः पितेत्यर्थः । पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिता इति ब्राह्मोक्तेः । अतोऽनेन तेषां क्षमापनेन स्वपितृत्वमेव हेतुरुक्तो भवति । तदुक्तम् । मरीचिजाः षण्मुनयो बभूवुस्ते देवलं प्राहसन्काश्यहेतोः । तच्छापतः कालनेमिः प्रसूतावध्यतार्थं तप एव चक्रुः । धाता प्रादाद्वरमेषां तथैव शशाप तान्क्ष्मातले सम्भव-ध्वम् । तत्र स्वतातो भवतां निहन्तेत्यात्मान्यतो वरलिप्सून् हिरण्यः । इति तात्पर्यनिर्णये । श्यालः

वसुदेवभार्या । भ्राता कंसः । इत्युक्तप्रकरेण पुत्रप्रकारेण क्षमापनमुक्त्वा वसुदेवं समाधत्ते ॥ **स्वस्रोरिति** । अत्र श्यालस्वस्रोरित्युक्तम् । तदसाधु । पुंस्त्रीद्वन्द्वे स्त्रीवाचकशब्दस्य पूर्वनिपात-नियमात् । स्वसृ शब्दापेक्षया श्यालशब्दस्य मात्राधिक्याच्च । न च स्वसुः सकाशात् श्यालस्य पुरुषत्वेनाभ्यर्हितत्वात्पूर्वनिपातः । सर्वत्र पुरुषस्याभ्यर्हितत्वेन कुत्रापि स्त्रियाः पूर्वनिपातायोगात् । तस्माद्विरुद्धमत उच्यते । प्रथमान्तश्यालशब्देन कंसः कर्तोच्यते । स्वस्रोः स्वां भगिनीं सरण-शीलत्वेन स्वसुर्वसुदेवः स्वा आत्मसम्बन्धित्वाद्भगिनी । सृ गतौ ताच्छील्यार्थादुनस्तथेत्यनु-व्याख्याने । यद्वा । स्वात्मानं स्रावयति अधः पातयति स तथा । अत्रान्तर्णिच् । तस्य वसुदेवस्य । पादावग्रहीदित्यन्वयः । भगिन्यर्थकस्वसृशब्दाङ्गीकारे एषा तवानुजा बालेति वसुदेवोक्त्या देवक्याः कंसानुजत्वसिध्या तत्पादग्रहणे महान्विरोधः प्रसज्येत । किञ्च श्यालस्वस्रोरिति द्विवचनाङ्गीकारे पादाविति द्विवचनमयुक्तम् । उभयोश्चतुष्पादसिद्धेः । यद्वा । पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिता इति ब्राह्मोक्त्या स्वपित्रादीनामश्रुमुखसंज्ञयाऽत्राश्रुमुख इत्येकवचनेन पितुरेव ग्रहणसिद्धेः । अश्रुमुख इति प्रथमायाः सप्तसु प्रथमेति सूत्रेण षष्ठ्यर्थकत्वा-त्पितुः स्वसृत्वेन स्वस्य च स्वसृत्वेन पितृष्वसा च स्वस्वसा च स्वसारौ तयोरित्युभयस्वसृविवक्षया एकस्यैव द्विवचनोपपत्त्या देवक्या इत्येवार्थः । तदुक्तम् । बभूव गन्धर्वमुनिस्तु देवकनामास्य

तस्मादजनिस्म देवकी । अन्याश्च या कश्यपस्य भार्या ज्येष्ठां तु तामाहुक आत्मपुत्रीम् । चकार तस्माद्धि पितृष्वसा । स्वसा च कंसस्य बभूव देवकीति तात्पर्यनिर्णये । किञ्च अहो भुगिन्य भामेत्युक्त्या भगिनीभर्तुर्भामशब्दप्रयोगेणैव स्त्रीभ्रातुः श्यालशब्दप्रयोगसिद्धेः । अत्र श्यालः कंस इत्यर्थः । तथा च । श्यालः कंसः । अश्रुमुखः स्वपितुः स्वसृत्वात् द्विवचनविषया एव स्वस्रोर्देवक्याः पादावग्रहीत् । पितृष्वसृत्वसम्बन्धेन पादग्रहणे दोषाभाव एव । अतो न किञ्चन शब्दप्रयोगासाधुत्वम् ॥ २३ ॥

भ्रातुरिति । अत्र देवकीवसुदेवश्चेति कर्तृसमुच्चयपक्षे ल्यबन्तक्रिययोरेककर्तृकत्वनियमात् भ्रातुर्वचनमाश्रित्येत्यनेन वसुदेवस्यापि कंसभ्रातृत्वापातोऽत उच्यते । देवकी । भ्रातुः कंसस्य । वचनमाश्रित्य । क्षांत्वा क्षमां कृत्वा । रोषं व्यसृजदित्येकोऽन्वयः । अन्यस्तु । वसुदेवश्च प्रहस्य तमुवाच हेति । यद्वा । देवकीति षष्ठ्यर्थे । वसुदेवः क्षांत्वा देवक्या भ्रातुर्वचनमाश्रित्य रोषं व्यसृजत् प्रहस्य तमुवाचेत्येक एवान्वयः ॥ २५ ॥

कंस इति । अत्र कंसो देवकीवसुदेवाभ्यां विशुद्धं प्रतिभाषितः सन्निति योजनायां भ्रातुर्वचनमाश्रित्येति श्लोके एकवसुदेवभाषणाङ्गीकारेण विरोधोऽत उच्यते । एवं विशुद्धं प्रतिभाषितः कंसः प्रसन्नाभ्यां देवकीवसुदेवाभ्यामनुज्ञातः सन् गृहमाविशदित्यन्वयः । देवक्यादितृतीयान्वयस्तु अनुज्ञातपदेन प्रतिभाषितपदे तत्र वसुदेवेति शेषः । अतो न विरोधः ॥ २८ ॥

रहोजुषेति । अत्र शम्भुना वा वनौकसेत्यनेन मन्त्रिकृतं रुद्रहेलनं कथं श्रुतम् । कंसस्य तद्भक्तत्वात् । रुद्रपरमभक्तजरासन्धजामातृत्वात् । विशंसतु पशून्मेध्यान्भूतराजाय मीहुषे इत्याज्ञापनाच्च । अतो विरोधस्तस्मादुच्यते ॥ **रहोजुषेति** । हरिहेलनं श्रुत्वा कंसः शङ्कते । न केवलं हरी रहोजुट् किंतु जलस्थोऽपि । महोदधिशयोऽन्तक इत्युक्तेः । लोकरूढ्याऽस्माकं जले दृश्यत इति भावः । तत्र मन्त्रिभिरनूद्योत्तरितम् ॥ **वनौकसेति** । यद्यपि जीवनं भुवनं वनमिति कोशाज्जलाश्रयत्वम् तथापि शंभुनावेत्यनेन शम्भुः नौः तरणसाधनं यस्य तेनेति । अनेनास्माकं प्रीतिकृत् शम्भुस्तारयेन्नास्मदप्रियमिति सूचितम् । अतो जलस्थस्यापि हरेर्जलतरणे स्वातन्त्र्याभावात्तेन किं भयमस्माकमिति भावः ॥ ३६ ॥

मूलमिति । अत्र तस्य चेत्यादिना विष्णोर्ब्रह्मगवादिमूलकत्वमुक्तम् । तदयुक्तम् । सर्वकारणकारण इत्यनेन विरोधादत उच्यते । इदमसुरोक्तत्वादासुरं मतम् । यद्वा । तस्य विष्णोः । ब्रह्मगवादयः । च शब्दसंगृहीतमूलानि । वचनविपरिणामात् । मूल संवरण इति धातोराच्छादका इत्यर्थः ॥ ३९ ॥

इति श्रीभागवते पञ्चमोऽध्यायः ॥ १०-५ ॥

कालेनेति । अत्र द्रव्याणीत्यनेनैवात्मलाभे पुनः पार्थक्येनात्मग्रहणमयुक्तमित्यत उच्यते । चेतनोऽचेतनश्चेति भावोऽस्मि द्विविधो मत इति द्रव्यवैविध्यविवक्षया पृथगात्मग्रहणेऽपि नायुक्तता । तथा च क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मन इति कारिकोक्तनवद्रव्याणामित्थं शुद्धिः । शूद्रान्नं त्रिदिनैः शुध्येदित्यादिना कालेन पार्थिवभागस्य शुध्या । कालेन क्षितिः सतां स्नानेनापो हरन्त्यघं तेऽङ्गसङ्गात्तेष्वास्ते ह्यपभिद्धरिरिति गङ्गां प्रति भगीरथोक्तेः । शौचेन तापादिना संपादितशुध्या तेजोंऽशभूतं सुवर्णादि । तापादिना हेम मलं जहातीत्युक्तेः । संस्कारैः रेचनपूरणकुम्भकाद्यैर्मरुत् प्राणरूपो वायुः । प्राणान्संशोध्य यत्नेन पूरककुम्भकरेचकैरित्युक्तेः । तपसा । तप आलोचन इति धातोः । ध्यानरूपालोचनेन व्योमः हृदयाकाशः । हृदिस्वेध्यायननिष्ठयेत्युक्तेः । ईज्यया । यजपूजा-दाविति धातोः । पूजादिनाऽशौचसंपादकोपरागादिकालः । दानैः । दो अवखण्डन इति धातोः । सामन्तिकाहितखण्डनैरित्यर्थः । दिशः प्राच्यादयः । सन्तुष्ट्या कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यच्चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचिदिति वचनेन कामाद्यनुपहतप्रशान्ताखिलवृत्तित्वेन ब्रह्मदर्शनसुखेनेत्यर्थः । मनो मानसम् । ननु पूर्वमात्मशुद्धिसाधनमुक्त्वा व्यवहितमनःशुद्धिसाधन-मुक्तम् । अतो व्यत्ययः कथम् । अत्रोच्यते । अचेतनजातिमद्द्रव्याणां मध्ये एकस्यैव चेतनत्वेन द्विजातीयस्यात्मनो ग्रहणेऽस्वारस्यं मत्वा मनोनन्तरमेवात्मग्रहणं युक्तमिति प्रदर्शनार्थमादौ मनःशुद्धिसाधनोक्तिरिति ज्ञेयम् । अध्यात्मविद्यानामिति विभूतिकथनेन सर्वोत्तमात्मज्ञानार्थकात्म-विद्याया आत्मा जीव एतानि द्रव्याण्येते शुध्यन्तीत्यन्वयः । एतैः, कैरित्याशङ्कायां कालेनेत्यादि विविच्य दर्शितम् ॥ ४ ॥

ता इति । अत्र चिरं पाहीत्यसङ्गतम् । कं प्रति को वक्तेत्यस्याज्ञानात् । किं च गोप्यः किमज्ञा वा सुज्ञाः । नाद्यः । भगवददर्शनप्रसङ्गात् । द्वितीये भगवद्रक्षणविषयेऽन्यप्रार्थनायोगात् । अतोऽपि विरोधः । अत उच्यते । हे बालके इति जीवन्तिकाख्यप्रसूतिदेवतां प्रति गोप्युक्तिः । बालाः शिशवः काः ब्रह्माणः यस्यास्तादृशभगवन्नामिके देवतेत्यर्थः । अत एव जीवन्तिकेत्याख्या जीवन्ति सप्राणा भवन्ति काः ब्रह्माणो ययेति विग्रहेण समानार्थकत्वात् । यद्वा । वशब्दस्य सुखार्थकत्वात् । वाः सुखरूपाः अलकाः केशा यस्या इति हृषीकेशाख्यत्वात् वस्य सुखात्मकमूलरूपस्य केशरूपे कृष्णे इति सप्तमी वा । तथा च त्वम् । इममिति शेषः । चिरं पाहीति बहुकालं रक्षेति आशिषः प्रयुञ्जानाः सत्य इत्यन्वयः । अथवा । हे बालकाख्यभगवद्देवते । न इति शेषः । चिरं पातुः चिरंजीव-नान्यथाऽनुपपत्त्या सिध्यास्ताश्चिरंजीवनामका आशिषः प्रयुंजानाः । अपि वा । ता गोप्यः । बालके कृष्णे । चिरं पाहि चिरंजीवेति । आशिषः प्रयुंजानाः । अनेकार्था हि धातव इति भागुर्युक्तेः ॥११॥

वसुदेव इति । अत्र नन्दवसुदेवयोः वैश्यक्षत्रियत्वेन भ्रातृत्वमयुक्तमित्यत उच्यते । तस्मै वरः समया सन्निसृष्टः स चास नन्दाख्य उतास्य भार्या । नाम्ना यशोदा स च शूरजातः सुतश्च वैश्याप्रभवोऽथ गोप इति तात्पर्यनिर्णयोक्तेर्भ्रातृत्वं युक्तमेवातो न विरोधः ॥ १९ ॥

इति श्रीभागवते षष्ठोऽध्यायः ॥ १०-६ ॥

अत्रोपगमप्रवेशार्थकयोर्ल्यबन्तक्रिययोर्गोकुलैककर्मत्वाङ्गीकारे उपगमं विना प्रवेशानुपपत्त्याऽर्थतस्तत्सिद्धौ पुनस्तद्ग्रहणस्य व्यर्थत्वमतोऽर्थान्तरमुच्यते । कंसेन प्रहिता घोरा पूतनेत्यादिना पूतनायाः प्रकृतत्वेन ग्राह्यत्वेऽपि परोक्षतया तच्छब्देन वचनात् । या पूर्वं तुम्बुरोः सङ्गता कुबेराच्छापं प्राप्ता सोर्वशीत्यर्थः । खेचरी स्वर्वेश्या ऊर्वशीमुखा इत्युक्तान्तरिक्षचारिणी । यद्वा । आत्मन आकाशः सम्भूत इति श्रुत्या आत्माख्यनरजातत्वान्नारशब्दः खवाची । स आकाशोऽयनं मार्गो यस्य स नारायणः खेचरशब्दवाच्यः । तत्सम्बन्धित्वात्खेचरी ऊर्वशी तत्पुत्रीत्वेन प्रसिद्धेः । एकदा कुबेरशापावाप्त्यनन्तरकाले । पूतनानन्दगोकुलमित्येकं पदम् । पूतनायाः पूर्वताटकायाः । अनन्दाः । अनन्दा नाम ते लोका इति श्रुतेः । दुःखकारकाः । या गावः इन्द्रियाणि । तासाम् कुम् आश्रयम् लाति स्वीकरोतीति । तं पूतनादेहम् । गौः स्वर्गे इत्यारभ्य भूगवादिषु योषितीति विश्वः । गोत्रा कुः पृथिवीत्यमरः । ला आदाने इति धातुश्च ॥ **उपेत्य आविश्य ॥ आत्मानम् आदत्तं पूतनादेहम् ॥** मायया मोहकशक्त्या ॥ गोपित्वा आच्छाद्य ॥ **कामचारिणी** । कामं गोपानां मन्मथं चारयति प्रवर्तयत्यात्मनीति तथाभूता सती प्राविशत् । प्रायेण यमुनातटे वस्त्रनिर्मितं गृहमिति शेषः । तदुक्तम् । सा ताटका चोर्वशी संप्रविष्टा कृष्णावज्ञानान्निरयं सञ्जगाम । सा तूर्वशी कृष्णभुक्तस्तनपूता स्वर्गं प्रययौ तत्क्षणेन । सा तुम्बुरोः सङ्गत आविवेश रक्षस्तनुं शापतो वित्तपस्य । कृष्णस्पर्शाच्छुद्धरूपा पुनर्दिवं ययौ । तुष्टे किमलभ्यं रमेशे । इति तात्पर्यनिर्णये । विवेश नन्दस्य गृहं बृहद्वनं प्रान्ते हि मार्गे रचितं प्रयाणे । तीरे भगिन्यास्तु यमस्य वस्त्रगृहे शयानं पुरुषोत्तमं तमिति च ॥ ४ ॥

पतमान इति । अत्र षट्क्रोशपर्यन्तं द्रुमादिचूर्णीभाव उक्तः । तदा व्रजस्य कथं सत्त्वेन स्थितिरित्यतो विरोधोऽत उच्यते । दुर्गाजन्मनः प्राक् कंसाय करं दातुं व्रजान्निर्गतस्य नन्दस्यानुवृत्त्या गताया यशोदाया मार्गमध्ये यमुनातीरे परवेश्मनि प्रसवे जाते तत्र चतुर्मासं वसतौ कृतायां पूतनावधस्य तत्रैव सम्भवाद्बृहद्वनस्थितव्रजस्य न चूर्णीभावः । तदुक्तम् । पूर्वं हि नन्दः स करं हि दातुमित्यारभ्य पपात सा व्याप्य वनं समस्तमित्यन्तं तात्पर्यनिर्णये । अत एवाद्भुतमिवेत्युक्तम् । अस्याल्पद्रष्टॄणामद्भुततत्वेऽपि बहुद्रष्टॄणामद्भुतमिवाभवत् । न त्वद्भुतमिति भावः । नन्वेवं चेत्प्रजाः संमृष्टमसंसिक्तेत्यादिना गोपीमोदवर्णनेन च विरोध इति चेन्न । गोपाः समाययू राजन्निति बलिभि-

स्त्वरितं जग्मुः । पृथुश्रोण्य इति च कथनेन बृहद्वनस्थव्रजमलंकृत्य जन्मोत्सवदर्शनार्थं गमनलाभात् । रोहिण्या अपि तथैवागमनाङ्गीकारात् । कासांचिद्गोपीनां व्रजं त्यक्त्वा सूतिकासन्निधौ स्थित्यभ्युपगमेन च न कश्चिद्विरोधः ।। १५ ।।

गोप्य इति । अत्र बीजन्यासमित्यत्र व्याख्यातृभिरष्टाक्षरन्यासमिति व्याख्यातम् । अष्टाक्षरस्य वैदिकत्वेन स्त्र्यनधिकारिकत्वाद्गोपीनां च कर्तृत्वाद्विरोधोऽत उच्यते । प्राहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके इत्युक्तेः । देवस्त्रीणां गोपीरूपत्वेनावतीर्णत्वादुत्तमत्वेनाधिकारसद्भावात् । वस्तुतस्तु गोप्यः संस्पृष्टसलिला उपस्पृष्टोदकाः सत्यः ।। **करयोः कराङ्गुलीष्वित्यर्थः ।।** अङ्गेषु हृच्छिरः शिखादि-पञ्चाङ्गेषु ।। **पृथक् कर्णबीजपार्थक्येन ।** न्यस्य । भूरग्न्यात्मनेऽनिरुद्धायेत्यादि सत्यं सत्यात्मने नारायणायेत्यन्तानां न्यासम् कृत्वा ।। **अथ उभयन्यासानन्तरम् ।** बालस्य ।। आत्मनि शिर आदिजीवबिम्बरूपान्तस्थानेष्वित्यर्थः ।। **बीजन्यासम् ।** अम् अजायनम इत्यादि क्षं नृसिंहाय नम इत्यन्तम् मातृकान्यासम् ।। **अकुर्वत चक्रुः ।** यद्वा आत्मनि शिरोहृत्पादरूपाङ्गेष्वित्यर्थः । बालस्य बालकृष्णस्य । बीजन्यासं क्लीमिति बीजन्यासम् । अकुर्वत । केचिदाबालयोरुभयोर्न्यासकरणं व्याचक्षते । तच्चिन्त्यम् । तथात्वे न्यस्यात्मनोऽथ बालस्येति न्यस्यात्मन्यथ वा बालस्येति पाठः स्यात् । षष्ठीसप्तम्योस्तु पृथग्विभक्तिप्रदर्शने कारणाभावात् । अयमप्यर्थो व्याख्यातृहृदं वरवर्ती । अविरुद्धत्वात्प्रदर्शयिष्यमाणत्वाच्च ।। २२ ।।

अव्यादिति । अत्र पादादिशिरोऽन्तन्यासोक्त्या लयन्याससिद्धेः । तन्न्यासस्य च यत्याधि-कारिकत्वात्कृष्णे च तदाश्रयाभावात्कथमयं न्यासो युज्यतेऽत उच्यते । नायं न्यासः किन्तु इयमङ्ग-रक्षाऽतो न विरोधः । तथाऽङ्गीकारपक्षे व्याख्यातृभिः पूर्वं द्वादशाङ्गेषु नामभिरित्यत्र द्वादशाङ्गेषु ललाटादिद्वादशावयवेष्विति व्याख्यानात् । आत्मानं भगवान्पर इत्यत्रात्मानं मध्यमिति व्याख्यास्य-मानत्वात् । पूर्वश्लोके न्यस्यात्मन्यथेत्यत्रात्मशब्दस्य मध्यार्थकत्वात् । तेन च सृष्टिलययोर्मध्यस्थत्वेन स्थितिन्याससिद्धेश्च । अत्र च लयन्यासोक्त्या त्रयाणामप्याश्रमाणां स्वावयवेभ्यो जनकस्य कृष्ण-स्योपनयनाभावेन पृथगेकैककरणायोगात् त्रयाणामपि न्यासानां युक्तत्वं बोद्धव्यम् ।। २३ ।।

पूतनेति । अत्र पूतनाया जिघांसया स्तनदानेन सद्गतिरुक्ता । तदयुक्तम् । तं यथा यथोपासते तदेव भवति । ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति श्रुतिविरोधापातात् । अत उच्यते । **राक्षसी** पूतना । पूतिं दुर्गन्धं नयति प्रवर्तयतीति सा तथा ।। **जिघांसया वधेच्छया निमित्तेन ।। रुधिराशना ।** रुध्या निरोधे नरः अग्निबीजतया दाहो यस्मिंस्तत्तमः **अश्नाति प्राप्नोतीति सा तथा ।** अभूदिति शेषः । अशु प्राप्ताविति धातोः । या आलोकबालघ्नी । **आलोकेन अवलोकनेन बालान्** विषयाभिमुखत्वेन बालिशान् हन्ति अनर्थं प्रापयति सा तथा ।। **पूतना । पूतः तपसा पवित्रः**

विश्वामित्रादिः ना पुरुषो यस्याः सा । पूतान्नयति स्ववशमिति वा । नृ शब्दात् स्त्रियां ङीषोऽपेक्षितत्वेऽपि टापू समानेति सूत्रोक्तदिशा ध्येयः । तादृगुर्वश्यपीत्यर्थः । हरये स्तनं दत्वा ॥ **सद्गतिम् अप्सरस्त्वरूपां गतिम्** । आपेति न कोऽपि विरोधः ॥ ३६ ॥

किं पुनरिति । पूर्वश्लोके उर्वश्याः स्तनदानेन सद्गतिप्राप्त्युक्तौ किं पुनः शब्दासङ्गतिः । जिघांसयाऽपि स्तनदानेन सद्गतिप्राप्तौ श्रद्धया दातुरेव कैमुत्यकथनस्यौचित्यात् । अत उच्यते । जिघांसया युक्ता पूतना देहस्थितायास्तद्द्वारा स्तनदानेन सद्गतिप्राप्तौ तत्संघविहीनाः पृश्निदितिदेवकीयशोदाख्या रक्ता भक्ता मातरो यथा सद्गतिमाप्नुयुस्तथा ॥ **श्रद्धया विश्वासयुक्तया** ॥ भक्त्या माहात्म्यज्ञानपूर्वकातिस्नेहेन । कृष्णाय ॥ **किञ्चित् किमपि प्रियतमम्** ॥ **यच्छन् ददन्** । सद्गतिं प्राप्नुयादिति किं पुनर्वक्तव्यमित्यङ्गीकारे नासङ्गतिदोषः । अयमर्थोऽग्रिमश्लोके व्यक्तो भविष्यतीति ॥ ३७ ॥

पद्भ्यामिति । उर्वश्याः पूतनासंसृष्टत्वं कैमुत्यसिध्यर्थमुक्तं स्पष्टयति ॥ **पद्भ्यामिति द्वाभ्याम्** ॥ अङ्गं पूतनाशरीरं समाक्रम्य । स्थिताया इति शेषः ॥ **यस्याः उर्वश्याः** । स्तनं भगवानपिबत् ॥३८॥

यातुधान्यपीति । सा ॥ **यातुधानी** । यातु पूतनाख्यं रक्षः तस्मिन्धीयत इति यातुधानी पूतनाविष्टाऽप्यूर्वशीत्यर्थः । जनन्याः यशोदायाः गतिर्यत्र तं स्वर्गमवाप । कृष्णभुक्तस्तनक्षीरा अत एव । अनुमातरो हितापेक्षया मातृसमाना गावो जननीगतिमवापुरिति किमु वक्तव्यमित्यर्थः ॥ ३९ ॥

इति श्रीभागवते सप्तमोऽध्यायः ॥ १०-७ ॥

तद्दामेति । अत्र द्व्यङ्गुलस्यैवोनत्वे किं निमित्तमित्यस्यापरिहारदर्शनाद्वक्तुरभिप्रायो व्यक्तीक्रियते । भगवद्बन्धनाङ्गीकारविषयकृपोत्पादने साधनत्रयमपेक्षितम् । भक्तिर्ज्ञानं वैराग्यं चेति । तत्र यशोदाया यदि ज्ञानं स्यात्तर्हि न चान्तर्न बहिर्यस्येत्यादिनोक्तस्य बन्धने कथं प्रवृत्तिः स्यात् । तथा वैराग्यं यदि स्यात्तर्हि दधिभाण्डविध्वंसेन तद्बन्धने कथं प्रवृत्तिरत उभयाभावः । भक्तिस्तु । जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ । भक्तिः स्यात्परमा लोके ययाऽञ्जो दुस्तरं त्यजेत् । अस्त्वित्युक्त इत्यारभ्य ततो भक्तिर्भगवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीदित्युक्तेः सिद्धा । अत्र द्व्यङ्गुलिशब्दो न केवलोन्मानार्थकः किन्तु वस्तुद्वयशंसने द्व्यङ्गुलप्रसारणवत्संकेतेन सञ्ज्ञार्थकश्च । अत एकभक्तिसद्भावेऽपि उभयोर्ज्ञानवैराग्ययोर्न्यूनतां द्योतयितुं द्व्यङ्गुलोनताया एव प्रदर्शनम् । अत एव चतुरध्याय्यां साधनाध्याये चतुष्पादानां पृथक् पृथक् प्रमेयत्वेऽपि सद्भिर्वैराग्यभक्तिश्च श्रुतिमतिनियतध्यानजज्ञानयोगाद्गम्यमित्युक्त्या तृतीयपादोक्तोपासनाया ज्ञानकारणत्वं प्रदर्श्य वैराग्यभक्तिज्ञानानामेव त्रयाणां भगवद्रतिसाधनत्वं टीकाचार्यैः प्रतिपादितम् । यद्यप्यत्र कृपापरपर्यायप्रसादोत्पादकज्ञानस्य वैराग्यभक्त्युपासनहेतुकत्वमुक्तम् तथापि कलौ मानुषलोके प्रायः स्त्रीणां वेदार्थश्रवणमननध्यानकर्मण्यधिकाराभावादुपासां विनैवात्र साधनत्रयमङ्गीकृतमिति बोध्यम् ॥ १५ ॥

नेममिति । विरिञ्चादयस्त्रयो मिलित्वा कर्तृत्वेन योजिताश्चेत्त्रयाणां नकाराणामनन्वयः । तदर्थं पृथक् पृथगन्वये क्रियाबहुवचनायोगः । अतोऽर्थान्तरस्य वक्तव्यतायां केचित् लेभिर इत्यस्य लेभिरं स्यादूलूखलमिति कोशबलेनोलूलार्थकतां कल्पयित्वा लक्षणया बन्धनाधिकरणतां वदन्ति । तच्चिन्त्यम् । तत्कोशस्यैवानुपलब्धेः । अत इत्थं योजना । तत्रैवं पदच्छेदः । ना इमं विरिञ्चः अनभवः नश्रीः अपि अङ्गसंश्रया प्रसादं लेभिरे गोपी यत् तत् प्राप विमुक्तिदात् इति ॥ **गोपी यशोदा ॥ यत् यस्मात्कारणात् ॥** इमम् स्वसम्बन्धानानुकूल्यरूपम् ॥ **प्रसादम् ॥ विमुक्तिदात्** यथायोग्यविशेषसहितमुक्तिदातुर्भगवतः सकाशात् प्राप तत् तस्मात्कारणात् इमम् उक्तार्थं प्रसादम् । हरिप्रीतिसाधनत्वाभावात् ॥ **अपि गर्हितम् ।** अपि गर्हासमुच्चये इत्यभिधानात् ॥ **ना ।** सर्वप्रवर्तको मुख्यप्राणः ॥ विरिञ्चः ब्रह्मा ॥ अनभवः । अन चेष्टायामिति धातोः । मारुत्येव यतश्चेष्टेत्युक्तेश्च । अनः प्राणः तत्पुत्रः रुद्रः । आभासकोऽस्य पवनः पवनस्य रुद्र इत्युक्तेः ॥ **श्रीः भारती लक्ष्मीर्वा ।** अङ्गसंश्रयेति विशेषणम् लिङ्गविपरिणामेन सर्वकर्तृषु योज्यम् । उद्यद्रविप्रकर-सन्निभमच्युताङ्के स्वासीनमित्यादेः । ध्यायेन्निषण्णमजमच्युताङ्केभिपद्मे इत्युक्तेः । सर्वात्म-नोऽन्तःकरणगिरित्र इत्युक्तेः । स्वभर्तुरंकस्थितामित्युक्त्या आश्रयते स्वभर्त्रङ्कमिति व्युत्पत्त्या च परंपरया भगवदाश्रितत्वात् । सरस्वती प्रादुरभूत्किलास्यत इत्युक्तेर्वा । श्रियो निवासो यस्योर

इत्युक्तेश्च । एतेन लेभिरे बन्धनानुकूलीकरणेच्छाभावात् । न तु यशोदायाः सकाशात् । गुणहीनत्वात् । तेषामादिसृष्टौ प्रथमोत्पन्नत्वात् । यत उक्तम् । आदिसृष्टौ पूर्वजाये तेऽधिकाः सर्वदा गुणैः । अनाद्यनन्तकालेषु मुक्तावपि यथाक्रममिति निर्बन्धे कृपानिमित्तायाः प्रीतिर्नीचभक्तेषु साधिका । आन्तरैव तु या प्रीतिः सा तूच्चेषु यथाक्रमम् । यथा कश्चित्स्वात्मानं प्रियापुत्रमथाऽपि वा । अतिहाय कृपायुक्तो भिक्षवेऽन्नं ददात्यपि । कदाचिदेव न पुनः स्वात्मादेः सार्वकालिकम् । योगक्षेमबहुत्वं च नित्यं स्वात्मादिषु स्फुटम् । एवमेव परेशस्य भक्तेषु श्रीयजादिषु । इति प्रियविवेके च । अत एव भक्त्या भगवता स्वबन्धनाय कृतमप्यानुकूल्यं प्रियकारित्वाभावात्कृष्णवियोगजन्यदुःखकारणं जातमिति भावः ॥ २० ॥

इति श्रीभागवते दशमोऽध्यायः ॥ १०-१० ॥

उवाहेति । अस्य यथा श्रुतार्थाङ्गीकारे हरिवंशे श्रीदामा कृष्णमुवाहेत्युक्तेर्विरोधः । अतोऽत्रत्य-कृष्णश्रीदामशब्दयोर्विभक्ती विपरिणम्य कर्मकर्तारौ कल्पनीयौ । विपरीतं किं न स्यादिति चेन्न । बहुमानविरोधे तु व्यत्यासः शब्दतोऽर्थतः । कार्यो निरुक्तं देवानां गुणसिध्यै न चान्यथा । विष्णुर्ब्रह्मा तथा वायुरनिरुक्ताः प्रकीर्तिताः । तत्पत्न्यश्चेतरा गुणा व्यत्यासस्तेष्वसंशय इति ब्रह्मतर्कोक्तिसंवादात् । किञ्च तत्र चक्रुः परिवृढौ गोपा रामजनार्दनावित्युक्त्या कृष्णस्य परिवृढत्वेन वाहकत्वायोगात् । न हि

लोके परिवृढौ वाह्यवाहकौ भवत इति प्रत्यक्षविसंवादाच्च । ननु रामसङ्घट्टिनौ ये तु श्रीदामवृषभादय इत्युक्त्या जयवद्रामपक्षस्थः श्रीदामा पराजितं कृष्णं कथं वहेदिति चेन्न । कृष्णस्य पराजितत्वाभावात् । यतो धर्मस्ततो कृष्णो यतः कृष्णस्ततो जयः । यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्ममेत्याद्युक्तेः । तर्ह्यूहुः कृष्णादयो नृपेति वाक्यस्य का गतिरिति चेत् । कृष्णोदय इत्यत्रातद्गुणसंविज्ञानबहुव्रीहेरङ्गीकारात्सुगमैव गतिः । जय्यपि श्रीदामा स्वस्य वाह्यत्वेऽपि कृष्णसखत्वात्स्वयमेव तमुवाह । श्रीदामा नाम गोपालो रामकेशवयोः सखेत्युक्तेः । ननु च भगवतः पराजितत्वासम्भवे कथं पराजय इति न शङ्क्यम् । तं भूतिरिति देवा उपासां चक्रिरे । ते बभूवुस्तस्माद्धाप्ये तर्हि सुप्तो भूर्भुरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह पराबभूवुरित्यादिश्रुतेः । प्रलम्बासुरस्य नैसर्गिकपराजयत्वेन कृष्णपक्षे तत्स्थित्या पराजयप्राप्तेः । तदर्थमपि स्वपक्षपराजयं कथमुररीचकारेति चेत् । दुष्टानां मोहनार्थाय सतामपि च कुत्रचित् । यथायोग्यफलप्राप्त्यै लीलैषा परमात्मन इत्युक्तेर्न कश्चिद्दोषः । उवाह कृष्णो भगवान् श्रीदामानं पराजित इत्यत्रापि पराजित शब्दस्य परैरजित इति विग्रहाङ्गीकाराच्चेत्यलं विस्तरेण ॥ २२-२३ ॥

इति श्रीभागवते षोडशोऽध्यायः ॥ १०-१६ ॥

भद्रकालीमिति । अत्र भूयात् भूयां वेत्येकवचनेन नन्दस्नुषा इति बहुवचनस्य विरोधः ।

अतोऽर्थान्तरमुच्यते । पूर्वोक्तनन्दगोपसुतं देव पतिं मे कुरुते नम इतिवदत्राप्यहं नन्दस्नुषा भूयामिति प्रातिस्विकाभिप्रायेण गोप्यो भद्रकालीं समानर्च्युरित्यन्वयः । न चात्र स्नुषा इति सन्ध्यभावो दोषाय । अर्थान्तरसापेक्षत्वात् । व्यत्ययोऽतिशयकुत्सनाभेदेष्विति हि सूत्रम् । सर्वातिशयितेत्यर्थः । यद्वा । कात्यायनादिशब्दैस्त्वं हि जगदम्बेति प्रसिद्धासीति हेतोर्वयं ते स्नुषा इति । तुभ्यमिति शेषः ॥ **नन्दः ।** आनन्दः ॥ **भूयात् भवतु ।** अन्यथा त्वं जगदम्बात्वेनास्मत्कृष्णयोरपि भ्रातृत्वसम्बन्धसिध्द्येष्टानाप्तिः स्यादित्याशयेन भद्रकालीं समानर्चुः । अथवा । उक्तरीत्या त्वत्सर्व स्नुषाः प्रति स कृष्णः । नन्दः आनन्दकरः । मा भूयात्किन्तु मामेवानन्दकरो भूयादिति भावेन भद्रकालीमानर्चुः । किंवा । सर्वजगतस्तेऽपत्यत्वेऽपि स कृष्णोऽपत्यं मा भूयाद्वयं च स्नुषा मा स्याम । अस्माकं त्वदपत्यत्वेऽपि कृष्णस्य तदभावादस्मत्सम्बन्धो युक्तः स्यादित्याशयेन भद्रकालीं सर्वासां भद्रवंचकां देवीम् । कल वञ्चन इति धातोः । आनर्चुः अपूजयन् । अतो न विरोधः ॥ ७ ॥

इति श्रीभागवते विंशोऽध्यायः ॥ १०-२० ॥

ते त्विति ॥ **ते गोपाः ॥ तु भेदेन ।** तुर्विशेषे तथा भेदे स्वसिद्धान्तेऽवधारणे इत्यभिधानात् ॥ **ब्रह्महृदं** विरजास्थानीयं ब्रह्मप्रतिपादकं ह्रदम् । गम्भीरोदकमिव वेदान्तशास्त्रम् ॥ **नीताः प्रापिताः ॥** मग्नाः तत्र निष्णाता इत्यर्थः । कृष्णं अचक्षत । ज्ञातवन्तः ॥ **ब्रह्मणो गुणपूर्णस्य हरेः ॥ लोकं**

स्थानम् ॥ ददृशुः साक्षादपश्यन् ॥ **यत्र लोके** ॥ **पुरा पुरातनः** । पूर्वकल्पीय इति यावत् ॥ **अक्रूरः श्वाफल्किः** ॥ **अध्यगात् प्राप** । तं लोकमित्यन्वयः ।

यद्वा यत्र ह्रदे पुरा गोपेभ्यो वैकुण्ठप्रदर्शनात्पूर्वम् । अक्रूरः श्वाफल्किः । स्नातः सन् । अध्यगात् भगवत्साक्षात्कारमाप । तं ब्रह्मह्रदं ब्रह्मदर्शनसाधनत्वाद्ब्रह्मह्रदनामकं यमुनाऽगाधजलाशयं नीतास्ते गोपा मग्नास्तत्र स्नाताश्च सन्तो ब्रह्मणो गुणपूर्णस्य । लोकं स्थानं ददृशुः । तत्र कृष्णं चाचक्षतापश्यन्नित्यर्थः ।

अथवा यत्र ब्रह्मलोके । अक्रूरः शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमान इति श्रुतेः अनुग्रः । जीवन्मुक्तगण इति यावत् । अध्यगात् अधितस्थे । तं ब्रह्मणश्चतुर्मुखस्य । लोकं सत्यलोकम् । तत्र ब्रह्मलोके । ददृशुः । तु तदनन्तरम् । ब्रह्मह्रदं सत्यलोकपरिखाभूतगङ्गाऽगाधजलाशयम् ।

यद्वा ब्रह्म गुणपूर्णं हरिम् । ह्रदा ते प्रतिपादयति । तत् । ह्रद अव्यक्ते शब्दे । पचाद्यच् पृषोदरादित्वाद्ध्रस्वः । ब्रह्मज्ञानमित्यर्थः । पुरा कृष्णदर्शनात्पूवम् । नीताः प्रापिताः । ततस्तस्मिन्मग्ना निष्णाताः सन्तो ब्रह्मप्रापकादजलात् ज्ञानाद्वा ब्रह्मणो लोकं स्थानमपरोक्षं वा नीताः प्रापिता ददृशुः कृष्णं चाचक्षतापश्यन् । संपूजितं ब्रह्मलोकं चतुर्थं कञ्जोद्भवेनाथ परं स्वधामेति महाभारत-तात्पर्यनिर्णयोक्त्या कृष्णस्य पूर्वापररूपाणामैक्येन तत्र सद्भावात्परममुक्तस्थानप्रदर्शने गोपानां लिङ्गावृतत्वेनानर्हत्वात् । सत्यलोकस्थं स्वकं जीवन्मुक्तस्थानं प्रदर्शितवानिति भावः । अन्यथाऽ-क्रूरस्यैष्यत्प्राप्त्याऽध्यगात्पुरेत्यस्य विरोधः ॥ १६ ॥

इति श्रीभागवते षड्विंशोऽध्यायः ॥ १०-२६ ॥

गत्वेति । चन्दयति आल्हादयति गोकुलमिति चन्द्रः कृष्णः । गोकुलचन्द्रेति श्रीमदाचार्यैः कृष्णस्य स्तुतत्वात् । तस्य । जोत्स्नाम् । ज्योतिः प्रकाशः भगवद्रूपस्फुरणमस्त्यस्यामिति ज्योत्स्ना । ज्योत्स्ना तमिस्रेति निपात्यते । भगवान्प्रत्यक्षो भवेदिति मनीषेत्यर्थः । यावत् विभाव्यतेऽभ्युपगम्यते । तावत् । वनात् वृक्षखण्डात् । वन सम्भक्ताविति धातोः केवलनिःसीमभक्तेर्वा । वनान्तरम् अन्यदरण्यम् । अन्यां कामयुक्तां भक्तिं वा गोप्यः कामादित्युक्तेः । गत्वा प्राप्य । तमः तमुग्लाना-विति धातोः अन्तर्णीतण्यर्थात् ग्लपनमित्यर्थः । प्रविष्टं प्रे विष्णौ विष्टं आविष्टं अकयप्रवि-सम्भूमसखह्रा विष्णुवाचका इत्यभिधानात् । आलक्ष्य लक्षणया । आरोप्यातिकरुणत्वात्तस्य । ततो मोहरूपाद्दौरात्म्यात् । तकारः कीर्तितश्चोरे मोहे युद्धे च कीर्तित इत्येकाक्षरात् । निववृतुः परावृत्ता आसन् । इत्यर्थमनङ्गीकृत्य यथाश्रुतार्थाङ्गीकारे ''तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः । स चर्षणीनामुदगाच्छुचो मृजन्निति'' वाक्येन दिवा चन्द्रोदये प्राचीरागासम्भवेन न

रात्र्युदयसिध्या रात्रावस्थानानुपपत्तेर्विरोधापत्तिः । राकेशकररञ्जितमित्यस्यापि विरोधः । ननु पर्व-मैथुनस्य निषिद्धत्वात्कथमिदमिति चेन्न । राकाशब्दस्य न पौर्णिमापरत्वम् । किन्तु राति सुखमिति राका रादाने कृदावारेति कः इति विग्रहेण रात्रिवाचकत्वम् । स्वापं प्रापयति श्रमापहृतये इत्युक्तेः । अतो । राकेशः चन्द्रः । रात्रिनाथत्वात् । औषधीशो निशापतिरित्युक्तेश्च । तस्मान्न निषिद्धाचारित्वं कृष्णस्येति भावः । परस्त्रीसेवनादिकं स्वयं शुकेनैव परिहृतम् । आत्मारामत्वादितीति ॥ ३४ ॥

इति श्रीभागवतटिप्पण्यामष्टाविंशोऽध्यायः ॥ १०-२८ ॥

जयतीति । हे ॥ **दयित** । प्रिय । त्वा दिदृक्षतां नस्त्वया दृश्यतां दृग्विषयीभवितव्यं इति यथाश्रुत-योजनायां अत्र न इति अस्मच्छब्दादेशेन गोपीनामेव विवक्षितत्वात् दिदृक्षतामिति पुल्लिङ्गं बाधितं स्त्रियां तु दिदृक्षतीनामिति भवेत् । तथा च त्वयि धृतासव इत्यत्रापि वयमिति विशेष्यं न युज्यते । विचिन्वत इत्यस्योत्तमपुरुषत्वाभावात् । तस्मादियं सामान्योक्तिः । ये ये त्वयि धृतासवः सन्तस्त्वां विचिन्वते तेषाम् । त्वा दिदृक्षतां त्वां प्रति द्रष्टुकामानाम् । त्वया दृश्यतां दृग्गोचरणं भतिव्यमिति न विशेषतो गोपीनां ग्रहणम् । न च तत्कृतस्तोत्रप्रयासो वृथा स्यादिति शङ्क्यम् । सामान्यवाक्येन गोपीनामपि द्रष्टुकामत्वस्य सद्भावेन निवेशयोग्यत्वात् । यद्वा । ते तव । जन्म । अधिकं सर्वाधिकं कं सुखरूपम् । अतः । जयति सर्वोत्कर्षेण वर्तते । अधिकृतं अधिकारानुसारि कं सुखं यस्य तादृश-रमामुक्तामुक्तब्रह्मादिचेतनगणं जयति । जित्वा तिष्ठति । तत्र हेतुमाहुः । हि यस्मात् । यत्तदोर्नित्य-सम्बन्धेन तत्रेति बलाद्यत्रेति लभ्यते । यत्र पद्मालयादिषु । ते इन्दिरा आस्ते तत्र त्वम् । न आव्रजः न गतवानसि । व्रज गताविति हि धातुः । इदं साधु युक्तम् । रमाया अन्वेषणकर्तृत्वाभावादिति भावः । तथाऽपि त्वयि धृतासवस्त्वत्सान्निध्येनैव प्राणधारकाः सन्तः । त्वाम् । विचिन्वते अन्विष्यन्ति । त्वा त्वाम् । दिदृक्षतां द्रष्टुकामानाम् । ये ये दर्शनार्थिनस्तेषां त्वम् । दृश्यतां दृष्टिविषयत्वम् । श्रय अङ्गीकुरु । अन्वेषके दर्शनदानाभावेऽप्रशस्यतापातेन जन्मोत्कर्षवर्णनस्य वैय्यर्थ्यादिति भावः ॥ १ ॥

प्रणतकामदमिति । अत्र प्रासभङ्गो न शङ्क्यः । प्रायः सर्वत्र चतुश्चरणानां द्वितीयाक्षरस्यैकत्वेऽपि ग्रन्थकर्त्रे श्रीवेदव्यासायात्र तृतीयाक्षरैक्येन प्रासानां विवक्षितत्वात् । न चाद्यपादे तदभावः । प्र शब्दे वर्णद्वयाङ्गीकारेण णस्य तृतीयत्वसिद्धेः । नाप्याद्यचरणे वर्णाधिक्यप्रसङ्गः । छन्दोविषये प्रस्यैकवर्ण-त्वेनाङ्गीकारात् । अत्र परस्परं विशेषणासङ्गतिस्तु गोप्य उचुरित्यनेन गोपीनां बाहुल्यात्कयाचित्प्रणत-कामदमित्युक्तम् । अन्यया पद्मजार्चितमिति । अपरया धरणिमण्डनमिति । इतरया ध्येयमापदीति पृथक् पृथगुक्तत्वात् । उत्तरार्धस्य न इत्यनेन सर्वाभिर्मिलित्वाऽभिहितत्वान्न । दोषावहा ।

यद्वा । त्वया त्रेधा निहितमपि पदं लोकानां ध्यानास्पदं जातम् । परंत्वाधुनिकसुखास्पदं नास्तीति भावेनाहुः ।। **प्रणतकामदमिति** । ते तव । चरणपङ्कजम् । धरणीमण्डनं गयां स्थितत्वेन भूमिशोभाकरमेकम् । द्वितीयं प्रणतकामदम् । प्राय विष्णवे नताः प्रह्वा इन्द्रादयः । अकयप्रविसम्भूमसखहा विष्णुवाचका इत्यभिधानम् । नस्य णत्वं तु छान्दसम् । प्रणतानां इन्द्रादीनां कामः स्वर्गराज्यभोगरूपः तं ददातीति तत् । अनेनान्तरिक्षगमनमिति सूचितम् । सत्यलोके ब्रह्मणा प्रक्षालनादिना पूजितम् । अनेन दिविष्ठम् । एतत्त्रिविधमपि पदं आपदि ध्येयम् । न तु सुखकारकम् । दूरस्थत्वेन परोक्षत्वात् । अतः स्वपदस्य सुखकारकत्वापेक्षा तवास्ति चेत् । चरणपङ्कजं नः स्तनेष्वर्पय । तदा शन्तमं अतिसुखकारकम् । भवेत् ।

यद्वा । आपदि आ निकटे पदानि सप्तदशपदानि सन्त्यस्येति आपदि । इति गयास्थविष्णुपदविशेषणम् । प्रत्युत ध्येयत्वमप्यशक्यम् । दृष्टस्यैव ध्यानगोचरत्वेनास्य दूरस्थत्वेनादृष्टतया मानसाविषयत्वात् । तस्मादश्रुपातयोग्यत्वेन नः स्तनयोर्नेत्र सन्निहितत्वाद्दर्शनयोग्यत्वेन ध्यानस्यापि सुशकत्वमिति भावः ।

यद्वा । स्तनमर्दने करस्यापेक्षितत्वेऽपि चरणप्रार्थने केचिदाख्यायिकाकथनपूर्वकमर्थमाहुः । स इत्थम् । स्वभर्तरि हरदग्धे सति रतिस्तस्य सुगत्यर्थं गोपीमाविश्य स्तनरूपौ पिण्डौ भगवत्पादेऽर्पयितुमियं प्रार्थना । न चात्र पिण्डत्रयस्य विहितत्वेऽपि पिण्डद्वयदानं कथमिति शङ्क्यम् । मदनस्य विष्णुपुत्रत्वेन विष्णोश्च पितृभावात्तृतीयपिण्डस्यापि निरधिकारित्वात्तदसमंजसम् । स्त्रियो न्युब्जत्वं विना स्तनपदसम्बन्धानुपपत्तेः । न्युब्जत्वस्य चरतिकाले स्त्रीणां निषिद्धत्वात्स्तनानामधिकरणत्वस्य चरणाम्बुजस्याधेयत्वेन कथनाच्च । अत इत्थं योजना । स्वशरीरे हरेण दग्धे कामो नीचाश्रयो न कर्तव्यः कर्तव्यो महदाश्रय इति न्यायं स्मृत्वाऽनुतप्तो योनिरूपं स्वस्य नीचं स्थानं विसृज्य गोपीनां स्तनमण्डरूपमुन्नतस्थानं दृष्ट्वा तत्रस्थो भूत्वा गोपीरपीडयत् । तदा गोप्यस्तत्पीडिताः सत्यस्तदुच्चाटनोपायं विमृशन्त्यो भगवच्चरणस्पर्शेन शकटात् शकटासुरस्य ह्रदात्कालीयस्योच्चाटनं वीक्ष्य तच्चरणस्पर्शेन कामापगमे वयं निष्कामत्वेन सुखं प्राप्स्याम इत्याशयेन स्वस्तनेषु तच्चरणस्पर्शं प्रार्थयन्ते ।

यद्वा । सुरतासनेषु स्त्रिया पुंकटौ स्वपादाभ्यां बद्धायां पुंसा स्त्र्यूरुबहिष्ठात्कृतपादयोरुरसिस्थानरूपं पाशासनमाकाङ्क्षमाणा आहुः । चरणपङ्कजस्यैकवचनत्वात्तस्मिन्नेवासने एकं पादं निधाय । शन्तमं अतिसुखकारकम् । करं च प्रार्थयन्त इति वा । किंवा ।

शन्तमञ्चेति कृष्णसम्बोधनम् । शं सुखं तनोति विस्तारयतीति शन्तः तादृशो मञ्चः पर्यङ्को यस्य

स तथेत्यर्थः । अथवा । हे आधिहन् कामजन्यमनोव्यथानिवारक । भवच्चरणे सर्वैः पुष्पसमर्पणं कार्यम् । त्वया तु देवाय पुष्पसमर्पणं न क्रियते । अतस्तव पुष्पलाभः कथं स्यात् । अतः शम्भोर्लिङ्गाकारेष्वस्मत्स्तनेषु स्वचरणलक्षणकमलपुष्पार्पणं कुरु । चकारात्पुष्पजन्मसुखलिङ्गार्पणं च कुर्विति प्रार्थना । तेन तव शुक्लपुष्पलाभः स्यादिति भावः ॥ १३ ॥

इति श्रीभागवतटिप्पण्यामेकोनत्रिंशोऽध्यायः ॥ १०-२९ ॥

बदरेति । अस्य श्लोकस्य विजयध्वजतीर्थकृतावतारिकेयम् । जननसमये क्षीराब्धितीरवालुकासु नववीथिषु विक्रमं कुर्वन्तमुच्चैःश्रवसं प्रशस्य बलभद्रप्रशंसयोपसंहरतीति । अस्यासङ्गतत्वं कैश्चिदुच्यते । अतोऽर्थ उच्यते । अत्रोच्चैःश्रवशब्देन कृष्णाश्वौ गृह्येते । उभयत्र प्रातिस्विकत्वेनोपमेयत्वोपमानत्वेऽपि । उपमानचन्द्रपक्षे जननसमये जन्यतेऽमृतादिसारमनेनेति जननं मथनं तत्काल इत्यर्थः । नवा अभिनवा वीथयो जलोभयपार्श्वस्थानानि यासां तासु । क्षीराब्धितीरवालुकासु विक्रमं उत्पन्नरूपं पादविक्षेपं कुर्वन्तम् उच्चैःश्रवसं ऊर्ध्वकर्णं सुराश्वमिवेति । उपमेयकृष्णपक्षे जननसमयेऽवतारकाले । प्रादुर्भावो हरेर्जनिरित्युक्तेः । क्षीराब्धितीरवत् वालुका वा तासु नववीथिषु यमुनाजलपार्श्वेषु विक्रमं पादविक्षेपं कुर्वन्तं सञ्चरन्तमित्यर्थः । उच्चैःश्रवसं महापुण्यश्लोकं श्रीकृष्णं प्रशस्य प्रशंस्य प्रशंसया संवर्ण्य बलभद्रप्रशंसयोपसंहरतीत्यवतारिकार्थः ॥ **अथ श्लोकार्थः** ॥ बदरवत् चन्द्रवत् पाण्डु गौरं वदनं यस्य सः । मानवो बदरः सिन्धुः शशिनस्तु त्रिनामकमिति वचनात् । मृदुगण्डमित्येकवचनं न प्राण्यंगत्वेन विवक्षितं किन्तु हलधरस्यैककुण्डलत्वेनैकगण्डस्यैव मण्डितत्वादिति ध्येयम् । अत एव कनककुण्डललक्ष्म्येत्यत्र कनककुण्डलस्येति षष्ठीतत्पुरुषसमासः द्वौ रौ रेफौ यन्नाम्नि स द्विरः भ्रमरः तेन दाय्यते शोध्यते स द्विरदः सुगन्धः । देप् शोधन इति धातुः । तेन राजन्ते शोभन्ते तानि द्विरदराजानि कमलानि तेषां विविधाः विशिष्टा वा हाराः मालाः यस्य स तथा । अत एव दिनान्तस्थसूर्यरक्तिमासहितचन्द्रदृष्टान्तो युज्यते । चन्द्रस्वच्छरामस्य रक्तकमलमालाद्युपेतत्वात् ॥ **यद्वा** ॥ द्विरदवत् कृष्णवर्णेन राजतेऽसौ द्विरदराजः कृष्णः तेन सह विहारः क्रीडा यस्य स तथा । दिनान्ते । नामैकदेशग्रहणेन नामग्रहणममिति न्यायात् । दिनस्य दिनकरस्य अन्ते समीपे स्थितौ यामिनीपतिः चन्द्र इव । लुप्तकान्तिरिति यावत् । दृश्यत इति शेषः । गजत्विट् कृष्णेन सह विहारात् ॥ **विष्प्रभ इति भावः** । तस्मात् श्लोकावतारिकयोः सङ्गत्यभावो नास्तीति ॥ २४ ॥

इति श्रीभागवतटिप्पण्यां त्रयस्त्रिंशोऽध्यायः ॥ १०-३३ ॥

तास्तथेति । अत्रायास्य इति भगवत्प्रतिज्ञा मोघेव दृश्यते । व्रजं प्रत्यनागमनादिति चेन्न । यतः संप्रेष्यैः सम्यक् प्रेषणार्हैः दौत्यकैः सन्देशहरोद्धवहलधरसम्बन्धिवाक्यैः । तद्रूपेणेति यावत् । न तु

स्वस्वरूपेणेति विशिष्यायास्य इत्युक्तम् । तस्मान्न प्रतिज्ञा प्रतियात इति भावः । उद्धवे सन्देशहरत्वं दूतत्वं च युज्यते । श्रूयतां प्रियसन्देशो भवतीनां सुखावहः । यमादायागतो भद्रा अहं भर्तुर्हि किंकर इत्युक्तेः । न च स्वरूपतोऽनागमने वाक्यानि प्रेषयिष्यामीति वक्तव्यम् । आयास्य इति तु कथं तत्र स्वरूपस्यैव युक्तत्वादिति वाच्यम् । भगवतस्तत्क्रियाणां च नेह नानास्ति किञ्चनेति श्रुतेर्भेदाभावात् । वाक्यानि तु भवतीनां वियोगो मे इत्यादीनि । तत्रास्मच्छब्दसद्भावेन भगवद्वाक्यत्वमवगम्यते । आगमिष्यत्यतिदीर्घेण कालेन व्रजमुच्यतः साक्षाद्व्रजमागमिष्यतीत्यस्य दर्शनात्पुनः पूर्वशङ्कातादवस्थ्यमिति चेन्न । अत्राच्युतशब्देन रामाविष्टशुक्लकेशभगवद्रूपग्रहणस्य विवक्षितत्वात् । हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् । यदाह वः समागम्य कृष्णः सत्यं करोति तत् । इति नन्दं प्रत्युद्धववाक्ये कृष्णवाक्यसत्यकरणकथनस्य का गतिरिति चेत् । तात्कालिकमिदं वाक्यम् । यात यूयं व्रजं यात । वयम् । चस्त्वर्थे । सुहृदां वसुदेवादीनां सुखमविधाय स्नेहदुःखितानपि ज्ञातीन् गोपान् द्रष्टुं नो एष्यामः । इत्यर्थकस्ववाक्यस्य कृष्णेन सत्यत्वसंपादनमेव हि कृतं दृश्यते । हन्त तर्हि नोऽस्माकमित्यादि विजयध्वजीयव्याख्यानविरोधः स्यादिति चेन्न । एष्याम इत्यस्य कर्मत्वेन विवक्षितं श्यमन्तपञ्चकक्षेत्रमिति शेषाङ्गीकारे विरोधगन्धाभावात् । तस्मान्नात्रायुक्तं किञ्चित् ॥ ३२ ॥

इति श्रीभागवतटिप्पण्यां सप्तत्रिंशोऽध्यायः ॥ १०-३७ ॥

इत्युक्त्वेति । अत्र दिनात्ययपदस्यास्तकालार्थत्वाङ्गीकारे ततोऽपराह्णे भगवान्कृष्णः संकर्षणान्वित इति वक्ष्यमाणश्लोकेऽपराह्णपदेन विरोधो भवेत् । अतोऽर्थान्तरम् । उदयात्पर्यावर्तनपर्यन्तं दिनवृद्धिः । आवर्तनादस्तपर्यन्तं दिनक्षयः । एतद्विवक्षया दिनात्यय इत्युक्तम् । मध्याह्नादूर्ध्वमित्यर्थः ॥ **यद्वा** ॥ दीयते क्षीणो भवति स दिनः । दीङ् क्षये दिवादिः इण् सिञ् जि दीङिति नक् बाहुलकाद्ध्रस्वः । क्षयोन्मुखः कंस इत्यर्थः । द्यति खण्डयति देवकीषडपत्यानीति दिनः कंसः । दोऽवखण्डने । द्यतेः किनन् । तस्यात्ययः क्षयः तस्मिन्विषये रामं कृष्णं च मथुरामनयदित्यर्थः ॥ ६ ॥

इति श्रीभागवतटिप्पण्यामूनचत्वारिंशोऽध्यायः ॥ १०-३९ ॥

इति श्रीभागवते पाङ्करी श्रीनिवासाचार्यकृतविरोधोद्धारे दशमस्कन्धः समाप्तः ॥ १० ॥

महर्षि श्री वेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थविरचित भागवततात्पर्यनिर्णयेन
श्री सत्यधर्मतीर्थविरचित भागवतविवृत्या
सुमनोरञ्जिन्या च सहितम्

नवमं सम्पुटम्

(दशमस्कन्धे पूर्वार्धः)

Edited by

Mahāmahopādhyāya

Prof. K.T. Pandurangi

Formerly Prof. of Sanskrit, Bangalore University

Hon. Director of Dvaita Vedanta Studies and Research Foundation, B'lore.

Associate Editor

Vidwan Krishnacharya Upadhyaya, M.A.

Research Scholar at Dvaita Vedanta Studies and Research Foundation, Bangalore

This volume is published with the grant from the Govt. of Karnataka for the Research Project undertaken by Dvaita Vedanta Studies and Research Foundation.

2004

Published by

Dvaita Vedanta Studies and Research Foundation

No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-4.

Śrīmad Bhāgavatam with Tātparyanirṇaya of Śrī Ānanda tīrtha, Bhāgavata vivṛti of Śrī Satyadharmatīrtha and Sumanoranjani. Edited by Prof. K.T. Pandurangi, Hon. Director of Dvaita Vedānta Studies and Research Foundation, Upakulapati, Poornaprajna Vidyapeetha, Bangalore. and Vidwan Krishnachārya Upādhyāya, Research Scholar at Dvaita Vedanta Foundation. Published by Dvaita Vedanta Studies and Research Foundation, No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-560 004.

No. of Pages : xcii+424

No. of Copies : 1000

Price : Rs. 300/-

Copies can be had from :

Dvaita Vedanta Studies and Research Foundation,
No.11, Uttaradi Matha Compound,
Basavanagudi, Bangalore-560 004.
Phone : 080-2662 7272

Printed at : **Raghavendra Enterprises**, Bangalore-560 085.

Preface

This is the Ninth Volume of Śrīmad Bhāgavatam. It contains chapter twentysixth to fourtyeighth chapter of Pūrvārdha of Tenth Skandha.

In these chapters, Rāsakrīdā, Gopigīta, Veṇugīta, the episode of Vidyādhara, Śaṅkhachūda. Kṛṣṇa proceeding to Madhura, wrestling with Chāṇūra and Muṣṭika. Killing Kamsa are described.

After killing Kamsa, Ugrasena is restored on the throne. Kṛṣṇa proceeds to study under Sandīpini, returns to Madhura, he deputes Akrūra to Hastinapura and learns about Dhṛtarāṣtra ill-treating Pāndavas.

The commentary of Śrī Satyadharma is continued. A new commentary Sumanoranjani is added.

Prof. Pandurangi has edited this volume with the assistance of Vidwan Krishnacharya Upadhyaya.

We record our appreciation of the hard work of these two scholars.

We thank Raghavendra Enterprises for neat printing and good getup.

N. Narasimha Rau
Chairman

Śrīmad Bhāgavatam
Tenth Skandha (Pūrvādha)

Introduction

The theme developed in the first twenty five chapters of Tenth skandha is already narrated in the introduction to the eighth volume.

In the eighth volume of Bhāgavata twenty five chapters of Pūrvādha of the tenth Skandha were included. In the present volume remaining twenty three chapters of Pūrvārdha are included. This completes the Pūrvārdha portion of tenth Skandha.

The theme of first twenty five chapters had an unpleasent aspect and a pleasent aspect. Kamsa's effort to subdue Kṛṣṇa by duputing a series of evil persons has been an unpleasent aspect. Kṛṣṇa foiling all these efforts and having a pleasent time with gopikas has been a pleasent aspect. The same model is followed in chapters twenty six to forty eight also. Here, the unpleasant aspect ultimately ends in the death of Kamsa and the pleasent aspect culminates in the Rāsakrīda with Gopikas.

In the earlier narration Kṛṣṇa has warded off many difficulties faced by gopas and gopikas. Here Kṛṣṇa helps Nanda to overcome two difficulties.

On a dvādasi day Nanda proceeded to Yamuna river to take bath at a wrong time. Varuṇa's servent pulled him down and took him to Varuṇa loka. The gopas started crying. Kṛṣṇa jumped into the river and reached Varuṇa loka. Varuṇa honoured him and begged the pardon for the blunder committed by his servent. Nanda was brought back. This event has a message. For every act there is a proper time. Even if a noble person ignors it, he has to face the consequences, ofcours, God always helps such persons who unwittingly voilate the code of conduct.

On another occasion Nanda was caught by a huge snake. By the touch of Kṛṣṇa's foot the snake was released from the form of the snake and his original form of Vidyādhāra was restored. He informs Kṛṣṇa that he is a Vidyādhāra. When I was travelling by Vimāna I laughed at sage Aṅgīrasa. He cursed me to be born as a snake. Now I am released from the curse by the touch of your feet. This episode also indicates that arrogent behaviour will lead to adverse consequences.

Bhāgavata and Purāṇas have there own style of developing the theme. In the course of developing the theme, some side episodes are introduced. These serve two purposes (i) A break is provided to follow the long narration of the main theme without feeling its burden. (ii) A message is given to improve the conduct of the man.

The above two episodes are interspered in the description of gopikas devotion and passion for Kṛṣṇa.

On a night of Śarad season Kṛṣṇa starts playing on flute. On hearing the sweet music of the flute, gopikas rushed to the place where Kṛṣṇa was playing on flute. They start Rāsakrīda. Kṛṣṇa disappears to moderate their over flowing joy.

The gopikas wander in the forest in search of him following his foot steps. At some stage they find the foot step of a gopikā along with the foot steps of Kṛṣṇa. They think some lucky gopikā must have joined him. After some steps, no foot prints could be traced. To their surprise they find the gopikā who had moved with Kṛṣṇa for some time. She informs the other gopikās that she moved with Kṛṣṇa for some distance. She felt tired and asked Kṛṣṇa to take her on his shoulders. He did not like my suggestion and disappeared. They all continued their search for Kṛṣṇa until midnight and then proceeded to the bank of Yamuna river and waited for him.

They started singing expressing their deep love for him. This charming song in eighteen verses is known as gopigītā. Pleased by this song Kṛṣṇa appeared before them. He started Rāsakrīdā with them. He started playing on flute. The gopikās enjoined the sweet music of flute and expressed their appreciation of flute in a song known as Veṇugīta. The rāsakrīda accompanied by gopigīta and veṇugīta presents the climax of the romance of Kṛṣṇa with gopikās. This has been a model for the description of romance in Sanskrit poems. A charming expression of love with rhythmical movements of the body and the eyes deeply touch the hearts of the sahṛdayas. Carefully choosen delicate wards of these songs highten the effect. We experiance the charm of Bhāgavata more as a poem than a religious work.

After this pleasant event we come back to Kamsa's attemp to subdue Kṛṣṇa. Here again Nārada plays his tricks. He informs the circumstances of birth of Kamsa to him and provokes him for the action against Kṛṣṇa.

Nārada tells the secret of Kamsa's birth to him. Once, your mother was walking in the garden of the palace enjoying the beauty of the flowers and creepers. Her passion was araused and she became eager to have the company of her husband. At this time a Gandharva arrived assuming the form of her husband Ugrasena. He enjoyed her. She soon realised that he was not her husband. She protested. He tried to console her saying that he is a Gandharva. The Gandharvas are superior to men. It is not improper if a superior enjoys an inferior woman. You will get a brave son. She became angry and cursed that this son of yours will be a cruel and evil person. The Gandharva retorted that he will be the enemy of your own people.

On hearing this episode of his birth Kamsa became more furious. He thought he should ruthlessly deal with Ugrasena, Vasudeva and all others who support them. He sent Akrūra to bring Kṛṣṇa and Balarāma to Madhura. He arranged wrestling between Chāṇūra and Kṛṣṇa, Muṣṭika and Balarāma. He asked the person in charge of elephant to place the elephant Kuvalayapīḍa at the door of the wrestling hall and kill Kṛṣṇa and Balarāma.

In our Purāṇas the birth of evil persons is generally traced to some curse, some evil act, and wrong acts of the parents. This is intended to give a message that such evil activities be carefully avoided in life.

On the invitation of Kamsa through Akrūra, Kṛṣṇa and Balarāma proceed to Madhura. As they walk through the city of Madhura the women welcome with great enthusiasm. Before they go to the wrestling hall, they destroy the stock of the arrows and bows. Trivakrā whose body was twisted at three points meet them on the way and appeals to them to visit her house. Kṛṣṇa assurs her that he will visit her house after the purpose of his visit to Madhura is over.

They enter into wrestling hall killing the elephant Kuvalayapīda placed at the entrance.

Kṛṣṇa wrestles with Chāṇūra and Balarāma with Muṣṭika. They pounce upon each other, catch hold of each other by leg and trunk, move the whole body in a circular way. Finally, Chāṇūra and Muṣṭika were killed. Kamsa was taken aback. Kṛṣṇa rushed towards him, pulled him down from his seat and killed him. The deities and sages showered flowers on Kṛṣṇa from over the sky.

Kṛṣṇa deputed Uddhava to Gokula to console Nanda, Yaśoda and Gopikas who were deeply pained by the absence of Kṛṣṇa. Uddhava went to Gokula met Nanda, Yaśoda and gopikas. The gopikas were eager to listen to the message of Kṛṣṇa to them.

They started singing the glory of Kṛṣṇa and his love for them taking a bee as a symbol of Kṛṣṇa. This beautiful song is known as Bhramara gīta.

Uddhava assured them that Kṛṣṇa will visit gokula and give them the pleasure of his company. Uddhava returned to Madhura and informed Kṛṣṇa that the gopikas are very eager to see him.

Kṛṣṇa visited Trivakra's residence, received her hospitality and straightened her body.

He also visited Akrūra's residence. He asked him to go to Hastināpura and meet Kunti and Pandavas.

Akrūra went to Hastinapura. Kunti told him her misery and Dhritarāṣtra's ill-treatment of Pandavas.

The above aspects of Bhāgavata are brought out in the naration of the events of Bhāgavata given below. Naration of these in English will not be effective. Hence select verses are also quoted.

Varuṇa's servant takes Nanda to Varuṇaloka

On a dvādaśi morning Nanda went to river Kālindi to take bath. When he was taking bath in the river, a servant of Varuṇa took him to Varuṇa loka as he was taking bath in an inauspicious time. On seeing this, gopalās started crying and appealed to Kṛṣṇa to rescue Nanda. Krisṇa immediately went to Varuṇa loka. Varuṇa was extremely delighted to see Kṛṣṇa. He offered prayers to Kṛṣṇa and appealed to him to Pardon him for the mistake of his servant. Kṛṣṇa brought back Nanda.

श्रीशुक उवाच—

एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ।
स्नातुं नन्दस्तु कालिन्द्या द्वादश्यां जलमाविशत् ॥ २८-१ ॥
तं गृहीत्वाऽनयद् भृत्यो वरुणस्यासुरोऽन्तिकम् ।
अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥ २ ॥

गोपालास्तमपश्यन्तः कृष्ण रामेति चुक्रुशुः ।
भगवांस्तदुपश्रुत्य पितरं वरुणाहृतम् ॥ ३ ॥
तदन्तिकं गतो राजन् **स्वानामभयदो विभुः** ।
प्राप्तं वीक्ष्य हृषीकेशं **लोकपालः सपर्यया** ।
महत्या पूजयित्वाऽऽह **तद्दर्शनमहोत्सवः** ॥ ४ ॥

वरुण उवाच—
नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ।
न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥ ६ ॥
अजानता मामकेन मूढेनाकार्यवेदिना ।
आनीतोऽयं तव पिता तत् प्रभो क्षन्तुमर्हसि ॥ ७ ॥

श्रीशुक उवाच—
एवं प्रसादितः कृष्णो भगवानखिलेश्वरः ।
आदायागात् स्वपितरं बन्धूनां चावहन्मुदम् ॥ ९ ॥

By this extraordinary act of Kṛṣṇa, gopās were wonder struck. They appealed to show them Kṛṣṇa's own place i.e. Vaikuṇṭha. Kṛṣṇa took them to Brahmaloka where Akrūra was present. Nanda and other gopās were delighted by seeing Kṛṣṇa praised by the śruti.

ते त्वौत्सुक्यधियो राजन् मत्वा गोपास्त्वधीश्वरम् ।
अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ ११ ॥
इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः ।
दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ १४ ॥
सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनम् ।
यद् हि पश्यन्ति मुनयो गुणापाये समाहितम् ॥ १५ ॥
ते तु ब्रह्महृदान्नीता मग्नाः कृष्णमचक्षत ।
ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरा ॥ १६ ॥
नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः ।
कृष्णं च तत्र छन्दोभिः स्तूयमानं सुविस्मिताः ॥ १७ ॥

Kṛṣṇa plays on flute, the gopikās rush towards him

After this event on one night of autumn season Kṛṣṇa thought of playing on the flute and enjoying the moonlight. On hearing the sweet sound of the flute the gopikas rushed to that spot leaving their activities at home in the middle. Some who were milking the cow rushed to the spot leaving the process of milking in the middle. Some others who were feeding their children left it in the middle and rushed to Kṛṣṇa. Some were serving the food to their husbands and left it in the middle. These gopikas rushed to Kṛṣṇa in spite of their husbands and other relatives preventing them to proceed.

श्रीशुक उवाच—

भगवानपि तां रात्रिं शारदोत्फुल्लमल्लिकाम् ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ २७-१ ॥

निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णनिषक्तमानसाः ।
आजग्मुरन्योन्यमलक्षिताशयाः स यत्र कार्तस्वरलोलकुण्डलाः ॥ ४ ॥

दुहन्त्योऽभिययुः काश्चिद् दोहं हित्वा समुत्सुकाः ।
पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥

परिवेषयन्त्यस्तद् हित्वा पाययन्त्यः शिशून् पयः ।
शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥

ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबन्धुभिः ।
गोविन्दापहृतात्मानो न न्यवर्तन्त योषितः ॥ ८ ॥

At this stage king Parikṣit asks an interesting question to śuka. These gopikās have taken Kṛṣṇa only as their lover but not as god. Therefore, how can they achieve their spiritual union with him. Śuka informs him that complete absorption of the mind on Kṛṣṇa is the means to obtaining. Such absorption may be by passion or a sense of friendship or even by fear.

राजोवाच—

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ।
गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

कामं क्रोधं भयं मोहं मैत्रीं सौहृदमेव च ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥

ता दृष्ट्वाऽन्तिकमायाता भगवान् व्रजयोषितः ।
अवदद् वदतां श्रेष्ठो वाचःपाशैर्विमोहयन् ॥ १७ ॥

Kṛṣṇa asks the gopikās to return home

When Kṛṣṇa saw the gopikas coming to him he first welcomed them and then asked as to what is the purpose their arrival here. He told them that it is not proper on their part to come to this forest area at night leaving their father, mother, brothers and husband. Your love for me can be satisfied by thinking about me by hearing about me and by seeing me. It is not necessary you should be present close to me. Therefore you please return home. On hearing these words of Kṛṣṇa the gopikas were depressed and appealed to him to permit them to serve him. Without you, our heart will not be happy. Our hands will not work. Our feet do not move. Therefore please take pity on us.

श्रीभगवानुवाच—

स्वागतं वो महाभागाः प्रियं किं करवाणि वः ।
व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥ १८ ॥

रजन्येषा घोररूपा घोरसत्वनिषेविता ।
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ।
विचिन्वन्तो ह्यपश्यन्तो मा कृध्वं बन्धुसाध्वसम् ॥ २० ॥

श्रवणाद् दर्शनाद् ध्यानान्मयि भावोऽनुकीर्तनात् ।
न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥

श्रीशुक उवाच—

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ।
विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

गोप्य ऊचुः—

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तव पादमूलम् ।
भक्त्या भजेम दुरवग्रह मा त्यजास्मान् देवो यथाऽऽदिपुरुषो भजतो मुमुक्षून् ॥ ३१ ॥

चित्तं सखे न भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ।
पादौ पदं न चलतस्तव पादमूलाद् यामः कथं व्रजमथो करवाम किं वा ॥ ३४ ॥

Kṛṣṇa allows the gopikās to remain, plays with them and disappears

Responding to their appeal Kṛṣṇa allowed them to remain and started playing on flute. He delighted them by extending his arm, by embracing them, by looking at them, smiling at them, and by various other love gestures. The gopikas felt proud by this gestures of Kṛṣṇa towards them. In order to moderate their pride Kṛṣṇa became invisible to them.

बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनालभननर्मकराग्रपातैः ।
क्ष्वेलावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ।
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥

The gopikās wander in forest in search of Kṛṣṇa

When Kṛṣńa became invisible the gopikās became very anxious to find him out, started wandering in the forest enquiring every tree, every creeper, every flower whether they saw Kṛṣṇa.

'O' Ashwattha tree, 'O' Plakṣa, 'O' Negrodha, 'O' Kimsuka and 'O' Campaka have you seen Kṛṣṇa coming here. 'O' Mālati flower and 'O' Mallika flower have you seen Kṛṣṇa coming here. As they went on enquiring from tree to tree they saw the footsteps of Kṛṣṇa.

श्रीशुक उवाच—

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।
अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ २८-१ ॥

गायन्त्य उच्चैरमुमेव सङ्गता विचेरुरुन्मत्तकवद् वनाद् वनम् ।
पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध किंशुक ।
नन्दसूनुरिहागात् किं सह हासावलोकनैः ॥ ५ ॥

कच्चित् कुरबकाशोक नाग पुन्नाग चम्पक ।
रामानुजो मानिनीनां दोग्धा नन्दस्य चात्मजः ॥ ६ ॥

कच्चित् तुलसि कल्याणि गोविन्दचरणप्रिये ।
सह त्वालिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥

एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् ।
व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ १४ ॥

As they followed these footsteps at some stage they found the footsteps of a gopikā also. They thought probably this gopikā served Kṛṣṇa with greater devotion so as to take her with him leaving us behind. At some point they did not see the foot prints of that Gopikā. They thought to avoid pricking of her feet by grass Kṛṣṇa must have lifted her and carried by his arms. In some place they found some flowers plucked and they thought Kṛṣṇa must have plucked these flowers for decorating her.

तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ।
वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ १६ ॥
कस्याः पदानि चैतानि याताया नन्दसूनुना ।
अंसन्यस्तप्रकोष्ठायाः करिण्याः करिणा यथा ॥ १७ ॥
अनयाऽऽराधितो नूनं भगवान् हरिरीश्वरः ।
यन्नो विहाय गोविन्दः प्रीतो यामनयद् रहः ॥ १८ ॥
न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः ।
खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ २१ ॥
अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना ।
अत्र प्रसूनापचयः प्रियार्थे प्रेयसा कृतः ॥ २३ ॥
प्रपदाक्रमणे एते पश्यता सकले पदे ।
केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥ २४ ॥
इत्येवं प्रलपन्त्यस्ताश्चेरुर्गोप्यो विचेतनाः ।
कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ २६ ॥

The gopika whom Kṛṣṇa had taken with him felt very proud and became arrogant. She asked Kṛṣṇa to carry her on his shoulders saying that she is not able to walk. On this suggestion of her Kṛṣṇa wanted to teach her a lesson and became invisible. The other gopikas arrived at that place. She told her plight to them. She informed them that she was first honoured by Kṛṣṇa by taking her with him. But he insulted her by becoming invisible. The Gopikas wandered in search of Kṛṣṇa as long as there was moonlight. But when the darkness descended they returned.

यां गोपीमनयत् कृष्णो विहायान्याः स्त्रियो वने ।
सा च मेने तदाऽऽत्मानं वरिष्ठं सर्वयोषिताम् ॥ २७ ॥

न पारयेऽहं चलितुं नय मां यत्र ते मनः ।
एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति ॥ २९ ॥

ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ।
हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ।
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥ ३० ॥

तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ।
अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥ ३२ ॥

गत्वा वनाद् वनं चन्द्रज्योत्स्ना यावद् विभाव्यते ।
तमःप्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः ॥ ३३ ॥

Gopigītā

The Gopikas started singing the glory of Kṛṣṇa expressing their deep devotion for him and deep loves.

O Kṛṣṇa, the Gokula has attained the glorious status by your birth and by the presence of goddess Lakṣmi.

Our heart is absorbed in you. We are anxious to see you. Kindly reveal yourself to us.

Ward of our pride by your smile and reveal your lotus like charming face to us.

You protected us from the Kāliya serpant, from the demon Triṇāvarta, from the heavy rain from Vatsāsura, and similar other calamities.

You took incarnation in Sātvata family to protect the whole world. You are present at the heart of all.

Please place your lotus like palm held by goddess Lakṣmi on our head.

Satisfy our passion by touching our heart by your foot which removes the sin of those who surrender at it.

Your laughter, your glances with love, secret conversations with you and the love sports with you agitate our mind.

When you move out of gokula taking the cows with you the fear that your tender foot may be pricked by the grass blade pricks us.

When you return in the evening, your face with curly hairs covered by the dust raised by the steps of the cows instigates the passion at our heart. Give us the nector of your lower lip kissed by your floot which increases the passion.

When you are away during the day even a moment of your seperation is felt as the duration of whole Yuga.

Ignoring our husband, children, brothers and relatives we have come in search of you, tracing your movements by your foot steps, captivated by your charming personality. How can you reject us at the mid night.

Please accept us and satisfy our passion.

गोपि गीतम्

गोप्य ऊचुः—

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा साधु तत्र हि ।
दयित दृश्यतां त्वां दिदृक्षतां त्वयि धृतासवस्त्वा विचिन्वते ।। २९-१ ।।

व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित ।
भज सखे भवे किङ्करीः स्म नो जलरुहाननं चारु दर्शयन् ।। २ ।।

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ।। ३ ।।

विषजलाशयाद् व्यालराक्षसाद् वर्षमारुताद् वैद्युतानलात् ।
वृषमयाद् भयाद् विश्वतोमुखाद् वृषभ ते वयं रक्षिता मुहुः ।। ४ ।।

स खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।
विखनसार्चितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ।। ५ ।।

विरचिताभयं वृष्णिवर्य ते शरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ।। ६ ।।

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥
मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यतीरधरसीधुनाऽऽप्याययस्व नः ॥ ८ ॥
तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९ ॥
प्रहसितं प्रिय प्रेमवीक्षितं विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥
चलसि यद् व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् ।
तृणशिलाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११ ॥
दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।
वनरजस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥
प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥
सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥
अटति यद् भवानह्नि काननं त्रुटि युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जडवदीक्षतां पक्ष्मनुद्दृशाम् ॥ १५ ॥
पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य ते ह्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥
रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरःश्रियो धाम वीक्ष्य ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥
व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ।
भज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

Kṛṣṇa appears again

They were anxious to meet Kṛṣṇa and were full of tears in their eyes. To their surprise Kṛṣṇa appeared with a smiling face. On seeing him all of them got up together. His arm was held by a gopikā. Another gopikā placed his arm on her shoulder. A third

gopikā stood before him with folded hands. One gopikā touched his feet. All of them were relieved of the pangs of the separation from Kṛṣṇa. Taking them all Kṛṣṇa went to the sandy bank of river Kālindi. And sat encircled by the gopikas.

श्रीशुक उवाच—

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ ३०-१ ॥
तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥
काचित् कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ।
काचिद् दधार तद्बाहुमंसे चन्दनरूषितम् ॥ ४ ॥
काचिदञ्जलिनाऽगृह्णात् तन्वी ताम्बूलचर्वितम् ।
एका तदङ्घ्रियुगलं सन्तप्तस्तनयोरधात् ॥ ५ ॥
सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ।
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनः ॥ ९ ॥

Pretending a little anger gopikās asked him that those persons who are devoted to him are rewarded with suitable benefits. Those who are not devoted also get the benefits. But there are occasions when he is indifferent to both who are devoted to him and who are not devoted to him. Please instruct us which course we should follow.

Kṛṣṇa replied to them that those who are devoted for getting some benefits are not the devotees at all. They are selfish. Bestowing any benefit on them is not dharma. Bestowing benefits on them who are not devoted is something like parental care for children. Being indifferent to both those who are devoted and who are not devoted is something like a sthitaprajña state. Those who obtain benefits but are not grateful they are ungrateful persons.

I bestow the benefits on those who are devoted to me depending upon their level of devotion and the service rendered.

I became invisible for some time in order to provide greater pleasure to you by my presence.

गोप्य ऊचुः—

भजतोऽनु.भजन्त्येक एक एतद्विपर्ययम् ।
नोभयांश्च भजन्त्यन्य एतन्नो ब्रूहि साधु भोः ॥ १६ ॥

श्रीभगवानुवाच—

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ।
न तत्र सौहृदं धर्मः स्वार्थं तद् वित्त नान्यथा ॥ १७ ॥

मया परोक्षं भजता तिरोहितं सासूयितुं नार्हथ मां प्रियं प्रियाः ॥ २२ ॥

Kṛṣṇa started Râsakrida with gopikâs

After listening the above words of Kṛṣṇa the gopikās became relieved of their pains of separation. Kṛṣṇa started Rāsakrīda surrounded by the gopikas.

Gopikas formed the groups of two holding their arms and when Kṛṣṇa pushed into it, they closely touched him by their neck. They started singing by placing their footsteps, moving the arms, throbbing the eyebrows, bending the trunk and with smiles. He took them to the water of river Kālindi. They profusely poured the water on Kṛṣṇa. The Gandharvas, sages and deities showered flowers on him.

श्रीशुक उवाच—

इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ।
जहुर्विरहजं तापं तत्सङ्गोपचिताशिषः ॥ ३१-१ ॥

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ।
स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥

ततो दुन्दुभयो नेदुः खात् पेतुः पुष्पवृष्टयः ।
जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥

वलयानां नूपुराणां किङ्किणीनां च योषिताम् ।
सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥

पादन्यासैर्भुजविधुतिभिः सुस्मितैर्भ्रूविलासैः
भज्यन्मध्यैश्चलकुचतटैः कुण्डलैर्गण्डलोलैः ।
स्विद्यन्मुख्यः कबररशनाग्रन्थयः कृष्णवध्वो
गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥

काचित् समं मुकुन्देन स्वरजातीरमिश्रिताः ।
उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ।
तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ १० ॥

सोऽन्तर्जले युवतिभिः परिषिच्यमानः प्रेमेक्षितप्रहसिताभिरभिष्टुताङ्गः ।
वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः ॥ २४ ॥

Parikṣit asks Śuka whether Kṛṣṇa playing with gopikās is dharma

When Śuka narrated this event king Parīkṣit asked him revered sage the god has taken the incarnation of Kṛṣṇa to maintain dharma and ward off adharma. Hence is his dancing with the wives of the others justified. Śuka answers that transgressing the ordinary dharma by great persons is not violation of dharma. Just as the fire burns all the thing offered to it. But still it is not a defect on the part of the fire, similarly the great people transgressing the ordinary dharma is not a lapse on their part. However, ordinary people should not take it as a model and should note indulg in such act.

राजोवाच—

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।
अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥

श्रीशुक उवाच—

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ३० ॥

नैतत् समाचरेज्जातु मनसाऽपि ह्यनीश्वरः ।
नश्यत्याश्वाचरन् मौढ्याद् यथा रुद्रोऽपिबद् विषम् ॥ ३१ ॥

गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेहभाक् ॥ ३६ ॥

नासूयन् नृप कृष्णाय मोहितास्तस्य मायया ।
मन्यमानाः स्वपाश्र्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ३८ ॥

Nanda is caught by serpent

One day gopalas went to Ambikavana taking bath in the saraswati river they worshiped Paśupati and Ambikā. During the night they stayed on the bank of saraswati river. At that time a large serpent arrived and caught hold of Nanda. They all started

crying and appealed to Kṛṣṇa to rescue Nanda. Kṛṣṇa touched the serpent by his foot. Then the serpent appeared in the form of a Vidyādhara. Kṛṣṇa asked him who he was and why he became a serpent.

श्रीशुक उवाच—

एकदा देवयात्रायां गोपाला जातकौतुकाः ।
अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनम् ॥ ३२-१ ॥

ऊषुः सरस्वतीतीरे जलं प्राश्य यतव्रताः ।
रजनीं तां महाभाग नन्दसनन्दकादयः ॥ ४ ॥

कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः ।
यदृच्छयाऽऽगतो नन्दं शयानमुरगोऽग्रसीत् ॥ ५ ॥

स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयम् ।
सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥

अलातैर्हन्यमानोऽपि नामुञ्चत् तमुरङ्गमः ।
तमस्पृशत् पदाऽभ्येत्य भगवान् सात्वतां पतिः ॥ ८ ॥

स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ।
भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥ ९ ॥

को भवान् परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ।
कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥ ११ ॥

That Vidyādhara informed him my name is Sudarśana. I became arrogant with the wealth and wandered by Vimāna in all directions. When I saw sage Aṅgīrasa I laughed at him. He cursed me to become a serpent. Now by the touch of your feet I am free from this curse. I prostrate at your feet, kindly permit me to return to my place. Kṛṣṇa permitted him and prostrating at the feet of Kṛṣṇa he returned.

सर्प उवाच—

अहं विद्याधरः कश्चित् सुदर्शन इति श्रुतः ।
श्रिया स्वरूपसम्पत्त्या विमानेनाचरन् दिशः ॥ १२ ॥

ऋषीन् विरूपानङ्गिरसः प्राहसं रूपदर्पितः ।
तैरिमां प्रापितो योनिं प्रलब्धः स्वेन पाप्मना ॥ १३ ॥

प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ।
अनुजानीहि मां कृष्ण सर्वलोकेश्वरेश्वर ॥ १६ ॥

ब्रह्मदण्डाद् विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनात् ।
यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ।
सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ १७ ॥

श्रीशुक उवाच—

इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवाद्य च ।
सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥ १८ ॥

Kṛṣṇa snatches Chūḍamaṇi from the head of Śaṅkhachūḍa

Once Balarāma and Kṛṣṇa went to forest with the gopikās to enjoy the moonlight. When they were singing and playing Śaṅkhachūda a servant of Kubera arrived. He encroached on gopikās in the very presence of Kṛṣṇa and Balarāma. Then Kṛṣṇa and Balarāma took a tāla tree and attacked him. Kṛṣṇa followed him wherever he ran and hit him on his head. He took away the Chūdāmaṇi of Śaṅkachūda and gave it to Balarāma.

कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः ।
विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषिताम् ॥ २० ॥

तमन्वधावद् गोविन्दो यत्र यत्र स धावति ।
जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥ ३० ॥

इवाविदूर अभ्येत्य शिरस्तस्य दुरात्मनः ।
जहार मुष्टिनैवाङ्ग सहचूडामणिं विभुः ॥ ३१ ॥

शङ्खचूडं निहत्यैव मणिमादाय भासुरम् ।
अग्रजायाददात् प्रीत्या पश्यन्तीनां च योषिताम् ॥ ३२ ॥

Veṇugītā

When Kṛṣṇa left for the forest gopikās could not bear his separation. They spent their time singing the glory of Kṛṣṇa. These songs are known as Veṇugītā. Kṛṣṇa playing on the flute is described here. The gopikās addressed each other by these songs presenting a beautiful picture of Kṛṣṇa. They described him as 'Placing his left cheek on the left arm, moving his eyebrows, holding the flute with his fingers, Kṛṣṇa is playing

flute. The siddha and gandharva women moving over the sky were observing him bashfully. The bulls, cows and deer captivated by the sweet music of the flute and were standing silently like drawn in a painting with the half chewed tender gross in their mouth. The rivers were moving slowly touched by the dust particles of his feet and sanctified by it. The creepers and trees revealed their admiration to the Supreme God through their flowers and fruits. The sārasa and hamsa birds on the lake were captivated by the music of his flute and enjoyed the same by closing their eyes. The clouds moved slowly and provided an umbrella for Kṛṣṇa. The deities Indra, Śiva, brahma etc. appreciated the music of the flute by moving their heads. In these words the gopikās sang the glory of Kṛṣṇa.

श्रीशुक उवाच—

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ।
कृष्णलीलां प्रगायन्त्यो निन्युर्दुःखेन वासरान् ।। ३३-१ ।।

गोप्य ऊचुः—

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ।
कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ।। २ ।।
वृन्दशो व्रजवृषो मृगगावो वेणुवाद्यहृतचेतस एत्य ।
दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ।। ५ ।।
बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः ।
कर्हिचित् सबल आलि सगोपैर्गाः समाह्वयति यत्र मुकुन्दः ।। ६ ।।
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ।
स्पृहयतीर्वयमि वाबहुपुण्याः प्रेमवेपितभुजा स्तिमितापः ।। ७ ।।
वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ।। ९ ।।
सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ।
हरिमुपासत ते यतचित्ता हन्त मीलितदृशो धृतमौनाः ।। ११ ।।
महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ।
सुहृदमभ्यवर्षत् सुमनोभिश्छायया च विदधे वितपत्रम् ।। १३ ।।
सुमनसस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ।
कवय आनतकन्धरगात्राः विस्मयं ययुरनिश्चिततत्त्वाः ।। १५ ।।

कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥ २० ॥
वत्सलो व्रजगवां यदगाधो वन्द्यमानचरणः पथि वृद्धैः ।
कृत्स्नगोधनमपोह्य दिनान्ते गीतवेणुरनुगोद्धृतकीर्तिः ॥ २२ ॥

श्रीशुक उवाच—
एवं व्रजस्त्रियो राजन् कृष्णलीला नु गायतीः ।
रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥

Kṛṣṇa kills Ariṣṭa

One day a demon Ariṣṭa arrived in the form of a furious bull. He was rushing raising his tail and crushing the ground by his arms. The gopās and gopikās were frightened. The cows and other animals ran away. They all started appealing to Kṛṣṇa to save them. Kṛṣṇa hit him by spreading his arm. The demon Ariṣṭa pounced upon Kṛṣṇa. Krisṇa took his arms and pushed him eighteen steps behind. He put his foot on him and killed him.

श्रीशुक उवाच—
अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ।
महीं महाककुत्कायः कम्पयन् खुरविक्षताम् ॥ ३४-१ ॥
रवमाणः खरतरं पदा च विलिखन् महीम् ।
उद्यम्य पुच्छमभ्राणि विषाणाग्रेण चोद्धरन् ॥ २ ॥
तं तीक्ष्णशृङ्गमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ।
पशवो दुद्रुवुर्भीता राजन् सन्त्यज्य गोकुलम् ॥ ५ ॥
कृष्ण कृष्णेति ते सर्वे गोविन्दं शरणं ययुः ।
भगवानथ तद् वीक्ष्य गोकुलं भयविद्रुतम् ॥ ६ ॥
मा भैष्टेति गिराऽऽश्वास्य वृषासुरमुपाह्वयत् ।
गोपालैः पशुभिर्मन्द त्रासितैः किमसत्तम ॥ ७ ॥
बलदर्पहाऽहं दुष्टानां त्वद्विधानां दुरात्मनाम् ।
इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ।
सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ ८ ॥

सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ।
उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥
गृहीत्वा शृङ्गयोस्तं वा अष्टादशपदानि सः ।
प्रत्यपोवाह भगवान् गजः प्रतिगजं यथा ॥ ११ ॥
तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य निपात्य भूतले ।
निष्पीडयामास यथाऽऽर्द्रमम्बरं कृत्त्वा विषाणे न जघान सोऽपतत् ॥ १३ ॥

Nārada informs Kamsa that Kṛṣṇa and Balarāma are in Nandagokula

After this event Nārada met Kamsa and informed him that Vasudeva handed over Kṛṣṇa the son of devaki to Yaśoda and brought the female child of Yaśoda near Devaki. He also handed over Balarāma the son of Rohiṇi to Nanda. These two have killed all your brave men. On hearing this Kamsa drew his sword to kill Vasudeva. However Nārada told him that two sons only are your enemies. Then Kamsa arrested Vasudeva and his wife. Then Kamsa sent demon Keśin to kill Balarāma and Kṛṣṇa.

अरिष्टे निहते गोष्ठे कृष्णेनाद्भुतकर्मणा ।
कंसाय प्राह भगवान् नारदो देवदर्शनः ॥ १६ ॥
यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च ।
रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ।
न्यस्तौ स्वमित्रे नन्दे वै याभ्यां ते पुरुषा हताः ॥ १७ ॥
निशम्य तद् भोगपतिः कोपात् प्रचलितेन्द्रियः ।
निशातमसिमादत्त वसुदेवजिघांसया । १८ ॥
निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ।
ज्ञात्वा लोहमयैः पाशैर्बबन्ध सह भार्यया ॥ १९ ॥
प्रतियाते तु देवर्षौ कंस आशास्य केशिनम् ।
प्रेषयामास हन्येतां भवता रामकेशवौ ॥ २० ॥

Kamsa instructs Cāṇūra and Muṣṭika to arrange wrestling

He invited his ministers, Cāṇūra, Muṣṭika, Kośala etc. and the persons in charge of elephants. He told him that Balarāma and Kṛṣṇa are my enemies. You should arrange to kill them by arranging a contest of wrestling. The elephant Kuvalayapīda should be pleased at the door of the wrestling ground and Rāma and Kṛṣṇa be killed by that elephant.

The person in charge of the elephant told him that it is not proper on his part to kill the sons of the sister of Kamsa. In order to impress upon him the need of killing these two boys Kamsa narrated the circumstances of his birth and the reason for the enemity of his own sister's sons.

ततो मुष्टिकचाणूरछलकोसलकादिकान् ।
अमात्यान् हस्तिपांश्चैव समाहूयाह भोजराट् ॥ २१ ॥
रामकृष्णौ सुतौ मह्यं मृत्यू कालनिदर्शितौ ।
भवद्भ्यामिह सम्प्राप्तौ हन्येतां मल्ललीलया ॥ २३ ॥
महामात्र निबोधेदं वचो मम महामते ।
गजः कुवलयापीडः प्रभिन्नकरटामुखः ॥ २५ ॥
संस्थाप्यो द्वारि रङ्गस्य करारोपितमुद्गरः ।
तेन ते तत्र हन्तव्यौ सुतावानकदुन्दुभेः ॥ २६ ॥

Kamsa narrates the circumstances of his birth

Once my mother went to the garden of the palace and was enjoying the sight of the flowers, the bees, the peacocks and creeper groves. She became eager to have the company of her husband. At this stage a gandharva by name Drumila appeared before her in the form of her husband Ugrasena. He enjoyed her. However when she realised that he was not her husband she felt very unhappy and asked him as to who he was. The gandharva told her that he is a gandharva and the gandharvas are like the deities. For human beings like you to get our company is a rare opportunity. On hearing this she became more angry and she protested by saying that you have insulted me in the very presence of the deities of the earth, water, fire, air and the sky. She proceeded to curse him but the gandharva tried to console her saying that the deities meeting the women of human beings is superior meeting the inferiors. And men meeting the women of deities is inferior meeting the superior. Therefore I have not committed any blunder by meeting you. By this meeting of mine with you, you will get a powerful son. By this remark she was enraged and said this son of yours will be a cruel and evil person. Then the gandharva retorted that he will be an enemy of you and all your relatives. Kamsa told that this background of his birth was informed to him by Nārada. Kamsa said for this reason Ugrasena, Vasudeva and all others are my enemies. Being the son of gandharva if I kill all these it is not a blunder. He ordered the officer incharge of the elephants to arrange the wrestling contest placing the Kuvalayapīda elephant at the entrance of the wrestling

ground. He also instructed his ministers to arrange for a dhanuryāga. Kill the animals and offer them to Bhūtarāja get rid of Ugrasena, Vasudeva and all my enemies. Jarāsandha is my friend. Śambara, Naraka and Bāṇa are friendly with me. With their co-operation I will kill all those who are on the side of the deities. He instructed Akrūra to bring Rāma and Kṛṣṇa. Akrūra agreed to follow his order.

कंस उवाच—

माता मम महाभागा कदाचित् कमलेक्षणा ।
विचचार गृहोद्याने मन्दमारुतवीचिते ॥ ३० ॥

चरन्ती तत्र मे माता चिन्तयामास सुव्रता ।
भर्तारं कामसन्तप्ता ऋतुस्नाता स्वलङ्कृता ॥ ३३ ॥

तत्रैव कश्चिद् गन्धर्वो द्रुमिलो नाम नामतः ।
चरन्नन्तर्हितः काले दृष्ट्वा तामेकचारिणीम् ॥ ३४ ॥

विज्ञाय चिन्तितं तस्याः सर्वसत्त्वाशयार्थवित् ।
उग्रसेनवपुर्बिभ्रत् सस्मितालापवीक्षितम् ॥ ३५ ॥

तामाससाद कामार्तः कामयानां पतिव्रताम् ।
अजानमाना साऽभ्येत्य रेमे तेन समं वने ॥ ३६ ॥

सा तं विदित्वा रमणेतरं सती नितान्तखेदाविललोचनाशया ।
उवाच कस्त्वं कितवार्यगर्हितं दुरात्मना येन कृतं त्वयेदृशम् ॥ ३७ ॥

इति ब्रुवन्तीं परिसान्त्वयन् शनैः स दीर्घबाहुर्द्रुमिलोऽभ्यभाषत ।
वयं हि गन्धर्वकुलोद्भवाः प्रिये गीर्वाणतुल्यामरवल्लभानुगाः ॥ ३८ ॥

भवादृशीनां मनुजाङ्गनानां जानीहि भद्रे सुलभा वयं न च ।
जराविनाशाद्यखिलाधिभागिनां नृणां सुराणां महदन्तरं प्रिये ॥ ३९ ॥

इमानतिक्रम्य जलाग्निमेदिनीसमीरणाकाशनिशेशसूर्यान् ।
दिक्कालधर्मानवधीर्य येन दुरात्मनेत्थं मलिनीकृताऽहम् ॥ ४१ ॥

इति ब्रुवन्तीं प्रोवाच स भूयः शापशङ्कितः ।
अनुलोमः सरोजाक्षि मनुष्यासु दिवौकसाम् ॥ ४३ ॥

नराणां देवकान्तासु प्रतिलोमो हि सङ्गमः ।
जानीहि नाहमागस्कृत् तेन पङ्कजगन्धिनि ॥ ४४ ॥

तस्मात् ते जायते पुत्रो मद्वीर्यं न वृथा भवेत् ।
श्रीमान् धीमान् महोत्साहो न मे वाग् जायते मृषा ॥ ४५ ॥
इत्येवं वादिनं क्रुद्धा माता मम यशस्विनी ।
प्राह सन्त्यज्य सन्तप्ता पातिव्रत्यं सुदुर्लभम् ॥ ४६ ॥
निस्स्रेतोर्भिन्नवृत्तस्य पापस्योन्मार्गवर्तिनः ।
क्रूरस्ते तनयो भूयात् साहसी निर्दयोऽघृणः ॥ ४७ ॥
नानुग्राह्यो देवतानां द्विजानां च तपस्विनाम् ।
इत्थं वदन्त्यां तस्यां स क्रुद्धायां शापशङ्कितः ।
तावकानां भवेच्छत्रु(स्तत्रैवा)रित्युक्त्वाऽन्तरधीयत ॥ ४८ ॥
गते तस्मिन् महोद्यानान्माता मम तपस्विनी ।
केनाप्यज्ञातवृत्तान्ता गृहानेवाभ्यपद्यत ॥ ४९ ॥
ततः सा गर्भमालम्ब्य कालेनैव सुषाव माम् ॥ ५० ॥
इति मे नारदः प्राह कदाचिद् भगवान् ऋषिः ।
ततः प्रभृत्यहं द्वेष्मि तानेतान् बन्धुदुर्जनान् ॥ ५१ ॥
वसुदेवं च कितवमन्यांश्च तदुपाश्रयान् ।
हत्वा न जायते दोषो मम गन्धर्वजन्मनः ॥ ५३ ॥
द्विपः कुवलयापीडो जहि तेन ममाहितौ ।
आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ॥ ५८ ॥
विशसन्तु पशून् मेध्यान् भूतराजाय मीढुषे ।
इत्याज्ञाप्यार्थतत्त्वज्ञमाहूय यदुपुङ्गवम् ।
गृहीत्वा पाणिना पाणिं तत्राक्रूरमुवाच ह ॥ ५९ ॥
ततश्चैषा मही मित्र भवित्री नष्टकण्टका ।
जरासन्धो मम गुरुर्द्विविदो दयितः सखा ॥ ६७ ॥
शम्बरो नरको बाणो मय्येव कृतसौहृदाः ।
तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ॥ ६८ ॥

अक्रूर उवाच—

राजन् मनीषितं सम्यक् तव चावद्यमार्जनम् ।
सिद्ध्यसिद्ध्योः समं कुर्याद् दैवं हि फलभावनम् ॥ ७० ॥

श्रीशुक उवाच—

एवमादिश्य चाक्रूरं मन्त्रिणश्च विसृज्य सः ।
प्रविवेश गृहं कंसस्तथाऽक्रूरः स्वमालयम् ॥ ७२ ॥

Kṛṣṇa kills Keśin

Demon Keṣi sent by Kamsa entered into Nandagokula assuming the form of a horse. On seeing him gopas were frightened. He hit Kṛṣṇa. Kṛṣṇa took him by arms and hit him by his foot. Krushed by the arms of Kṛṣṇa, Keṣi collapsed on the ground.

श्रीशुक उवाच—

केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्दरयन् मनोजवः ।
सटावधूताभ्रविमानसङ्कुलं कुर्वन् नभो हेषितभीषिताखिलः ॥ ३५-१ ॥
विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः ।
दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन् ॥ २ ॥
समेधमानेन स कृष्णबाहुना निरुध्यवायुश्चरणांश्च विक्षिपन् ।
प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लम्बं विसृजन् क्षितौ व्यसुः ॥ ८ ॥

Nārada predicts the future activities of Kṛṣṇa

At this juncture Nārada arrived and praised Kṛṣṇa. 'O' Kṛṣṇa you are the master of all living and nonliving beings. You are present in the heart of these and witness all their activities. You have taken this incarnation to destroy the evil persons and to protect the noble persons. I am glad that you killed the demon Keṣi. I want to see Cāṇūra, Muṣṭika etc. wrestlers and Kamsa killed by you. I also foresee that you will bring Pārijāta tree defeating Indra, marry Rukmiṇi, bring Śyamantaka gem and marry Jāmbavati. I further envisage your killing Poundraka and Dantavakra. I foresee all your great deeds. I offer obeisance to you.

देवर्षिरुपसङ्गम्य भागवतप्रवरो नृप ।
कृष्णमक्लिष्टकर्माणं रहसीदमभाषत ॥ १० ॥
कृष्णकृष्णाप्रमेयात्मन् योगेश जगदीश्वर ।
वासुदेवाखिलावास सात्वतां प्रवर प्रभो ॥ ११ ॥
त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ।
गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥ १२ ॥

दिष्ट्या ते निहतो दैत्यो लीलयाऽयं हयाकृतिः ।
अस्य हेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवम् ॥ १५ ॥

चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिपान् ।
कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥ १६ ॥

तस्यानु शङ्खयवनमुराणां नरकस्य च ।
पारिजातस्य हरणमिन्द्रस्य च पराजयम् ॥ १७ ॥

उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणम् ।
नृगस्य मोक्षणं पापाद् द्वारकायां जगत्पते ॥ १८ ॥

स्यमन्तकस्य च मणेरादानं सह भार्यया ।
मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः ॥ १९ ॥

पौण्ड्रकस्य वधं पश्चात् काशिपुर्याश्च दीपनम् ।
दन्तवक्रस्य निधनं चैद्यस्य च महाक्रतौ ॥ २० ॥

यानि चान्यानि वीर्याणि द्वारकामावसन् भवान् ।
कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि ॥ २१ ॥

अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै ।
अक्षोहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥ २२ ॥

Kṛṣṇa kills Vyomāsura and releases gopas from the cave

Śuka continues to narrate Śrī Kṛṣṇa's activity. One day Kṛṣṇa went to the hills taking the cows and accompanied by his friends. They started playing hide and seek. Some of them moved like lambs and hid themselves. When their play was going on Vyoma son of Maya appeared in the form of a gopa. He put them in a cave of the hill and closed the door. Kṛṣṇa took hold up him and pushed him to the ground and hit him severaly like hitting the animals.

श्रीशुक उवाच—

भगवानपि गोविन्दो हत्वा केशिनमाहवे ।
पशूनपालयत् पालैः प्रीतैर्व्रजसुखावहः ॥ २६ ॥

एकदा ते पशून् पालाश्चारयन्तोऽद्रिसानुषु ।
चक्रुर्निलायनक्रीडां चोरपालापदेशतः ॥ २७ ॥

तत्रासन् कतिचिच्चोराः पालाश्च कतिचिन्नृप ।
मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥ २८ ॥
मयपुत्रो महामायो व्योमो गोपालरूपधृक् ।
मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥ २९ ॥
गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः ।
शिलया पिदधे द्वारं चतुःपञ्चावशेषिताः ॥ ३० ॥
तस्य तत् कर्म विज्ञाय कृष्णः शरणदः सताम् ।
गोपान् नयन्तं जग्राह वृकं हरिरिवौजसा ॥ ३१ ॥
तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ।
पश्यतां दिवि देवानां पशुमारममारयत् ॥ ३३ ॥
गुहापिधानं निर्भिद्य गोपान् निस्सार्य कृच्छ्रतः ।
स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥ ३४ ॥

Akrūra goes to Nandagokula

Akrūra went to Nandagokula seated on chariot. On his way he was thinking of Krisṇa only with great reverence. He thought it is a great opportunity for him to see Krisṇa. He praised Krisṇa narrating his glory. When he reached Nanda-gokula he jumped from the chariot being anxious to meet Rāma and Krisṇa. He prostrated at the feet of Rāma and Krisṇa. Krisṇa embraced him with great affection. He welcomed him and offered a seat and madhuparka. He was also served sumptuous meal.

श्रीशुक उवाच—

अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः ।
उषित्वा रथमास्थाय प्रययौ नन्दगोकुलम् ॥ ३६-१ ॥
गच्छन् पथि महाभागो भगवत्यम्बुजेक्षणे ।
भक्तिं परामुपगत एवमेतदचिन्तयत् ॥ २ ॥

अक्रूर उवाच—

किं मयाऽऽचरितं भद्रं किं तप्तं परमं तपः ।
किं वाऽथाप्यर्हते दत्तं यद् द्रक्ष्याम्यद्य केशवम् ॥ ३ ॥
ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः ।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ॥ ६ ॥

दद‍र्श कृष्णं रामं च व्रजे गोदोहनं गतौ ।
पीतनीलाम्बरधरौ शारदाम्बुरुहेक्षणौ ॥ २६ ॥

रथात् तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः ।
पपात चरणोपान्ते दण्डवद् रामकृष्णयोः ॥ ३२ ॥

भगवांस्तदभिप्रेत्य रथाङ्गाङ्कितपाणिना ।
परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३४ ॥

पृष्ट्वाऽथ स्वागतं तस्मै निवेद्य परमासनम् ।
प्रक्षाल्य विधिवत् पादौ मधुपर्कार्हमाहरत् ॥ ३६ ॥

तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ।
मुखवासैर्गन्धमाल्यैः परां प्रीतिं व्यधात् पुनः ॥ ३८ ॥

Akrūra informs Kamsa's instruction to bring Kṛṣṇa to Madhura

After the dinner Krisṇa enquired about the activities of Kamsa. Akrūra narrated his enemity towards him and the attempt to kill Vasudeva. Then he informed Krisṇa the purpose for which he is sent by Kamsa to meet him. Krisṇa laughed at it and asked the permission of Nanda to go to Mathurā. Nanda instructed the gopas to prepare the presentations to be offered to Kamsa. He asked them to go with Krisṇa. The gopikas felt very unhappy when they learnt about the departure of Krisṇa from Nandagokula. They decided to prevent him. They profusely cried for the whole night.

श्रीशुक उवाच—

सुखोपविष्टः पर्यङ्के रामकृष्णानुमोदितः ।
लेभे मनोरथान् सर्वान् पथि यान् स चकार ह ॥ ३७-१ ॥

सायन्तनाशनं कृत्वा भगवान् देवकीसुतः ।
सुहृत्सु वृत्तिं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥ ३ ॥

पृष्टो भगवता सर्वं वर्णयामास माधवः ।
वैरानुबन्धं यदुषु वसुदेववधोद्यमम् ॥ ४ ॥

यत्सन्देशो यदर्थं वा दूतः सम्प्रेषितः स्वयम् ।
यदुक्तं नारदेनास्य स्वजन्मानकदुन्दुभेः ॥ ५ ॥

श्रुत्वाऽक्रूरवचः कृष्णो बलश्च परवीरहा ।
प्रहस्य नन्दं पितरं राज्ञाऽऽदिष्टं विजज्ञतुः ॥ ६ ॥

गोपान् समादिशत् सोऽपि गृह्यतां सर्वगोरसः ।
उपायनानि गृह्णीध्वं युज्यन्तां शकटानि च ॥ ७ ॥
यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ।
द्रक्ष्यामः सुमहत् पर्व यान्ति जानपदाः किल ॥ ८ ॥
एवमाघोषयत् क्षत्रा नन्दगोपः स्वगोकुले ।
गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिताशयाः ॥ ९ ॥
रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ।
काश्चित् तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ १० ॥
शोकापहानि नर्माणि प्रोद्दामचरितानि च ।
चिन्तयन्त्यो मुकुन्दस्य भीता विरहकातराः ॥ १४ ॥
समेताः सङ्घशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १५ ॥
निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबान्धवाः ।
मुकुन्दसङ्गान्निमिषार्धदुस्त्यजाद् दैवेन विध्वंसितदीनचेतसाम् ॥ २५ ॥

श्रीशुक उवाच—

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णनिषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥ २८ ॥

Akrūra sees Kṛṣṇa's devine form in Yamuna water

Next morning Akrūra started seated on his chariot with Balarāma and Krisṇa. Nanda and other gopas followed them seated on their carts. They followed him until the dust of the chariot became invisible, then they returned. When Akrūra, Balarāma and Krisṇa reached the river Kālindi. Krisṇa and Rāma sipped the holy water and returned to the chariot. Akrūra took bath. When he dipped his head in the water meditating upon the supreme god he saw Balarāma and Krisṇa in the water. He wondered how could Rāma and Krisṇa be in the water who have already gone to the chariot. He came out of water and looked at the chariot. They were in the chariot. He again dipped into the water and to his surprise he saw Krisṇa seated on the lap of ādiśeṣa with his four arms. He realised that Krisṇa was the supreme god and profusely the praised him.

स्त्रीणामेवं रुदन्तीनामुदिते सवितर्यथ ।
अक्रूरश्चोदयामास कृतमैत्र्यादिको रथम् ॥ २९ ॥

गोपास्तमन्वसज्जन्त नन्दाद्याः शकटैस्ततः ।
आदायोपायनं भूरि कुम्भान् गोरससम्भृतान् ॥ ३० ॥
यावदालक्ष्यते केतुर्यावद् रेणू रथस्य च ।
अनुप्रस्थापितात्मानो लेख्यानीवोपतस्थिरे ॥ ३३ ॥
ता निराशा निववृतुर्गोविन्दविनिवर्तने ।
विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम् ॥ ३४ ॥
भगवानपि सम्प्राप्तो रामाक्रूरौ तथा नृप ।
रथेन वायुवेगेन कालिन्दीमघनाशिनीम् ॥ ३५ ॥
तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ।
वृक्षखण्डमुपव्रज्य सरामो रथमाविशत् ॥ ३६ ॥
अक्रूरस्तावुपामन्त्र्य निवेश्य च रथोपरि ।
कालिन्द्या ह्रदमागम्य स्नानं विधिवदाचरन् ॥ ३७ ॥
निमज्य तस्मिन् सलिले जपन् ब्रह्म सनातनम् ।
तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥ ३८ ॥
तौ रथस्थौ कथमिह सुतावानकदुन्दुभेः ।
तर्हि स्वित् स्यन्दने न स्त इत्युन्मज्य व्यचष्ट सः ॥ ३९ ॥
तत्रापि च यथापूर्वमासीनौ पुनरेव सः ।
न्यमज्जद् दर्शनं मेने मृषा किं सलिले तयोः ॥ ४० ॥
भूयस्तत्रापि सोऽद्राक्षीत् स्तूयमानमहीश्वरम् ।
सिद्धैर्भुजङ्गपतिभिरसुरैर्नतकन्धरैः ॥ ४१ ॥
सहस्रशिरसं देवं सहस्रफणमौलिनम् ।
नीलाम्बरं बिसश्वेतं शृङ्गैः श्वेतमिव स्थितम् ॥ ४२ ॥
तस्योत्सङ्गे घनश्यामं पीतकौशेयवाससम् ।
पुरुषं चतुर्भुजं शान्तं पद्मपत्रारुणेक्षणम् ॥ ४३ ॥
प्रह्लादनारदवसुमुखैर्भागवतोत्तमैः ।
स्तूयमानं पृथङ्मार्गैर्वचोभिरमलात्मभिः ॥ ५१ ॥
विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः ।
हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥ ५३ ॥

गिरा गद्गदयाऽस्तौषीत्सत्त्वमालम्ब्य सात्त्वतः ।
प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिपुटः शनैः ॥ ५४ ॥

Akrūra prays the Viśvarūpa form of Śri Kṛṣṇa

'O' Nārāyaṇa I offer my salutations to you. The yogins meditate upon you. The scholars approach you with the knowledge. The Karma yogins offer all the Karmas performs by them at your feet. Just as the rivers flowing from the mountans reach the sea all religious practitioners approach you. Agni is your face. Earth is your foot. The sun is your navel. The deities are your arms. The ocean is your stomach. The trees and plants are the hairs. The day and night are your winking. 'O' god whatever forms you assume. These are glorified by your deities. I offer my salutations to Vāsudeva.

श्रीशुक उवाच—

एवं दृष्ट्वा तमक्रूरः प्रसन्नहृदयेन्द्रियः ।
तुष्टाव पुण्डरीकाक्षं भक्त्याऽवनतकन्धरः ॥ ३८-१ ॥

अक्रूर उवाच—

नतोऽस्म्यहं त्वाऽखिलहेतुभूतं नारायणं पूरुषमादिमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद् ब्रह्माऽऽविरासीद् यत एष लोकः ॥ २ ॥

त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ।
साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ५ ॥

त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः ।
यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥ ६ ॥

एके त्वखिलकर्माणि सन्न्यस्योपशमं गताः ।
ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम् ॥ ७ ॥

यथाऽद्रिप्रभवा नद्यः पर्जन्यापूरिता विभो ।
विशन्ति सर्वतः सिन्धुं तद्वत् त्वां गतयोऽन्ततः ॥ ११ ॥

अग्निर्मुखं तेऽवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ।
द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवं कुक्षिर्मरुत् प्राणबलं प्रकल्पितम् ॥ १४ ॥

नमः कारणमत्स्याय प्रलयाब्धिचराय च ।
हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १८ ॥

Akrūra and Kṛṣṇa arrive at Madhura

Akrura came to the chariot after the bath. Krisṇa asked him what was the wonderful that you saw in the water. Akrura told him whatever are the wonderfull things on the earth or over the sky I saw all that in you. Akrura started the chariot and took Rāma and Krisṇa towards Madhura. On the way the villagers collected in groups and were delighted by seeing Rāma and Krisṇa. In the meanwhile Nanda and other gopas had reached the garden near the city of Madhura and were waiting for Rāma and Krisṇa. Krisṇa told Akrura you go to your residence. We will go around the city and see the city. Akrura pleaded that he does not wish to go without them and asked them to come to his residence. Krisṇa told him I will come to your house after destroying the enemy of Yādavas. Akrūra left them with a heavy heart went to Kaṁśa reported the arrival of Rāma and Krisṇa and returned to his house.

श्रीशुक उवाच—

सोऽपि चान्तर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः ।
कृत्वा चावश्यकं सर्वं विस्मितो रथमाविशत् ॥ ३९-२ ॥
तमपृच्छद् हृषीकेशः किं ते दृष्टमिहाद्भुतम् ।
भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥

अक्रूर उवाच—

अद्भुतानीह यावन्ति भूमौ वियति वा जले ।
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥
यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ।
तं त्वाऽनुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतम् ॥ ५ ॥

श्रीशुक उवाच—

मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः ।
वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ॥ ७ ॥
तावद् व्रजौकसस्तात नन्दगोपादयोऽग्रतः ।
पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥ ८ ॥
भवान् प्रविशतामग्रे सहयानः पुरीं गृहम् ।
वयं त्विहावमुच्याथ तावद् द्रक्ष्यामहे पुरीम् ॥ १० ॥

अक्रूर उवाच—

नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मधुरां प्रभो ।
त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥ ११ ॥
आपस्तेऽङ्घ्र्यवनेजन्यस्त्रींल्लोकान् शुचयोऽपुनन् ।
शिरसाऽधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥ १५ ॥

श्रीभगवानुवाच—

आयास्ये भवतो गेहमहमार्यसमन्वितः ।
यदुवर्गद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥ १७ ॥

श्रीशुक उवाच—

एवमुक्तो भगवता सोऽक्रूरो विमना इव ।
पुरीं प्रविश्य कंसाय कर्मावेद्य गृहं ययौ ॥ १८ ॥

Kṛṣṇa enters the city of Mdhura. Women welcome him with great joy

In the afternoon Krisṇa entered the city of Madhura accompanied by Rāma. He saw the city that had the buildings built in marbles with high towers. With golden doors, with the rooms built by copper for storing the food grains. With the gardens for common people and with special gardens for women.

With the buildings of rich citizens covered with golden plates, with the halls for merchants. Krisṇa and Rāma entered this beautiful city accompanied by gopas by the royal path. As they entered, the women stood on the top of the high buildings to see them. In their hurry to come, they were not properly dressed. Some had forgotten to put their ear rings on both the ears. Others had forgotten to put the silver chain on both feet. Some who were taking oil bath rushed to see them without taking full bath. They showered the flowers on them from the top of the buildings.

ततोऽपराह्णे भगवान् कृष्णः सङ्कर्षणान्वितः ।
मधुरां प्राविशद् गोपैर्दिदृक्षुः परिवारितः ॥ १९ ॥
ददर्श तां स्फाटिकतुङ्गगोपुरं बृहत्स्फुरद्धेमकपाटतोरणाम् ।
ताम्रारकोष्ठपरिखां दुरासदामुद्यानरम्योपवनालिशोभिताम् ॥ २० ॥
सौवर्णशृङ्गाटकहर्म्यनिष्कुटश्रेणीसभाभिर्भवनैरुपस्कृताम् ।
वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥ २१ ॥

तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ।
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥

काश्चिद् विपर्यक्कृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ।
कृतैकवस्त्रश्रवणैकनूपुरा नाङ्क्त्वा द्वितीयं त्वपराश्च लोचनम् ॥ २५ ॥

मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ।
जहार मत्तद्विरदेन्द्रविक्रमो दृशां दधच्छ्रीरमणो महोत्सवम् ॥ २७ ॥

प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखाम्बुजाः ।
अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥ २९ ॥

दध्यक्षतैः सोदपात्रैः स्रग्गन्धैरभ्युपायनैः ।
तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥ ३० ॥

Kṛṣṇa kills the arrogant washerman

As Krisṇa and Rāma were proceeding they saw a washer man on the way. Balarāma asked him to give them some newly washed cloth. He told them that you are forest dwellers. You do not deserve the cloths meant for royal personages. Krisṇa got upset by this remark and cut his head by his nails. The associates of that washer man ran away leaving all the cloths. The cloths were thrown on the path all around. Krisṇa selected whatever he liked for himself and for Balarāma. The rest he gave to gopas.

A weaver presents the royal cloth and a garland maker presents garlands

At this Juncture a weaver arrived. He decorated them with royal cloths and other ornaments. Krisṇa was pleased. Then they went to the residence of a person who used to prepare garlands. He was happy to receive them and presented some fine garlands. He appealed to Kṛṣṇa that he should be blessed to be a devotee to him forever.

रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः ।
दृष्ट्वाऽयाचत वासांसि धौतान्यत्युत्तमानि च ॥ ३१ ॥

स याचितो भगवता परिपूर्णेन सर्वतः ।
साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥ ३३ ॥

ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ।
परिधत्त किमुद्‌वृत्ता राजद्रव्याण्यभीप्सथ ॥ ३४ ॥

इत्थं विकत्थमानस्य कुपितो देवकीसुतः ।
रजकस्य कराग्रेण शिरः कायादपाहरत् ॥ ३६ ॥

तस्यानुजीविनः सर्वे वासःकोशान् विसृज्य वै ।
दुद्रुवुः सर्वतो मार्गे वासांसि जगृहेऽच्युतः ॥ ३७ ॥
वसित्वाऽऽत्मप्रिये वस्त्रे कृष्णः सङ्कर्षणस्तथा ।
शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३८ ॥
ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् ।
विचित्रवर्णैः शैलेयैराकल्पैरनुरूपतः ॥ ३९ ॥
नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः ।
स्वलङ्कृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४० ॥
तस्य प्रसन्नो भगवान् प्रादात् सारूप्यमात्मनः ।
श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियम् ॥ ४१ ॥
ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ।
तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥ ४२ ॥
भवन्तौ किल विश्वस्य जगतः कारणं परम् ।
अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ ४५ ॥
इत्यभिप्रेत्य राजेन्द्र सुदामा प्रीतमानसः ।
शस्तैः सुगन्धैः कुसुमैर्माला विरचिता ददौ ॥ ४८ ॥
सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ।
तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥ ५० ॥

Trivakrā meets Kṛṣṇa

When Kṛṣṇa and Balarāma were proceeding by the royal path Kṛṣṇa happens to see a dwarf young woman Trivakrā. Whose body was twisted at three points. He asked her as to who she was and what was her occupation. She told him she is a servant engaged in anointing the body of royal personages with angarāga. She anointed them with angarāga. They looked very charming. Pleased with her service Kṛṣṇa straightened her body. She appealed to Kṛṣṇa to come to her house. Kṛṣṇa told her that he will visit her place after the purpose of his visit to madhura is over. Kṛṣṇa and Balarāma proceeded further; they went on through the market path. They were honored by offering garland.

Kṛṣṇa enters Army and destroys the arms

Kṛṣṇa enquired about the place where the bows are kept. That place was guarded by many guards. They prevented Kṛṣṇa from entering into it. However he forcibly entered into it took bows and broke. The loud noise of it went up to the sky. Kamsa was frightened by it. The guards surrounded these two and tried to arrest them. They killed the guards and came out.

श्रीशुक उवाच—

अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम् ।
विलोक्य कुब्जां युवतीं वराननां पप्रच्छ धात्रीं वचसा रसप्रदः ॥ ४०-१ ॥

सैरन्ध्र्युवाच—

दास्यस्म्यहं ते सुरवर्य सम्मता त्रिवक्रनाम्नी ह्यनुलेपकर्मणि ।
मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ॥ ३ ॥

रूपपेशलमाधुर्यहसितालापवीक्षितैः ।
धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम् ॥ ४ ॥

प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम् ।
ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम् ॥ ६ ॥

सा तदार्जुसमानाङ्गी बृहच्छ्रोणिपयोधरा ।
मुकुन्दस्पर्शनात् सद्यो बभूव प्रमदोत्तमा ॥ ८ ॥

एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे ।
त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ॥ १० ॥

एष्यामि ते गृहं सुभ्रु पुंसामाधिविकर्शनम् ।
साधितार्थोऽगृहाणां नः पान्थानां त्वं परायणम् ॥ १२ ॥

ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः ।
तस्मिन् प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतम् ॥ १४ ॥

पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ।
वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥ १५ ॥

करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यताम् ।
नृणां विकृष्य प्रबभञ्ज मध्यतो यथेक्षुदण्डं मदकर्युरुक्रमः ॥ १६ ॥

धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ।
पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥ १७ ॥
तद्रक्षिणः सानुचराः कुपिता आततायिनः ।
ग्रहीतुकामा आवव्रुर्गृह्यतां वध्यतामिति ॥ १८ ॥
बलं च कंसप्रहितं हत्वा शालामुखात् ततः ।
निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः ॥ २० ॥

Kamsa sees bad omens in his sleep

On hearing this news Kamsa spent sleepless night. He saw a number of bad omens. He saw his head upside down in the mirror. He saw a person with black teeth. He saw a monkey attacking him. He heard a horse sound in his ears. He also saw the dead persons embracing him. His riding a donkey and wearing a garland of red flowers.

कंसस्तु धनुषो भङ्गं रक्षिणां स्वबलस्य च ।
वधं निशम्य गोविन्दरामविक्रीडितं परम् ॥ २४ ॥
दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ।
बहून्यचष्टोभयथा मृत्योर्दूतकराणि च ॥ २५ ॥
अदर्शनं स्वशिरसः प्रतिरूपेषु सत्स्वपि ।
असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २६ ॥
स्वप्ने प्रेतपरिष्वङ्गः खरयानं बिसादनम् ।
यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगम्बरः ॥ २८ ॥
अन्यानि चेत्थम्भूतानि स्वप्नजागरितानि च ।
पश्यन् मरणसन्त्रस्तो निद्रां लेभे न चिन्तया ॥ २९ ॥

Kamsa and wrestlers enter the wrestling hall

Next morning he arranged for the wrestling programme. The wrestling hall was decorated. Kamsa sat on a royal sheet surrounded by his subordinate kings. Leading citizen were also present. Cāṇūra, Muṣṭika, Kośala etc. wrestlers also took their seat. Nanda and gopas were also invited by Kamsa they also took their seat.

व्युष्टायां निशि कौरव्य ! सूर्ये चाभिसमुत्थिते ।
कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३० ॥

कंसः परिवृतोऽमात्यै राजमञ्च उपाविशत् ।
मण्डलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३३ ॥

वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ।
मल्लाः स्वलङ्कृता दृप्ताः स्वोपाध्यायाः समाविशन् ॥ ३४ ॥

चाणूरो मुष्टिकः कूटः छलः कोसल एव च ।
त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३५ ॥

नन्दगोपादयो गोपा भोजराजसमाहुताः ।
निवेदितोपायनास्त एकस्मिन् मञ्च आविशन् ॥ ३६ ॥

Kṛṣṇa kills the elephant Kuvalayapida

Kṛṣṇa and Rāma arrived at the door of the wrestling hall. They saw a huge elephant Kuvalyapīda standing at the door. They asked the person in charge of the elephant to take away the elephant. But he instigated the elephant to rush towards Kṛṣṇa. Kṛṣṇa took its tail and dragged it. Then going in front of it hit it on the head. The elephant fell on the ground but again got up and rushed towards Kṛṣṇa. Kṛṣṇa took its trunk and pushed it to the ground. He took away its tooth and hit the person in charge of the elephant by it.

श्रीशुक उवाच—

अथ कृष्णश्च रामश्च कृतशौचौ परन्तपौ ।
मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥ ४१-१ ॥

रङ्गद्वारं समासाद्य तस्मिन् नागमवस्थितम् ।
अपश्यत् कुवलयापीडं कृष्णोऽम्बष्ठप्रचोदितम् ॥ २ ॥

अम्बष्ठाम्बष्ठ मार्गं नौ देह्यपक्राम माचिरम् ।
नो चेत् सकुञ्जरं त्वाऽद्य नयामि यमसादनम् ॥ ४ ॥

एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं गजम् ।
चोदयामास कृष्णाय कालान्तकयमोपमम् ॥ ५ ॥

करीन्द्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत् ।
कराद् विगलितः सोऽमुं निहत्याङ्घ्रिष्वलीयत ॥ ६ ॥

पुच्छे प्रगृह्यातिबलं धनुषः पञ्चविंशतिम् ।
विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥

तमापतन्तमासाद्य भगवान् मधुसूदनः ।
प्रगृह्य पाणिना हस्तं पातयामास भूतले ।। १३ ।।
वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ ।
रङ्गं विविशतू राजन् गजदन्तवरायुधौ ।। १६ ।।

Kṛṣṇa enters the wrestling hall. The people praise him

Kṛṣṇa and Rāma entered the wrestling hall. The people present there intently saw them as if they were drinking them by the eye, liking them by the tongue, smelling them by the nose, and embracing them by the arms. They started recollecting the great deeds of Kṛṣṇa. He killed Pūtanā, Cakravāka, Dhenuka and Keśi. He saved the cows and the gopas from the forest fire. He cut the arrogance of Kāliyā and Indra. The Govardhana hill was held by his palm for one full week.

Cāṇūra invites Kṛṣṇa for wrestling

At this time Cāṇūra talked to Kṛṣṇa and Rāma and told them we should please the king by following his orders.

Kṛṣṇa told him the king desires that we should wrestle with king's wrestlers. We are just wanderers in the forest. Obeying kings order is a favour to us. However, we are still young. We can wrestle with only equals to us. Cāṇūra told them you are not young boys but you are very strong men. Therefore you should wrestle with only strong men.

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभृतां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विधातृविहितस्तत्त्वं परं योगिनां
वृष्णीनां च पतिः सदैव शुशुभे रङ्गेऽच्युतः साग्रजः ।। १७ ।।
हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ।
कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ।। १८ ।।
तौ रेजतू रङ्गगतौ महाभुजौ विचित्रवेषाभरणस्रगम्बरौ ।
यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षताम् ।। १९ ।।
पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ।
जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः ।। २१ ।।
ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम् ।
तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ।। २२ ।।

एतौ भगवतः साक्षाद् हरेर्नारायणस्य हि ।
अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥

जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ।
कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥ ३१ ॥

प्रियं राज्ञः प्रकुर्वन्त्यः श्रेयो विन्दन्ति वै प्रजाः ।
मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥

तस्माद् राज्ञः प्रियं यूयं वयं च करवामहे ।
भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ॥ ३५ ॥

तन्निशम्याब्रवीत् कृष्णो देशकालोचितं वचः ।
नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनन्द्य च ॥ ३६ ॥

श्रीभगवानुवाच—

प्रजा भोजपतेर्यूयं वयं चापि वनेचराः ।
करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥

बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ।
भवेन्नियुद्धं माऽधर्मः स्पृशेन्मल्ल सभासदः ॥ ३८ ॥

चाणूर उवाच—

न बालो न किशोरस्त्वं बलश्च बलिनां वरः ।
लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥

तस्माद् भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै ।
मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥

Cāṇūra, Muṣṭika start wrestling

Kṛṣṇa took on Cāṇūra and Baralāma took on Muṣṭika in the wrestling contest. They caught hold of the hands by hands and feet by feet and drag each other.

They moved around, they embraced and pushed each other. They went close and immediately moved away and they pounced upon each other.

श्रीशुक उवाच—

एवं चिन्तितसङ्कल्पो भगवान् मधुसूदनः ।
आससाद ह चाणूरं मुष्टिकं रोहिणीसुतः ॥ ४२-१ ॥

आस्फोट्य हस्तौ हस्ताभ्यामूरू चैव परस्परम् ।
विसृज्य भूयः सङ्गम्य परिक्रम्य परस्परम् ॥
हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ।
विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥
परिभ्रामणविक्षेपपरिरम्भावपातनैः ।
उत्सर्पणापसर्पैश्चाप्यन्योन्यं प्रत्ययुध्यतम् ॥ ४ ॥

The women while watching the wrestling praised Kṛṣṇa

The women present to witness the wrestling felt that it is wrong on the part of the king to have arranged the wrestling between very strong wrestlers and the young boys. This is adharma. It will not do any good either to the participating persons or the whole society. They saw Kṛṣṇa sweating and Balarāma's face becoming red.

They also felt that the persons born in Nandagokula are very lucky. Who enjoy the pleasure of seeing Kṛṣṇa. They sing the glory of Kṛṣṇa while milking the cows and churning the curd. They listen to the flute when Kṛṣṇa leaves Gokula with the cows in the morning and returns to the gokula with the cows.

तद् बालबलवद्युद्धं समेताः सर्वयोषितः ।
ऊचुः परस्परं प्रेक्ष्य सानुकम्पा वरूथशः ॥ ६ ॥
महानयं बताधर्म एषां राजसभासदाम् ।
ये बालबलवद्युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ॥ ७ ॥
क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ।
क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥ ८ ॥
धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ।
यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥
न सभां प्रविशेत् प्राज्ञः सभ्यदोषाननुस्मरन् ।
अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥

गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ईश्वरस्य ॥ १४ ॥
या दोहनेऽवहनने मथनोपलेपप्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ ।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यः धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥ १५ ॥

प्रातर्व्रजाद् व्रजत आविशतश्च सायं गोभिः समं कणयतोऽस्य निशम्य वेणुम् ।
निर्गत्य तूर्णमबलाः पथि भूरिपुण्याः पश्यन्ति सस्मितमुखं सदयावलोकम् ॥१६॥

When they were in this mood the wrestling went on. Kṛṣṇa caught hold of Cāṇūra and moved him in a circular way, hit on his back. Cāṇūra collapsed on the ground. In the same way muṣṭika was hit by Baralāma with his fist. Muṣṭika vomited the blood and fell on the ground. Similarly Kṛṣṇa hit the demon Chela on the head and tore Kosala into two peaces. These fell on the ground. When Cāṇūra, Muṣṭika, Chela and Kosalaka were killed the other wrestlers ran away.

तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ।
युयुधाते तथाऽऽन्योन्यं तथैव बलमुष्टिकौ ॥ १८ ॥
नाचलत् तत्प्रहारेण स्रजा हत इव द्विपः ।
बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन् हरिः ॥ २१ ॥
भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ।
विस्रस्ताकल्पकेशस्रगिन्द्रध्वज इवापतत् ॥ २२ ॥
तथैव मुष्टिकः पूर्वं स्वमुष्ट्याऽभिहतेन वै ।
बलभद्रेण बलिना तलेनाभिहतो भृशम् ॥ २३ ॥
चाणूरे मुष्टिके कूटे शले तोसलके हते ।
शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २७ ॥

Kṛṣṇa kills Kamsa

All the people who had gathered in the wrestling hall to witness wrestling congratulated Kṛṣṇa and Rāma. Kamsa was upset and ordered his servants to push out Kṛṣṇa and Balarāma, take away all the properties of gopas, arrest Nanda, kill Vasudeva. It is unfortunate that my father Ugrasena is on the side of my enemies. These remarks of Kamsa enraged Kṛṣṇa and he jumped to the thrown of Kamsa. He removed the Kirīṭa of Kamsa pushed him down the thrown and jumped on him. He dragged the dead body of Kamsa on the ground. At this the eight brothers of Kamsa rushed towards Kṛṣṇa and Balarāma. Balarāma killed all of them. Brahmā, Śiva and all other deities showered flowers on Kṛṣṇa and Rāma. The wives of Kamsa started crying. Kṛṣṇa consoled them. Kṛṣṇa released his father and mother from the prison and prostrated at their feet.

जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ।
ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति ॥ २९ ॥
निस्सारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ।
धनं हरत गोपानां नन्दं बध्नीत दुर्मतिम् ॥ ३१ ॥
एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ।
लघिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ॥ ३३ ॥
प्रगृह्य केशेषु चलत्किरीटं निपात्य रङ्गोपरि तुङ्गमञ्चात् ।
तस्योपरिष्टात् स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ॥ ३६ ॥
कंसं परेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ।
हाहेतिशब्दः सुमहांस्तदाऽभूदुदीरितः सर्वजनैर्नरेन्द्र ॥ ३८ ॥
तस्यानुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः ।
अभ्यधावन्नतिक्रुद्धा भ्रातुर्निर्वेशकारिणः ॥ ४० ॥
तथाऽतिरभसांस्तांस्तु संयतान् रोहिणीसुतः ।
अहन् परिघमुद्यम्य पशूनिव मृगाधिपः ॥ ४१ ॥
नेदुर्दुन्दुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ।
पुष्पैः किरन्तस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ॥ ४२ ॥
मातरं पितरं चैव मोचयित्वाऽथ बन्धनात् ।
रामकृष्णौ ववन्दाते शिरसाऽऽस्पृश्य पादयोः ॥ ५० ॥
देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ।
कृतसंवन्दनौ पुत्रौ सस्वजाते न शङ्कितौ ॥ ५१ ॥

Kṛṣṇa begs the parden of his parents for not being with them in his child hood. Nanda returns to gokula

Kṛṣṇa and Balarāma told their parents that they had missed the pleasure of staying with them during their childhood and boyhood. They missed the joy of being fondled by them. Kṛṣṇa asked Nanda and other gopas to return to gokula. Nanda embraced them and returned gokula with his eyes full of tears. Then Upanayana samskāra was performed inviting the family priest.

मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ।
गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः ॥ ४३-७ ॥

तत् क्षन्तुमर्हथस्तात मातर्नौ परतन्त्रयोः ।
अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदोर्भृशम् ॥ ९ ॥

एवमाश्वास्य पितरौ भगवान् देवकीसुतः ।
मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥

सर्वान् स्वज्ञातिसम्बन्धान् दिग्भ्यः कंसभयाद् गतान् ।
यदुवृष्ण्यन्धकमधुदाशार्हकुकुराईकान् ॥ १५ ॥

सभाजितान् समाश्वास्य विदेशावासकर्शितान् ।
न्यवासयत् स्वगेहेषु वित्तैः सन्तर्प्य विश्वसृक् ॥ १६ ॥

अथ नन्दं समासाद्य भगवान् देवकीसुतः ।
सङ्कर्षणश्च राजेन्द्र परिष्वज्येदमूचतुः ॥ २० ॥

पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ।
पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥

यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ।
ज्ञातीन् नो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ २३ ॥

इत्युक्तस्तौ परिष्वज्य नन्दः प्रणयविह्वलः ।
पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ २५ ॥

अथ शूरसुतो राजन् पुत्रयोः समकारयत् ।
पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृतिम् ॥ २६ ॥

ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ।
गर्गाद् यदुकुलाचार्याद् गायत्रं व्रतमास्थितौ ॥ २९ ॥

Kṛṣṇa proceeds to Sandīpini āśrama to receive education

Then they proceeded to receive education from Sāndīpini at Avantīpura. Sāndīpini taught them Vedas, Upaniṣads, Dharmaśāstra, Dhanurveda and Rājanīti. They learnt sixtyfour arts in sixtyfour days.

अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः ।
काश्यं सान्दीपनिं नाम अवन्तिपुरवासिनम् ॥ ३१ ॥

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ॥ ३३ ॥

सरहस्यं धनुर्वेदं धर्मन्यायपथांस्तथा ।
तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ।। ३४ ।।
अहोरात्रैश्चतुःषष्ट्या संयातौ तावतीः कलाः ।

Kṛṣṇa brings back the dead son of Sandipani

They desired to offer gurudakṣiṇa to sāndīpini. Sāndīpini told them. They should bring back his son drowned in the sea at Prabhāsa. Rāma and Kṛṣṇa went to Prabhāsa and stood on the bank of the sea. They asked sea to return the son of their guru who was drown in the sea by the waves of the sea. Varuṇa the god of the sea told them that he did not take away their guru's son. But a demon called Pancajana was hiding in the sea in the form of a śankha. Kriṣṇa jumped into the sea killed the demon śankha but did not find his guru's son in the womb of śankha. Kṛṣṇa took that śankha went to saṁyamanīpuri of yama and blue the śankha. Yama arrived and asked what service he can render to them. They asked him to return the son of their guru. Yama returned. Kṛṣṇa brought the son back and gave to his guru. Rāma and Kṛṣṇa returned to madhura taking permission from their teacher.

गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप ।। ३६ ।।
द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ।
सम्मन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयाम्बभूव ह ।। ३७ ।।
तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ ।
वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्विदित्वाऽर्हणमाहरत् तयोः ।। ३८ ।।
तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् ।
योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ।। ३९ ।।
तमाह वरुणो देवो विनयावनतः स्थितः ।
नैवाहार्षमहं देव दैत्यः पञ्चजनोऽहरत् ।। ४० ।।
अन्तर्जलचरः कृष्ण शङ्खरूपधरोऽसुरः ।
जलमाविश्य तं हत्वा गृह्यतामित्युवाच सः ।।
ततस्तौ जलमाविश्य हत्वाऽन्तर्जलवासिनम् ।
विदार्य जठरं तस्य नापश्यदुदरेऽर्भकम् ।। ४१ ।।
तदङ्गप्रभवं शङ्खमादाय रथमागमत् ।। ४२ ।।

ततः संयमनीं नाम यमस्य दयितां पुरीम् ।
गत्वा जनार्दनः शङ्खं प्रदध्मौ सहलायुधः ॥ ४३ ॥

शङ्खनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ।
तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितः ॥ ४४ ॥

तथेति तेनोपनीतं गुरुपुत्रं यदूत्तमौ ।
दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४७ ॥

सम्यक् सम्पादितौ वत्स भवद्भ्यां गुरुनिष्क्रिया ।
को नु युष्मद्विधगुरोः कामानामवशिष्यते ।
गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ ४९ ॥

गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ।
आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥ ५० ॥

Uddhava was asked to go to Nandagokula to console the gopikās

Kṛṣṇa asked Uddhava to go to Nandagokula and console them pained by my separation. Accordingly Uddhava went to Nandagokula. As he went near gokula he saw the cows returning raising the dust of the road. The bulls running and brushing each other's sides. He saw the calf's eager to suck the milk. When he entered Nandagokula he heard the sweet sounds of milking the cows and songs of the gopas singing the glory of Kṛṣṇa. Around the gokula there were trees and creepers full of flowers. Bees and birds singing. The ponds full of swans and lotuses.

श्रीशुक उवाच—

वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा ।
शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ ४४-१ ॥

गच्छोद्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावह ।
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥ ३ ॥

आदाय रथमारुह्य प्रययौ नन्दगोकुलम् ।
प्राप्तो नन्दव्रजं श्रीमान् निम्लोचति विभावसौ ॥ ८ ॥

धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ।
सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥ १३ ॥

हंसकारण्डवाकीर्णैः पद्मषण्डैश्च मण्डितम् ।
तमागतं समालोक्य कृष्णस्यानुचरं प्रियम् ॥ १४ ॥

Uddhava was received by Nanda with warmth

He arrived at Nandas residence. Nanda received him with warmth and arranged for the dinner. Nanda enquired him the welfare of Vasudeva, Devaki, their children and friends. He also asked whether Kṛṣṇa remembers his mother Yaśoda, his friends, the cows, the Brindâvana hill and the entire Nandagokula. Will he visit us someday. Remembering the past associations Nanda was full of tears. Yaśoda also was full of tears listening to the great deeds of Kṛṣṇa recollected by Nanda. Uddhava congratulated Nanda for unfolding the great deeds of Kṛṣṇa. He assured Nanda that Kṛṣṇa will visit Nandagokula in the near future. Nanda and Uddhava spent the whole night recollecting the great deeds of Kriṣṇa. In the next morning seeing a new chariot the gopikas wondered whether akrūra has come again who took away Kṛṣṇa from us. However they saw Uddhava.

नन्दः प्रीतः परिष्वज्य वासुदेवधियाऽऽर्चयत् ।
भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ॥ १५ ॥

नन्द उवाच—

कच्चिदङ्ग महाभाग सखा नः शूरनन्दनः ।
आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १७ ॥

अपि स्मरति नः कृष्णो मातरः सुहृदः सखीन् ॥
गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिम् ॥ १९ ॥

श्रीशुक उवाच—

इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः ।
अश्रुकण्ठोऽभवत् तूष्णीं प्रेमप्रसरविह्वलः ॥ २८ ॥

यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ।
शृण्वन्त्यश्रूण्यवास्राक्षीत् स्नेहस्नुतपयोधरा ॥ २९ ॥

तयोरित्थं भगवति कृष्णे नन्दयशोदयोः ।
वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ ३० ॥

उद्धव उवाच—

आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ।
प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ॥ ३५ ॥

न ह्यस्यातिप्रियः कश्चिन्नाप्रियो वाऽस्त्यमानिनः ।
नोत्तमो नाधमो वाऽपि समानस्य समोऽपि वा ॥ ३८ ॥

न माता न पिता तस्य न भार्या न सुतादयः ।
नात्मीयो न परश्चास्य न देहो जन्म कर्म वा ॥ ३९ ॥
युवयोरेव नैवायमात्मजो भगवान् हरिः ।
सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥

श्रीशुक उवाच—

एवं निशा सा ब्रुवतोर्व्यतीता नन्दस्य कृष्णानुचरस्य राजन् ।
गोप्यः समुत्थाय निरूप्य दीपान् वास्तून् समभ्यर्च्य दधीन्यमन्थन् ॥ ४४ ॥
भगवत्युदिते सूर्ये व्रजद्वारि व्रजौकसः ।
दृष्ट्वा रथं शातकौम्भं कस्यायमिति चाब्रुवन् ॥ ४७ ॥
किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिम् ।
इति स्त्रीणां वदन्तीनामुद्धवोऽगात् कृताह्निकः ॥ ४९ ॥

Gopikās anxiously enquire about Kṛṣṇa's message

On seeing Uddhava the gopikas bowed to him and requested him to inform the message sent by Kṛṣṇa. Do you know that Kṛṣṇa has deep affection for us. It is a natural and spontaneous affection. If the affection is for a purpose that will be a mockery of the affection. The bees have a natural affection for flowers. But in the case of courtzans they reject the person after taking all his money. The people reject a king who is not able to take care of them. The students ignore the teacher after their study is over. The priests ignore the yajamāna after their dakṣiṇā is received. The birds leave the tree that has no fruits. The guests leave the residence of the host after lunch is over. The animals leave the forest when it is burnt down by the forest fire. Uddhava found the gopikās hearts completely absorbed on Kṛṣṇa.

श्रीशुक उवाच—

तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलम्बबाहुं नवकञ्जलोचनम् ।
पीताम्बरं पुष्करमालिनं लसन्मुखारविन्दं परिमृष्टकुण्डलम् ॥ ४५-१ ॥
तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ।
रहस्यपृच्छन्परिविष्टमासने विज्ञाय सन्देशहरं रमापतेः ॥ ३ ॥
अन्येष्वर्थकृता मैत्री यावदर्थविडम्बना ।
पुम्भिः स्त्रीषु कृता यद्वत् सुमनस्स्विव षट्पदैः ॥ ६ ॥

निस्स्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ।
अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥ ७ ॥
खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ।
दग्धं मृगास्तथाऽरण्यं जारो भुक्त्वा परस्त्रियम् ॥ ८ ॥

श्रीशुक उवाच—

दद‍र्श गोपीर्गोविन्दमनोवाग्देहचेष्टितैः ।
कृष्णदूतो व्रजं प्राप्त उद्धवस्त्यक्तलौकिकाः ॥ ९ ॥
गायन्त्यः प्रियकर्माणि रुदन्त्यश्च गतह्रियः ।
तस्य संस्मृत्यसंस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥

Bhramara gita

They were singing the charming activities of Kṛṣṇa. While singing a gopika saw a bee. She took the bee as a symbol of Kṛṣṇa and addressed. 'O' bee do not touch me with your mouth contaminated by embracing of another woman. 'O' bee you inform Kṛṣṇa my affection for him. A loving person like you can not leave me who has enjoyed your sweet company. How can one leave you at who's lotus like feet Lakshmi always remains. Young women on the earth and the heaven look at you with graceful smile and the charming movement of the eyebrows.

You killed Vali like a hunter and also you disfigured Śūrpaṇakhā in your Rāma incarnation. You sent Bali to the under world. How can we remain without bringing to our mind your great deeds.

गोप्युवाच—

मधुप कितवबन्धो मा स्पृशास्मान् सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिस्त्वम् ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥
सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यः कस्त्यजेन्मां भवादृक् ।
परिचरति कथं तत्पद्मकिञ्जल्कपादमपि बत हृतचित्ता उत्तमश्लोकजल्पैः ॥ १३ ॥
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे उत्तमश्लोकशब्दः ॥ १५ ॥
मृगयुरिव कपीन्द्रं विव्यधे यः किरातः स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥

Uddhava appreciats the devotion of gopikās to Kṛṣṇa

Uddhava on hearing these songs realised their deep attachment to Kṛṣṇa and delighted them by the message of Kṛṣṇa. He appreciated their deep interest and devotion to Kṛṣṇa. People try to develop devotion to Kṛṣṇa by austerity, penance, meditation and knowledge. However you have developed intense devotion spontaneously which is difficult of even for sages. Now I tell you the message of Kṛṣṇa that brings a great happiness to you. Kṛṣṇa has asked me to inform you that he is never separated from you. The heart of women gets deeper attachment when the person whom they love is away. This attachment is deeper than the attachment when he is nearer. The gopikas asked Uddhava whether Kṛṣṇa remembers them. When he is in the company of young women of the city of Madhura. We are after all girls living in the forest. When he is in the company of young women of the city he is not likely to be interested in us. However we still hope that Kṛṣṇa will not disappoint us.

श्रीशुक उवाच—

अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ।
सान्त्वयन् प्रियसन्देशैर्गोपीरिदमभाषत ॥ २२ ॥

अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ।
वासुदेवे भगवति यासामित्यर्पिता मतिः ॥ २३ ॥

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोविधिभिरन्यैश्च कृष्णे भक्तिर्हि साध्यते ॥ २४ ॥

दिष्ट्या पुत्रान् पतीन् देहान् स्वजनान् भवनानि च ।
हित्वा वृणीत यूयं यत् कृष्णाख्यं पुरुषं परम् ॥ २६ ॥

सर्वात्मभावोऽधिगतो भवतीनामधोक्षजे ।
विरहेण महाभागा महान् वोऽनुग्रहः कृतः ॥ २७ ॥

श्रीभगवानुवाच—

भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् ।
यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ॥ २९ ॥

तथाऽहं च मनःप्राणभूतेन्द्रियगुणाश्रयः ।
आत्मन्येवात्मनाऽऽत्मानं सृजे हन्म्यनुपालये ॥ ३० ॥

यथा दूरतरे प्रेष्ठे मन आविश्य वर्तते ।
स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ॥ ३५ ॥

मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान्मामुपेष्यथ ॥ ३६ ॥

श्रीशुक उवाच—

एवं प्रियतमादेशमाकर्ण्य व्रजयोषितः ।
ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतयः ॥ ३८ ॥

गोप्य ऊचुः—

दिष्ट्याऽऽहितो हतः कंसो यदूनां सानुगोऽघकृत् ।
दिष्ट्याऽऽप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ३९ ॥

अपि स्मरति नः साधो गोविन्दः प्रस्तुते क्वचित् ।
गोष्ठीमध्ये पुरस्त्रीणां ग्राम्यस्वैरकथान्तरे ॥ ४२ ॥

ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृन्दावने कुमुदकुन्दशशाङ्करम्ये ।
रेमे कणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ४३ ॥

अप्येष्यतीह दाशार्हस्तप्तं स्वकृतया शुचा ।
सञ्जीवयन् व्रजं गात्रैर्यथेन्द्रो वनमम्बुदैः ॥ ४४ ॥

कस्मात् कृष्ण इहायाति प्राप्तराज्यो हताहितः ।
विहृत्य नगरस्त्रीभिः प्रीतः सर्वसुहृद्वृतः ॥ ४५ ॥

किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ।
श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ॥ ४६ ॥

क उत्सहेत सन्त्यक्तुमुत्तमश्लोकसंविदम् ।
अनिच्छतोऽपि यस्य श्रीरङ्गान्न च्यवते क्वचित् ॥ ४८ ॥

हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ।
मग्नमुद्धर गोविन्द गोकुलं वृजिनार्णवात् ॥ ५२ ॥

Uddhava remains at Nandagokula for few months and then returns to Madhurā

Uddhava remained at Nandagokula for few months. He enjoyed the sight of river, the forest, the hill, and the trees full of flowers. He felt that these gopikas are very lucky as their mind is completely absorbed on Kṛṣṇa. These have the good luck of recounting great deeds of Kṛṣṇa which is a rare opportunity even for the sages. Uddhava returned to Madhura taking the permission of gopikas and informed Kṛṣṇa about the deep devotion of gopikas to him.

श्रीशुक उवाच—

उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः ।
कृष्णलीलाकथा गायन् रमयामास गोकुलम् ॥ ४६-२ ॥

सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितान् द्रुमान् ।
कृष्णं संस्मारयन् रेमे हरिदासो व्रजौकसाम् ॥ ४ ॥

उद्धव उवाच—

एताः परं तनुभृतां भुवि गोपवध्वो गोविन्द एवमखिलात्मनि रूढभावाः ।
वाञ्छन्ति यद् भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथा न यत्र ॥ ६ ॥

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥ ९ ॥

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ११ ॥

श्रीशुक उवाच—

अथ गोपीरनुज्ञाप्य यशोदां नन्दमेव च ।
गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ १२ ॥

कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम् ।
वासुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ १७ ॥

Kṛṣṇa visits Trivakrā's residence

Kṛṣṇa went the residence of Trivakra to fulfill her desire. On his arrival at Trivakras residence she received Kṛṣṇa and Uddhava with great respects. Kṛṣṇa gave her the pleasure of his company by staying at her residence for a few days. She wanted him to stay for many more days. Kṛṣṇa assured her that he will visit her place whenever she wants him to visit her residence.

Kṛṣṇa went to Akrūras house with Balarāma. Akrūra received them with great honor Kṛṣṇa asked him to go to Hastināpura and find our the welfare of Kunti and Pāndavas. And he also asked him to find out whether Dṛtarāṣtra treats them as he treats his own sons or he discriminates.

श्रीशुक उवाच—

अथ विज्ञाय भगवान् सर्वात्मा सर्वदर्शनः ।
सैरंध्र्याः कामतप्तायाः प्रियमिच्छन् गृहं ययौ ॥ ४७-१ ॥

गृहं तमायान्तमवेक्ष्य साऽऽसनात् सद्यः समुत्थाय हि जातसम्भ्रमात् ।
यथोपसङ्गम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ॥ ४ ॥

तस्यै कामवरं दत्वा मानयित्वा च मानदः ।
सहोद्धवेन सर्वेशः स्वधामागमदृद्धिमत् ॥ ११ ॥

अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः ।
किञ्चिच्चिकीर्षन् स प्रागादक्रूरप्रियकाम्यया ॥ १३ ॥

दिष्ट्या पापो हतः कंसः सानुगः पावितं कुलम् ।
भवद्भ्यामुद्धृतं कृच्छ्राद् दुरन्ताच्च समेधितम् ॥ १८ ॥

युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ।
भवद्भ्यां न विना किञ्चित् परमस्ति न चापरम् ॥ १९ ॥

इत्यर्थितः संस्तुतश्च भक्तेन भगवान् हरिः ।
अक्रूरं सस्मितं प्राह गीर्भिः सम्मोहयन्निव ॥ २९ ॥

स भवान् सुहृदां वै नः श्रेयः श्रेयश्चिकीर्षया ।
जिज्ञासार्थं पाण्डवानां गच्छ स्वगजसाह्वयम् ॥ ३३ ॥

पितर्युपरते बालाः सह मात्रा सुदुःखिताः ।
आनीताः स्वपुरं राज्ञा वसन्त इति शुश्रुम ॥ ३४ ॥

तेषु राजाम्बिकापुत्रो भ्रातृपुत्रेषु दीनधीः ।
समो न वर्तते नूनं दुष्पुत्रवशगोऽन्धदृक् ॥ ३५ ॥

गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ।
विज्ञाय तद् विधास्यामो यथा शं सुहृदां भवेत् ॥ ३६ ॥

Akrūra is deputed to Hastināpura

Akrūra went to Hastināpura. He met Dṛtarāṣtra, Bhīṣma, Vidura, Droṇa, Karṇa, Duryodhana and Pāndavas. He remained at Hastināpura for a few months in order to ascertain the attitude of Dṛtarāṣtra towards Pāndavas. Kunti and Vidura told him the evil deeds of Dṛtarāṣtra such as the attempt to give them the poison. Kunti told him I am suffering like a deer hunted by the wolf. She told him that Kṛṣṇa only can save her children from this difficult situation. Akrūra met Dhṛtarāṣtra that he should have equal treatment for Pāndavas and his sons. The kingdom and the wealth accumulated by adharma will perish. This advise of Akrūra did not make any influence on Dṛtarāṣtras heart. Dṛtarāṣtra said no body can change the destiny. The god has already taken the

incarnation of Kṛṣṇa in the Yadu family to lead the destiny. Akrūra returned to Madhura and informed the Dṛtarāṣtra's attitude towards the Pāndavas.

श्रीशुक उवाच—

स गत्वा हस्तिनपुरं पौरवेन्द्रयशोऽङ्कितम् ।
ददर्श तत्राम्बिकेयं सभीष्मं विदुरं पृथाम् ॥ ४८-१ ॥
सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमम् ।
कर्णं सुयोधनं द्रौणिं पाण्डवान् सुहृदोऽपरान् ॥ २ ॥
उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया ।
दुष्प्रज्ञस्याल्पसारस्य खलच्छन्दानुवर्तिनः ॥ ४ ॥
तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ।
प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥ ५ ॥
कृतं च धार्तराष्ट्रैर्यद् गरदानाद्यकौशलम् ।
आचख्यौ सर्वमेतस्मै पृथा विदुर एव च ॥ ६ ॥
अपि स्मरन्ति नः सौम्य पितरौ भ्रातरश्च मे ।
भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥
सपत्नमध्ये शोचन्तीं वृकाणां हरिणीमिव ।
सान्त्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥
नान्यत् तव पदाम्भोजात् पश्यामि शरणं नृणाम् ।
बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ॥ १२ ॥
नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ।
योगेश्वराय योगाय त्वामहं शरणं गता ॥ १३ ॥
इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् ।
प्रारुदद् दुःखिता राजन् भवतां प्रपितामही ॥ १४ ॥
यास्यन् राजानमभ्येत्य विषमं पुत्रलालसम् ।
प्रावदत् सुहृदां मध्ये बन्धुभिः सौहृदोदितम् ॥ १६ ॥
भो भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन ।
भ्रातर्युपरते पाण्डौ बन्धूनां सममास्थितः ॥ १७ ॥
धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रञ्जयन् ।
वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥ १८ ॥

अन्यथा त्वाचरँल्लोके गर्हितो यास्यसे तमः ।
तस्मात् समस्त्वं वर्तस्व पाण्डवेष्वात्मजेषु च ॥ १९ ॥
अधर्मोपचितं वित्तं हरन्त्यन्येऽल्पचेतसः ।
सम्भोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥

धृतराष्ट्र उवाच—

यथा वदति कल्याणीं वाचं दानपते भवान् ।
तथाऽनया न तृप्यामि मर्त्यः प्राप्य यथाऽमृतम् ॥ २६ ॥
तथापि सूनृता सौम्य हृदि न स्थीयते जले ।
पुत्रानुरागविषमे विद्युत् सौदामिनी यथा ॥ २७ ॥
ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान् ।
भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥ २८ ॥

श्रीशुक उवाच—

इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ।
सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ॥ ३० ॥
शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम् ।
पाण्डवान् प्रति कौरव्य यदर्थं प्रेषितः स्वयम् ॥ ३१ ॥

On reading this summary one may feel that there are more verses than the English narration. However, it is the total effect that is kept in mind while quoting these verses.

I take this opportunity to express my thanks to Sri N. Narasimha Rau, Chairman of Dvaita Vedanta Foundation for giving me this opportunity to edit Bhāgavata with commentaries.

I record my appreciation of the help given to me by Vidwan Krishnacharya Upadhyaya and Aluru Vamanacharya.

Mahāmahopādhyāya
Prof. K.T. Pandurangi
Hon. Director
Dvaita Vedanta Foundation

ಮುನ್ನುಡಿ

ದಶಮಸ್ಕಂಧ

ಶ್ರೀ ಗುರುಭ್ಯೋನಮಃ

ವರುಣಲೋಕದಿಂದ ನಂದನ ಆನಯನ

ಒಮ್ಮೆ ನಂದನು ಏಕಾದಶೀ ಉಪವಾಸ ಮಾಡಿ ಯಮುನೆಯಲ್ಲಿ ಸ್ನಾನಕ್ಕಾಗಿ ಬಂದನು. ಆಗ ಅವೇಳೆ. ಅಂದರೆ ರಾತ್ರಿ ಇನ್ನೂ ಉಳಿದಿತ್ತು. ಆಗ ವರುಣನ ದೂತರು ಅವನನ್ನು ಒಯ್ದರು. ಇದನ್ನು ಕೇಳಿ ಶ್ರೀ ಕೃಷ್ಣನು ವರುಣಲೋಕಕ್ಕೆ ಹೋದನು. ಅವನನ್ನು ನೋಡಿ ವರುಣನು ಪೂಜಿಸಿ, ವಿಜ್ಞಾಪಿಸಿಕೊಳ್ಳುವನು.

ಅದ್ಯ ಮೇ ವಿದೃತೋ ದೇಹಃ ಅದ್ಯಾರ್ಥೋಽಧಿಗತಃ ಪ್ರಭೋ ।
ಯತ್ಪಾದಭಾಜೋ ಭಗವನ್ನವಾಪುಃ ಪಾರಮಧ್ವನಃ ॥

ದೇವ! ನಿನ್ನ ದರ್ಶನದಿಂದ ನನ್ನ ದೇಹವು ಸಫಲವಾಯಿತು. ಮುಕ್ತಿಯು ನಿಶ್ಚಿತವಾಯಿತು. ಮೂಢನಾದ ನನ್ನ ಭೃತ್ಯನು ನಿನ್ನ ತಂದೆಯನ್ನು ತಂದನು. ಅವನ ಈ ಅಪರಾಧವನ್ನು ಕ್ಷಮಿಸು.

ಅಜಾನತಾ ಮಾಮಕೇನ ಮೂಢೇನಾಕಾರ್ಯವೇದಿನಾ
ಆನೀತೋಽಯಂ ತವ ಪಿತಾ ತತ್ಪ್ರಭೋ ಕ್ಷಂತುಮರ್ಹಸಿ ॥

ಈ ಮೇಲಿನ ಶ್ಲೋಕದಲ್ಲಿ ನಿನ್ನ ತಂದೆಯನ್ನು ಕರೆತಂದವನು ಅಜ್ಞಾನಿಯೆಂದು ತಿಳಿಸಲು ಅಜಾನತಾ, ಮೂಢೇನ, ಅಕಾರ್ಯವೇದಿನಾ ಎಂದು ಮತ್ತೆ ಮತ್ತೆ ಪರ್ಯಾಯ ಪದಗಳನ್ನೇ ಮೂರು ಹೇಳಿರುವನು.

ನಂದನನ್ನು ತಂದದ್ದು ನನಗೆ ತಿಳಿದಿಲ್ಲ

ಅಥವಾ 'ಹೇ ಅಜಾನತ' ಎಂದು ಕೃಷ್ಣನಿಗೆ ಸಂಬೋಧನೆ ಮಾಡಬಹುದು. ಅಜೇನ ಆನತ ಬ್ರಹ್ಮವಂದ್ಯನೇ, 'ಅಜಯಾ ನತ' ರಮಾನಮಸ್ಕೃತನೇ 'ಅ'=ಅಶಬ್ದವಾಚ್ಯನೇ, 'ಮಾಮಕೇನ'=ನನ್ನ ದೂತನಿಂದ, ಅವೇದಿನಾ ಮಯಾ=ತಿಳಿಯದಿರುವ ನನ್ನಿಂದ, ತವ ಪಿತಾ ಆನಿತಃ=ನಿನ್ನ ತಂದೆಯು ಕರೆತರಲ್ಪಟ್ಟನು. ಎಂದರೆ ನನಗೆ ತಿಳಿಯದೇ ಭೃತ್ಯರು ಕೆಲಸ ಮಾಡಿರುವರೆಂದರ್ಥ. ಆದರೂ 'ಯದಕಾರಿ ಸ್ವಶಿಷ್ಯದಾಸವರ್ಗಕೈಃ' ಎಂದಿರುವುದರಿಂದ ಶಿಷ್ಯರು ಮಾಡಿದ ಅಪರಾಧ ಫಲವನ್ನು ರಾಜನು ಅನುಭವಿಸಬೇಕಾದ್ದರಿಂದ ಕ್ಷಮಿಸಬೇಕು ಎಂದು ಪ್ರಾರ್ಥಿಸಿದನು.

ಗೋವಿಂದ ನೀಯತಾಮೇಷ ಪಿತಾ ತೇ ಮಾಮಕಾಹೃತಃ ।
ಮಮಾಪ್ಯನುಗ್ರಹಂ ಕೃಷ್ಣ ಕರ್ತುಮರ್ಹಸ್ಯಶೇಷದೃಕ್ ॥

ಹೇ ಗೋವಿಂದ ನಿನ್ನ ತಂದೆಯನ್ನು ಕರೆದೊಯ್ಯು. ಹಾಗೆ ನನಗೂ ಅನುಗ್ರಹಿಸು ತಂದೆ ಎಂದು ವರುಣನು ಬೇಡಿದನು.

ಲೋಕಪಿತೃವಾದ ನಿನಗ್ಯಾರು ಪಿತಾ?

ಇಲ್ಲಿ ಗೋವಿಂದನೆಂದು ಸಂಬೋಧಿಸಿದ್ದರಿಂದ ವರುಣನು ತನಗೆ ಇಂದ್ರನು ಏಕಾಂತದಲ್ಲಿ ಸ್ಥಾಪಿಸಿದ ಹೆಸರು ಗೊತ್ತು ಎಂದು ಸೂಚಿಸುವನು. ''ತೇ ಪಿತಾ'' ಎಂದದ್ದರಿಂದ ಲೋಕಪಿತನಾದ ನಿನಗೂ ಒಬ್ಬ ಪಿತನು

ಅಂಗಡಿಬೀದಿಯಲ್ಲಿ ಸಿಕ್ಕಿದನೇನು? ಎಂದು ಕುತೂಹಲದಿಂದ ಅವನಾರಿರಬಹುದೆಂದು ನೋಡಲು ನಂದನನ್ನು ಕರೆತಂದುದು ಅಂತರಂಗದಲ್ಲಿ ನನಗೂ ಸಮ್ಮತವೇ, ಎಂದು ಪುನಃಪುನಃ ಪಿತೃಶಬ್ದವನ್ನುಚ್ಚರಿಸಿ ವರುಣನು ನಂದನ ಕೃಷ್ಣಪಿತೃತ್ವವನ್ನು ನಗೆಯಾಡಿದನೆಂದು ಭಾವ. ನಂದನನ್ನು ಎದುರಿಗೆ ಕರೆತಂದು ನಿನ್ನ ತಂದೆ ''ಏಷಃ'' (ಎದುರಿಗಿರುವ) ಇವನೇ ಎಂದು ಹೇಳುತ್ತಾ ಇವನಿಗೆ ಯಾವ ಯಾವ ರೀತಿಯಲ್ಲೂ ಶಾರೀರಿಕವಾದ ತೊಂದರೆ ಮಾಡಿಲ್ಲವೆಂದು ಸೂಚಿಸುವನು.

ಶ್ರೀ ಕೃಷ್ಣನು ನಂದಗೋಪನನ್ನು ಹಿಂದಕ್ಕೆ ಕರೆತಂದನು. ನಂದನು ವರುಣನ ಮಹಾಭಾಗ್ಯವನ್ನೂ, ಅವನು ತೋರಿದ ಹರಿಭಕ್ತಿಯನ್ನೂ ತನ್ನ ಬಂಧುಗಳಿಗೆ ಹೇಳಿಬಿಟ್ಟನು. ಇದನ್ನು ಕೇಳಿದ ಗೋಪಾಲರಿಗೆ ಶ್ರೀಕೃಷ್ಣನಲ್ಲಿ ಅಧಿಕ ಭಕ್ತಿಯುಂಟಾಯಿತು. 'ಬ್ರಹ್ಮಾದಿಗಳಿಗೆ ಸ್ವಾಮಿಯಾದ ಶ್ರೀಕೃಷ್ಣನು ನಮ್ಮ ಇಷ್ಟವನ್ನು ಪೂರೈಸುವುದಾದರೆ ವೈಕುಂಠವನ್ನು ತೋರಿಸಲಿ' ಎಂದು ಗೋಪಾಲರು ಮನಸ್ಸಿನಲ್ಲಿ ಅಂದುಕೊಂಡರು.

ತೇತು ಬ್ರಹ್ಮಹ್ರದಂ ನೀತಾ ಮಗ್ನಾಃ ಕೃಷ್ಣಮಚಕ್ಷತ ।
ದದೃಶುರ್ಬ್ರಹ್ಮಣೋ ಲೋಕಂ ಯತ್ರಾಕ್ರೂರೋಽಧ್ಯಗಾತ್ಪುರಾ ।
ಸತ್ಯಂ ಜ್ಞಾನಮನಂತಂ ಯದ್ ಬ್ರಹ್ಮ ಜ್ಯೋತಿಃ ಸನಾತನಮ್ ।
ನಂದಾದಯಸ್ತು ತಂ ದೃಷ್ಟ್ವಾ ಪರಮಾನಂದ ನಿರ್ವೃತಾಃ ।
ಕೃಷ್ಣಂ ಚ ತತ್ರ ಛಂದೋಭಿಃ ಸ್ತೂಯಮಾನಂ ಸುವಿಸ್ಮಿತಾಃ ॥

ಶ್ರೀಕೃಷ್ಣನು ಯಮುನಾ ನದಿಯಲ್ಲಿರುವ ಬ್ರಹ್ಮಹ್ರದಕ್ಕೆ ಗೋಪಾಲರೆಲ್ಲರನ್ನೂ ಕರೆದುಕೊಂಡುಹೋಗಿ ನೀರಿನಲ್ಲಿ ಮುಳುಗಿಯೆಂದು ಹೇಳಿ ವೈಕುಂಠವನ್ನೂ, ಅಲ್ಲಿರುವ ತನ್ನನ್ನೂ ಅವರಿಗೆ ತೋರಿಸಿದನು. ಅವರೆಲ್ಲರೂ ನೋಡಿ ಆನಂದಭರಿತರಾದರು.

ಶರದೃತುವಿನ ರಾತ್ರಿಯಲ್ಲಿ ವೇಣುಗಾನ

ಕೃಷ್ಣನ ಅಂತರ್ಧಾನ

ಶ್ರೀಕೃಷ್ಣನು ಶರತ್ಕಾಲದ ಹುಣ್ಣಿಮೆಯ ದಿನ ಗೋಪಿಯರಿಗೆ ಅವರಿಷ್ಟವನ್ನು ಪೂರೈಸುವುದಾಗಿ ವಾಗ್ದಾನ ಮಾಡಿದ್ದನು.

ಭಗವಾನಪಿ ತಾಂ ರಾತ್ರಿಂ ಶಾರದೋತ್ಫುಲ್ಲಮಲ್ಲಿಕಾಂ ।
ವೀಕ್ಷ್ಯ ರಂತುಂ ಮನಶ್ಚಕ್ರೇ ಯೋಗಮಾಯಾಮುಪಾಶ್ರಿತಃ ॥

ಭಗವಂತ ಸ್ವರಮಣ

ಸ್ವರಮಣನೂ ಅಪ್ರಾಕೃತವಿಗ್ರಹನೂ ಆದ ಶ್ರೀಹರಿಯು ಗೋಪಿಯರೊಡನೆ ರಮಿಸಲು ಮನಸ್ಸು ಮಾಡಿದನು. ಇದು ಯುಕ್ತವಲ್ಲ. ಗೋಪಿಯರು ಶ್ರೀ ಹರಿಯೊಡನೆ ರಮಿಸಲು ಪಾತ್ರರಲ್ಲ. ಕಾರಣ ಇದು ಹೇಗೆ? ಎಂದು ಸಂದೇಹ ಬರುವುದು. ಈ ಸಂದೇಹ ನಿವಾರಣೆಗಾಗಿ ವ್ಯಾಸರು ಸ್ವಯಂ ಮನಃ ಚಕ್ರೇ ಎಂದಿರುವರು. ಇದಕ್ಕರ್ಥ ಇಷ್ಟೆ! ಭಗವಂತ ಎಲ್ಲ ಧರ್ಮಮರ್ಮ ಬಲ್ಲವ. ಕಾರಣ ಈ ಗೋಪಿಯರ ಅಂಗಸಂಗ ಕಾಮವಿಕಾರ ದಿಂದಲ್ಲ. ಆದರೆ ಅವರು ಮಾಡಿದ ತಪಸ್ಸಿನ ಫಲರೂಪ. ಇದಕ್ಕೆ ಸಂಭಾವಕವಾಗಿ ''ಯೋಗಮಾಯಾಂ ಉಪಾಶ್ರಿತಃ'' ಎಂದಿರುವರು. ಅಂದರೆ ಯೋಗವುಳ್ಳ ಮಾಯೆಯೆನಿಸಿದ ಲಕ್ಷ್ಮಿಯನ್ನು ಆಶ್ರಯಿಸಿದನು. ಅಂದರೆ ಎಲ್ಲ ಗೋಪಿಕೆಯರಲ್ಲಿ ಸನ್ನಿಹಿತಳಾದ ರಮೆಯೊಡನೆ ಕ್ರೀಡಿಸಿದ ಶ್ರೀಕೃಷ್ಣ. ಹೊರತು ಪರಸ್ತ್ರೀಯರ ಜೊತೆಗಲ್ಲ. ಕಾರಣ ಗೋಪಿಯರೊಡನೆ ಹೇಗೆ ಕ್ರೀಡಿಸಿದ ಎನ್ನುವ ಪ್ರಶ್ನೆಗೆ ಅವಕಾಶವಿಲ್ಲ.

ಭಗವಂತ ಸ್ವರಮಣ. ಆ ಮಹಾಲಕ್ಷ್ಮಿಯಲ್ಲಿಯೂ ಸಹ ತನ್ನದೇ ಆದ ಸ್ತ್ರೀರೂಪದಿಂದ ರಮಿಸುವನು, ಕೇವಲ ರಮೆಯೊಡನೆ ಅಲ್ಲ. ಇದನ್ನೇ ''ರಮಾಯಾ ರತಿಪಾತ್ರತ್ವಂ ಸ್ವೇನೈವ ಸ್ತ್ರಿಯಾಽಽತ್ಮನಾ'' ಎನ್ನುತ್ತದೆ ಪ್ರಮಾಣ.

ಅದನ್ನು ನೆರವೇರಿಸಲು ಶ್ರೀಕೃಷ್ಣನು ಆ ರಾತ್ರಿ ವನಕ್ಕೆ ಬಂದು ಕೊಳಲೂದಿದನು.

ನಿಶಮ್ಯ ಗೀತಂ ತದನಂಗವರ್ಧನಂ ವ್ರಜಸ್ತ್ರಿಯಃ ಕೃಷ್ಣನಿಷಕ್ತಮಾನಸಾಃ ।
ದುಹಂತ್ಯೋಽಭಿಯಯುಃ ಕಾಶ್ಚಿದ್ ದೋಹಂ ಹಿತ್ವಾ ಸಮುತ್ಸುಕಾಃ ।

ಅದನ್ನು ಕೇಳಿದ ಗೋಪಿಯರು ಮಾಡುತ್ತಿದ್ದ ಮನೆಯ ಕೆಲಸವನ್ನು ಅಷ್ಟಕ್ಕೆ ಬಿಟ್ಟು, ಬಂಧುಜನರು ಅವರನ್ನು ತಡೆದರೂ ನಿರಾಕರಿಸಿ, ಶ್ರೀಕೃಷ್ಣನ ಬಳಿಗೆ ಬಂದರು. ಯಾವ ಗೋಪಿಯರನ್ನು ಕೋಣೆಯಲ್ಲಿ ಕೂಡಿ ಬಾಗಿಲು ಮುಚ್ಚಿದರೋ ಅಂತಹವರು ತಮ್ಮ ಹೃದಯದಲ್ಲಿಯೇ ಇರುವ ಶ್ರೀಕೃಷ್ಣನನ್ನು ಧ್ಯಾನಿಸಿದರು. ಹಾಗೆ ಧ್ಯಾನ ಮಾಡಿ ದೇಹವನ್ನು ಬಿಟ್ಟು ಶ್ರೀಹರಿಯನ್ನು ಹೊಂದಿದರು.

ಕೃಷ್ಣಂ ವಿದುಃ ಪರಂ ಕಾಂತಂ ನ ತು ಬ್ರಹ್ಮತಯಾ ಮುನೇ ।
ಗುಣಪ್ರವಾಹೋಪರಮಸ್ತಾಸಾಂ ಗುಣಧಿಯಾಂ ಕಥಮ್ ॥

ಮುನಿಗಳೇ! ಆ ಗೋಪಿಯರು ಕೃಷ್ಣನನ್ನು ತಮ್ಮ ಪತಿಗಿಂತ ಮಾತ್ರ ಅಧಿಕನೆಂದು ತಿಳಿದಿದ್ದರೇ ಹೊರತು ಪರಿಪಕ್ವವಾದ ಬ್ರಹ್ಮಜ್ಞಾನವಿರಲಿಲ್ಲ. ನಿವೃತ್ತಿಮಾರ್ಗದಿಂದಷ್ಟೇ ಸಂಸಾರ ನಿವೃತ್ತಿ? ಪ್ರವೃತ್ತಿಮಾರ್ಗದಲ್ಲಿಯೇ ಇದ್ದ ಈ ಗೋಪಿಯರಿಗೆ ಸಂಸಾರದ ನಿವೃತ್ತಿ ಹೇಗಾಯಿತು ಎಂಬುದನ್ನು ತಿಳಿಸಬೇಕು ಎಂದು ಪರೀಕ್ಷಿತನು ಪ್ರಶ್ನಿಸಿದನು.

ಅದಕ್ಕೆ ಶುಕರು ಹೀಗೆ ಉತ್ತರಿಸಿದರು.

ಗೋಪಿಕಾಸ್ತ್ರೀಯರು ಕಾಮಸ್ವರೂಪರು—

ಕಾಮಂ ಕ್ರೋಧಂ ಭಯಂ ಮೋಹಂ ಮೈತ್ರೀಂ ಸೌಹೃದಮೇವ ಚ ।
ನಿತ್ಯಂ ಹರೌ ವಿದಧತೋ ಯಾಂತಿ ತನ್ಮಯತಾಂ ಹಿ ತೇ
ನ ಚೈವಂ ವಿಸ್ಮಯಃ ಕಾರ್ಯೋ ಭವತಾ ಭಗವತ್ಯಜೇ ।
ಯೋಗೇಶ್ವರೇಶ್ವರೇ ಕೃಷ್ಣೇ ಯತ ಏತದ್ವಿಮುಚ್ಯತೇ ॥

ಶಿಶುಪಾಲನೆಂದು ಕರೆಯಲ್ಪಡುವ ಜಯನೆಂಬ ಸುಜೀವನು ಅಸುರಾವಿಷ್ಟನಾದರೂ ಮುಕ್ತಿಯನ್ನು ಹೊಂದಿದನು. ಅವನ ಮುಕ್ತಿಗೆ ಕಾರಣವಾದ ಪಕ್ವಭಕ್ತಿಯು ಅವನ ಸ್ವರೂಪವಾಗಿತ್ತು. ಅಂದಮೇಲೆ ಗೋಪಿಯರಿಗೆ ಅಸುರಾವೇಶವಿರಲಿಲ್ಲ. ಅವರ ಸ್ವರೂಪವು ಹರಿಭಕ್ತಿಮಯ ವಾಗಿದ್ದಿತು. ಇದರ ಮೇಲೆ ಅವರು ಜ್ಞಾನಸಹಿತವಾದ ಕಾಮವುಳ್ಳವರಾದುದರಿಂದ ಅವರಿಗೆ ಮುಕ್ತಿಯಾಗಲು ಇನ್ನಾವುದು ಬೇಕು? ಆದ್ದರಿಂದಲೇ ಆ ಗೋಪಿಯರು ದೇಹವನ್ನು ಬಿಟ್ಟು ಸ್ವರ್ಗಕ್ಕೆ ಹೋಗಿ ಕ್ಲುಪ್ತಕಾಲದಲ್ಲಿ ಮುಕ್ತಿಯನ್ನು ಹೊಂದಿದರು. ಇದರಲ್ಲಿ ಆಶ್ಚರ್ಯವೇನೂ ಇಲ್ಲ. ಅವರಲ್ಲಿದ್ದ ಕಾಮವು ಇತರರಲ್ಲಿರುವ ದೋಷಯುಕ್ತ ಕಾಮದಂತೆ ಅಲ್ಲ. ಅದಕ್ಕೆ ಇಚ್ಛೆ ಎಂದು ಅರ್ಥ. ಭಕ್ತಿಯಿಂದಲೇ ಮೋಕ್ಷವಷ್ಟೆ? ದ್ವೇಷಿಗಳಿಗೆ ಭಕ್ತಿಯು ಸುತರಾಂ ಇಲ್ಲ. ಆದ್ದರಿಂದ ಅವರಿಗೆ ಎಂದಿಗೂ ಮೋಕ್ಷವಿಲ್ಲ. ಗೋಪಿಯರಾದರೋ ಇಚ್ಛೆಯೆಂಬ ಕಾಮವುಳ್ಳ ಭಕ್ತಿಸ್ವರೂಪರಾದ್ದರಿಂದ ಅವರಿಗೆ ಮುಕ್ತಿಯು ಆಯಿತು. ಕರುಣಾಳುವಾದ ಶ್ರೀಹರಿಯು ಭಕ್ತರನ್ನು ಅನುಗ್ರಹಿಸುವ ವಿಷಯದಲ್ಲಿ ಆಶ್ಚರ್ಯ ಪಡಲೇಬೇಡ ಎಂದರು. ಈ ಎಲ್ಲ ಅಭಿಪ್ರಾಯವನ್ನು ಆಚಾರ್ಯರು ತಾತ್ಪರ್ಯದಲ್ಲಿ ಸ್ಪಷ್ಟಪಡಿಸಿರುವರು.

ಕೃಷ್ಣನು ತನ್ನಲ್ಲಿ ಗೋಪಿಯರಿಗಿರುವ ಅಸಾಧಾರಣ ಭಕ್ತಿಯನ್ನು ತೋರಿಸಬೇಕೆಂದು ಮಾತಾಡುತ್ತಾನೆ.

ಸ್ವಾಗತಂ ವೋ ಮಹಾಭಾಗಾಃ ಪ್ರಿಯಂ ಕಿಂ ಕರವಾಣಿ ವಃ ।
ವ್ರಜಸ್ಯಾನಾಮಯಂ ಕಚ್ಚಿದ್ ಬ್ರೂತಾಗಮನಕಾರಣಮ್ ॥

ಭಾಗ್ಯವತಿಯರೇ! ನಿಮಗೆ ಸುಖಾಗಮನ. ನಿಮ್ಮ ಅಭೀಷ್ಟವನ್ನು ಪೂರೈಸುವುದು ನನ್ನ ಕರ್ತವ್ಯ. ಗೋಕುಲ ದಲ್ಲಿ ಎಲ್ಲರೂ ಕ್ಷೇಮವಷ್ಟೆ?

ರಜನ್ಯೇಷಾ ಘೋರರೂಪಾ ಘೋರಸತ್ವನಿಷೇವಿತಾ ।
ಪ್ರತಿಯಾತ ವ್ರಜಂ ನೇಹ ಸ್ಥೇಯಂ ಸ್ತ್ರೀಭಿಃ ಸುಮಧ್ಯಮಾಃ ॥

ನೀವು ಈ ರಾತ್ರಿಯ ವೇಳೆಯಲ್ಲಿ ಇಲ್ಲಿಗೆ ಬರಲು ಕಾರಣವೇನು? ಇದು ಪಿಶಾಚಿಗಳು ಸಂಚರಿಸುವ ಕಾಲ. ಆದ್ದರಿಂದ ನೀವೆಲ್ಲ ಗೋಕುಲಕ್ಕೆ ಹಿಂತಿರುಗಿ ಎಂದನು ಶ್ರೀಕೃಷ್ಣ. ಅದಕ್ಕೆ ಗೋಪಿಯರು, ಆಗಲಿ ನಮಗೇನು! ಎಂದಾಗ ಪ್ರತಿಯಾಗಿ ''ಸುಮಧ್ಯಮಾಃ'' ಎಂದುತ್ತರಿಸಿದನು.

ನೀವು ಮಧ್ಯಮರು ಸ್ವತಂತ್ರರಲ್ಲ–

''ಸುಮಧ್ಯಮಾಃ'' ಹೀಗೆಂದರೇನು? ನೀವು ಪತಿಪುತ್ರರ ಮಾತನ್ನು ಕೇಳಿಕೊಂಡಿರುವವರು. ನೀವು ಸ್ವತಂತ್ರರಲ್ಲ. ''ಪ್ರೋಕ್ತಕಾರೀತು ಮಧ್ಯಮಃ'' ಹೇಳಿದ್ದನ್ನು ಮಾಡುವವರು ಮಧ್ಯಮರೆನ್ನುತ್ತದೆ ನವಮಸ್ಕಂಧ. ಕಾರಣ ನೀವು ಮನೆಗೆ ಹೋಗಿ. ಅಥವಾ ನೀವು (ಸುಮಧ್ಯ=ಕಟಿ) ಭಾರೀ ಸೌಂದರ್ಯವುಳ್ಳವರು. ದುಷ್ಟರ ದೃಷ್ಟಿ ನಿಮ್ಮ ಮೇಲೆ ಬಿದ್ದೀತು? ಕಾರಣ ಮನೆಗೆ ಹೋಗಿರಿ.

ಕಾಮಬಾಣಪೀಡಿತರು–

ಅಥವಾ ''ಸುಮಧಿ'' ಎಂದರೆ ಕಾಮ. ಸುಮಗಳು (ಹೂಗಳು) ಇವನಲ್ಲಿರುತ್ತವೆ. ಇವನನ್ನು ''ಸುಮಬಾಣ'' ಎನ್ನುವರು. ಈ ''ಸುಮಧಿ''ಯಿಂದ ಕಾಮನಿಂದ ಪೀಡಿತರು. ಅರ್ಥಾತ್ ಕಾಮಜ್ವರ (ಆಮ) ಪೀಡಿತರು. ಹೀಗಾಗಿ ಮನೆಗೆ ಹೋಗಿ.

ಸುಮ ನೋಡಲು ಬಂದವರು–

ಅಥವಾ ಕೃಷ್ಣನು ಗೋಪಿಯರೇ ಮನೆಗೆ ಹೋಗಿ ಎಂದು ಹೇಳಿದಾಗ ಗೋಪಿಯರು ಆಡಿದ ಮಾತು, ''ಸುಮಧ್ಯಮಾಃ'' ಎನ್ನುವುದು. ಕೃಷ್ಣ! ನಾವು ಸುಮಧೀ (ಹೂವನ್ನು ನೋಡವ ಬುದ್ಧಿ)ಯಿಂದ (ಅಮಾಃ) ಬಂದವರು. ನಿನಗೇನು? ಎಂದು ಉತ್ತರಿಸುವರು.

ಕಾಡು ತಿರುಗಲು ಬಂದೆವು–

ಅಥವಾ ''ಸುಮಧಿ'' ವನದಲ್ಲಿ (ಸುಮಾನಿ ಧೀಯಂತೆ ಅಸ್ಮಿನ್) (ಅಮಾಃ) ತಿರುಗಾಡುವವರು ನಾವು. ನಿನಗೇನು ತೊಂದರೆ ಎನ್ನುವರು.

ನಿಮ್ಮನ್ನು ಕಾಣದೆ ನಿಮ್ಮವರು ಭಯ ಪಡುತ್ತಿರುವರು. ಈ ಸನ್ನಿವೇಶವನ್ನು ನೋಡಿ ಆನಂದ ಪಡಬೇಕೆಂದು ಬಂದಿರುವಿರೇನು? ನೋಡಿದ್ದಾಯಿತಷ್ಟೆ? ಹಿಂತಿರುಗಿ ಹೋಗಿಬಿಡಿ. ನನ್ನಲ್ಲಿರುವ ಭಕ್ತಿಯಿಂದ ಬಂದಿರು ವಿರೇನು? ಹಾಗಾದರೆ! ನನಗೆ ಪ್ರೀತಿಯಾಗುವ ಕೆಲಸ ಮಾಡಿರಿ.

ಭರ್ತುಃ ಶುಶ್ರೂಷಣಂ ಸ್ತ್ರೀಣಾಂ ಪರೋ ಧರ್ಮೋ ಹ್ಯಮಾಯಯಾ ।
ತದ್ಬಂಧೂನಾಂ ಚ ಕಲ್ಯಾಣಂ ಪ್ರಜಾನಾಂ ಚಾನುಪೋಷಣಮ್ ॥

ಅದೇನೆಂದರೆ ನಿಮ್ಮ ನಿಮ್ಮ ಪತಿಗಳಲ್ಲಿಯೂ ನಾನಿರುವೆನಾದುದರಿಂದ ಅವರನ್ನು ಸೇವಿಸಿರಿ. ಶ್ರೇಯಸ್ಸಾಗುವುದು.

ಪತಿಸೇವೆ ಉತ್ತಮ ಧರ್ಮ, ಬಂಧುಸೇವೆ ಮಂಗಳಕರ–

ವೇದವ್ಯಾಸರು ಆಡಿದ ಮಾತುಗಳು ಗಮನಾರ್ಹವಾದವುಗಳು. 'ಸ್ತ್ರೀಯರಿಗೆ ಪತಿಸೇವೆ ಪರಮಧರ್ಮ. ಪತಿಯ ಬಂಧುಗಳ ಸೇವೆ 'ಕಲ್ಯಾಣ' 'ಮಂಗಳಕರ' ಎನ್ನುತ್ತಾರೆ. ಅತಿ ಎಚ್ಚರದ ಮಾತುಗಳು. ಹೀಗೆ ಕಲ್ಯಾಣವೆನ್ನುವ ಪದವಿಡದಿದ್ದರೆ ಪತಿಸೇವೆಯಂತೆ ಬಂಧುಸೇವೆ ಪ್ರಜಾಪಾಲನವೂ ಸಹ ಪರಮಧರ್ಮವೆಂದೇ ನಮಗೆ ಭ್ರಾಂತಿ ಬರುತ್ತಿತ್ತು. ಆ ರೀತಿಯಾಗಿ ಭ್ರಾಂತಿ ಬರದಿರಲೆಂದು ಕಲ್ಯಾಣಪದ ಪ್ರಯೋಗಿಸಿದರು. ಪತಿಸೇವೆ ಉತ್ತಮ ಧರ್ಮ. ಬಂಧುಸೇವೆ ಮಂಗಳಕರ ಧರ್ಮ. ಕಾರಣ 'ಪರೋಧರ್ಮಃ' ಎಂದಾಗಲಿ 'ಕಲ್ಯಾಣಂ' ಎಂದಾಗಲಿ ಯಾವುದಾದರೊಂದು ಪದ ಸಾಕು, ಎರಡು ಪದವೇಕೆ? ಎನ್ನುವ ಪ್ರಶ್ನೆಗೂ ಅವಕಾಶವಿಲ್ಲ.

ಹಾಗಲ್ಲ, ''ನೀನೇ ನಮಗೆ ಮುಖ್ಯಪತಿ. ನಿನ್ನ ಸೇವೆಯೇ ಪತಿಯ ಸೇವೆಗಿಂತ ಮುಖ್ಯ'' ಎನ್ನುವಿರೇನು? ನಿಜ.

ಶ್ರವಣಾದ್ದರ್ಶನಾದ್ ಧ್ಯಾನಾನ್ಮಯಿ ಭಾವೋಽನುಕೀರ್ತನಾತ್ ।
ನ ತಥಾ ಸನ್ನಿಕರ್ಷೇಣ ಪ್ರತಿಯಾಚ ತತೋಗೃಹಾನ್ ॥

ಹಾಗಿದ್ದರೂ ನನ್ನ ಕಥಾಶ್ರವಣ, ದರ್ಶನ, ರೂಪಚಿಂತನೆ ಮತ್ತು ನನ್ನ ನಾಮಸಂಕೀರ್ತನೆ ಇವುಗಳಿಂದ ನನ್ನಲ್ಲಿ ಭಕ್ತಿಯು ವೃದ್ಧಿಯಾಗುವಂತೆ ನನ್ನ ಅಂಗಸಂಗದಿಂದ ಭಕ್ತಿಯು ವೃದ್ಧಿಯಾಗುವುದಿಲ್ಲ. ಮನೆಗೆ ಹೋಗಿ ಅಲ್ಲಿದ್ದುಕೊಂಡೇ ಭಕ್ತಿಯಿಂದ ಶ್ರವಣಾದಿಗಳನ್ನು ಮಾಡಬಹುದು.

ಕೃಷ್ಣನು ಹೀಗೇಕೆ ಮಾತನಾಡಿದನು?

ಗೋಪಿಯರು ಅಪರೋಕ್ಷಜ್ಞಾನಿಗಳಾದ ಅಪ್ಸರೆಯರ ಅವತಾರ, ಅವರಿಗೆ ಪರಪುರಷನನ್ನು ಹೊಂದ-ಬೇಕೆಂಬ ಕಾಮ ಅಂದರೆ ಇಚ್ಛೆಯೇ ಇಲ್ಲ. ಆದರೆ ಪರಮಪುರುಷನಾದ ಶ್ರೀಹರಿಯನ್ನು ಮಾತ್ರವೇ ಹೊಂದ ಬೇಕೆಂಬ ಕಾಮವಿರುವುದು. ಅದು ಭೋಗಿಸಿಯೇ ಕಳೆದುಕೊಳ್ಳಬೇಕಾದ ಪ್ರಾರಬ್ಧಕರ್ಮವಾಗಿದೆ. ಆದ್ದರಿಂದಲೇ 'ಉಪನಯನಾತ್ಪೂರ್ವದಲ್ಲಿಯೇ ಶ್ರೀಕೃಷ್ಣನ ಅಂಗಸಂಗವನ್ನು ಹೊಂದಬೇಕೆಂದು ಬ್ರಹ್ಮದೇವ ರಿಂದ ವರವನ್ನು ಪಡೆದಿದ್ದರು. ಅದನ್ನು ಪೂರ್ಣಮಾಡೆಂದು ಗೋಪಿಯರು ಬಾಯಿಂದ ಹೇಳಲಿ ಎಂದೇ ಶ್ರೀಕೃಷ್ಣನು ಹೀಗೆ ಮಾತನಾಡಿದನು.

ಗೋಪಿಯರು ಕೃಷ್ಣನ ಮಾತನ್ನು ಕೇಳಿ ಅತ್ತುಬಿಟ್ಟರು.

ಮೈವಂ ವಿಭೋಽರ್ಹತಿ ಭವಾನ್ ಗದಿತುಂ ನೃಶಂಸಂ
ಸಂತ್ಯಜ್ಯ ಸರ್ವವಿಷಯಾಂಸ್ತವ ಪಾದಮೂಲಮ್ ।
ಭಕ್ತ್ಯಾ ಭಜೇಮ ದುರವಗ್ರಹ ಮಾತ್ಯಜಾಸ್ಮಾನ್
ದೇವೋ ಯಥಾದಿಪುರುಷೋ ಭಜತೋ ಮುಮುಕ್ಷೂನ್ ॥

ವಿಭೋ! ಮನೆಮಂದಿಯನ್ನು ಬಿಟ್ಟು ನಿನ್ನ ಪಾದಸೇವೆಗೆ ಬಂದ ನಮ್ಮ ಕೊರಳನ್ನು ಕತ್ತರಿಸುವಂತಹ ಮಾತಾಡಬೇಡ. ಪತಿಸೇವೆಯೇ ಮುಖ್ಯಧರ್ಮವೆಂದು ಹೇಳಿದಿ ನಿಜ. ನಮ್ಮ ಪಿತ್ರಾದಿಗಳಿಗೆ ನೀನೇ ಜಾಮಾತೃ ಸ್ಥಾನೀಯನು ನಮಗೆ ನೀನೇ ಪತಿಯು. ನಿನ್ನ ಸೇವೆಗೆ ಬಂದಿರುವೆವು. ನೀನೇ ಸಾರಜ್ಞರಿಗೆ ಅನಿಮಿತ್ತ ಬಂಧುವು. ಹೀಗೆ ನೀನೇ ನಮಗೆ ಮುಖ್ಯಪತಿಯಾಗಿರುವಾಗ ಅಪ್ರಿಯರೂ, ಪೀಡೆಯನ್ನುಂಟುಮಾಡುವವರೂ ಆದ ಪತಿಪುತ್ರಾದಿಗಳಿಂದ ಪ್ರಯೋಜನವೇನು? ನಮ್ಮ ಆಶಾಭಂಗ ಮಾಡಬೇಡ. ಮನೆಗೆ ಹೋಗಿರೆಂದು ನೀನು ಹೇಳಿದೆ. ನಮ್ಮ ಚಿತ್ತವನ್ನು ನೀನು ಸೆಳೆದುಕೊಂಡಿರುವೆ. ಅದು ನಿನ್ನನ್ನು ಹೊರತು ಮನೆಮಂದಿ ಯಾವುದನ್ನೂ ಸ್ಮರಿಸಲಾರದು. ಕೈಕಾಲುಗಳೂ ನಿನ್ನ ಸಾನಿಧ್ಯವನ್ನು ಬಿಟ್ಟು ಅನ್ಯತ್ರ ಚಲಿಸಲಾರವು. ನಮ್ಮ ಕಾಮಾಗ್ನಿಯನ್ನು ನಿನ್ನ ಆಧಾರಮೃತಸೇವನೆಯಿಂದ ನಂದಿಸು. ಇಲ್ಲವಾದರೆ ವಿರಹಾಗ್ನಿಯಿಂದ ನಮ್ಮ ದೇಹವು ದಗ್ಧವಾಗಿ ಹೋಗು-ವುದು. ಲಕ್ಷ್ಮೀದೇವಿಗೆ ಉತ್ಸವಪ್ರದವಾದ ನಿನ್ನ ಅಂಗಾಲನ್ನು ನಾವು ಸ್ಪರ್ಶ ಮಾಡಿದಾಗಿನಿಂದ ಅನ್ಯರ ಇದಿರಿಗೆ ನಿಲ್ಲಲು ಅಶಕ್ತರಾಗಿದ್ದೇವೆ.

ಶ್ರೀರ್ಯತ್ಪದಾಂಬುಜರಜಶ್ಚಕಮೇ ತುಲಸ್ಯಾಃ
ಲಬ್ಧ್ವಾಽಪಿ ವಕ್ಷಸಿ ಪದಂ ಕಿಲ ಭೃತ್ಯಜುಷ್ಟಮ್ ।
ಯಸ್ಯಾಃ ಸ್ವವೀಕ್ಷಣಕೃತೇಽನ್ಯಸುರಪ್ರಯಾಸಃ
ತದ್ವದ್ವಯಂ ಚ ತವ ಪಾದರಜಃ ಪ್ರಪನ್ನಾಃ ॥

ಲಕ್ಷ್ಮಿಯು ನಿನ್ನ ವಕ್ಷಸ್ಥಳದಲ್ಲಿ ಸ್ಥಾನವನ್ನು ಪಡೆದಿದ್ದರೂ, ನಿನ್ನ ಪಾದರೇಣುವನ್ನು ಅಪೇಕ್ಷಿಸುವಳು. ಇಂತಹ ನಿನ್ನ ಪಾದವನ್ನು ಹೊಂದಿರುವ ನೀನು ನಮ್ಮಲ್ಲಿ ಪ್ರಸನ್ನನಾಗು. ನಿನ್ನ ಆಕಾರವನ್ನು ನೋಡಿ, ನಿನ್ನ ದಾಸಿಯರಾಗಿ, ನಿನ್ನನ್ನೇ ಕಾಮಿಸುತ್ತಿರುವೆವು. ನಿನ್ನ ಮುರುಳಿಯ ಗಾನವನ್ನು ಕೇಳಿ ಮೋಹಿತರಾಗಿರುವ ಯಾವ (ನಮ್ಮಂತಹ) ಸ್ತ್ರೀಯು ತಾನೇ ಸನ್ಮಾರ್ಗವನ್ನು ಮೀರದಿರುವಳು? ಹೀಗಿರುವಾಗ ನಿನ್ನ ರೂಪವನ್ನು ಸಾಕ್ಷಾತ್ತಾಗಿ ನೋಡುತ್ತಿರುವ ನಾವು ಮೋಹಿತರಾಗಿ ನಿನ್ನನ್ನು ಬೇಡುವುದರಲ್ಲಿ ಆಶ್ಚರ್ಯವೇನೂ ಇಲ್ಲ. ನಮ್ಮ ತಲೆಯ ಮೇಲೆ ನಿನ್ನ ಹಸ್ತವನ್ನಿಡು, ಎಂದು ಗೋಪಿಯರು ಗೋಗರೆದರು.

ಇತಿ ವಿಕ್ಲವಿತಂ ತಾಸಾಂ ಶ್ರುತ್ವಾ ಯೋಗೇಶ್ವರೇಶ್ವರಃ ।
ಪ್ರಹಸ್ಯ ಸದಯಂ ಗೋಪೀರಾತ್ಮಾರಾಮೋ ನ್ಯರೀರಮತ್ ॥

ಯೋಗೇಶ್ವರನಾದ ಶ್ರೀಕೃಷ್ಣನು ಗೋಪೀಯರು ಕಾಮಪರವಶರಾಗಿ ನುಡಿದ ಮಾತುಗಳನ್ನು ಕೇಳಿ, ಸ್ವರಮಣನಾದರೂ ಅನುಗ್ರಹದಿಂದ ಗೋಪಸ್ತ್ರೀಯರನ್ನು ಸುಖ ಪಡಿಸಿದನು.

ಯೋಗೇಶ್ವರನ ಪರಮೈಶ್ವರ್ಯ

''ಯೋಗೇಶ್ವರೇಶ್ವರಃ'' ಯೋಗೇಶ್ವರರಾದ ಬ್ರಹ್ಮಾದಿಗಳಿಗೂ ಈಶ್ವರನು. ಈ ವಿಶೇಷಣದಿಂದ ತಾನು ಒಬ್ಬನೇ ಕಾಮಿನಿಯರನೇಕರೊಡನೆ ಹೇಗೆ ರಮಿಸಿದನು? ಮುಂದೆ ಅವರ ಪತಿಗಳು ಈ ಪತ್ನಿಯರನ್ನು ಹೇಗೆ ಸ್ವೀಕರಿಸಿದರು? ಬೇರೆಲ್ಲಿಯೂ ಕಾಣಸಿಗದ ಆತ್ಮಾರಾಮತೆ ಇವನಿಗೆಲ್ಲಿಯದು? ಈ ಎಲ್ಲ ಶಂಕೆಗೂ ಉತ್ತರ ಬರುವದು ಅಚಿಂತ್ಯಶಕ್ತಿಯಿಂದಾಗಲಿ ಅನೇಕ ದೇಹಗಳನ್ನು ತೆಗೆದುಕೊಂಡಾಗಲಿ, ರಮಿಸಿದನು. ಅವರ ಪತಿಗಳಿಗೆ ತಮ್ಮ ಪತ್ನಿಯರು ತಮ್ಮ ಪಕ್ಕದಲ್ಲಿಯೇ ಇರುವರೆಂಬ ಜ್ಞಾನ ತಂದುಕೊಟ್ಟನು. ಕಾರಣ ಅವರೂ ಕೋಪಿಸಲು ಕಾರಣವಿಲ್ಲ.

ಮತ್ತು ಆತ್ಮಾರಾಮಃ ಎಂದದ್ದರಿಂದ ಭಗವಂತನು ಸಾಕ್ಷಾತ್ ಗೋಪಿಯರಲ್ಲಿ ರಮಿಸಲಿಲ್ಲ, ಅವರಲ್ಲಿರುವ ರಮಾರೂಪಾಂತರ್ಯಾಮಿ ತನ್ನ ಸ್ತ್ರೀರೂಪಗಳಲ್ಲಿಯೇ ರಮಿಸಿದನು, ಎಂದು ಸೂಚಿಸಿದ್ದರಿಂದ ಅಪ್ರಾಕೃತ ವಿಗ್ರಹ ನಾದ ಹರಿಯು ಪ್ರಾಕೃತದೇಹವುಳ್ಳ ಗೋಪಿಯರ ಸಂಗ ಹೇಗೆ ಮಾಡಿದೆನೆಂಬ ಶಂಕೆಗೆ ಅವಕಾಶವಿಲ್ಲ.

ತಾಸಾಂ ತತ್ಸೌಭಗಮದಂ ವೀಕ್ಷ್ಯಮಾನಂ ಚ ಕೇಶವಃ ।
ಪ್ರಶಮಾಯ ಪ್ರಸಾದಾಯ ತತ್ರೈವಾಂತರಧೀಯತ ॥

ಶ್ರೀಕೃಷ್ಣನು ತಮ್ಮಲ್ಲಿ ತೋರಿದ ಗೌರವ ಪ್ರೇಮ, ಸಲಿಗೆಗಳಿಂದ ಗೋಪಿಯರಿಗೆ ತಮಗಿಂತ ಉತ್ತಮರು ಯಾರೂ ಇಲ್ಲವೆಂಬ ಗರ್ವವು ಬಂದಿತು. ಅದನ್ನು ಹೋಗಲಾಡಿಸಲು ಶ್ರೀಕೃಷ್ಣನು ಕಣ್ಮರೆಯಾದನು.

ಗೋಪಿಯರ ಪಶ್ಚಾತ್ತಾಪ - ಕೃಷ್ಣಾನ್ವೇಷಣ

ಗೋಪಿಯರು ಕೃಷ್ಣನನ್ನು ಕಾಣದೆ ಪರಿತಪಿಸಿದರು. ಆ ವನದಲ್ಲಿ ಅವನನ್ನು ಹುಡುಕುತ್ತಾ ಹೊರಟರು.

ಚೂತಪ್ರಿಯಾಲಪನಸಾಸನಕೋವಿದಾರ
ಜಂಬ್ವರ್ಕಬಿಲ್ವಬಕುಲಾಮ್ರಕದಂಬನೀಪಾಃ ।
ಯೇಽನ್ಯೇ ಪರಾರ್ಥಭವಿನೋ ಯಮುನೋಪಕೂಲಾಃ
ಶಂಸಂತು ಕೃಷ್ಣಪದವೀಂ ರಹಿತಾತ್ಮನಾಂ ನಃ ॥

ಕಂಡಕಂಡ ಅರಳಿ, ಆಲ, ಮುಂತಾದ ಮರಗಳನ್ನೂ, ಜಿಂಕೆಗಳನ್ನೂ ಕುರಿತು 'ಕೃಷ್ಣನ ಕಂಡೀರಾ' ಎಂದು ಕೇಳುತ್ತಾ ಕಾಡಿನಲ್ಲಿ ಅಲೆದರು. ಒಂದು ಕಡೆ ಕೃಷ್ಣ ಮತ್ತು ಒಬ್ಬ ಗೋಪಿಯ ಹೆಜ್ಜೆಗಳ ಗುರುತು ಕಾಣಿಸಿದುವು.

ಇಮಾನ್ಯಧಿಕಮಗ್ನಾನಿ ಪದಾನಿ ವಹತೋ ವಧೂಂ ।
ಗೋಪ್ಯಃ ಪಶ್ಯತ ಕೃಷ್ಣಸ್ಯ ಭಾರಾ ಕ್ರಾಂತಾನಿ ಕಾಮಿನಃ ॥

ಹೇ ಗೋಪಿಯರೇ! ಈ ಕೃಷ್ಣನ ಹೆಜ್ಜೆಗಳನ್ನು ನೋಡಿ. ಗೋಪಿಯನ್ನು ತನ್ನ ಹೆಗಲಮೇಲೆ ಹೊತ್ತುಕೊಂಡು ಕೃಷ್ಣ ನಡೆದಿರುವನು. ಹೀಗಾಗಿ ಅವನ ಪಾದಗಳು ಆಳವಾಗಿ ಮೂಡಿವೆ ಎಂದೊಬ್ಬಳು ಗೋಪಿಯು ನುಡಿದಳು.

ಅವರಿಗೆ ಆ ಗೋಪಿಯಲ್ಲಿ ಅಸೂಯೆ ಹುಟ್ಟಿತು. ಆ ಹೆಜ್ಜೆಯ ಗುರುತುಗಳನ್ನೇ ಅನುಸರಿಸಿ ಮುಂದೆ ಹೋಗುತ್ತಿರುವಾಗ ಆ ಗೋಪಿಯು ಅಳುತ್ತಾ ಕುಳಿತಿರುವುದನ್ನು ನೋಡಿದರು. ಏಕೆ ಎಂದು ಕೇಳಲಾಗಿ ಆ ಗೋಪಿಯು ಹೇಳುತ್ತಾಳೆ. ''ಕೃಷ್ಣನು ನನ್ನನ್ನು ಕರೆದುಕೊಂಡು ಬಂದ. ನನ್ನಲ್ಲಿರುವ ಪ್ರೀತಿ ಕೃಷ್ಣನಿಗೆ ಇನ್ನಾರಲ್ಲಿಯೂ ಇಲ್ಲವೆಂದು ತಿಳಿದು ಗರ್ವದಿಂದ

ನ ಪಾರಯೇಽಽಹಂ ಚಲಿತುಂ ನಯಮಾಂ ಯತ್ರ ತೇ ಮನಃ ।
ತತಶ್ಚಾಂತರ್ದಧೇ ಕೃಷ್ಣಃ ಸಾ ವಧೂರನ್ವತಪ್ಯತ ॥

'ಕೃಷ್ಣಾ! ನಾನು ನಡೆಯಲಾರೆನು. ನನ್ನನ್ನು ಹೊತ್ತುಕೋ, ಎಂದೆ, ಕೃಷ್ಣನು ಕುಳಿತನು. ನಾನು ಅವನ ಹೆಗಲಮೇಲೆ ಕೂಡಬೇಕೆನ್ನುವಷ್ಟರಲ್ಲಿ ಅವನು ಕಣ್ಮರೆಯಾದನು' ಎಂದು ಹೇಳಿದಳು. ಇದನ್ನು ಕೇಳಿ ಗೋಪಿಯ ರೆಲ್ಲರೂ, ಶ್ರೀಕೃಷ್ಣನು ಗರ್ವಿಗಳಿಗೆ ಒಲಿಯುವವನಲ್ಲ ಎಂಬ ತತ್ತ್ವವನ್ನು ತಿಳಿದರು. ಆ ಗೋಪಿಯನ್ನು ಸಂಗಡ ಕರೆದುಕೊಂಡು ಕೃಷ್ಣನನ್ನು ಹುಡುಕುತ್ತಾ ಹೊರಟರು. ಶ್ರೀಕೃಷ್ಣನು ಈ ಹೆಣ್ಣುಮಕ್ಕಳು ಹಿಂತಿರುಗಲಿ ಎಂಬ ಉದ್ದೇಶ್ಯದಿಂದ ಚಂದ್ರನು ಮುಳುಗಿದಂತೆ ಮಾಡಿದನು. ಕತ್ತಲಾಯಿತೆಂದು ಗಾಬರಿಯಾಗಿ ಗೋಪಿಯರು ಮುಂದೆ ಹೋಗದೆ ಹಿಂತಿರುಗಿ ಮೊದಲಿದ್ದ ಮರಳಿನ ಬಳಿಗೆ ಬಂದು ಕೃಷ್ಣನ ಗುಣಗಾನ ಮಾಡಿದರು.

ಗೋಪೀಗೀತೆ

ಶ್ರೀಹರಿ ಮಹಿಮೆ ಅಜ್ಞೇಯ -

ಈ ಗೋಪೀಗೀತವು ನಗಣ ರಗಣ ರಗಣ ಲಘು ಗುರುಗಳಿಂದ ಕೂಡಿದ್ದು, ತ್ರಿಷ್ಟುಪ್ ಛಂದಸ್ಸಿನ ಹನ್ನೊಂದು ಅಕ್ಷರಗಳ ಯಾವುದೋ ಒಂದು ವೃತ್ತದಲ್ಲಿದೆ. ಹೆಸರು ಛಂದಃಶಾಸ್ತ್ರ ಗ್ರಂಥಗಳಲ್ಲಿ ಹೇಳಿಲ್ಲ. ಹರಿಮಹಿಮೆ ಅಜ್ಞೇಯವೆಂದೂ ಇದರಿಂದ ಧ್ವನಿತವಾಗುತ್ತದೆ. ರಗಣವು ಮಧ್ಯ ಲಘು ಉಳ್ಳದು. ಗೋಪಿಯರ ಮಧ್ಯವೂ ಲಘು. ರ ಎಂದರೆ ಅಗ್ನಿ. ಗೋಪಿಯರ ವಿರಹಾಗ್ನಿಗೆ ವ್ಯಂಜಕ. ಪ್ರತಿಪಾದದಲ್ಲೂ ಪ್ರಾರಂಭದಲ್ಲಿ ಲಘು. ಅಂತ್ಯದಲ್ಲಿ ಗುರು. ಕೃಷ್ಣನು ಗೋಪಿಯರ ಬಗ್ಗೆ ಪ್ರಾರಂಭದಲ್ಲಿ ಲಘು ಅಂದರೆ ತಿರಸ್ಕಾರ ದೃಷ್ಟಿಯಿಂದ ಮರೆಯಾದರೂ, ಕೊನೆಯಲ್ಲಿ ಪ್ರಸನ್ನನಾಗಿ ಗುರು ಅಂದರೆ ಆದರದ ಭಾವನೆಯಿಂದ ಮೈದೋರಿದ.

ಜಯತಿ ತೇಽಧಿಕಂ ಜನ್ಮನಾ ವ್ರಜಃ ಶ್ರಯತ ಇಂದಿರಾ ಸಾಧು ತತ್ರ ಹಿ ।
ದಯಿತ ದೃಶ್ಯತಾಂ ತ್ವಾ ದಿದೃಕ್ಷತಾಂ ತ್ವಯಿ ಗತಾಸವಃ ತ್ವಾ ವಿಚಿನ್ವತೇ ॥

ಬಿಂಬಾಧರದ ಗೋಪಿಯರು ತಮ್ಮ ಚಿತ್ತದಲ್ಲಿ ಪ್ರತಿಬಿಂಬಿತನಾದ ಗೋವಿಂದನನ್ನು ಕೂಗಿ ಕರೆದು ಹೀಗೆ ಹಾಡಿದರು– 'ಪ್ರಿಯಕರನಾದ ಕೃಷ್ಣನೇ, ನೀನು ಜನ್ಮ ತಳೆದುದರಿಂದ ಈ ನಂದಗೋಕುಲಕ್ಕೆ ಶ್ರೇಷ್ಠತೆ ಬಂದೊದಗಿತು. ''ಜನ್ಮ ನ ಅವ್ರಜಃ''=ನೀನು ಎಲ್ಲರಂತೆ ಕರ್ಮಾನುಸಾರವಾಗಿ ಜನ್ಮ ತಳೆಯಲಿಲ್ಲ. ಅಧಿಕಂ= ಚತುರ್ಮುಖನು ಪ್ರಾರ್ಥಿಸುತ್ತಾ ನಿನ್ನ ಬಳಿ ಬಂದಾಗ ಆ ಪ್ರಾರ್ಥನೆಯಂತೆ ಸ್ವೇಚ್ಛೆಯಿಂದ ಜನ್ಮ ತಳೆದೆ. ಆದ್ದರಿಂದಲೆ ಗೋಕುಲ ಶ್ರೇಷ್ಠವೆನಿಸಿತು. ಲಕ್ಷ್ಮಿಯೂ ಅಲ್ಲಿ ಚೆನ್ನಾಗಿ ವಾಸಮಾಡುತ್ತಿದ್ದಾಳೆ. ಅಲ್ಲಿಯ ಜನರು ನಿನ್ನನ್ನು ನೋಡಬಯಸುತ್ತಿದ್ದಾರೆ. ನೀನು ದರ್ಶನ ಕೊಡಬೇಕು. ಅವರು ನಿನಗಾಗಿ ಬದುಕಿದ್ದಾರೆ. ನಿನ್ನನ್ನೇ ಅರಸುತ್ತಿದ್ದಾರೆ.

ನಾವೆಂಥ ಸ್ತ್ರೀಯರು–

ಗೋಪಿಯರು ತಾವು ವಸ್ತುತಃ ದೇವತೆಗಳು ಎನ್ನುವುದನ್ನು ಸೂಚಿಸಲು ತಮ್ಮನ್ನೇ ಪರೋಕ್ಷವಾಗಿ 'ಅವರು' ಎಂದು ಮುಂತಾಗಿ ಪ್ರಥಮ ಪುರುಷದಲ್ಲಿಯೂ ಪುಲ್ಲಿಂಗದಲ್ಲಿಯೂ ನಿರ್ದೇಶಿಸುತ್ತಾರೆ. ಅಥವಾ ಮನ್ಮಥ ಪರವಶತೆಯಲ್ಲಿ ಈ ವ್ಯತ್ಯಾಸ ಅವರ ಗಮನಕ್ಕೆ ಬರಲಿಲ್ಲ. ಅಥವಾ ತಮ್ಮ ಬಂಧುಗಳಾದ ಪುರುಷರನ್ನು ಸೇರಿಸಿಕೊಂಡು ಸಾಮಾನ್ಯವಾಗಿ ಹೇಳಿರಬಹುದು. ಅಥವಾ ಪ್ರಿಯತಮನನ್ನು ವಶಪಡಿಸಿಕೊಳ್ಳಲಾಗದ ತಾವು ಎಂಥ ಸ್ತ್ರೀಯರು ಎಂಬ ಅಭಿಪ್ರಾಯವೂ ಇರಬಹುದು.

ನೀನು ಸನ್ಯಾಸಿಯಲ್ಲ

''ಹೇ ಜ, ತೇ ಜನ್ಮ ನ, ಅವ್ರಜಃ''=ಅಥವಾ ಜಯಶಾಲಿಯಾದ ಕೃಷ್ಣನೇ, ನಿನಗೆ ಎಲ್ಲರಂತೆ ಜನ್ಮವಿಲ್ಲ. ನೀನು ಸ್ವೇಚ್ಛೆಯಿಂದಲೇ ಬಂದೆ. ''ತೇ ಯತಿತಾ ನ''=ನೀನೇನೂ ಯತಿಯೂ ಅಲ್ಲ, ಇಧಿಕಂ=ಏಕೆಂದರೆ ಬ್ರಹ್ಮನಿಗೂ, ಮನ್ಮಥನಿಗೂ ತಾಯಿಯಾದ ಲಕ್ಷ್ಮಿಯಿಂದ ಸುಖ ಪಡೆಯುವ ನಿನ್ನನ್ನು ಗೋಕುಲದ ಜನರು ನೋಡ ಬಯಸಿರುವರು.

ಲಕ್ಷ್ಮಿಯೂ ನಿನ್ನನ್ನು ಅರಸುತ್ತಿರುವಳು

''ಹೇ ಇಂದಿರಾಸಾಧುತತ್ರ! ಇಂದಿರಯಾ ಪ್ರವಿಷ್ಟಯಾಂತರಧುತೇನಾತಿರಸ್ಕೃತ್ಯಾ ಸಹಿತ ಇತೀಂದಿರಾ ಸಾಧುತೋಽಯಂ ಸ್ತ್ರೀಜನಃ ತಂ ತ್ರಾಯತ ಇತಿ ತತ್ಸಂಬೋಧನಂ'' ನಮ್ಮಲ್ಲೂ ಲಕ್ಷ್ಮಿಯ ಆವೇಶವಿರುವುದರಿಂದ ನಮ್ಮನ್ನು ಕಾಪಾಡಬೇಕು. ನಮ್ಮನ್ನು ತಿರಸ್ಕರಿಸಲು ಕಾರಣವಿಲ್ಲ. ''ಭವಾನ್ ದೃಶ್ಯತಾಂ ಶ್ರಯತೇಹಿ'' ನೀನು ಬಲು

ಸುಂದರನೂ ಹೌದು. ಲಕ್ಷ್ಮೀದೇವಿಯೂ, ''ಧೃತಾಸವಃ, ಧೃತ+ಅಸವಃ'' ಪ್ರಾಣಾಯಾಮ ಪರರಾದ ಯೋಗಿಗಳೂ, ''ಧೃತ+ಆ+ಸವಃ ಆವ್ರಜಃ'' ಯಜ್ಞಪರರಾದ ನಂದಗೋಕುಲದ ಜನಸಮೂಹವೂ, ನಿನ್ನನೇ ಹುಡುಕುತ್ತಿದ್ದಾರೆ.

ವ್ರಜಜನಾರ್ತಿಹನ್ ವೀರ ಯೋಷಿತಾಂ ನಿಜಜನಸ್ಮಯಧ್ವಂಸನಸ್ಮಿತ ।
ಭಜ ಸಖೇ ಭವೇ ಕಿಂಕಿರೀಃ ಸ್ಮ ನೋ ಜಲರುಹಾನನಂ ಚಾರುದರ್ಶಯನ್ ॥

ದಾಸಿಯರೆಂದು ನೆನೆದು ಕಾಪಾಡು

ವೀರ=ಸಮರ್ಥನೇ, ವಿ+ಈರ=ಗರುಡಾರೂಢ, ವಿ+ಈರ=ಇನ್ನೊಬ್ಬರ ಪ್ರೇರಣೆಗೊಳಪಡದ, ಕೃಷ್ಣನೇ! ಯೋಷಿತಾಂ=ಸ್ತ್ರೀಯರಾದ ನಮ್ಮ ದುಃಖಗಳನ್ನು ಕೇಳುವವನೆ! ವ್ರಜ+ಜನ=ವ್ರಜದಲ್ಲಿ ಜನಿಸಿದವನೆ! ಜ, ನ ವ್ರಜ=ಜಗಜ್ಜನಕನೆ, ನಮ್ಮನ್ನು ಬಿಟ್ಟು ದೂರ ಹೋಗಬೇಡ. ನಿಮ್ಮವರೇ ಆದ ನಮ್ಮ ಗರ್ವಪರಿಹಾರ ಮಾಡಬಲ್ಲ ಮುಗುಳು ನಗು ಉಳ್ಳವನೆ, ಸ್ನೇಹಿತನೇ, ಭವೇ=ನಮ್ಮ ಒಳಿತಿಗಾಗಿ ಕಮಲದಂಥ ನಿನ್ನ ಮುಖವನ್ನು, ಜಲರುಹ+ಆನನ=ಕಮಲಕ್ಕೆ ಆದರ ಪ್ರವೃತ್ತಿ ಕೊಡುವ ಅಂದರೆ ಕಮಲವನ್ನು ಅರಳುವಂತೆ ಮಾಡುವ ನಿನ್ನ ರೂಪವನ್ನು ತೋರುತ್ತ, ನಾವೆಲ್ಲ ನಿನ್ನ ದಾಸಿಯರೆಂಬುದನ್ನು ಮರೆಯದೆ ನಮ್ಮನ್ನು ಕಾಪಾಡು.

ಕಾಮಬಾಧೆಯನ್ನು ಪರಿಹರಿಸು

ಪ್ರಣತದೇಹಿನಾಂ ಪಾಪಕರ್ಶನಂ
ತೃಣಚರಾನುಗಂ ಶ್ರೀನಿಕೇತನಮ್ ।
ಫಣಿಫಣಾರ್ಪಿತಂ ತೇ ಪದಾಂಬುಜಂ
ಕೃಣು ಕುಚೇಷು ನಃ ಕೃಂಧಿ ಹೃಚ್ಛಯಮ್ ॥

ಹಿಂದೆ ನಿನ್ನ ಪಾದಕಮಲವು ನಮಸ್ಕಾರ ಮಾಡಿದವರ ಪಾಪ ಪರಿಹರಿಸುತ್ತಿತ್ತು. ಹುಲ್ಲು ಮೇಯುವ ಪಶುಗಳ ಹಿಂದೆಹಿಂದೆ ಓಡಾಡುತ್ತಿತ್ತು. ಶೋಭೆಗೂ ಲಕ್ಷ್ಮಿಗೂ ಆವಾಸಸ್ಥಾನವಾಗಿತ್ತು. ಶೇಷನಾಗ ಹಾಗೂ ಕಾಳಿಯ ನಾಗರ ಹೆಡೆಯನ್ನು ತುಳಿದಿತ್ತು. ಅದನ್ನು ಈಗ ನಮ್ಮ ಸ್ತನಗಳ ಮೇಲಿರಿಸು, ಹಾವಿನ ಹೆಡೆಯೂ ನಮ್ಮ ಸ್ತನಗಳೂ ಅಸಂಗನಾದ ನಿನಗೆ ಸಮಾನವೆ. ಆದರೆ ಪೊರೆ ಬಿಡುವ ಸ್ವಭಾವದ ಹಾವಿನ ಸಂಗವಿರುವುದರಿಂದ ನಮ್ಮ ಸ್ತನವಸ್ತ್ರಗಳನ್ನು ತೆಗೆದು ನಮ್ಮ ಕಾಮಬಾಧೆಯನ್ನು ನೀನು ಪರಿಹರಿಸಬೇಕು. (ಯಃ ಕುಚೇಷುನಃ ತಂ ಹೃಚ್ಛಯಂ ಕೃಂಧಿ) ನಮ್ಮ ಸ್ತನಗಳಿಗೆ ಹೂಬಾಣ ಎಸೆಯುವ ಅಪರಾಧ ಮಾಡಿರುವ ಮನ್ಮಥನನ್ನು ನೀನು ಭಂಗಪಡಿಸಬೇಕು.

ಪ್ರಣತಕಾಮದಂ ಪದ್ಮಜಾರ್ಚಿತಂ
ಧರಣಿಮಂಡನಂ ಧ್ಯೇಯಮಾಪದಿ ।
ಚರಣಪಂಕಜಂ ಶಂತಮಂ ಚ ತೇ
ರಮಣ ನಃ ಸ್ತನೇಷ್ವರ್ಪಯಾಧಿಹನ್ ॥

ಮನಸ್ಸಿನ ದುಃಖ ಕಳೆವವನೆ, ಪ್ರಿಯಕರನೆ, ಬ್ರಹ್ಮನಿಂದ ಪೂಜಿತವೂ, ಭೂಮಿಗೆ ಅಲಂಕಾರವೂ, ಸ್ಪಷ್ಟವಾಗಿ ಧೂಳಿನಲ್ಲಿ ಮೂಡಿದ ಹೆಜ್ಜೆಗಳನ್ನು ಕಂಡಾಗ ನಮ್ಮ ಧ್ಯಾನಕ್ಕೆ ಗೋಚರವೂ (ಆ ಪದಿ ಧ್ಯೇಯಂ) ಆನಂದಮಯವೂ ಆದ ನಿನ್ನ ಪಾದಕಮಲವನ್ನು ನಮ್ಮ ಸ್ತನಗಳಲ್ಲಿ ಇಡು.

ಮತ್ತೇಕೆ ಈ ಪ್ರಾರ್ಥನೆ?

ಈ ಬೇಡಿಕೆ ಹಿಂದೊಮ್ಮೆ ಬಂದಿದೆ. ಆದರೆ ಅದು ಒಬ್ಬಳದು, ಇದು ಇನ್ನೊಬ್ಬಳದು. ಅಥವಾ ಒಬ್ಬಳೆ ಆದರದಿಂದ ಎರಡು ಬಾರಿ ಬೇಡಿದ್ದಾಳೆ. ಅಥವಾ ಹಿಂದೆ ಜ್ಞಾನಮಯವೆಂದೂ ಈಗ ಆನಂದಮಯವೆಂದೂ ಪಾದವನ್ನು ಹೊಗಳಿದೆ. ಅಥವಾ ಸ್ತನ ಎಂದರೆ ಶಬ್ದ. ನಿನ್ನ ಪಾದವನ್ನು ನಮ್ಮ ಶಬ್ದಗಳಲ್ಲಿಡು. ಅಂದರೆ ನಮ್ಮ ಮಾತೆಲ್ಲ ನಿನ್ನ ಸ್ತುತಿಯಾಗುವಂತೆ ಮಾಡೆಂದು ಬೇಡುತ್ತಿದ್ದಾಳೆ.

ಎಲ್ಲ ಗೋಪಿಯರು ಒಟ್ಟಾಗಿ ಹಾಡಿರುವರು–

ಅಥವಾ 'ಗೋಪ್ಯ ಊಚುಃ' ಎಂದು ಪ್ರಾರಂಭವಾಗಿದೆಯಾದ್ದರಿಂದ, ಗೋಪಿಯರು ಬಹಳ ಇರುವುದರಿಂದ ಒಬ್ಬಳು 'ಪ್ರಣತಕಾಮದಂ' ಎಂದಳು. ಇನ್ನೊಬ್ಬಳು 'ಪದ್ಮಜಾರ್ಚಿತಂ' ಎಂದಳು. ಮತ್ತೊಬ್ಬಳು 'ಧರಣಿಮಂಡನಂ' ಎಂದಳು. ಮಗದೊಬ್ಬಳು 'ಧ್ಯೇಯಮಾಪದಿ' ಎಂದು ಪ್ರತ್ಯೇಕ ಪ್ರತ್ಯೇಕವಾಗಿ ಪ್ರಾರ್ಥಿಸಿ ಕೊನೆಯ ಪಾದದಲ್ಲಿ ಎಲ್ಲರೂ ಏಕಕಂಠದಿಂದ ಪ್ರಾರ್ಥಿಸಿದ್ದಾರೆ. ಕಾರಣ ಪುನರುಕ್ತಿಯಲ್ಲಿ.

ನಿನ್ನ ಪಾದಸುಖ ನೀಡುವಂತಾಗಲಿ–

ಅಥವಾ ತ್ರಿವಿಕ್ರಮನಾದಾಗ ಇಟ್ಟ ಆ ಮೂರೂ ಪಾದಗಳು ಧ್ಯಾನಯೋಗ್ಯವಾದವು. ಆದರೆ ಆಧುನಿಕರಾರಿಗೂ ಸುಖಕಾರಣವಾಗಲಿಲ್ಲ, ಎಂಬುದನ್ನೇ ಹೇಳುತ್ತಿದ್ದಾರೆ ಗೋಪಿಯರು.

ನಿನ್ನ ಚರಣಕಮಲವೊಂದು ಗಯೆಯಲ್ಲಿದ್ದು ಧರಣಿಗೆ ಮಂಡನ(ಅಲಂಕಾರ)ವಾಯಿತು. ಎರಡನೆಯದು, ''ಪ್ರಾಯ ವಿಷ್ಣವೇ ನತಾಃ ಪ್ರಣತಾಃ ಇಂದ್ರಾದಯಃ, ತೇಷಾಂ ಕಾಮಃ ಸ್ವರ್ಗಭೋಗರೂಪಂ ದದಾತೀತಿ ಪ್ರಣತಕಾಮದಂ.'' ವಿಷ್ಣುವಿಗೆ ನಮಿಸಿದ ಇಂದ್ರಾದಿಗಳ ಕಾಮನೆಯಾದ ಸ್ವರ್ಗಭೋಗವನ್ನು ನೀಡಿತು. ಹೀಗೆ ಅರ್ಥೈಸಿರುವುದರಿಂದ ಎರಡನೆಯಪಾದ ಅಂತರಿಕ್ಷ ಲೋಕದಲ್ಲಿ.

ಇನ್ನು ಮೂರನೆಯದು, (ಪದ್ಮಜಾರ್ಚಿತಂ) ಸತ್ಯಲೋಕದಲ್ಲಿ ಬ್ರಹ್ಮದೇವರಿಂದ ಪಾದಪೂಜಾದಿಗಳಿಂದ ಪೂಜಿತವಾಗಿದೆ. ಆದರೆ ನಿನ್ನ ಈ ಮೂರು ಪಾದಗಳು ಆಪತ್ತೊದಗಿದಾಗ ಧ್ಯಾನಕ್ಕಾಗಿವೆ. ಸುಖಕ್ಕೆ ಕಾರಣವಾಗಿಲ್ಲ. ಏಕೆಂದರೆ ಆ ಮೂರು ಪಾದಗಳು ನಮಗೆ ದೂರವಾಗಿವೆ. ಆದ್ದರಿಂದ ನಿನ್ನ ಪಾದ ಸುಖಕಾರಣವಾಗಬೇಕಾದರೆ ನಮ್ಮ ಸ್ತನಗಳಲ್ಲಿಡು. ಆಗ ನಮಗೆ ಸುಖಕಾರಕವಾಗುವುದು.

ಧ್ಯಾನಯೋಗ್ಯವಾಗಬೇಕಾದರೆ ಪಾದ ಸಮೀಪವಿರಬೇಕು

ಅಥವಾ ನಿನ್ನ ಪಾದಗಳು ಧ್ಯಾನಕ್ಕೆ ನಿಜ. ಧ್ಯಾನ ಮಾಡಬೇಕಾದರೆ ನಾವು ನೋಡಿರಬೇಕು. ಈ ನಿನ್ನ ಪಾದಗಳನ್ನು ನಾವು ನೋಡಿಲ್ಲ, ದೂರವಾಗಿವೆ. ಕಾರಣ ಮಾನಸವಿಷಯವಾಗುವುದಿಲ್ಲ. ನಾವು ಧ್ಯಾನ ಮಾಡಬೇಕಾದರೆ ನಮಗೆ ಸಮೀಪವಿರಬೇಕು. ನಮಗೆ ಈಗ ನಮ್ಮ ಕಣ್ಣೀರು ಧಾರಾಕಾರವಾಗಿ ಹರಿದು ಸ್ತನಗಳ ಮೇಲೆ ಬೀಳುತ್ತಿವೆ. ಹೀಗಾಗಿ ನಮ್ಮ ನೇತ್ರಗಳಿಗೆ ಸನ್ನಿಹಿತವಾದ ಸ್ತನಗಳ ಮೇಲೆ ನೀನು ಪಾದವಿಟ್ಟಾಗ ನಾವು ಧ್ಯಾನ ಮಾಡಲಾಗುವುದು. ನಿನ್ನ ಪಾದಗಳ ಅಪರೋಕ್ಷವಾಗಿ ಮನಸ್ಸಿನಲ್ಲಿ ಧ್ಯಾನ ಮಾಡಲಾಗುವುದು. ಕಾರಣ ಚರಣವನ್ನು ಸ್ತನಗಳ ಮೇಲಿಡು.

ವಿಷ್ಣುಪಾದದಲ್ಲಿ ರತಿಯ ಪಿಂಡಪ್ರದಾನ–

ಅಥವಾ ಸ್ತನಮರ್ದನಕ್ಕೆ ಕರಗಳು ಅಪೇಕ್ಷಿತವಾದರೂ ಚರಣಗಳ ಪ್ರಾರ್ಥನೆಗೆ ಹೀಗೊಂದು ಆಖ್ಯಾಯಿಕೆಯುಂಟು. ತನ್ನ ಪತಿಯು ರುದ್ರನಿಂದ ಭಸ್ಮೀಭೂತನಾದಾಗ ರತಿಯು ಕಾಮನಿಗೆ ಸುಗತಿಗಾಗಿ

ಗೋಪಿಯರನ್ನು ಪ್ರವೇಶಿಸಿ ಸ್ತನಗಳನ್ನು ಪಿಂಡವನ್ನಾಗಿ ಮಾಡಿ ಭಗವತ್ಪಾದದಲ್ಲಿ ಅರ್ಪಿಸಲು ಈ ಪ್ರಾರ್ಥನೆ. ಪಿಂಡಪ್ರದಾನ ವಿಷ್ಣುಪಾದದ ಮೇಲಷ್ಟೆ!

ಶ್ರಾದ್ಧದಲ್ಲಿ ಪಿಂಡಗಳು ಮೂರಿರಬೇಕಷ್ಟೇ! ಮತ್ತೆ ರತಿಯು ಎರಡೇ ಪಿಂಡಗಳನ್ನು ಹೇಗೆ ಇಟ್ಟಳು? ಎಂದು ಶಂಕಿಸಬೇಡಿ. ಕಾಮನ ಅಪ್ಪ ವಿಷ್ಣು. ಈ ವಿಷ್ಣು ಜಗದಪ್ಪ. ಈ ಜಗದಪ್ಪನಿಗೆ ಮತ್ಯಾರು ಅಪ್ಪ? ಯಾರೂ ಇಲ್ಲ ಆದ್ದರಿಂದ ಎರಡೇ ಪಿಂಡಗಳು ಹೇಗೆ? ಎಂದು ಪ್ರಶ್ನಿಸಬೇಡಿರಿ ಎನ್ನುತ್ತಾರೆ.

ಕೃಷ್ಣನ ಆವಿರ್ಭಾವ–

ಇತಿ ಗೋಪ್ಯಃ ಪ್ರಗಾಯಂತ್ಯಃ ಪ್ರಲಪಂತ್ಯಶ್ಚ ಚಿತ್ರಧಾ ।
ರುರುದುಃ ಸುಸ್ವರಂ ರಾಜನ್ ಕೃಷ್ಣದರ್ಶನಲಾಲಸಾಃ ।
ತಾಸಾಮಾವಿರಭೂತ್ ಶೌರಿಃ ಸ್ಮಯಮಾನ ಮುಖಾಂಬುಜಃ ।
ಪೀತಾಂಬರಧರಃ ಸ್ರಗ್ವೀ ಸಾಕ್ಷಾನ್ಮನ್ಮಥಮನ್ಮಥಃ ।

ಶುಕಮುನಿಗಳು ಪರೀಕ್ಷಿದ್ರಾಜನಿಗೆ ಹೇಳಿದರು.

ರಾಜನ್! ಕೃಷ್ಣನನ್ನು ಕಾಣಲು ಹಾತೊರೆಯುತ್ತಾ ಗೋಪಿಯರು ಕರುಣಾಜನಕವಾಗಿ ಸ್ವರಮಣನಾದ ಹರಿಯನ್ನು ಕುರಿತು ಇಂಪಾದ ಧ್ವನಿಯಿಂದ ಹಾಡುತ್ತಾ ಬಿಕ್ಕುತ್ತಾ ನಾನಾ ಬಗೆಯ ವಿಲಾಪ ಮಾಡುತ್ತ ಕಣ್ಣೀರಿಟ್ಟರು. ಪಿತಾಂಬರ ವನಮಾಲೆಗಳನ್ನು ಧರಿಸಿ ನಗುವ ಮುಖಕಮಲ ತೋರುತ್ತಾ ಕಣ್ಣಿಗೆ ಕಾಣುವ ಮನ್ಮಥ ಮನ್ಮಥನಾಗಿ ಕೃಷ್ಣ ಮೈದೋರಿದ.

ಮನ್ಮಥಮನ್ಮಥ–

ಮನಸ್ಸನ್ನು ಮಥಿಸಿಸಿದವ ಮನ್ಮಥ. ಕಾಮ ಈ ಮನ್ಮಥನನ್ನು ಮಥಿಸಿದವ ಮನ್ಮಥಮತ, ರುದ್ರ. ರುದ್ರರನ್ನು ನಾರಾಯಣಿಯಾಗಿ ಮಥಿಸಿದವ ಮನ್ಮಥ ಮನ್ಮಥ, ಶ್ರೀಹರಿ. ಅಥವಾ ಮನ್ಮಥನಿಗೆ ಮನ್ಮಥತ್ವ ಕೊಟ್ಟವ ಹರಿ. ಇದರಿಂದ ಹರನನ್ನೇ ಮರಳು ಮಾಡುವ ಸ್ತ್ರೀರೂಪನು ಗೋಪಿಯರಿಗೆ ಮರುಳಾದಾನೇ? ಮನ್ಮಥನಿಗೆ ಮನ್ಮಥತ್ವ ಕೊಟ್ಟವ ಅವನ ವಶನಾದಾನೆಯೇ ಎಂದು ಧ್ವನಿತವಾಗುತ್ತದೆ.

ಅಪ್ಪನದೇ ಕಿಮ್ಮತ್ತಿಲ್ಲ. ಸ್ನೇಹಿತ ಯಾವ ಲೆಕ್ಕ–

ಕಾಮನು ಮನಸಿಜನೆಂದು ಪ್ರಸಿದ್ಧನು. ಅಂದರೆ ಮನಸ್ಸು ಕಾಮನಿಗೆ ಜನಕ. ಈ ಮನಸ್ಸೇ ಚಂದ್ರನಿಗೂ ಜನಕ. ''ಚಂದ್ರಮಾ ಮನಸೋ ಜಾತಃ'' ಎನ್ನುತ್ತದೆ ಶ್ರುತಿ. ಮನಸ್ಸಿನಿಂದ ಉತ್ಪನ್ನರಾದ ಕಾಮಚಂದ್ರರಿಬ್ಬರೂ ಮಿತ್ರರಿದ್ದಂತೆ. ಇಂತಹ ಮನಸ್ಸು ಕಾಮನ ವೈರಿಯಾದ ಹರನಿಗೆ ಮನೆ. ಮನಸ್ಸಿಗೆ ಅಭಿಮಾನಿ. ಮನೋರುದ್ರ ಉದಾಹೃತಃ ಎನ್ನುತ್ತದೆ ಸ್ಮೃತಿ. ಕಾಮನು ಇಂತಹ ಮನಸ್ಸನ್ನು ಮಥಿಸಿದ. ಕಾರಣವಿಷ್ಟೇ! ತನ್ನ ವೈರಿಗೆ ಆಶ್ರಯ ನೀಡಿದ್ದು. ವೈರಿಗೆ ಆಶ್ರಯ ನೀಡಿದೆ ಎನ್ನುವ ಕಾರಣಕ್ಕೆ ಮನಸ್ಸನ್ನು ವಿಕಾರಗೊಳಿಸಿದರೆ ಮಿತ್ರನಿಗೂ ವಿಕಾರ ಮಾಡಿದಂತಾಗಲಿಲ್ಲವೆ? ಎಂದು ನೀನು ಶಂಕಿಸಬಹುದು. ಆದರೆ ಅದೇ ಮನಸ್ಸು ತನಗೆ ಜನಕ ಎನ್ನುವುದನ್ನು ಮರೆತು ತಂದೆಗೂ ತೊಂದರೆ ಕೊಟ್ಟವನಿಗೆ ಮಿತ್ರನ ನೆನಪೇನು? ಕಾರಣ ಸ್ನೇಹಿತನಿಗೆ ಹೇಗೆ ತೊಂದರೆ ಕೊಟ್ಟನು? ಎಂದು ಚಿಂತಿಸಬೇಡ.

ಕೃಷ್ಣನ ಆವಿರ್ಭಾವ – ಗೋಪಿಯರ ಹರ್ಷ

ಗೋಪಿಯರು ಅತ್ಯಂತ ಸಂತುಷ್ಟರಾಗಿ ಆತನಿಗೆ ಉಪಚಾರ ಮಾಡಿದರು. ಶ್ರೀಕೃಷ್ಣನು ಬೆಳದಿಂಗಳಿನಲ್ಲಿ ಗೋಪಿಯರೊಡನೆ ವಿರಾಜಿಸಿದನು.

ಭಜತೋಽನುಭಜಂತ್ಯೇಕ ಏಕ ಏತದ್ವಿಪರ್ಯಯಮ್ ।
ನೋಭಯಾಂಶ್ಚ ಭಜಂತ್ಯನ್ಯ ಏತನ್ನೋ ಬ್ರೂಹಿ ಸಾಧು ಭೋ ॥

ಈ ಮೂವರಲ್ಲಿ ಯಾರು ಉತ್ತಮರು–

ಆಗ ಗೋಪಿಯರು ಕೃಷ್ಣನನ್ನು ಕುರಿತು ಲೋಕದಲ್ಲಿ ಸೇವಾನುಸಾರವಾಗಿ ಫಲವನ್ನು ಕೊಡತಕ್ಕವರು ಕೆಲವರು. ಸೇವಿಸದೇ ಇದ್ದರೂ ಫಲ ಕೊಡತಕ್ಕವರು ಕೆಲವರು. ಸೇವಿಸುವವರಿಗೂ, ಸೇವಿಸದೇ ಇರುವವರಿಗೂ ಫಲವನ್ನು ಕೊಡದೆ ಉದಾಸೀನರಾಗಿರುವವರು ಕೆಲವರು. ಕೃಷ್ಣನೇ! ಇವರಲ್ಲಿ ಶ್ರೇಷ್ಠರು ಯಾರು?

ಮಿಥೋ ಭಜಂತಿ ಯೇ ಸಖ್ಯಃ ಸ್ವಾರ್ಥೈಕಾಂತೋದ್ಯಮಾ ಹಿತೇ ।
ನ ತತ್ರ ಸೌಹೃದಂ ಧರ್ಮಃ ಸ್ವಾರ್ಥಂ ತದ್ವಿತ್ತ ನಾನ್ಯಥಾ ॥

ಉಪಕಾರ ಮಾಡಿದವರಿಗೆ ಪ್ರತ್ಯುಪಕಾರ ಮಾಡುವವರಲ್ಲಿ ಸ್ವಾರ್ಥವಿದೆ. ಅನಿಮಿತ್ತ ಸ್ನೇಹವಿಲ್ಲ. ತಂದೆಯು ಮಕ್ಕಳಿಂದ ಸೇವೆಯನ್ನು ನಿರೀಕ್ಷಿಸದೆ ತಾನಾಗಿ ಮೇಲೆ ಬಿದ್ದು ಉಪಕರಿಸುವನು. ಅವನಂತೆ ಪ್ರಾಣಿಗಳಲ್ಲಿ ಕನಿಕರವುಳ್ಳವರು ತಮ್ಮನ್ನು ಸೇವಿಸದೇ ಇದ್ದರೂ ಉಪಕಾರ ಮಾಡುವ ಸಂಪ್ರಜ್ಞಾತ ತಪೋನಿಧಿಗಳಲ್ಲಿ ನಿರ್ದೋಷವೂ ಅನಿಮಿತ್ತವೂ ಆದ ಪ್ರೇಮವಿರುವುದು. ಇವರು ಉತ್ತಮರು.

ಸೇವೆ ಮಾಡಿದರೂ, ಮಾಡದೇ ಇದ್ದರೂ ಉದಾಸೀನರಾಗಿರುವವರಲ್ಲಿ ಎರಡು ಬಗೆ. ಅಸಂಪ್ರಜ್ಞಾತ ಸಮಾಧಿಯಲ್ಲಿ ಮುಳುಗಿರುವವರು ಸ್ವಪ್ರಯೋಜನ ರಹಿತರಾದ್ದರಿಂದ ಸೇವಿಸುವವರನ್ನು ಸತ್ಕರಿಸುವುದಿಲ್ಲ. ಅವರು ಆತ್ಮಾರಾಮರು. ಬಹಿರ್ವ್ಯಾಪಾರಶೂನ್ಯರು, ಪರಮಾತ್ಮನ ಜ್ಞಾನವಿರುವುದರಿಂದ ಆನಂದವನ್ನು ಹೊಂದಿರುವರು. ಯಾರು ಸೇವಿಸಿದರೇನು? ಬಿಟ್ಟರೇನು? ಅವರ ಕಡೆ ಗಮನವೇ ಇಲ್ಲದವರಾಗಿ ಉದಾಸೀನರಾಗಿರುವರು. ಎರಡನೆಯ ಬಗೆಯವರು ಕೃತಘ್ನರು. ಅವರು ದೇವಾದಿ ಗುರುಗಳಿಗೆ ಹವಿಸ್ಸನ್ನು ಕೊಡದೆ ದ್ರೋಹ ಮಾಡುತ್ತಾರೆ.

ನಾಹಂ ಸಖ್ಯೋ ಭಜತೋಽಪಿ ಜಂತೂನ್
ಭಜಾಮ್ಯಮೀಷಾ ಮನುವೃತ್ತಯೋ ಯಥಾ ।
ತಥೈವ ಮತ್ತಃ ಫಲಸಂಪದಃ ಸ್ಯುಃ
ಉಚ್ಚಾವಚಾಃ ಕಲ್ಪತರೋರಿವಾರ್ಥಿನಾಮ್ ॥

ನಾನು ಈ ಯಾವ ಗುಂಪಿಗೂ ಸೇರಿದವನಲ್ಲ. ಈಶಕೋಟಿಗೆ ಸೇರಿದವನು. ಫಲಾಪೇಕ್ಷೆಯಿಂದ ಸೇವಿಸುವವರನ್ನೂ, ನಿಷ್ಕಾಮರನ್ನೂ, ನಾನು ಸತ್ಕರಿಸಿ ಅವರ ಇಚ್ಛೆಯಂತೆ ಫಲವನ್ನು ಕೊಡುವವನಲ್ಲ. ಅವರಿಂದ ನನಗೆ ಯಾವ ಪ್ರಯೋಜನವು ಇಲ್ಲ. ನನ್ನಿಂದ ಅವರಿಗೇ ಪ್ರಯೋಜನ. ಯೋಗ್ಯರಿಗೆ ಅವರವರ ಸೇವಾನುಸಾರ ಫಲವು ದೊರೆಯುವುದು. ಗೋಪಿಯರೇ! ಲೌಕಿಕ ವೈದಿಕ ಕರ್ಮಗಳನ್ನೆಲ್ಲ ನನಗೆ ಅರ್ಪಿಸಿ, ನನ್ನನ್ನು ಉಪಾಸಿಸಿರಿ. ಇದಿರಿಗೆ ಇದ್ದರೆ ಆ ವ್ಯಕ್ತಿಯಲ್ಲಿ ಅನಾದರವುಂಟಾಗುವುದು. ಆದ್ದರಿಂದ ನಾನು ಕಣ್ಮರೆಯಾದೆ. ಅದಕ್ಕಾಗಿ ನೀವು ಅಸೂಯೆ ಪಡಬಾರದು. ನಿಷ್ಕಾಮವಾಗಿ ನನ್ನನ್ನು ಭಜಿಸುತ್ತಿರುವಿರಿ. ಅದಕ್ಕೆ ತಕ್ಕ ಪ್ರತಿ ಉಪಕಾರವನ್ನು ದೇವತೆಗಳ ಆಯುಃಕಾಲ ಪೂರ್ತಿ ಮಾಡಿದರೂ ನಿಮ್ಮ ಸಾಲವನ್ನು ತೀರಿಸಲಾರೆನು. ನಿಮ್ಮಲ್ಲಿ ಮಾತ್ರವೇ ವಿಶೇಷಾನುಗ್ರಹವೆಂದಲ್ಲ, ನನ್ನಲ್ಲಿ ಭಕ್ತಿ ಮಾಡುವ ಪುರುಷನಾಗಲೀ, ಸ್ತ್ರೀಯೇ ಆಗಲೀ ಅಭಿಮಾನವನ್ನು ಬಿಟ್ಟು ಸೇವಿಸಿದರೆ ಅವರು ಮುಕ್ತಿಯನ್ನು ಹೊಂದುವರು, ಎಂದು ಕೃಷ್ಣ ಉತ್ತರ ಕೊಟ್ಟನು.

ರಾಸೋತ್ಸವ

ತತ್ರಾರಭತ ಗೋವಿಂದೋ ರಾಸಕ್ರೀಡಾಮನುವ್ರತೈಃ ।
ಸ್ತ್ರೀರತ್ನೈರನ್ವಿತಃ ಪ್ರೀತೈರನ್ಯೋನ್ಯಾಬದ್ಧಬಾಹುಭಿಃ ॥

ಶೃಂಗಾರರಸಭರಿತವಾದ ಉತ್ಸವವು (ರಾಸಕ್ರೀಡೆಯು) ಶ್ರೀಕೃಷ್ಣನಿಂದಾರಂಭವಾಯಿತು. ಪುಷ್ಪವೃಷ್ಟಿಯಾಯಿತು. ಗಂಧರ್ವರು ಗಾನ ಮಾಡಿದರು. ಗೋಪಿಯರು ಒಬ್ಬರಿಗಿಂತ ಒಬ್ಬರು ಸ್ಪರ್ಧೆಯಿಂದ ಗಾನ ಮಾಡಿದರು. ಹರಿಯನ್ನು ಆಲಂಗಿಸಿದರು. ಸುರತಕ್ರೀಡೆಯಿಂದ ಬಳಲಿದವರನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಉಪಚರಿಸಿದನು. ಜಲಕ್ರೀಡೆಯಾಡಿ ಸಂತೋಷಭರಿತರಾದರು. ಹೀಗೆ ಅವರು ಆ ರಾತ್ರಿಯನ್ನು ವೈಭವದಿಂದ ಕಳೆಯುವ ಹಾಗೆ ಶ್ರೀಕೃಷ್ಣನು ಅನುಗ್ರಹಿಸಿದನು.

ಸಂಸ್ಥಾಪನಾಯ ಧರ್ಮಸ್ಯ ಪ್ರಶಮಾಯೇ ತರಸ್ಯ ಚ ।
ಅವತೀರ್ಣೋಽಹಿ ಭಗವಾನಂಶೀನ ಜಗದೀಶ್ವರಃ ॥
ಆತ್ಮಾರಾಮೋ ಯದುಪತಿಃ ಕೃತವಾನ್ ವೈ ಜುಗುಪ್ಸಿತಮ್ ।
ಕಿಮಭಿಪ್ರಾಯ ಏತನ್ನಃ ಸಂಶಯಂ ಛಿಂಧಿ ಸುವ್ರತ ॥

ಮುನಿಗಳೇ! ಧರ್ಮಸ್ಥಾಪನೆಗಾಗಿ ಅವತರಿಸಿದ ಶ್ರೀಹರಿಯು ಶಾಸ್ತ್ರಕ್ಕೆ, ಧರ್ಮಕ್ಕೆ, ವಿರುದ್ಧವಾಗಿ ಪರಸ್ತ್ರೀಯರನ್ನು ಹೇಗೆ ಬೆರೆತನು? ಆದರೆ ಸ್ವರಮಣನಿಗೆ ವಿಷಯಭೋಗದಾಸೆಯಿಲ್ಲ. ಹಾಗಾದರೆ ಜನರು ಹೀಗೆ ನಡೆಯಲಿ ಎಂದು ನಡಿಸಿದನೆ? ತಾನು ಹೇಳಿದುದನ್ನು ಮಾತ್ರ ನಡೆಸಬೇಕು. ಅಷ್ಟೇ ಹೊರತು ತಾನು ಮಾಡಿದಂತೆ ನಡೆದುಕೊಳ್ಳಬಾರದು ಎಂದೆ? ಅವನ ಅಭಿಪ್ರಾಯವೇನು? ಎಂದು ಪರೀಕ್ಷಿತನು ಶುಕರನ್ನು ಪ್ರಶ್ನಿಸಿದನು.

ನೈ ತತ್ಸಮಾಚರೇತ್ ಜಾತು ಮನಸಾಽಪಿ ಹ್ಯನೀಶ್ವರಃ ।
ನಶ್ಯತ್ಯಾಶ್ವಾಚರನ್ ಮೌಢ್ಯಾತ್ ಯಥಾ ರುದ್ರೋಽಪಿಬದ್ ವಿಷಮ್ ॥

ತೇಜೀಯಸಾಂ ನ ದೋಷಾಯ–

ಅಣಿಮಾದಿ ಅಷ್ಟೈಶ್ವರ್ಯವುಳ್ಳ ವಿಶ್ವಾಮಿತ್ರರೇ ಮೊದಲಾದ ಜ್ಞಾನಿಗಳು ಶಾಸ್ತ್ರ ವಿರುದ್ಧವಾದ ಕರ್ಮಗಳನ್ನು ಮಾಡಿದರೂ, ''ತೇಜೀಯಸಾಂ ನ ದೋಷಾಯ.'' ಅವರು ಶ್ರೀಹರಿಯ ಅನುಗ್ರಹದಿಂದುಂಟಾದ ಸಾಮರ್ಥ್ಯ ಉಳ್ಳವರಾದುದರಿಂದ ಅವರಿಗೆ ಯಾವ ದೋಷವೂ ಅಂಟುವುದಿಲ್ಲ ಮತ್ತು ಪವಿತ್ರಾತ್ಮರೇ ಆಗಿರುತ್ತಾರೆ. ಪಾಮರನು ಹರಿ ಮತ್ತು ಹರಿಭಕ್ತರಾದ ಜ್ಞಾನಿಗಳು ಮಾಡುವ ಕರ್ಮಗಳನ್ನು ಮಾಡುವುದಿರಲಿ, ಮನಸ್ಸಿನಿಂದಲೂ ಸ್ಮರಿಸಬಾರದು. ಇನ್ನು ಆಚರಿಸಲೇಬಾರದೆಂದು ಹೇಳಬೇಕಾದುದೇ ಇಲ್ಲ. ದೊಡ್ಡವರನ್ನು ನೋಡಿ ನಡಿ ಎಂದರೆ ದೊಡ್ಡವರು ಆಚರಿಸತಕ್ಕ ಸತ್ಕರ್ಮಗಳನ್ನು, ಸದಾಚಾರವನ್ನು ನೋಡಿ ಅದರಂತೆ ಆಚರಿಸಬೇಕೆಂದು ಅರ್ಥವೇ ಹೊರತು ದುಷ್ಕರ್ಮವನ್ನಲ್ಲ. ಯೋಗೇಶ್ವರರು ಮಾಡಿದ್ದನ್ನೆಲ್ಲ ನಡೆಸುವೆನೆಂಬ ಮೂರ್ಖನು ನಾಶವನ್ನೇ ಹೊಂದುವನು. 'ರುದ್ರೋಽಪಿಬದ್ವಿಷಂ' ರುದ್ರನು ವಿಷವನ್ನು ಕುಡಿದನು. ನಾನೂ ಕುಡಿಯುವೆನೆಂದು ಕುಡಿದವನು ಸಾಯುವನು. ಮಹಾಜ್ಞಾನಿಗಳು ವಿರಕ್ತರು. ಪಕ್ವಭಕ್ತಿಯುಳ್ಳವರು. ಅದರಿಂದ ಲೋಕದ ಧರ್ಮವನ್ನು ಮೀರುವುದರಿಂದ ಅವರಿಗೆ ದೋಷವಿಲ್ಲ.

ಹೀಗೆ ಜ್ಞಾನಿಗಳಿಗೇ ದೋಷವಿಲ್ಲದಿರುವಾಗ ಸರ್ವಜೀವಪ್ರೇರಕನಾದ ಶ್ರೀಹರಿಗೆ ಪುಣ್ಯಪಾಪಲೇಪವಿಲ್ಲವೆಂದು ಹೇಳಬೇಕೇನು? ಸಕಲ ದೇಹಿಗಳ ಒಳಗೆ ಸಂಚರಿಸುವ ಸಾಕ್ಷಿಯೇ ಈ ಕ್ರೀಡೆಗೆ ಉಪಯುಕ್ತವಾದ

ಅಪ್ರಾಕೃತ ದೇಹವನ್ನು ತಾಳಿರುವನು. ಗೋಪಿಯರೆಲ್ಲರಲ್ಲೂ ಆವೇಶ ರೂಪದಿಂದಿರುವ ಲಕ್ಷ್ಮಿಯ ಒಳಗಿರುವ ಲಕ್ಷ್ಮೀನಾಮಕ ಬಿಂಬರೂಪದೊಡನೆ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಸಂಪರ್ಕವೇ ಹೊರತು ಗೋಪಿಯರೊಡನೆ ಸಾಕ್ಷಾತ್ ಸಂಪರ್ಕವಿಲ್ಲವೆಂಬುದನ್ನು ಹಿಂದೆಯೇ ತಿಳಿಸಿರುವೆನು.

ಬ್ರಹ್ಮರಾತ್ರ ಉಪಾವೃತ್ತೆ ವಾಸುದೇವಾನುಮೋದಿತಾಃ ।
ಅನಿಚ್ಛಂತ್ಯೋ ಯಯುರ್ಗೋಪ್ಯಃ ಸ್ವಗೃಹಾನ್ ಭಗವತ್ಪ್ರಿಯಾಃ ॥

ಶ್ರೀಕೃಷ್ಣನ ಇಚ್ಛೆಯಿಂದ ಮೋಹಿತರಾದ ಗೋಪಾಲರು ಆ ರಾತ್ರಿ ತಮ್ಮ ತಮ್ಮ ಪತ್ನಿಯರು ತಮ್ಮ ಪಕ್ಕದಲ್ಲೇ ಇದ್ದಂತೆ ತಿಳಿದವರಾಗಿ ಕೃಷ್ಣನ ಗುಣಗಳಲ್ಲಿ ದೋಷವೆಣಿಸಲಿಲ್ಲ. ಬ್ರಾಹ್ಮಮುಹೂರ್ತವು ಬರಲು ಗೋಪಿಯರು ಕೃಷ್ಣನ ಅಪ್ಪಣೆ ಮೀರಲಾರದೆ ಮನೆಗಳಿಗೆ ಬಂದರು. ಕೃಷ್ಣನ ಈ ವಿಹಾರದ ಕಥೆಯನ್ನು ಭಕ್ತಿಯಿಂದ ಕೇಳಿದ-ವನೂ, ಭಕ್ತಿಯಿಂದ ಹೇಳಿದವನೂ ಭಕ್ತಿಯ ವೃದ್ಧಿಯನ್ನು ಹೊಂದಿ ಜ್ಞಾನಿಯಾಗುವನು.

ವಿದ್ಯಾಧರನ ಉದ್ಧಾರ – ಶಂಖಚೂಡನ ಸಂಹಾರ

ಒಮ್ಮೆ ಗೋಪಾಲರು ಅಂಬಿಕಾವನಕ್ಕೆ ಬಂದು ಶಿವನನ್ನೂ, ಶಿವೆಯನ್ನೂ ಪೂಜಿಸಿದರು. ರಾತ್ರಿ ಮಲಗಿರು-ವಾಗ ಒಂದು ಹೆಬ್ಬಾವು ನಂದಗೋಪನನ್ನು ನುಂಗಲು ಆರಂಭಿಸಿತು. ಶ್ರೀಕೃಷ್ಣನು ಅದನ್ನು ಪಾದದಿಂದ ಸ್ಪರ್ಶಿಸಿ-ದನು. ಕೂಡಲೇ ಸರ್ಪದೇಹವು ಹೋಗಿ ವಿದ್ಯಾಧರನು ನಿಂತನು. ಶ್ರೀಕೃಷ್ಣನು ನೀನು ಯಾರೆಂದು ಕೇಳಿದನು.

ಅಹಂ ವಿದ್ಯಾಧರಃ ಕಶ್ಚಿತ್ ಸುದರ್ಶನ ಇತಿ ಸ್ಮೃತಃ ।
ಋಷೀನ್ ವಿರೂಪಾನಂಗಿರಸಃ ಪ್ರಾಹಸಂ ರೂಪದರ್ಪಿತಃ ॥

ನಾನು ಸುದರ್ಶನನೆಂಬ ವಿದ್ಯಾಧರನು. ರೂಪವಂತನೆಂಬ ಗರ್ವದಿಂದ ಅಂಗಿರಾಋಷಿಗಳನ್ನು ಗೇಲಿ ಮಾಡಿದೆ. ಅವರು ಅಜಗರನಾಗೆಂದು ಶಪಿಸಿದರು. ಕೃಷ್ಣ! ನಿನ್ನ ಪಾದಸ್ಪರ್ಶದಿಂದ ಪಾಪ ಪರಿಹಾರವಾಗಿ ಆ ಶಾಪವು ಅನುಗ್ರಹವೆಂದು ಭಾವಿಸುವೆನು. ಸುಜನಪಾಲಕನೇ! ನಾನು ಅನುಗೃಹೀತನಾದೆನು. ಎಂದು ಹೇಳಿ ಅಪ್ಪಣೆ ಪಡೆದು ಹೊರಟುಹೋದನು.

ಶಂಖಚೂಡಂ ನಿಹತ್ಯೈವಂ ಮಣಿಮಾದಾಯ ಭಾಸುರಮ್ ।
ಅಗ್ರಜಾಯಾದದಾತ್ ಪ್ರೀತ್ಯೈ ಪಶ್ಯಂತೀನಾಂ ಚ ಯೋಷಿತಾಮ್ ॥

ರಾಮಕೃಷ್ಣರು ವನದಲ್ಲಿ ಗೋಪಿಯರೊಡನೆ ಕ್ರೀಡಿಸುತ್ತಿದ್ದಾಗ ಶಂಖಚೂಡನೆಂಬ ರುದ್ರದೇವರ ಪ್ರಸಾದ ದಿಂದ ರಕ್ಷಿತನಾಗಿದ್ದ ಯಕ್ಷನು ಬಂದು ಗೋಪಿಯರನ್ನು ಅಪಹರಿಸಿದನು. ಶ್ರೀಕೃಷ್ಣನು ಅವನ ತಲೆಯನ್ನು ಚಚ್ಚಿ ಕೊಂದು, ಅಲ್ಲಿದ್ದ ಮಣಿಯೊಂದನ್ನು ತಂದು ಅಣ್ಣನಿಗೆ ಕೊಟ್ಟನು.

ವೇಣುಗೀತೆ

ಗೋಪ್ಯಃ ಕೃಷ್ಣೇ ವನಂ ಯಾತೇ ತಮನುದ್ರುತಚೇತಸಃ ।
ಕೃಷ್ಣಲೀಲಾಂ ಪ್ರಗಾಯಂತ್ಯೋ ನಿನ್ಯುರ್ದುಃಖೇನ ವಾಸರಾನ್ ॥

ಕೃಷ್ಣನು ದನಗಳನ್ನು ಮೇಯಿಸಲು ಕಾಡಿಗೆ ಹೋದಾಗ, ಗೋಪಿಯರು ಅವನ ಅಗಲಿಕೆಯನ್ನು ಸಹಿಸದೆ, ಅವನ ಚರಿತ್ರೆಯನ್ನೇ ಗಾನ ಮಾಡುತ್ತ ಹಗಲನ್ನು ಕಳೆಯುವರು.

ದುಃಖದ ಜೊತೆಯಲ್ಲಿ ಲೀಲಾಸ್ಮರಣಸುಖ

ಕ್ಷಣವು ಯುಗದಂತೆ ಎನ್ನುವ ಹಾಗೆ ''ವಾಸರಾನ್'' ಎನ್ನುವಲ್ಲಿ ಬಹುವಚನವು ವಿರಹತಾಪದಿಂದ ಅನೇಕ ದಿನಗಳನ್ನು ಕಳೆದಂತೆ ತಿಳಿದರೆಂದು ಸೂಚಿಸುವುದು. ''ದುಶ್ಚ ತತ್ ಖಂಚ ದುಃಖಂ, ತೇನ ದುಃಖೇನ'' ಎಂದು ವಿಗ್ರಹ. ಅಂದರೆ ವಿರಹದಿಂದುಂಟಾದ ದುಃಖದಿಂದಲೂ ಲೀಲಾಸ್ಮರಣದಿಂದುಂಟಾದ ಸುಖದಿಂದಲೂ ದಿನಗಳೆದರು. ''ದುರ್ದುಃಖಮಿತಿ ಸಂಪ್ರೋಕ್ತಂ ಖಂ ಸುಖಂ ಪ್ರೋಚ್ಯತೇ ಬುಧೈಃ'' ॥ ಎಂದು ತಾತ್ಪರ್ಯದಲ್ಲಿ ಬೇರೆಡೆ ಹೇಳಿದೆ. ಕೇವಲ ದುಃಖವೇ ಆದರೆ ಅದರಲ್ಲಿ ಮುಳುಗಿದ ವನಿತೆಯರಿಗೆ ಲೀಲೆಯ ಸ್ಮರಣೆ ಹೇಗಾದೀತು? ಕಾರಣ ಈ ರೀತಿ ಅರ್ಥ ಮಾಡಬೇಕು.

ವಾಮಬಾಹುಕೃತವಾಮಕಪೋಲೋ ವಲ್ಗಿತಭ್ರುರಧರಾರ್ಪಿತವೇಣುಃ ।
ಕೋಮಲಾಂಗುಲಿಭಿರಾಶ್ರಿತಮಾರ್ಗಂ ಗೋಪ್ಯ ಈರಯತಿ ಯತ್ರ ಮುಕುಂದಃ ॥

ಗೋಪಿಯರೇ! ಗೋಪಾಲಕೃಷ್ಣನ ಸೌಂದರ್ಯವನ್ನು ಏನೆಂದು ಹೇಳಬಹುದು. ಎಡಭುಜಕ್ಕೆ ಕಪೋಲವು ಸೋಕುವಂತೆ ಬಗ್ಗಿದ ಕೊರಳು! ತುಟಿಯ ಮೇಲೆ ಕೊಳಲು! ಅದರ ಮೇಲೆ ಆಡುತ್ತಿರುವ ಬೆರಳುಗಳು! ಸ್ವರಮೂರ್ಛನೆಗೆ ತಕ್ಕಂತೆ ಹುಬ್ಬಿನಾಟಗಳು.

ವ್ಯೋಮಯಾನವನಿತಾಃ ಸಹಸಿದ್ಧೈಃ ವಿಸ್ಮಿತಾಸ್ತದುಪಧಾರ್ಯ ಸಲಜ್ಜಾಃ ।
ಕಾಮಮಾರ್ಗಣಸಮರ್ಪಿತಚಿತ್ತಾಃ ಕಶ್ಮಲಂ ಯಯುರಪಸ್ಮೃತನೀವ್ಯಃ ॥

ಇಂತಹ ದಿವ್ಯ ಸೌಂದರ್ಯದಿಂದ ಶ್ರೀಕೃಷ್ಣನು ಕೊಳಲನ್ನೂದುವಾಗ, ವಿಮಾನದಲ್ಲಿ ಕುಳಿತು ಸಂಚರಿಸುವ ಸಿದ್ಧಸ್ತ್ರೀಯರು ತಮ್ಮ ಪತಿಗಳೊಡನೆ ಇದ್ದರೂ, ಕಾಮವಶರಾಗಿ ಮೂರ್ಛೆ ಹೊಂದುವರು.

ಯಶೋದೆ! ನಿನ್ನ ಮಗನು ಕೊಳಲಿನಲ್ಲಿ ಸ್ವರಭೇದಗಳನ್ನು ನುಡಿಸುವಾಗ ಇಂದ್ರಾದಿಗಳು ಈ ಸ್ವರಭೇದ-ಗಳ ತತ್ತ್ವವನ್ನು ತಿಳಿಯದೆ ಮೂರ್ಛೆ ಹೊಂದುವರು. ಇಂತಹವನ ವಿಯೋಗವನ್ನು ಸಹಿಸಲಾರೆವು. ಸಾಯಂಕಾಲ ಗೋಕುಲಕ್ಕೆ ಬರುವಾಗ ಕೃಷ್ಣನನ್ನು ನೋಡಿದೊಡನೆ ಅವನು ಹಗಲಿನ ನಮ್ಮ ವಿರಹತಾಪವನ್ನು ಪರಿಹರಿಸುವನು.

ಹೀಗೆ ಗೋಪಿಯರು ಗಾನ ಮಾಡುತ್ತ ಶ್ರೀಕೃಷ್ಣನಲ್ಲಿಯೇ ಮನಸ್ಸುಳ್ಳವರಾದರು.

ಅರಿಷ್ಟಾಸುರ ಸಂಹಾರ

ಅರಿಷ್ಟನೆಂಬ ಗೂಳಿಯ ಆಕಾರದ ಅಸುರನು ಗೋಕುಲಕ್ಕೆ ಬಂದು, ಅಲ್ಲಿರುವವರನ್ನೆಲ್ಲ ಹೆದರಿಸಿದನು.

ಅಥ ತರ್ಹ್ಯಾಗತೋ ಗೋಷ್ಠಮರಿಷ್ಟೋ ವೃಷಭಾಸುರಃ ।
ತಂ ತೀಕ್ಷ್ಣಶೃಂಗಮುದ್ವೀಕ್ಷ್ಯ ಗೋಪಾ ಗೋಪ್ಯಶ್ಚ ತತ್ರಸುಃ ॥
ತಮಾಪತಂತಂ ಸ ನಿಗೃಹ್ಯ ಶೃಂಗಯೋಃ
ಪದಾ ಸಮಾಕ್ರಮ್ಯ ನಿಪಾತ್ಯ ಭೂತಲೇ ।
ನಿಷ್ಪೀಡಯಾಮಾಸ ಯಥಾರ್ದ್ರಮಂಬರಂ
ಕೃತ್ವಾ ವಿಷಾಣೇನ ಜಘಾನ ಸೋಽಪತತ್ ॥

ಅರಿಷ್ಟಾಸುರನು ಹೀಗೆ ಎಲ್ಲರನ್ನೂ ಬೆದರಿಸುತ್ತಾ ಕೃಷ್ಣನ ಮೇಲೇರಿ ಬಂದನು. ಆಗ ಕೃಷ್ಣನು ಅವನ ಕೋಡುಗಳನ್ನು ಕೈಯಲ್ಲಿ ಹಿಡಿದು ಕಾಲಿನಿಂದ ಅವನನ್ನು ಆಕ್ರಮಿಸಿಕೊಂಡು ಭೂಮಿಗೆ ಕೆಡವಿ ಬಟ್ಟೆಯನ್ನು

ಹಿಂಡುವಂತೆ ಚೆನ್ನಾಗಿ ಪೀಡಿಸಿದ! ಆಮೇಲೆ ಅದೇ ಕೋಡುಗಳನ್ನು ಕಿತ್ತಿ ಅವುಗಳಿಂದ ಸಂಹರಿಸಿದ. ಇದನ್ನೇ ರಾಜರು ಹೀಗೆ ವರ್ಣಿಸಿರುವರು-

ಕೊನೆಗಾಲದಲ್ಲಿ ನಮ್ಮವರೇ ನಮಗೆ ಶತ್ರುಗಳು—

ಯದುಪತಿಮೃದುಹಸ್ತೇನೋದ್ಧೃತಂ ತಸ್ಯ ಶೃಂಗಂ
ವ್ಯಸುಮಸುರಮಕಾರ್ಷೀತ್ ತತ್‌ಕ್ಷಣೇನೇತಿ ಯುಕ್ತಂ ॥
ಅಪಿ ಶಿರಸಿ ಧೃತೋ ಯತ್ಸ್ವೀಯ ಏವಾಂತಕಾಲೇ
ಕರವಶಮುಪಯಾತಃ ಶತ್ರುತಾಮೇತಿ ಶತ್ರೋಃ ॥

ಶ್ರೀಕೃಷ್ಣನ ಕೋಮಲ ಕರಗಳಿಂದ ಕಿತ್ತಲ್ಪಟ್ಟ ಕೊಂಬು ತತ್‌ಕ್ಷಣದಲ್ಲಿ ಅಸುರನ ಪ್ರಾಣ ತೆಗೆಯಿತೆಂಬುದು ಯೋಗ್ಯವೇ. ತನ್ನವರೇ ಆದರೂ ಅವರನ್ನು ತಲೆಯಲ್ಲಿ ಕೂಡಿಸಿಕೊಂಡರೂ ಎಷ್ಟೇ ಗೌರವಾದರದಿಂದ ನೋಡಿದರೂ ಕೊನೆಗಾಲದಲ್ಲಿ ಶತ್ರುವಿನ ಕೈವಶರಾದರೆ ಅವರೂ ಸಹ ಶತ್ರುಗಳಾಗುವರಷ್ಟೆ ಎಂದು ಭಾವ.

ಧರ್ಮಮರ್ಮ ಬಲ್ಲವನ ಕಾರ್ಯ, ಅಧರ್ಮವಲ್ಲ–

ಸಜ್ಜನನಾದ ವೃಷನನ್ನು ಹೇಗೆ ಕೊಂದನು ಶ್ರೀಕೃಷ್ಣನೆಂದರೆ ಉತ್ತರಿಸುವರು– ''ತಮಾಪತಂತಮಿತಿ'' ತಮಾಯಾಂ ಪತತಿ ಇತಿ ತಮಾಪತತ್ ತಂ'' ಹೀಗೆ ವಿಗ್ರಹ. ರಾತ್ರಿಯಲ್ಲಿ ಬೀಳತಕ್ಕವನೆಂದರ್ಥ (ನಿಶಾಚರನೆಂದರ್ಥ) ತಮೇ=ತಮಸ್ಸಿನಲ್ಲಿ, ಆಪತಂತಂ=ಚೆನ್ನಾಗಿ ಬೀಳುವ ಅಂದರೆ ತಮೋಯೋಗ್ಯನಾದ ಎಂದರ್ಥ. ಹೀಗೆ ಅರ್ಥ ಮಾಡಿದ್ದರಿಂದ ''ಗೌರ್ನಪದಾ ಸ್ಪ್ರಷ್ಟವ್ಯಾ'' ಎಂದು ಸಾಮಾನ್ಯವಾಗಿ ಗೋ(ಆಕಳೆ ಆಗಲಿ ಎತ್ತೇ ಆಗಲಿ)ವಿನ ಪಾದಸ್ಪರ್ಶ ವಿಹಿತವಲ್ಲವಾದ್ದರಿಂದ ಧರ್ಮದ ಮರ್ಮವನ್ನರಿತ ಶ್ರೀಕೃಷ್ಣ ಹೇಗೆ ಪಾದದಿಂದ ಆಕ್ರಮಿಸಿದ ಎಂಬ ಶಂಕೆಗೆ ಅವಕಾಶವಿಲ್ಲ. ಅವನು ಗೋವೇ ಅಲ್ಲ. ತಮೋಯೋಗ್ಯ ಅಸುರನು. ಅವನನ್ನು ಒದ್ದು ತಮಸ್ಸಿಗೆ ಹಾಕಿದ್ದು ಯೋಗ್ಯ.

ಶ್ರೀಕೃಷ್ಣನು ಅವನನ್ನು ಸಂಹರಿಸಿ ಗೋಕುಲದವರ ಭಯವನ್ನು ಪರಿಹರಿಸಿದನು. ಇತ್ತ ನಾರದರು ಕಂಸನ ಬಳಿಗೆ ಬಂದು ಹೀಗೆ ಹೇಳುತ್ತಾರೆ :–

ಯಶೋದಾಯಾಃ ಸುತಾಂ ಕನ್ಯಾಂ ದೇವಕ್ಯಾಃ ಕೃಷ್ಣಮೇವಚ ।
ರಾಮಂ ಚ ರೋಹಿಣೀಪುತ್ರಂ ವಸುದೇವೇನ ಬಿಭ್ಯತಾ ॥
ನ್ಯಸ್ತೌ ಸ್ವಮಿತ್ರೇ ನಂದೇ ವೈ ಯಾಭ್ಯಾಂ ತೇ ಪುರುಷಾಹತಾಃ ॥

ಗೋಕುಲಕ್ಕೆ ಅಕ್ರೂರನ ಪ್ರಯಾಣ–

ಕಂಸನೇ! ನೀನು ಕೊಲ್ಲಲು ಯತ್ನಿಸಿದ ಹೆಣ್ಣುಮಗುವು ಯಶೋದೆಯದು. ಕೃಷ್ಣನು ದೇವಕಿಯ ಎಂಟನೆಯ ಮಗನು. ಬಲರಾಮ ಕೃಷ್ಣರೇ ನಿನ್ನವರಾದ ಅಸುರರನ್ನೆಲ್ಲ ಕೊಂದುಹಾಕಿದರು.

ಇದನ್ನು ಕೇಳಿ ಕಂಸನು ವಸುದೇವನನ್ನು ಕಪಟಿಯೆಂದು ಕೊಲ್ಲಲು ಸಿದ್ದನಾದಾಗ ಸಮಾಧಾನ ಮಾಡಿದರು. ಕಂಸನಾದರೋ ಕೃಷ್ಣನು ತನ್ನ ಮೃತ್ಯುವೆಂದು ಬಗೆದು ವಸುದೇವದೇವಕಿಯರನ್ನು ಸೆರೆಯಲ್ಲಿಟ್ಟನು. ಕೇಶಿಯೆಂಬ ದಾನವನನ್ನು ರಾಮಕೃಷ್ಣರನ್ನು ಕೊಲ್ಲೆಂದು ಅಪ್ಪಣೆ ಮಾಡಿ ಗೋಕುಲಕ್ಕೆ ಕಳುಹಿಸಿದನು. ದೈತ್ಯಸ್ವರೂಪರಾದ ಚಾಣೂರ ಮೊದಲಾದ ಜಟ್ಟಿಗಳನ್ನು ಕರೆಸಿದನು.

ನನ್ನ ತಾಯಿಯು ವನದಲ್ಲಿ ಸಂಚರಿಸುವಾಗ, ದ್ರುಮಿಳ ಎಂಬ ಗಂಧರ್ವನು ಉಗ್ರಸೇನನ ವೇಷದಿಂದ ಬಂದು ರಮಿಸಿದನು. ನನ್ನ ತಾಯಿಗೆ ಅವನ ಮೋಸವು ಗೊತ್ತಾಗಿ 'ನಿನ್ನಿಂದ ಹುಟ್ಟುವ ಮಗನು ಕೂರಿಯಾಗಿ, ದೇವ ಬ್ರಾಹ್ಮಣರ ಅನುಗ್ರಹಕ್ಕೆ ಬಾಹಿರನಾಗಲಿ' ಎಂದಳು. ಈ ಸಂಗತಿಯನ್ನು ನಾರದರು ನನಗೆ ಹೇಳಿದರು. ನಾನು ಹೇಡಿಯಾದ ಉಗ್ರಸೇನನ ವೀರ್ಯದಿಂದ ಹುಟ್ಟಿದ ಮಗನಲ್ಲ. ದೇವಕಿಯೂ ನನ್ನ ತಂಗಿಯಲ್ಲ. ಯಾದವರು ನಮ್ಮವರಲ್ಲವಾದುದರಿಂದ ಅವರನ್ನು ಕೊಂದರೆ ನನಗೆ ದೋಷವಿಲ್ಲ ಎಂದು ಸಭೆಯಲ್ಲಿ ಹೇಳಿದನು. ಅನಂತರ ಅಕ್ರೂರನನ್ನು ಕರೆದು, ಅಕ್ರೂರನೇ! ಗೋಕುಲಕ್ಕೆ ಹೋಗಿ ರಾಮಕೃಷ್ಣರನ್ನು ಬಿಲ್ಲು ಹಬ್ಬವೆಂದು ಹೇಳಿ ಇಲ್ಲಿಗೆ ಕರೆದುಕೊಂಡು ಬಾ. ಅವರಿಬ್ಬರು ಇಲ್ಲಿಗೆ ಬಂದಾಗ ಅವರನ್ನು ಕೊಲ್ಲಿಸಿ, ದೇವಪಕ್ಷಪಾತಿಗಳನ್ನೆಲ್ಲ ಕೊಂದು ಈ ಭೂಮಿಯನ್ನು ಅನುಭವಿಸುವೆನು ಎಂದನು.

ಅಕ್ರೂರನು ಮಾಡುವ ಪ್ರಯತ್ನವೂ ನಮ್ಮದು. ಫಲವು ಈಶ್ವಾರಧೀನ. ನಿನ್ನ ಮಾತಿನಂತೆ ಹೋಗಿ ಬರುವೆನು ಎಂದು ಮಥುರೆಯಿಂದ ಗೋಕುಲಕ್ಕೆ ಪ್ರಯಾಣಗೈದನು.

ಕೇಶಿ ವಧೆ-

ಕುದುರೆಯ ಆಕಾರದ ಕೇಶಿಯೆಂಬ ದಾನವನು ಗೋಕುಲಕ್ಕೆ ಬಂದು ಎಲ್ಲರನ್ನೂ ಹೆದರಿಸಿದನು. ಎಲ್ಲರೂ ನಡುಗಿ ಹೋದರು. ಕೃಷ್ಣನು ಆ ನೀಚನ ಬಾಯೊಳಗೆ ತನ್ನ ತೋಳನ್ನು ತುರುಕಿ ಅದು ದೇಹದೊಳಗೆಲ್ಲ ವ್ಯಾಪಿಸುವ ಹಾಗೆ ಬೆಳೆಸಿದನು. ಕೇಶಿಯ ದೇಹವು ಬಿರಿದು ಸತ್ತನು.

ಸಮೇಧಮಾನೇನ ಸ ಕೃಷ್ಣಬಾಹುನಾ ನಿರುದ್ಧವಾಯುಶ್ಚರಣಾಂಶ್ಚ ವಿಕ್ಷಿಪನ್ ।
ಪ್ರಸ್ವಿನ್ನಗಾತ್ರಃ ಪರಿವೃತ್ತಲೋಚನಃ ಪಪಾತ ಲಂಬಂ ವ್ಯಸೃಜನ್ ಕ್ಷಿತೌ ವ್ಯಸುಃ ॥

ಆಗ ದೇವತೆಗಳು ಗಗನದಲ್ಲಿ ನಿಂತು ಸ್ವಾಮಿಯನ್ನು ಸ್ತುತಿಸಿದರು. ಕೃಷ್ಣನ ಬಳಿಗೆ ಬಂದ ನಾರದರು ಮಾತನಾಡುತ್ತಾರೆ :-

ಕೃಷ್ಣ ಕೃಷ್ಣಾಪ್ರಮೇಯಾತ್ಮನ್ ಯೋಗೇಶ ಜಗದೀಶ್ವರ ।
ವಾಸುದೇವಾಖಿಲಾವಾಸ ಸಾತ್ವತಾಂ ಪ್ರವರಪ್ರಭೋ ॥

ನಾರದನು ಕೃಷ್ಣನೇ! ಅಪ್ರಮೇಯಾತ್ಮನೇ! ಜಗದೀಶ್ವರನೇ! ನೀನು ಪ್ರತಿಯೊಬ್ಬರ ಹೃದಯ ಗುಹಾಶಯನು. ಸಾಕ್ಷಿಯು, ಜಗತ್ತನ್ನು ಪ್ರಕೃತಿಯಿಂದ ಸೃಷ್ಟಿಸಿ, ಪಾಲಿಸಿ, ಸಂಹರಿಸುವೆ. ದುಷ್ಟನಿಗ್ರಹ ಮತ್ತು ಶಿಷ್ಟಪರಿಪಾಲನೆಗಾಗಿಯೇ ನೀನು ಅವತರಿಸುವೆ.

ಚಾಣೂರಂ ಮುಷ್ಟಿಕಂ ಚೈವ ಮಲ್ಲಾನನ್ಯಾಂಶ್ಚ ಹಸ್ತಿನಂ ।
ಕಂಸಂ ಚ ನಿಹತಂ ದ್ರಕ್ಷ್ಯೇ ಪರಶ್ವೋಽಹನಿ ತೇ ವಿಭೋ ॥

ಕುವಲಯಾಪೀಡವೆಂಬ ಆನೆಯನ್ನೂ, ಅದರ ಮಾವಟಿಗನನ್ನೂ, ಜಟ್ಟಿಗಳನ್ನೂ ಮತ್ತು ಕಂಸನನ್ನೂ ಇವತ್ತಿಗೆ ನಾಲ್ಕನೆಯ ದಿನದಲ್ಲಿ ನೀನು ಸಂಹರಿಸುವೆ. ಇದನ್ನು ನಾನು ನೋಡುವೆನು.

ಕಂಸನ ಹನನ ನಾಲ್ಕನೆಯ ದಿನದಲ್ಲೇ. ಮೂರನೇ ದಿನವಲ್ಲ–

ನಾರದನು ಹೇಳಿದ ದಿನದಿಂದ ನಾಲ್ಕನೇ ದಿನ ನಡೆದ ಕಂಸನ ಹಿಂಸೆಯನ್ನು (ಮರಣವನ್ನು) ಮೇಲಿನ ಶ್ಲೋಕದಲ್ಲಿ ''ಪರಶ್ವೋಽಹನಿ ನಿಹತಂ ದ್ರಕ್ಷ್ಯೇ'' ಎಂದು ನಾಳಿದ್ದು ನೋಡುವೆನೆಂದು ಹೇಳಿದುದು ಸರಿಯಲ್ಲ, ಎನ್ನುವಂತಿಲ್ಲ.

''ಪರಶ್ವಃ'' ಎನ್ನುವಲ್ಲಿ ಪರಾಭ್ಯಾಂ=ತನ್ನ ಮುಂದಿನ ತಿಥಿಗಳಿಂದ, ಸಹಿತಂ=ಕೂಡಿದ, ಶ್ವಃ=ನಾಳೆ, ಹೀಗೆ ವಿಗ್ರಹಮಾಡಿ ಅರ್ಥಮಾಡಿದ್ದರೆ ಇವತ್ತು, ನಾಳೆ, ಮುಂದಿನ ಎರಡು ದಿನಗಳು. ಹೀಗೆ ವಿವಕ್ಷಿತವಾದ ನಾಲ್ಕನೇ ದಿನವೆಂದು ಅರ್ಥವಾಗುವುದು. ಅಥವಾ ತೇ=ನಿನ್ನನ್ನು, ಪರಶ್ವಃ=ನಾಡಿದ್ದು, ದ್ರಕ್ಷ್ಯೇ=ಮಧುರೆಯಲ್ಲಿ ನೋಡು-ವೆನು. ಅಹನಿ=ಅದರ ಮುಂದಿನ ದಿನ, ನಿಹತಂ ಕಂಸಂ ಚ ದ್ರಕ್ಷ್ಯೇ=ಸತ್ತ ಕಂಸನನ್ನೂ ನೋಡುವೆ. ಹೀಗೆ ಯೋಜಿಸಿದರೂ ಇಷ್ಟವಾದ ಅರ್ಥವಾಗುವುದು. ಅಥವಾ ''ಪರ'' ಉತ್ತಮನೇ! ಎಂದು ಅರ್ಥಮಾಡಿ, ಶ್ವಃ ''ಅಹನಿ'' ಮುಂದಿನ ದಿನಗಳಲ್ಲಿ ಎಂದರೆ ಯೋಗ್ಯತಯಾ ನಾಲ್ಕನೇ ದಿನವನ್ನೇ ಗ್ರಹಿಸಲು ಬರುವುದು.

ಹಾಗೆಯೇ ಮುಂದೆ ಸತ್ತ ಗುರುಪುತ್ರನನ್ನು ಬದುಕಿಸಿ, ಗುರುದಕ್ಷಿಣೆಯನ್ನು ಕೊಡವೆ. ದುಷ್ಟರನ್ನು ಮರ್ದಿಸಿ, ರುಕ್ಮಿಣಿಯನ್ನು ತಂದು ಮದುವೆಯಾಗುವೆ. ಇತರ ದುಷ್ಟರನ್ನೆಲ್ಲ ಸದೆಬಡಿಯುವೆ. ಕೊನೆಗೆ ಕುರುಕ್ಷೇತ್ರದಲ್ಲಿ ಹದಿನೆಂಟು ಅಕ್ಷೌಹಿಣೀ ಸೈನ್ಯವನ್ನು ಸಂಹರಿಸುವೆ.

ಯಾನಿ ಚಾನ್ಯಾನಿ ವೀರ್ಯಾಣಿ ದ್ವಾರಕಾಮಾವಸನ್ ಭವಾನ್ ।
ಕರ್ತಾ ದ್ರಕ್ಷ್ಯಾಮ್ಯಹಂ ತಾನಿ ಗೇಯಾನಿ ಕವಿಭಿರ್ಭುವಿ ॥

ಇವೇ ಮೊದಲಾದ ವ್ಯಾಪಾರವನ್ನು ನೀನು ಮಾಡುವೆ. ಅದೆಲ್ಲವನ್ನೂ ನಾನು ನೋಡುವೆನು. ಯಾದವರ ರಕ್ಷಣಾಭಾರವನ್ನು ಹೊತ್ತಿರುವ, ಈಶ್ವರನಾದ ನಿನಗೆ ನಮಸ್ಕಾರ! ಎಂದು ಸ್ತುತಿಸಿ ಹೊರಟುಹೋದರು. ಶ್ರೀಕೃಷ್ಣನು ಎಂದಿನಂತೆ ಕಾಡಿನಲ್ಲಿ ದನಗಳನ್ನು ಮೇಯಿಸುತ್ತಿರುವಾಗ ಮಯನ ಪುತ್ರ ವ್ಯೋಮಾಸುರನೆಂಬುವನು ಗೋಪಾಲನ ವೇಷದಿಂದ ಬಂದು ಗೊಲ್ಲಬಾಲಕರನ್ನು ಗುಹೆಯೊಳಗೆ ತುರುಕಿ, ಬಾಗಿಲಿಗೆ ಬಂಡೆ ಬಡಿದನು. ಶ್ರೀಕೃಷ್ಣನು ಆ ವ್ಯೋಮನನ್ನು ಕೊಂದು ಗೋಪಾಲರನ್ನು ಗುಹೆಯಿಂದ ಈಚೆಗೆ ತಂದು ರಕ್ಷಿಸಿದನು.

ನಾನೆಂತಹ ಭಾಗ್ಯಶಾಲಿ

ಕಿಂ ಮಯಾಽಽಚರಿತಂ ಭದ್ರಂ ಕಿಂ ತಪ್ತಂ ಪರಮಂ ತಪಃ ।
ಕಿಂ ವಾಽಥಾಪ್ಯರ್ಹತೇ ದತ್ತಂ ಯದ್ ದ್ರಕ್ಷ್ಯಾಮ್ಯದ್ಯ ಕೇಶವಮ್ ॥

ಅಕ್ರೂರನು ನಾನೇನು ಪುಣ್ಯಮಾಡಿದ್ದೆನೋ? ಖಲನಾದ ಕಂಸನ ಸಂಗದಲ್ಲಿದ್ದರೂ ಶ್ರೀಕೃಷ್ಣನ ಸಂದರುಶನಭಾಗ್ಯವು ದೊರೆಯಿತು. ನನ್ನ ಪಾಪಗಳೆಲ್ಲ ನಷ್ಟವಾದುವು. ಜನ್ಮ ಸಫಲವಾಯಿತು. ಕಂಸನು ರಾಮಕೃಷ್ಣರನ್ನು ಕರೆತರಲು ಮತ್ತಾರನ್ನೂ ಕಳುಹಿಸದೆ ನನ್ನನ್ನೇ ಕಳುಹಿಸುತ್ತಿರುವುದರಿಂದ ನನಗೆ ಅನುಗ್ರಹವನ್ನೇ ಮಾಡಿರುವನು. ಆಶ್ಚರ್ಯ! ಲಕ್ಷ್ಮೀ ಬ್ರಹ್ಮಾದಿಗಳಿಂದ ಅರ್ಚಿತವಾದ ಭಗವಂತನ ಪಾದಗಳನ್ನು ನೋಡುವೆನು. ಸುಂದರವಾದ ಮಂದಹಾಸಸೂಚಕ ಪ್ರಸನ್ನ ದೃಷ್ಟಿಯುಳ್ಳ, ಇಂದೀವರದಳನಯನನ ಮುಖಾರವಿಂದವನ್ನು ನೋಡಿಯೇ ನೋಡುವೆನು. ಈಗಾಗಲೇ ಶುಭಸೂಚನೆಗಳೂ, ಶಕುನಗಳೂ ಕಾಣುತ್ತಿವೆ. ಶ್ರೀಕೃಷ್ಣನು ಅಹಂಕಾರ ವಿಲ್ಲದವನು. ಭ್ರಾಂತಿಯನ್ನು ದೂರ ಓಡಿಸಿದವನು. ಸರ್ವಗುಣಪರಿಪೂರ್ಣನು ಸಾಕ್ಷಿಯು, ಸಜ್ಜನರಿಗೆ ಮಂಗಳ ವನ್ನೂ, ಪಾವನತೆಯನ್ನೂ ಉಂಟುಮಾಡುವ ಗುಣ, ಕರ್ಮ, ಜನ್ಮಗಳುಳ್ಳವನು. ದೇವತೆಗಳಿಂದ ಸ್ತುತ್ಯವಾದ ಯಶಸ್ಸುಳ್ಳವನು. ಲಕ್ಷ್ಮೀದೇವಿಯಿಂದ ಆಕಾಂಕ್ಷಿತಸ್ವರೂಪನಾದ ಅವನನ್ನು ಕಣ್ದಣಿಯೆ ನೋಡುವೆನು. ಪರಮಾತ್ಮ ನನ್ನು ದರ್ಶನ ಮಾಡಿಸತಕ್ಕ ಇವತ್ತಿನ ಪ್ರಭಾತ ಕಾಲವು ಅತ್ಯಂತ ಮಂಗಳಕರವು. ಕಾಲಸರ್ಪದಿಂದ ಭೀತರಾದ ಸುಜನರಿಗೆ ಅಭಯಪ್ರದವಾದ ಹಸ್ತವನ್ನು ನನ್ನ ತಲೆಯ ಮೇಲೆ ಇಡುವನಲ್ಲವೆ? ಶತ್ರುಪಕ್ಷದವನೆಂದು ನನ್ನನ್ನು ತಿಳಿಯದೆ ನನ್ನ ನಿರ್ಮಲ ಮನಸ್ಸನ್ನು ತಿಳಿಯಬಲ್ಲವನಾದ್ದರಿಂದ ನನ್ನನ್ನು ತಿರಸ್ಕರಿಸುವುದಿಲ್ಲ.

ಅಪ್ಯಂಘ್ರಿಮೂಲೇ ಪತಿತಸ್ಯ ಮೇ ವಿಭುಃ ಶಿರಸ್ಯಧಾಸ್ಯನ್ನಿಜಹಸ್ತಪಂಕಜಮ್ ।
ದತ್ತಾಭಯಂ ಕಾಲಭುಜಂಗರಂಹಸಾಂ ಪ್ರೋದ್ವೇಜಿತಾನಾಂ ಶರಣೈಷಿಣಾಂ ನೃಣಾಮ್ ॥

ನಾನು ಅವನ ಪಾದಗಳಲ್ಲಿ ಬಿದ್ದಾಗ ಕೃಷ್ಣನು ನನ್ನನ್ನೆತ್ತಿ ಮುಖವನ್ನು ನೋಡಿ ಮಾತನಾಡಿಸುವನು. ಆಗಲೇ ನಾನು ಪಾಪವಿದೂರನಾಗಿ ಉದ್ರಿಕ್ತಾನಂದವನ್ನು ಹೊಂದಿಬಿಡುವೆನು. ಅವನ ಕುಲದಲ್ಲಿಯೇ ಹುಟ್ಟಿರುವೆನು ಮತ್ತು ಅವನನ್ನೇ ನನ್ನ ಕುಲಸ್ವಾಮಿಯೆಂದು ನಂಬಿರುವೆನು.

ಲಬ್ಧಾಂಗಸಂಗಂ ಪ್ರಣತಂ ಕೃತಾಂಜಲಿಂ
ಮಾಂ ವಕ್ಷ್ಯತೇಽಕ್ರೂರ ತತೇತ್ಯುರುಶ್ರವಾಃ ।
ತದಾ ವಯಂ ಜನ್ಮಭೃತೋಽಮಹೀಯಸಾ
ನೈವಾದೃತೋ ಯೋ ಧಿಗಮುಷ್ಯ ಜನ್ಮ ತತ್ ॥

ಆದುದರಿಂದ ನನ್ನನ್ನು ಬಿಗಿದಪ್ಪಿ ''ತಾತಾ! ಅಕ್ರೂರ! ಬಂದೆಯಾ''' ಎಂದು ಮಾತನಾಡಿಸುವನು. ಆಗಲೇ ನನ್ನ ಜನ್ಮವು ಸಫಲವಾಗುವುದು. ಅತ್ಯಂತ ಪೂಜ್ಯನಾದ ಅವನಿಂದ ಆದರಿಸಲ್ಪಡದ ಜೀವನ ಜನ್ಮವು ನಿಂದ್ಯವೇ ಸರಿ. ಶ್ರೀಕೃಷ್ಣನು ಪರಮಾತ್ಮನಾದುದರಿಂದ ಅವನಿಗೆ ಯೋಗ್ಯತೆ ಮೀರಿದ ಪ್ರಿಯನಾಗಲಿ, ಅಪ್ರಿಯನಾಗಲಿ, ದ್ವೇಷಿಯಾಗಲಿ, ಉದಾಸೀನನಾಗಲಿ, ಯಾರೂ ಇಲ್ಲ. ಭಜಕನ ಯೋಗ್ಯತಾನುಸಾರ ಫಲವನ್ನು ಕೊಟ್ಟು ಬಿಡುವನು. ಬಲರಾಮನು ನನ್ನನ್ನು ಸತ್ಕರಿಸುವನು ಎಂದು, ಅಕ್ರೂರನು ಹಂಬಲಿಸುತ್ತ ಗೋಧೂಳಿಲಗ್ನಕ್ಕೆ ಗೋಕುಲಕ್ಕೆ ಬಂದನು.

ಪದಾನಿ ತಸ್ಯಾಖಿಲಲೋಕಪಾಲಕಿರೀಟಚೂಡಾಮಣಿಪಾದರೇಣೋಃ ।
ದದರ್ಶ ಗೋಷ್ಠೇ ಕ್ಷಿತಿಕೌತುಕಾನಿ ವಿಲಕ್ಷಿತಾನ್ಯಬ್ಜಯವಾಂಕುಶಾದ್ಯೈಃ ॥
ರಥಾದವಸ್ಕಂದ್ಯ ಸ ತೇಷ್ವಚೇಷ್ಟತ ಪ್ರಭೋರಿಮಾನ್ಯಂಘ್ರಿರಜಾಂಸ್ಯಹೋ ಇತಿ ॥

ಆಗ ತಾನೇ ಶ್ರೀಕೃಷ್ಣನು ದನಗಳನ್ನು ಕರೆದುಕೊಂಡು ಬಂದಿದ್ದನಾದ್ದರಿಂದ ನೆಲದ ಧೂಳಿನಲ್ಲಿ ಅವನ ಅಂಗಾಲಿನ ಧ್ವಜಾಂಕುಶಾದಿ ರೇಖೆಗಳು ಮೂಡಿದ್ದುವು. ಅವನ್ನು ನೋಡಿ ಅಕ್ರೂರನು ತೇರಿನಿಂದಿಳಿದು ಆ ಧೂಳಿಯಲ್ಲಿ ಹೊರಳಾಡಿ ನಾ ಧನ್ಯ ಧನ್ಯನೆಂದುಕೊಂಡನು. ರಾಮಕೃಷ್ಣರು ಕೊಟ್ಟಿಗೆಯಲ್ಲಿದ್ದರು. ಅವರನ್ನು ಅಕ್ರೂರನು ನೋಡಿ ಓಡಿ ಬಂದು ಭಕ್ತ್ಯುದ್ರೇಕದಿಂದ ಅವರ ಪಾದಗಳ ಮೇಲೆ ಬಿದ್ದನು. ಶ್ರೀಹರಿಯು ಅವನನ್ನೆತ್ತಿ ಅಪ್ಪಿಕೊಂಡನು. ಬಲರಾಮನು ಅವನಿಗೆ ನಮಿಸಿದನು ಮತ್ತು ಅಕ್ರೂರನ ಕೈಹಿಡಿದುಕೊಂಡು ಮನೆಗೆ ಕರೆತಂದು ಭೋಜನ ಮಾಡಿಸಿ, ತಾಂಬೂಲವನ್ನು ಕೊಟ್ಟನು.

ಗೋಕುಲಕ್ಕೆ ಅಕ್ರೂರನ ಆಗಮನ

ಅಕ್ರೂರನು ಅಂದುಕೊಂಡಿದ್ದಂತೆ ಶ್ರೀಕೃಷ್ಣನು ಆದರವನ್ನು ತೋರಿದನು. ಅಕ್ರೂರನು ನಂದಗೋಪ, ಯಶೋದೆ, ರಾಮಕೃಷ್ಣರಿಗೆ ಕಂಸನ ಆಹ್ವಾನವನ್ನು ತಿಳಿಸಿ, ಪಾಪಿ ಕಂಸನ ಮನದೊಳಗಿರುವ ದುಷ್ಟವಾದ ಅಭಿಪ್ರಾಯವನ್ನು ತಿಳಿಸಿದನು. ನಂದಗೋಪ, ಗೊಲ್ಲರು, ಹಾಲು, ಮೊಸರು ಇತ್ಯಾದಿಗಳನ್ನು ತೆಗೆದುಕೊಂಡು ಬೆಳಿಗ್ಗೆ ಹೊರಡಲು ಸಿದ್ಧಮಾಡಿಕೊಳ್ಳಹತ್ತಿದರು. ರಾಮಕೃಷ್ಣರೂ ಬೆಳಿಗ್ಗೆ ಅಕ್ರೂರನೊಡನೆ ಮಧುರೆಗೆ ಹೊರಡಲು ಸಿದ್ಧರಾದರು. ಪ್ರಯಾಣ ಸಿದ್ಧತೆಯನ್ನು ನೋಡಿದ ಗೋಪಿಯರು, ಕೃಷ್ಣನನ್ನು ಬಿಟ್ಟಿರಲಾರದೆ, ಒಂದೆಡೆ ಸೇರಿ ಹೀಗೆ ಮಾತನಾಡಿಕೊಂಡರು.

ನೀನು ಅಕ್ರೂರನಲ್ಲ, ಕ್ರೂರನೇ–

ಅಹೋವಿಧಾತಸ್ತವ ನ ಕ್ವಚಿದ್ದಯಾ ಸಂಯೋಜ್ಯ ಮೈತ್ರ್ಯಾ ಪ್ರಣಯೇನ ದೇಹಿನಃ ।
ತಾಂಶ್ಚಾ ಕೃತಾರ್ಥಾನ್ ವಿಯುನಂಕ್ಷ್ಯಪಾರ್ಥಕಂ ವಿಚೇಷ್ಟಿತಂ ತೇಽರ್ಭಕಚೇಷ್ಟಿತಂ ಯಥಾ ॥

ವಿಧಿಯೇ! ನಿನಗೆ ಕನಿಕರವೇ ಇಲ್ಲ. ಜನರಿಗೆ ಪರಸ್ಪರ ಪ್ರೀತಿಯನ್ನು ಹುಟ್ಟಿಸಿ, ಒಟ್ಟಿಗೆ ಸೇರಿಸಿ ಮನೋರಥಗಳನ್ನು ಹೊಂದದೇ ಇರುವಂತೆ ಅಗಲಿಸುವೆ. ಎಂತಹ ಅಮಂಗಳಕರವಿದು? ವಿಧಿಯನ್ನೇಕೆ ನಿಂದಿಸಬೇಕು? ಮನೆಮಂದಿಯನ್ನೇ ಬಿಟ್ಟು ಹೊರಟ ಕೃಷ್ಣನಿಗೆ ನಂಬಿದ ದಾಸಿಯರು ಹೇಗೆ ಜ್ಞಾಪಕಕ್ಕೆ ಬಂದಾರು? ಹೊಸ ಹೆಂಡತಿಯು ಸಿಗುವಾಗ ಹಳೆಯ ಹೆಂಡಿರಲ್ಲಿ ಪ್ರೇಮ ಹೇಗೆ ಇದ್ದೀತು? ಮಧುರಾಪುರದ ಸ್ತ್ರೀಯರಿಗೆ ಅದೃಷ್ಟ ಕುಲಾಯಿಸಿತು. ಅವರು ಕೃಷ್ಣನನ್ನು ವಶಮಾಡಿಕೊಂಡು ಬಿಡುವರು. ಮುಂದೆ ಕೃಷ್ಣನು ಈ ಹಳ್ಳಿಮುಕ್ಕಗಳನ್ನು ಬಂದು ನೋಡುವನೆ?

ಕ್ರೂರಸ್ತ್ವಮಕ್ರೂರಸಮಾಖ್ಯಯಾ ಸ್ಮೃತಃ ।
ಚಕ್ಷುರ್ಹಿ ದತ್ತಂ ಹರಸೇ ಬತಾಜ್ಞವತ್ ॥

ಅಕ್ರೂರನು ಕರುಣೆಯಿಲ್ಲದೆ ಕೃಷ್ಣನನ್ನು ನಮ್ಮಿಂದ ಅಗಲಿಸಿದನು. ಇವನಿಗೆ ಅಕ್ರೂರನೆಂದು ಹೆಸರನ್ನು ಯಾರು ಇಟ್ಟರೋ ಕಾಣೆವು? ಅದೋ! ಕೃಷ್ಣನು ರಥವನ್ನು ಹತ್ತುತ್ತಿರುವನು. ಇಲ್ಲಿರುವ ವೃದ್ಧರೂ ಅವನನ್ನು ತಡೆಯುತ್ತಿಲ್ಲವಲ್ಲ? ಮುಖ್ಯ ದೈವವೇ ನಮಗೆ ಪ್ರತಿಕೂಲವಾಗಿದೆ.

ನಿವಾರಯಾಮಃ ಸಮುಪೇತ್ಯ ಮಾಧವಂ
ಕಿಂ ನೋಽಕರಿಷ್ಯನ್ ಕುಲವೃದ್ಧಬಾಂಧವಾಃ ।
ನೀತಾಃ ಸ್ಮ ನಃ ಕ್ಷಣಮಿವ ಕ್ಷಣದಾ ವಿನಾ ತಂ
ಗೋಪ್ಯಃ ಕಥಂ ನ್ವತಿತರೇಮ ತತೋ ದುರಂತಮ್ ॥

ಬನ್ನಿ! ಕೃಷ್ಣನನ್ನು ತಡೆದುಬಿಡೋಣ. ಯಾರು ಏನೆಂದರೂ ಭಯಪಡಬೇಕಾಗಿಲ್ಲ. ರಾಸಕ್ರೀಡೆಯಿಂದ ಪರಮ ಸಂತೋಷ ಪಡಿಸಿದ ಕೃಷ್ಣನನ್ನು ಬಿಟ್ಟು ಅಪಾರ ದುಃಖದಿಂದ ಹೇಗೆ ದಾಟಬಲ್ಲೆವು?

ಎಲ್ಲ ಗೋಪಿಯರು ನಾಚಿಕೆಯನ್ನು ಬಿಟ್ಟು ''ಗೋವಿಂದ! ದಾಮೋದರ! ಮಾಧವ!'' ಎಂದು ಕೂಗಲಾರಂಭಿಸಿದರು.

ತಾಸ್ತಥಾ ತಪ್ಯತೀರ್ವೀಕ್ಷ್ಯ ಸ್ವಪ್ರಸ್ಥಾನೇ ಯದೂತ್ತಮಃ ।
ಸಾಂತ್ವಯಾಮಾಸ ಸಂಪ್ರೇಷ್ಯೈರಾಯಾಸ್ಯ ಇತಿ ದೌತ್ಯಕೈಃ ।

ಕೃಷ್ಣನು ಗೋಪಿಯರಿಗೆ ದೂತನ ಮೂಲಕ 'ನಾನು ಬರುವೆನು' ಎಂದು ಹೇಳಿಕಳುಹಿಸಿ ಸಮಾಧಾನ ಮಾಡಿ ಹೊರಟುಬಿಟ್ಟನು. ಗೋಪಿಯರು ಚಿತ್ರಬೊಂಬೆಗಳಂತೆ ನಿಂತು ರಥವು ಕಣ್ಮರೆಯಾದ ಮೇಲೆ ಹಿಂತಿರುಗಿ ಬಂದು ಹಗಲು ರಾತ್ರಿ ಒಂದು ಕ್ಷಣ ಬಿಡದಂತೆ ಕೃಷ್ಣನ ವ್ಯಾಪಾರಗಳನ್ನೇ ಗಾನ ಮಾಡುತ್ತಾ ದಿನಗಳನ್ನು ಕಳೆದರು.

ಇತ್ತ ಅಕ್ರೂರನು ರಥವನ್ನು ನಿಲ್ಲಿಸಿ, ಯಮುನೆಯಲ್ಲಿ ಮಾಧ್ಯಾಹ್ನಿಕ ಕರ್ಮ ಮಾಡಿ ನೀರಿನಲ್ಲಿ ಮುಳುಗಿ ನಾರಾಯಣನ ಮಂತ್ರವನ್ನು ಮಾಮೂಲಿನಂತೆ ಜಪಿಸಿದನು. ಆಗ ನೀರಿನೊಳಗೆ ರಾಮಕೃಷ್ಣರನ್ನು ಕಂಡನು. ತಲೆಯೆತ್ತಿ ನೋಡಿದಾಗ ರಥದಲ್ಲಿ ಅವರಿಬ್ಬರೂ ಕುಳಿತಿರುವುದನ್ನು ನೋಡಿ, ನೀರಿನಲ್ಲಿ ಇವರಿಬ್ಬರನ್ನು

ನೋಡಿದುದು ಸುಳ್ಳೇನು? ತಿರುಗಿ ನೋಡುವುದಾಗಿ ನೀರಿನಲ್ಲಿ ಮುಳುಗಿದನು. ಆಗ ಶೇಷನ ಮೇಲೆ ಕುಳಿತಿರುವ ಶ್ರೀಹರಿಯನ್ನೂ, ಬ್ರಹ್ಮಾದಿ ಅವನ ಪರಿವಾರವನ್ನೂ ಕಂಡು ಕೈಮುಗಿದು ಸ್ತುತಿಸಿದ.

ಅಕ್ರೂರನ ಪ್ರಾರ್ಥನೆ

ಅಕ್ರೂರನ ಪ್ರಾರ್ಥನೆಯನ್ನು ಶ್ರೀಮದ್ವಾದಿರಾಜಪೂಜ್ಯಚರಣರು ಒಂದೇ ಪದ್ಯದಲ್ಲಿ ಹೃದ್ಯವಾಗಿ ಬಣ್ಣಿಸಿದ್ದಾರೆ.

ಸಂಸಾರಾಸಾರಸಿಂಧೋರ್ಜನಿಮರಣಜರಾದ್ಯೂರ್ಮಿಭಿರ್ಬಾಧಿತಾನಾಂ
ದಾರಾಗಾರಾದಿಭಾರಾಃ ಕಿಮಿಹಸುಖಕರಾಃ ಪ್ರೇಮಪಾಶೈರ್ನಿಬದ್ಧಾಃ ।
ಕೃಷ್ಣ! ತ್ವತ್ಪಾದಪೋತಂ ಪ್ರದಿಶ ತದನಿಶಂ ಸತ್ಪತಾಕಂ ಸಕೇತುಂ
ರಮ್ಯಂ ಕರ್ಮಂದಿಗಮ್ಯಂ ಭವಜಲಧಿಭವಚ್ಛೇದವಿಚ್ಛೇದಹೇತುಮ್ ॥

ನಾವೆಲ್ಲರೂ ಸಂಸಾರವೆಂಬ ಸಾಗರದಲ್ಲಿ ಮುಳುಗುತ್ತಿದ್ದೇವೆ. ಸಾಯುವ ಘಟ್ಟದಲ್ಲಿದ್ದೇವೆ. ಇದಕ್ಕೆ ಕಾರಣ ನಮಗೆ ಈಜುವ ಕಲೆ ಗೊತ್ತಿಲ್ಲ. ಹೇಗೆ ಜೀವನ ನಡೆಸಬೇಕು ಎಂಬುದನ್ನರಿಯದೆ ಸ್ವಾರ್ಥಿಗಳಾಗಿ ರಾಗದ್ವೇಷ-ಗಳಿಂದ ಕಾಲಹರಣ ಮಾಡುತ್ತಿದ್ದೇವೆ. ಜೀವನದ ಕಲೆಯನ್ನು ಕೃಷ್ಣ ತಿಳಿಸಿದ್ದಾನೆ. ಇದನ್ನು ನಾವು ತಿಳಿದಿಲ್ಲ.

ಕೃಷ್ಣ ಗೀತೆಯಲ್ಲಿ ಹೇಳಿದ 'ಕರ್ತವ್ಯವೇ ಜೀವನದ ಕಲೆ' –'ಯೋಗಃ ಕರ್ಮಸು ಕೌಶಲಮ್' ಎಂದು. ಸ್ವಾರ್ಥವಿಲ್ಲದೆ ಭಕ್ತಿಭಾವದಿಂದ ಮಾಡುವ ಕರ್ತವ್ಯ ಯೋಗವೆನಿಸುತ್ತದೆ. ಜನನಮರಣಗಳೇ ಮೊದಲಾದ ಅಲೆಗಳು ನಮ್ಮನ್ನು ಅಪ್ಪಳಿಸುತ್ತಿವೆ. ಇಂತಹ ದಾರುಣ ಸ್ಥಿತಿಯಲ್ಲಿದ್ದರೂ ಮನೆ, ಮಡದಿ, ಮಕ್ಕಳು ಎಂಬ ಭಾರೀ ಭಾರಗಳನ್ನು ಹೊತ್ತುಕೊಂಡು ಮುಳುಗುತ್ತಿದ್ದೇವೆ. ಬಂಡೆಕಲ್ಲನ್ನು ಕಟ್ಟಿಕೊಂಡು ನೀರಿಗೆ ಬಿದ್ದವನಂತೆ ನಮ್ಮ ಸ್ಥಿತಿಯಾಗಿದೆ. ಹೀಗಾದರೂ ಭಯಂಕರ ಪ್ರಾಣಾಂತಿಕ ಭವಸಾಗರದಲ್ಲಿ ಮುಳುಗಿದ ನಮಗೆ ಒಂದೇ ಒಂದು ಆಸರೆ ಇದೆ.

ನೀರಿನಲ್ಲಿ ಮುಳುಗಿದವಗೆ ದೋಣಿ ಸಿಕ್ಕರೆ ಸುರಕ್ಷಿತವಾಗಿ ದಡಸೇರುತ್ತಾನೆ. ಅದರಂತೆ ಸಂಸಾರ-ಸಾಗರದಲ್ಲಿ ನಾನಾ ತರದ ಅಲೆಗಳಿಂದ ಅಪ್ಪಳಿಸಿದ ನಮಗೆ ಸಿಕ್ಕುವ ಒಂದೇ ಒಂದು ಆಸರೆ ಶ್ರೀಕೃಷ್ಣನ ಪಾದಕಮಲ. ಹರಿಪಾದವೆಂಬ ನಾವೆ ಸಿಕ್ಕಿದರೆ ಭವಸಾಗರದಲ್ಲಿ ಮುಳುಗುವ ದುರಂತ ನಮಗಿಲ್ಲ.

ನಾವೆಲ್ಲರೂ ಆಪತ್ತಿನಿಂದ ಬಿದ್ದಿರುವುದಂತೂ ಸತ್ಯ. ಆದರೆ ಆಸರೆಯನ್ನು ಹೊಂದುವ ಗೋಜಿಗೆ ಹೋಗಿಲ್ಲ. ಹರಿಪಾದ ಹೊಂದದೆ ಮುಂದೆ ಉಳಿತಿಲ್ಲ. ಹರಿಪಾದವೆಂಬ ನಾವೆ ಎಲ್ಲಿಯೋ ಇಲ್ಲ, ನಮ್ಮೊಳಗೇ ಇದೆ.

ಒಂದು ಸರೋವರದಲ್ಲಿ ಹುಲ್ಲು ಬೆಳೆದು, ಪಾಚಿ ಕಟ್ಟಿದಾಗ ನೀರು ಕಾಣಿಸದು. ನೀರಡಿಕೆಯಾದವನು ಸರೋವರದ ಬಳಿಯೇ ಇದ್ದರೂ ದೂರದಲ್ಲಿ ಕಾಣಿಸುವ ಬಿಸಿಲುಗುದುರೆಯನ್ನು ನೀರೆಂದು ಭ್ರಮಿಸಿ ಅಲ್ಲಿಗೆ ಓಡುತ್ತಾನೆ. ಎದುರಿಗಿರುವ ನೀರನ್ನು ಬಿಟ್ಟು ಬಿಸಿಲುಗುದುರೆಯನ್ನು ನೀರೆಂದು ಭ್ರಮಿಸಿ ಘಾಸಿಗೊಳಗಾಗು-ವಂತೆಯೇ ನಮ್ಮ ಸ್ಥಿತಿಯೂ ಆಗಿದೆ. ನಮ್ಮ ಹೃದಯದಲ್ಲಿ ಭಗವಂತನಿದ್ದಾನೆ. ಆದರೆ ಅಜ್ಞಾನವೆಂಬ ಪಾಚಿ ಇವನನ್ನು ಮುಚ್ಚಿಬಿಟ್ಟಿದೆ. ಶ್ರೀನಿಕೇತನನ್ನು ಕಾಣದೆ ಜೀವನನ್ನು ಘಾಸಿಗೊಳಿಸುವ ವಿಷಯ ಪದಾರ್ಥಗಳ ಬಳಿ ಓಡುತ್ತಿದ್ದೇವೆ. ಸುಖನಿಧಿಯನ್ನಾಶ್ರಯಿಸಿ ನಿತ್ಯಸುಖಿಗಳಾಗುವುದು ಬಿಟ್ಟು; ಭೌತಿಕವಿಷಯಗಳಲ್ಲಿಯೇ ಬಳಲುವ ಮೂಢಾತ್ಮರಾಗಿದ್ದೇವೆ.'' ನಮ್ಮೆಲ್ಲರಿಗೂ ನಿನ್ನ ಪಾದವೆಂಬ ನಾವೆಯನ್ನು ಕೊಡು ಎಂದು ಭಕ್ತಿಪಾಶದಿಂದ ಅವನನ್ನು ಕಟ್ಟಿದಾಗ ಭವಪಾಶದಿಂದ ಮುಕ್ತನನ್ನಾಗಿಸುವ. ಅಕ್ರೂರನ ಈ ಪ್ರಾರ್ಥನೆ ಹೃದ್ಗತವಾಗಬೇಕು!!

ಅತ್ಯಾಶ್ಚರ್ಯಕರ ಭಗವಂತ

ಶ್ರೀಕೃಷ್ಣನು ಅಕ್ರೂರನಿಗೆ ವಿಶ್ವರೂಪದರ್ಶನ ಮಾಡಿಸಿದನು. ಅಕ್ರೂರನು ಮಾಧ್ಯಾಹ್ನಿಕವನ್ನು ಮಾಡಿಬಂದು ತೇರನ್ನೇರಿದನು. ಕೃಷ್ಣನು ಆಶ್ಚರ್ಯವನ್ನೇನು ಕಂಡೆ ಎಂದು ಕೇಳಲು ಅಕ್ರೂರನು-

ಯತ್ರಾದ್ಭುತಾನಿ ಸರ್ವಾಣಿ ಭೂಮೌ ವಿಯತಿ ವಾ ಜಲೇ ।
ತೇ ತ್ವಾಽನು ಪಶ್ಯತೋ ಬ್ರಹ್ಮನ್ ಕಿಂ ಮೇಽದೃಷ್ಟಮಿಹಾದ್ಭುತಮ್ ॥

''ನಿನಗಿಂತ ಆಶ್ಚರ್ಯವಸ್ತುವು ಇನ್ನೊಂದಿಲ್ಲ'' ಎಂದನು. ಮಧುರೆಯ ಉಪವನವನ್ನು ತಲುಪಿದ ಕೃಷ್ಣನು, ತನಗಿಂತ ಮುಂಚಿತವಾಗಿ ಬಂದಿದ್ದ ನಂದಗೋಪ ಮತ್ತು ಗೊಲ್ಲರೊಡನೆ ಸೇರಿ, ಅಕ್ರೂರನನ್ನು ಮುಂದೆ ಅವನ ಮನೆಗೆ ಬರುವುದಾಗಿ ಸಮಾಧಾನ ಮಾಡಿ, ಅವನನ್ನು ಕಳುಹಿಸಿದನು. ಬಳಿಕ ಕೃಷ್ಣನು ತನ್ನ ಜೊತೆಯ ಗೊಲ್ಲಬಾಲಕರೊಡನೆ ಮಧುರಾಪಟ್ಟಣವನ್ನು ನೋಡಲು ಹೊರಟನು.

ಪ್ರಾಸಾದಶಿಖರಾರೂಢಾಃ ಪ್ರೀತ್ಯುತ್ಫುಲ್ಲಮುಖಾಂಬುಜಾಃ ।
ಅಭ್ಯವರ್ಷನ್ ಸೌಮನಸ್ಯೈಃ ಪ್ರಮದಾ ಬಲಕೇಶವೌ ॥

ಅಲ್ಲಿನ ಸ್ತ್ರೀಯರು ಕೃಷ್ಣನನ್ನು ನೋಡಬೇಕೆಂದು ಮಾಡುತ್ತಿದ್ದ ಕೆಲಸವನ್ನು ಅಷ್ಟಕ್ಕೇ ನಿಲ್ಲಿಸಿ ಉಪ್ಪರಿಗೆಯನ್ನು ಏರಿ ನಿಂತರು. ಅವರಿಗೆ ಕೃಷ್ಣನನ್ನು ನೋಡಬೇಕೆಂದು ಬಹುಕಾಲದಿಂದಲೂ ಆಸೆಯಿದ್ದಿತು. ರಾಜಬೀದಿಯಲ್ಲಿ ಬರುತ್ತಿದ್ದ ಕೃಷ್ಣನನ್ನು ನೋಡಿದರು. ಅವರ ಆಸೆ ಈಡೇರಿತು.

ದಾರಿಯಲ್ಲಿ ಒಬ್ಬ ಆಗಸರವನು ಬಂದನು. ವಸ್ತ್ರಗಳನ್ನು ಕೊಡೆಂದು ಕೃಷ್ಣನು ಯಾಚಿಸಿದನು. ಆ ದೈತ್ಯನಾದ ಆಗಸರವನು ಕಿಚಾಯಿಸಿ ಮಾತನಾಡಿದನು. ಆಗ–

ಇತ್ಥಂ ವಿಕತ್ಥಮಾನಸ್ಯ ಕುಪಿತೋ ದೇವಕೀಸುತಃ ।
ರಜಕಸ್ಯ ಕರಾಗ್ರೇಣ ಶಿರಃ ಕಾಯಾದಪಾಹರತ್ ॥

ಈ ರೀತಿಯಾಗಿ, ಅಸಂಬದ್ಧವಾಗಿ ಮಾತಾಡುವ ಆಗಸನ ರುಂಡವನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಮುಂಡದಿಂದ ಬೇರ್ಪಡಿಸಿದನು. ಅರ್ಥಾತ್ ಸಂಹರಿಸಿದನು.

ರಾಮಕೃಷ್ಣರು ನೀಲಾಂಬರ ಪೀತಾಂಬರಧಾರಿಗಳೇಕೆ?–

ಯಾವ ಶಿರಸ್ಸಿನಿಂದ ದುಷ್ಟ ಮಾತುಗಳಾಡಿದನೋ, ಅದನ್ನು ಹರಣ ಮಾಡುವುದು ನ್ಯಾಯವಷ್ಟೇ! ಆದ್ದರಿಂದ ರುಂಡ ಕತ್ತರಿಸಿದನು. ಮುಂಡದಿಂದೇನು? ಎಂದು ಉತ್ಪ್ರೇಕ್ಷೆ ಮಾಡುವರು.

ಶ್ರೀಕೃಷ್ಣನು ಪೀತಾಂಬರಧಾರಿ, ಬಲರಾಮನೋ ನೀಲಾಂಬರೀ. ಏಕೆ ಇವರಿಬ್ಬರು ಹೀಗೆ? ಈ ಪ್ರಶ್ನೆಗೆ ಉತ್ತರ ನೀಡುವರು. ಶ್ವೇತವಸ್ತ್ರಧಾರಿಗಳಾದಾಗ ವಸನ ಬೇಗನೆ ಮಲಿನವಾಗುತ್ತದೆ. ಆಗ ಮತ್ತೆ ಮತ್ತೆ ಕ್ಷಾಲನ ಮಾಡಬೇಕು. ಕ್ಷಾಲನ ಮಾಡುವ ರಜಕನನ್ನು ಕೃಷ್ಣ ಸಂಹರಿಸಿದ್ದರಿಂದ ರಜಕಕುಲವೇ ಕುಪಿತವಾಯಿತು. ಆಗ ಕ್ಷಾಲನ ಮಾಡುವವರು ಯಾರು? ಅದಕ್ಕೆ ಈ ಗೋಜಲೇ ಬೇಡವೆಂದು ಕೃಷ್ಣಬಲರಾಮರು ಪೀತಾಂಬರ ನೀಲಾಂಬರಧಾರಿಗಳಾದರು ಎಂದು ಉತ್ಪ್ರೇಕ್ಷಿಸುವರು. ಬಣ್ಣದ ಬಟ್ಟೆ ಬೇಗನೆ ಹೊಲಸಾಗುವುದಿಲ್ಲವಷ್ಟೇ?! ನಾವು ಶ್ವೇತ ವಸ್ತ್ರಧರಿಸಿದಾಗ ಮಾತ್ರ ನೀವು ನಮ್ಮ ವಸ್ತ್ರ ಶುದ್ಧ ಮಾಡುವುದು. ಆ ತಂಟೆಯೇ ಬೇಡವೆಂದು ಹೀಗೆ ರಂಗವಸನಿಗಳಾದರು ಎಂದು ಪ್ರಾಸಂಗಿಕವಾಗಿ ಹೇಳಿರುವುದು.

ಅವನನ್ನು ಕೊಂದು ಕೃಷ್ಣನು ಆ ವಸ್ತ್ರಗಳನ್ನು ತಾನೂ, ತನ್ನ ಗೆಳೆಯರೂ ಧರಿಸಿದರು. ಉಳಿದ ವಸ್ತ್ರಗಳನ್ನು ಗೊಲ್ಲಬಾಲಕರು ಕೃಷ್ಣನಿಗೆ ನಡೆಮುಡಿ ಹಾಸುತ್ತ ಹೋದರು.

ತತಸ್ತು ವಾಪಕಃ ಪ್ರೀತಸ್ತಯೋರ್ವೇಷಮಕಲ್ಪಯತ್ ।
ವಿಚಿತ್ರವರ್ಣೈಃ ಶೈಲೇಯೈರಾಕಲ್ಪೈರನುರೂಪತಃ ॥

ವೈಕುಂಠದಲ್ಲಿ ನಾಪಿತನಾಗಿದ್ದು ಹರಿಯ ಸೇವೆಗಾಗಿ ಹುಟ್ಟಿದ್ದ ಒಬ್ಬ ಭಕ್ತನು ಬಂದು ರಾಮಕೃಷ್ಣರಿಗೆ ಲಾಕ್ಷಾದಿಗಳಿಂದ ಅಲಂಕಾರ ಮಾಡಿದನು. ಕೃಷ್ಣನು ಅವನಿಗೆ ವೈಕುಂಠವನ್ನು ಕೊಟ್ಟನು. ವೈಕುಂಠದಲ್ಲಿ ಹೂಮಾಲೆಯನ್ನು ಕಟ್ಟಿ ಹರಿಗೆ ಅರ್ಪಿಸುತ್ತಿದ್ದ ಹೂವಾಡಿಗರವನು ಸುದಾಮನೆಂಬ ಹೆಸರಿನಿಂದ ಹುಟ್ಟಿದ್ದನು. ರಾಮಕೃಷ್ಣರಿಬ್ಬರೂ ಬಂದು ಅವನನ್ನು ಹೂಮಾಲೆಗಳನ್ನು ಕೊಡಬೇಕೆಂದು ಕೇಳಿಕೊಂಡರು. ಸುದಾಮನು ಅವರಿಬ್ಬರಿಗೂ ಸುಂದರವಾದ ಮಾಲೆಗಳನ್ನು ಅರ್ಪಿಸಿದನು. ಶ್ರೀಕೃಷ್ಣನು ಅವನಿಗೂ ವೈಕುಂಠವನ್ನು ಕೊಟ್ಟನು.

ಕುಬ್ಜೆಗೆ ಅನುಗ್ರಹ

ಅಪ್ಸರ ಸ್ತ್ರೀಯೊಬ್ಬಳು ಪಿಂಗಳೆಯೆಂಬ ವೇಶ್ಯೆಯಾಗಿ ಹುಟ್ಟಿದ್ದಳು. ಅವಳು ಅಪೇಕ್ಷೆ ಮಾಡಿದಷ್ಟು ದ್ರವ್ಯವನ್ನು ಯಾರೂ ಕೊಡದೇ ಹೋದುದರಿಂದ ಇಡೀ ಜನ್ಮವು ಪುರುಷಸಂಗವೇ ಇಲ್ಲದಂತೆ ಆಗಿ ದೇಹವನ್ನು ಬಿಟ್ಟು ಪ್ರಾರಬ್ಧಕರ್ಮಾನುಸಾರ ಕುಬ್ಜೆಯಾಗಿ ಹುಟ್ಟಿ ಸೈರಂಧ್ರಿಯ ಕೆಲಸ ಮಾಡುತ್ತಿದ್ದಳು. ದಿನವೂ ಕಂಸನಿಗಾಗಿ ಗಂಧವನ್ನು ತಯಾರು ಮಾಡುತ್ತಿದ್ದಳು. ಎಂದಿನಂತೆ ತಯಾರು ಮಾಡಿದ ಗಂಧವನ್ನು ಕಂಸನಿಗೆ ಅರ್ಪಿಸಬೇಕೆಂದು ಬರುತ್ತಿರುವಾಗ ಮಾರ್ಗಮಧ್ಯದಲ್ಲಿ ಕೃಷ್ಣನ ಭೇಟಿ ಆಯಿತು. ಅವನು ಗಂಧವನ್ನು ಕೊಡೆಂದು ಕೇಳಿದನು. ಕೂಡಲೇ ಭಕ್ತಿಯಿಂದ ಅದನ್ನು ಅರ್ಪಿಸಿದಳು.

ಪ್ರಸನ್ನೋ ಭಗವಾನ್ ಕುಬ್ಜಾಂ ತ್ರಿವಕ್ರಾಂ ರುಚಿರಾನನಾಮ್ ।
ಋಜ್ವೀಂ ಕರ್ತುಂ ಮನಶ್ಚಕ್ರೇ ದರ್ಶಯನ್ ದರ್ಶನೇ ಫಲಮ್ ॥
ಮುಕುಂದ ಸ್ಪರ್ಶನಾತ್ ಸದ್ಯೋ ಬಭೂವ ಪ್ರಮದೋತ್ತಮಾ ॥

ಶ್ರೀಕೃಷ್ಣನು ಕುಬ್ಜೆಯ ಡೊಂಕಾಗಿದ್ದ ದೇಹವನ್ನು ನೆಟ್ಟಗೆ ಮಾಡಿದನು. ಆಗ ಅವಳು ಸುಂದರಿಯಾಗಿ ಕಾಣಿಸಿದಳು. ಅವಳು ಅಪ್ಸರೆಯಾದ್ದರಿಂದ ತನ್ನ ಪ್ರಾರಬ್ಧ ಕರ್ಮಾನುಸಾರ ಕೃಷ್ಣನನ್ನು ಕಾಮಿಸಿ ಅವನ ಸಂಗವನ್ನು ಬಯಸಿದಳು.

ಏಹಿ ವೀರಂ ಗೃಹಂ ಯಾಮೋ ನ ತ್ವಾಂ ತ್ಯಕ್ತುಮಿಹೋತ್ಸವೇ ।
ಏಷ್ಯಾಮಿ ತೇ ಗೃಹಂ ಸುಭ್ರು ಪುಂಸಾಮಾಧಿವಿಕರ್ಶನಮ್ ।
ಸಾಧಿತಾರ್ಥೋಽಗೃಹಾಣಾಂ ನಃ ಪಾಂಥಾನಾಂ ತ್ವಂ ಪರಾಯಣಮ್ ॥

ಕೃಷ್ಣನು ಕಂಸನ ಸಂಹಾರವಾದ ಮೇಲೆ ಅವಳ ಮನೆಗೆ ಬರುವುದಾಗಿ ಮಾತುಕೊಟ್ಟನು. ಮಧುರಾವಾಸಿಗಳೆಲ್ಲರೂ ರಾಮಕೃಷ್ಣರನ್ನು ಭಕ್ತಿಯಿಂದ ಪೂಜಿಸಿದರು. ಕೃಷ್ಣನು ಧನುರಾಗಾರಕ್ಕೆ ಹೋದನು. ಅಲ್ಲಿ ಶಿವನ ಧನುಸ್ಸನ್ನಿಟ್ಟು ಪೂಜಿಸುತ್ತ ಅದಕ್ಕೆ ಕಾವಲಿದ್ದರು. ಕೃಷ್ಣನು ಅಲ್ಲಿಗೆ ಹೋದವನೇ ಆ ಶೈವ ಧನುಸ್ಸನ್ನು ಮುರಿದು ಬಿಟ್ಟನು. ಆ ಬಿಲ್ಲಿನ ತುಂಡಿನಿಂದಲೇ ತನ್ನನ್ನು ಅಟಕಾಯಿಸಿದ ಕಾವಲುಗಾರರನ್ನೂ, ಕಂಸನು ಕಳುಹಿಸಿದ ಸೈನ್ಯವನ್ನೂ ಸಂಹರಿಸಿ, ಉದ್ಯಾನಕ್ಕೆ ಬಂದು ನಂದಗೋಪಾದಿಗಳೊಡನೆ ಭೋಜನ ಮಾಡಿ ರಾತ್ರಿಯನ್ನು ಸುಖವಾಗಿ ಕಳೆದನು. ಅತ್ತ ಕಂಸನು ಕೃಷ್ಣನ ವ್ಯಾಪಾರವನ್ನು ಕೇಳಿ ನಡುಗಿ ರಾತ್ರಿಯೆಲ್ಲ ಭಯದಿಂದ ಕಾಲ ಕಳೆದನು. ಬೆಳಗಾದಾಗ ಕಂಸನು ರಂಗಸ್ಥಳಕ್ಕೆ ಬಂದನು. ಜಟ್ಟಿಗಳೆಲ್ಲರೂ ಬಂದು ಅಲ್ಲಿ ಸೇರಿದರು. ನಂದಾದಿಗಳು

ಕಂಸನಿಗೆ ಕಾಣಿಕೆ ಒಪ್ಪಿಸಿ ಸಭೆಯಲ್ಲಿ ತಮಗೆ ಯೋಗ್ಯವಾದ ಸ್ಥಳದಲ್ಲಿ ಕುಳಿತರು. ಪುರಜನ ಮೊದಲಾದವ-ರೆಲ್ಲರೂ ಸಭೆಗೆ ಬಂದು ನೆರೆದರು.

ಕುವಲಯಾಪೀಡವಧೆ

ಇತ್ತ ರಾಮಕೃಷ್ಣರು ಸ್ನಾನಮಾಡಿ ಅಲಂಕೃತರಾಗಿ ಉದ್ಯಾನದಿಂದ ಸಭೆಗೆ ಹೊರಟರು.

ರಂಗದ್ವಾರಂ ಸಮಾಸಾದ್ಯ ತಸ್ಮಿನ್ ಗಜಮವಸ್ಥಿತಮ್ ।
ಅಪಶ್ಯತ್ಕುವಲಯಾಪೀಡಂ ಕೃಷ್ಣೋಽಂಬಷ್ಠಪ್ರಚೋದಿತಮ್ ।

ಕಂಸನ ಅಣತಿಯಂತೆ ರಾಮಕೃಷ್ಣರನ್ನು ಕೊಲ್ಲಬೇಕೆಂದು ಕುವಲಯಾಪೀಡವೆಂಬ ಬೆಟ್ಟದಂತಹ ಆನೆಯನ್ನು ಮಾವಟಿಗನು ಸಭಾದ್ವಾರದಲ್ಲಿ ನಿಲ್ಲಿಸಿದ್ದನು. ಆನೆಯು ಕೃಷ್ಣನನ್ನು ಕೊಲ್ಲಲು ಬಹಳ ಪ್ರಯತ್ನ ಪಟ್ಟಿತು. ಶ್ರೀಕೃಷ್ಣನು ಆ ಆನೆಯನ್ನೂ, ದೈತ್ಯನಾದ ಮಾವಟಿಗನನ್ನೂ ಕೊಂದನು.

ವೃತೌ ಗೋಪೈಃ ಕತಿಪಯೈಃ ಬಲದೇವಜನಾರ್ದನೌ ।
ರಂಗಂ ವಿವಿಶತೂ ರಾಜನ್ ಗಜದಂತವರಾಯುಧೌ ॥

ಆನೆಯ ಎರಡು ಕೊಂಬುಗಳನ್ನೂ ಕಿತ್ತು ಒಂದನ್ನು ಬಲರಾಮನಿಗೆ ಕೊಟ್ಟು ಮತ್ತೊಂದನ್ನು ಹೆಗಲಮೇಲೆ ಇಟ್ಟುಕೊಂಡು ಸಭಾಪ್ರವೇಶ ಮಾಡಿದನು. ಇವನನ್ನು ನೋಡಿದ ಸಭಿಕರು ಭಿನ್ನ ಭಿನ್ನ ಸ್ವಭಾವದವ-ರಾದುದರಿಂದ ಅದಕ್ಕನುಸಾರವಾಗಿ ಒಬ್ಬನೇ ಆದ ಶ್ರೀಕೃಷ್ಣನು ಭಿನ್ನಭಿನ್ನವಾಗಿ ತೋರಿದನು. ಅದನ್ನು ಶ್ರೀವೇದವ್ಯಾಸರು ಸುಂದರವಾಗಿ ವರ್ಣಿಸುತ್ತಾರೆ.

ರಂಗೇರಿದ ರಂಗನ ರೂಪ

ಮಲ್ಲಾನಾಮಶನಿಃ ನರವರಃಸ್ತ್ರೀಣಾಂ ಸ್ಮರೋ ಮೂರ್ತಿಮಾನ್ ।
ಗೋಪಾನಾಂ ಸ್ವಜನೋಽಸತಾಂ ಕ್ಷಿತಿಭೃತಾಂ ಶಾಸ್ತಾ ಸ್ವಪಿತ್ರೋಃ ಶಿಶುಃ ॥
ಮೃತ್ಯುರ್ಭೋಜಪತೇರ್ವಿಧಾತೃವಿಹಿತಃ ತತ್ತ್ವಂ ಪರಂ ಯೋಗಿನಾಂ ।
ವೃಷ್ಣೀನಾಂ ಚ ಪತಿಃ ಸದೈವ ಶುಶುಭೇ ರಂಗೇಽಚ್ಯುತಃ ಸಾಗ್ರಜಃ ॥

ಆ ರಂಗಸ್ಥಳದಲ್ಲಿ ಬಲರಾಮನಿಂದ ಸಹಿತನಾದ ಶ್ರೀಕೃಷ್ಣನು ಚಾಣೂರ ಮೊದಲಾದ ಜಟ್ಟಿಗಳಿಗೆ ಸಿಡಿಲಿ-ನಂತೆ, ಶನೈಶ್ಚರನಂತೆ ತೋರಿದನು. ಮನುಷ್ಯರಿಗೆ ಮಹಾಪುರುಷನಂತೆ ತೋರಿದನು. ಸ್ತ್ರೀಯರಿಗೆ ಮೂರ್ತಿಮತ್ತಾದ ಮನ್ಮಥನಂತೆಯೂ ಗೋಪಾಲರಿಗೆ ಬಂಧುವಿನಂತೆಯೂ, ದುಷ್ಟ ಕ್ಷತ್ರಿಯರಿಗೆ ದಂಡಿಸತಕ್ಕ ಪ್ರಭುವಿನಂತೆಯೂ, ವಸುದೇವ ದೇವಕಿಯರಿಗೆ ಮುದ್ದುಮಗುವಿನಂತೆಯೂ, ಕಂಸನಿಗೆ ಬ್ರಹ್ಮದೇವರಿಂದ ಪ್ರಾರ್ಥಿತನಾದ ಮೃತ್ಯುವಿನಂತೆಯೂ, ನಾರದಾದಿ ಯೋಗಿಗಳಿಗೆ ಅನವರತ ನಾರಾಯಣನಂತೆಯೂ, ವೃಷ್ಣಿಕುಲ ದವರಿಗೆ ಪರಿಪಾಲಕನಾದ ಪ್ರಭುವಿನಂತೆಯೂ ತೋರುತ್ತಾ ವಿರಾಜಿಸಿದನು.

ಇವರನ್ನು ನೋಡಿದ ಸಭಿಕರು ಆನಂದಪಟ್ಟು ''ನಾರಾಯಣನೇ ವಸುದೇವನ ಮಗನಾಗಿ ಅವತರಿಸಿರು-ವನು. ಪೂತನಾದಿಗಳನ್ನು ಕೊಂದವನೂ ಇವನೇ, ಯದುವಂಶವು ಇವನಿಂದಲೇ ಸುಖವಾಗಿ ಬಾಳುವುದೆಂದು ಜ್ಞಾನಿಗಳು ಹೇಳುವರು. ಅವನ ಪಕ್ಕದಲ್ಲಿರುವವನೇ ಬಲ ರಾಮನು. ಇವನಿಂದಲೇ ಪ್ರಲಂಬ, ಧೇನುಕಾದಿಗಳು ಹತರಾದರು'' ಎಂದು ಮಾತನಾಡಿಕೊಳ್ಳುತ್ತಿದ್ದರು.

ಮಲ್ಲರ ಸಂಹಾರ

ಹೇ ನಂದಸೂನೋ ಹೇ ರಾಮ ಭವಂತೌ ವೀರ್ಯಸಮ್ಮತೌ ।
ನಿಯುದ್ಧ ಕುಶಲೌ ಶ್ರುತ್ವಾ ರಾಜ್ಞಾಹೂತೌ ದಿದೃಕ್ಷುಣಾ ।
ಪ್ರಿಯಂ ರಾಜ್ಞಃ ಪ್ರಕುರ್ವಂತ್ಯಃ ಶ್ರೇಯೋ ವಿಂದಂತಿ ವೈ ಪ್ರಜಾಃ ।

ಚಾಣೂರನು ನಂದಕುಮಾರನೇ! ಬಲರಾಮನೇ! ನೀವಿಬ್ಬರೂ ಜಟ್ಟಿಕಾಳಗದಲ್ಲಿ ಗಟ್ಟಿಗರೆಂದು ನಮ್ಮ ಮಹಾಪ್ರಭುವು ತಿಳಿದು ಇಲ್ಲಿಗೆ ನಿಮ್ಮನ್ನು ಕರೆಸಿರುವನು. ರಾಜನೇ ದೇವರು. ಅವನಿಗೆ ಪ್ರಿಯವನ್ನುಂಟು ಮಾಡುವ ಪ್ರಜೆಗೇ ಶ್ರೇಯಸ್ಸು ಇನ್ನಾರಿಗೂ ಇಲ್ಲ. ಪ್ರಭುವಿನ ಅಪ್ಪಣೆಯಂತೆ ನೀವಿಬ್ಬರೂ ನಮ್ಮ ಕೂಡ ಕುಸ್ತಿಯನ್ನು ಮಾಡಿ ಪ್ರತ್ಯಕ್ಷದೇವರಾದ ಕಂಸಮಹಾಪ್ರಭುವನ್ನು ಸಂತೋಷ ಪಡಿಸಿರಿ ಎಂದು ನುಡಿದನು.

ಬಾಲಾ ವಯಂ ತುಲ್ಯಬಲೈಃ ಕ್ರೀಡಿಷ್ಯಾಮೋ ಯಥೋಚಿತಮ್ ।
ಭವೇನ್ನಿಯುದ್ಧಂ ಮಾ ಧರ್ಮಃ ಸ್ಪೃಶೇನ್ಮಲ್ಲಸಭಾಸದಃ ।

ಶ್ರೀಕೃಷ್ಣನು ನಿಮಗೆ ಈ ಕಂಸನೇ ದೇವರಾಗಲಿ, ನಮಗಲ್ಲ. ನಾವು ಬಾಲಕರು. ನಿಮಗೆ ಸಮಗೈ ಅಲ್ಲ. ನೀವಿಬ್ಬರೂ ಬಲಿಷ್ಠರಿಗೆ ಬಲಿಷ್ಠರು. ಅಧರ್ಮವು ಬರದಂತೆ ನ್ಯಾಯರೀತಿಯಿಂದ ಕಾಳಗವನ್ನು ನಡೆಸಬೇಕು ಎಂದು ಪ್ರತಿ ನುಡಿದನು.

ಸಾವಿರ ಆನೆಗಳ ಬಲವುಳ್ಳ ನಮ್ಮ ಮದದಾನೆಯನ್ನು ನಿರಾಯಾಸವಾಗಿ ಕೊಂದ ನೀನು ಬಾಲಕನೇ? ನೀವಿಬ್ಬರೂ ಮಹಾಬಲಿಷ್ಠರಿದ್ದೀರಿ. ನಮ್ಮೊಡನೆ ನೀವು ಕಾಳಗಮಾಡಿದರೆ ಅಧರ್ಮವೇನೂ ಇಲ್ಲ. ಕೃಷ್ಣನೇ! ನನ್ನೊಡನೆ ನೀನೂ, ಮುಷ್ಟಿಕನೊಡನೆ ಬಲರಾಮನೂ ಕಾಳಗಕ್ಕೆ ನಿಲ್ಲಿರಿ ಎಂದು ಚಾಣೂರನು ಆರ್ಭಟಿಸಿದ.

ಜಟ್ಟಿಕಾಳಗವು ಆರಂಭವಾಯಿತು.

ಮಹಾನಯಂ ಬತಾ ಧರ್ಮಃ ಏಷಾಂ ರಾಜಸಭಾಸದಾಮ್ ।

ಅದು ಅನ್ಯಾಯವೆಂದು ಸ್ತ್ರೀಯರೆಂದರು. ಕೃಷ್ಣ ದರ್ಶನಲಾಭವಾದುದರಿಂದ ತಾವೆಲ್ಲರೂ ಧನ್ಯರೆಂದು-ಕೊಂಡರು. ಕೃಷ್ಣನು ಚಾಣೂರನನ್ನೂ, ಬಲರಾಮನು ಮುಷ್ಟಿಕನನ್ನೂ ಕೊಂದರು. ಛಲನೆಂಬ ಜಟ್ಟಿಯನ್ನು ಬಲರಾಮನು ಕೊಂದನು. ಕೂಟ, ಕೋಶಲ ಮೊದಲಾದ ಮೇಲೆ ಬಿದ್ದ ಜಟ್ಟಿಗಳನ್ನೆಲ್ಲ ಶ್ರೀಕೃಷ್ಣನು ಕೊಂದನು.

ಕಂಸನ ಸಂಹಾರ

ಕಂಸನು ಬಲರಾಮಕೃಷ್ಣರನ್ನು ಈ ಊರಿನಿಂದ ಹೊರಡಿಸಿರಿ. ನಂದಗೋಪನನ್ನು ಸೆರೆಹಾಕಿ, ವಸುದೇವ ಮತ್ತು ಉಗ್ರಸೇನರನ್ನು ಕೊಂದುಬಿಡಿ ಎಂದು ಅಸಹನೆಯಿಂದ ನುಡಿದ. ಭಟರಿಗೆಲ್ಲ ಯುದ್ಧಕ್ಕೆ ಆದೇಶಿಸಿದ.

ಲಘಿಮ್ನೋತ್ಪತ್ಯ ತರಸಾ ಮಂಚಮುತ್ತುಂಗಮಾರುಹತ್ ।

ಶ್ರೀಕೃಷ್ಣನು ಹಾರಿ ಮಂಚದ ಮೇಲಿನಿಂದ ಕಂಸನನ್ನು ನೆಲದ ಮೇಲೆ ಕೆಡಹಿ ಕೊಂದನು.

ಕೃಷ್ಣನು ಕಂಸನನ್ನು ಕೊಂದುದನ್ನು ನೋಡಿದ ಅವನ ಎಂಟುಮಂದಿ ಸಹೋದರರೂ ಶ್ರೀಕೃಷ್ಣನ ಮೇಲೆ ಬಿದ್ದರು. ಕಂಕ, ನ್ಯಗ್ರೋಧ, ಮೊದಲಾದ ಆ ದುಷ್ಟರನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಸಂಹರಿಸಿದನು. ಕಂಸನ ಪತ್ನಿಯರು ಗೋಳಾಡಿದರು. ಅವರನ್ನು ಸಮಾಧಾನ ಮಾಡಿ, ಸತ್ತವರಿಗೆ ಸಂಸ್ಕಾರಗಳನ್ನು ಮಾಡಿಸಿ, ಶ್ರೀಕೃಷ್ಣನು ತಂದೆ-ತಾಯಿಗಳನ್ನು ಸೆರೆಯಿಂದ ಬಿಡಿಸಿ, ಬಲರಾಮನೊಡನೆ ಅವರಿಗೆ ನಮಸ್ಕಾರ ಮಾಡಿದನು. ವಸುದೇವ-

ದೇವಕಿಯರಿಬ್ಬರೂ ಅವರನ್ನು ಜಗದೀಶ್ವರನೆಂದು ತಿಳಿದು ಆಲಿಂಗಿಸಿ, ಆಶೀರ್ವದಿಸದೆ ಭಕ್ತಿಯಿಂದ ಕೈಮುಗಿದು ನಿಂತರು.

ಶ್ರೀಕೃಷ್ಣನು ಸಾಕ್ಷಾತ್ ಪರಮಾತ್ಮನು ಎಂದು ವಸುದೇವದೇವಕಿಯರಿಗೆ ಈಗಲೇ ಜ್ಞಾನವುಂಟಾಗ ಬಾರದೆಂದು ನಿಶ್ಚಯಿಸಿ, ಜನರು ಭ್ರಾಂತಿಯನ್ನು ಹೊಂದುವಂತೆ ಮಾಡಬಲ್ಲ ಮಾಯೆಯನ್ನುಂಟುಮಾಡಿ, ಬಲರಾಮನಿಂದ ಸಹಿತನಾಗಿ ಕೃಷ್ಣನು–

ಪಿತರ್ಯುರ್ವಾಭ್ಯಾಂ ಸ್ನಿಗ್ಧಾಭ್ಯಾಂ ಪೋಷಿತೌ ಲಾಲಿತೌ ಭೃಶಮ್ ।
ಪಿತ್ರೋರಪ್ಯಧಿಕಾ ಪ್ರೀತಿರಾತ್ಮಜೇಷ್ವಾತ್ಮನೋಽಪಿಹಿ ।

ಅಮ್ಮಾ! ಅಪ್ಪಾ! ನಾವು ನಿಮ್ಮ ಮಕ್ಕಳಾಗಿದ್ದರೂ ಬಾಲಲೀಲೆಗಳಿಂದ ನಿಮ್ಮನ್ನು ಸುಖಪಡಿಸಲಿಲ್ಲ. ತಂದೆತಾಯಿಗಳ ಋಣವನ್ನು ನೂರಾರು ವರ್ಷಗಳಲ್ಲಿಯೂ ತೀರಿಸಲು ಮನುಷ್ಯನಿಗೆ ಅಸಾಧ್ಯ. ಮುದುಕನಾದ ತಂದೆ, ಪತಿವ್ರತೆಯಾದ ಹೆಂಡತಿ, ಮಗ, ಗುರು ಮತ್ತು ಶರಣಾಗತ ಇವರನ್ನು ಸಮರ್ಥನಾಗಿಯೂ ಪೋಷಿಸದೆ ಇದ್ದವನು ಬದುಕಿದ್ದರೂ ಅವನು ಮೃತಪ್ರಾಯನು. ಆದ್ದರಿಂದ ಕಂಸನಿಗೆ ಹೆದರಿ ನಿಮ್ಮನ್ನು ಸೇವಿಸದೆ ಇಷ್ಟು ಕಾಲವೂ ವ್ಯರ್ಥವಾಗಿ ಹೋಯಿತು. ನಮ್ಮ ಅಪರಾಧವನ್ನು ಕ್ಷಮಿಸಿರಿ, ಎಂದು ಮನುಜರಂತೆ ನಟಿಸಿ ನುಡಿದ.

ಸಾಂದೀಪನಿಯಲ್ಲಿ ಅಧ್ಯಯನ–

ಅನಂತರ ಶ್ರೀಕೃಷ್ಣನು ಉಗ್ರಸೇನನಿಗೆ ಪಟ್ಟಗಟ್ಟಿ, ''ನಾವು ನಿನ್ನ ಪ್ರಜೆಗಳು. ಆಯಾಕಾರ್ಯದಲ್ಲಿ ನಿಯಮಿಸಬೇಕು. ಯಯಾತಿಯ ಶಾಪಶಂಕೆ ಬಿಡು. ನಾನು ನಿನಗೆ ಭೃತ್ಯನಾಗಿರುವಾಗ ದೇವತೆಗಳೇ ನಿನ್ನನ್ನು ಪೂಜಿಸುವರು'' ಎಂದನು. ನಂದಗೋಪನನ್ನು ಸಮಾಧಾನ ಮಾಡಿ ಗೋಕುಲಕ್ಕೆ ಕಳುಹಿಸಿದನು. ಮುಂದೆ ರಾಮಕೃಷ್ಣರಿಗೆ ವಸುದೇವನು ಉಪನಯನ ಮಾಡಿದನು. ಅವರಿಬ್ಬರೂ ವ್ಯಾಸಂಗ ಮಾಡಲು ಅವಂತೀಪುರದಲ್ಲಿದ್ದ ಸಾಂದೀಪನಿಯನ್ನು ಗುರುವಾಗಿ ಮಾಡಿಕೊಂಡು ಅವರ ಶಿಷ್ಯರಾದರು. ಶ್ರೀಕೃಷ್ಣನು ಗುರುದಕ್ಷಿಣೆಗಾಗಿ ಸತ್ತಿದ್ದ ಗುರುಪುತ್ರನನ್ನು ಬದುಕಿಸಿ, ತಂದುಕೊಟ್ಟನು. ಗುರುವು ಬಹು ಸಂತೋಷಪಟ್ಟು ''ನಿಮ್ಮ ಕೀರ್ತಿಯು ಭುವನಪಾವನ ಮಾಡಲಿ'' ಎಂದರು.

ಗೋಕುಲಕ್ಕೆ ಉದ್ಧವನ ಆಗಮನ–

ಶ್ರೀಕೃಷ್ಣನು ನಂದಗೋಪ, ಯಶೋದೆ ಮತ್ತು ಗೋಪಿಯರನ್ನು ಸಮಾಧಾನ ಪಡಿಸೆಂದು ಉದ್ಧವನನ್ನು ಗೋಕುಲಕ್ಕೆ ಕಳುಹಿಸಿದನು. ಬಂದ ಉದ್ಧವನನ್ನು ನಂದಗೋಪನು ಸತ್ಕರಿಸಿದನು.

ಅಪ್ಯಾಯಾಸ್ಯತಿ ಗೋವಿಂದಃ ಸ್ವಜನಂ ಸಕೃದೀಕ್ಷಿತುಮ್ ।
ಸ್ಮರತಾಂ ಕೃಷ್ಣವೀರ್ಯಾಣಿ ಲೀಲಾಪಾಂಗನಿರೀಕ್ಷಣಮ್ ।
ಹಸಿತಂ ಭಾಷಿತಂ ಚಾಂಗ ಸರ್ವಾಃ ನಃ ಶಿಥಿಲಾಃ ಕ್ರಿಯಾಃ ।

ನಂದಗೋಪನು ಉದ್ಧವಾ! ಕೃಷ್ಣನು ನಮ್ಮನ್ನು ನೋಡಲು ಬರುವನೆ? ಅವನು ನಮ್ಮನ್ನು ಅನೇಕ ವಿಪತ್ತುಗಳಿಂದ ತಪ್ಪಿಸಿ ರಕ್ಷಿಸಿದನು. ಅವನು ಸ್ಮರಣೆಗೆ ಬಂದರೆ ಕೈಕಾಲುಗಳು ಆಡದೆ ನಿಂತುಹೋಗುವುವು. ಶ್ರೀಕೃಷ್ಣನು ದೇವೋತ್ತಮನೆಂಬುದರಲ್ಲಿ ಸಂದೇಹವಿಲ್ಲ ಎಂದು ಹೇಳುತ್ತಾ ಕಣ್ಣೀರನ್ನು ಸುರಿಸಿ ಸುಮ್ಮನಾದನು. ಯಶೋದೆಯೂ ಆನಂದಬಾಷ್ಪವನ್ನು ಸುರಿಸಿದಳು.

ಉದ್ಧವನು ನೀವು ಶ್ಲಾಘ್ಯರು. ಕೃಷ್ಣನಲ್ಲಿ ಭಕ್ತಿಯಿಟ್ಟಿರುವುದರಿಂದ ನೀವೇ ಧನ್ಯರು. ಕೃಷ್ಣನು ಇಲ್ಲಿಗೆ ಬಂದು ಪ್ರೀತಿಯುಂಟುಮಾಡುವನು, ಎಂದು ಹೇಳಿದನು.

ಮರುದಿನ ಬೆಳಗಾಯಿತು. ತೇರನ್ನು ಕಂಡ ಗೋಪಿಯರು ತಿರುಗಿ ಅಕ್ರೂರನು ಬಂದಿರಬಹುದು ಎಂದು ಮಾತನಾಡುತ್ತಿರುವಾಗ ಉದ್ಧವನು ಅಲ್ಲಿಗೆ ಬಂದನು.

ಭ್ರಮರಗೀತೆ

ಗೋಪಿಯರು, ಸೌಮ್ಯನೇ! ನೀನು ಕೃಷ್ಣಭೃತ್ಯನಂತೆ ಕಾಣುವೆ. ಕೃಷ್ಣನು ನಿನ್ನ ಮೂಲಕ ಅವನ ತಂದೆ-ತಾಯಿಗಳಿಗೆ ಮಾತ್ರ ಕ್ಷೇಮಲಾಭಗಳನ್ನು ಹೇಳಿಕಳುಹಿಸಿರಬಹುದಲ್ಲವೆ? ನಾವಾರು? ಮಧುರಾಪಟ್ಟಣದ ಕನ್ಯೆಯರಲ್ಲಿ ಆಶೆಯುಳ್ಳ ಅವನಿಗೆ ಅನಾಗರಿಕರಾದ ನಾವು ಸ್ಮರಣೆಗೆ ಹೇಗೆ ಬಂದೇವು? ಎನ್ನುತ್ತಾ ಕೃಷ್ಣನನ್ನು ಸ್ಮರಿಸಿ ಅವರೆಲ್ಲ ಅಳುವುದಕ್ಕಾರಂಭಿಸಿದರು. ಅವರಲ್ಲಿ ಮುಗ್ಧಳಾದ ಒಬ್ಬ ಗೋಪಿಯು ಒಂದು ಭ್ರಮರವನ್ನು ನೋಡಿ, ಅದನ್ನೇ ಕೃಷ್ಣನ ದೂತನೆಂದು ಭ್ರಮಿಸಿ ಹೀಗೆ ಹೇಳುವಳು :

ಮಧುಪ ಕಿತವಬಂಧೋ ಮಾಸ್ಪೃಶಾಸ್ಮಾನ್ ಸಪತ್ನ್ಯಾಃ
ಕುಚವಿಲುಲಿತ ಮಾಲಾಕುಂಕುಮಶ್ಮಶ್ರುಭಿಸ್ತ್ವಂ ।
ವಹತು ಮಧುಪತಿಸ್ತನ್ಮಾನಿನೀನಾಂ ಪ್ರಸಾದಂ
ಯದುಸದಸಿ ವಿಡಂಬ್ಯಂ ಯಸ್ಯ ದೂತಸ್ತ್ವಮೀದೃಕ್ ॥

ಓ ದುಂಬಿಯೇ ಮೋಸಗಾರನಾದ ಕೃಷ್ಣನ ಕಡೆಯವ ನೀನು ನಮ್ಮನ್ನು ಸ್ಪರ್ಶಿಸಬೇಡ. ನಮ್ಮ ಕಾಲು ಹಿಡಿಯಬೇಡ ('ಮಾಸ್ಪೃಶಾಂಘ್ರಿಂ' ಎಂದು ಪಾಠಾಂತರ) ಆ ಕೃಷ್ಣ ಮಧುರೆಯ ಹೆಣ್ಣುಗಳನ್ನೇ ಸಂತೋಷಗೊಳಿಸುತ್ತಿರಲಿ. ಯಾದವರ ಸಭೆಯಲ್ಲಿ ಹೇಳಿಕೊಳ್ಳಲು ಅದುವೆ ಒಳ್ಳೆಯ ವಿಡಂಬನೆಯಾದೀತು. ನೀನು ನಮ್ಮ ಸವತಿಯಾದ ಮಧುರೆಯ ಹೆಣ್ಣಿನ ಎದೆ ಮೇಲಿನ ಹೂಮಾಲೆಯ ಕುಂಕುಮವನ್ನು ಮೀಸೆಗಳಿಂದ ಸ್ಪರ್ಶಿಸಿ ಅವೇ ಮೀಸೆಗಳಿಂದ ನಮ್ಮನ್ನು ಸ್ಪರ್ಶಿಸಬೇಡ. ನೀನು ಕೃಷ್ಣನ ದೂತನೆ ತಾನೆ! ನೀನು ಹಾಗೆ ಮಾಡುವುದು ಸಹಜ.

ದತ್ತೂರ ಪುಷ್ಪವನ್ನು ಸದಾ ಸೇವಿಸಿ ಚಿತ್ತಭ್ರಂಶ ಹೊಂದಿದ ನೀನು ನಮ್ಮ ಸವತಿಯರಾದ ಮಧುರೆಯ ಹೆಣ್ಣುಗಳ ಎದೆ ಮೇಲಿನ ಕೆಂಪುದಾಸವಾಳದ ಮಕರಂದದಿಂದ ಲಿಪ್ತವಾದ ಆ ನಿನ್ನ ಮೀಸೆಗಳಿಂದ ನಮ್ಮನ್ನು ಸ್ಪರ್ಶಿಸಬೇಡ. ನೀನು ವಸಂತನ ಆಳು. ವಸಂತ ಕೃಷ್ಣನ ದೂತ. ಆದ್ದರಿಂದಲೇ ನೀನು ನಮ್ಮನ್ನು ಮುಟ್ಟಿ ವಿವಶ-ಗೊಳಿಸುತ್ತಿರುವಿ. ಸದಾ ಹೂಗಳ ಒಳ್ಳೆಯ ರಾಶಿಯಲ್ಲಿಯೆ ಸಂಚರಿಸುವ ನೀನು ನಮ್ಮನ್ನು ಮುಟ್ಟಿ ಇನ್ನೂ ಹೆಚ್ಚಿನ ಕಾಮಬಾಧೆಯ ಮೈಕೈನೋವನ್ನು ಉಂಟುಮಾಡು. ಅದರಿಂದ ನಿನಗೆ ತೃಪ್ತಿಯಾಗುವುದಾದರೆ ಆಗಲಿ. (ಯತ್ ಕಿತವೋ ಮಧುಪತಿಃ ತತ್ ತಸ್ಮಾತ್ ಮಾನಿನೀನಾಂ ನಃ ಉ ಸದಸಿ ವಿಡಂಬ್ಯಂ ಪ್ರಸಾದಂ ವಿಶೀರ್ಣತಾಂ ವಹತು ಪುನರಪಿ ದದಾತು)

ಈ ಪ್ರಣಯಪ್ರಸಂಗ ಸುರಸಭೆಯಲ್ಲಿ ಗೌರವಾರ್ಹ–

ಮೇಲುನೋಟಕ್ಕೆ ಗೋಪಿ ಹೀಗೆ ಹೇಳುತ್ತಿದ್ದರೂ ಅಂತರಂಗದ ಭಾವ ಬೇರೆಯೆ ಇದೆ—

ಓ ದುಂಬಿಯೆ, ಮಹಾಲಕ್ಷ್ಮಿಯ ಎದೆಮೇಲಿನ ಹೂಮಾಲೆಯ ಕುಂಕುಮ ಲೇಪದಿಂದ ಅಲಂಕೃತವಾದವು ನಿನ್ನ ಮೀಸೆಗಳು. ಅವುಗಳಿಂದ ನಮ್ಮನ್ನು ಸ್ಪರ್ಶಿಸು. ಮಧುರೆಯ ಹೆಣ್ಣುಗಳೂ ನಮ್ಮಂತೆ ಲಕ್ಷ್ಮಿಯ ಆವೇಶ ಉಳ್ಳವರಾಗಿದ್ದು ನಮಗೆ ಮಾನ್ಯರೇ ಆಗಿದ್ದಾರೆ. ಅವರನ್ನು ಕೃಷ್ಣ ಸಂತೋಷ ಪಡಿಸಲಿ. ಈ ಪ್ರಣಯಪ್ರಸಂಗ ಪವಿತ್ರವಾಗಿದ್ದು ಯಾದವರ ಸಭೆಯಲ್ಲಿ ಮಾತ್ರವಲ್ಲ, ರುದ್ರಾದಿದೇವತೆಗಳ ಸಭೆಗಳಲ್ಲಿಯೂ ಗೌರವಾರ್ಹ-

ವಾಗಿದೆ. ಆ ಕೃಷ್ಣನ ದೂತನಾದ ನೀನೂ ಜ್ಞಾನಿಯಾಗಿದ್ದು ಅವನ ಅಂಗಸಂಗಯೋಗ್ಯರಾದ ಹೆಣ್ಣುಗಳಲ್ಲೆಲ್ಲಾ ರಮಾವೇಶವನ್ನು ಕಾಣುವವನೆ. (ಈಂ ಲಕ್ಷ್ಮೀಂ ಪಶ್ಯತೀತಿ ಈದೃಕ್)

ನಮ್ಮನ್ನು ಮರೆತುಬಿಡುವುದು ನ್ಯಾಯವೇ–

ಸಕೃದಧರಸುಧಾಂ ಸ್ವಾಂ ಮೋಹಿನೀಂ ಪಾಯಯಿತ್ವಾ
ಸುಮನಸ ಇವ ಸದ್ಯಃ ಕಸ್ಯ್ಯಜೇಸ್ಮಾಂ ಭವಾದೃಕ್ ।
ಪರಿಚರತಿ ಕಥಂ ತತ್ಪದ್ಮಕಿಂಜಲ್ಕಪಾದಂ
ಹ್ಯಪಿ ಬತ ಹೃತಚಿತ್ತಾ ಉತ್ತಮಶ್ಲೋಕಜಲ್ಪೈಃ ॥

ಆ ಕೃಷ್ಣ ನಿಜವಾಗಿಯೂ ಮೋಸಗಾರ. ಒಮ್ಮೆ ಮಾತ್ರ ನನಗೆ ಅಧರಾಮೃತವನ್ನುಣಿಸಿ ಮೋಹದಲ್ಲಿ ಕೆಡವಿದನು. ಮತ್ತೆ ನನ್ನ ಕಡೆಗೆ ಬರಲೇ ಇಲ್ಲ. ಹೂಗಳನ್ನು ಮೂಸಿ ನೋಡಿ ಬಿಟ್ಟುಬಿಡುವಂತೆ ನನ್ನನ್ನು ಯಾರು ಹೀಗೆ ಬಿಟ್ಟುಬಿಡುತ್ತಾನೆ? ನಾನು ಮಾತ್ರ ಅವನನ್ನು ಬಿಡಲಾರೆ. ನಿತ್ಯಮುಕ್ತಳಾದ ರಮೆಯೂ ಅವನ ಚರಣಕಮಲವನ್ನು ಸೇವಿಸುತ್ತಿರುವಳೆಂದ ಮೇಲೆ ಭವಸಾಗರದಲ್ಲಿ ಮುಳುಗಿರುವ ನಮ್ಮಂಥವರ ಪಾಡೇನು? ಒಳ್ಳೆಯ ಕೀರ್ತಿಶಾಲಿ ಕೃಷ್ಣ. ಅವನ ನುಡಿಗಳಿಗೆ ನಾವು ಮನಸೋತಿದ್ದೇವೆ. ಆದರೂ ನಾವೇನೂ ಸ್ವತಃ ಕೃಷ್ಣನ ಬಳಿಗೆ ಓಡಿದವರಲ್ಲ. 'ಬನ್ನಿ, ಅಧರಸುಧೆಯನ್ನು ಪಾನಮಾಡಿ' ಎಂದು ಕರೆಕರೆದು ನಮಗೆ ಉಣಿಸಿದವನು. ಈಗ ನಮ್ಮನ್ನು ಮರೆತು ಬಿಡುವುದು ನ್ಯಾಯವೇ? ನಾವೇನು ಸುಂದರಿಯರಲ್ಲವೆ? ಹೂವಿನಂಥ ಮೂಗು ಕಣ್ಣು ಕಿವಿ ಮುಂತಾದ ಅಂಗಗಳುಳ್ಳವರು ನಾವು. ಅವನೂ ಪ್ರಣಯದಾಟದಲ್ಲಿ ಉದಾಸೀನನೇನಲ್ಲ. ಮನ್ಮಥನಿಗೆ ಆಶ್ರಯನೆಂದು ಪ್ರಸಿದ್ಧನಾಗಿರುವವನು. ಯಾವ ರೀತಿಯಿಂದ ವಿಚಾರ ಮಾಡಿದರೂ ಅವನು ನಮ್ಮನ್ನು ಬಿಡುವುದು ತರವಲ್ಲ. (ಭವಂ ಸಂಸಾರಂ ನ ಪಶ್ಯತೀತಿ ನಿತ್ಯಮುಕ್ತಾ ರಮಾಽಪಿ । ಹೇ ಅ ಭಗವನ್ । ಪಿಬತ ಇತಿ ಪಾಯಯಿತ್ವಾ । ಮಾಮಿತಿ ಮದಾದ್ಯಾ ಇತ್ಯರ್ಥಃ ॥ ಸುಮವತ್ ತಿಲಕುಸುಮವತ್ ನಾಸಿಕಾ ಯಾಸಾಂ ತಾಃ । ಇಃ ಮನ್ಮಥಃ ವಸತ್ಯಸ್ಮಿನ್ ಸಃ ಇವಸನ್ ಇತಿ ಯಂ ಯಶೋ ಯಸ್ಯಸಃ ಇವಸದ್ಯಃ ।)

ಮೃಗಯುರಿವ ಕಪೀಂದ್ರಂ ವಿವ್ಯಧೇ ಯಃ ಕಿರಾತಃ
ಸ್ತ್ರಿಯಮಕೃತ ವಿರೂಪಾಂ ಸ್ತ್ರೀಜಿತಃ ಕಾಮಯಾಬಾನಾಂ ।
ಬಲಿಮಪಿ ಬಲಿವಾಸಂ ವೇದವಿದ್ವರ್ಗವಂದ್ಯ-
ಸ್ತದಲಮಸಿತಸಖ್ಯೈರ್ದುಸ್ತ್ಯಜಸ್ತತ್ಕಥಾರ್ಥಃ ॥

ಮಧುರೆಯ ಹೆಣ್ಣುಗಳಿಗೆ ವಶನಾಗಿ ಕೃಷ್ಣ ನಮ್ಮನ್ನು ವಂಚಿಸಿದ. ಆತ ಹಿಂದೆಯೂ ರಾಮನಾಗಿದ್ದಾಗ ಏಕಪತ್ನೀವ್ರತಸ್ಥ ಶಮಾದಿಗುಣಸಂಪನ್ನನಾಗಿದ್ದರೂ ಹೆಂಡತಿ ಕಳೆದುಹೋದ ಚಿಂತೆಯಲ್ಲಿ ಬೇಡನಂತೆ ಮರ-'ಯಲ್ಲಿ ನಿಂತು ಅನ್ಯಾಯವಾಗಿ ವಾಲಿಯನ್ನು ಕೊಂದ. ಯೋಗ್ಯ ಪತಿಯ ಅನ್ವೇಷಣೆ ಮಾಡುತ್ತಿದ್ದ ಶೂರ್ಪಣಖಿ-ಯನ್ನು ಕಿರಾತನಂತೆ ನಿಷ್ಕರುಣೆಯಿಂದ ವಿರೂಪಗೊಳಿಸಿದ. ಸೀತೆಯ ಮನಃಸಂತೋಷಕ್ಕಾಗಿ ಮಧುರೆಯ ರಾಜಮಾರ್ಗದಲ್ಲಿ ತನ್ನಪಾಡಿಗೆ ತಾನು ನಡೆದುಬರುತ್ತಿದ್ದ ವಿರೂಪಳಾದ ಕುಬ್ಜೆಯನ್ನು ತನ್ನ ಮಡದಿಯನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ಸ್ತ್ರೀಲಂಪಟನಾದ ಕಿರಾತನಂತೆ ವರ್ತಿಸಿದ. ಅವನು ಬಣ್ಣದಲ್ಲಿ ಅಸಿತ, ಅಂದರೆ ಕಪ್ಪು. ಬಣ್ಣದಲ್ಲಿ ಮಾತ್ರವಲ್ಲ ಚಾರಿತ್ರ್ಯದಲ್ಲಿಯೂ ಅಸಿತ, ಕಪ್ಪು. ಏಕೆಂದರೆ ಹಿಂದೆ ವಾಮನನಾಗಿ ಅವತರಿಸಿದಾಗ ತನ್ನ ಸರ್ವಸ್ವವನ್ನೂ ದಾನ ಮಾಡಿದ ಬಲಿಯನ್ನು ಪಾತಾಳಕ್ಕೆ ತಳ್ಳಿದ. ಇಂಥವನನ್ನು ವೇದವೇತ್ತರಾದ ಜ್ಞಾನಿಗಳೂ ಕೊಂಡಾಡುವರೆಂದರೆ ಇದು ಆಶ್ಚರ್ಯ! ಅವನೊಡನೆ ಪ್ರಣಯ ವ್ಯವಹಾರ ಇನ್ನು 'ಅಲಂ' ಸಾಕು. ಆದರೂ ಹೆಣ್ಣಿನ ಸ್ವಭಾವದಿಂದ ನಾವು ಅವನ ವೃತ್ತಾಂತ ಶ್ರವಣವನ್ನು ಮಾತ್ರ ಬಿಡಲು ಅಸಕ್ತರಾಗಿರುವೆವು.

ನಿತ್ಯಮುಕ್ತನ ಕಥೆ ಬಿಡಲು ಸಲ್ಲ–

ಇಲ್ಲಿ ಗೋಪಿಯರ ಅಂತರಂಗದ ಭಾವ ಹೀಗಿದೆ– ವಾಲಿಯೆ ಬೇಡನಂತೆ ಅನ್ಯಾಯವಾಗಿ ಸುಗ್ರೀವನನ್ನು ಹೊಡೆದೋಡಿಸಿ ಅವನ ಹೆಂಡತಿಯನ್ನಿಟ್ಟುಕೊಂಡು ಅವಳ ಯಶಸ್ಸಿಗೆ ಕುಂದುತಂದಿದ್ದ. ಆದ್ದರಿಂದ ರಾಮನೂ ಬೇಡನಂತೆ ಮರೆಯಲ್ಲಿ ನಿಂತು ಆ ವಾಲಿಯನ್ನು ಕೊಂದ. ಯೋಗಿಪ್ರಿಯನಾದ ರಾಮ ಸ್ವೈರಿಣಿಯಾಗಿ ಗಂಡಿನ ಬೇಟೆಯಾಡುತ್ತ ತಿರುಗುತ್ತಿದ್ದ ಶೂರ್ಪಣಖಿಗೆ ಯೋಗ್ಯ ಶಿಕ್ಷೆಯನ್ನೇ ವಿಧಿಸಿದ. ದೇವರಾಜನನ್ನು ಕಾಮಿಸಿ ಪತಿಶಾಪದಿಂದ ಶಿಲೆಯಾಗಿ ಬಿದ್ದಿದ್ದ. ಅಹಲ್ಯೆಯನ್ನು ತಿರುಗಿ ಸ್ತ್ರೀಯನ್ನಾಗಿ ಮಾಡಿದ. ಸ್ತ್ರೀಗೆ ಮರುಳಾಗದೆ ಇರುವ ಕೃಷ್ಣನೆ ವಿರೂಪಳಾದ ಕುಬ್ಜೆಯನ್ನು ಸುಂದರ ಸ್ತ್ರೀಯನ್ನಾಗಿ ಮಾಡಿ ಅನುಗ್ರಹಿಸಿದ. ಬಲಿ ಅನ್ಯಾಯವಾಗಿ ದೇವೇಂದ್ರನ ಸಿಂಹಾಸನವನ್ನು ಆಕ್ರಮಿಸಿ ಬಹಳ ಅಹಂಕಾರ ಪಟ್ಟಿದ್ದರೂ ಅವನನ್ನು ಕ್ಷಮಿಸಿ ಪಾತಾಳದಲ್ಲಿ ಚಕ್ರವರ್ತಿಯನ್ನಾಗಿ ಮಾಡಿದ್ದಾನೆ, ಮುಂದಿನ ಮನ್ವಂತರದಲ್ಲಿ ಉಚ್ಚೈಃಶ್ರವಸ್ ಮುಂತಾದ ಸಂಪತ್ತಿನಿಂದ ಯುಕ್ತವಾದ ಇಂದ್ರಪದವಿಯನ್ನು ಬಲಿಗೆ ನಿಶ್ಚಯವಾಗಿ ಕೊಡಲಿದ್ದಾನೆ ಎಂದೇ ವೇದವೇತ್ತರಾದ ಜ್ಞಾನಿಗಳು ಅವನನ್ನು ವಂದಿಸುತ್ತಾರೆ. ಬಣ್ಣದಲ್ಲಿ 'ಅಸಿತ' ಕಪ್ಪಾದರೂ ಮಹಿಮೆಯಲ್ಲಿ 'ಅಸಿತ' ನಿತ್ಯಮುಕ್ತನಾದ್ದರಿಂದ 'ಅಲಂ' ವಿಶೇಷವಾಗಿ ಪ್ರೀತಿ ಮಾಡಲು ಯೋಗ್ಯನೆಂದೇ ನಾವು ಅವನ ವೃತ್ತಾಂತಶ್ರವಣವನ್ನು ಬಿಟ್ಟಿರಲಾರೆವು. (ಯೊಂ ಮೃಗಯುರಿವ ಕಪೀಂದ್ರಂ ಸುಗ್ರೀವಂ ವಿವ್ಯಧೇ ಸ್ತ್ರಿಯಂ ತತ್‌ಸ್ತ್ರಿಯೇ ರುಮಾಂ ವಿರೂಪಾಂ ವಿಗತಂ ರೂಪಂ ಯಶಃ ಯಸ್ಯಾಸ್ತಾಂ ಅಕೃತ ತಂ ಕಪೀಂದ್ರಂ ವಾಲಿನಂ ವಿವ್ಯಧೇ । ನಾನಯೋಽನೇನಾನುಷ್ಠಿತ ಇತಿ ಭಾವಃ । ಸ್ತ್ರಿಯೋ ಜಿತಾ ಯೇನಾಸೌ । ಕಿನೋ ವಾಯುಜಯವತಃ ರಾತಂ ಮಿತ್ರಂ ಯಸ್ಯಸಃ ಸ್ತ್ರೀಜಿತೋ ಗೌತಮ-ಭಾರ್ಯಾಂ ಪ್ರಾಪ್ತಃ ವಿರೂಪಾ ಶಿಲಾರೂಪಾಂ ತಾಂ ಸ್ತ್ರಿಯಮಕೃತ । ಬಿಲವಾಸಂ ಉಚ್ಚೈಃಶ್ರವೋವಾಸಂ ತದ್ವಾಹನಕಮಿಂದ್ರ ಮಿತಿ ಯಾವತ್ ।)

ಬಿಟ್ಟರೆ ಅಮಂಗಳವಾಗುವುದು. ಅವನ ವಾರ್ತೆಯನ್ನು ಹೇಳು! ಆನಂದವಾಗುವುದು. ಕೃಷ್ಣನ ಗೆಳೆಯಾ! ಹೋದವನು ತಿರುಗಿ ಏಕೆ ಬಂದೆ? ಕೃಷ್ಣನು ನಿರ್ಬಂಧಿಸಿ ಕಳುಹಿಸಿದನೇನು? ಹಾಗಾದರೆ ನೀನು ಪೂಜ್ಯನು. ನಾವು ಅವನನ್ನು ಬಿಟ್ಟಿರಲಾರೆವು. ನಮ್ಮನ್ನು ಅವನ ಬಳಿಗೆ ಹೇಗೆ ಸಾಗಿಸುವಿ? ಲಕ್ಷ್ಮಿಯು ಸವತಿಮಾತ್ಸರ್ಯದಿಂದ ನಮ್ಮನ್ನು ಅವನ ಹತ್ತಿರ ಸೇರಿಸುವಳೆ? ಅವನ ದರ್ಶನ ಮತ್ತು ಸಂಭಾಷಣೆ ದುರ್ಲಭವೇ ಸರಿ. ಕೃಷ್ಣನು ಇಲ್ಲಿಗೆ ಬರುವನೆ? ಯಾವಾಗ ಬರುವನು?

ಉದ್ಧವ ಗೋಪಿಯರ ಸಂವಾದ–

ಇವರನ್ನೇ ಕಂಡ ಉದ್ಧವನು, ಆಹಾ! ನೀವೇ ಧನ್ಯರು! ಸಾಧನಸಂಪನ್ನರಾದ ಮುನಿಗಳಿಗೂ ದುರ್ಲಭ-ವಾದ ಅಸಾಧಾರಣ ಭಕ್ತಿಯು ನಿಮಗೆ ಉಂಟಾಗಿರುವುದಲ್ಲ!! ಮಹಾಭಾಗ್ಯವತಿಯರೇ! ಸರ್ವವನ್ನೂ ತೊರೆದು ಶ್ರೀಕೃಷ್ಣನನ್ನೇ ಪ್ರೀತಿಸುವುದಕ್ಕೆ ದೈವಾನುಗ್ರಹವೇ ಕಾರಣ. ಶ್ರೀಕೃಷ್ಣನು ನಿಮಗೆ ಹೇಳಿ ಕಳುಹಿಸಿರುವುದನ್ನು ಅವನ ಮಾತಿನಿಂದಲೇ ತಿಳಿಸುವೆನು ಕೇಳಿ!

ಶ್ರೀಭಗವಾನುವಾಚ–

ಭವತೀನಾಂ ವಿಯೋಗೋಮೇ ನಹಿ ಸರ್ವಾತ್ಮನಾ ಕ್ವಚಿತ್ ।
ಯಥಾಭೂತಾನಿ ಭೂತೇಷು ಖಂ ವಾಯ್ವಗ್ನಿರ್ಜಲಂ ಮಹೀ ।

ಗೋಪಿಯರೇ! ನಿಮಗೂ, ನನಗೂ ಯಾವಾಗಲೂ ವಿಯೋಗವು ಇಲ್ಲವೇ ಇಲ್ಲ. ಪಂಚಭೂತಗಳು ಸಕಲ ಶರೀರಗಳಲ್ಲಿಯೂ ಹೇಗೆ ಇದ್ದೇ ಇರುವುವೋ ಹಾಗೆ ನಾನು ಸರ್ವರಲ್ಲಿಯೂ ಇರುವುದರಿಂದ ನನ್ನನ್ನು ಬಿಟ್ಟು ನೀವು ಇರುವುದೆಲ್ಲಿ ಬಂತು? ನಾನು ಆದಾನಾದಿಕರ್ತನು, ಪೂರ್ಣಜ್ಞಾನಿಯು, ನಿರ್ದೋಷನು,

ತ್ರಿಗುಣವರ್ಜಿತನು. ನಾನು ನಿಮ್ಮ ಸಮೀಪದಲ್ಲಿಯೇ ಇದ್ದರೂ, ನಿಮ್ಮ ಕಣ್ಣಿಗೆ ಕಾಣಿಸದೆ ದೂರವಿದ್ದಂತೆ ನಿಮಗೆ ಭಾಸವಾಗುತ್ತಿದೆ. ಅಖಂಡವಾಗ್ಗಿ ಧ್ಯಾನವನ್ನು ನೀವು ಮಾಡಲು ನಿಮ್ಮ ಮನಸ್ಸನ್ನು ಸಂಯೋಜನೆ ಮಾಡ-ಬೇಕೆಂದೇ ಹೀಗೆ ಮಾಡಿರುವೆನು. ನೀವು ಹೀಗೆ ಎಡಬಿಡದೆ ಧ್ಯಾನ ಮಾಡಿದರೆ ನನ್ನನ್ನು ಬೇಗ ಹೊಂದುವಿರಿ ಶ್ರೀ ಕೃಷ್ಣನು ಹೇಳಿದನು.

ಗೋಪಿಯರು ಮತ್ತೆ ಉದ್ಧವಾ! ಮಧುರಾಪುರಿಯ ತರುಣಿಯರೊಡನೆ ವಿಹರಿಸುವಾಗ ನಮ್ಮನ್ನು ಒಂದು ಬಾರಿಯಾದರೂ ಕೃಷ್ಣನು ಸ್ಮರಿಸಿಕೊಳ್ಳುವನೇ? ಎಂದಾದರೂ ಬಂದು ಅಂಗಸಂಗದಿಂದ ನಮ್ಮನ್ನು ಅವನು ಬದುಕಿಸುವನೆ? ಸ್ವರಮಣನಾದ ಅವನಿಗೆ ಯಾರಿಂದಲೂ ಆಗಬೇಕಾದ ಸುಖವು ಇಲ್ಲ. ನಮಗೆ ಮಾತ್ರ ಅವನ ಕಾಮವು (ಆಶೆಯು) ಬಿಟ್ಟಿಲ್ಲ. ಇಲ್ಲಿನ ವನ, ನದಿ ಮುಂತಾದುವುಗಳನ್ನು ನೋಡಿದಾಗ ಅವನ ಸ್ಮರಣೆಯು ಬರುವುದು. ಅವನ ಪಾದಸ್ಮರಣೆ ಮಾಡದಿರಲು ನಮಗೆ ಸಾಧ್ಯವೇ ಇಲ್ಲ ಎಂದು ಬಡಬಡಿಸುತ್ತಲೇ ಇದ್ದರು.

ಹೇ ನಾಥ ಹೇ ರಮಾನಾಥ ವ್ರಜನಾಥಾರ್ತಿನಾಶನ ।
ಮಗ್ನಂ ಉದ್ದರ ಗೋವಿಂದ ಗೋಕುಲಂ ವೃಜಿನಾರ್ಣವಾತ್ ॥

ಗೋಪಿಯರು ಕೃಷ್ಣಾಜ್ಞೆಯನ್ನು ಚಿಂತಿಸಿ ವಿರಹತಾಪದಿಂದ ಮುಕ್ತರಾಗಿ ಉದ್ಧವನನ್ನು ಪೂಜಿಸಿದರು. ಉದ್ಧವನು ಕೆಲವು ತಿಂಗಳುಗಳ ಕಾಲ ಅಲ್ಲಿಯೇ ಇದ್ದು, ಶ್ರೀಕೃಷ್ಣನು ಓಡಾಡಿದ ಸ್ಥಳ ಮತ್ತು ಅಲ್ಲಲ್ಲಿ ಮಾಡಿದ ವ್ಯಾಪಾರಗಳನ್ನು ಗೋಪರಿಂದ ಕೇಳುತ್ತಾ, ಹರಿಯನ್ನೇ ಸ್ಮರಿಸುತ್ತ, ಸಂತೋಷದಿಂದ ಇದ್ದು ತನ್ನ ಮನಸ್ಸಿನಲ್ಲಿ,

ಗೋಪಿಯರು ದೃಢಭಕ್ತರಾಗಿ ತಮ್ಮ ಜನ್ಮವನ್ನು ಸಫಲ ಮಾಡಿಕೊಂಡಿರುವರು. ಗೊಲ್ಲತಿಯರಾಗಿ ಹುಟ್ಟಿದ್ದರೂ ಅವರಿಗೆ ಈ ಭಕ್ತಿಯು ಆಶ್ಚರ್ಯವೆ!!

ಆಸಾಮಹೋ ಚರಣರೇಣುಜುಷಾಮಹಂ ಸ್ಯಾಂ
ವೃಂದಾವನೇ ಕಿಮಪಿ ಗುಲ್ಮಲತೌಷಧೀನಾಂ ॥

ಈ ಭಾಗ್ಯವತಿಯರ ಪಾದಧೂಳಿಯನ್ನು ಸೇವಿಸುತ್ತಿರುವ ಈ ಬೃಂದಾವನದಲ್ಲಿರುವ ತರು, ಗುಲ್ಮ, ಬಳ್ಳಿ ಮೊದಲಾದುವುಗಳಲ್ಲಿ ಯಾವುದಾದರೂ ಒಂದು ಜನ್ಮವು ನನಗೆ ಲಭಿಸಲಿ! ಅದೇ ನನಗೆ ಭಾಗ್ಯ! ಇವರ ಪಾದಧೂಳಿಯನ್ನು ನನ್ನ ತಲೆಯ ಮೇಲೆ ಇಟ್ಟು ಸ್ತುತಿಸುವೆನು ಎಂದು ಚಿಂತಿಸಿದನು. ಉದ್ಧವನು ಮಧುರೆಗೆ ಹೊರಡಲು ಸಿದ್ಧನಾದುದನ್ನು ನೋಡಿ,

ಗೋಪಿಯರು ಸೌಮ್ಯ! ಉದ್ಧವ! ಇನ್ನು ನಾವು ಹೇಳತಕ್ಕದ್ದೇನಿದೆ? ನಮ್ಮ ಮನಸ್ಸು ಶ್ರೀಹರಿಯ ಪಾದಗಳಲ್ಲಿ ನೆಲೆಸಲಿ! ನಾಲಗೆ ಅವನ ನಾಮವನ್ನು ನುಡಿಯುತ್ತಿರಲಿ! ದೇಹವು ಅವನಿಗೆ ನಮಿಸುತ್ತಿರಲಿ! ಹಿಂದೆ ಮಾಡಿದ ಪುಣ್ಯವೇನಾದರೂ ಇದ್ದರೆ ಶ್ರೀಕೃಷ್ಣನಲ್ಲಿ ಭಕ್ತಿಯು ಶಾಶ್ವತವಾಗಿರಲಿ! ಎಂದರು. ಉದ್ಧವನು ಬಂದು ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಗೋಕುಲದವರ ಭಕ್ತ್ಯತಿಶಯವನ್ನು ತಿಳಿಸಿದನು.

ಕುಬ್ಜೆಗೆ ಅನುಗ್ರಹ

ಶ್ರೀಕೃಷ್ಣನು ಒಂದು ದಿನ ಉದ್ಧವನೊಡನೆ ಸೈರಂಧ್ರಿಯ ಮನೆಗೆ ಬಂದು, ಹಿಂದೆ ಕೊಟ್ಟ ಮಾತಿನಂತೆ ಅವಳನ್ನು ಸುಖ ಪಡಿಸಿದನು. ಆಕೆಯು ಕೃಷ್ಣನನ್ನು ತನ್ನ ಮನೆಯಲ್ಲಿಯೇ ಕೆಲವು ದಿನಗಳು ಇರಬೇಕೆಂದು ಪ್ರಾರ್ಥಿಸಿದಾಗ, ಇನ್ನೊಂದು ಬಾರಿ ಬಂದು ಅವಳ ಅಭೀಷ್ಟವನ್ನು ಪೂರೈಸುವುದಾಗಿ ವರವನ್ನು ಕೊಟ್ಟು ತನ್ನ ಅರಮನೆಗೆ ಬಂದನು.

ಶ್ರೀಕೃಷ್ಣನು ಅಕ್ರೂರನಿಗೆ ಮಾತು ಕೊಟ್ಟಿದ್ದಂತೆ ಬಲರಾಮ ಮತ್ತು ಉದ್ಧವರೊಡನೆ ಅವನ ಮನೆಗೆ ಹೋದನು. ಅಕ್ರೂರನು ಆನಂದಿಸಿ ಅವರಿಗೆ ಭಕ್ತಿಪೂರ್ವಕವಾಗಿ ಸತ್ಕಾರ ಮಾಡಿದನು.

ಮಹಾತ್ಮಾ! ನಿಮ್ಮಿಂದ ಕಂಸನು ಹತನಾಗಿ, ಅವನಿಂದಾಗಿದ್ದ ಹಿಂಸೆ ಮತ್ತು ಸಂಕಟಗಳೆಲ್ಲ ಪರಿಹಾರವಾಗಿ ಈ ಕುಲವು ಪಾವನವಾಗಿ ಅಭಿವೃದ್ಧಿಯಾಯಿತು. ಕೃಷ್ಣ! ನೀನು ಸೃಷ್ಟ್ಯಾದಿಕರ್ತನು. ನಿನ್ನಿಂದ ಸೃಷ್ಟವಾದ ಪದಾರ್ಥಗಳೊಳಗೆಲ್ಲ ತದ್ರೂಪ ತನ್ನಾಮಕನಾಗಿರುವೆ. ಅಣುಮಹತ್ತಾಗಿ ತೋರುವೆ. ಜನನಾದಿದೋಷದೂರನಾಗಿರುವೆ. ಈ ತತ್ತ್ವನಿಶ್ಚಯಜ್ಞಾನವು ನಮಗೆ ಉಂಟಾಗಲಿ! ದುಷ್ಟರು ಅಪಾರ್ಥ ಮಾಡಿ ಶಾಸ್ತ್ರವನ್ನು ಕೆಡಿಸಿದಾಗಲೆಲ್ಲ ಅವತರಿಸಿ ಜ್ಞಾನೋಪದೇಶ ಮಾಡಿ ಸಜ್ಜನರನ್ನು ಸನ್ಮಾರ್ಗದಲ್ಲಿ ಸ್ಥಿರವಾಗಿ ಸ್ಥಾಪಿಸುವೆ. ವೇದವ್ಯಾಸರಿಂದ ಅಭಿನ್ನನಾದ ನೀನು ಕೃಷ್ಣಕೇಶಾಂಶದಿಂದ ದೇವಕಿಯಲ್ಲಿ ಅವತರಿಸಿರುವೆ. ಜಗದ್ಗುರುವಾದ ನೀನು ಈ ಮನೆಗೆ ಬಂದುದರಿಂದ ಮಹಾಸಂಪತ್ತುಂಟಾಯಿತು. ನಿನ್ನ ದರ್ಶನವು ದುರ್ಲಭ. ನೀನು ಪ್ರತ್ಯಕ್ಷನಾಗಿರುವಾಗಲೇ ಸತೀಸುತಾದಿಗಳಲ್ಲಿರುವ ಅಭಿಮಾನವನ್ನು ಬಿಡಿಸಿಬಿಡು, ಎಂದು ಅಕ್ರೂರನು ಪ್ರಾರ್ಥಿಸಿದನು.

ಕೃಷ್ಣನು ಆ ಕಾಲದಲ್ಲಿ ಬಂದ ವಿವೇಕವನ್ನು ಮರೆಮಾಡಿ ನೀನು ನಮ್ಮ ಚಿಕ್ಕಪ್ಪನು. ನಾವು ನಿನ್ನ ಮಕ್ಕಳು. ನಮ್ಮ ಪೋಷಣೆ ಮುಂತಾದುದೆಲ್ಲವೂ ನಿನಗೇ ಸೇರಿವೆ. ಸಾಧುಗಳಾದ ನಿಮ್ಮಂತಹವರು ಸ್ವಾರ್ಥಪರರಲ್ಲ. ಪರಾರ್ಥೈಕನಿಷ್ಠರು. ಆದ್ದರಿಂದ ಕಿರಿಯರಾದ ನಮ್ಮಿಂದ ಸೇವಿಸಲ್ಪಡಲು ಅರ್ಹರು.

ನಹ್ಯಮ್ಮಯಾನಿ ತೀರ್ಥಾನಿ ನ ದೇವಾ ಮೃಚ್ಛಿಲಾಮಯಾಃ ।
ತೇ ಪುನಂತ್ಯುರುಕಾಲೇನ ದರ್ಶನಾದೇವ ಸಾಧವಃ ॥

ಜಡವಾದ ನೀರಾಗಲಿ, ಮಣ್ಣು, ಕಲ್ಲಿನ ಪ್ರತಿಮೆಗಳಾಗಲಿ ದೇವತೆಗಳಲ್ಲ. ಆದ್ದರಿಂದ ಜಡಗಳಾದ ಅವು ತಾವಾಗಿ ಪವಿತ್ರ ಮಾಡಲಾರವು. ತಮ್ಮಲ್ಲಿ ಸಂನಿಹಿತರಾಗಿರುವ ದೇವತೆಗಳ ಮೂಲಕ ಬಹುಕಾಲದ ಮೇಲೆ ಪಾವನ ಮಾಡುವುವು. ಸಜ್ಜನರಾದರೋ ಸ್ವಾರ್ಥಕ್ಕಾಗಿ ಸಂಚರಿಸುವವರಲ್ಲ. ಸಜ್ಜನರಾದವರಿಗೆ ಅನುಗ್ರಹಿಸಬೇಕೆಂದು ಸಂಚರಿಸುವವರು. ಆದ್ದರಿಂದ ಅವರು ತಮ್ಮ ದರ್ಶನ ಮಾತ್ರದಿಂದಲೇ ಸಜ್ಜನರನ್ನು ಪಾವನ ಮಾಡಿಬಿಡುತ್ತಾರೆ.

ಹಸ್ತಿನಾವತಿಗೆ ಅಕ್ರೂರ ಪ್ರೇಷಣ–

ಸಭವಾನ್ ಸುಹೃದಾಂ ವೈನಃ ಕಿಂಚಿಚ್ಛ್ರೇಯಶ್ಚಿಕೀರ್ಷಯಾ ।
ಜಿಜ್ಞಾಸಾರ್ಥಂ ಪಾಂಡವಾನಾಂ ಗಚ್ಛಸ್ವ ಗಜಸಾಹ್ವಯಮ್ ॥

ಇಂತಹ ಸಾಧುವಾದ ನೀನು ನಮ್ಮ ಹಿತೈಷಿಯು. ನಮಗಾಗಿ ನೀನು ಒಂದು ಕಾರ್ಯವನ್ನು ಮಾಡಬೇಕು. ಏನೆಂದರೆ ಹಸ್ತಿನಾವತಿಗೆ ಹೋಗಿ ಧೃತರಾಷ್ಟ್ರನು ತನ್ನ ಮಕ್ಕಳನ್ನು ನೋಡುವಂತೆ ತನ್ನ ತಮ್ಮನ ಮಕ್ಕಳಾದ ಪಾಂಡವರನ್ನು ನೋಡುತ್ತಿರುವನೇ ಅಥವಾ ಪಕ್ಷಪಾತ ಮಾಡುತ್ತಿರುವನೇ? ವಿಚಾರ ಮಾಡಿ ತಿಳಿದು ಬಾ. ಬಳಿಕ ನಮ್ಮ ಬಂಧುಗಳಾದ ಪಾಂಡವರಿಗೆ ಸುಖವಾಗುವ ರೀತಿಯಲ್ಲಿ ಕಾರ್ಯ ಮಾಡೋಣ.

ಅಕ್ರೂರ ಪ್ರಯಾಣ – ಧೃತರಾಷ್ಟ್ರೋಪದೇಶ

ಯಥಾವದುಪಸಂಗಮ್ಯ ಬಂಧುಭಿರ್ಗಾಂದಿನೀಸುತಃ ।
ಸಂಪೃಷ್ಟಾಸ್ತೈಃ ಸುಹೃದ್ವಾರ್ತಾಂ ಸ್ವಯಂ ಚಾಪೃಚ್ಛದವ್ಯಯಮ್ ।

ಅಕ್ರೂರ ಕೃಷ್ಣಾಜ್ಞೆಯಂತೆ ಹಸ್ತಿನಾವತಿಗೆ ಹೋಗಿ, ಭೀಷ್ಮಾದಿಗಳನ್ನು ಕಂಡು ಕುಶಲವಿಚಾರ ಮಾಡಿದನು. ಯಾದವರ ಕುಶಲವನ್ನು ಅವರಿಗೂ ತಿಳಿಸಿದನು. ಅಲ್ಲಿಯೇ ಇದ್ದು ಧೃತರಾಷ್ಟ್ರನು ತನ್ನ ಮಕ್ಕಳ ವಶನಾಗಿರುವನೆಂದೂ, ಪಾಂಡವರಲ್ಲಿ ಪ್ರಜೆಗಳೆಲ್ಲರೂ ಬಹುವಾಗಿ ಅನುರಾಗವಿಟ್ಟಿರುವರೆಂದೂ, ಕುಂತಿ ಮತ್ತು ವಿದುರಾದಿಗಳಿಂದ ತಿಳಿದನು. ಈ ವೇಳೆಯಲ್ಲಿಯೇ ಕುಂತಿಯು ತನ್ನ ಗಂಡ ಪಾಂಡುರಾಜನನ್ನು ಕಳೆದುಕೊಂಡದ್ದು, ಮಕ್ಕಳು ಪರದೇಶಿಗಳಾದುದು ಮೊದಲಾದ ಹಿಂದಿನ ಸಂಗತಿಗಳನ್ನು ಸ್ಮರಿಸಿಕೊಂಡು ಅತ್ತಳು. ಅಕ್ರೂರನೂ, ವಿದುರನೂ ಆಕೆಯನ್ನು ಸಮಾಧಾನ ಮಾಡಿದರು. ಅಕ್ರೂರನು ಹೊರಡಲು ಸಿದ್ಧನಾಗಿ ಬಂಧುಗಳ ಸಭೆಗೆ ಬಂದು

ಭೋ ಭೋ ವೈಚಿತ್ರವೀರ್ಯತ್ವಂ ಕುರೂಣಾಂ ಕೀರ್ತಿವರ್ಧನ ।
ವರ್ತಮಾನಃ ಸಮಃ ಸ್ವೇಷು ಶ್ರೇಯಃ ಕೀರ್ತಿಮವಾಪ್ಸ್ಯಸಿ ।
ಅನ್ಯಥಾ ತ್ವಾಚರನ್ ಲೋಕೇ ಗರ್ಹಿತೋ ಯಾಸ್ಯಸೇ ತಮಃ ॥

ಧೃತರಾಷ್ಟ್ರನೇ! ನೀನೀಗ ಕುರುರಾಜನ ಸಿಂಹಾಸನವನ್ನು ಏರಿರತಕ್ಕವನು. ಪ್ರಜೆಗಳನ್ನು ಯೋಗ್ಯರೀತಿಯಿಂದ ಕಾಪಾಡು! ನಿನ್ನ ಮಕ್ಕಳಲ್ಲಿಯೂ, ನಿನ್ನ ತಮ್ಮ ಪಾಂಡುರಾಜನ ಮಕ್ಕಳಲ್ಲಿಯೂ ಪಕ್ಷಪಾತ ಮಾಡದೆ ಸಮವಾಗಿ ನಡೆದುಕೊಂಡರೆ ಕೀರ್ತಿಯನ್ನೂ ಮತ್ತು ಶ್ರೇಯಸ್ಸನ್ನೂ ಹೊಂದುವೆ. ಅಧರ್ಮದಿಂದ ನರಕವಾಗುತ್ತದೆಯಾಗಿ ದೇಹ ಮತ್ತು ಮಕ್ಕಳು ಮೊದಲಾದವರಲ್ಲಿ ಮಮತೆಯನ್ನು ಬಿಟ್ಟು ಸರ್ವವೂ ಭಗವಂತನ ಅಧೀನವೆಂದೂ ನಿಶ್ಚಯಿಸಿ, ರಾಗದ್ವೇಷಾದಿಗಳನ್ನು ತೊರೆದು ಮನಸ್ಸನ್ನು ನಿಗ್ರಹಿಸಿ ಶಾಂತಚಿತ್ತನಾಗಿ ನಡೆದುಕೋ ಎಂದು ಹಿತನುಡಿಗಳನ್ನು ಅರುಹಿದ.

ಈಶ್ವರಸ್ಯ ವಿಧಿಂ ಕೋನು ವಿಧುನೋತ್ಯನ್ಯಥಾ ಪ್ರಮಾನ್ ।
ಭೂಮೇರ್ಭಾರಾವತಾರಾಯ ಯೋ ವತೀರ್ಣೋ ಯದೋಃ ಕುಲೇ ।

ಅದಕ್ಕೆ ಧೃತರಾಷ್ಟ್ರನು ಅಕ್ರೂರನೇ! ನಿನ್ನ ಹಿತೋಕ್ತಿಯನ್ನು ಕೇಳಿ ಸಂತೋಷವಾಯಿತು. ನೀನು ಹೇಳಿದ ಬುದ್ಧಿವಾದವು ಶ್ರೇಯಸ್ಕರವೆಂಬ ವಿಷಯದಲ್ಲಿ ಸಂದೇಹವೇ ಇಲ್ಲ. ಆದರೆ ಪುತ್ರವ್ಯಾಮೋಹವು ಹೋಗಿಲ್ಲ. ಮನಸ್ಸು ಸ್ಥಿರವಾಗಿ ನಿಲ್ಲುತ್ತಿಲ್ಲ. ಇದರ ಮೇಲೆ ಭೂಭಾರಹರಣಕ್ಕಾಗಿ ಅವತರಿಸಿರುವ ಶ್ರೀಕೃಷ್ಣನ ಸಂಕಲ್ಪವನ್ನು ವ್ಯತ್ಯಾಸ ಮಾಡಲು ಯಾರಿಗೆ ಶಕ್ತಿಯಿದೆ. ಅವನ ಪ್ರೇರಣೆಯಂತೆ ನಡೆಯುವೆನೆಂದನು.

ಅಕ್ರೂರನು ಇದು ಕಳ್ಳವೇದಾಂತವೆಂದು ತಿಳಿದು ನಿನಗೆ ನೂರು ಮಂದಿ ಮಕ್ಕಳು ಇಲ್ಲವೆಂದೇ ತಿಳಿ ಎಂದು ಹೇಳಿ ಮಧುರೆಗೆ ಬಂದು ಆ ಸಂಗತಿಗಳನ್ನೆಲ್ಲಾ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ತಿಳಿಸಿದನು.

ಕೃತಜ್ಞತೆಗಳು

ಹೀಗೆ ದಶಮಸ್ಕಂಧದ 26ನೇ ಅಧ್ಯಾಯದಿಂದ ಆರಂಭಿಸಿ ಪೂರ್ವಾರ್ಧದೊಂದಿಗೆ ಪೂರ್ಣವಾಗುವ ವ್ಯಾಖ್ಯಾನಸಹಿತವಾದ ಈ ಶ್ರೀಮದ್ಭಾಗವತದಶಮಸ್ಕಂಧದ ಸಂಪಾದನಾ ಕಾರ್ಯವನ್ನು ಭಗವಂತನು ಪೂರ್ಣ ಮಾಡಿಸಿದ್ದಾನೆ. ಇದರ ಪುಣ್ಯವೆಲ್ಲವನ್ನೂ ಸಮಸ್ತಗುರ್ವಂತರ್ಗತ ತತ್ತ್ವಾಭಿಮಾನಿ ದೇವತಾಂತರ್ಯಾಮಿ ಭಾರತೀರಮಣ ಮುಖ್ಯಪ್ರಾಣಪತಿಯಾದ ಭಾಗವತ ಪ್ರತಿಪಾದ್ಯ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಅನಂತಾನಂತ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳೊಂದಿಗೆ ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾದ ಪರಮಪೂಜ್ಯ **ಶ್ರೀ ಶ್ರೀ 1008 ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರು** ಶಾಸ್ತ್ರೋಪದೇಶಗೈದು ಅಧ್ಯಾತ್ಮಿಕಸಾಧನೆಗೆ ತೊಡಗಿಸಿ, ವಿದ್ಯಾಪೀಠದಲ್ಲಿ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಶಾಸ್ತ್ರದ

ಪಾಠಪ್ರವಚನಗಳ ಮೂಲಕ ಶಾಸ್ತ್ರಸೇವೆಯನ್ನು ಮಾಡಿಸಿ ನಿರ್ವ್ಯಾಜವಾದ ಅಭಿಮಾನದಿಂದ ಅನುಗ್ರಹಿಸುತ್ತಿರು-ವರು. ಈ ಮಹಾಗುರುಗಳಿಗೆ ಅನಂತಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳ ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಯನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಶಾಸ್ತ್ರಗ್ರಂಥಗಳನ್ನು ಉಪದೇಶಿಸಿ ಸಾಧನ ಮಾರ್ಗದಲ್ಲಿ ತೊಡಗಿಸಿ ಸ್ವರೂಪೋದ್ಧಾರಗೈಯ್ದ ಸುಧಾವಿಶಾರದರಾದ ಶ್ರೀ ಗುತ್ತಲಾಚಾರ್ಯರಿಗೆ (ಶ್ರೀ ರಂಗಾಚಾರ್ಯ ಗುತ್ತಲ) ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಈ ಗ್ರಂಥಗಳ ಸಂಪಾದನೆಯ ಕಾರ್ಯದಲ್ಲಿ ನನ್ನನ್ನು ತಮ್ಮ ಜೊತೆಯಲ್ಲಿ ನಿಯೋಜಿಸಿ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿರುವ ಹಿರಿಯ ವಿದ್ವಾಂಸರಾದ ಪ್ರೊ. ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿಯವರಿಗೆ ಕೃತಜ್ಞತಾಪೂರ್ವಕ ನಮನಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ನನಗೆ ಈ ಸಾಧನಶರೀರವನ್ನಿತ್ತು ನನ್ನನ್ನು ಸಾಧನಮಾರ್ಗಕ್ಕೆ ತೊಡಗಿಸಿದ ಮಾತಾಪಿತೃಗಳಿಗೆ (ಶ್ರೀಮತಿ ಶಿಲಾಬಾಯಿ ಶ್ರೀ ಪ್ರಲ್ಹಾದಾಚಾರ್ಯ ಉಪಾಧ್ಯಾಯ) ನನ್ನ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ಕೊನೆಯಲ್ಲಿ ಸರ್ವಪ್ರೇರಕನಾದ ಮುಖ್ಯಪ್ರಾಣಪತಿ ಶ್ರೀಹರಿಯನ್ನು ಸ್ಮರಿಸಿ ಅವನ ಪರಮಪವಿತ್ರ ಚರಣ ಕಮಲಗಳಲ್ಲಿ ಅನಂತನಮನಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ವಿದ್ವದನುಚರಃ

ಕೃಷ್ಣಾಚಾರ್ಯ ಪ್ರ. ಉಪಾಧ್ಯಾಯ

दशमस्कन्धपूर्वार्धस्य विषयानुक्रमणिका

दशमस्कन्धस्य श्लोकानुक्रमणिका

क

द

प

ह

श्र